MSS No. 338A Subject PHILOSOPHY

Name of MSS निर्णय सिंधु

Author कमलाकर भट्ट

Period Folios 44

Script Sanskrit Source Prithi Pal Singh

Missing Folios 39-41

निर्णय सिन्धु
३६५ पत्रक ॥ ला० भ० १५पं०प्र०पृ०

ह० ला०



निर्णयसिन्धोस्सूचिः

२ २

२

3

३ ३

४

निर्णयसिंधोःसूचिः

४

निर्णयसिंधोस्सूचिः

5A

६ 6

निर्णयसिंधोःसूचिः

६

निर्णयसिंधोः सूचिः

8

निर्णयसिंधोः सूचि

प्रकरणम्	पत्रं	पंक्तिः
अथ पवित्रारोपणं	७१	१०
चतुर्दश्यां शिवपवित्रा	७१	१२
अधिवासः	७१	१३
पवित्रारोपणे गौणकालः	७१	१४
पवित्रलक्षणम्	७१	१६
शिवपवित्रम्	७१	२४
पवित्रकरणेऽधिकारी	७१	२६
पवित्राकरणे प्रायश्चित्तं	७२	२
देवविशेषपवित्रकालः	७२	३
शुक्लचतुर्दशी	७३	३
उपाकर्मकालः	७३	४
ग्रहणसंक्रमादौ उपाकर्मकालः	७३	२५
सिंहस्थार्के उपाकर्म	७४	२३
शुक्रास्तादौ प्रथमोपाकर्म	७५	३
मलमासे उपाकर्म न कार्यम्	७५	१०
उत्सर्जनकालः	७५	१२
अथ पितृजातिरात्रमनध्यायः	७८	१
स्त्रीकर्तृकस्वरज्ञोदोषाभावः	७८	३
रक्षाबन्धनम्	७८	४
अत्रैव हयग्रीवोत्पत्तिः	७८	१३
श्रवणाकर्म	७८	१५
अशून्यशयनव्रतम्	७९	२०
अथ भाद्रमासकृत्यं सिंहसंक्रमणम्	७८	२२
अथ गोप्रसवशान्तिः	७०	४
कुसचतुर्थी		
कज्जलतृतीया	७०	६
वहुला	७०	७
हलषष्ठी	७०	१२
शीतलाव्रतम्	७०	१३
जन्माष्टमी	७०	१४
जन्माष्टमीपारणकालः	८४	३
देवक्यादिप्रतिमापूजा	८४	२०
अमायां कुशग्रहणम्	८५	१६

१

निर्णयसिंधोः सूचिः

निर्णयसिंधोःसूचिः

निर्णयसिंधोःसूचिः

निर्णयसिंधोः सूचिः

13

निर्णयसिंधोःसूचिः

१२

15

निर्णयसिंधोः सूचिः

१४ १४ १४ १४

15

निर्णयसिंधोःसूचिः

16

निर्णयसिंधोःसूचिः

निर्णयसिंधोरनुक्रमणिका

निर्णयसिंधोस्सूचिः

१८

18

१८

19

निर्णयसिंधोस्सूचिः

२०

निर्णयसिंधोस्सूचिः

21

निर्णयसिंधोरनुक्रमणिका

२२

निर्णयसिंधोस्सूचिः

निर्णयसिंधोस्सूचिः

निर्णयसिंधोस्सूचिः

निर्णयसिंधोस्सूचिः

निर्णयसिंधोस्सूचिः

२६

२६ २६

२७

निर्णयसिंधोस्सूचिः

२७

निर्णयसिंधोः सूचिः

निर्णयसिंधोस्सूचिः

निर्णयसिन्धोःसूचिः

३.

३०

निर्णयसिंधोः सूचिः

३[illegible]

निर्णयसिन्धोस्सूचिः

निर्णयसिन्धोस्सूचिः

3A

३४

निर्णयसिंधोस्सूचिः

३४ ३४ ३४

35

निर्णयसिन्धोरनुक्रमः

निर्णयसिन्धोस्सूचिः

36

निर्णयसिन्धोस्सूचिः

निर्णयसिंधोःसूचिः

निर्णयसिन्धोरनुक्रमणिका

४९

48

निर्णयसिन्धोस्सूचिः

४१ ४२

43

॥ निर्णयसिन्धोः सूचिः ॥

४२

४२

४२

४२

निर्णयसिन्धोस्सूचिः

४८ प्रकरणम् ४८

४४

॥ समाप्तमिदं सूचीपत्रम् ॥

नि॰ सिं॰
१

1

ॐ स्वस्ति श्रीगणेशाय नमः श्रीसरस्वत्यै नमः श्रीगुरवे नमः कारुण्यैक
निकेतनं रामं सीतालतायुक्तं विश्वामित्रिच्छायायततति समालीढशाखिनं वं
दे १ लक्ष्मीसहायं कल्पद्रुतलरंजितं गोकुलं बर्हापीडं घनश्यामं महः किं
चिदुपास्महे २ वेदाद्यधर्मरक्षायै मायामनुजरूपिणं पितामहं हरिं वंदे महना
रायणाह्वयं ३ यत्पादसंस्मृतिः सर्वमंगलप्राप्तिभूमिता तान्नुमः भट्टरामकृ
ष्णाख्यान् श्रीतातचरणान्नुमः ४ सर्वकल्याणसंदोहनिदानं नित्यतद्वपे दु
नदीसोदरीमेवामुमाख्यां नौमि सादरं ५ विठुमाधवपादद्वंद्वरोलंबीकृत
विग्रहं ज्यायांसं भ्रातरं भट्टदिवाकरमुपास्महे ६ हेमाद्रिमाधवमते प्रवि
चार्य सम्यगालोच्य तांश्च मयतीर्थकृतां परेषां श्रीरामकृष्णतनयः कम
लाकराख्यः काले यथामति विनिर्णयमातनोति ७ सोऽतिपयाधि विद्वां
स संतन्विवं धात्रकोशः तथाप्यमुख्यवेदग्रंथीके चित्कविताङमीशाते तत्र
संदेहतः कालः षोढाब्दोपनमत्तुर्मासः पक्षो दिवस इति तत्राब्दो
माधवमते पंचधा सवनः सौर सांद्रो नक्षत्रो बार्हस्पत्य इति गुरो मे च्य

राम
१

IA

मराशिभोगेन बार्हस्पत्यः स च ज्योतिःशास्त्रे प्रसिद्धः हेमाद्रिस्त्वं चत्यग्नो धर्म
शास्त्रेनुपयोगान्नित्यत्वएवविधामाह तत्र वर्षमानैः सावनादि द्वादशमासैस्तत्र
द्वद्वे मलमासेनुसति षष्ठिदिनात्मक एव [illegible] एको मासः इति द्वादशमासत्वम
विरुद्ध तथा च व्यासः अब्दस्यान्तु दिवसैर्मासः कथितो बादरायणेनेति तत्र चांद्रो
ब्दः षष्टिभेदः तदाह गर्गः नारदश्च प्रभवो विभवः शुक्लः प्रमोदोथ प्रजापतिः अं
गिराः श्रीमुखो भावो युवा धाता तथेश्वरस्तथा बहुधान्यः प्रमाथी च विक्रमोथ वृ
षस्तथा चित्रभानुः सुभानुश्च तारणः पार्थिवो व्ययः सर्वजित्सर्वधारी च वि
रोधी विकृतः खरः नंदनो विजयश्चैव जयो मन्मथ दुर्मुखौ हेमलंबो विलं।
बो विकारी शार्वरी प्लवः शुभकृच्छोभनः क्रोधी विश्वावसुपराभवौ प्लवं
गः कीलकः सौम्यः साधारणो विरोधकृत् परिधावी प्रमाथी च आनंदो राक्ष
नलः पिंगलः कालयुक्तश्च सिद्धार्थी रौद्र दुर्मती दुंदुभी रुधिरोद्गारी रक्ताक्षः क्रो
धनः क्षयइति यद्यपि ज्योतिषे गुरोर्मध्यमराशिभोगेन प्रभवादीनां माघादौ प्र
वृत्तिरुक्ता तथापि प्रभवादीनां चांद्रत्वमप्यस्ति चांद्राणां प्रभवादीनां पंचके पंच के
युगे इति माधवोक्तेः तेन चांद्र प्रभवादिः चैत्रसिते प्रवर्तते बार्हस्पत्यस्तु माघा

दौ तयोर्विनियोगो ज्योतिर्निबंधे ब्रह्मसिद्धांते व्यवहारिकसंज्ञोयंकालः स्मृ
त्यादिकर्मसु योज्यः सर्वत्र तत्रापि जैवो वा नभसि दोषांतरे आर्क्षे वेलाः स्मरेत्सर्वत्र
कर्मादौ चांद्रं संवत्सरं सदा नान्यं यस्मात्वत्सरादौ प्रवृत्तिस्तस्य कीर्तितेति अय
नं तु सौरमेव तथात्मके सौरं त्रिंशतं प्रादेष्टमयनमिति दीपिकोक्तेः तच्च द्विविधम् य
दक्षिणमुत्तरं चेति कर्कसंक्रांति दक्षिणं मकरे त्वन्यत् अनयोर्विनियोगमाह मदन
रत्ने सत्यव्रतः देवतारामवाप्यादि प्रतिष्ठोदग्रवेरवौ दक्षिणमयने कुर्वन्न त
त्फलमवाप्नुयात् वैखानसः मातृभैरववाराहनरसिंहत्रिविक्रमाः महिषासुर
हंत्र्यश्च स्थाप्या वै दक्षिणायने वैशाखोच्यते ननु दक्षिणायन एवेति नियमः ए
वं च ने दक्षिणायने निषिद्धायादेवप्रतिष्ठायाः देवविशेषे प्रतिप्रसवमात्रात्
रत्नमालायां गृहप्रवेशत्रिदशप्रतिष्ठाविवाहचौलव्रतबंधपूर्वं सौम्यायने कर्म
शुभं विधेयं यद्गर्हितं तत्खलु दक्षिणे चेति अस्यापवादः काशीखंडे सदा कार्य
पुंगीचास्त्र सदाचारस्तत्तरायणे सदा महोदयश्चारस्त्र कार्यं नवसंतासतो इत्यय
नम् अथ तु मासः द्वयात्मा मलमासे तु मासः द्वयात्मक एको मासस्तेन मासद्वया
त्मकोत्र मवितत्र्द्ध सद्वेधा चांद्रः सौरश्च चैत्रारंभो वसंतादिश्चांद्रः मीनारंभो मे

बारंभो वा सौरः मीनमेषयोर्मेषवृषयोर्वा वसंत इति बौधायनोक्तेः अनयोर्वि
नियोगमाह ऋष्यशृंगः श्रौतस्मार्तक्रियाः सर्वाः कुर्याच्चांद्रमसर्तुषु तदभा
वे तु सौरर्तौ इति ज्योतिर्विदां मतं स द्विविधोपि बोध्यो वसंतो ग्रीष्मो वर्षाः शरद्धेमं
तः शिशिरश्चेति इति अत्र ऋतुः मासश्चतुर्धा सावनः सौरश्चांद्रो नाक्षत्र इति त्रिंशद्दि
नः सावनः अर्कसंक्रांतेः संक्रांत्यवधिः सौरः मासप्रसंगात्संक्रांतिनिर्णय उच्य
ते तत्र पूर्वतोपि परतोपि संक्रमात् पुण्यकालघटिकास्तु षोडशेति सामान्यतः
पुण्यकालः सर्वत्र विशेषस्तूच्यते अत्र सामकाः संग्रहश्लोकाः प्रागूर्ध्वं द
श पूर्वतः षडवनिस्तद्वत्पराः पूर्वतस्त्रिंशत्षोडश पूर्वतोथ परतः पूर्वापराः
स्युर्दश पूर्वाः षोडश पश्चाच्चोत्तरा राकृतभुवः पश्चात्तरव वेदाः पुनः पूर्वाः षोडश पश्चाच्चोत्तरा
पुनरथ पुण्यस्तु मेषादितः अत्र माधवः मेषे प्रागूर्ध्वं च दश घटिकाः पुण्यकालः
वृषे पूर्वाः षोडशाः मिथुने पराः षोडशाः कर्के पूर्वास्त्रिंशत् सिंहे पूर्वाः षोडशाः
कन्यायां पराः षोडशाः तुलायां प्रागूर्ध्वं दश वृश्चिके पूर्वाः षोडश धनुषि पराः
षोडश मकरे चत्वारिंशत्पराः इदं च हेमाद्रिमतेनोक्तं माधवमते त्वपरा विं
शतिः पुण्याः कुंभे पूर्वाः षोडश मीने परा षोडशेति वाच्यस्तु रात्रौ पुण्यतमो मयो

x कुंभे पूर्वाः षोडशाः मीनापराः षोडशाः २४

क्रमस्तायंभवेत्तस्या यदिसापिपर्वा पूर्वान्तयोः क्रियादिसाविभातिसाप्युत्तरा रात्रि
निषेधतः स्यात् पूर्वाह्ने निशीथाद्यदि संक्रमः स्यात्तदा पूर्वेह्नि पुण्यं परतः शेषेह्नि
रस्मात्सद्यपातद्वयमेव पुण्यं निशीथेक्षेत्तदिनद्वयं स्यात् कर्के मृगेष्वेवमिति
स्मृत्वाच हेमाद्रिस्तु रिस्मिन्नप्यपरार्कैः मृषः प्रदोषेयदिवार्द्धरात्रे परेह्नि पुण्यं
त्विय कर्कटस्तेत प्रभातकाले यदिवा निशीथे पर्वाह्नि पुण्यं त्विति माधवाचा
र्यैः अप्रत्रमूलवचनाभि माधवपरार्कहेमाद्र्यादिषु द्रष्टव्यानि सर्वासु संक्रां
तिषु दानाविशेषो हेमाद्रौ दानकांडे उक्तः विश्वामित्रः मेषसंक्रमणे भानोर्मे
षदानं महाफलं वृषसंक्रमणे दानं गवां प्रोक्तं तथैव च वस्त्रान्नपानदानानि
मिथुने विहितानितु घृतधेनुप्रदानं च कर्कटेपि विशिष्यते सस्वर्णं छत्रदानं तु
सिंहेपि विहितं सदा कन्याप्रवेशे वस्त्राणां वेश्मानां दानमेव च तुलाप्रवेशे तैला
नां गोरसानामथापीष्टं वृश्चिके चलिते भानौ दीपदानं महाफलं वृश्चिके चक्रिकः
धनुःप्रवेशे वस्त्राणां यानानां च महाफलं मृगप्रवेशे दारूणां दानमग्नेस्तथैव
च कुंभप्रवेशे दानं तु गवां मेवतृणस्य च मीनप्रवेशे स्थानानां माल्यानामपि चो
त्तममिति अथोपवासमाह हेमाद्रौ वोपस्तंबः अयने विषुवे चैव त्रिरात्रोपोषितो नरः

3A

स्नात्वा वा यस्त्वर्च्चयेद्भानुं सर्वकामफलं लभेत् अपरार्के तु वृद्धवसिष्ठः अयने संक्र
मे चैव ग्रहणे चन्द्रसूर्ययोः अहोरात्रोषितः स्नात्वा सर्वपापैः प्रमुच्यते अत्रोपवा
सः संक्रान्तदिने दानादि तु पुण्यकालदिने इत्याचार्यचूडामणिः विधिलाघवात्
पुण्यकालदिने एवोभयमिति हलायुधः इदं च पुत्रिगृहस्थातिरिक्तविषयं आदित्यह
निसंक्रान्तौ ग्रहणे चन्द्रसूर्ययोः उपवासो न कर्त्तव्यः पुत्रिणा गृहिणा तथेति जैमि
निवचनात् अत्र श्राद्धमुक्तं हेमाद्रौ विष्णुधर्मे श्राद्धं संक्रमणे भानोः प्रशस्तं पृथिवी
पते अपरार्केपि विष्णुः आदित्यसंक्रमणं विषुवे त्वयनद्वयं जन्ममभ्युदयश्च ए
तेषु श्राद्धकालास्ते काम्यानाह प्रजापतिरिति द्वादशादिदिने रवौ गायनौ चाप्रवृ
त्तावपि पूर्वोत्तरवत्क्रमयनग्रहणं अन्यथा संक्रमे लोसिद्धेरयनग्रहणं व्यर्थं स्यादि
त्यपरार्कः हेमाद्रावपि गालवः अयनांशकत्वेन कालेनैव स्फुटं भवेत् मकरकर्को
र्दिगो सूर्ये याम्योदगयने सति तदा संक्रान्तिकाले स्फुटं ज्ञा विष्णुपदादयः इति अथ
नोराशाब्रुतत्पृथे संक्रान्तिकाले विष्णुपदादयः पूर्वं तेन तेन तत्प्रयुक्तं पुण्यकालादि तत्रा
पि ज्ञेयमिति सत्वव्याख्यानं तच्च मेषायनं चयनायनमित्यादि सर्वत्र ज्ञेयं माधवीयेपि
जाबालिः संक्रान्तिषु यथा कालस्तद्वैवेत्ययने तथा अयने विंशतिः पूर्वा मकरे विं

4

* तद्द्वय

शतिपरेति कर्कपने पूर्वा विंशति घटिकाः पुण्याः मकरसंक्रांतौत्तु पश्चात् विंशतिः
पुण्याः अन्यायनेत्तसंक्रांतिनदितर्थेः विष्णुपादादिस्वरूपं च दीपिकायामुक्तं
स्यर्थिपिवृहवसिंहवृश्चिककुंभघटेष्वर्कस्य यः संक्रमः कन्यामीनधनुर्नृयुक्षु षडशीत्या
स्यात्तुलामेषयोः प्रोक्तो विषुवन्मृगेऽयनमुदक् कर्कटिके दक्षिणमिति स्थिरे
विष्णुपदं नरयुक्तमिथुनं अत्र च पिंडरहितं श्राद्धं कुर्यात् तथा चापरार्के मात्स्ये
अयनद्वितीये श्राद्धं विषुवद्वितये तथा संक्रांतिषु च सर्वासु पिंडनिर्वपणादृते
इति श्राद्धमूलपाणी तत्त्वस्यानिर्मूलत्वात् समूलत्वे ततः प्रभृति संक्रांतावुपरागा
दिपर्वसु त्रिपिंडमाचरेच्छ्राद्धमेकोद्दिष्टं मृतेऽहनीति मात्स्योक्ते ग्रहणागृह
णवद्विकल्प एवेत्याह त्रिपिंडमाचरेत् तत्र अस्य पार्वणानुवादत्वेन पिंडवि
धायकत्वात् पिंडोक्तिः अन्यथैकपदे पिंडानुवादत्वे विधौ च वषट्कर्तुः प्र
थमभक्षवत्प्रसक्तस्यापत्तेः मंगलकर्मणि विशेषमाह ज्योतिर्निबंधे नारदः त्याज्या
स्यर्द्धस्यसंक्रांतिः पूर्वतः परतस्तथा विवाहादिषु कार्येषु नाड्यः षोडश षोडश
एतत् पुण्यकालोपलक्षणं भानोः संक्रांतिभोगस्त्वकुलकस्यार्ध्यामकर इति
ज्योतिःप्रकाशे वर्ज्येषु परिगणनात् अयनव्यतिरिक्तासु दशासु संक्रांतिषु

4A

रात्रौ स्नानश्राद्धादिनकार्यं अर्द्धसंक्रमणे पुण्यमहः कृत्स्नं प्रकीर्तितं रात्रौ संक्रम
णे भानोर्दिनार्द्धं स्नानदानयोः अर्द्धरात्राद्धस्तस्मिन् मध्याह्नस्योपरि क्रिया ऊर्द्ध्वं सं
क्रमणे चोर्द्ध्वमुदयात् प्रहरद्वयं पूर्णे चेदर्द्धरात्रे तु यदा संक्रमते रविः प्राहुर्दिन
द्वयं पुण्यं मुक्त्वा मकरकर्कटाविति वृद्धवसिष्ठादिवचनैरहः पुण्यत्वोक्त्या रात्रौ
संक्रमणे भानोर्दिनां कुर्यात्तु तत्क्रियां पूर्वस्मात्परतो वापि प्रत्यासन्नस्य तत्फल
मिति विशिष्टवचनाच्चार्थाद्रात्रौ स्नानादिनिषेधप्रतीतेः यानि तु विवाहव्रत
संक्रांतिषु प्रतिष्ठाक्रतुजन्मसु तथोपरागपातादौ स्नाने दाने निशा शुभेति रा
हुदर्शनसंक्रांतिविवाहात्ययवृद्धिषु स्नानदानादिकं कुर्युर्निशि काम्यव्रतेषु
चेत्यादीनि विष्णुगोभिलादिवचनानि तानि मकरकर्कसंक्रांतिविषयाणि
णि मुक्त्वा मकरकर्कटाविति तयोर्दिवानुष्ठानस्य पर्युदस्तत्वादिति हेमाद्रि
माधवादयः वस्तुतस्तु प्रमुक्त्ववचनेन तयोर्दिनद्वये पुण्यत्वादेरेव पर्युदासा
न्मकरकर्कटयोरपि स्नानं दानं परेऽहनीत्यादिभिरहः पुण्यत्वोक्तेः अहः पुण्य
त्वानुपपत्त्या कल्प्यरात्रिनिषेधस्य च प्रत्यक्षरात्रिविधिना बाधात्सर्वसंक्रांतिषु
रात्रावनुष्ठानविकल्पः स च देशाचाराद्व्यवतिष्ठत इति युक्तः पंथाः अनयोस्तु व

त्कयोर्विरोधः श्रावणे मासि च वक्ष्यते ज्योतिर्निबंधे गर्गः यस्य जन्मर्क्षमासाद्य र
विसंक्रमणं भवेत् तन्मासाभ्यंतरे तस्य वैरक्लेशधनक्षयाः नगरस्तु रोरुहस्य वैरजनी
सिद्धार्थैलाधूसंयुतैः स्नानं जन्मर्क्षगते रविसंक्रमणे नृणां शुभदं हेमाद्रौ अत्रिश्चै(
द्वौ त्रियुग्मं स्याद्वात्रौ चेद्वासरद्वये संक्रांतिः पक्षिणी ज्ञेया दानाध्ययनकर्मसु यत्तु
जः संक्रांत्यां पक्षयोरंते द्वादश्यां श्राद्धवासरे सायंसंध्यां न कुर्वीत कुर्वंश्च पितृहा
भवेदिति कर्मप्रदेशान्वं व्यासोक्तेः सायं पुण्यकाले संध्यानिषेधमाहुस्तन्निर्मूलं (
अत्र च बहु वक्तव्यं विस्तरभीतेर्नोच्यते इति संक्रांतिनिर्णयः पक्षयुगजश्चांद्रो मा
सः स द्वेधा शुक्लादिरमांतः कृष्णादिः पूर्णिमांतश्च तथा च त्रिकांडमंडनः चांद्रोपि
शुक्लपक्षादिः कृष्णादिर्वेति च द्विधा शुक्लादेरारंभे देनत व्यवस्थामाह कृष्णपक्षादिकं
मासं नांगीकुर्वंति केचन येपीच्छंति न तेषामपीष्टो विंध्यस्य दक्षिणे इति विंध्यद
क्षिणे कृष्णादिनिषेधादुत्तरे तयोरभ्यनुज्ञा गम्यते तत्रापि शुक्लादिर्मुख्यः कृष्णा
दिर्गौणः रात्संवत्सरे चैत्रशुक्लप्रतिपद्येव चांद्रसंवत्सरारंभोक्तेः तदुक्तं दीपिका
यां चांद्रोब्दो मधुशुक्लगप्रतिपदारंभ इति न हि ये कृष्णादिमन्यंते तेषां वत्सरारंभो
भियते अतः शुक्लादिर्मुख्यः कृष्णादिना मलमासासंभवाच्च चंद्रस्य सर्वनक्ष

नि

5A

त्रभोगेन नाक्षत्रो मासः सावनादीनां लक्ष्मोक्तं हेमाद्रौ ब्रह्मसिद्धान्ते अमावास्या
परिच्छिन्नो मासः स्याच्चान्द्रमसस्तथा संक्रान्तियोगिमासाविभ्यां तथैवेन्दुभयोः अत्र
ब्राह्मणादीनां चनोनरेशायत्रकर्मविशेषवसंते ब्राह्मणोऽग्निमादधीतेत्यादिवन्मासा
उक्तलक्षणेनैतन्मार्गे नियम्यते न तु कर्मसर्वकर्मसु दर्शितत एवेति हव्यकव्ययोः सौ
रमेरणो वादिनिधनानियमवाहिपिलाघवतत्रैव तिथीनां सर्वकर्मसु मासवि
शेषविधेः सवनादीनां अन्द्राणुलोमादिपरत्वापत्तेरिति गुरुचरणाः ज्योतिर्गर्गः
सौरमासो विवाहादौ यज्ञादौ सावनः स्मृतः आब्दिके पितृकार्ये च चान्द्रो मासः प्र
शस्यते अत्र व्यासः गः विवाहव्रतयज्ञेषु सौरं मानं प्रशस्यते पार्वणे त्वष्टकाश्राद्धे
चान्द्रमिष्टं तथाब्दिके स्मृत्यन्तरे एकोद्दिष्टादि वार्षिकादौ गणनादौ सौरसावनौ
ज्योतिर्गर्गः आयुर्दायविभागश्च प्रायश्चित्तक्रिया तथा सावनेनैव कर्तव्या शत्रू
णां वाप्युपासना विष्णुधर्मे नक्षत्रसत्रमायण्यमिति चान्द्रो मासेन कुर्मा इग
णनाकेनेति वृद्धिरिति पितृकार्ये च कष्मादिं नेतेषु सादिमेव च विवाहादौ च सौरा
दिं मासे हव्येषु विनिर्दिशेत् अथ मलमासः तत्रैकमात्रे संक्रान्तिरहितः सितादिश्चां
द्रो [illegible] मलमासः एकसंक्रान्तिरहितस्य संक्रान्तित्वेन संक्रान्तिद्वयवत्त्वेन च भव

नि॰सिं॰
६

6

तीति मलमासो द्वेधा ऽधिकमासः क्षयमासश्चेति तदुक्तं काठकगृह्ये यस्मिन्
मासे न संक्रान्तिः संक्रान्तिद्वयमेव वा मलमासः स विज्ञेयो मासः स्यात्तु त्रयोदश इति सत्यव्रतो
पि राशिद्वयं यत्र मासे संक्रमेत दिवाकरः नाधिमासो भवेदेष मलमासस्तु केवलमिति
अधिकमासस्य कालनियममाह वसिष्ठः द्वात्रिंशद्भिर्गतैर्मासैर्दिनैः षोडशभिस्तथा
घटिकानां चतुष्केण पतत्यधिकमासकः इति एतच्च संभवार्थं न तु नियमार्थं अन्ये
षां षोडशादिनाधिकद्वात्रिंशन्मासानंतरं क्वचित्पक्षानियमेन पुलस्त्यादित्यभोगापत्तेः तेन न्यू
नाधिककालेपि मलमासप्राप्तेर्न दोषः अत एव मासे त्रिंशत्तमे भवेदिति माध
वीये वृद्धोक्ते क्षयस्यापि ज्योतिःशास्त्रे असंक्रांतमासोधिमासः स्फुटः स्याद्द्विसंक्रांतमासः
क्षयाख्यः कदाचित् क्षयः कार्त्तिकादित्रये नान्यतः स्यात्तदा वर्षमध्येधिमासद्वयं च
एकः क्षयात्पूर्वं परतश्चैकः स्यात् अधिमासद्वयं भवतीत्यर्थः अत्र विशेषमाह जाबालिः
मासद्वयेब्दमध्ये तु संक्रान्तिर्न यदा भवेत् प्राकृतस्तत्र पूर्वः स्यादधिमासस्तथोत्तर इति
उत्तर एव कालाधिक्येन सर्वस्मिन्नित्यर्थः यत्तु ब्रह्मसिद्धांते चैत्रादर्वाङ् नाधिमासः
परतोधिको भवेदिति यच्च ज्योतिःसिद्धांते घटकन्यागते सूर्ये वृश्चिके वाथ धन्वि
नि मकरे वाथ कुंभे वा नाधिमासो विधीयते इति तत्र वृश्चिकादिचतुष्टये मलमासे
सति पूर्वं तुलाकन्यागते सूर्ये स्यात् एवं भाव्यधिमासस्य कालाधिक्यान्निषेधो

६

6A

र्येनत्वाधिकमात्रस्यदशानां फाल्गुनादीनां प्रायो माघस्य च क्वचित् नपुंसकत्वं
भवतीत्येष शास्त्रविनिश्चय इति हेमाद्रौ विष्णुधर्मे विरोधात् मलमासेष्टकादि
निषेधानुपपत्तेश्च मकरे वाथ कुंभे वेति दृष्टांतार्थं प्राप्त्यभावात् क्षयस्यागमनका
लउक्तः सिद्धांतशिरोमणौ गतोब्ध्यद्रिनंदैर्मिते शाककाले तिथीशैर्भविष्यत्यथो
गाक्षसूर्यैः गजाद्र्यग्निभूमिस्तथा प्रायशोयं कुचेड्डैर्दुवर्षैः क्वचिद्गोकुभिश्चेति
अस्यार्थः चत्वारः अद्रयः सप्त नंदाः नव एषां प्रतिलोम्येन निपाते ९७४ नैर्मितैर्वर्षैः
क्वचित् क्षयमासः पूर्वं जात इत्यर्थः तिथयः पंचदश ईशाः एकादश ११५ ए
वमितिनिपाते क्वचित् भाविष्यतीत्यर्थः अंग ६ अक्ष ५ सूर्याः १२ एकत्र १२५६ ।
गजाः ८ अद्रयः ७ अग्नि ३ भू १ एकत्र १३७८ कु १ वेदाः ४ इंदुः १ एकत्र १४१ गा
वः ९ कु १ एकत्र १९ एतैर्मितैर्वर्षैर्जातं क्वचिद्भविष्यतीत्यर्थः अथ मलमा
से कार्याकार्यं निरूप्यते तत्र जाबालिः नित्यनैमित्तिके कुर्यात् श्राद्धं कुर्यान्म
लिम्लुचे तिथिनक्षत्रवारोक्तं काम्यं नैव कदाचन अयं च काम्यनिषेध आरंभस
माप्तिविषयः अस्य यथा नाम ये मासा नतेषु ममसंमतः व्रतानां चैव यज्ञानामा

७

रंभस्य समापनमिति निर्णयामृतेऽप्युक्तत्वात् गुर्वस्तत्वाद्यधिकमासादावत्वर्थः तत्र मंगलं न
पतेरवेरिति वचनात् काशीखंडे काम्यस्य त्वारंभसमाप्ती भवत एवेत्यादिरन्यत्र विस्त
रः काठकगृह्येपि मलेनन्यमगतिं कुर्यान्नित्यं नैमित्तिकीं क्रियामिति तानि नैमित्ति
कानि दीपिकायामुक्तानि यन्नैमित्तिकमप्यनन्यगतं गर्भाधानसवनवास्तवासस्का
दिविनोपनेरपि पुनः प्रोक्तं प्रतिष्ठादिकमिति गार्ग्यं तत्र यत्नतः सोमादिहेयमेव तत्र क
र्त्तव्यानि उक्तानि कालदर्शे सूद साहसपिंडांतकर्मग्रहणजन्मनोः सीमंतेपुंसवेष्व
दंदावेतो जातकर्मेव रोगे शांतिरलभ्ये च योगे श्राद्धं स्नानानि च प्रायश्चित्तं निमित्त
स्य वशात् सर्वे परेच अब्दोदकुंभमन्वादिमहालययुगादिषु श्राद्धं दर्शे व्यवहारहः
श्राद्धमन्वादिमासकं मलिम्लुचान्यमासेषु मृतानां श्राद्धमाब्दिकं श्राद्धं न पूर्वं द
र्शेषु तीर्थे वेवयुगादिषु मन्वादिषु यद्दानं दानं दैनं दिने चयत् तिलगोभूहिरण्या
नां संध्योपासनयोः क्रिया पर्वहोमश्चाग्रयणं साग्नेरिष्टिश्च पर्वणि नित्याग्निहोत्र
होमश्च देवतातिथिपूजनं स्नाने च स्नानविधिनाप्यभक्ष्याये पवर्ज्यनं तर्पणं चानि
मित्तस्यानित्यत्वादुभयत्रापीति एतौ पुंसवसीमंतौ एतच्च गर्भाधानाद्यन्नप्राशनां
तसंस्कारोपलक्षणं तदुक्तं दीपिकायां गर्भाधानमुखं च चोलविधिनः प्रागन्नात्
यागं विनाकृष्ण यागयणं गजेंद्रपुत्रः छायामघानां गयोस्ती थैंद्र्क्षययोश्च पित्र्यमपि

7A

केमासे च मायाचरेदिति अलभ्ये योगे औदयपमकादौ काम्यान्यपि कृतादीनि
कार्याणीत्यर्थः एवं परत्र मलेप्युक्तं चेत्यर्थः महालयराकौ नमयात्र योदयवुच्य
नेदति माधवः दर्शश्राद्धं मलेपि कार्यं यत्तु अरव्यश्रगः संवत्सरातिरिके एकमासो
यः स्यात् मलिम्लुचः तस्मिंस्त्रयोदशे श्राद्धं न कुर्यादिंदुसंक्षये इति तत् काम्यदर्श
[illegible] विषयं काम्यं नैव कदाचनेति वचनात् दर्शे च काम्यं श्राद्धं कन्यावेदिन
श्रेत्यादिना यानुवक्तं नोक्तं नित्यं तु मलेपि भवत्येव दर्शोप्यहरहः श्राद्धं दानं च प्र
तिवासरं गोभूतिलहिरण्यानां मासेपि स्यात् मलिम्लुचे इति मात्स्योक्तेरिति हेमा
द्रिप्रभृतयः दिवोदासीयेपि अनिंद्यरिंदुपर्णोनच हारिवारो बुधाष्टमी नाधिमासे प
रित्याज्याः सीमंतान्नप्राशने [illegible] इति अनिंद्यदर्शः द्विविधिमध्यमा श्राद्धं न कार
ये [illegible] त्वपरार्कः तत्र यदि हि तं कर्म उत्तरे मासि कारयेदित्युक्तेः [illegible]
सेरिति [illegible] मासकरणोपि शास्त्रार्थोपपन्नो दर्शश्राद्धं मलेन कार्यमिति प्राचीनगो
डाः [illegible] संवत्सरप्रदीपेपि एकराशिस्थिते सूर्ये यदा दर्शद्वयं भवेत्
दर्शश्राद्धं तदा दोस्यान्नपरं तु मलिम्लुचे [illegible] अत्र व्यवस्था यद्यपि कालो
दर्शे [illegible] मासद्वये कार्यमित्युक्तं तथापि हेमाद्रिमाधवापरार्कादि

8

मृतानां प्रथमवार्षिकं मलमासे द्वितीयाद्याब्दिकं तु शुद्धमास एव कार्यं ।
अत्र संक्रान्तेऽपि कर्तव्यमाब्दिकं प्रथमं द्विजैः तथैव मासिकं श्राद्धं सपिंडीकरणं त
थेति सत्यव्रतोक्तेः आब्दिकं प्रथमं यत्स्यात्तत्कुर्वीत मलिम्लुचे चतुर्दशे तु संप्राप्ते
कुर्वीत पुनराब्दिकमिति स्मृत्यंतरोक्तेश्च पुनराब्दिकं द्वितीयादिवार्षिकं त्रयो
दशो मासेतीते चतुर्दशात्मदिने कुर्यादित्यर्थः पतृसत्यव्रतः वर्षे वर्षे तु यच्छ्रा
द्धं मातापित्रोर्मृतेहनि मलमासे न तत्कार्यं व्याघ्रस्य वचनं यथेति तत्र द्वितीया
दि वार्षिकविषये आब्दिकं प्रथमं यत्स्यात्तत्कुर्वीत मलिम्लुचे इति प्र
तीतेवचनात् यत्र द्वादशमासिकं शुद्धमासे भवति तत्र त्रयोदशेऽधिके एवाद्या
ब्दिकं कार्यं यत्र त्वधिकमध्ये द्वादशं मासिकं तत्र तस्य द्विरावृत्तिं कृत्वा चतुर्दशे
शुद्ध एव प्रथमाब्दिकमिति निष्कर्षः तेन द्वितीयादि शुद्धः मास एव पृथ्वी
चंद्रोदये दिवोदासीये मदनपारिजाते चैवं मलमासमृतानां तु यदा स एवा
धिकः स्यात्तदा तत्रैव कार्यं यथाह पैठीनसिः मलमासे मृतानां तु श्राद्धं यत्प्र
तिवत्सरं मलमासेऽपि कर्तव्यं नान्येषां तु कथंचनेति यत्तु वृद्धवसिष्ठः प्रा
प्तियाहानि संप्राप्ते अधिमासो भवेद्यदि मासद्वयेऽपि कुर्वीत श्राद्धमेवं न मुह्य

8A

ति पक्षमासः उत्तरे देवकार्याणि पितृकार्याणि चोभयोरिति तन्मासिकादि
विषये योगादिकं मासिकं च श्राद्धं चैव मासद्वयेपि [illegible]क्षिकं मन्वादिकं नैमित्तिकं।
च कुर्यान्मासद्वयेपि चेति स्मृतिचंद्रोक्तेः नैमित्तिकं तीर्थश्राद्धं तच्च मासद्वयेपि
कार्यमिति त्रिस्थलीसेतौ भट्टाः केचित्तु प्रतिमासं मृताहे च श्राद्धं यत्प्रतिवत्स
रं मन्वादौ च युगादौ च तन्मासे उभयोरपीति मरीचिवचनात् वर्षे वर्षे तु यच्छ्राद्धं
मातापित्रोर्मृते हनि मासद्वयेऽपि तत्कुर्यात् व्यासस्य वचनं यथेति गालवोक्ते
श्च प्रत्याब्दिकं मासद्वये कार्यमित्याहुः तन्न प्रतिमासं मृताहे क्रियमाणं
मासिकं प्रतिसंवत्सरं क्रियमाणं कन्यादिश्राद्धमिति मरीचिवचसो मद
नरत्नेन व्याख्यानात् गालवीयस्य च मासद्वयात्मके क्षयमास इति माधवे
न व्याख्यानात् पक्षकेष्विष्टं प्रथमाब्दिकं मासद्वये कार्यं श्राद्धिकं प्रथमं
यत्स्यात्तत्कुर्वीत मलिम्लुचे त्रयोदशे च संप्राप्ते कुर्वीत पुनराब्दिकमिति यमो
क्तेरिति तदपि चिंत्यं पुनराब्दिकं द्वितीयाब्दिकं वा। र्षिकं त्रयोदशे तीते चतुर्दशे कु
र्यात् अन्यथा संवत्सरं न व्यर्थं न श्राद्धं तत्र मृतेहनीति पौठीनसि विरोधः स्या

दिनिहेमाद्रौ पृथ्वीचंद्रोदये च एतेन वर्षे तन्न हि द्वियाब्देऽपि कुर्यादेवेत्यनं
तभट्टव्याख्यामानाभावात्परास्ता पूर्वोक्तव्याख्यायां तु हारीतेव प्रथमग्रहणा
मेव मानं यदपि निर्णयामृते पूर्वोक्तकालादर्शवचनात् मलमासे श्राद्धदिन
स्य वंध्यत्वनिरासार्थे पितृद्देशेन ब्राह्मणान् भोजयेत्वाब्दं मासे सपिंडकं श्रा
द्धं कुर्यात् पिंडवर्जं मसे संक्रांते संक्रांतौ सपिंडसंयुतं प्रतिसंवत्सरं श्राद्धमेवं
मासद्वयेऽपि चेति पृथ्वीपाराशरोक्तिरिति तदपि चिंत्यं पूर्वोक्तवचनस्य क्षयपूर्व
मासाधिकमासविषयत्वात् तत्रैव मासद्वये श्राद्धमुक्तं तदाह सत्यतपाः एक एव य
मासः संक्रांतिद्वयसंयुतः मासद्वयगतं श्राद्धं मलमासेऽपि शस्यते इति मासद्व
यगतं पूर्वसंक्रांतिगतं क्षयगतं च मलमासे क्षयमासे अविशेषात् तत्सर्वाधि
मासे चेति हेमाद्रिः दीपिकापि तत्साक्षात् संक्रमयधिमासको यदि भवेत्तत्रान्यसं
क्रांतौ तस्मिन् श्राद्धं नृपाक्षये च वचनात् कुर्यात् द्वयोः कोविद इति कालदर्शेऽप्ये
तदिष्टं मयैवेत्युक्तं कृत्वा मलमासवर्ज्यान्युक्तानि कालदर्शे अग्नित्यमनु
नेते च दाने च महादानादिके अग्न्याधानाध्वरापूर्वतीर्थयात्रामरेश एं

१

रि

राम
५

9A

देवारामतडागादिप्रतिष्ठा मौंजीबंधनं आश्रमस्वीकृतिः काम्यवृषोत्सर्ग
निष्क्रमः राजाभिषेकः प्रथमश्रावणाकर्मसु तान्येव अन्नप्राशनमारंभो गृ
हारंभं च प्रवेशनं स्नानं विवाहो नामाभिपन्नं देवमहोत्सवः व्रतारंभसमाप्ती च
काम्यं काम्यं च पापानां प्रायश्चित्तं तु सर्वस्य मलमासे विवर्जयेत् उपाकर्म्मो
त्सर्जनं च पवित्रदमनार्पणे अवरोहश्च हेमंतः सर्पाणां बलिरष्टकाः ईशानस्य
बलिर्विष्णोः शयने परिवर्त्तने दुर्गेंद्रस्थापनोत्थाने ध्वजोत्थाने च वज्रिणः
एवं च प्रतिष्ठापरत्वात् देवकर्मेति अत एव मलवचनान्नि हेमाद्रिमाधवादि
भिर्ज्ञेयानि दिवोदासीये च यात्रोत्सवं देवादिशपथं दिव्यमेव च मलमा
से न कुर्वीत व्यासस्य वचनं यथेति अत एव निर्णयः क्षयमासेपि ज्ञेयः रवि
संक्रमहीने योवर्ज्यावर्ज्यविधिः स्मृतः स एव तु द्विसंक्रांते मलमासेप्युदी
रित इति काठकगृह्योक्तेः क्षयमासस्य ज्ञानं ग्रन्थान्तरे विशेषो हेमा
धै द्रौ तिथ्यर्द्धे प्रथमे पूर्वो द्वितीये र्द्धे तयोत्तरः मासाविति बुधैश्चिंत्यौ क्ष
यमासस्य मध्यगौ आह्निकं वद्धर्औपने पि ज्ञेयं यन्मलमासे वर्ज्यमुक्तं त

शुक्रगुर्वोरस्तादि स्पष्टं ज्ञेयं तथा बृहस्पतिः वालेवा यदि वा वृद्धे शुक्रे वा
स्तंगते गुरौ मलमासइवैतानि वर्जयेद्देवदर्शनमिति तथा अनादिदेवता
नदृष्टाश्रवः स्नानं भार्गवे मलमासेप्यनावृत्ततीर्थयात्रां विवर्जयेत् १
आवृत्ततीर्थे दोषाभावमात्रं न तु फलमिति वाचस्पतिमिश्राः तन्न असति।
बाधके फलहेतुत्वाच्चाशौचेः लल्लोपि नीचस्थे वक्रसंस्थे प्यतिचरणगते वालवृ
द्धास्तगे वा संन्यासो देवयात्राव्रतनियमविधिः कर्णवेधस्तु दीक्षा मौंजीबं
धोंगनानां प्रतिगमनविधिर्वास्तुदेवप्रतिष्ठा वर्ज्याः सद्भिः प्रयत्नात्त्रिदशप
तिगुरौ सिंहराशिस्थिते चेति दीक्षा यागदीक्षा नत्वागमदीक्षा तथा उपा
नचूडान्नबंधदीक्षा विवाहयात्रा च वधूप्रवेशः तडागकूपत्रिदशप्रति
ष्ठा बृहस्पतौ सिंहगते न कुर्यात् दिवोदासीये गुर्वादित्ये गुरौ सिंहे नष्टे
शुक्रे मलिम्लुचे गृहकर्म व्रतं यात्रां मनसापि न चिंतयेत् अस्यापवादः
मघैव त्याज्या मंडने चोपवासं च गौतम्यां सिंहगे गुरौ कन्यागते तु कृष्णायां
न तु तत्तीरवासिनां तथा आद्यांशमागौतमी गंगा द्वितीयां जाह्नवी स्मृता स

10A

वैनाशिकफलंस्नानाद्गौतम्यांसिंहगेगुरौ संहितापुस्तीये स्यात्सप्तरात्रंगुरुस्तम्
स्तयोश्च बालत्वमष्टौ दशकंचवार्द्धं ह्यष्टौ सितेस्याद्यसप्तभो शिशुत्वेशस्तोयत
स्तावुपचीयमानो वशिष्ठः अस्तंचारगतेजीवेवर्जयेत्तदनंतरं स्तो दृत्तादिकार्य
सु अष्टाविंशतिवासरान् वात्स्यादिलक्षणमुक्तं ब्रह्मसिद्धांते रविणाशक्ति
रन्येषांग्रहाणामस्तउच्यते ततो वागवार्धके प्रोक्तमष्टर्धवाल्यप्रकीर्तितमिति ।
वाल्यादिपरिमाणं चब्रह्मशाते वालः पश्चात्प्रोदिवसदशकं पंचकंचैववृद्धः पश्चा
दष्टौ त्रितयमुदितः पक्षमेष्टौ क्रमेण जीवो वृद्धः शिशुरपितथापक्षमन्यैः शिशुः
तो वृद्धो प्रोक्तो दिवसदशकंचापरैः सप्तरात्रं पश्चिमत उदये दशादिनादि वालः अस्ते
पंचदिनानि वृद्धः पूर्वेतो दिनत्रयंवालः पक्षंचवृद्धः इत्यर्थः जीवो गुरुः अन्यत्र
त्वान्यतयोक्तं प्राक्पश्चादुदितमुक्तः पंचसप्तदिनेशिशुः विपरीतेपि वृद्ध त
त्वंतद्वदेवगुरोरपीति एषांचपक्षाणांव्यवस्थामाहमिहिरः वहवोदर्शिता
कालाद्येवाल्येवार्धकेपिवागताप्राप्तत्राधिकाः शेषादेशभेदादुगतायदीति
देशभेदस्य मदनरत्नेगार्ग्यः भृगोर्गुरुः प्राक्चपराक्चवालोविंध्येदशा

वंति षसप्तरात्रं वं॰ मुहूर्तोवूचवद्ध्वदेशोत्रिदनवदंतीति अस्मादेरपवादः काशी
खंडे नमस्तानोस्मकान्तो दोषो विश्वेश्वरालये त्रिस्थलीसेतौवायवीये गोदाव
र्यां गयायां च श्रीशैले ग्रहणद्वये सुरासुरगुरूणां च मौढ्यदोषो न विद्यते ग्रहण
द्वये तन्निमित्तककृत्ये त्र्ययात्रासानांवित्यर्थः तदाहत्रिस्थलीसेतौ लल्लः उपप्ल
वेषीनलभानमान्धोरधौद्वये वैकापिला रव्यषक्ष्मांसुरासुरेज्यास्तमयेपितीर्थयात्रा
विधिः सक्रमणेचरास्तः इत्यलं बहुना मलमासे च व्रतविशेष उक्तो हेमाद्रौ पाद्मे
अधिमासे तु संप्राप्ते गुडसर्पिर्युतानि च त्रयस्त्रिंशदपूपानि दातव्यानि दिने दिने सा
ज्यानि गुडमिश्राणि अधिमासेन्ययोत्तम अधिमासे तु संप्राप्ते च त्रयस्त्रिंशत्तु देव
ताः उद्दिश्याप्यूपदानेन पृथ्वीदानफलं लभेत् त्रयस्त्रिंशदपूपान्नं कांस्यपात्रे
निधाय च सघृतं सहिरण्यं च ब्राह्मणाय निवेदयेत् विष्णुरूपी सहस्रांशुः स
र्वपापप्रणाशनः अपूपान्नप्रदानेन मम पापं व्यपोहतु नारायण जगद्बीजभा
स्कर प्रतिरूपक व्रतेनानेन पुत्रांश्च संपदं चाभिवर्द्धय यस्य हस्ते गदाचक्रे गरु
डो यस्य वाहनं शंखः करतले यस्य स मे विष्णुः प्रसीदतु कलाकाष्ठादिरूपेण

11A

निमेषघटिकादिना यो वंचयति भूतानि तस्मै कालात्मने नमः कुरुक्षेत्रसमं
देशः कालः पर्व द्विजो हरिः पृथ्वीसममिदं दानं गृहाण पुरुषोत्तम मलानां
च विशुध्यर्थं पापप्रशमनाय च पुत्रपौत्रादिवृध्यर्थं तव दास्यामि भास्कर मंत्रे
णानेन यो दद्यात् त्रयस्त्रिंशतमपूपकान् प्राप्नोति विपुलां लक्ष्मीं पुत्रपौत्रादिसंपद
इति इति श्रीकमलाकरभट्टकृते निर्णयसिंधौ मासमलमासनिर्णयः १
पक्षनिर्णयस्तु दैवे मुख्यः शुक्लपक्षः कृष्णः पित्र्ये विशिष्यत इति माधवेनोक्तः
अथ तिथिनिर्णयः तत्र तिथिर्द्वेधा शुद्धा विद्धा च दिने तिथ्यंतरसंवेधरहिता
शुद्धा तद्रहिता विद्धा तत्र शुद्धायामसंदेहाद्विद्धा निर्णीयते तत्र सामान्यतो वेधमाह
माधवीये पैठीनसिः पक्षद्वयेपि तिथयस्तिथिं पूर्वां तथोत्तरां त्रिभिर्मुहूर्तैर्विध्यं
ति सामान्योयं विधिः स्मृत इति हेमाद्रिमदनरत्नादौ तु त्रिमुहूर्तापि उक्तः उदिते
दैवतं भानौ पित्र्यं चास्तमिते रवौ द्विमुहूर्तं त्रिरह्नश्च सा तिथिः हव्यकव्ययोरिति वि
ष्णुधर्मोक्तेः द्विमुहूर्तत्वे चानुकल्पः द्विमुहूर्तापि कर्तव्या या तिथिर्वृद्धिगामिनी
ति दक्षस्मापि शाठ्योक्तेः अयं वेधः प्रातरेव सायं तु त्रिमुहूर्तवेध एव यानि तिथिस

मत्र प्राप्ययात्त्वंत्प प्रनीयते सा तिथिस्तद्दिने प्रोक्ता त्रिमुहूर्त्तैव या भवेदिति स्कांदो
क्तेः दीपिकायां त्रिमुहूर्त्तगा नु सकला साये इति याज्ञ व्रतोपवासस्नानादौ घ
टिकैकापि या भवेत् उदये सा तिथिर्ग्राह्या विपरीता तु पैत्रके इत्यादीनि स्कंदादि
वचनानि तानि वैष्णवराधिकरणन्यायेनावयवस्तुत्या त्रिमुहूर्त्तप्रशंसापराणि
तिथिविशेषे वेधविशेषः स्कांदे नागो द्वादशनाडीभिर्दिक् पंचदशभिस्तथा ।
भूतोष्टादशनाडीभिर्दूषयंत्युत्तरां तिथिमिति अयं चोपवासातिरिक्तविषय
इति वेधः तत्र सर्वा तिथिर्द्वेधा कर्मकालव्यापिनी सैव ग्राह्या कर्मणो य
स्य यः कालस्तत्कालव्यापिनी तिथिः तया कर्माणि कुर्वीत ह्रासवृद्धी न का
रणमिति विष्णुधर्मोक्तेः दिनद्वये तद्व्याप्तावव्याप्तावेकदेशव्याप्तौ वा युग्मवा
क्यान्निर्णयः तस्य सर्वापवादत्वेनोपपत्तेः युग्मवाक्यं तु निगमः युग्माग्नियुग
भूतानि षण्मुन्योर्वसुरंध्रयोः रुद्रेण द्वादशी युक्ता चतुर्दश्या च पूर्णिमा प्रति
पद्यप्यमावास्या तिथ्योर्युग्मं महाफलं एतद्व्यस्तं महादोषं हंति पुण्यं पुरा

× कर्मकालस्य प्रधानांगत्वाच्च ३४

12A

कृतमिति अत्र रंध्रांताः शब्दाद्द्वितीयादिनवम्यंततिथिवाचकाः रुद्र एका
द्वितीयातृतीयायुता सा च द्वितीयायुक्तेति समयुग्मानीत्यर्थः इदं च शुक्लपक्षे
अमाप्रतिपद्युग्मस्य पूर्णिमायामप्युक्तत्वे च सत्त्वात् इति केचित् तच्चेत्तमाप्रतिपद्युग्मा
त्कृष्णपक्षस्त्रिंगात्पक्षद्वयपरमिदं तत्र विशेषवाक्यैः कृष्णेतिथिविशेषेयो यत इति
दशमी नवम्याकामुपरा लसमुच्चये संपूर्णा दशमी कार्या मिश्रिता पूर्वया यथवेति संपूर्णे
शुक्लपक्षे त्रयोदशी तु स्कंदमंतनतोक्ता त्रयोदशी तु कर्तव्या द्वादशी सहिता मुने
इति कृष्णपक्षे त्वापस्तंबः प्रतिपत्सद्वितीया स्याद्वितीया प्रतिपद्युता चतुर्थी सं
युता याच सा तृतीया फलप्रदा पंचमी च प्रकर्तव्या षष्ठ्या युक्ता च नारद कृष्णपक्षेष्ट
मी चैव कृष्णपक्षे चतुर्दशी पूर्वविद्धा प्रकर्तव्या परविद्धा न कुत्रचित् दशमी च
प्रकर्तव्या सा दुर्गा द्विजसत्तम अष्टमी मिश्रमावास्या कृष्णपक्षे त्रयोदशी एताः प
रयुताः पूज्याः पराः पूर्वेण संयुता इति पद्मपुराणे खर्वो दर्पस्तथा हिंसा त्रि
धं तिथिलक्षणं खर्वदर्पौ परौ पूज्यौ हिंसा स्यात्पूर्वकालिकीति खर्वः सा

स्यंदर्शोन्नद्धिः तयोः परा हिंसाभयस्तत्र पर्वैवेत्यर्थः एतच्छ्राद्धादिविषयं द्वितीया
दिषु युग्मानां प्रत्यक्षनियमादिषु एकोद्दिष्टादि तु श्राद्धे ह्रास तु श्राद्धे चोदनेति
व्यासोक्तेः नियमादिषु व्रतदानादिदैवकर्मसु एकोद्दिष्टादिनिषेधे श्राद्धादिवि
त्यर्थः कर्मकालव्याप्त्यभावेन कर्मोपक्रमकालगैव ग्राह्या कर्मोपक्रमका
लगा तु कालनिर्णयात्यानयुग्मादर प्रतिदीपिकोक्तेः यां तिथिं समनुप्राप्य
उदयं याति भास्करः सा तिथिः सकला ज्ञेया दानाध्ययनकर्मसु इत्यादीनि तानि
त्रिमुहूर्तादिसत्तिरिति निर्णयदीपोक्ति अथैकभक्तं तत्कालः पाद्मे मध्याह्नव्या
पिनी ग्राह्या एकभक्ते सदा तिथिरिति मध्याह्नश्च पंचधाभक्तदिनस्य तृतीयांशः तेन
यद्यपि द्वादशदंडानंतरं प्राप्यते तथापि दिनार्द्धं समयेऽतीते भुज्यते नियमेन यत्
एकभक्तमिति प्रोक्तमतस्तस्याद्दिवैव हीति स्कांदोक्तेः षोडशसप्तदशादिदंडा मुख्यः
कालः दीपिकायां तु मध्याह्नं त्वदले त्रिभागादिवसे स्यादेकभक्तमिति ततः (
सूर्यास्तपर्यंतं गौणः दिवैव हीत्यस्यैव सर्वथाप्राप्त्यैतत्परत्वात् अत्र पर्वद्वयव्या
प्तावुभयोर्वा व्याप्तिस्तदभावो वा व्याप्तिस्तत्रापि साम्यं वैषम्यं वेति षट् पक्षाः तत्रा

द्वयोः संदेह एव तृतीये तु पूर्वेद्युर्गौणमुख्यव्याप्तेः सत्वात्पूर्वैवेति माधवः ।
पुरुषवाक्यान्निर्णयः इति हेमाद्रिः चतुर्थपक्षे पूर्वैव गौणकालव्याप्तेः सत्वात् वैष
म्ये गौणव्याप्तौ याधिका सा ग्राह्या साम्ये पूर्वा अयं च सर्वत्र एकभक्ते निर्णयः अ
न्यांगे उपवासप्रतिनिधौ तदनुसारेण निर्णयः अथ नक्तं तच्च दिनानशनपूर्वं
रात्रिभोजनं तत्र प्रदोषव्यापिनी ग्राह्या प्रदोषव्यापिनी ग्राह्या तिथिर्नक्तव्रते सदेति व
त्सोक्तेः प्रदोषस्तु त्रिमुहूर्त्तं प्रदोषः स्याद्भानोवास्तंगते सति नक्तं तत्र तु कर्त्तव्यमिति ।
शास्त्रविनिश्चय इति मदनरत्ने व्यासोक्तेः तत्रापि तिथिद्वैधे परं कार्य्यं सायंसंध्या त्रि ।
घटिकास्तमयादुपरि भास्वत इति स्कांदोक्तेः संध्याकाले तत्र चत्वारि मानि कर्माणि सं ।
ध्यायां परिवर्जयेत् आहारं मैथुनं निद्रां स्वाध्यायं च चतुर्थकमिति मार्कंडेयेन भो
जननिषेधात् मुहूर्तोनं दिनं नक्तं प्रवदंति मनीषिणः नक्षत्रदर्शनान्नक्तमहं मन्ये ग
णाधिप इति माधवीये भविष्योक्तेश्च गौणस्तु प्रदोषोस्तमयादूर्ध्वं घटिकाद्वयमिष्य
ते इति वत्सोक्त प्रदोषः संध्यात् तेजःपरिहानिवशाद्भानोरर्धोदयं यावदिति वत्सो ।
क्तेरित्याहुः तन्न अस्य संध्यावंदनानध्यायादिपरत्वात् अत एव तत्र रवेः समस्य सं ।

षष्ठाद्यमुक्तं विज्ञानेश्वरेण यच्च मदनरत्ने नक्तं वैधत्वाद्रागप्राप्तभोजनगोचरो
निषेधस्तमुक्तं तन्न विधेर्निषेधाविरोधात् अन्यथा कपिंजलानित्यत्रत्रिभ्यो
धिकानां हिंसनं स्यात् सायंकालेन नक्तं तु दिनद्वये प्रदोषस्पर्शे ज्ञेयं अन्यथा त्वे
परत्र स्यादस्तादर्वाग्यतो हि सेति जाबालिवचनात् प्रदोषव्यापिनी तस्या दिवा नक्तं
विधीयते आत्मनो द्विगुणां छायां मंदीभवति भास्करे तन्नक्तं नक्तमित्याहुर्न नक्तं निशि
भोजनमिति स्कांदाच्च यत्यादीनामपि सायाह्ने नक्तं नक्तं निशायां कुर्वीत गृहस्थो।
विधिसंयुतः यतिश्च विधवा चैव कुर्यात्तत्सदिवाकरमिति माधवीये च स्मृत्यंत
रात् इदमपुत्रविधिरोपलक्षणं पुत्रवत्तस्तु रात्रावेव अनाश्रमी आश्रमी स्यादप।
त्नीकोपि पुत्रवानिति संग्रहोक्तेः सौरनक्तं दिवैव त्रिमूर्तस्यगे वाह्नि निशि चैताव
तीतिथिः तस्यां सौरं भवेन्नक्तमहन्येव तु भोजनमिति सुमंतूक्तेः हरिनक्ते विशेषः
कालादर्शे स्कांदे उदयस्था सदा पूज्या हरिनक्ते त्वनेन तिथिरिति अन्यनक्तं तु संक्रां
त्यादावपि रात्रावेवानिषेधस्य रागप्राप्तभोजनगोचरत्वेन वैधावाधकत्वात्
दिनद्वयव्याप्तौ परा उभयोर्मदिवातिथ्योः प्रदोषव्यापिनी तिथिः तत्रोत्तरत्र न।

14A

क्तं स्यादुभयत्रापि स्नायत इति कालादर्शे जाबालिवचनात् अन्यपक्षेषु एकभ
क्तवन्निर्णयः अत्र विशेषो मदनरत्ने गारुडे हविष्यभोजनं स्नानं सत्यमाहारलाघ
वं अग्निकार्यमधःशय्यां नक्तभोजी षडाचरेत् अग्निकार्यं व्याहृतिहोमः इति न
क्तं अयाचिते तु विशेषवचनाभावादुपवासवन्निर्णयः अथ नक्षत्रव्रतकालः र
विस्तु यर्क्षे उपोषितव्यं नक्षत्रं यस्मिन्नस्तमयाद्रविः युज्यते यत्र वा तारा निशीथे
शशिना सहेति माधवीये स्कांदे तत्रैवोपवसेदृक्षे यन्निशीथाद्धो भवेत् उ
पवासेयदृक्षं स्यात्तद्दिनं नैककभक्तयोः अथ व्रतपरिभाषा तत्राधिकारिणो मद
नरत्ने भविष्ये अनग्नयस्तु ये विप्रास्तेषां श्रेयो विधीयते व्रतोपवासनियमैर्ना
नादानैस्तथा नृप अनग्निग्रहणमुपवासविषयं अत एव देवलः आहिताग्नि

व

रनड्वांश्च ब्रह्मचारी च ते त्रयः अश्नंत एव सिध्यंति नैषां सिद्धिरनश्नतां एकादश्या
दौ तु वचनाद्भवतीति वक्ष्यामः शूद्रस्याप्यधिकारः शूद्रो वर्णश्चतुर्थो वर्णित्वा
द्धर्ममर्हति वेदमंत्रस्वधास्वाहावषट्कारादिभिर्विनेति व्यासोक्तेः प्राच्यास्तु वैश्यवै
श्ययोर्द्विराजाधिकोपवासनिषेधः वैश्याशूद्राश्च ये मोहादुपवासं प्रकुर्वते त्रि

15

रात्रं पंचरात्रं वा तेषां शुद्धिर्न विद्यते यत्तु यैर्भक्त्युपणं वैरेयस्त्र द्वैविधीयते।
त्रिरात्रं न धर्मस्तैर्विहितं ब्रह्मवादिभिरिति हेमाद्रौ वचनात् यावदुक्तानि वे।
धस्त्येकेन तं भस्रात यो विषयत्वेनोक्तं एवं स्त्रीणामपि यत्तु स्कांदे नास्ति स्त्री
णां पृथग्यज्ञो न व्रतं नाप्युपोषणं भर्तृशुश्रूषयैवैता लोकानिष्टान्व्रजंति
ति यद्देवेभ्यो यच्च पित्रादिकेभ्यः कुर्याद्भर्त्ताभ्यर्चनं सत्क्रियां च तस्यार्द्धं वै सा फ
लं नान्यचित्ता नारी भुंक्ते भर्तृशुश्रूषयैव च आदित्यपुराणे नारी खल्वननुज्ञाता
भर्त्रा पित्रा सुतेन वा विफलं तद्भवेत्तस्या यत्करोत्यौर्ध्वदेहकमिति मौर्ध्वदे
हिकं पारलौकिकं तदुक्तं ननु ज्ञाविषयं भार्या पत्युर्मतेनैव व्रतादीनाचरेत्स
देति कात्यायनोक्ते अव्रविरोधो हारीवंशे स्नानं च कार्यं शिरसस्ततः फलमवा
प्नुयात् स्नात्वा स्त्री प्रातरुत्थाय पतिं विज्ञापयेत्ततो तयाऽऽगृहीत्वोदुंबरं पात्रे सकु
शं साक्षतेन तयाऽऽगेन मूलं दक्षिणां सिंच्यपृच्छ्रीयाद्वतज्जलं उदं वरं ताम्रमयं त
तो भर्तुः सती दद्यात्तात्तस्य प्रपतस्य च आत्मनस्त्वाभिषेचनं व्यं ततः शिरसि त
ज्जलं उपवासेष्वकर्त्तव्यमेतद्धि व्रतकेष्वचेति सर्वत्र व्रतेषु संकल्पविधि

15A

[illegible]भारते गृहीत्वौदुंबरं पात्रे वारिपूर्णमुदङ्मुखः उपवासं तु गृह्णीयाद्यद्वा सं
कल्पयेद्बुधः हस्तेनैवेत्यर्थः अथ व्रतारंभकालः मदनरत्ने गार्ग्यः अस्तगे च
गुरौ शुक्रे वाले वृद्धे मलिम्लुचे उद्यापनमुपारंभं व्रतानां नैव कारयेत् रत्नमाला
यां सोमसौम्यगुरुशुक्रवासराः सर्वकर्मसु भवंति सिद्धिदाः भानुभौमशनिवा
सरेषु च प्रोक्तमेव खलु कर्म सिध्यति विरुद्धसंज्ञा इह ये च योगास्तेषामनिष्टः १ र्ध
खलु पाद आद्यः सर्वे व्यतीपातनाम सर्वो परिघः परिघस्य चार्धं ति
स्तं शूलयोगे प्रथमे च वज्रे व्याघातसंज्ञे नव पंच शूले गंडे तिगंडे च षडेव नाड्यः अ

नत्र पभद्र नपाच ८

मेषु कार्येषु विवर्जनीयाः ॥५॥ संग्रहे कृष्णे त्रिदशयोः शुक्ले सप्तमी भद्रयोरधः अ
ल्के वेदेशयोः शुक्ले भद्रा प्रागर्धसपर्णियोः श्रीपतिः न सिद्धिमायाति कृतं च विष्ट्या
विषारिघातादिकमत्र सिद्धं व्यवहारसमुच्चये दशम्यामष्टम्यां प्रथमघटिका
पंचकपरहरिष्टः सप्तम्यां हे दशघटिकां न तीयां राकायां स्वयमघटिकाभ्यः परम
येशुभं विद्धः पुष्यं शिवतिथिं चतुर्थ्यां स्ततो विरमे तथैव सर्पिण्यां तु सिते पक्षे कृ
ष्णे चैव तु वृश्चिकी सर्पिण्यां तत्तत्सरं त्यज्यं चाष्टमिका पुष्यमेव च माघवीये

नि॰सि॰
१६

16

ष्ठी यदा स्यान्निशीथे परार्द्धजा नापूर्वार्द्धजा निशि तदा शुभदा च पूर्वे वृत्रस्याम
ले दिन भद्रा यदा रात्रौ रात्रिभद्रा यदा दिवा न त्याज्याः शुभकार्येषु प्राहुरेवं
पुरातनाः व्रतारंभे च विशेषः मदनरत्ने सत्यव्रतेनोक्तः उदयस्था तिथिर्या हि
न भवेद्दिनमध्यभाक् सा खंडा न व्रतानां स्यादारंभश्च समापनमिति देवलः
अभुक्त्वा प्रातराहारं स्नात्वाचम्य समाहितः सूर्याय देवताभ्यश्च निवेद्य व्रतमा
चरेत् मदनरत्ने भविष्ये क्षमा सत्यं दया दानं शौचमिंद्रियनिग्रहः देवपूजाग्नि
हवनं संतोषोऽस्तेयवर्जनं सर्वव्रतेष्वयं धर्मः सामान्यो दशधा स्मृतः अग्निहोमस्तु
दैवत्यः व्याहृतिहोमो वेति वर्धमानः यत्तु तेनोक्तं सर्वमेतत्पुराणोक्तं प्राकृत
व्रतपरं व्रतांतरेषु विध्यंतरसत्त्वे होमोन्यथा न अत एवैकादश्यां शिवादीनां होमा
नाचरणमिति तन्न जपो होमश्चेति वक्ष्यमाणैकवाक्यत्वेनास्य काम्यव्रतस
माप्तिपरत्वात् तदंगं तु साष्टदशास्य पञ्चमित्रविंदादिप्रकरणस्थेनैव तत्तद्व्रत
विशेषहोमविधिभिरस्योपसंहार इति विष्णुधर्मे तज्जप्यं जपनं ध्यानं तत्क
थाश्रवणादिकं तदर्चनं च तन्नामकीर्तिनश्रवणादयः उपवासकृता ह्येते गुणाः

16A

प्रोक्ताः मनीषिभिः कौर्मे वह्निगां मांत्यजां सूतिं पतितं च रजस्वलां न स्पृशेन्नाऽ
भिभाषेत नेक्षेत व्रतवासरे परेऽपि चं द्वादश्ये अग्निपुराणे स्नात्वा व्रतवतां सर्वेऽ
व्रतेषु व्रतमूर्त्तयः पूज्याः सुवर्णमय्याद्याः शक्त्या वै भूमिशायिना जपो होमश्च
सामान्यं व्रतांते दानमेव च चतुर्विंश द्वादश पंच वा त्रय एव वा विप्राः पूज्या यथा
शक्ति तेभ्यो दद्याच्च दक्षिणां अत्र विप्रा इति पुल्लिंगनिर्देशात् पुमांस एव भोज्याः न
तु स्त्रियः एवं सहस्रभोजनादावपि विरूपैकरोऽस्य प्रमाणांतरं विना युक्तत्वात्
अत एव द्वयोर्यजमानयोः प्रतिपदं कुर्यात् बहुभ्यो यजमानेभ्यो इत्यादौ विरूपै
करोऽप्ययोगात् यत्नाभिप्राये द्वित्वबहुत्वे वा न संभवतीत्युक्तमाचार्यैः पार्थसा
रथिना च एतेनैकस्य ब्राह्मणस्याहत्या भोजनेऽपरास्तां बहुत्वस्य एकपदश्रुत्या
ब्राह्मणान्वितत्वेन भोजनान्वयाभावादित्यन्यत्र विस्तरः मदनरत्ने तु प्रतिष्ठादि
वह्निप्रद्वारा व्याहृतिहोम इति वर्द्धमानः अत्र मूर्त्तयो व्रतदेवताप्रतिमाः पुति
मास्वरूपं च मदनरत्ने भविष्ये अनुक्तद्रव्यसंख्यादेवताप्रतिमान्यपसौवर्णी
राजती ताम्री वा कार्या मार्त्तिकी तथा चित्रजा पट्टलेख्या स्यान्निजवित्तानुरूपतः औ

नि॰सिं॰
४

17

माघमासमलपर्यंते कर्तव्यमाशास्त्रवर्जितैः तत्रैव वर्द्धते आज्यं दुग्धमनदेरोऽहतो
त्रिभुविधीयते मंत्रस्य देवतायाश्च प्रजापतिरिति स्थितिः मंत्रानुक्तौ समस्त
व्याहृतिरूपो मंत्रः प्रजापतिश्च देवतेति कल्पतरुः वर्धमानघृतदेवीपुराणे ।
होमो ग्रहादिपूजायां शतमष्टाधिकं भवेत् अष्टाविंशतिरष्टौ वा यथाप्राप्ति विधीय
ते मदनरत्ने अनुक्तसंख्या यत्र स्यात्तत्राष्टोत्तरं शतं वर्धमानघृतं तद्वशातात
पः उपवासं द्विजः कृत्वा ततो ब्राह्मणभोजनं कुर्यात्तेनास्य सगुण उपवासोभिजाय
ते व्रतोद्यापनानुक्तौ तु पृथ्वीचंद्रोदये नंदिपुराणे कुर्यादुद्यापनं तस्य समाप्तौ
यदुदीरितं उद्यापनं विना यत्तु तद्व्रतं निःफलं भवेत् यदि चोद्यापने नोक्तं व्रतानुगु
णं तद्भवेत् वित्तानुसारतो दद्याद्यत्नेनोद्यापने व्रते गामेकां च कांचनं दद्यात् व्रतस्य
परिपूर्तये अशक्तौ तु नारदीये सर्वेषामप्यलाभे तु यथोक्तं कारणं विना वि
प्रवाक्यं स्मृतं शुद्धं व्रतस्य परिपूर्तये यथा विप्रवचो यस्तु करोति मनुजः शुभं
अश्रद्धया दक्षिणां पापः स याति नरकं ध्रुवं भारते वेदोपनिषदे चैव सर्व ।
कर्मसु दक्षिणा सर्वत्र तु मया दिष्टा भूमिर्गावो यत्कांचनं वैजवापः शिवे

रा

राम
४१

17A

मैत्रोद्भवं यस्माद्वर्जनं तापितं वच्छमं अमंगलं तत्प्रयत्नेन देवकार्ये विवर्जयेत् दो
ङ्कारानंदे देवीपुराणे व्रते च तीर्थेऽध्ययने श्राद्धे पि च विशेषतः परान्नभोजनाद्देवि
यस्यान्नं तस्य तत्फलं पृथ्वीचंद्रोदयेऽग्निपुराणे नित्यस्नायी मिताहारो गु
रुदेवद्विजार्चकः क्षारंक्षौद्रं च लवणं मधुमांसानि वर्जयेत् तारास्तु न
नैवोक्ताः तिलमुद्गादृते शिंब्यं समं गोधूमकोद्रवौ धान्यकं देवधान्यं
च शमीधान्यं तथैव च स्विन्नधान्यं तथा पण्यं मसूरं तारणं स्मृतं गो
धूमानां तु नैवं प्रतिप्रसवः व्रीहिषष्टिकमुद्गाश्च कलायाः सतिलंपयः
श्यामाकाश्च यवनीवारा गोधूमाद्या व्रते हिताः कूष्मांडालाबुवार्त्ताकं पालं
कीं ज्योत्स्निकां त्यजेत् चरुभैक्षं सक्तुकणाः शाकं दधि घृतं मधु श्यामा
काः शालिनीवारा यावकं मूलतंडुलं हविष्यव्रतनक्तादावग्निकार्या

18

दिकोहितं मधुमांसं विहायान्यद्भुंक्ते वा दिनमीरितमिति शामीधान्यं माषादि पा
लंकी मध्यदेशे पोइङ्गेति प्रसिद्धा श्यामाकोशालकीमिति अर्थ्यो गौतमः
चरुभैक्षसक्तुकणयावकशाकपयोदधिघृतमूलफलोदकानि हवींष्युत्तरोत्त
रं प्रशस्तानि व्रतोपयिघृतं तच्च गव्यमिति अन्येच विशेषाः एकादशीचतुर्मा
स्यादिप्रकरणे वक्ष्यते गृहीतव्रतत्यागे तु मदनरत्ने छागलेयः पूर्वं व्रतं गृही
त्वा यो नाचरेत्काममोहितः जीवन्भवति चांडालो मृतः श्वा चाभिजाय
ते तत्र प्रायश्चित्तं तु कं दशीचंद्रोदये अग्निगारुडपुराणयोः क्रोधात्प्रमा
दाल्लोभाद्वा व्रतभंगो भवेद्यदि दिनत्रयं न भुंजीत मुंडनं शिरसोऽथवेति प्रायश्चि
त्ताम्नानादतिक्रांतव्रतानुष्ठानं नास्तीति गम्यते अतिक्रांतमपि व्रतं कार्यमेवेति स्मृ
पारिणः तन्मध्ये लोपो व्रतस्य सत्येवं एतत्स्वशक्तिविषयं अशक्तौ तु कालहेमाद्रौ
पुराणांतरे उपवासासमर्थश्चेदेकं विप्रं तु भोजयेत् तावद्धनादि वा दद्यात् स्य द्वि
गुणं तथा भक्तः नक्तभोजनेन विनेति निरोधः सहस्रसंमितां देवीं जपेद्वा प्राणसंयमान्
कुर्याद्द्वादशसंख्याकान् यथाशक्त्यान्तरेण नर इति स्मृतिरत्ने मत्स्येपि उपवासे अ
प्राणायामान्नक्तभोजनमपि स्यादिति मदनरत्ने वायवीये द्रव्यदानोपवासस्य फलं प्रा

18A

प्रोक्तं स्मार्त्तं तथापरार्के देवलः ब्रह्मचर्यं तथा शौचं सत्यमामिषवर्जनं व्रतेष्वेता
नि चत्वारि चरिष्ठानि इति निश्चयः मत्स्ये तस्मात्कृतोपवासेन स्नानमभ्यंगपूर्वकं व
र्जनीयं प्रयत्नेन स्त्यपघृतत्परं स्त्रय अन्ये च नियमास्तत्र तत्रान्वेषणीयाः अथ स्त्रीव
तेषु विशेष उच्यते तत्र हेमाद्रौ व्रतकांडे गारुडे गंधालंकारतांबूलपुष्पमालानु
लेपनं उपवासेन दुष्यंति दंतधावनमंजनमिति इदं च भर्तृकोपवासविषयं अं
जनं च सतांबूलं कुंकुमं रक्तवाससी धारयेत् सोपवासोपि अवैधव्यकरं यतः वि
धवा यतिमार्गेण कुमारी वा यदृच्छयेति तत्रैव भविष्योक्तेः तथा विष्णुधर्मे सर्वेषूप
पवासेषु पुमान् वा यस्तु वासिनी धारयेद्रक्तवस्त्राणि गंधधूपानुलेपनं उपवासेन दु
ष्यंति दंतधावनमंजनं मदनरत्ने व्यासः दंतधावनपुष्पादि व्रतेष्वस्यान्न दुष्यतीति
यद्यपीदं सर्वोपवासविषयं प्रतीयते तथापि शिष्टाचारो भाग्याद्यर्थं क्रियमाण
त्वारात्रित्रिरात्राद्युपवासविषयमेव न त्वेकादश्यादिविषयं अरात्रौ जलपानाद्ये
शाक्तं तांबूलचर्वणात् उपवासः प्रणश्यति तादिवास्वापाच्च मैथुनादित्यपरार्के देवलेन
तान्विधेयात् न चास्यधं विषयत्वेन साधकाराधात् स्त्रीणां तांबूलादिप्राप्तो गौ
तिवाक्यं तांबूलादिप्रापकस्यैवैकादशीतरविषयत्वेन वैपरीत्यस्यापि स्तु वचायात् ॥

पञ्चदशिवंशे अभ्यंजनं रोचनं चैव गंधालेपनमेव च तथा व्रते चैवोपवासे च नित्यमेव विव
र्जयेत् । शिरस्यभ्यंजनं तैलस्यैव मे तत्प्रशस्यते न पादयोर्न गात्रस्य स्नेहो नेति स्थितिः
स्थितेति तत्र व्रते वोक्तपुण्यकव्रतविषयं न तु सर्वव्रतपरं वैविरोधादिति मदनरत्ने उक्तं
तत्रैव अक्षमप्रायो नारो वस्त्रकलहस्य क्षान्तिस्तथा उपवासाद्धृता हानिः सद्यो भ्रंशाय
नित्यश्च स्त्रियमित्युपलक्षणं मदनरत्ने शिवधर्मे दानं स्नानानि नियमान् ध्या
नं हुतं जपः यत्नेनापि कृतं सर्वं क्रोधितस्य वृथा भवेत् अथ सूतकादौ निर्णयः त
त्र शातवस्तथा शौचयोः सर्वस्मान्नैकर्म निवर्तते निर्वं घेनुस्य चैव गोगत्क सूतकाशौचा
दाव पितामहः जाते पुत्रे क्षतजे जाते नित्यकर्म न वाचरेत् नैमित्तकं च तत्त्वदधः २
श्रवद्भक्तोम न वाचरेत् पञ्चकेत्च समुत्पन्ने ज्वरकर्म शिरोमे पुने धूमोद्गारे तथा वांतौ
नित्यकर्माणि संत्यजेत् दुर्भिक्षे भक्ते च जीर्णे च नैव भुक्तापि किंचित् न कर्म कुर्याच्चरो
नित्यं सूतके मृतके तथेति कालिकापुराणात् वस्तुतस्तु पूर्वं देवीपूजोपक्र
मात्तन्मात्रविषयत्वमस्येति युक्तं प्रतीमः तथा हेमाद्रौ पाद्मे गर्भिणी सूतिका
दिभ्रकुमारी वाथ रोगिणी यदाशुद्धा तदान्येन कारयेत् प्रयता स्वयमिति २

पुंसोप्येष विधिः स्त्रीलिंगस्याविवक्षितत्वात् तेन यस्मिन् व्रते यत्पूजाद्युक्तं तद
न्येन कारयेत् शारीरनियमं स्वयं कुर्यादिति हेमाद्रिः अपि च रत्नेन व्रतिनां व्रते इति
विष्णुः तेनास्य आरंभस्तु न भवत्येव शुद्धितत्त्वे विष्णुः बहुकालिकसंकल्पो गृही
तश्च पुरा यदि सूतके मृतके चैव व्रतं तन्नैव दुष्यति एतच्च काम्यपरं नित्यं त्वनार
ब्धमपि कार्यमिति गौडाः मदनरत्ने पूर्वं संकल्पितं यच्च व्रतं सुनियतव्रतैः तत्
कर्त्तव्यं नरैः शुद्धं दानार्चनविवर्जितं माधवीये कौर्मे काम्योपवासे प्रक्रांते त्वंतरा
मृतसूतके तत्र काम्यव्रतं कुर्याद् दानार्चनविवर्जितमिति एतेन सांगोऽधिकाराद् व्रता
गदेव पूजादि कार्यमिति वर्धमानोक्तिः परास्त प्रारब्धपूजादिकार्यमेव नवरात्रे
तत्रैव विशेषं वक्ष्यामः एवं रजस्वलापि यत्नः सत्यव्रतः प्रारब्धदीर्घतपसां नारी
णां यद्रजो भवेत् न तत्रापि व्रतस्य स्यादुपरोधः कदाचनेति तत्प्रतिनिधिना
कारयेदित्येतत्परं तदुक्तं मदनरत्ने मात्स्ये अंतरा तु रजोयोगे पूजामन्येन कारये
दिति प्रतिनिधयश्च निर्णयामृते पैठीनसिः भार्या पत्युर्व्रतं कुर्याद्भार्यायाश्च प
तिर्व्रतं असामर्थ्ये परस्ताभ्यां व्रतभंगो न जायते स्कांदेपि पुत्रं वा विनयोपेतं भगि
नीं भ्रातरं तथा एषामभावे एवान्यं ब्राह्मणं वा नियोजयेत् कात्यायनः पितृमा

तस्मात्पतिगुर्वर्थेचनिरोधतः उपवासंप्रकुर्वाणाः पुण्यंशतगुणंलभेत् माता
महादीनुद्दिश्यएकादश्यामुपोषणे हानिर्नैतत्फलेविप्राः समंतत्समवाप्नुयुः मद
नरत्नेप्रभासखंडे भर्तापुत्रः पुरोधाश्चभ्रातापत्नीसखापिच यात्रायांधर्मकार्येषु।
जायंतेप्रतिहस्तकाः एभिः कृतंमहादेवि स्वयमेवकृतंभवेत् तत्रैववायवीये।
स्वयंकर्तुमशक्तश्चेत्कारयीतपुरोधसा इदंचसर्ववर्णसाधारणंअविशेषात् य
त्तुकश्चिदाह स्त्रीशूद्रस्यब्राह्मणादिरेवप्रतिनिधिर्युक्तो नस्त्रीशूद्रः जपस्तपस्तीर्थसेवाप्र
व्रज्यामंत्रसाधनं दैवैः संपादितंयस्यसंपन्नंतस्यतत्फलमिति मरीचिवचना
दिति तन्न प्रव्रज्यादौ नास्त्रीशूद्रस्य संभवाद्विशेषाप्रदर्शनात् नातिन्यायेनास्यप्र
व्रज्यादिगोचरत्वात् यदापिउपवासोव्रतंहोमस्तीर्थस्नानजपादिकमिति पूर्वार्धे
पाठस्तदापि सएवदोषः स्त्रीशूद्रपतनानिषडिति मानवीयेजपनिषेधात् वस्तु
तस्तु संकल्पमात्रवाचनमात्रमात्रेत्यत इतिव्रतनिषेधेकार्यार्थमित्यलं अत्रविशेष
माह त्रिकांडमंडनः काम्येप्रतिनिधिर्नास्ति नित्येनैमित्तिकेचसः काम्येप्युपक्र
मादूर्ध्वंकेचित्प्रतिनिधिंविदुः नस्यात्प्रतिनिधिर्मंत्रस्वामिदेवाग्निकर्मसु।

20A

सदेशकालयोर्नास्तिनाशोरग्निरेवसा नापिप्रतिनिधातव्यंनिषिद्धंवस्तुकुत्र
हिरण्यकेशिसूत्रेपि नस्वामित्वस्यभार्यायपुत्रस्यदेशस्यकालस्याग्नेर्देवतायाःक
र्मणःशब्दस्यचप्रतिनिधिर्विद्यते अथव्रतादिसन्निपातेनिर्णयः तत्रतिथिद्वय
सन्निपातेनतत्रोक्तंदानहोमादिक्रमेणानुष्ठेयंअविरोधात् इदंसर्वारब्धेष्वेवए
कमध्येन्यकाम्यकर्मारंभस्तुनभवत्येवगुणफलाहतेः यस्ययद्रेनततेनशयत्तस्ता
यजेतंयद्वंनिर्ऋतिर्ऋतानीतिशाणकद्घ्नतस्मृतिः यतःअनादिकर्ममात्रंअनंगो
नमवधानदोषस्यसर्वत्रसाम्यात् शिष्टास्तुमाघकार्तिकस्नानादिमध्येल
क्षहोमतुलाभारतत्रवणाद्याचरंति तन्नित्यमध्येस्तुकाम्यमध्येतदचिंत्यं यत्र(
तुननैकभक्तादेविरोधस्तत्रप्राथम्यादेकभक्तंकार्यं नक्तंतुपरेयुक्तमितिचे
गौणकालेकार्यंसमकालीनविरुद्धव्रतादौत्वेकंस्वयंकृत्वान्यद्भार्यादिनाका
रयेदितिमाधवः यत्रतुशिवरात्र्यादौतिथिमध्येपारणयात्रिभोजनंप्राप्तंभूत्वा(
ष्टम्योर्दिवाभुक्तौरात्रौभक्तोचपर्वणि एकादश्यामहोरात्रंभुक्त्वाचांद्रायणंच
रेदितितन्निषेधस्तत्रपारणयावैधतादिवैवभोजनेनिषेधस्तुरागप्राप्तभोजन

विषयः एवमष्टम्यादिनक्तमपि संक्रांत्यादौ रवौ संक्रमणे चानुपोष्यो न चरात्रौ भोजनं यत्र
त्वष्टम्यादौ दिवा भुंजीत निषेधः संक्रांतौ च रात्राविति निषेधद्वयं तत्रोपवास एव कार्यः
यद्यपि पुत्रिणः उपवासोपि निषिद्धः तथाप्युपवासनिषेधेन भक्ष्यं किंचित्प्रक
ल्पयेदिति वचनात् किंचिद्भक्षयित्वोपवासः कार्यः चांद्रायणमध्ये एकादश्यादौ तु भो
जनं कार्यमेव चांद्रायणस्य काम्यत्वेन नित्यबाधकत्वात् अबाधेन गत्यसंभवा
त्र एकादश्यामेकांतरोपवासादिपारणायां जलपारणं कृत्वोपवसेत् आपो
वा अशितमनशितं चेति श्रुतेः एवं द्वादश्यां मासोपवासश्राद्धप्रदोषादिषु ज्ञेयं ए
वं काम्यनैमित्तिकनित्यत्वादौ दिक्कृतं बलाबलं स्वयमूह्यमिति दिक् इति श्रीक
मलाकरभट्टकृते निर्णयसिंधौ परिभाषा समाप्ता अथ प्रतिपदादिनिर्णयः
शुक्लप्रतिपदपराह्णव्यापिनी चेत्सर्वा गताह्या युग्मवाक्यात् प्रतिपत्संमुखी कार्या या
भवेदपराह्णिकीति स्कांदोक्तेः शुक्ला स्यात्प्रतिपत्तिथिः प्रथमेतरस्मिन् सपराह्णे भवे
दिति दीपिकोक्तेश्च अपराह्णश्च पंचधा भक्ते दिने चतुर्थो भागः तदभावे सायाह्न
व्यापिनी परिगृह्यतामिति माधवोक्तेः कृष्णा तु पराह्णव्यापिन्युत्तरतो रविलेति दी
पिकोक्तेः कृष्णापि पूर्वैवेत्यनंतभट्टः सर्वा तिथिः षड्वर्ज्यान्युक्तानि मुहूर्तं दीपि

21A

कायां कूष्मांडं बृहतीफलानि लवणं वर्ज्यं तिलाम्नं तैलं चामलकं दिवं प्रवसता(
शीर्षं कपालं जकं निष्पावांश्च मसूरिकान्फलमयोवं ताकं हं तं मधुद्यूतं स्त्रीगमं।
नेकमात्प्रतिपदि स्वमासोडशः शीर्षं नालिकेरं कपालं प्रलावुः पृष्ठे पटोलं भ
पालः कूष्मांडं बृहती मारं मूलकं पनसं फलं धात्री शिरः कपालांत्रं नरवं चर्म
तिलानिच स्मरकर्मांगनीनां सेवां प्रतिपदं प्रभृति त्यजेत् नरवं शिवं चर्मम
सूरिकाः द्वितीयातु कूष्मापूर्वा मुल्लौ नरेति हेमाद्रिः कूष्मा द्वितीयादि सा प
वीक्षेयदि सासितानुपरतः सर्वेति दीपिकोक्तेः माधवानंतभट्टमते तु सर्वापि द्वि
तीयापरा तथा च माधवः सर्वेष्वरसती प्रातः परेद्युस्त्रिमुहूर्तगा सा द्वितीयापरे
योगमात्सर्वे विज्ञातनोन्यथेति तृतीयातु सर्वमते रंभाव्रतातिरिक्तापरैव तेन
युग्मवाक्यं रंभाव्रतविषयं रंभाख्यां वर्जयित्वा तु तृतीया द्विजसत्तम अन्येषु
सर्वकार्येषु गणयुक्ता प्रशस्यत इति ब्रह्मवैवर्तात् गौरीव्रते तु विशेषमाह मा
धवः मुहूर्तमात्रसत्वेपि दिने गौरीव्रतं परे शुद्धाधिकायामप्येवं गणयोगप्रशं
सनादिति चतुर्थ्यपि सर्वमते गणेशव्रतातिरिक्तापरैव युग्मवाक्यात् एकाद
शीतथा षष्ठी अमावास्या चतुर्थिका उपोष्याः परसंयुताः पराः पूर्वेण संयुता

इति माधवीये वृद्धवसिष्ठोक्तेश्च नागचतुर्थी तु मध्याह्नव्यापिनी पंचमीयुता च ग्रा।
ह्येति निर्णयामृते माधवीये तु गणेशव्रते तु तृतीयायुतैव चतुर्थी तत्र जीयां मत्स्यपु
राणेऽयफलप्रदा कर्तव्या व्रतमिदं गणनाथस्य तोषिणीति हेमाद्रौ ब्रह्मवैवर्तात् माध
वीये तु गणेशव्रते मध्याह्नव्यापिनी मुख्या चतुर्थी गणनाथस्य मातृविद्धा प्रशस्यते म
ध्याह्नव्यापिनी चेत् स्यात्परतश्चेत्परेहनीति बृहस्पतिवचनात् प्रातः शुक्लतिलैः।
स्नात्वा मध्याह्ने पूजयेन्नृपेति तत्कल्पोक्तेरभिधानाच्च तेन परदिने सत्त्वे परा अन्यथा पूर्वैव तु
के वस्तुतस्तु यत्र भाद्रशुक्लचतुर्थ्यादौ गणेशव्रतविशेषे मध्याह्नपूजोक्तातद्वि
षयाण्येव ब्राह्मवचनानि अन्यत्र सर्वत्रिकालिकसंकष्टचतुर्थ्यादौ बहूनां कर्मका
लानां बाधापत्तेः तेन सर्वत्र गणेशव्रते पूर्वैवेति सिद्धं संकष्टचतुर्थी तु चंद्रोदयव्या
पिनी ग्राह्या दिनद्वये सत्त्वे मातृयोगस्य सत्त्वात्पूर्वेति केचित् अन्ये तु दिने तु मु
हूर्तत्रयात्मकस्य तृतीयायोगस्याभावात्परदिने माधवोक्तमध्याह्नव्याप्तिस
त्वात्संपूर्णत्वाच्च परेत्याचक्षते दिनद्वये तदभावे तु परैव गौरीव्रते पूर्वैव गणराजे गौ
रीवसुभ्यां तिथिरिक्ता प्रकीर्तिताः चतुर्थ्याः पंचमी विद्धा देवतोत्तरयोगत इति म
दनरत्ने ब्रह्मवैवर्तात् पंचमी तु माधवमते सर्वापि पूर्वा चतुर्थीसंयुता कार्या।
पंचमी परयान्वितुः दैवे कर्मणि पित्र्ये च शुक्लपक्षे तथासिते इति हारीतोक्तेः हेमा

22A

द्धिमतेन तु शुक्ला पूर्वा सिता परा कृष्णा पूर्वैव शुक्ला सिता परयुता स्यात् पंचमीति
दीपिकोक्तेः ॥ स्कान्दे तु हारीतोक्त उपवासादिविषया प्रतिपत्पंचमी चैव सावि
त्री भूत दर्शा नवमी दशमी दशमी चैव नोपोष्या परसंयुता इति ब्रह्मवैवर्त
तीव यत्तु पंचमी तु कर्तव्या षष्ठ्या युक्ता तु नारदेत्यापस्तंबीयं तन्नागपूजाविष
यमिति मदनरत्ने निर्णयामृतादयः चमत्कारचिंतामणौ पंचमी नागपूजा
यां कार्या षष्ठीसमन्विता तस्यां तु तुषिता नागा इतरा सचतुर्थिकेति तेन ना
गपूजादौ परैव यत्तु मदनरत्ने देवोदासीये श्रावणे पंचम्यतिरिक्ता पूर्वैव यु
क्ते श्रावणे पंचमी शुक्ला संप्रोक्ता नागपंचमी तां परित्यज्य पंचम्यश्चतुर्थीसहि
ता इति संग्रहोक्तेः गणेशस्कंदयोगाभ्यां क्रमान्नागः शुभाशुभः मित्रामित्रे
तयोः सूत्रे नागानामाखुबर्हिणाविति षड्विंशन्मतात्व श्रावणे पंचम्यतिरिक्ता
याः नागपंचम्याः चतुर्थीयुतत्वेषूक्तं तदुपवासादिविषयं यत्रैवाह्ने षष्ठी सर्वम
तो स्कंदव्रतातिरिक्ता परैव युग्मवाक्यात् नागविद्धा न कर्तव्या षष्ठी चैव कदाचने
ति स्कांदाच्च निर्णयामृते षष्ठी च सप्तमी चैव वारश्चेदं शुमालिनः योगो यं पद्म

कोनामरसूर्य्यकोटिग्रहे सत्तमः सप्तमी पूर्वैव युग्मवाक्यात् षष्ठ्या युता सप्तमी च क
र्त्तव्या तात न संदेह इति स्कांदाच्च अष्टमी तु सर्वमते कृष्णा पूर्वा सिता परा व्रतमात्रे ऽष्टमी
कृष्णा पूर्वा सिताष्टमी परेति माधवोक्तेः परयुक्ता शुक्लाष्टमी पूर्वयुक्ता कृष्णेति दीपि
कोक्तेश्च शिवशक्त्युत्सवे तु कृष्णाप्युत्तरा पक्षद्वयेप्युत्तरैव शिवशक्तिमहोत्सवे इति माध
वोक्तेः दिवोदासीये भविष्ये यदा यदा सिताष्टम्यां बुधवारो भवेत् क्वचित् तदा तदा हि सा
त्याज्या एकभक्ताशनेन तु संध्याकाले तथा चैव प्रसुप्ते च जनार्दने बुधाष्टमी न कर्त्तव्या
हंति पुण्यं पुराकृतं नवमी तु सर्वमते पूर्वा युग्मवाक्यात् न कुर्यान्नवमीं तात दशम्या
तु कदाचनेति स्कंदाच्च दशमी तु पूर्वा परा चेति हेमाद्रिः कृष्णा पूर्वा परा शुक्ला दशम्ये
वं व्यवस्थितेति माधवः वस्तुतस्तु युग्मान्नवमीयुतैव ग्राह्या दशमी तु प्रकृते व्यासदृग्गौढि
जस्तन्मत्यायस्तं वोक्तेः यत्तु संस्पर्शाद्दशमी कार्या पूर्वा परयाप्यवेध्य गरसोक्तं तन्नवमीयु
ता लाभे ऽन्योदयिकी ग्राह्येत्येवं नेयं अथैकादशी तत्रैकादश्युपवासो द्वेधा निषेधपरि
पालनात्मको व्रतरूपश्च तत्राद्यं न शंखेन पिबेत्तोयं न खादेत्कूर्मसूकरौ एकादश्यां न
भुंजीत पक्षयोरुभयोरपि इति पीतिकौर्मदेवलाद्युक्तेः आग्नेयपुराणे गृहस्थो ब्रह्मचा
री च आहिताग्निस्तथैव च एकादश्यां न भुंजीत पक्षयोरुभयोरपि इति न चात्र पर्यु
दासेन व्रतविधिः तद्धेतुव्रतादिशब्दाभावात् व्रतरूपस्तु सर्वेवर्त्ते प्राप्ते हरिदिने

23A

सम्यग्विधाय नियमं निशि दशम्यामुपवासस्य प्रकुर्याद्वैष्णवं व्रतं इति इदं च शि-
वभक्तादिभिरपि कार्यं वैष्णवो वाथ शैवो वा कुर्यादेकादशीव्रतमिति शिवधर्मो-
क्तेः वैष्णवो वाथ शैवो वा सौरोप्येतत्समाचरेदिति सौरपुराणाच्च सोपि द्वेधा नित्यः
काम्यश्च उपोष्यैकादशी नित्यं पक्षयोरुभयोरपि इति गरुडोक्तेः पक्षे पक्षे च कर्त्त-
व्यमेकादश्यामुपोषणं इति नारदोक्तेश्च नित्यता यदीच्छेद्विष्णुसायुज्यं श्रियं संततिमात्म-
नः एकादश्यां न भुंजीत पक्षयोरुभयोरपि इति कौर्मादिषु फलश्रुतेश्च काम्यता उभयैकाद-
शीव्रतं च गृहस्थातिरिक्तानामेव नित्यं गृहस्थस्य तु शुक्लायामेव व्रतं नित्यं न कृष्णायां एका-
दश्यां न भुंजीत पक्षयोरुभयोरपि वनस्थयतिधर्मोयं शुक्लामेव सदा गृही इति देवलोक्तेः
न चानेन निषेधपालनमेव वनस्थयतिविषये उपसंह्रियते न तु व्रतमिति वाच्यं अस्य पर्यु-
दासेन व्रतविधिपरत्वात् अन्यथा पद्मोक्ताग्निपुराणवचने निषेधपालने गृहस्थस्याधिका-
रोक्त्या विरोधः स्यात् न निषिद्धस्यापि व्रतमात्रफलोक्त्या न विरोधात् पद्मएवोपसंहारायोगा-
त् अभावस्य धर्मत्वाभावाच्च तस्मादनेन सर्वेषामेकादशीव्रतविधायिनां सामान्य-
वाक्यानां वनस्थयतिविषये उपसंहाराद्गृहस्थस्य कृष्णायां नित्यव्रतप्राप्तिः क-
थं तर्हि संक्रान्त्यामुपवासं च कृष्णैकादशिवासरे चंद्रसूर्यग्रहे चैव न कुर्यात्पुत्रवान्
गृहीति नारदादिवचने कृष्णानिषेधः अभावादिति चेत् श्रूयतां शयनीबोध

24

नीमध्ये या कृष्णैकादशी भवेत्। सैवोपोष्या गृहस्थेन नान्या कृष्णा कदाचनेति पाद्मे
गृहस्थस्य स्मार्तादौ कार्त्तिकीमध्यस्था या कृष्णा विहिता सपुत्रवतो निषिध्यते अन्यकृ
ष्णायां तु न विधिः सर्वविधीनां वनस्थयतिपरत्वसंहारात् न निषेधः प्राप्त्यभावात् शायन्या
दिवाक्यं तु शुक्लगोचरमित्यनंतभट्टहेमाद्र्यादिग्रंथाः दीपिकामपि अवसितातु श
यनीबोधांतरस्थाप्युपोष्या सा त्याज्या जिनोपीति मदनरत्ने भविष्ये पि यथा शुक्ला त
था कृष्णा द्वादशी मे सदा प्रिया शुक्ला गृहस्थैः कर्तव्या भोगसंतानवर्धिनी मुमुक्षुभिस्त
था कृष्णा तेन नैवोपोष्या दशमीनेति निषेधपालनं काम्यव्रतं कुर्यात्तु वैष्णवमिति नारदोक्तेः
एतच्च सर्वं कालादर्शे उक्तं विधवाया वनस्थस्य यतेश्चैकादशीद्वये उपवासो गृहस्थस्य
शुक्लायामेव पुत्रिणः भुजेर्निषेधः कृष्णायां सिद्धस्तस्य ततो व्रते इति प्रायस्तु वैष्णव
गृहस्थानां कृष्णापि नित्या नित्यं भक्तिसमायुक्तैर्नरैर्विष्णुपरायणैः पक्षेपक्षे च कर्तव्य
मेकादश्यामुपोषणं सपुत्रश्च सभार्यश्च स्वजनैर्भक्तिसंयुतः एकादश्यामुपवसेत्पक्ष
योरुभयोरपि इति नारदोक्तेरित्याहुः पुत्रशब्दस्यापत्यमात्रवचनं नारायणवृत्तौ
पुमांसः स एव मे पुत्रा जायेरन्नित्यत्रापत्यमात्रवाचित्वोक्तेः जनयद्भुः पुत्राणीति लिंगात् यो
श्रीमान्नाम स्तेनेति मन्त्रोक्तेः पुत्रापत्यमित्यर्थे तु स्त्रीभ्यो ढगिति योज्ञेयश्चात्यायनोक्तेः पुमान्
पुत्रो जायते इति च उपवासनिषेधे विशेषो वायवीये उक्तः उपवासनिषेधे तु भ

84A

स्यां किंचित्रकल्पयेत् न दुष्यत्युपवासेन उपवासफलं लभेत् भविष्ये च तत्रैवोक्तं न
क्तं हविष्यान्नमथोदनं वा फलं तिलाः क्षीरमथांबु चाज्यं यत्पंचगव्यं यदि वापि वायुः प्र
शस्तमत्रोत्तरंचोत्तरं तत्र दशमीवेधो द्वेधा अरुणोदयवेधः सूर्योदयवेधश्चेति ।
अ[illegible]घटिकात्मके दशमीशेषसंयुक्तो यदि स्यादरुणोदयः नैवोपोष्यं वैष्णवेन तद्दिने
कादशीव्रतमिति अरुणोदयस्वरूपं च माधवीये स्कांदे च उदयात्प्राक् चतस्रस्तु
घटिका अरुणोदय इति यदपि उदयात्प्राग्यदा विप्र मुहूर्तद्वयसंयुता संपूर्णैका
दशी नाम तत्रैवोपवसेद्गृही इति गारुडे सौरधर्मादिवचनं यच्च भविष्ये आदित्यो
दयवेलायाः प्राङ्मुहूर्तद्वयान्विता एकादशी तु संपूर्णा विद्धान्या परिकीर्तिता ।
तदरुणोदय[illegible]व्यापनेन दंडचतुष्टयपरमेव हेमाद्रिमाधवीयेव यच्च ब्रह्मवैवर्ते चतस्रो
घटिकाः प्रातररुणोदयनिश्चयः चतुष्टयविभागोऽत्र वेधादीनां किलोदितः अरुणो
दयवेधः स्यात्सार्धं तु घटिकात्रयं अतिवेधो द्विघटिकाः प्रभासंदर्शनाद्रवेः महावे
धोपि तत्रैव दृश्यतेऽर्को न दृश्यते तुरीयस्तत्र विहितो योगः सूर्योदये बुधैरिति तदप्यु
दयवद्वारारुणोदयवेधविशेषपरमेवेति माधवीयमदनरत्ने च अथ सूर्योदयवेधः
तथान्येपि वेधा हेमाद्रौ माधवीये गारुडे च उदयात्प्राक् त्रिघटिका व्यापिन्येकादशी य
दा संदिग्धैकादशी नाम वर्ज्या धर्मकांक्षिभिः उदयात्प्राङ्मुहूर्तेन व्यापिन्येकादशी

यदा संयुक्तैकादशीनामवर्ज्यैव धर्मवृद्धये हेमाद्रौ रात्रे रंत्योष्टमभागोप्यरुणो
दय उक्तः निशः प्रांते तु यामार्धे देवानां दित्रवादने सारस्वतानध्यायने चारुणोदय
उच्यते इति स्मृतेः अत्रैके रात्रांसर्वेषसाणां मुहूर्तद्वयेन ऋोडीकारान्निशः प्रांते इति
वचनाच्च रात्रिमानवशात्सार्द्धत्रिदंडादयोनेकेऽरुणोदयाः तदाह हेमाद्रिः सार्धघटि
काप्रयोपि स्यादिविंशतिघटीमानरात्रिविषयमस्तनेरारुरात्रीरव्यस्य चतस्रोघटि
काः स्युस्तामिलीत्याहुः तन्न अरुणोदयशब्दस्यानेकार्थत्वापत्तेः न च मुहूर्तद्वयमित्यर्थः
देवैककर्त्रैवीदिवेधानां तथात्वस्यनुपपत्तेः निशि प्रांते यामार्धत्वमरुणोदयत्वेऽ
चास्ति मुहूर्तद्वयस्य यामार्धस्य चतस्रो घटिका इत्यनेनोपसंहाराच्च न तदर्थः न च सा
र्धं तु घटिकात्रयमित्यनेनोपि तदापत्तिः शंकया तेन च तुर्दंडवेधस्यैवोक्तेः चतुर्दंडेऽर्ध
घटीदशमीसत्वे हि वेधस्तदर्थः द्विघटिकादौ तद्योगाच्च पक्षमते कियतारुणोदय
वेधस्त्वपेक्षायां सार्धघटीत्रयनियमादरुणोदयेऽर्धघटिकातोन्यूनदशमीसत्वे न वे
ध इति तन्न द्विदंडादावपि तदापत्तेः दशमीशेषसंयुक्तो यदि स्यादरुणोदयः नैवो
पोष्यं वैष्णवेन तद्दिने एकादशीव्रतमिति गारुडे भविष्ये च योगमात्रनिषेधात् नार
दीयेपि लववेधोपि विप्रेंद्र दशम्येकादशीं त्यजेत् सुरायाबिंदुना स्पृष्टं गंगांभइ
वनिर्मलं स्कांदेपि कलाकाष्ठादिमात्रैव दृश्यते दशमी विभो एकादश्यां न कर्तव्यं व्रतं राजन

25A

कदाचनेति माधवोप्याह सोयं कलादिवेधोऽरुणोदयवेधे च समान इति निगमे
ऽपि सर्वप्रकारवेधोयमुपवासस्य दूषक इति अत एव माधवेनारुणोदयाद्यदंडस्प
दशमीस्पर्शे संप्रोक्ता काल्लघटीयोगे संस्तिन्निदिग्धा मुहूर्तं मासे संयुक्ता उदये सं
वीर्णेभियुक्ता अरुणोदयवेलायां दशमी यदि संगता संप्रोक्तैकादशीनां तु मोहिन्यै
दत्तवान् प्रभुरिति गोभिलाद्युक्तेः सर्वोक्तगारुडादेश्च सामान्यतो विशेषवत्स्यारुणोद
यवेधः निषिद्धः यत्तु षट्सभागोऽरुणोदय इति हेमाद्रिणोक्तं पंचमहत्तरारात्रीरिति।
तत्परमतेस्वाबलेव दूषितं अंत्रेनयुक्तं वेधतारतम्यं च दोषतारतम्यादुपपद्यतमिति दो
षतारतम्यं प्रायश्चित्ततारतम्यदेवगम्यते तथोक्तं हेमाद्रौ स्मृत्यंतरे अज्ञानाद्यदि वा मो
हात्कुर्वेन्नेकादशीं नरः दशमीशेषसंयुक्तां प्रायश्चित्तमिदं चरेत् कृच्छ्रपादं नरः स्त्री चेत्
गां च दद्यात्सवत्सकां सुवर्णस्यार्धकं देयं तिलद्रोणसमन्वितं विद्धं तत्रं तत्रैव ब्राह्म
णान् भोजयेत्त्रि सङ्को च दद्यात्सवत्सकां धरण्यस्यार्धकं देयं तिलद्रोणमथापि वेति।
अंत्र वेधतारतम्यादुपवसेदिति हेमाद्रिः निशः प्रोक्ते इत्यादिदोषाधिक्यार्थमेव तस्मा
त्तु घटिकात्मकत्वादरुणोदय इति सिद्धं तेन बहुस्यं चारादंडं अनंतरं दशमीप्रवेशेऽरुणोद
यवेध उक्तो भवति अंत्योपि तत्रैकराद्येनोक्तः उदयोपरि विद्धा तु दशम्यैकादशी यदि

26

दानवेभ्यः प्रीणनार्थं दत्तवान् पाकशासन इति स्मृत्यंतरेपि दशम्याः प्रांतमादाय यदोदेति
दिवाकरः तेन स्पृष्टं हरिदिनं दत्तं जंभासुराय त्विति तत्रारुणोदयवेधो वैष्णवविषयः त
द्वाक्येषु वैष्णवग्रहणात् तत्स्वरूपं तु माधवीये स्कांदे परमापदमापन्नो हर्षे वा समुपस्थिते
नैकादशीं त्यजेद्यस्तु यस्य दीक्षास्ति वैष्णवी विष्णवार्पिताखिलाचारः स हि वैष्णव उच्य
ते यद्यपि पित्रादेरागमदीक्षायां तन्मात्रस्य वैष्णवत्वं न तु पुत्रादेः तथापि स्वपारंपर्यप्रसि
द्धमेव वैष्णवत्वं स्मार्तत्वं च मन्यंते वृद्धाः तत्त्वसागरे भविष्ये यथा शुक्ला तथा कृष्णा यथा कृ
ष्णा तथेतरा तुल्ये ते मन्यते यस्तु स वै वैष्णव उच्यते केचित्तु दशम्या नवमीवेधमपि त्यजंति
तत्र मूलं मृग्यं उदयवेधस्तु परिशेषात् स्मार्तगोचरः तदाह माधवः अरुणोदयवेधोत्र
वेधः सूर्योदये तथा उक्तौ द्वौ दशमीवेधौ वैष्णवस्मार्तयोः क्रमात् हेमाद्रिस्तु केषांचिदर्धरा
त्रेपि दशमीवेधमाह अर्धरात्रे तु केषांचिद्दशम्या वेध इष्यते कपालवेध इत्याहुराचार्या ये।
हरिप्रियाः न तन्मतं यस्माद्वियामा रात्रिरुच्यते इति ब्रह्मवैवर्तात् अस्यार्थः अनद्यतने ल
ङित्यत्रातीतायाः रात्रेः पश्चिमयामद्वयमागामिन्या रात्रेः पूर्वयामद्वयं दिवसश्च सकलो
ऽद्यतनः सकल इत्युक्तं महाभाष्ये स एव वर्तमानः कालः एकादश्यहोरात्रे उपोष्यः
तन्मध्ये दशमीप्रवेशे विद्धा सा त्याज्या अत एव हेमाद्रौ दशम्याः संगदोषेण अर्धरात्रात्प
रेण तु वर्जयेच्चतुरो यामान् संकल्पार्चनयोः सदेति तत्र दोष उक्तः चतुरो यामाश्च दिवस

26A

स्येत्यर्थः स्वमतेन तु रात्रेस्त्रियामत्वात्त्यप्रहरत्रयः पूर्वशेषः तेन चतुर्थप्रहर एव वेधो युक्तः सोप्यरुण
ोदय एव सूर्योदये विना नैव स्नानदानादिकं क्रमः इति मार्कंडेयपुराणात् प्रत्यूहो हर्मठरवं
कल्प इति कौशाद् अरुणोदयमारभ्य सूर्यांशु प्रस्तत्रैव निषेधः तेन मतभेदात्पूर्व
स्येति केचित् केमुतिकन्यायेनारुणोदयवेधस्यैवेयं स्तुतिरिति तु माधवः यत्तु दिक्
पंचदशभिस्तु यो लिवेधः स उपवासातिरिक्तविषय इति माधवः सर्वप्रकारवेधो यमुप
वासस्य दूषकः साधं सप्तमुहूर्तोस्तु योगोयं बाधते व्रतमिति निगमादित्यलं तत्र माधव
मते वैष्णवानां अरुणोदयविद्धा त्याज्या यदा त्वेकादश्येव शुद्धा सती वर्धते द्वादशी चोभयं
वा तदा परैवोपोष्या एकादशी द्वादशीवाधिका चेत्त्यज्यतां दिनं पूर्वं गत्वा त्वन्तरं स्यादिति
वैष्णवनिर्णय इति माधवोक्तेः स्मार्तैस्तु सूर्योदयविद्धा त्याज्या यदा त्वेकादशी शुद्धा
सती वर्धते द्वादशी च समा न्यूना वा तदा गृहस्थैः पूर्वा यतिभिरुत्तरा कार्या प्रथमेऽह
नि संपूर्णा व्याप्याहोरात्रसंयुता द्वादश्यां च तथा तातं दृश्यते पुनरेव च पूर्वा कार्या गृ
हस्थैश्च यतिभिश्चोत्तरा विभोः इति स्कांदोक्तेः वर्धमानोप्येवमाह उभयत्र शुद्धौ तु शु
द्धा विद्धा वा सर्वैर्वैष्णवैश्च संपूर्णैकादशी यत्र प्रभाते पुनरेव सा सर्वैरेवोत्तरा कार्या परतो
द्वादशी यदि इति नारदोक्तेः द्वादशी माग्रहा द्वौ शुद्धायां पूर्ववैव न चेदेकादशीविघ्नो द्वाद
शीपरतः स्थिता उपोष्यैकादशी तत्र यदीच्छेत्परमं पदं इति नारदोक्तेः द्वादशीमा

नि. सिं.
२७

27

गतद्दौ तच्छुद्धा विद्धे अवस्थिते शुद्धा पूर्वा तु परा विद्धा स्मार्त्ते निर्णय ईदृशः इति माध
वोक्तेश्च मदनरत्नेप्येवं यत्तु विद्धाप्यविद्धा विज्ञेया परतो द्वादशी न चेत् अविद्धापि
च विद्धा स्यात्परतो द्वादशी यदीति हेमाद्रौ पाद्मवचनं तदेकादश्या ह्रासे द्वैतेयं तदुक्तं माध
वीये एकादशी द्वादशी चेदुभयं वर्धते यदा तदा पूर्वदिनं त्याज्यं स्मार्त्तैर्ग्राह्यं परं दिनमि
ति विद्धैकादश्यां द्वादशीमात्रवृद्धौ च सर्वेषां परैव तत्रैवैकादशीमात्रवृद्धौ गृहस्थाना
दीयते तु परा सर्वैरुपोष्यास्ति एकादशी विद्धा चेदुभ्यैकैव विशेषत उत्तरां तु यतिः
कुर्यात् पूर्वां तूपवसेद् गृहीति प्रचेतसोक्तेः एतच्छुद्धाविद्धातुल्यमिति माधवः त्रयोद
श्यां न लभ्येत द्वादशी यदि किंचन उपोष्यैकादशी तत्र दशमीमिश्रितापि चेति स्कंदात्
अविद्धा न निषिद्धैश्च न लभ्यन्ते दिनानि तु मुहूर्तैः पंचभिर्विद्धा ग्राह्यैवैकादशीति पितृशी
रूपवचनं गौडोक्तेश्च मुहूर्त्तं पंचकं सूर्योदयमारभ्य ज्ञेयं अन्ये तु रात्रेरेक्ति एकादश्यभावस
भवात् यद्यपि हेमाद्रिणा शुद्धसमा शुद्धन्यूना वाधिकद्वादशिका चेत्सर्वेषां परैवेत्यु
क्तं तदपि वैष्णवविषयं स्मार्त्तानां तु पूर्वैवेत्यविरोधः हेमाद्रिमते तूच्यते तत्र शुद्धावि
द्धा द्वयी द्वेधा न्यूनसमाधिकैः बहुप्रकारा पुनस्त्रेधा द्वादश्यूनसमाधिकैरित्यष्टा
दशैकादशीभेदाः तत्र शुद्धाधिकान्यूनद्वादशिका शुद्धाधिके समद्वादशिका च स
कामैः सर्वा निःकामैस्तु ~~पश्चात्~~ परा कार्या प्रचेदानिसंपत्तेरिति सर्वेषां त्वर्के

राम
२७

९७A

दात्तऊनद्वादशिकायांतत्रविष्णुप्रीतिकामैरुपवासद्वयंकार्यं संपूर्णैकादशीयत्र।
प्रभातेपुनरेवसालुप्यते द्वादशीतस्मिन्नुपवासः कथंभवेत् उपोष्येद्वेतिथीतत्रवि
ष्णुप्रीणनतत्परैरिति तद्विशिष्टोक्तेः शुद्धन्यूनाशुद्धाधिकाशुद्धसमाविद्धन्यूनावि
द्धसमावाधिकद्वादशिकाचेत्सर्वेषांपरैवेतिहेमाद्रिः मदनपारिजातेतुशुद्धाधिकापरा संपू
र्णैकादशीयत्रेतिपूर्वोक्तेः अन्यापूर्वाशुद्धायदसमाहीनाधिकोत्तरा एकादशीमुपवसे
न्नशुद्धांवैष्णवीमपीतिस्कांदात् शुद्धाएकादशीनचेदेकादशीविद्धा इतिनारदोक्तेश्च य।
त्तुअविद्धाधिवद्धास्यादितिपद्यं तच्छुद्धाधिकापरं यत्तु संपूर्णैकादशीत्यादि तत्परतोद्वाद
शीयदि उपोष्याद्वादशीशुद्धाद्वादश्यामेवपारणमित्यादि तदेतद्वैष्णवपरं स्मार्तानांतुपूर्वैव।
न्यूनं विद्धन्यूनासमद्वादशिकासुमुमुक्षूणां पुत्रवतांचपराअन्येषांपूर्वापुत्रवतोपिपर
वेति मदनरत्ने विद्धान्यूनान्यूनद्वादशिकाचसैवसर्वैः कार्येतिहेमाद्रिः मुमुक्षूणांपरा
सि अन्येषांपूर्वेति मदनरत्ने विद्धसमासमद्वादशीकानद्वादशिकाचमुमुक्षुभिःपरान्यैःपूर्वाका
र्या दशमीमिश्रितापूर्वा द्वादशीयादिलुप्यते शुद्धैवद्वादशीराजन्नुपोष्यामोक्षकांक्षिभिः इति
व्यासोक्तेः मोक्षकांक्षिग्रहणादन्येषांपूर्वैवसर्वत्रैकादशीकार्याद्वादशीमिश्रितानरैः
प्रातर्भवतुवामावाघ्रतानित्यमुपोषणम् इति पाद्मोक्तेः विद्धाधिकासमद्वादशीकाधिकद्वा
दशिकाचसर्वेषांपूर्वैव पारणाहेनलभ्येतद्वादशीकलयापिचेत् तदानीदशमीविद्धाप्यु

येष्वेकादशीतिथिरिति ऋष्यशृंगोक्तेः माधवमते तु अग्रहिणा पूर्वा यतिभिस्तु परा विद्धाधि
कन्यूनद्वादशिकामोक्षपापक्षयविष्णुप्रीतिकामैः परा कार्या गृहस्थेन तु नक्तं कार्यं एका
दशी च रात्रिशेषे त्रयोदशी उपवासं न कुर्वीत पुत्रपौत्रसमन्वित इति कौर्मे दिनक्षये उपवा
सनिषेधात् दशम्येकादशीविद्धा द्वादशीक्षयं गता क्षीणा सा द्वादशी तेषां नक्तं तु गृहिणः
स्मृतमिति वृद्धशातातपोक्तेश्च गृहिणः पूर्वत्रोपवासः एकादश्याः स्त्वन्यत्र वेधे [illegible] सम
त्वे वा द्वादश्याः न्यूनसमत्वयोरेकादश्यामुपवासः यानि तु दशम्यनुगतां हंति द्वादशीफलं ध
र्मापत्यधनादं च त्रयोदश्यां तु पारणमिति कौर्मादीनि दशमीवेधत्रयोदशीपारणयोर्नि
षेधकानि तानि विहितनिमित्तपराणि अगस्त्यवचनानि त्वावश्याचाकरे ज्ञेयानि यत्तु
कालसंदिग्धे बहुवाक्यविरोधेन संदेहो जायते यदा द्वादशी तु तदा ग्राह्या त्रयोदश्यां तु पा
रणमिति मार्कंडेयोक्तेः संदिग्धेषु च वाक्येषु द्वादशीं समुपोषयेत् तथा विवादेषु च सर्वे
षु द्वादश्यां समुपोषणं पारणं च त्रिदश्यामाज्ञेयं मामकीं मुने इति पाद्मोक्तेश्च वेधसंदे
हे ज्योतिर्विदां विप्रतिपत्तौ वा परा कार्येत्युक्तं तद्वैष्णवविषयमित्यलं बहुना अथात्रोप
युक्तं किंचिल्लिख्यते तत्र दशम्यामेकादशीयोगे दशमीमध्ये एकभोजनं कार्यं एकादश्यां
न भुंजीतेति तस्या एव निमित्तत्वात् न वेधस्य [illegible] नित्यत्वात्कालमागमपेक्षत इति
देवलोक्तेश्च केचित्तु एकादशीव्रतांगत्वेन पूर्वेद्युरेकभक्तविधानाद्विधिस्पृष्टे च

५४A

निषेधानवकाशात्काम्यव्रतांगेभोजनेनिषेधः प्रवर्त्ततेतेनैकादशीमध्येपिसर्वदि
नेभोजनमित्याहुः अत्राधिकारी माधवीये कात्यायनेनोक्तः अष्टवर्षाधिकोमर्त्योह्य
शीतिन्न्यूनवत्सरः एकादश्यामुपवसेत् पक्षयोरुभयोरपि इतिभविष्ये ब्रह्मचारीचनारी
चशुक्लामेवसदागृहीति यत्तुविष्णुः पत्यौजीवतियानारीउपोष्यव्रतमाचरेत् आयु
ष्यंहरतेभर्त्तुर्नरकंचैवगच्छति इतितद्भर्त्रननुज्ञाविषयमितिप्रागुक्तं उपवासासा
मर्थ्येतुमार्कंडेयकौर्मयोः एकभक्तेननक्तेनतथैवायाचितेनच उपवासेनदाने
ननद्विजोद्वादशीकोभवेत् अत्रएकभक्तेनयोमर्त्यउपवासव्रतंचरेदित्येकभक्ता
दिरुपवासशब्दस्तद्धर्मातिदेशार्थः तेनतत्रयुक्ताः सर्वेधर्माः संकल्पमंत्रेचैकभक्ता
दिपदैरूहः कार्यः इतिमदनरत्ने तथासामर्थ्येप्रतिनिधिनाकार्येदितिप्रागुक्तं
भुक्ताचरणेप्रायश्चित्तमाह माधवीये कात्यायनः अर्कपर्वद्वयेरात्रौचतुर्दश्यष्टमी
दिवा एकादश्यामहोरात्रंभुक्त्वाचांद्रायणंचरेदिति अथकाम्यव्रतविधिः लघुना
रदीये दशम्यादिमहीपाल त्रिदिनेपरिवर्जयेत् गंधतांबूलपुष्पादिस्त्रीसंभोगंम
त्ययणाः तत्रदशम्यांविनिःकौर्मे कांस्यंमांसंमसूरांश्चचणकानकोरदूषका
न् शाकंमधुपरान्नंचत्यजेदुपवासिनः स्त्रियं तथा शाकंमांसंमसूरांश्चपुनर्भोजन
मैथुने द्यूतमत्यंबुपानंचदशम्यांवैष्णवस्त्यजेत् मदनरत्ननारदीये अक्षारलवणास

वैद्यविद्यान्ननिषेविणः अपवनीतस्य शयनात् स्त्रियासंगमवर्जिता व्रतघ्नान्याहहेमाद्रौ
देवलः असकृज्जलपानाच्च सकृत्तांबूलचर्वणात् उपवासः प्रणश्येत दिवास्वापाच्च मै
थुनात् अशक्तौ तु मदनरत्ने देवलः अपत्सु चांबुपानेन नोपवासः प्रणश्यति अत्यजे
कट्ये विष्णुरहस्ये गात्राभ्यंगं शिरोभ्यंगं तांबूलं चानुलेपनं व्रतस्थो वर्जयेत्सर्वं यच्चान्य
दनिराकृतं प्रायश्चित्तमुक्तं निर्णयामृते संग्रहे स्तेनहिंसकयोः सर्वस्वं कृत्वा स्तेन्यं चाहिं
सनं प्रायश्चित्तं व्रती कुर्याज्जपेन्नाम शतत्रयं मिथ्यावादी वै देवस्यापेवकृशोंगावुनिषेवणे
अष्टाक्षरं व्रती जप्त्वा शतमष्टोत्तरं शुचिः ॐ नमो नारायणायेत्यष्टाक्षरः तत्रैव पैठी
नसिः तांबूलचर्वणे स्त्रीसंभोगे मांसनिषेवणे व्रतलोपो न चेत्कुर्यात्क्षमावद्भिर्वर्ज
नमिति संभोगो ऋतुकालादन्यत्र रेतःसेकान्तसंभोगमृते न्यत्र क्षयः स्मृतः
इति तत्रैव कात्यायनोक्तेः हेमाद्रौ वशिष्ठः उपवासे तथा श्राद्धे तथा श्राद्धे न कुर्या
द्दंतधावनं दंतानां काष्ठसंयोगो दहत्यासप्तमं कुलं काष्ठग्रहणात्स्त्रोष्टाध
निषेध इति हेमाद्रौ विष्णुरहस्ये श्राद्धोपवासदिवसे खादित्वा दंतधावनं गायत्र्या
शतं संपूतमंबुप्राश्य विशुध्यति निर्णयामृते व्यासः वर्जयेत्पारणे मांसं व्रतान्ते
ऽप्यौषधं सदेति एकादश्यां श्राद्धप्राप्तौ माधवीये कात्यायनमते उपवासो यदा नि
त्यः श्राद्धं नैमित्तिकं भवेत् उपवासं तदा कुर्यादाघ्राय पितृसेवितं मातापित्रोः स

29A

येप्राप्ते:भवेदेकादशीयदि अभ्यर्च्यपितृदेवांश्च आजिघ्रेत्पितृसेवितमिति हेमा
द्र्यादिसर्वनिबंधेष्वेवं एतेनैकादशीनिमित्तकं श्राद्धं द्वादश्यां कार्यमितिवदंतः
परास्तः किंच महालयेसपक्षः सकलः पक्ष्यः श्राद्धषोडशकं प्रतीतिस्तत्षोडशत्वं
पौषे एकादश्यां च मन्वादिश्राद्धं तयाहा परिज्ञानेव तत्पक्षैकादश्यां विहितं श्राद्धं वाधि
तमेवस्यात् यदपिस्मृतिचंद्रिकायां पठंति अन्नाश्रितानि पापानि तन्नो हृदानुरेव
च मांसं ति पितरस्तस्य नरके शाश्वतीः समाः इति तस्यापि रागप्राप्तिभुंजंगोचरस्य
वैधश्राद्धगोचरयत्नो महत्साहससमित्यलं योपि अकृतश्राद्धनिचयजलापिंडविना
कृतार्थइति लघुनारदीये एकादश्यां श्राद्धादिनिषेधः समाता पितृभिन्नविषयः एवं वा
क्येन द्वयरूपगात्त निश्चयः प्रतिगृह्य अव्रतघ्नान्याह मदनरत्ने देवलः सर्वभूतभयं व्याधिः
प्रसादो गुरुशासनं अव्रतघ्नानि पञ्चांते सकृदेतानि शास्त्रत स्कांदेपि अष्टौतान्यव्रत
घ्नानि आपो मूलं फलं पयः हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधं इदं वा तिसंक
ल्पविषयं नारदीयेति अनुकल्पेन राजप्रोक्तः क्षीरनं नोवरवर्णिनि मूलं फलं पय
सोपयस्ययभोग्यंभवेत्कुम्भे न त्वेव भोजनं कैश्चिदेकादश्यां प्रकीर्तितं अस्यापवादः शा
यनेच मरुद्घ्याने मत्स्यार्थपरिवर्तने नदोषः मूलफलाहारो हृदिशल्यं ममार्पयेत् एते
चाविरोधिनो निषिद्धाः सर्वव्रतेषु ज्ञेयाः तत्रैकादश्यां संकल्पः गृहीत्वौडुंवरेण

ऽंबारिपूर्णमुदङ्मुखः उपवासं तु गृह्णीयाद्यद्वा चार्थं वधारयेदिति माधवीये व
राहोक्तेः मंत्रस्तु विष्णूक्तः एकादश्यां निराहारः स्थित्वाहं परेहनि भोक्ष्यामि पुंडरीका
क्ष शरणं मे भवाच्युतेति शैवादीनां तु हेमाद्रौ सौरपुराणे सावित्र्याप्यथवा नाम्ना
संकल्पं तु समाचरेत् । शिवादिगायत्र्यो यजुर्वेदे प्रसिद्धाः वाराहे सत्त्वचार्यं ततो विद्वा
न्पुष्पांजलिमथार्पयेत् ततस्तज्जलं पिबेत् अष्टाक्षरेण मंत्रेण त्रिर्जप्तेनाभिमंत्रितं
उपवासफलं प्रेप्सुः पिबेत्पात्रगतं जलमिति कात्यायनोक्तेः मध्यरात्रे उदये वा द
शमीवेधे रात्रौ संकल्प इति माधवः दशम्यां संगदोषेण अर्धरात्रात्परेण तु वर्जयेच्च
तुरेयामान् संकल्पार्चनयोस्तदा विद्धोपवासेनुग्रस्तं दिनंत्यक्त्वा समाहितः रात्रौ से
पूजयेद्विष्णुं संकल्पं च तदाचरेदिति नारदीयोक्तेः तत्रैव पूजामभिधाय देवस्य पुर
तः कुर्याज्जागरं नियतो व्रती द्वादश्यां निवेदनमंत्र उक्तः कात्यायनेन अज्ञानतिमिरां
धस्य व्रतेनानेन केशव प्रसीद सुमुखो नाथ ज्ञानदृष्टिप्रदो भवेति नारदीये ब्राह्म
णान्भोजयेच्छक्त्या दद्याद्वै दक्षिणां ततः स्कांदे स्नात्वा चैवोपवासं तु योश्नाति द्वाद
शीदिने नैवेद्यं तुलसीमिश्रं हत्याकोटिविनाशनं द्वादश्यां च वर्ज्यान्याह बृहस्पतिः
दिवानिद्रां परान्नं च पुनर्भोजनमैथुनं क्षौद्रं कांस्यामिषं तैलं द्वादश्यामष्ट वर्जयेत्
हेमाद्रौ ब्रह्मांडपुराणे पुनर्भोजनमध्वानं भार आयासमैथुने उपवासफलं हन्यु

30A

दिवानिद्रांचपंचमी स्कांदे परान्नंकांस्यतांबूलेलोभंवितथभाषणंवर्ज्जयेदितिशेषः
विष्णुधर्मे असंभाष्यान्हिसंभाष्यतुलस्यतसिकादलं आमलक्याःफलंवापिपारणेप्राप्य
शुध्यति बृहन्नारदीये रजस्वलांचचंडालंमहापातकिनंतथा सूतिकांपतितंचैव
वउच्छिष्टंरजकादिकं व्रतादिमध्येसंस्पृश्यपाद्ययेषांधनिमत्तमः अष्टोत्तरसहस्रंतु
जपेद्वैवेदमातरं शातातपस्मृतिकेपिकार्यं सूतकेमृतकेवापिनत्याज्यंद्वादशीव्र
तं इतिविष्णूक्तेः तत्रत्यक्तंदानादिसूतकांतेकार्यं सूतकांतेनरःस्नात्वापूजित्वा
जनार्दनं दानंदत्वाविधानेनव्रतस्यफलमश्नुतइति मात्स्योक्तेः रजोदर्शनेपिका
र्यैकादश्यांनभुंजीतनारीह्यत्ररजस्वलेति पुलस्त्योक्तेः यदाद्वादश्यांश्रवणंदैन
दाशुद्धामध्येकादशीत्यक्त्वा तत्रैवोपवासःकार्यः शुक्लावायदिवाकृष्णाद्वादशीश्रव मा:
णान्विता तयोरेवोपवासस्त्रयोदश्यांचपारणमितिदीपोक्तेः एतेचनियमाःका
म्यव्रतेनियतो नित्यव्रतेसतिसंभवेकार्याः शक्तिमांस्तुपुनःकार्यान्नियमंसविशेषव
णमिति कात्यायनोक्तेः अशक्तौतुमाधवीयेव्रतस्यैवैवर्तेइति विज्ञायकुर्वीतावश्यमे
कादशीव्रतं विशेषनियमाशक्तोहोरात्रंभुजवर्जितइति अथाष्टौमहाद्वादश्यः
तत्रशुद्धाधिकैकादशीयुताद्वादशी उन्मीलनीसंज्ञा द्वादश्येवशुद्धाधिकावर्द्धतेचेत्सा १
वंजुली वासरत्रयस्पर्शिनी त्रिस्पृशा अग्रेपर्वणःसंपूर्णाधिकाचेत्पक्षवर्धिनी पु

31

ष्य संयुता जया श्रवणायुता विजया पुनर्वसुयुता जयंती रोहिणीयुता पापनाशिनी
तत्तद्यायपक्षय मुक्तिकाम उपवसेत् अथ मलदेमा द्वैतेयं एकादशी द्वादश्योरेकत्वे तं
त्रैकोपवासः पार्थक्ये तु राजस्योपवासद्वयं एकादशीमुपोष्यैव द्वादशीं समुपोषयेदि
ति विष्णुरहस्यात् अशक्तौ तु द्वादश्यामेव एवमेकादशीं त्यक्त्वा द्वादशीं समुपोषयेत्
पूर्ववासरजं पुण्यं सर्वं प्राप्नोत्यसंशयमिति तत्रैवोक्तेः यदा न स्याद्द्वादशी तदोक्तं मात्स्ये ।
यदा भवति अल्पापि द्वादशी पारणादिने स्नानार्चनक्रियाकार्या दानहोमादिसंयुता इति
संकटे तु माधवीये देवलः संकटे विषमे प्राप्ते द्वादश्यां पारयेत्कथं अद्भिस्तु पारणं कु
र्यात्पुनर्भुक्तं न दोषकृदिति संकटे त्रयोदशी श्राद्धप्रदोषादौ अत्र केचिदाहुः अपकर्ष
वाक्यान्यनाहिताग्निविषयाणि अग्निहोत्रादीनां श्रौतत्वेनापकर्षायोगादिति द्वाद
श्यां च प्रथमपादमतिक्रम्य पारणं कार्यं द्वादश्याः प्रथमः पादो हरिवासरसंज्ञकः त
मतिक्रम्य कुर्वीत पारणं विष्णुतत्परः इति निर्णयामृते मदनरत्ने च विष्णुधर्मोक्तेः
अत्र केचित्संगिरंते यदाल्पा द्वादशी तदापि प्रातर्मुहूर्तत्रयेऽपि पारणं कार्यं सर्वेषा
मुपवासानां प्रातरेवाह्नि पारणमिति वचनादिति अस्मद्गुरवस्तु बहूनां कर्मकालानां वि
नाकारणं बाधायत्तेः प्रागुक्तवचनैः स्वाल्पद्वादश्यामेवापकर्षविधानादपराह्ण एव
कार्यं प्रातःशब्दस्तु सायं प्रातर्द्विजातीनामशनं श्रुतिचोदितमिति वदपराह्णवाचि

31A

ष्युपपन्नः नचवाकार्यवैयर्थ्यंपुनर्भोजनस्यापारणानिवृत्त्यर्थत्वात्तस्येत्याहुः ।
प्रमादेन एकादश्युपवासातिक्रमेपरार्केवाराहे एकादशीविद्धुनाचेत्द्वादशीपरतः
स्थिताः उपोष्यद्वादशीतत्रयदिच्छेत्परमंपदमिति कैश्चित्तुविष्णुनाचेदितिपठितं ।
अत्राविरोधिनोनियमाः सर्वव्रतेष्ववोध्याः अन्येचनवरात्रेवक्ष्यन्तइतिदिक् इति
श्रीरामकृष्णभट्टात्मजकमलाकरकृतेनिर्णयसिंधौएकादशीनिर्णयः द्वादशीतुप
रैव युग्मवाक्यात् द्वादशीतुप्रकर्तव्याएकादश्यायुताप्रभो इतिस्कांदाच्च त्रयोदशीतु
सर्वमतेपूर्वा कृष्णात्रयोदशीतिथिःपूर्वाः सितोपापराःपश्चादिति दीपिकोक्तेः
शुक्लत्रयोदशीपूर्वापराकृष्णत्रयोदशीतिमाधवाच्च चतुर्दशीतुसर्वमतेकृष्णपूर्वाशु
क्लापराः उपवासेतुव्यत्ययपरेतिमदनरत्ने पौर्णमास्यमावास्येतुसावित्रीव्रतंविना
परेग्राह्येभूतविद्धेनकर्त्तव्येदर्शपौर्णिमे कदाचन वर्जयित्वामुनिश्रेष्ठसावित्रीव्रतमुत्तम
मिति ब्रह्मवैवर्त्तात् अमायांयोगविशेषोपरार्केशातातपः अमावस्यांभवेद्वारोयदाभू ।
मिसुतस्यवै जाह्नवीस्नानमात्रेणगोसहस्रफलंलभेत् अमावासोमवारेणरविवारेणस
प्तमी चतुर्थीभौमवारेण विषुवत्सदृशंफलं तत्रैवव्यासः सिनीवालीकुहूर्वापियदिसोमदि
नेभवेत् गोसहस्रफलंदद्यात्स्नानेवैमौनिनाकृतं हेमाद्रौवृद्धमनुः श्रवणाश्विधनिष्ठार्द्रा
नागदैवतमस्तके यद्यमारविवारेण व्यतीपातःसउच्यते नागदैवतमश्लेषामस्तकोमृगशिरः ।

प्रथमपाद इत्यन्ये सचसर्वैर्बोध्यः अथेष्टिकालः गोभिलः पक्षान्ता उपवस्तव्याः पक्षादयो ऽभियष्टव्या
इति उपवासोन्वाधाने तत्र मध्याह्नात्पूर्वं चापर्वप्रतिपत्संधौ तद्दिने यागः पूर्वाह्णे वाथ मध्याह्ने
यदि पर्व समाप्यते उपोष्य तत्र पूर्वेद्युस्तदहर्याग इष्यते इति लौगाक्षिवचनात् अत्र च द्वेधा वि
भागः आवर्तनात्पूर्वाह्णोथ पराह्णस्ततः परः मध्याह्नस्तु तयोः संधिर्यदावर्तनमुच्यते इति मद
नरत्नेवचनात् मध्याह्नादूर्ध्वं संधौ माधवमते परेह्नि यागः अपराह्णेप वा रात्रौ यदि पर्व समा।
प्यते उपोष्य तस्मिन्नहनि श्वोभूते याग इष्यते इति लौकाक्षिरोक्ते हेमाद्रिस्तु पराह्णसंधाव
पि परेद्दिने प्रतिपच्चतुर्थांशं चंद्रोदये च सति द्वितीयादिषु त्र्यंशेषु सत्सु पूर्वेद्युर्यागः पर्वणों
शे द्वितीये तु यष्टव्यं तु द्विजातिभिः द्वितीया सहिते यस्मात् इष्टव्यं त्वाश्वलायनात् इति द्वितीये।
त्विति केचित् कात्यायनेन तुर्यांशपरं तुरीये त्विति मूलपाठेऽपपाठः स्वबाधार्थमेव तथा।
भूतां पंचदशीं त्यक्त्वा द्वितीयाक्षयगामिनी चतुर्घटीरमायास्यात् भूते कव्यादिकीक्रिये
ति बौधायनवचनाच्चेत्यरोचिवान् मदनरत्नेपि चतुर्दशी चतुर्थांशमा अमावास्या न हरय
ते सोमभूते प्रतिपद्वेत्स्यात् सर्वां तत्रैव कारयेदिति यत्तु माधवः यस्तु वाजसनेयी स्यात्तस्य
संधिदिनात्पुरा नह्याप्यन्वाहितिः किंतु सदा संधिदिने हि सेत्याह यच्च कालादर्शेप्युक्तं।
आवर्तनादधः संधिर्यद्यन्वाधाय तद्दिने परेद्युरिष्टिरित्याहुर्विप्रा वाजसनेयिन इति।
यच्च मदनरत्ने मध्यंदिनात्स्यादहनीह यस्मिन्प्राक्पर्वणोः संधिरियं तृतीया।

32A

सारस्वर्विकावाजिसनेयिमत्यातस्यामुपोष्यायपरेद्युरिष्टिरिति एतत्पौर्णमासीपरमि
ति तत्रैव आवर्त्तनोर्ध्वमर्वागस्ताद्वाजौ वास मावेदे मध्य त्रादर्वीक्षमाप्रात्तीयेत्यर्थः
तत्कर्कभाष्य देवजानी मृशिअनंतभाष्यादि सकलतच्छाखीयग्रंथविरोधाच्छंदानना
दराच्चोपेक्ष्यं पौर्णमास्यां विशेषमाह कात्यायनः संधिश्चेत्संगवादूर्ध्वं प्राक् पर्यावर्त्त
नाद्रवेः सा पौर्णमासी विज्ञेया सद्यस्कालविधौ नरैः अमायां विशेषमाह बौधायनः द्वि
तीयां त्रिमुहूर्त्तां चेत्प्रतिपत्तयायराकिकी अन्वाधानं चतुर्दश्यां परतः सोमदर्शनात् कात्या
यनश्च यजनीयेह्नि सोमश्चेद्वारुण्यां दिशि दृश्यते तत्र व्याहृतिभिर्हुत्वा दंडं दद्यात् द्विजा
तयइति एतच्च बौधायनवाजसनेयिविषयं तैत्तिरीयस्तु नोनं चेद्दुर्दर्शनेपि यागउक्तः ए
षां वै सुमनानामेष्टिर्यामद्येजानं पश्चाच्चंद्रमा अभ्युदेत्यस्मिन्नेवास्मै लोके धुकं भव
तीति ऐतरेयेपि यदहः पश्चाच्चंद्रमा अभ्युदेति तदहर्यजेत्तिमं लोकानभ्युदेतीति
इति मदनरत्नेप्येवं आपस्तंबभाष्यार्थसंग्रहेप्येवं अतः पक्षद्वयस्यापि स्वस्वशाखाव्यवस्थे
ति तच्चे दूषयेत्याश्वलायनानां इति पर्वान्तसंधिविषयमिति माधवः शेषपर्वणोष्टौ विशे
षमाह माधवीयेगार्ग्यः प्रतिपद्यप्रविष्टायां यदि चेदिष्टिः समाप्यते पुनः प्रणीय कर्त्तव्ये
ष्टिः कर्त्रे अयागविद्भिः गृह्यागेनैवनियमइति मदनपारिजातः एवं पर्वान्तसंधौ प्रति
पदस्तु त्रयोंशा यागकालउक्तः कांश्चित्प्रतिपदंशो शेषियागः संधिर्वेद्यपराह्णेस्याद्यागा

नि॰सिं॰
३३

33

प्राप्तः परेहनि कुर्वाणः प्रतिपद्भागे चतुर्थेपि न दुष्यति शातातपोक्तेः एतत्स्वर्गिमा
परमिति मदनरत्ने पर्वणः प्रतिपदः समस्य ह्रस्वेर्द्धं प्रक्षिप्य संधिर्ज्ञेयः तदाह माध
वः वृद्धिः प्रतिपदो यास्ति तदर्धं पर्वणि क्षिपेत् समस्याद्वै तयोः क्षिप्ता संधिर्निर्णयो
सदेति कात्यायनोपि परेह्नि घटिकान्यूनास्तथैवाभ्यधिकाश्च याः तदर्धं लघुपक्षस्य सर्व
स्मिन् ह्रासवृद्धी प्रकल्पयेदिति एवं स्मार्तस्थालीपाकेपि ज्ञेयं तत्रोद्दिष्टस्थालीपाका
धानन्तरं गृहप्रवेशनीयहोमानन्तरं भाविन्यां पौर्णमास्यां प्रारंभणीयो न तु दर्शे यथा
रंभे मलमासयोर्वा मासस्थ शुक्रास्तादि भवति तदाप्यारंभः कार्यः यानि तु उपरागो
धिमासवृत्त्यादि प्रथमपर्वणि तथा मलिम्लुचे पौषे नान्वारंभणमिष्यते गुरुभार्गवयो
मौंढ्ये चंद्रसूर्यग्रहे तथेति संग्रहवचनानि तानि प्रतिपाते पक्षे सति तयोः प्रशस्ते मासि
पुण्ये पर्वत्वयनपराके गर्गवचनात् प्रयोगपारिजाते उक्तं चैतत्प्रयोगरत्ने भट्टैः कालाद
र्शे तु नामकर्म च जातेष्टिमिति पाठः याज्ञिकास्तु आधानानन्तरा पौर्णमासी चेन्मल
मासगता तस्यामारंभणीयादीन्न कुर्वीत कदाचनेति त्रिकांडमंडनवचनाच्छुद्धकाल
एव विकृतेष्टिं कृत्वा आरंभं कुर्वन्तीत्याहुः कालादर्शे स्मृतिसंग्रहेपि प्रारंभं दर्शप
र्णेष्ट्योरग्निहोत्रस्य चादिमं प्रतिष्ठाः पंचकर्माण्या मलमासे विवर्जयेदिति अथ विर
हितेष्टिः तत्रापस्तंबः यदीष्ट्या यदि पशुना यदि सोमेन यजेत सोमावास्यायां पौ

राम
३३

33A

र्णमास्यां चेति अत्र प्रकृतिः कालेसिद्धेऽपि सद्यःकालतां विधेयात्तृतीयपर्यासंगतोक्तेः
पौर्णमास्यमावास्याशब्दाभ्यां तदंत्यक्षणोपलक्ष्यते तेन तदहस्त्यहोरात्रेऽस्त्यर्थमाह रामां
डारः माधवोपि इत्यादि विकृतिः सर्वापर्वण्येवेति निर्णीयत इति अत्र विशेषमाह त्रि
कांडमंडनः कात्यायनस्त्रस्त्रावर्तनात् प्राग् यदि पर्वसंधिः स्यात्तु तास्मिन् प्रकृतिवि
कृत्याः तदैव यागः परतो यदि स्यात्तस्मिन् विकृत्या प्रकृतेः परेद्युरिति धूर्तस्वाम्याद
योप्येवमाहुः यश्चोक्तेति संगाया विकृतेः पर्वकालत्वादावर्तनात्प्राक् संधौ संधिम
ति तो यदे तुरिति प्रकृतेः प्रति पदि समाप्तिनियमात् प्रकृत्यनंतरं प्रति यदि विकृत्ययो
गात् एवं च विकृतिरित्युक्तं तेंगरत्ने सारस्यिना यद्यपि प्रकृतिः पर्वत्वादपर्वमंते स्था
दित्याय स्तवेनोक्तं तथापि हेतुवादेन स्मृतिमूलत्वाभावादंगोवा समभिव्याहारादि
ति वदप्रामाण्यमिति तद्दाशयः आग्रहणेतु विशेषं वक्ष्यामः अन्वारंभणीयातु च
तुर्दश्यां कार्येति हिरण्यकेशिसूत्रोक्तोनात्र दत्तीये अन्येषां पर्वण्येव यदेशे कालांतरम
प्याह बौधायनः अमावास्येनवाहविषेस्थान क्षत्रे वेति अत्र कृष्णपक्षे कृत्तिकादिविशा
खांते षुदेवनक्षत्रेष्विति केशवस्वामी व्याचख्यौ चातुर्मास्येष्वपि कादशाह यथाप्रयो
गपक्षयोर्निक्षत्रेष्वप्यारंभः पावत्त्रोवसंवत्सर प्रयोगयोस्तु फल्गुण्यां चैत्र्यां वारंभः
पशौ तु विशेषमाह कात्यायनः अर्धादर्ध्वं भवति नियतं पर्वसंधिः परस्तात्तु

मा

34

त्वात्तस्मिन्नहि निरूप्यं स एव मुख्यः ॥ आरभ्याद्य प्रकृतिरथ चेत्पर्वसंधिः पुरस्तात्स्या
त्ता तस्मिन्प्रकृतिमथ तत्स्यात्पक्षः स एव ॥ अधिकारपक्षस्त्वग्नीषोमीयेण सवनी
येन वा सह यागान्ते त्रो या कार्य इति त्रिकांडमंडनः ॥ सोमे त्वापस्तंबः ॥ अमावास्यायां दी
क्षा यजनीये वामावास्यायां यजनीये वास्तु त्यमहः पौर्णमास्यां दीक्षा यजनीये वा पौर्ण
मास्यां यजनीया स्तुत्यमहः इति बौधायनस्तु ॥ पूर्वपक्षस्य प्रथमे ह्नि दीक्षेत दृ
ष्टा वा नक्षत्रयोगे चेति पूर्वपक्षः शुक्लपक्षः नक्षत्रयोगे चेत्यपरार्धः चैत्र्यादिपूर्ण
मास्या चित्रादिनक्षत्रयोगे दीक्षेतेति ॥ आधाने तु पर्वणि नक्षत्रे वेत्युक्तं तत्र पर्वन क्षं
गार्हपत्यमादधातीत्यादिकर्मकालव्यापि ग्राह्यं दिनद्वये तत्त्वे परं ग्राह्यं संकल्पस्य पर्व
णि लाभात् पर्वनक्षत्रयोगे तदेव ग्राह्यं यत्र त्रीणि सन्निपतितान्यत्र नक्षत्रं च पर्व तत्र स
र्वं विप्रतिषेध ऋतुनक्षत्रं च बलीय इति हिरण्यकेशिसूत्रात् ॥ अश्ववर्षे सते ब्राह्मणो
ऽग्निमादधीतेत्यादि रेणुकारिकायां तु माघादि पंच मासेषु श्रावणे वा स्विने तथा मा
र्गशीर्षे शुक्लपक्षे आधानमथ कारयेदित्युक्तं अत्रमलं भ्यंग्य ॥ आधाननक्षत्राणि
त्वापस्तंबस्त्रे कृत्तिका रोहिणी मृगशीर्ष पुनर्वसु पुष्य पूर्वोत्तरा पूर्वाषाढोत्तरा
षाढा हस्त चित्रा विशाखानुराधा श्रवणोत्तराभाद्रपदा इति सोमपूर्वाधाने विशाख
माह ॥ आपस्तंबः सोमेन यक्ष्यमाणो नादधानो नार्हेन्नक्षत्रेन्नत्रामिति अग्रप्रवृ

34A

ग्न्याधानकालबाधः तेन सोमस्य वसंतकालता न बाध्यत इति रुद्रदत्तो नारायणश्चैतो
चोक्तं तंत्ररत्ने वार्त्तिके च तेवा एते उभयेऽप्यपहतपाप्मानोऽत्यवचः एष वा उ ह्यन्नादस्त्वे याज्ञ नो
पहे नायदैवेन कदाचन यज्ञ उपमेद्यादधीतेत्यत्रो नारायणरूपे दैगयवेदाजि एग यन।
रूपे च पि ऽमस्तद्यामतुभयमस्तद्वयं सोमाधाने शत्नपक्षे विशिष्टविहितं तदेकवाक्य
तया शास्त्रांतरे धिनतेन स्व सर्वेदि… सोमकालबाध एव ग्न्याधानकालबाधस्य यदैवे
नेमश्रद्धायनमेत दादधीतेत्यस्यां शाखायां वाक्यांतरेण सिद्धत्वात्सोमकालबाधार्थमे
वेदमित्युक्तं धर्त्तस्वामी तत्तस्यापि न स्वसर्वेदितिलिखनादुभयकालबाधं मन्यते श्रीरा।
मेश्वरस्तु कालांतरविधानं वा सर्वकालानादरो वेति पक्षद्वयमुक्तवान् तत्राद्येकृत्ति
कादिकालांतरस्य यथाध्यानेव संताद्यबाधेन विधानं तथा सोमेप्युदगयनपूर्व
पक्षपुण्याहसंनिपाते यत्र कालानादरो इति द्वंदोगस्त्रोक्तोदगयनाबाधेन सोमाभि
संधिसंधिरूपकालांतरविधानादुदगयनं त्वपेक्ष्यतम्भ्युक्तं द्वितीयपक्षे तु यदैवैनं यज्ञ उप
नमेदिति सर्वकालानादर उक्त इति भारद्वाजस्त्रात्सर्वेशाढस्य च विश्वजित्सर्वपृष्ठर
तिवत्तद्वयोरप्रयोगात्सर्वकालबाध इति तेन दक्षिणायने पि भवतीत्युक्तं बहृगुरुभाष्ये दे
वत्रातभाष्येन त्रत्ने च बहृस्यापि अरत्र भवतीत्युक्तमित्यादिक् आद्धत्वमावास्यात्रेधा
विभक्तादिनदर्शो यांशेयो परान्तभागस्तद्व्यापिनी साग्निकैर्ग्राह्या पिंडान्वाहार्यके स्मा

द्धं सो होरा जनि शस्यते वासरस्य तृतीयांशे नातिसंध्यासमीपतः इति कात्यायनोक्तेः
दर्शश्राद्धं तु यत्प्रोक्तं पार्वणं तत्प्रकीर्त्तितं अपराह्णे पितॄणां च तत्र दानं प्रशस्यते इति शाता
तपोक्तेश्च दिनद्वये तत्सत्वे सर्वापराह्णव्यापी दर्शो ग्राह्यः पक्षभेदे पुरेव विहितः सर्वा
पराह्णास्थितेत्युक्ति दीपिकोक्तेः यत्तु कार्ष्णाजिनिः भूतविद्धाममावास्यां मोहादज्ञानतोपि
वा श्राद्धकर्मणि ये कुर्युस्तेषामायुः प्रहीयते इति तदपराह्णे चतुर्दशीवेधपरमिति श्राद्धहे
माद्रिः अपराह्णव्याप्तिपरमिति माधवः दिनद्वयेपराह्णव्याप्त्यभावे शतो व्याप्तौ च तिथिक्षये
पूर्वेति हेमाद्रिः यदा चतुर्दशीयामं तुरीयमनुपूरयेत् अमावास्या क्षीयमाणा तदैव श्राद्धमि
ष्यते इति कात्यायनोक्तेः चतुर्दशीयाम जयं स्यादित्यर्थः क्षीयमाणा परदिने पराह्णव्यापिनी
नेत्यर्थः व्यतिरेकमाह वर्द्धमानाममावास्यां लक्षयेदपरेहनि यामांस्त्रीनधिकान्वापि पितृय
ज्ञस्ततो भवेत् ततः श्राद्धं च दिनद्वयेपराह्णव्याप्त्यादौ तिथिद्वैधे च हारीतः त्रिमुहूर्त्ताकर्त्तव्या
पूर्वा खर्वा च वर्द्धके कुहूरघधृतिभिः कार्या यथेष्टं साममौलिभिः त्रिमुहूर्त्ताभावे तु पूर्वा नेत्य
र्थः पिंडपितृयज्ञस्तु कात्यायनैर्यागदिनात्पूर्वेद्युः कार्यः पूर्वा वा गत्वा तिथि ३ पितृयज्ञ इति
तत्सूत्रात् व्याख्यातं चैतत्कर्काचार्यैः पूर्व एव दर्शात् पिंडपितृयज्ञो न पश्चात् कुतः अंगत्वा
त् तथा च श्रुतिः तस्मात्पूर्वेद्युः पितृभ्यः क्रियते उत्तरमहर्देवान्यजंत इति पूर्वेद्युः पितृ
भ्यो यज्ञेन प्रातर्देवेभ्यः प्रतनुत इति च तेन तन्मतेंगमेवासौ न तु अंगी वा सममिव्या

35A

ह्लारादिति तेन कर्ममते चतुर्दशीयुक्तदर्शे पिंडपितृयज्ञ इति अनंतभाष्ये तु परेद्युरित्यु-
क्तं अत्र द्वेधा व्याचारो दृश्यते आपस्तंबानां तु परदिने मुहूर्त्तमपि दर्शसत्वे तत्रैव पितृय-
ज्ञः तदाहापस्तंबः अमावास्यायां यदहश्चंद्रमसं न पश्यंति तदहः पिंडपितृयज्ञं कुर्वीतेति र
अस्य रुद्रदत्तो व्याख्या पिंडैर्युक्तः पितृयज्ञः पिंडपितृयज्ञः स च कर्मांतरं न तु दर्शशेषः
यथा वक्ष्यति पितृयज्ञः स्वकालविधानादनंगं स्यादिति तं च यदहश्चंद्रमसं न पश्य-
ति पंचदश्यां प्रतिपदि वा तदहः कुर्वीत यदहस्तयोः संधिस्तदहरित्यर्थ इति श्रीरामांडारो
प्याह पिंडपितृयज्ञस्तु पर्वसंधिमदहोरात्रोपराह्ण इति अतः पर्वसंधिदिने पितृयज्ञः
शतपथश्रुतिरपि यदेवैष पुरस्तान्न पश्चाद्ददृशेथ पितृभ्यो ददातीति पर्वसंधिदिने
हि पर्वसंधिदिने हि पूर्वतः पश्चाद्वा चंद्रो न दृश्यत एवेत्यर्थः सत्याषाढोपि पितृयज्ञे
प्रक्रम्य दृश्यमानेप्युपोष्य श्वोभूते यजेतेत्याह हेमाद्रिस्तु अमावास्याराद्वासिर
यिवचनं एव पर्वांकाय स्तंबसूत्रे यदुक्तं न पश्यंतीति तत्र क्षयोभिप्रेतः अन्तश्चंद्रे
दृश्यमाने चंद्रस्य क्षीणत्वात्तद्युक्तदर्शे पितृयज्ञः पितृयज्ञं तु निवर्त्य विप्रश्चंद्रक्षये
ग्निमानिनिमन्वहैः यदुक्तं यदहस्त्वेव दर्शनं नैतीति चंद्रमाः तत्क्षयापेक्षया तेयं
स्त्रीणां श्वोभूतजनि चेत्यपि यदुक्तं दृश्यमाने तच्च तद्दृश्यापेक्षयेति च कात्यायनोक्ते दृश्य-
माने प्येकदृतिगोभिलोक्तेः पत्न्या संध्यां गतः सोमो मस्त्रणा नाभिवदृश्यते अपराह्णे

क्षयस्तस्यां पिंडानां करणं ध्रुवं इति हारीतोक्तेः चंद्रक्षयकालश्चोक्तः कात्यायनेन
अष्टमेंशेचतुर्दश्याः क्षीणो भवति चंद्रमाः अमावास्याष्टमेंशेतु पुनः किल भवे
दणुरिति तेन पूर्वेद्युरेव पितृयज्ञ इत्युच्चिवान् कर्काचार्यैरप्यपराह्णे पिंडपितृ
यज्ञः चंद्रादर्शनेमावास्यायामिति कात्यायनसूत्रे दर्शनेन क्षय एव उक्तः तस्मिन्
क्षीणे ददातीति श्रुतेः अतस्तन्मते चतुर्दशीयुक्तदर्शे पितृयज्ञे सति परदिने या
गोपि सिद्धः तदेतत्सर्वं यत्कृष्टमपि हेमाद्रिकर्कादिव्याख्यानं आपस्तंबैरनभ्युपग
मात्कात्यायनबौधायनादिविषयं आश्वलायनानामपि शेषपर्वणि पिंडपितृ
यज्ञः तथाच सूत्रं अमावास्यायामपराह्णे पिंडपितृयज्ञः इति अत्र नारायणवृत्तिः
अमावास्याशब्दः प्रतिपत्पंचदश्योः संधिवचनोप्यत्रापराह्णशब्दसमन्वया
त्तदन्यहोरात्रेवर्तते तस्यापराह्णे तृतीये भागे पिंडपितृयज्ञः कार्यः श्वोपवस
थेयजनीयेवाहनि यदा त्वहोरात्रसंधौ तिथिसंधिः स्यात्तदैव सद्य एवाहनि
कार्यइति अत एव मुहूर्तमप्यमावास्या प्रतिपद्यपि चेद्भवेत् तदन्तमभ्यर्थं नेयं
पर्वशेषं तु पर्ववदिति हेमाद्रौ वचनं पिंडपितृयज्ञपरमुक्तं प्रयोगपारिजाते अयं च
स्मार्ताग्निमतां संपूर्णे दर्शे श्राद्धव्यतिरेकेण कार्यः अतिरेको नाम उभयोः स
हानुष्ठानं एतेन च स्थालीपाकेन सह पिंडार्थं मुध्धत्येति इति कर्कोक्तेः

36A

खंडपर्वणि तु केचिदाहुः पूर्वेह्नि पिंडपितृयज्ञव्यतिषंगेण श्राद्धं कृत्वा परेह्नि केव-
लः पिंडपितृयज्ञः कार्यः इति कृतान्न च एकस्य च पर्वणु मासि मास्यपपार्वणं काम्यमा-
ष्टुदये एकस्यामेकोद्दिष्टम पार्वणमित्युदाहृत्य पूर्वेष्टुश्चरुं स्थालीपाकादुद्धृत्याग्नौ-
करणमित्युक्तेर्दर्शश्राद्धे स्थालीपाको नियत इति गम्यते स्थालीपाकश्च पितृयज्ञ
एवेति पूर्वदिने व्यतिषंगः सिद्धः प्रयोगपारिजाते तु वार्षिकश्राद्धादेरपि व्यतिषंगउ-
क्तः किमुत दर्शश्राद्धस्य न्यायविदस्त्वाहुः सूत्रस्य हानेश्च संपूर्णदर्शविषयत्वात्
खंडपर्वणि पूर्वदिने केवलं श्राद्धं परदिने च केवलः पितृयज्ञः कार्यः अत एवोक्तं
वृत्तिकृता नात्र पूर्वस्थालीपाकोपेक्ष्यते सर्वश्राद्धेष्वप्रसंगादिति प्रयोगपारिजाते
ऽपि रक्षितहविषैव पूर्वदिने च श्राद्धेग्नौकरणमेव न पाणिहोमः चरुश्चेद्धोमस्साग्नौ
नौ वह्नौ होमो विधीयते पित्र्यब्राह्मणहस्ते स्यादुत्तरेषु चरुश्चेपीति परिशिष्टे नियमा-
त् न च लौकिकाग्नेः पक्वस्य कथं गृह्यवह्नौ होमः नान्याग्नौ पक्वमन्याग्नौ जुहुयात् इति नि-
षेधात् मैवं श्राद्धस्य गृह्यत्वेन स्मार्ताग्न्यायत्तत्वानाग्नेश्च कर्तव्यत्वात् तस्मात्सर्वेषु के-
वलं श्राद्धं न व्यतिषंगः इदमेव च युक्तं आहिताग्निनां तु सर्वाधानिनामर्धाधानिनां वा
संपूर्णे खंडे च दर्शे श्रौताग्नौ पृथगेव पितृयज्ञः कार्यः न तु दर्शश्राद्धव्यतिषंगेण
तिविस्तरभीतेर्विरमामः संपूर्णे दर्शे विशेषमाह लौगाक्षिः पक्षांतं कर्म निर्व-

र्यं वैश्वदेवं च साग्निकः पिंडयज्ञं ततः कुर्यात्ततोन्वाहार्यकं बुधाः इति पक्षांते कर्मा
न्वाधानं अन्वाहार्यकं दर्शश्राद्धं प्रथमेव साग्नेर्जीवपितृकस्य पिंडपितृयज्ञकालो
ज्ञेयः तस्यापि कात्यायनहोमांतमनारंभो वेत्याम्नानात् पिंडपितृयज्ञाकरणे प्रायश्चि
त्तमाह पराशरमाधवीये कात्यायनः पितृयज्ञात्यये चैव वैश्वदेवात्यये पि च भोज
ने पतितान्नस्य चरुर्वैश्वानरो भवेदित्यलं प्रकृतमनुसरामः निरग्निकादिभिस्त्वमा
वास्यापराह्णव्याप्यलाभे कुतपकालव्यापिनी ग्राह्याः अत विद्धाप्यमावास्या प्रति
पन्मिश्रितापि वा पित्र्ये कर्मणि विद्वद्भिर्ग्राह्या कुतपकालिकीति हारीतोक्तेः इ
दं च निरग्निकादिविषयं सिनीवाली द्विजैः कार्या साग्निकैः पितृकर्मणि स्त्री
भिः शूद्रैः कुहूः कार्या तथा चानाग्निकैर्द्विजैः इति लौगाक्षिवचनात् अत्र साग्निरौ
पासनाग्निरपीति मदनपारिजाते उक्तं कुतपश्चापराह्णव्याप्यलाभे तु कल्प्यः अप
राह्णद्वयव्यापी यदि दर्शस्तिथिक्षये आहिताग्नेः सिनीवाली निरग्न्यादेः कुहूर्मते
ति आवालिनाभावे विधानात् तेन साग्नीनां निरग्नीनां वा पराह्णव्यापिन्येव मुख्या
तिथिसाम्यवृद्धिक्षयैः समव्याप्तौ खर्वादिनानिर्णयः वैषम्ये धिकादिन इत्यपरा
ह्णस्पर्शे कुतपव्यापिनीति माधवः इदमेव युक्तं हेमाद्र्यादिमते तु कुतपव्यापिन्ये
व निरग्न्यादेर्मुख्या सिनीवाली दृष्टचंद्रा तथा च व्यासः दृष्टचंद्रा सिनीवाली नष्ट

37A

चंद्रार्कहस्तस्तेति पूर्वदिने परदिने एव वा न व्यापित्वे सैव ग्राह्या अंशेन व्यापित्वे वै
षम्ये धिककालव्यापिनी ग्राह्या द्विनद्वये शेतः समव्याप्तौ तिथिक्षये पूर्वा वृद्धौ सा
म्ये च परा तिथिक्षये सिनीवालीति तिथिवृद्धौ कुहूस्तस्मात् साम्येपि च कुहूर्ज्ञेया वेद
वेदांगवेदविभिरिति प्रचेतो वचनात् दिनद्वये संपूर्णा कुतपव्याप्तिस्तत्र तिथिवृद्धा
वेव भवतीत्यनंतरवचनात् परैवेति कुतपस्तु अह्नो मुहूर्त्तो विख्यातो दशपंचच सर्व
दा तत्राष्टमो मुहूर्त्तो यः स कालः कुतपः स्मृतः इति मात्स्यात्तेः तिलादानपितृदेव
प्रीत्यर्थोपवासादौ तु परा ग्राह्येत्यन्यत्र विस्तरः दर्शे च मासिकवार्षिकादिश्राद्ध प्राप्तौ
कालदर्शे विशेष उक्तः दर्शस्य चोदकुंभस्य दर्शे मासिकयोरपि नित्यस्याचाब्दिकस्या
पि दार्शिकाब्दिकयोरपीत्युक्त्वा संप्राप्ते ते देवताभेदाः श्राद्धयुग्मं समाचरेत् निमित्ता
नियतिश्राद्धपूर्वानुष्ठानकारणमिति निर्णयदीपेपि नष्टचंद्रे यदा काले न याह
दिवसो भवेत् वैश्वदेवं क्षयं श्राद्धं कुर्यात्प्राग्दर्शकर्मणः अमाश्राद्धं चानुपनीतोपि कु
र्यात् श्राद्धस्तु लपाणौ अमावस्याष्टकाकृष्णपक्षपंचदशीषु चेत्युपक्रम्य एतच्चानु
पनीतोपि कुर्यात्सर्वेषु वर्णेषु श्राद्धं साधारणं नाम सर्वकामफलप्रदं भार्याविरहितो
प्येतत् प्रवासस्थोपि नित्यशः शूद्रोप्यमंत्रवत्कुर्यात् अनेन विधिना बुध इति मात्स्या
त्तेः अग्निश्राद्धातिदाने प्रायश्चित्तमुक्तं [illegible] विधाने न्युब्जवाचं जपेत्तमंत्रं शतवारं दिने

लिं॰स॰
३८

38

ग्रमाग्न्यादेः यदा नास्ति तदा संप्रणीमेति तत्र अत्र सर्वत्र साग्निकपदेनाहिताग्निस्मा

र्त्ताग्निमांश्च गृह्यते विच्छिन्नाग्निकादिश्च निरग्निकः तथा च हेमाद्रिरग्नौकरणप्रकरणे

साग्निरग्नावेवनाग्निस्तु द्विजपाणौ वाप्सु वा कुर्यादग्नौक्रियां नित्यं लौकिके नेति

विच्छिन्नमिति स्मृतिवाक्यमुदाहृत्य पत्नीस्वीकृतौपासनतया सम्बद्धिन्नाग्नितया

भार्याविधुरतया वाग्निरहितस्तस्य द्विजपाणौ जलादौ वा होम इति व्याचक्षे मदनपारिजाते

एवं दृश्यते एव साग्निकस्वरूपं सर्वत्रेत्थं अथ ग्रहणनिर्णयो लिख्यते तत्र चंद्रग्रहणे

यस्मिन्यामे ग्रहणं तस्मात्पूर्वं प्रहरत्रयं न भुंजीत सूर्यग्रहे तु प्रहरचतुष्टयेन भुं

जीतः सूर्यग्रहे तु नाश्नीयात्पूर्वं यामचतुष्टयं चंद्रग्रहे तु यामांस्त्रीन्बालवृद्धातुरै

विनेति माधवीये वृद्धगौतमोक्तेः ग्रहणं तु भवेदिंदोः प्रथमादधियामतः भुंजीता

वर्तनात्पूर्वं पश्चिमे प्रथमादधः इति मार्कंडेयोक्तेश्च अधिऊर्ध्वं ततश्चंद्रग्रहे याम

चतुष्टयनिषेधस्तु चिंत्यो नानु सूर्यग्रहे सर्पिष्पायसाकभोजनात्पापं मैववचनस्य पूर्व

मयामे सूर्यग्रहे मतिर्वृद्धः पूर्वरात्रे भोजननिषेधपरत्वात् चंद्रग्रहे विशेषमाह ॥ मा

धवीये वृद्धवसिष्ठः ग्रस्तोदये विधोः पूर्वं नाहर्भोजनमाचरेदिति दृष्ट्वो ग्रस्तास्तं तु

माधवीये व्यासः सुमुक्तयोरस्तगयोरदृष्ट्वापरेहनीति विष्णुधर्मेपि ग्रहो रात्रौ न

भोक्तव्यं चंद्रसूर्यग्रहोपप्लवे मुक्तिं दृष्ट्वा तु भोक्तव्यं स्नानं कृत्वा ततः परं ग्रहो रात्रिनिषे

२

सर्पि×

३८

धः सूर्यग्रस्तास्ते निषेधः मदनरत्ने गार्ग्यः संध्याकाले यदा राहुर्ग्रसते शशिभा
स्करौ तदहर्नैव भुंजीत रात्रावपि कदाचन सायंसंध्यायां सूर्यस्य ग्रस्तास्ते एवं द्वि
रात्रौ च न भोक्तव्यं प्रातःसंध्यायां चेंदुस्य ग्रस्तास्ते पूर्वरात्रावुत्तरेह्नि च भोक्तव्य
मित्यर्थः चंद्रग्रस्तास्ते उत्तरार्धे संध्याहोमादौ न दोषः तदाह प्रानाग्रस्ते चास्तं ग
ते त्विंदौ ज्ञात्वा मुक्त्यवधारणं स्नानहोमादिकं कार्यं स्वजाते तु भवेत्पुनः एतदनाहिता
ग्निविषयं अपराह्णे व्रतोपायनीयमश्नीतेति कात्यायनोक्तेर्हतस्य श्रौतत्वेन चप्र
बलत्वात् शुद्धिं वृतं कुर्यादिति निर्णयदीपः रागप्राप्तभोजने कालनियमोपंते न र
ज्वरादावपि न भोजनमिति कर्कोनुसारिणः बालवृद्धातुराणां तु ग्रहणमात्र
वेध एक यामो निषिद्धः सायाह्ने ग्रहणं चेत्स्यादपराह्ने न भोजनं अपराह्णे न मध्याह्ने
न तु संगवे भुंजीत संगमे चेत्स्यान्नपूर्वं भोजनक्रियेति मार्कंडेयोक्तेः इदं च बाला
दिविषयं कालवृद्धातुरैर्विनेति पूर्वोक्ते वेधकाले ग्रहणे चाप्यकामत्वं स्यात्संस
र्गो मेध्य वर्णानां सूतकं राहुदर्शने स्नात्वा कर्माणि कुर्वीत शृतमन्नं विवर्जयेदि
ति हेमाद्रौ वृद्ध [illegible] विशान्नस्नानात् भूतमिति तदंतरतस्यैवोपलक्षणं तवस्मार्दे
यत्नासिद्ध्य [illegible] द्रिपिते चैवदितिमितामरायां वचनात् भार्गवार्चनदीपिका

यो॰ ज्योतिर्निबंधे च मेधातिथिः आरनालं पयस्तक्रं दधि स्नेहाज्यपाचितं मणिकस्थो
दकं चैव न दुष्येद्राहुसूतके मन्वर्थमुक्तावल्यां अन्नं पक्वमिह त्याज्यं स्नानं सव
सनं ग्रहे वारितक्रारनालादि तिलदर्भैर्न दुष्यति जलेत्वदोषोरगांगाविषयः
ग्रहोषितं जलं पीत्वा पादकृच्छ्रं समाचरेदिति तत्रैव वचनाद्विशाति मतेन्यजलस्य
दोषोक्तेः वेधकाले ग्रहणे च भोजने प्रायश्चित्तमुक्तं माधवीये कात्यायनेन चंद्र
सूर्यग्रहे भुक्त्वा प्राजापत्येन शुध्यति तस्मिन्नेव दिने भुक्त्वा त्रिरात्रेणैव शुध्यति ग्रह
णे च त्रिरात्रमेकरात्रं चोपवासश्श्रेयोर्थिना कार्यः एकरात्रमुपोष्यैव ग्रहे स्नात्वा
दत्वा च शक्तितः कंचुकादिस्सर्पस्य निवृत्तिः पापकोशतः त्रिरात्रं समुपोष्यैव
ग्रहणे चंद्रसूर्ययोः स्नात्वा दत्वा च विधिवन्मोदते ब्रह्मणा सहेति हेमाद्रौ लिंगोक्तेः
इदं च पुत्रवद्व्यतिरिक्तविषयं आदित्येहनि संक्रांतौ ग्रहणे चंद्रसूर्ययोः पारणं चोप
वासं च न कुर्यात्पुत्रवान् गृहीति जैमिनिवचनात् यदान्तरवेर्ग्रस्तास्तस्तदाशुद्धि
णः प्रहरद्वयं हित्वा बालादिवद्भोजनं न तूपवासः सायाह्ने ग्रहणं चेत्स्यादिति
सर्वोक्तमार्कंडेयवचनात् सायाह्ने संगवे स्त्रीयाद्वारदे संगवादधः मध्याह्ने परतो
स्त्रीयाह्नोपवासो रविग्रहे इति स्मृतिरत्नेति हेमाद्रिः शारदोपराह्नः माधवीये तु

39A

पुत्री स्त्री पितत्रोपवास एव अहोरात्रं न भोक्तव्यमिति स्मृत्युक्त निषेधस्य तेनापि
पालनीयत्वात् उपवासनिषेधस्तु व्रतरूपोपवासपरः कृष्णैकादशी निषेधवदि
ति मदनरत्ने प्येवं इदमेव च युक्तं वर्धमानस्तु अहोरात्रं न भोक्तव्यमिति शातात
पीयागे सूर्याचंद्रमसोर्लोकान् स प्राप्नोति मानव इति फलश्रुतेर्मुक्तदर्शने उप
वासः काम्येनत्वे च निषेध इत्याह तन्न अग्रहणतत्वेपि प्राग्युक्तविष्णुधर्मे निषेधावश्य
भावात् तथा व्यासः रविग्रहः सूर्यवारे सोमे सोमग्रहस्तथा चूडामणिरिति विख्या
तस्तत्र दत्तमनंतकं वारेष्वन्येषु यस्तु स्यात् ग्रहणं चंद्रसूर्ययोः तत्पुण्यं कोटिगुणं
शितं योगे चूडामणौ स्मृतं अत्र वा ग्रहणयोः स्नानं कुर्यात् ग्रस्यमाने भवेत्स्नानं ग्रस्ते
होमो विधीयते मुच्यमाने भवेद्दानं मुक्ते स्नानं विधीयते इति हेमाद्रौ वचनात् स्नानं
स्यादुपरागादौ मध्ये होमः सुरार्चनमिति ब्रह्मवैवर्ताच्च सर्वेषामेव वर्णानां सूतकं
राहुदर्शने सचैलेन भवेत्स्नानं सूतकान्नं च वर्जयेदिति वृद्धवसिष्ठोक्तेश्च सर्वे
नत्वं मुक्तिस्नानपरामिति मदनरत्ने उक्तं भार्गवार्चनदीपिकायां चतुर्विंशतिमते
मुक्तौ यस्तु न कुर्वीत स्नानं ग्रहणसूतके स सूतकी भवेत्तावद्यावत्स्यादप
रोग्रहः इदं स्नानममंत्रकं कार्यमिति स्मृतिरत्नावल्यां तत्र तीर्थविशेषे भार

40

ते गंगास्नानं तु कुर्वीत ग्रहणे चंद्रसूर्ययोः महानदीषु चान्यासु स्नानं कुर्यात्त्
यथाविधि महानदीषु यि मास विशेषे काश्चिद्धृष्टाः प्रयागे देविकारे वासन्नि
हत्याश्च वारणं सरस्वती चंद्रभागा कौशिकी नापिका तथा। सिंधुर्गंडकिका चैव
सरयूः कार्त्तिकादितः मलं हेमाद्रि स्पष्टं व्यासः इंद्रोर्लेसगुणं पुण्यं रवेर्दशगुणं
ततः गंगातोयेनु संप्राप्ते इंदोः कोटी रवेर्दश गवां कोटि सहस्रस्य यत्फलं लभते
नरः तत्फलं लभते मर्त्यो ग्रहणे चंद्रसूर्ययोः असंभवे तु माधवीये शंखः वापीकूपत
डागेषु गिरिप्रस्रवणेषु च नद्यां नदे देवखाते सरसीषूद्धृतोदकं उष्णोदके न
वा स्नायात् ग्रहणे चंद्रसूर्ययोः अत्र तारतम्यमाह मार्कंडेयः शीतमुष्णोदकात्
पुण्यम पारक्यं च परोदकात् भूमिष्ठमुद्धृतात् पुण्यं ततः प्रस्रवणोदकं ततोपि सार
सं पुण्यं ततः पुण्यं नदीजलं तीर्थतोयं ततः पुण्यं महानद्यंबु पावनं ततस्ततोपि गं
गांबु पुण्यं पुण्यस्ततोंबुधिरिति उष्णोदकमातुरविषयं तथा गोदावरी महापुण्या
चंद्रे राहुसमन्विते सूर्ये च राहुणा ग्रस्ते तमोभूते महामुने नर्मदातोयसंस्पर्शे कृ
तकृत्या भवंतीति हि पृथ्वीचंद्रोदये प्रभासखंडे गावो नामासिला धान्यं रत्नानि
कनकं महीं संप्रदाय कुरुक्षेत्रे यत्फलं लभते नरैः तादृग्ग्रहणे गोदायां स्नाना

द्भवति चन्द्रग्रहणे तत्रैव सौरपुराणे वृधिस्नानमथ प्रक्रम्य दानानि यानि लो
केषु विख्यातानि मनीषिभिः तेषां फलमवाप्नोति ग्रहणे चंद्रसूर्ययोः दे
वीपुराणे गंगा कनखलं पुण्यं प्रयागं पुष्करं तथा कुरुक्षेत्रं महापुण्यं राहु
ग्रस्ते दिवाकरे स्नानासंभवे स्मरणं वा कार्यं स्मृत्वा शतक्रतुफलं हस्त्वा सर्वोघ
नाशनं सहस्राश्वमेधपुण्यं तत्पीत्वा सोमग्रहणे लभेत् स्नात्वा वाजिमखपु
ण्यं प्राप्नुयादविचारतः रविचंद्रोपरागे च अयने चोत्तरे तथेति मार्कंडेयोक्तेः अ
त्र श्राद्धमाह व्यासः ग्रहणे चंद्रसूर्ययोर्ग्रहे यस्तु श्राद्धं विधिवदाचरेत् तेनैव सकला पृ
थ्वी दत्ता विप्रस्य वै करे भारते सर्वस्वेनापि कर्तव्यं श्राद्धं वै राहुदर्शने अकुर्वाणस्तु
नास्तिक्यात् पंके गौरिव सीदति विष्णुः राहुदर्शनदत्तं हि श्राद्धमाचंद्रतारकं इ
दं चामान्नेन हेम्ना वा कार्यं न त्वन्नेन आपद्यनग्नौ तीर्थे च चंद्रसूर्यग्रहे तथा आ
मश्राद्धं प्रकुर्वीत हेमश्राद्धमथापि वेति शातातपोक्तेरिति हेमाद्रिमाधवादयः अप
रार्कस्तु एतन्नाहिताग्नीनां पाकाभावे द्रव्यं तीर्थश्राद्धवत् पाकाभावे द्विजातीनां आम
श्राद्धं विधीयते इति स्मृतेः सैंहिकेयो यदा सूर्यं ग्रसते पर्वसंधिषु गजच्छाया तु
सा प्रोक्ता तस्यां श्राद्धं प्रकल्पयेत् घृतेन भोजयेद्विप्रान् घृतं भूमौ समुत्सृजेत् वा

वी

41

पृथ्वीचंद्रोदये स्कांदे विज्ञानेश्वरीयाह ग्रहणे श्राद्धे भानुर्दोषो दात्तस्त्वभ्युदय इति
सूतके मृतके भुक्ते ग्रहीते शशिभास्करे छायायां हस्तिनश्चैव नभस्यपः पुनर्यो
भवेदित्यापस्तंबेन भोजननिषेधात् अयं च निषेधः श्राद्धभोक्तुः हस्तिछायासा
तत्त्वर्यात् अन्यत्र ग्रहणनिमित्तकश्राद्धे नैवामासंक्रांत्यादि निमित्तिकानां सिद्धिः द
र्शकालश्चयोरपीति कालादर्शोक्तेः अशौचमध्येपि स्नानश्राद्धादिकार्यमे
व सूतके मृतके चैव न दोषो राहुदर्शने तावदेव भवेच्छुद्धिर्यावन्मुक्तिर्न दृश्य
ते इति पृथ्वीचंद्रे वृद्धवशिष्ठेनोक्तेः स्मार्त्तकर्मपरित्यागो राहोरन्यत्र सूतके
इति माधवपादोक्तेश्च कालादर्शेग्निः सर्वे वर्णाः सूतकेपि मृतके राहुदर्शने
स्नात्वा श्राद्धं प्रकुर्वीरन् दानं शाठ्यविवर्जितं मदनपारिजातेप्येवं तेन स्नानमात्रं
प्रकुर्वीत दानश्राद्धविवर्जितमिति निर्मूलं वदंतो गौडाः परास्ताः इयं च शुद्धि
रविशेषात् तत्रैव आयुरश्मरणादि सर्वस्मार्तकर्मविषया मदनरत्नेप्येवं रज
स्वलायास्तु भार्गवार्चनदीपिकायां सूर्योदयनिबंधे न सूतकादिदोषोस्ति ग्रहे हि
मज्जापादिषु ग्रस्ते स्नानं पादुदकस्यापि तीर्थात् घृतं वा स्नेति अत्र स्नाने नैमित्तिके
प्राप्ते नारी यदि रजस्वला पात्रांतरितोयेन स्नानं कृत्वा व्रतं चरेदिति श्राद्धमिता
क्षरोक्तो विधिर्ज्ञेयः तथा ग्रहणे रात्रावपि [illegible] श्राद्धादिकार्यं ग्रहणे दाहसं

41A

ऽऽंति वा शार्तिः प्रसवेऽशुच दानं नैमित्तिकं ज्ञेयं रात्रावपि तदिष्यते इत्यपरार्के
व्यासोक्तेः चंद्रग्रहे तथा रात्रौ स्नानं दानं प्रशस्यते इति देवलोक्तेश्च यदा तु ज्यो
तिःशास्त्रगम्यो दिने चंद्रग्रहो रात्रौ च सूर्यग्रहः तदा स्नानादि न कार्यं सूर्यग्रहे
यदा रात्रौ दिवा चंद्रग्रहस्तथा तत्र स्नानं न कुर्वीत दद्याद्दानं च न क्वचिदिति वृद्ध
त्रिंशन्मतात् ग्रहणदिने वार्षिकश्राद्धप्राप्तौ तु प्रयोगपारिजाते गोभिलः दर्शेर
विग्रहे पित्रोः प्रत्याब्दिकमुपस्थितं अन्नेनासंभवे हेम्ना कुर्यादामेन वा सुतः इ सा
ति अत्र दर्शे रविपितृसुतपदाब्दप्रदर्शनार्थाः न्यायेस्यात् तेन चंद्रग्रहणेपि
सपिंडादि वार्षिकमन्नादिना तद्दिने एव कार्यमिति मदनपारिजाते व्याख्यातं
पृथ्वीचंद्रोदयेप्येवं तेन यानि आमश्राद्धं प्रकुर्वीत मास संवत्सरादृते इति अ
त्रैवार्षिकं कुर्याद्धेम्ना वामेन न क्वचिदिति मरीचिगोभिलास्यादिवचना
नि तानि ग्रहणादिनातिरिक्तविषयाणि निर्णयामृतेप्येवं यानि तु ग्रह
णे विनाशिसके तद्दिने तृतीयेह्निरजोदोषात् पंचमे ग्रस्तोदये यदा चेप्रत्यक्षं समु
पस्थितं तद्दिने चोपवासः स्यात् प्रत्यक्षं तु परेहनि तथा ग्रस्तावेवास्तमानं
तु रविंदू प्राप्नुतो यदि प्रत्यक्षं तु तदा कार्यं परेहन्येव सर्वदा चंद्रसूर्योपरा

गे च तथा श्राद्धं परेहनि इत्यादीनि वचनानि मूलानि निबंधेषु क्वाप्यनुपलं
भान्निर्मूलानि प्रत्युत मदनरत्ने श्राद्धनिबंधेषु तद्दिन एव श्राद्धमुक्तमित्यलं ग्रह
णादिसप्तदिनपर्यंतं रामगोपालाद्यागमदीक्षो क्षाशिवार्चनचंद्रकायंत्राना
णि वै मंत्राद्यारंभणं कुर्यान्न ग्रहणे चंद्रसूर्ययोः ग्रहणाद्यपि देवेशि कालः
सप्तदिनावधीति रत्नसागरे सत्तीर्थे कविषुग्रासे तेदामनपर्वणि मं
त्रदीक्षां प्रकुर्वाणो मासर्क्षादीन्न शोधयेत् अत्र सूर्यग्रहणमेव मुख्यं सूर्यग्र
हणकालेन नान्यदन्वेषितं भवेत् सूर्यग्रहणकालेन समो नान्यः कदाच
न न मासतिथिवारादिशोधनं सूर्यपर्वणि इति तंत्रे एककालोत्तरवचनात्
चंद्रग्रहे तु या दीक्षा या दीक्षा व्रतचारिणी वनस्य स्वयमादीक्षा दारिद्र्यं समजे
न्मासीति तत्रैव योगिनीतंत्रे निषेधाच्च ग्रहणं च जन्मराश्यादौ निषिद्धं तदु
क्तं ज्योतिषे त्रिषडेकादशे चोपगतं नराणां शुभप्रदं स्याद्ग्रहणं रवींद्वोः द्विस
प्तनंदेषु च मध्यमं स्याच्छेषेष्वनिष्टं कथितं मुनींद्रैरिति अयष्टकादशा
नंदाः नवाष्टमः पंच मदनरत्ने गर्गः जन्मसप्ताष्टरिष्फांकदेशमस्थे निशा
करे दृष्टो रिष्टप्रदो राहुर्जन्मर्क्षे निधने तथा चिच रिष्फं दशा अत्र जानव निधनं तस
ममाराहुग्रस्ते चैत्रादये विश्वधर्मे मन्वर्के गते तारा सेन्द्रसने शशिभास्करौ

42A

तज्जातानां भवेत्पीडा येन नराः शांतिरंतवर्जिताः तत्रैव पुराणांतरे सूर्यस्य
संक्रमो वापि ग्रहणं चंद्रसूर्ययोः यस्य त्रिजन्मनक्षत्रे तस्य रोगोथवा मृतिः
तस्य दानेन च होमेन च देवार्चनजपेन तथा उपरागाभिषेकं च कुर्याच्छांति
र्भविष्यति स्वर्णेन वाथ पिष्टेन कृत्वा सर्पस्य चाकृतिं ब्राह्मणाय ददेत्तस्य
न रोगादि भयं तत्स्मृतः जन्मनक्षत्रं तत्स्थैर्वान्यैरेव त्रिजन्मनक्षत्रमित्युच्यते ज
न्मदशमैकोनविंशतितारा इति केचित् सर्पस्य तदाकारस्य राहोरित्यर्थः
अद्भुतसागरे तीर्थवः यस्य राज्यस्य नक्षत्रे स्वर्भानुरुपरज्यते राज्यभंगं सुहृ
न्नाशं मरणं चात्र निर्दिशेत् राजस्य नक्षत्रं अभिषेकनक्षत्रमिति तत्रैव व्याख्या
तं भार्गवार्चनदीपिकायां ज्योतिःसागरे सौवर्णं कारयेन्नागं पलेनार्धपला
र्धतः तदर्धेन पञ्चगव्यां मौक्तिकं न्यसेत् ताम्रपात्रे निधायाथ घट तस्य विनि
वेशतः कांस्ये वापि लोहे चान्यस्य दद्यात्सदक्षिणं चंद्रग्रहे रूप्यस्य बिंबं दद्यात्सु
नागं सकलमयं सूर्यग्रहे बिंबं च हैमजं तुरंगरथगोभूमितिलसर्पिर्मकांचनं
काल विवेकेपि सुवर्णनिर्मितं नागं सतिलं कांस्यभाजने सदक्षिणं सव

43

स्त्रं च ब्राह्मणाय निवेदयेत् सौवर्णं राजतं वापि बिंबं कृत्वा स्वशक्तितः उपराग
भवक्लेशच्छिदे विप्राय कल्पयेत् मंत्रस्तु तमोमय महाभीम सोमसूर्यविमर्दन हे मे२
मताराप्रदानेन मम शांतिप्रदो भव विधुंतुद नमस्तुभ्यं सिंहिकानंदनाच्युत दानेनानेन ना
गस्य रक्ष मां वेधजाद्भयात् इति अत्र शांतिरप्युक्ता हेमाद्रौ मात्स्ये यस्य राशिं स
मासाद्य भवेद्ग्रहणसंभवः स्नानं तस्य प्रवक्ष्यामि मंत्रौषधसमन्वितं चंद्रोपरा
गं संप्राप्य कृत्वा ब्राह्मणवाचनं संपूज्य चतुरो विप्रान् शुक्लमाल्यानुलेपनैः पूर्व
मेवोपरागस्य समानीयौषधादिकं स्थापयेच्चतुरः कुंभानग्रतः सागरानिव
गजाश्वरथ्यावल्मीकसंगमाद्ध्रदगोकुलात् राजद्वारप्रदेशाच्च मृदमानीय निक्षि
पेत् पंचगव्यं पंचरत्नं पंचत्वक् पंचपल्लवं रोचनपद्मकं शंखं कुंकुमं रक्तचंदनं
शुक्तिस्फाटिकतीर्थांबु सितसर्षपगुग्गुलून् मधुकं देवदारुं च विष्णुक्रांतां शता
तावरीं बलां च सहदेवीं चानिशां हि तथैव च गजदंतं कुंकुमं च तथैवोशीरचंद
नं एतत्सर्वं विनिक्षिप्य कुंभेष्वावाहयेत्सुरान् सर्वे समुद्राः सरितस्तीर्थानि जल
दा नदाः आयांतु यजमानस्य दुरितक्षयकारकाः योसौ वज्रधरो देवः आदित्या
नां प्रभुर्मतः सहस्रनयनश्चंद्रग्रहपीडां व्यपोहतु मुखं यः सर्वदेवानां सप्तार्चिर
मितद्युतिः चंद्रोपरागसंभूतामग्निः पीडां व्यपोहतु यः कर्मसाक्षी लोकानां

43A

धर्मराजो महिषवाहनः यमश्चंद्रोपरागोत्थां ग्रहपीडां व्यपोहतु रक्षोगणाधिपः सा
क्षात् नीलांजनसमप्रभः खड्गहस्तोतिभीमश्च ग्रहपीडां व्यपोहतु नागपाशधरो
देवः सदा मकरवाहनः स जलाधिपतिर्देवो ग्रहपीडां व्यपोहतु प्राणरूपो हि
लोकानां सदा कृष्णमृगप्रियः वायुश्चंद्रोपरागोत्थां ग्रहपीडां व्यपोहतु यो
सौ निधिपतिर्देवः खड्गशूलगदाधरः चंद्रोपरागकलुषं धनदोत्र व्यपोहतु योसा
विंदुधरो देवः पिनाकी वृषवाहनः चंद्रोपरागपापानि स नाशयतु शंकरः
त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च ब्रह्मविष्ण्वर्करुद्राश्च द
हंतु यम पातकं एवमावाहये देवान् मंत्रैरेभिश्च वारुणैः एतानेव तथाम
न्त्रान् स्वर्णपट्टे विलेखयेत् ताम्रपट्टेथवा लिख्य नववस्त्रेण तथैव च मस्तके च
जमानस्य निदध्यात्सो द्विजोत्तमः कलशान्स्नपयंस्तान्नानारूपसमन्वितान्
गृहीत्वा स्नापयेत्सम्यक् भद्रपीठोपरिस्थितं पूर्वैरेव तु मंत्रैश्च यजमानं द्विजोत्त
मः अभिषेकं ततः कुर्यान्मंत्रैर्वारुणसूक्तकैः ततः शुक्लांबरधरः शुक्लमाल्या
नुलेपनः आचार्यं वरयेत्पश्चात् स्वर्णपट्टं निवेदयेत् आचार्य दक्षिणां दद्या
च
द्गोदानं च स्वशक्तितः अतः ऊर्ध्वं ग्रहस्य पूजा तदर्धेन विशेषतः पूजयेत् वस्त्रगोद

44

नैवेद्यैस्तर्पणेनापि शक्तितः गंधमाल्यैः धूपदीपैः पूजयेद्देवतुष्टये होमं चापि प्र
कुर्वीत तिलैर्व्याहृतिभिस्तथा दानं च शक्तितो दद्यात् यदीच्छेदात्मनो हितं सूर्य
ग्रहे सूर्यनाम्नस्तु कामं त्राष्ट्रकीर्तयेत् अनेन विधिना यस्तु ग्रहणे स्नानमाचरे
त् न तस्य ग्रहणे दोषः कदाचिदपि जायते इति ग्रहणशांतिः मार्गवार्चनदीपिका
यां ब्रह्मसिद्धांते सर्वैः परास्थितं वीक्ष्यं स्वस्थं तैलांबुदर्पणैः ग्रहणं गुर्विणी जा
तु न पश्येत्तं घटं विना तथा मंगलकार्येषु वेधविशेषो हेमाद्रौ ब्रह्मयोदश्यादि
तो वर्ज्यो दिनानां नवकं ध्रुवं मांगल्येषु समस्तेषु ग्रहणे चंद्रसूर्ययोः प्रकारां
तरं तत्रैवोक्तं द्वादश्यादितृतीयांतो वेध इंदुग्रहे स्मृतः एकादश्याधिकः सौरे
चतुर्थ्यंतः प्रकीर्तितः खंडपर्वे ग्रासे अहं खंडग्रहे तयो रितित्रैवोक्ते इदं
च ग्रस्तास्ते त्रिदिनं पूर्वमिति नारदेन ग्रस्तास्ते विशेषोक्तेर्ग्रस्ते भिन्नं ग्रहणाप
रं ज्योतिर्निबंधे अंबनः ग्रहणोत्पातभेत्याज्यं मंगलेषु अष्टतुत्रयं यावच्च रवि
णोर्भुक्ता मृत्के दग्धकाष्ठवत् अन्यानि चाग्नेयादिमंडलानि तत्फलं वर्णविका
रादिफलं च देवज्ञेभ्योज्ञेयं पुरश्चरणचंद्रिकायां चंद्रसूर्योपरागे च स्नात्वा प्रयत
मानसः स्पर्शादिमोक्षपर्यंतं जपेन्मंत्रं समाहितः जपाद्दशांशतो होमस्तथा हो

तिन्सै.
५५

55A

मात्तृत्तर्पणं तर्पणस्य दशांशेन मार्जनं कथितं किल तथैवं देवतारूपं ध्यात्वा
त्मानं प्रपूज्य च तन्मोत्तं मंत्रमुच्चार्य तदंते देवताभिधां द्वितीयांतामहं प्र स्नापयामि
षिंचाम्यनेन तु तोयैरंजलिना कुशैर्वा अभिषिंचेत् स्वमूर्धनि मार्जनस्य दशांशे
न ब्राह्मणानपि भोजयेत् जपो वा एवं को होमस्तर्पणं चाभिषेचनं अदेवपूजनं
पंचप्रकारोक्तपुरश्चर्या तथा होमाशक्तौ जपं कुर्यात् होमसंख्या चतुर्गुणं ए
वं कृते तु मंत्रस्य जायते सिद्धिरुत्तमा ग्रहणप्रसंगात् कश्चित् प्रतिग्रहे प्रा
यश्चित्तमुच्यते तत्रार्णस्य तो प्रतिग्राही कुरुक्षेत्रे नभः यः पुरुषो भवेत् तथा
पि मनसः शुद्धौ प्रायश्चित्तं समाचरेत् तन्मतं [illegible] हृदयं कुर्यात् देवं देवेन समन्वितं सत्रेण
वायजपेत् [illegible] जपेद्वा लक्षसप्तकं वापीकूपतडागादिखननैर्विसर्जेद्धनमिति १
एतच्च यत् हितेनार्जयति कर्मणा ब्राह्मणाधनं तस्योत्सर्गेण शुध्यति दानेन तप
सैव चेति मन्त्र [illegible] त्सर्गो तारं [illegible] मिति दिक् ग्रहणांतरितस्य पूर्वसंकल्पितद्र
व्यस्य [illegible] गुणं भवतीति शिष्टाः पठंति लब्धं ग्रहे वै [illegible] दातव्यमिति नो कांक्ष्या
वता अंकुरं चित्त [illegible] अहोरात्रमतिक्रम्य तद्दानं द्विगुणं भवेत् दशोत्तरं प
वेत् सुस्नाय [illegible] दुर्ग्रहे भवेत् सूर्यग्रहे सहस्रं तन्नमराणे नंतकं स्यात् इति अत्र

राम
५५

सतं चिंत्यं अत्र केचिद्दोद्धत्तल्याम्याहुः ग्रहणस्य निमित्तत्वेन तन्निक्रयस्य प्र
योजकत्वात् ज्योतिःशास्त्रादिना ज्ञानस्य निमित्तत्वप्राप्तेपि स्नानदानजपोश्राद्धंम
नंतराहुदर्शने चंद्रसूर्योपरागेन यावद्दर्शनगोचरः इति जाबाल्यादिवचनेष्ठ दर्शितप्रवो
गाच्चाक्षुषज्ञानस्यैवायं संहारन्यायेन निमित्तत्वं अन्यथा दृष्टौलक्षणस्यात् तेन मेघाच्छा
दनेंधादीनां जन्मसमाच्छेत्यादि निषिद्धदर्शनानां च स्नानश्राद्धादौ नाधिकार इति कल्पत
रुस्यात् दर्शनशब्देन चाक्षुषज्ञानं गृह्यते न ज्ञानमात्रं अज्ञातस्य निमित्तत्वासंभवा
न्निमित्तमहिम्नैव ज्ञानलाभेन दर्शनपदवैयर्थ्यापत्तेः तेन चाक्षुषधीर्योग्यः का
लः पुण्यः योग्यत्वं च प्रयत्नानपनेयचाक्षुषज्ञानप्रबंधकराहित्यं तेन मेघाद्यं तरितो
रुपरागाभावान्न स्नानादीति निर्णयामृतेप्येवमेतदेतल्लघु यदि चाक्षुषज्ञानं निमित्तं स्या
त्तदा सूर्यग्रहो यदा रात्रौ दिवा चंद्रग्रहस्तथा तत्र स्नानं न कुर्वीत दद्याद्दानं न च क्व।
चिदिति वाक्यं व्यर्थं स्यात् चाक्षुषज्ञानाभावेन प्राप्त्यभावात् तात्पर्यकल्पने त्वनि
षेधस्य न चेदं अस्तास्तपरं रविचंद्रयोरस्तानंतरं रात्रिदिवा ग्रहस्त्वादिति वाच्यं ।
तत्र पदस्य ग्रहपरत्वेधिकरणत्वयोगान्निमित्तपरत्वे च तद्ग्रहनिमित्तकस्नानादेर
स्तास्तागम्यभावापत्तेः अत एव तत्रैव रात्रिदिने उक्तेते सावेष्य देवीति वकृणाभ्यते
ऽपि तन्न तादृशमंत्रलिंगाभावात् तयोर्निमित्तत्वेधिकरणत्वे चान्यग्रंथोक्ते

45A

स्नानाद्यभावापत्तेश्च किंच नेक्षेतोद्यंतमादित्यं नास्तयंतं कदाचन नोपरक्तं न
वारिस्थं न मध्यं नभसो गतमिति मनुवचनं बाध्येत दृष्टो रिष्टप्रदो राहुरित्यादि च
नचात्र विहिते दर्शने निषेधाप्रवृत्तिवत्स्पर्शदानसंक्रियमाणापि न दुष्टेति वाच्यं दर्शन
स्यानुवादेन विधेयत्वाभावात् एतच्चाग्रे वक्ष्यामः नचैवाधिरूढत्रिकदृग्यापत्तेः मु
स्तकसक्तदर्शनविधानेन संकोच इति चेन्न नमुक्तिं दृष्ट्वा ततः स्नायादिति मुक्तिस्नाने
पिचास्त्वत्स्नानस्य निमित्तत्वापत्तेः अस्तु किं नश्छिन्नमिति चेन्न नगरस्नानस्ततयोः प
रेषु रुदयेत् दृष्ट्वाभ्यवहरेच्छुचिरिति दर्शनोत्तरं भोजनविधानाद् ग्रस्यस्यैव वेधका
लोभवयावद्दर्शनं भोजननिषेधापत्तेः मध्यंदिनाभिन्नतस्य स्वस्तं रागयावच्चक्षुः प्राप्तु
यवासप्रसंगाच्च अस्पर्शान्न लोलुपतया तत्र स्नानमात्रे विवक्ष्येत तत्र स्पर्शे मुक्ति
लैङ्गेन स्वीक्रियतां एतेन यत्केनचिदुक्तं स्पर्शस्नानं मुक्तिस्नानं च यस्य दर्शनं
तेनैव कार्यं नान्येन न्यायप्रत्ययेन समानकर्तृकत्वावगतेरिति तन्निरस्तं का
तर्हि तस्य गतिः दर्शोरुदेरयविशेषणत्वात्तत्र ग्रहैकत्ववद्विवक्षया एतत्तः सि
द्धं स्नानमानमात्रानुवादत्वे सर्वत्र स्वस्य ग्रहमुलायनादेरेव गृहव्याहत्यावादर्श
नस्यार्थवत्त्वं न चोक्तायोग्यतादिसाध्या दर्शनोत्तरं मेघच्छिन्ने योग्यताभावापत्त्या
दानाद्यभावापत्तेः तेनात्र द्वैरवावच्छेदेन ज्योतिःशास्त्रावेधत्वमेव योग्यता १

किंच रजसोदर्शनान्नारी त्रिरात्रमशुचिर्भवेदित्यत्राप्यंधस्त्रीणामाशौचाभावप्र
संगः यत्तु वर्द्धमानेनोक्तं ज्ञानोत्तरं स्नानेऽधिकारो न ज्ञानकाले स्नानकाले ज्ञानाभावात्
एवं दर्शनोत्तरं मुक्तिपर्यंतमस्त्येव योग्यतेति तदपि प्रतिज्ञामात्रं किंच ग्रस्तास्तेत
योः पश्येत्सूर्यचंद्रयोः दृष्ट्वाभ्यवहरेत् शुचिरित्यादिवाक्यवैयर्थ्यापत्तेः चाक्षुषज्ञाना
न्ययात्ऽपपत्त्यैवायोऽदये स्नानासिद्धेन च मुक्तिस्नाने शास्त्रीयज्ञानमेव निमित्तं न चा
न्यस्वं च द्रूसूर्यग्रहे नाघ्रानास्नि न्यहानि पर्वतः राहोर्विमुक्तिं विज्ञाय स्नात्वा कुर्वी
त भोजनमिति वृद्धगौतमेन विज्ञायेति ज्ञानमात्रोक्तेः यत्तु मुक्तिं दृष्ट्वा तु भोक्त
व्यं स्नानं कृत्वा ततः परमिति तदपि ज्ञानमात्रपरं मेघमालादिदोषेण यदि मु
क्तिर्न दृश्यते आकलय्य तु तं कालं स्नात्वा भुंजीत वाग्यत इति गौडनिबंधे वचनात्
नैवं अज्ञातस्य निमित्तत्वाभावेन निमित्तमहिम्नैव ज्ञानलाभे वाक्यवैयर्थ्यात्
ग्रस्तास्तेऽपि तदापत्तेश्च किंच दर्शनं विशेषणमुपलक्षणं वा नाद्यः दर्शनावच्छि
न्नेकाले स्नानतुलादानादेर्बाधात् दर्शनविच्छेदे कृत्यमपि स्नानादि न ग्रहणनिमि
त्तं स्यात् नांत्यः यावद्दर्शनगोचरत्वमिति यावत्पदवैयर्थ्यप्रसंगात् दृष्ट्वा ग्रहणस्य ग्र
हणोत्तरमपि स्नानापत्तेश्च ज्ञानपक्षे च्चेव दोषस्तुल्य इति चेत् न कैंचिद्येदि ज्ञा
न वाचकं पदं श्रूयेत तत्र तत्र स्यादयं विचारो यत्र दर्शितस्तु श्रूयते इति विषयस्य दाथे

46A

तर्हि स्नानं लभ्यते संक्रान्तौ स्नायादितिवदर्थादित्यवेहि अश्रुतत्वादेव नोदेश्य
विशेषणविवक्षाकृतो वाक्यभेदोपि अस्तु तर्हि दृष्टं ग्रहणं निमित्तमिति चे
न्न ग्रस्तास्तेऽस्तोत्तरस्नानापत्तेः विशिष्टोद्देशे वाक्यभेदाच्च तत्र वाच्येन तुल्यमिति
चेत् यावद्दर्शनगोचर इति वचनेन तन्निषेधात् तत्त्व यथान्यग्रहणे इव ग्रस्तास्तमि
स्यात् । किंच दर्शनस्य विधिरनुवादो वा आद्ये ग्रहणोद्देशेन दर्शनविधेरुत दर्श
नविशिष्टस्नानविधिरुत स्नानोद्देशेन दर्शनविधिः नाद्यः ग्रहणोद्देशेन स्नानविधा
नेच वाक्यभेदात् एतेनाद्वितीयोपि परास्तः न तृतीयः स्नानस्याप्राप्तेः दर्शनस्य नि
मित्तत्वे विधेयत्वाच्च अन्यथा सोमवमनादौ प्रसंजनविधिः केन येत अथ नाना
वाक्येषु क्वचिद्दर्शनविशिष्टस्नानविधिः क्वचिच्च प्राप्तं दर्शनं निमित्तीकृत्य स्ना
नमात्रविधिः तत्र स्नानस्य प्रधानस्य प्राप्तेन तदंगदर्शनप्राप्तिः तत्स्वांशे च निमित्ते
सति स्नाननिमित्तत्वमन्योन्याश्रयात् एवं दर्शनविधौ सति तन्निमित्तकस्नानविधिः
सति च प्रधानस्नानविधौ तदंगदर्शनविधिः एवमधिकारे प्रयोजकत्वे च योऽयं स्ना
यं पूर्वकालत्वविधौ वास्तेव वाक्यभेदः अन्यथा स्नानोत्तरमपि दर्शनमंगं स्यात्
न द्वितीयः तत्रापि दर्शनग्रहणयोर्निमित्तत्वे स्नानद्वयापत्तेर्दर्शनाहानौ नैमित्तिका
इति प्रसंगात् दर्शनविशिष्टग्रहणस्य च विशिष्टस्यानुवादे वाक्यभेदापत्तेः

न चाहर्दिवारात्रिवद्विशिष्टं निमित्तं निर्वाच्यं ग्रहणमात्रस्य हि निमित्तत्वे निमेषाद्यवच्छेर
पिन्नत्वापत्तेर्नैमित्तिकत्वभंगापत्तेः विशिष्टोद्देश्यत्वे ग्रहत्वग्रहणमात्रस्य निमित्तत्वे
न काचित्क्षतिः तस्या ईदृशी नवाक्यानां ग्रस्तादिविषयत्वादस्नादेरपग्रहपरत्वाद्दानानस्य
चार्थतः प्राप्तत्वादेव निमित्तं तेन मेघाच्छादनेऽप्यादेः स्नानादि भवत्येवेत्यलं वेदवेद्यैः
संलापेन इति ग्रहणनिर्णयः अथ समुद्रस्नानं आश्वलायनः समुद्रे पर्वसु स्नायाद
मायां च विशेषतः पापैर्विमुच्यते सर्वैरमायां स्नानमाचरन् भृगुभौमदिने स्नानं नित्
यमेव विवर्जयेत् भारते अश्वत्थः सागरः सेव्यो न स्प्रष्टव्यः कदाचन अश्वत्थं मंदवा
रे तु सागरं पर्वणि स्पृशेत् स पश्चात्त्विद्ध्रोदये स्कांदे पुनाति पर्वणि स्नानान्न्यर्थतोसरि
तां पतिः कदाचिदपि नैवात्र स्नानं कुर्यादपर्वणि अस्यापवादस्तत्रैव प्रभासखंडे प
र्वकाले च संप्राप्ते नदीनां च समागमे सेतुबंधे तथा सिंधौ तीर्थेष्वन्येषु संयुतः एवमा
दिषु सेवेषु मे योऽन्येते स्वकर्मणि तथा विना मंत्रं विना पर्व पुरकर्म विना नरैः कुशा
ग्रणादि देवेशि नः पुष्टः सोमहोदधिः तथा न कालनियमः सेतौ समुद्रस्नानकर्मणि
तार्क्ष्ये विष्णुस्तत्रैव पिप्पलादेः समुत्पन्ने कृत्ये लोकभयंकरे पाषाणं तेन यद्दत्तं
मर्दितार्थे प्रकल्पितामिति पाषाणं प्रक्षिप्य विश्वाची च घृताची च विश्वयोने विशांप
ते सान्निध्यं कुरुष्वे देवसागरे लवणांभसि नमस्ते विश्वगुप्ताय नमो विष्णो अपां

47A

पते नमो जलाधिरूपाय नदीनां पतये नमः समस्तं जलदाधार शंखचक्रगदाधर दे
व देहि ममानुज्ञां तव तीर्थनिषेवणे त्रितत्त्वात्मकमीशानं नमो विष्णुमुमापतिं साक्षि
ध्यं कुरु देवेश सागरे लवणांभसि अग्निश्च योनिरनिलाश्च देहो रेतोधा विष्णुरमृतस्य
नाभिः एतत् ब्रुवन्पांडव सत्यवाक्यं ततोवगाहेत पतिं नदीनामिति भारते क्रमंत्रान्
पठित्वा विधिवत्स्नात्वा सर्वरत्नो भवान् श्रीमान् सर्वरत्नाकरो यतः सर्वरत्नप्रधान
स्त्वं गृहाणार्घ्यं महोदधे इत्यर्घं दत्त्वा तर्पयेत् यथोक्तं पृथ्वीचंद्रोदये स्कांदे पिप्पलादं
विकरालं च कृतांतं जीवकेश्वरं वसिष्ठं वामदेवं च पाराशरमुमापतिं वाल्मीकिं ना
रदं चैव वालखिल्यांस्तथैव च नलं नीलं गवाक्षं च गवयं गंधमादनं जांबवंतं हनूमंतं सत्सं ×
सुग्रीवं चांगदं तथा मैंदं च द्विविदं चैव वृषभं तथा: रामं च लक्ष्मणं चैव सीतां चैव तप
स्विनी एतान्संतर्पयेद्विद्वान् जलमध्ये विशेषतः आब्रह्मस्तंबपर्यंतं यत्किंचित्सच
राचरं मया दत्तेन तोयेन तृप्तिमेवाभिगच्छत्विति इति मीमांसक नारायणभट्ट
सूनु रामकृष्णभट्टात्मज दिनकरभट्टानुज कमलाकरभट्टकृते निर्णयसिंधौ प्रथ
मः परिच्छेदः १॥ अथ संवत्सरप्रतिपदमारभ्य तिथिकृत्ये च कृष्णाचने प्रहृत्कादिमेव
च विवाहादौ च सौरादिमासहेतवे विनिर्दिशेदिति प्राप्तं प्रायशो नस्त्यतिथिनिर्णय
तत्र कृत्ये च निरूप्यते तत्र मीनसंक्रांतौ पश्चात् षोडश घटिकाः पुण्यकालः रात्रौ तु

निर्णयात्प्राक्परतस्तत्संक्रमे पूर्वेणापरा दिनार्धं पुण्यं निर्णीयेतु दिनद्वये पुण्यमिति सा
मान्यनिर्णयाद्वसेयं अथ तिथिनिर्णयः तत्र चैत्रशुक्लप्रतिपदि वत्सरारंभः तत्रोद
यिकी ग्राह्या चैत्रे मासि जगद्ब्रह्मा ससर्ज प्रथमेहनि शुक्लपक्षे समग्रं तु तदा सूर्योदा
दये सतीति हेमाद्रौ ब्राह्मोक्तेः दिनद्वये तद्व्याप्तावव्याप्तौ वा पूर्वैव तदुक्तं ज्योतिर्निबंधे
चैत्रसितप्रतिपदि यो वारोर्कोदये स वर्षेशः उदयद्वितये पूर्वो नोदये पूर्व एव पक्षयुगलेपि
पूर्वः स्यात् यस्माच्चैत्रसितादेरुदयाद्भानोः प्रवृत्तिरब्दादेरिति वत्सरादौ वसंतादौ बलि
राज्ये तथैव च पूर्वविद्धैव कर्तव्या प्रतिपत्सर्वदा बुधैरिति गोविंदार्णवे वृद्धवसिष्ठो
क्तेः यदा तु चैत्रो मलमासो भवति तदा देवकार्यस्य तत्र निषिद्धत्वाच्छुद्धे मासि संवत्स
रारंभः कार्य इति केचिदाहुः निःकर्षस्तु शुक्लादेर्मलमासत्वेंतर्भवति चांतरस्त्यादि
वचनादग्निमवर्षीतः पातात् मलमास मारभ्यैव वर्षप्रवृत्तेः शुक्लास्तादेर्विवमासे
एव कार्यमिति वयं प्रतीमः ननु शुक्लादौ चैत्रशुक्लप्रतिपदंतरस्याभावाघुक्तं तन्मध्य
एवानुष्ठानं मलमासेतु शुप्रतिपदंतरस्य संभवाच्छुद्धे एव वत्सरारंभो युक्त इति चे
न भ्रांतोसि नहि प्रतिपदंतरसत्वं प्रयोजकं अपि तु वत्सरारंभः स तु मलमासे पू
र्णं प्राक् नहि चैत्रशुक्लादिर्मलमासः पूर्ववर्षेतं भवतीति ब्रह्मणापि स्तवचं
अत्रैतैलाभ्यंगो नित्यः वत्सरादौ वसंतादौ बलिराज्ये तथैव च तैलाभ्यं

48A

गामकुर्वाणो नरकं प्रतिपद्यत इति हारीतवसिष्ठोक्तेः अस्यामेव नवरात्रारंभः त
दुक्तं मार्कंडेयपुराणे शरत्काले महापूजा क्रियते या च वार्षिकीति या वार्षिकी इ
त्यनेन संवत्सरस्यादौ चैत्रशुक्लप्रतिपदादि उपक्रम्याष्टमीपर्यंतं क्रियमाणा पू
जा विधीयते अतः शरद्वसंतयोरुत्सवस्तावद्दुर्गामहोत्सवः कार्यः तत्र परयुतैव (
ग्राह्या अमायुक्ता न कर्तव्या प्रतिपच्चंडिकार्चने मुहूर्तमात्रा कर्तव्या द्वितीयादि
गुणान्वितेति देवीपुराणात् तिस्रो ह्येताः पराः परयुताः अत्र विशेषः पारणानि
र्णीयश्च शारदनवरात्रे वक्ष्यते अथ प्रपादानं तत्र कमरार्के भविष्ये अतीते फाल्गुने
मासि प्राप्ते चैत्रमहोत्सवे पुण्येऽह्नि विप्रकथिते प्रपादानं समारभेदित्युपक्रम्य त
त्स्त्रोत्सर्जेये द्विजान् मंत्रेणानेन मानवः प्रपेयं सर्वसामान्या भूतेभ्यः प्रतिपादिता अ
स्याः प्रदानात्पितरस्तृप्यंतु हि पितामहाः अनिवार्यं ततो देयं जलं सामचतुष्टयमिति
तथा प्रपादानमशक्तेन विशेषद्धर्ममीप्सुना प्रत्यहं धर्मघटको वस्त्रसंवेष्टिताननः
ब्राह्मणस्य गृहे देयः शीतामलजलः शुचिः तत्र मंत्रः एष धर्मघटो दत्तो ब्रह्मविष्णु
शिवात्मकः अस्य प्रदानात्सकला मम संतु मनोरथाः अनेन विधिना यस्तु धर्म
कुंभं प्रयच्छति प्रपादानफलं सोऽपि प्राप्नोति इह न संशय इति चैत्रशुक्लतृतीयायां
गौरीमीश्वरयुतां संपूज्य दोलोत्सवं कुर्यात् तदुक्तं निर्णयामृते देवीपुराणे

51

तृतीयायां यजेद्देवीं शंकरेण समन्वितां कुंकुमागुरुकर्पूरमणिवस्त्रसुगंध
कैः स्रग्गंधधूपदीपैश्च दमनेन विशेषतः आंदोलयेत्ततो वत्स शिवोमातुष्टये
सदेति अत्र चतुर्थीयुता ग्राह्या सा मुहूर्त्तमात्रसत्त्वेपि दिने गौरीव्रतं परे इति मा
धवोक्तेः अत्रैव सौभाग्यशयनव्रतमुक्तं मात्स्ये वसंतमासमासाद्य तृतीयायां ज
नप्रिये सौभाग्याय सदा स्त्रीभिः कार्यं पुत्रसुखेप्सुभिरिति तत्रापि परयुतैव इयं
च मन्वादिरपि अत एव प्रसंगात्सर्वमन्वादिनिर्णय उच्यते तत्रोक्तं दीपिकायां ।
तिथ्यग्नीनतिथित्र्याशाः कृष्णे भोगानलेग्रहः तिथ्यर्कोनशिवोब्ध्योमति ।
पीमन्वादयो मधोरिति तिथिः पूर्णिमा अग्निस्तृतीया नेति वैशाखे नास्तीत्य
र्थः अश्वदशमी कृष्णेभः कार्त्यष्टमी अनलस्तृतीया ग्रहो नवमी अर्को द्वादशी
शिव एकादशी अश्वः सप्तमी मधोश्चेत्यादारभ्येता मन्वादयस्त्वर्थः अत्र मूलवचना
नि हेमाद्र्यादौ ज्ञेयानि एताश्च मन्वादयो हेमाद्रिमते शुक्लपक्षस्था पौर्वाह्णिकाः कृष्णप
भस्याश्च पराह्णिका ग्राह्याः पूर्वाह्णे तु सदा ग्राह्याः शुक्ला मन्वयुगादयः दैवे कर्मणि पित्र्ये
च कृष्णे चैवापराह्णिकाः इति नारदवचनात् अथो मन्वादियुगादिकर्मनिर्णयः
विर रवाह्णिकास्तु सिनीवाल्या अपराह्णिका एव तुल्ये इति दीपोक्तिश्च कालादर्शोक्त्वप
राह्णव्यापित्वं मन्वादिषूक्तं तच्च युक्तमिति युगादिनिर्णये वक्ष्यामः अत्र च माद्हु

५१A

कं मासे कृतश्राद्धं विधानेन मन्वादिष्वयुगादिषु हायनानि द्विसाहस्रं पितृणां
तृप्तिदं भवेदिति मन्वादिश्राद्धं मलमासे सद्ध्येपि कार्यं मन्वादिकं तीर्थिकं चक्र यो
कौ॰२ न्मासद्वयेपि चेति स्मृतिचंद्रोक्तेः अत्रापिंडरहितं श्राद्धं कुर्यात् तदुक्तं कालादर्शे
विषुवायने संक्रांति मन्वादिषु युगादिषु विहाय पिंडनिर्वापं सर्वं श्राद्धं समा
चरेदिति मन्वादिश्राद्धं च नित्यप्रकरणे प्रायश्चित्तदर्शनात् तदुक्तमस्त्रविधाने त्वं
भुवः प्रतिमंत्रं च नववारं जले जपेत् मन्वादयो यदा न स्नाताः कुरुते नैव वापियशति एवं
यत्प्रायश्चित्तं वीप्सादिदर्शनं तानि षण्णवति श्राद्धानि नित्यानि तानि च अमाम
न्वयुगक्रांतिधृतिपातमहालया अन्वष्टकं च पूर्वेद्युः षण्णवतयः प्रकीर्तिताः इत्य
ष्टानि च कारादष्टकागृह्णं चैत्रशुक्लतृतीये व मत्स्यजयंती अत्रैव प्रसंगाद्दशाव
तारजयंत्यो निर्णीयंते तत्र पुराणसमुच्चये मत्स्योऽभूद्धुतभुग्दिने मधौ सिते कूर्मो वि
धौ माधवे वाराहो गिरिजासुतेन भसि पक्षे सिते माधवे । सिंहो भाद्रपदे सिते हरियो ऋक्षा
मनो माधवे रामो गौरिति पिवतः परमभद्रामो नवम्यां मधोः कृष्णोष्टम्यां नभसि सि
तपरे चाश्विने यद्दशम्यां बुधः कल्की नभसि समभूच्छुक्ले षष्ठ्यां क्रमेण अत्रो मध्ये बाम
नो रामरामौ मत्स्यः क्रोडश्चापराह्णे विभागे कूर्मः सिंहो वौद्ध कल्की च सायं कृष्णो रात्रौ
कालसाम्ये च पूर्वेति केचित्तस्मृत्यंतरश्लोकान् पठंति यथा चैत्रे शुक्लपंचम्यां भग ।
वान् मीनरूपधृक् ज्येष्ठे तु शुक्लद्वादश्यां कूर्मरूपधरो हरिः चैत्रे कृष्णनवम्यां तु हरिर्वी

नि॰सिं॰
५०

50

राहरूपधृक् नरसिंहश्चतुर्दश्यां वैशाखे शुक्लपक्षके मासि भाद्रपदे शुक्ले द्वादश्यां वा
मनो हरिः राधाशुक्लतृतीयायां रामो भार्गवरूपधृक् चैत्रे शुक्ले नवम्यां तु रामो दश
रथात्मजः नभस्ये तु द्वितीयायां बलभद्रो भवद्धरिः श्रावणे बहुलेऽष्टम्यां कृष्णोभूत्
लोकरक्षकः ज्येष्ठे शुक्लद्वितीयायां बौद्धः कल्की भविष्यति कौंकणास्तु वराहपुरा
णस्थानि तेषामेव वाक्यानि पठंति आषाढे शुक्लपक्षे त्वेकादश्यां महातिथौ जयंती मत्स्यना
म्नीति तस्या कार्यमुपोषणं नभोमासि तृतीयायां हरिः कमठरूपधृक् नभस्यशुक्ल
पंचम्यां वराहस्य जयंतिका वैशाखे च चतुर्दश्यां नृसिंहः समपद्यत वैशाखे शुक्लपक्षे
तु तृतीयायां भृगूद्वहः मासि भाद्रपदे शुक्ले द्वादश्यां वामनो हरिः चैत्रे नवम्यां रामो
भूत् कौशल्यायां परः पुमान् श्रावणे बहुलेष्टम्यां वासुदेवो जनार्दनः पौषशुक्ले तु
सप्तम्यां कृपा बौद्धस्य पूजनं माघशुक्लतृतीयायां कल्किना पूजनं हरेः प्रातः प्रा
तस्तु मध्याह्ने सायं सायंतनान्यपि निशि मध्याह्ने मध्यरात्रे च सायं प्रातरनुक्रमादिति
तदत्र समूलत्वनिर्णये सति कल्पभेदेन व्यवस्था द्रष्टव्या एतासु तत्तदुपासका
नां नित्याः अन्येषां तु काम्याः जन्माष्टम्यादौ तु विशेषं वक्ष्यामः चैत्रशुक्लपंच
मी कल्पादिः तदुक्तं हेमाद्रौ मात्स्ये ब्राह्मणोपपादनस्यादिः कल्पादिः सा प्रकीर्तिता
वैशाखस्य तृतीया या कृष्णा या फाल्गुनस्य च पंचमी चैत्रमासस्य तस्यैवांत्या तथा

राम
५०

50A

परा शुक्ला त्रयोदशी माघे कार्त्तिकस्य तु सप्तमी नवमी मार्गशीर्षस्य संप्रोक्ताः सं
वत्सराश्च तैः कल्पानामादयो ह्येते दत्तस्याक्षयकारकाः अत्र सर्वेषां पित्र्ये तिथिमन्वा
दिवज्ज्ञेयाः चैत्रशुक्लाष्टम्यां भवान्या उत्पत्तिः तत्र नवमीयुताग्राह्या अष्टमीनव
मीयुक्ता नवमी चाष्टमीयुतेति ब्रह्मवैवर्तात् अत्र भवानीयात्रोक्ता काशीखंडे
भवानीयस्तु पश्येत शुक्लाष्टम्यां मधौ नरः न जातु शोकं लभते सदानंदमयो भ
वेदिति अत्रैवाशोककलिकाप्राशनमुक्तं हेमाद्रौ लैंगे अशोककलिकाश्चाष्टौ
ये पिबंति पुनर्वसौ चैत्रे मासि सिताष्टम्यां न ते शोकमवाप्नुयुः प्राशनमंत्रस्तु त्वाम
शोक वराभीष्ट मधुमाससमुद्भव पिबामि शोकसंतप्तो मामशोकं सदा कुर्विति अत्र
विशेषः षष्ठी चेद्रुद्रदेवे विष्णुः पुनर्वसुबुधोपेता चैत्रे मासि सिताष्टमी प्रातस्तु विधि
वत्स्नाया लौहित्यतोयेषु स याति ब्रह्मणः पदं चैत्रे तु सकलं मासं शुचिः प्रयतमानसः
लौहित्यतोयेषु यः स्नायात्स कैवल्यमवाप्नुयात् लौहित्यो ब्रह्मपुत्रः मंत्रस्तु ब्रह्मपुत्रम
हाभाग शंतनोः कुलसंभव अमोघागर्भसंभूत पापं लौहित्य मे हर चैत्रशुक्लनवमी राम
नवमी तदुक्तमगस्त्यसंहितायां चैत्रे नवम्यां प्राक्पक्षे दिवा पुण्ये पुनर्वसौ उदये गुरु
गौरांशोः स्वोच्चस्थे ग्रहपंचके मेषे पूषणि संप्राप्ते लग्ने कर्कटकाह्वये आवि
रासीत्सकलया कौशल्यायां परः पुमान् तस्मिन्दिने तु कर्तव्यमुपवासव्रतं सदा

तत्र जागरणं कुर्याद्रघुनाथपरो भुवीति इयं च मध्याह्नव्यापिनी ग्राह्या चैत्रशु
द्धे तु नवमी पुनर्वसुयुता यदि सैव मध्याह्नयोगेन महापुण्यतमा भवेदिति तत्रैवो
क्तेः तथा चैत्रमासे नवम्यां तु जातो रामः स्वयं हरिः पुनर्वस्वृक्षसंयुक्ता सा तिथिः सर्व
कामदा श्रीरामनवमी प्रोक्ता कोटिसूर्यग्रहाधिका तथा केवलापि सदोपोष्या नर
वमीशब्दसंग्रहात् तस्मात्सर्वात्मना सर्वैः कार्यं चैव नवमीव्रतं दिनद्वये मध्याह्नव्या
प्तौ तदभावे वा पूर्वदिने पुनर्वसुयुक्तामपि त्यक्त्वा परैव कार्या तदुक्तं माधवीये
अगस्त्यसंहितायां नवमी चाष्टमीविद्धा त्याज्या विष्णुपरायणैः उपोषणं नवम्यां वै
दशम्यां चैव पारणमिति अष्टमीविद्धा सत्पक्षापि नोपोष्येति माधवः रामार्चनचंद्रि
कायामपि विद्धे वर्चे ऋक्षयुक्तापि व्रतं तत्र कथं भवेत् विद्धानिषेधश्रवणान्नवमी चेति
वाक्यतः वैष्णवानां विशेषात्तु तत्र विष्णुपरैरपि दशम्यादिषु वृद्धिश्चेद्विद्धा त्याज्यैव वै
ष्णवैः तदन्येषां च सर्वेषां व्रतं तत्रैव निश्चितमिति अत्र दशम्यादिषु वृद्धिश्चेदिति तद
न्येषामिति च वदन् यदा प्रातस्त्रिमुहूर्ता नवमी दशमी च क्षयवशात् सूर्योदयात्प्रागेव स
माप्यते तदा स्मार्तानां तत्रैवैकादशीनिमित्तोपवासात् नवमीप्राप्तां तां पारण
लोपः स्यात् अतोऽष्टमीविद्धैव स्मार्तैः कार्या वैष्णवानां त्वरुणोदयविद्धैकादश्या
देयत्वान्न पारणलोपप्रसंग इति द्वितीयैव तैः कार्येति सूचयति दशमीवृद्ध्यभावे

ष्टमीविद्धायाः क्षये चैवेष्यतेरपि विद्धे चोपोष्यत्वसिद्धं इदं च व्रतं संयोगपृथक्त्व
न्यायेन काम्यं नित्यं च तदुक्तं हेमाद्रावगस्त्यसंहितायां उपोषणं जागरणं पितॄ
नुद्दिश्य तर्पणं तस्मिन्दिने तु कर्तव्यं व्रतस्य प्रीतिमभीप्सुभिः सर्वेषामप्ययं धर्मो भु
क्तिमुक्त्यैकसाधनः अशुचिर्वापि पापिष्ठः कृत्वेदं व्रतमुत्तमं पूज्यः स्यात्सर्वभू
तानां यथा रामस्तथैव सः यस्तु रामनवम्यां तु भुंक्ते मोहाद्विमूढधीः कुंभीपा
केषु घोरेषु पच्यते नात्र संशयः तथा अकृत्वा रामनवमीव्रतं सर्वव्रतोत्तमं व्रतान्य
न्यानि कुरुते न तेषां फलभाग्भवेत् प्राप्ते श्रीरामनवमीदिने मर्त्यो विमूढधीः उपोष
णं कुरुते कुंभीपाकेषु पच्यते अत्र केचित्तदुपासकानामेवेदं व्रतं नित्यं न त्वन्येषा
मित्याहुः अन्येन अकरणे दोषश्रवणात्तस्मात्सर्वात्मना सर्वैः कार्यं वै नवमीव्रत
मिति पूर्वोक्तवचनाच्च जन्माष्टम्यादिवदिदमपि सर्वेषां नित्यं अन्यथा जन्माष्टम्याद
वपि तदुपासकानामेव नित्यत्वं वक्तुं को वारयितेत्याहुः अत्र विशेषो हेमाद्रावग
स्त्यसंहितायां आचार्यं चैव संपूज्य वृणुयात्प्रार्थयन्निति श्रीरामप्रतिमादानं करि
ष्येऽहं द्विजोत्तमः भक्त्या चार्यो भव प्रीतः श्रीरामोऽसि त्वमेव च तथा स्वगृहे चोक्त
रे देशे दानस्योत्पलमंडपं शंखचक्रहनूमद्भिः प्राग्द्वारे समलंकृते गरुत्मतछा
ष्णे वा सोऽपि दक्षिणे समलंकृते गरुत्मता दारवट्टांगादेश्चैव पश्चिमे सुविभूषि

ते पद्मस्वस्तिकनीलेश्च कौवेरे समलंकृतं मध्ये हस्तचतुष्काढ्यं वेदिकायुक्तम
मायतं ततः संकल्पयेद्देवं राममेव स्मरन्मुने अस्यां रामनवम्यां च रामारा
धनतत्परः उपोष्याष्टसु यामेषु पूजयित्वा यथाविधि इमां स्वर्णमयीं रामप्रति
मां च प्रयत्नतः श्रीरामप्रीतये दास्ये रामभक्ताय धीमते प्रीतो रामो हरत्वाशु पापा
नि सुबहूनि मे अनेकजन्मसंसिद्धान्यभ्यस्तानि महांति च ततः स्वर्णमयीं राम
प्रतिमां पलमात्रतः निर्मितां द्विभुजां दिव्यां वामांकस्थितजानकीं बिभ्रतीं दक्षिण
करेणानमुद्रां महामुने वामेनाधः करेणात्तदेवीमालिंग्य संस्थितां सिंहासने
राजते त्रपलद्वयविनिर्मिते तथा अशक्तोयो महाभाग सन्तु वित्तानुसारतः पले
नार्धतदर्धार्धतदर्धार्धेन वा मुने सौवर्णं राजतं वापि कारयेद्रघुनंदनं पार्श्वे भरत र
शत्रुघ्नौ धृतछत्रकरावुभौ चापद्वयसमायुक्तं लक्ष्मणं चापि कारयेत् दक्षिणे
गे दशरथं पुत्रावेक्षणतत्परं मातुरंकगतं राममिंदुनीलसमप्रभं पंचामृते
स्नानपूर्वं संपूज्य विधिवत्ततः कौशल्यामंत्रकः रामस्य जननी चासि रामरूप
मिदं जगत् अतस्त्वां पूजयिष्यामि लोकमातर्नमोस्तु ते नमो दशरथायेति पू
जयेत्पितरं ततः अत्र दशावरणपंचावरणादि पूजान्यत्र ज्ञेया अशोककु र
सुमैर्युक्तमर्घ्यं दद्याद्विचक्षणः दशाननवधार्थाय धर्मसंस्थापनाय च

52A

राक्षसानां विनाशाय दैत्यानां निधनाय च परित्राणाय साधूनां जातो रामः स्वयं
हरे गृहाणार्घ्यं मया दत्तं भ्रातृभिः सहितोनघ पुष्पांजलिं पुनर्दत्वा यामे यामे प्र
पूजयेत् एवं विधिवत्कृत्वा रात्रौ जागरणं ततः ततः प्रातः समुत्थाय स्नानसंध्या
दिकाः क्रियाः समाप्य विधिवद्रामं पूजयेद्विधिवन्मुने ततो होमं प्रकुर्वीत मूल
मंत्रेणाग्निमंत्रवित् पूर्वोक्तपद्मकुंडे वा स्थंडिले वा समाहितः लौकिकाग्नौ विधा
नेन शतमष्टोत्तरं ततः आज्येन पायसेनैव स्मरन्राममनन्यधीः ततो भक्त्या सुसं
तोष्य आचार्यं पूजयेन्मुने ततो रामं समुद्दिश्य दद्यादेवं मंत्रमुदीरयेत् इमां स्वर्णमयीं
रामप्रतिमां समलंकृतां चित्रवस्त्रयुगाछिन्नां रामोहं राघवाय ते श्रीरामप्रीतये दा
स्ये तुष्टो भवतु राघवः इति दत्वा विधानेन दद्याद्दक्षिणां भवे ब्रह्महत्यादिपापेभ्यो मु
च्यते नात्र संशय इति इयं मलमासे न कार्यास्तु तत्र मध्यजन्मे स्यात्तत्रोपवासः कृतो भवे
दिति नवमीं मलमासे न महालये न व्रतानि चेति माधवीये संग्रहवचनात् ननु
रामनवमीव्रतस्य नित्यत्वादेकादशीवन्मलमासेपि कर्तव्यता स्यादिति चेत् अत्र
ब्रूमः नैकादश्युपवासस्य व्रतत्वेन प्राप्तिः किंत्वेकादश्यां न भुंजीत पक्षयोरुभ
योरपीत्यादिनिषेधस्य मासेपि पालनीयत्वात् कृष्णैकादश्यां पुत्रवतस्तु गृहिणो द्वा
दश्यादुपवासः प्रसज्यते नात्र हि तथेति व्रतत्वेन प्राप्तिर्वाच्या सा चानिषिद्धत्वप्र

संगः स्यच्छमासे विशेषाख्याविदितं वर्जयेन्मले इति निषेधाच्च ॥ एवं जन्माष्टम्या
दावपि बोध्यं इति रामनवमी चैत्रशुक्लैकादश्यां दोलोत्सव उक्तो ब्राह्मे चैत्र ॥
मासस्य शुक्लायामेकादश्यां तु वैष्णवैः आन्दोलनीयो देवेशः सलक्ष्मीको महोत्सवै
रिति चैत्रशुक्लद्वादश्यां दमनोत्सवः द्वादश्यां चैत्रमासस्य शुक्लायां दमनोत्सवः बोधा
यनादिभिः प्रोक्तः कर्तव्यः प्रतिवत्सरमिति रामार्चनचंद्रिकोक्तेः ऊर्जे व्रते मधौ
दोलाश्रावणे तंतुपूजने चैत्रे मदनारोपमकुर्वाणो व्रजत्यधः इति तत्रैव पाद्मवा
क्याच्च शिवभक्तादिभिस्तु चतुर्दश्यादौ कार्यं तत्र स्यात्सायाः तिथिषु ब्रह्मा
देर्दमनार्पणमिति तत्रैवोक्तेः तिथयस्तु वह्निर्विरंचोगिरिजागणेशः फणी ॥
विशाखो दिनकृन्महेशः दुर्गान्तको विष्णुहरिः स्मरश्च शर्वः शशी चेति तिथीश्वरा
स्यादित्युक्ताः अथागमोक्तदीक्षावतो दमनारोपणविधिः रामार्चनचंद्रिकोक्तेः त
त्रैकादश्यां क्रियालोपविघातार्थं यत्त्वया ॥ विहितं प्रभो न मे विघ्नो भवेदत्र कुरु ना
थ दयां मयि सर्वथा सर्वदा विष्णो समस्त्वं परमा गतिः उपवासेन त्वां देव तोषयामि
जगत्पते कामक्रोधादयो येते न मे स्युर्व्रतघातकाः अद्यप्रभृति देवेश
यावद्वैशेषिकं दिनं तावद्रक्षा त्वया कार्या सर्वस्यास्य जगत्पते इति देवं संप्रा
र्थ्य दमनमादाय मंत्रत्रयेण प्रोक्ष्य वस्त्रेणाच्छाद्याशोकमूले देवाग्रे वा ।

53A

अशोकाय नमस्तुभ्यं कामस्त्रीशोकनाशने शोकार्तिहर मे नित्यमानंदं जनयस्व मे
इत्यशोकं कुब्जादिकालपर्यंतः कालरूपो महाबलः कलते चैवयः सर्वं तस्मै कालात्मने
नम इति कालं वसंताय नमस्तुभ्यं वृक्षगुल्मलताय च सहस्रमुखसंवास कामरूप नमो
स्तु ते इति वसंतं कामभस्मसमुद्भूत रतिबाष्पपरिप्लुत ऋषिगंधर्वदेवादिविमोहक न
मोस्तु ते इति दमनं च संपूज्य नमोस्तु पंचबाणाय जगदाह्लादकारिणे मन्मथाय जगन्ने
त्रे रतिप्रीतिप्रियाय ते इति म[illegible]नमुपस्थाय ॐ कामाय नमः इति संपूज्य निशायां देवाग्रे पं
चवर्णैः शुद्धचन्दनेन वा अष्टदलं कृत्वा बहिश्चतुरस्रं तद्बहिर्वृत्तं तत्र यंत्रं बहिरष्टं च चतुरस्रं च कृत्वा तत्र
कुंभं संस्थाप्य तदुपरि दमनं संस्थाप्य पूजार्थे देवदेवस्य विष्णोर्लक्ष्मीपतेः प्रभोः दमनं त्वमि
हागच्छ सान्निध्यं कुरु ते नमः ॐ क्लीं कामदेवाय नमः ॐ ह्रीं रत्यै नमः इत्यावाह्यादिपूर्वादितः
स्मरशराय नमः अनंगाय नमः मन्मथाय रामाय क्लीं वसंतसखाय स्मराय इक्षुचापाय पुष्पबाणाय
नम इति प्रजपित्वा ॐ तत्पुरुषाय विद्महे कामदेवाय धीमहि तन्नोऽनंगः प्रचोदयादित्य
ष्टोत्तरशतं सम्यग्जपित्वा ह्रीं नमः इति पुष्पांजलिं दत्वा नमोस्तु पुष्पबाणाय जगदा-
ह्लादकारिणे मन्मथाय जगन्नेत्रे रतिप्रीतिप्रियाय इति नत्वा आमंत्रितोसि देवेश पुराण
पुरुषोत्तम प्रातस्त्वां पूजयिष्यामि संनिधौ भवते नमः निवेदयाम्यहं तुभ्यं प्रातर्दमनकं
शुभं सर्वथा सर्वदा विष्णो नमस्ते तत्प्रसीद मे इति देवं संप्रार्थ्य पुष्पांजलिं दत्वा अ

स्त्रेण चक्रमंत्रेण चारक्षां कुर्यात् ततः प्रातर्नित्यपूजां कृत्वा पुनर्देवं संपूज्य दूर्वागं
धाक्षतयुक्तं दमनमादाय मूलमंत्रं पठित्वा देवदेव जगन्नाथ वांछितार्थप्रदायक हृत्स्था
न्पूरय मे कामान् मम कामेश्वरीप्रिय इदं दमनकं देव गृहाण मदनुग्रहात् इमां सांवत्सरीं
पूजां भगवन् परिपूरय इति मंत्रांते पुनर्मूलमंत्रेण देवे समर्पयेत् ततोंगदेवताभ्यः स्वस्व
मंत्रैर्दत्वा प्रार्थयेत् मणिविद्रुममालाभिर्मंदारकुसुमादिभिः इयं सांवत्सरी पूजा तवास्तु
गरुडध्वज वनमालां यथा विष्णो कौस्तुभं सततं हृदि तद्वद्दामनकीं मालां पूजां च हृदये वह
जानताजानता वापि न कृतं यत्तवार्चने तत्सर्वं पूर्णतां यातु त्वत्प्रसादाद्रमापते जितं ते पुंडरी
काक्ष नमस्ते विश्वभावन नमस्तेस्तु हृषीकेश महापुरुष पूर्वज मंत्रहीनमिति च संप्रार्थ्य
पंचोपचारैः पुनः संपूज्य नीराज्य पारयेदिति दीक्षारहितानां तु नाम्नैव समर्पणं
अत्र त्रयोदशी ग्राह्या पवित्रदमनार्पणं प्रति तत्रैवोक्तेः गौणोपि काल उक्तस्तत्रैव हरौ
न दमनारोपः स्यान्मध्ये विघ्नो यदि वैशाखे श्रावणे वापि तत्रैयोस्यात्तदर्पणे श्राव
णवद्विधुक्तकाले कर्तव्यमिति नारदः इति पाठांतरं तच्च मलमासे न कार्यं उपाकर्मोत्
सर्जनं च पवित्रदमनार्पणमिति कालादर्शे मलमासवर्ज्यप्रपरिगणनात् उपाक
र्म च हव्यं च कव्यं पर्वोक्तं स्वेनया उत्तरे नियतं कुर्यान्न वर्तेत त्रिःफलं भवेदिति माधवी
ये प्रजापतिवचनाद्ध अस्तास्तादौ न कार्यमेव पर्वोक्तवचनात् उपाकर्मोत्सर्जने

चपरत्रदमनार्पणं ईशानस्य बलिर्विघ्नेशः शयनपरिवर्तनं कर्णाप्रच्छुकस्य चतु
रोमौहूर्तव्यापीति विनिश्चय इति ज्योतिर्निबंधे बृहद्गार्ग्यवचनाच्च चैत्रशुक्लत्रयोदश्या
मनंगाहुतेन वसापयैगणाधानपोदशातिथिः पूर्वैः सितइति दीपिकोक्तेः चैत्रशुक्लचतुर्द
शी पूर्वा ग्राह्या मघोः श्रावणमासस्य शुक्लापुत्रचतुर्दशी सा रात्रिव्यापिनी ग्राह्या नान्या
ग्रकाक्तवाचनेति हेमाद्रौ बौधायनोक्तेः परा पूर्वाह्णगामिनीति वा पाठः अत्र केचिद्घस्या
क्तमेवार्थं वर्णयंति निशि भ्रमंति भूतानि शक्तयः शूलभृद्यतः अतस्तत्र चतुर्दश्यां
सत्यां तत्पूजनं भवेदिति प्रतिपदेन लीन हेमाद्रिमाधवादिलिखनमप्येवं संप्रदायविद
स्त्यानुः चतुर्दशीतकान्वेव्या त्रयोदश्यायुक्ता विशेषेरति स्कांमुत्सर्गः तदपवादस्त्वतीये
कादशीवर्ज्यशुक्लपक्षचतुर्दशी पर्वविद्धा नकैत्तेमाकार्त्तनापरसंयुतेति नारदीयव
चनं तदपवादस्तु मघोः श्रावणमासस्येति तत्रापवादाभावे पुनरुत्सर्गस्यास्थितिरि
ति न्यायेन मुहूर्तविद्धैव ग्राह्येति सिध्यति तत्र लैवे वर्तेत सामान्यरूपमन्यत्र सर्वकथा
मिति तेन पूर्वे दिने मुहूर्तत्रयवेधे पूर्वा अन्यथोत्तरेति चैत्रपूर्णिमासामान्यति
णी यात्तयैव अत्र विशेषो निर्णयामृते विष्णुरहस्ये तौ चैत्री चित्रायुता चेत्स्यात्तस्यांवि
ग्रवस्त्रप्रदानेन सौभाग्यमाप्नोति तथा ब्राह्मे मंदे वे वा गुरौ वापि वारेष्वेतेषु चेत्रिका

नत्राश्वमेधजं पुण्यं स्नानमात्रादिभिर्लभेदिति अत्र सर्वदेवानां दमनपूजोक्ता
तत्रैव वायवीये संवत्सरकृतार्चायाः साफल्याय विधानतः दमनेनार्च्चयेच्चै
त्रे विशेषेण सदाशिवमिति अनुक्तस्वीयतिथ्यासमस्य पद इति केचित्तु स्वीयतिथ्य
वकरणे अत्र दमनपूजनमित्यन्ये दीक्षिततत्तदितरविषयत्वेन व्यवस्थेत्यपरे इयं
मन्वादिरपि सा च पूर्वविद्धा चैत्रकृष्णत्रयोदश्यां महावारुणीसंज्ञको योगो गौडेषु
प्रसिद्धः तदुक्तं वाचस्पतिकृतौ स्कन्दपुराणे च स्कांदे वारुणेन समायुक्ता मधौ कृष्णा
त्रयोदशी गंगायां यदि लभ्येत सूर्यग्रहशतैः समा शनिवारसमायुक्ता सा महावारु
णी स्मृता गंगायां यदि लभ्येत कोटिसूर्यग्रहैः समा शुभयोगसमायुक्ता शनौ
शतभिषा यदि महामहेति विख्याता त्रिकोटिकुलमुद्धरेत् तत्रैव ज्योतिषे चैत्रा
सिते वारुणऋक्षयुक्ता त्रयोदशी सूर्यसुतस्य वारे योगे शुभे सा महती महत्या गं
गाजले अर्कग्रहकोटितुल्येति स्थलीसेतौ ब्रह्माण्डपुराणे वारुणेन समायुक्ता मधौ
कृष्णत्रयोदशी गंगायां यदि लभ्येत शतसूर्यग्रहैः समेति कल्पतरौ ब्राह्मे मधौ कृ
ष्णत्रयोदश्यां शतभिषा यदि वारुणीति समाख्याता शुभे तु महती स्मृता चैत्र
कृष्णचतुर्दश्यां विशेषः षष्ठीचंद्रोदये मात्स्यः चैत्रकृष्णचतुर्दश्यां यः स्नायाच्छिव

कोटि

55A

सन्निधौ नपुंत्तत्त्वमवाप्नोतिगंगायांतु विशेषतः इति गोडरत्वेतदेवमुक्तं चतुर्दश्यां
मित्येवं देवलीयत्वेनपठितं इति श्रीरामकृष्णभट्टसूरिसूनुकमलाकरभट्टकृते
कालनिर्णयसिंधौचैत्रमासः मेषसंक्रमेप्रागपरादशघटिकाः पुण्यकालः रात्रौतु
पूर्वमुक्तं अथधर्मघटादिदानमुक्तं पश्चाच्चंद्रोदये पाद्मे तीर्थेवानदीषुस्नानं तिलै
श्च पितृतर्पणं दानंधर्मघटानांमधुसूदनपूजनं माधवेमासिकुर्वीतमधुसूद
नतुष्टिदं अथवैशाखस्नाने तत्रपश्चाच्चंद्रोदयेविष्णुस्मृतिपाद्मयोस्तुलामकरमे
षेषुप्रातःस्नानंविधीयते हविष्यंब्रह्मचर्यंचमहापातकनाशनमिति सौरमा
सउक्तः अन्यत्पक्षद्वयमुक्तं तत्रैवपाद्मे मधुमासस्यशुक्लायामेकादश्यामुपो
षितः पंचदश्यांचमोवारमेषसंक्रमेनचवैशाखस्नाननियमंब्राह्मणानामनु
ज्ञया मधुसूदनमभ्यर्च्यकुर्यात्संकल्पपूर्वकं तत्रमंत्रः वैशाखंसकलंमासंमे
षसंक्रमणेरवेः प्रातःसनियमःस्नास्येप्रीयतांमधुसूदनः मधुहंतुःप्रसादेन
ब्राह्मणानामनुग्रहात् निर्विघ्नमस्तुमेपुण्यंवैशाखस्नानमन्वहं माधवेमेषगे
भानौमुरारेमधुसूदन प्रातःस्नानेनमेनाथफलदोभवपापहन्निति तीर्थविशेषो
पितत्रैवोक्तः मेषसंक्रमणेभानौमाधवेमासियत्नतः महानद्यांनदीतीर्थेषु
रवा देसरसिनिर्झरे देवखातेयथाप्राप्तेजलाशये दीर्घिकाकूपवापीषु

नि०सिं०
५६

56

नियतात्माहरेस्स्मरन्निति संकल्प्येचतत्तीर्थंनामगरुडंघ्रमुत्तानेतु विष्णुतीर्थमि
तिवदेत् यदानन्ताश्यतेनामतत्स्यतीर्थस्यसोद्विजाः तत्रैवमुच्चारणंकार्यंविष्णु
तीर्थमिदंत्विति तीर्थस्यदेवताविष्णुःसर्वगापिनसंशयः इतितत्रैवोक्तेः तथान्यो
पिविशेषस्तत्रैव पद्मेतुलसीकुंकुमगौराख्यातथाभ्यर्च्यमधुद्विषं विशेषेणतु
वैशाखेनरोनारायणोभवेत् माधवंसकलंमासंतुलस्यायोर्चयेन्नरः त्रिसंध्यंमधुहंता
रंनास्तितस्यपुनर्भवः तथा प्रातःस्नात्वाविधानेनमाधवेमाधवःप्रियः योऽश्वत्थस्यमू
लंमासिंचेत्तोयेनबहुनासदा कुर्यात्प्रदक्षिणंतंतुसर्वदेवमयंततः पितृदेवमनु
ष्यांश्चतर्पयेत्सचराचरं योऽश्वत्थंसर्वदेवमुदकेनसमंततः कुलानामयुतंतेनतारि
तंस्यान्नसंशयः कंडूयनंघटततोगालवस्नात्वाचापिप्पलतर्पणं कृत्वागोविंदमभ्यर्च्यनदु
र्गतिमवाप्नुयात् तथा एकभक्तमथोनक्तमयाचितमतंद्रितः माधवेमासियःकु
र्यात्सलभतेसर्वमीप्सितंवैशाखेविधिनास्नानंदेवनपादिकेवाह्निः हविष्यंब्रह्मच
र्यंचभूशय्यानियमस्थितिः व्रतंदानंदमोदेविमधुसूदनपूजनं अपिजन्मसहस्रो
त्थपापंदहतुदारुणं मदनरत्नेस्कांदे प्रपाकार्याविशाखेदेवेदयागलंतिका उपान
त्पादुकाच्छत्रवासांसि चंदनं जलपात्राणिदेयानितथापुष्पगृहाणिच पा
नकानिचचित्राणिद्राक्षारंभफलान्यपि तिथितत्त्वे ददातियोहिमेषादौसक्तू

राम
५६

56A

नं कुर्वन्दत्वा चान्नानि पितृन्देवर्षिविप्रेभ्यः सर्वपापैः प्रमुच्यते तथा वैशाखे योऽटं
पूर्णे संभोज्यं वै द्विजन्मने ददाति स्वर्णकं स याति परमां गतिं एवं संपूर्णे स्नाना
शक्तो मासं देवास्नायात् तदुक्तं तत्रैव पाद्मे त्रयोदश्यां च चतुर्दश्यां पौर्णमास्यां दिनत्रयं।
अपि सम्यग्विधानेन नारी वा पुरुषोऽपि वा प्रातःस्नातः सनियमः सर्वपापैः प्रमुच्य
ते तस्मिन् यदा तु वैशाखो मलमासो भवति तदा काम्यानां तत्र समाप्तिनिषेधान्मल
द्वये स्नानं तन्नियमाश्च कर्तव्या मासोपवासचान्द्रायणादिवन्मलमासे एव समापये
त तदुक्तं दीपिकायां नियतस्त्रिंशद्दिनात्मा शुभे मासारभ्य समापयेत् मलिनमासो
पवाव्रतमिति अत्र दानं विशाखकोपरार्के वामनपुराणे गंधाश्च माल्यानि तथा वैष्ण
वैशाखे सुरभीण्यत्र देयानि द्विजमुख्येभ्यो मधुसूदनतुष्टये एवं स्नाने कृते तस्योद्यापनं।
कार्यं तदुक्तं तत्रैव मासमेवं बहिःस्नात्वा नद्यादौ विमले जले एकादश्यां च द्वादश्यां मो
णे मासमध्येऽपि वा ज्योत्स्ने नियतो भक्त्या कुर्यादुद्यापनं बुधः मंडपं कारयेद्दोकुल
णेन तत्र विन्यसेत् निष्केण वा तदर्धेन तदर्धार्धेन वा पुनः एकं वा कारयेद्देवं सौवर्णं ला
ञ्छनान्वितं लक्ष्मीयुतं जगन्नाथं पूजयेदासने बुधः अर्घ्यस्नानार्चनैः पुष्पैर्दीपनैवेद्यसं
चयैः एवं संपूज्य विधिवद्रात्रौ जागरणं चरेत् प्रभाते कृतमैत्रोऽथ गतस्वे धौतांगस्ततो य
जेत् मैत्रेशो वयापोऽमित्रदेवत्याच्चात् होमं कुर्यात्प्रयत्नेन पायसेन विचक्षणः तिलाज्येन
यवैर्वापि सर्वैर्वापि स्वशाखितः अष्टोत्तरसहस्रं वा शतमष्टोत्तरं तु वा प्रतिद्रव्यम्

एनेनैवइदं विस्तरेणवा व्रतसंपूर्त्तिसिध्यर्थं धेनुमेकां पयस्विनीं पादुकोपान
हौ छत्रं गुरवे व्यजनं तथा शय्यां सोपस्करां दद्याद्दीपिकां दर्पणं तथा ब्राह्मणान्
भोजयेत्त्रिंशद्भ्यो दद्याच्च दक्षिणां कलशान् जलसंपूर्णांस्तेभ्यो दद्याद्वा स्वशक्तितः ए
वं कृते माधवस्योद्यापनविधौ शुभे फलमाप्नोति सकलं विष्णुसायुज्यमाप्नुयात्
एवं वत्सरान्ते न तस्यैवोक्तं वैशाखस्नानविधिना स्नात्वा भोजयेद्ब्राह्मणान्दश कृशरं सर्व
पापेभ्यो मुच्यते नात्र संशय इति वैशाखशुक्लतृतीयाक्षयतृतीया सा पूर्वाह्णव्या
पिनी ग्राह्या दिनद्वयेपि तद्व्याप्तौ परैव तदुक्तं निर्णयामृते नारदीये वैशाखे शु
क्लपक्षे तु तृतीया रोहिणीयुता दुर्लभा बुधवारेण सोमेनापि युता तथा रोहि
णी बुधसंयुक्ता पूर्वविद्धा विवर्जिता भविष्ये अनया कृतयापि मांधाता पुत्रं हंति पुरा कृ
ते मौरिविनायकोपेता रोहिणीबुधसंयुता विनापि रोहिणीयोगात्पुण्यकोटिप्र
दा स्मृतेति इयं युगादिरपि सा चोक्ता रत्नमालायां माघे पंचदशी कामा नभस्ये च
त्रयोदशी तृतीया माधवे शुक्ला नवम्यूर्जे युगादय इति मदनगौडः माघस्य
पूर्णिमायां तु घोरं कलियुगं स्मृतमिति ब्रह्मोक्तेः वैशाखमासस्य च या तृतीया न
वम्यसौ कार्तिकशुक्लपक्षे नभस्यमासस्य तमिस्रपक्षे त्रयोदशी पंचदशी च

57A

माघे इति विष्णुपुराणे चकारेण तमिस्रपक्षानुरोधेपि सर्वानुरोधात्पूर्णिमा
स्येव ज्ञेया हेमाद्रौ तु मन्वादिकं तु निर्मूलमित्याहुः तन्न दर्शे तु मासस्य प्रवर्तते द्वाप
रं युगमिति भविष्यविरोधात् एतेन ब्राह्मानुसारात्पूर्णिमायामेव युगादि
त्वं वदं शूलपाणिः परास्तः तेन कल्पभेदात् युगभेदात् वा व्यवस्थेति तत्त्वं एतेन
कार्तिकनवमीमुक्त्वा माघमासे च पूर्णिमेति वदन्नारदीयमाख्यातं निर्मूल
त्वोक्तिर्नारदीयाज्ञानकृता अत्र श्राद्धमुक्तं मात्स्ये कृतं श्राद्धं विधानेन मन्वा
दिषु युगादिषु हायनानि द्विसहस्राणि पितॄणां तृप्तिदं भवेदिति भारतेपि या मन्वा
द्या युगाद्यास्तिथयस्तासु मानवः स्नात्वा हुत्वा च जप्त्वानंतफलं लभेदिति श्राद्धे
पि पूर्वाह्णव्यापिनी ग्राह्या पूर्वाह्णे तु सदा कार्याः शुक्ले मन्वादयः दैवे कर्मणि पि
त्र्ये च कृष्णे चैवापराह्णिकी इति पाद्मोक्तेः हेमाद्रौ तु तथा कृष्णे युगादौ कव्ये वि
दुः शुक्ले पौर्वाह्णिके ग्राह्ये कृष्णे चैवापराह्णिके इति हेमाद्रौ नारदीयवचनाच्च दी
पिकायां तु ये मन्वादियुगादिकर्मतिथयः पूर्वाह्णिकाः शुक्ले ते विज्ञेया ह्यप
राह्णिकास्तु बहुले इति स्मृत्यर्थसारेपि युगादिमन्वादिश्राद्धेषु शुक्लपक्षे उदयव्या
पिनीति पित्र्ये ग्राह्या कृष्णपक्षे परा [illegible] व्यापिनीति दिवोदासीये गोभिलः १

वैशाखस्य तृतीयां यः पूर्वविद्धां करोति वै हव्यं देवा न गृह्णन्ति कव्यं च पितरस्तथेति
तेनैव पूर्वाह्णव्यापिन्यादिनद्वये तत्त्वे परैवेति धर्मतत्त्वविदो हेमाद्र्यादयः अनंतभट्ट
स्त्वैवं धृति व्यतीपातो युगमन्वादयस्तथा सन्मुखा उपवासे स्युर्दानादावितिमा
स्त्रान्तरात्याह दानादाविति श्राद्धसंग्रहः उपवासस्तु वक्ष्यते यत्तु मार्कंडेयः अलौ
पक्षस्य पूर्वाह्णे श्राद्धं कुर्याच्च द्विचक्षणः कृष्णपक्षापराह्णे हि रोहिणं तु न लंघयेत् ।
रोहिणो नवमो मुहूर्तः अत्र शुक्लपक्षे युगादिश्राद्धं पूर्वाह्णे कार्यमिति मदनपा ।
रिजातपृथ्वीचंद्रौ निर्णयामृतादयस्तु कालादर्शे माघश्राद्धमापराह्णिकमुक्तं यएव
एमन्वंतरादीनांविनिर्णयस्तु हेमाद्रेर्मतः इत्यादिवचनं विष्णुपूजादिविषयं
श्राद्धे त्वापराह्णिकोचति व्यवस्थामाहुः सेयं पूर्वोक्तानेकवचोविरोधात्पूर्वाह्ण
दैविकं कुर्यादित्यादिवचनैर्नादेव सिद्धेर्वचनवैयर्थ्यापत्तेश्चास्याश्छायाविलसितमा
त्रमित्युपेक्षणीयं किंच कालादर्शोक्ति न्यायमूला वचनमूला वा नाद्यः युगा
दिश्राद्धस्यामाश्राद्धविकृतत्वेन न्यायतोपराह्णप्राप्तावपि वचनेन तस्य बाधा
न नांत्यः अतिदेशादेवापराह्णप्राप्ते वचनवैयर्थ्यात् अप्राप्ते शास्त्रमर्थवदिति
न्यायात् तेनयदि कालादर्शोक्तः कथंचित्पुष्ट्या जन्येन समाधिः स्यात्तर्हि न्याय

ना

58A

प्राग्हृष्टकृष्णपक्षयुगादिविषयत्वेन साम्यवस्थापनीयेति दिक्‌ अत्र विशेषो हे
माद्रौ भविष्ये वैशाखे शुक्लपक्षे तु तृतीयायां तथैव च गंगातोये नरः स्नात्वा मु
च्यते सर्वकिल्बिषैः तस्यां कार्यो यवैर्होमो यवैर्विष्णुं समर्चयेत् यवान् दद्याद्द्विजा
तिभ्यः प्रयतः प्राशयेद्यवानिति कल्पतरौ पद्मे यच्छंकरं गंगा कैलासाच्च हिमा
लयं भगीरथं च नृपतिं सगराणां सुखावहमिति अत्र दानविशेषस्तत्रैव भवि
ष्ये इमां प्राकृम्य उदकुंभान् सकनकान् सान्नान् सर्वरसैः सह यवगोधूमचणकान् स
क्तु दध्योदनं तथा ग्रैष्मिकं सर्वमेवात्र सस्यं दाने प्रशस्यते इति देवीपुराणेपि ।
तृतीयायां तु वैशाखे रोहिण्यां प्रयतस्तु उदकुंभप्रदानेन शिवलोके महीयते
मंत्रस्तु एष धर्मघटो दत्तो ब्रह्मविष्णुशिवात्मकः अस्य प्रदानात्तृप्यंतु पितरोपि
पितामहाः गंधोदकतिलैर्मिश्रं सान्नं कुंभं फलान्वितं पितृभ्यः संप्रदास्यामि
अक्षय्यमुपतिष्ठतु इति अत्रैव पितृहितं श्राद्धं कुर्वीत अपनहितये श्राद्धं विर
इव दिनत्रयेण तथा युगादिषु च सर्वासु पिंडनिर्वपणं हृत इति हेमाद्रौ पुलस्त्य
वचनात् अत्र रात्रिभोजनेप्युक्तिमरणविधाने राज्ञो भुक्त्वा वत्सरेण मन्वादिषु
युगादिषु अभिस्पृश्य हविर्मंत्रं च जपेद्दानपातकात् इति अपरार्के यमः कृतो
पवासः सलिले युगादिदिनेषु च दास्यन्मन्वादिसंहितं तेषां लोका महोदय ई

ति वैशाखेवमलमासे सति तत्रैव युगादिः कार्या तथा च हेमाद्रौ ऋष्यशृंगः
दर्शाद्दर्शास्तु नो चांद्रः सोपि युगादिषु उपाकर्मणि चोत्सर्गे युतं दिष्टं वृषा
दितः इति एतद्दर्शाद्दर्शादिकं वृषादिसंक्रमेष्टं कन्यायां चेद्द्वेषे रवावित्यादि (
मासो रमासोर्कोरित्यर्थः कालादर्शोपि अब्दोदकुंभमन्वादिमहालययुगादि
ष्विति मलमासकर्तव्येषु परिगणनाच्च महालयशब्देन मघात्रयोदश्युक्तेति
ति माधवः स्मृतिचंद्रिकायां तु मासद्वयेकर्तव्यमित्युक्तं योगादिकं मासिकं
च श्राद्धं चापरपाक्षिकं। मन्वादिकं तैर्थिकं च कुर्यान्मासद्वयेपि चेति अपरप
क्षः कृष्णपक्षः न तु महालयः तस्य तत्र निषेधात् मदनरत्नेपि मरीचिः प्रतिमास
मृताहेषु श्राद्धं प्रतिसंवत्सरं मन्वादौ च युगादौ च तन्मासो उभयोरपीति प्रतिसंव
त्सरे क्रियमाणं कल्पादिश्राद्धमिति स एव व्याचख्यौ अत्र श्राद्धाकरणे प्रा
यश्चित्तमुक्तं मत्स्यविधाने नवस्यधावामंत्रेण शतवारं तदा जपेत् युगादयो यदा
न्यूनाः कृतास्तेनैव चाधिपः इति अत्र समुद्रस्नानं प्रशस्तं तदुक्तं पद्मे चंद्रोदये
ऽसौ प्रयुक्तो युगादौ तु नरः स्नात्वा विधिवल्लवणोदधौ गोसहस्रप्रदानस्य कृत्स्नो
ऽपि फलमाप्नुयात् तत्फलं लभते मर्त्यो भूमिदानस्य च ध्रुवमिति अयं निर्णयः सर्व
युगादिष्वेव बोद्धव्यः इति युगादिनिर्णयः इयमेव तृतीया परशुरामजयंती साप्य

शेषव्यापिनी ग्राह्या तदुक्तं भार्गवार्चनदीपिकायां स्कांदभविष्ययोः वैशा
खस्य सितेपक्षे तृतीयायां पुनर्वसौ निशायाः प्रथमे यामे रामाख्यः समहाहरिः
स्वोच्चगैः षड्ग्रहैर्युक्ते मिथुने राहुसंस्थिते रेणुकायास्तु यो गर्भादवतीर्णो हरिः
स्वयमिति दिनद्वये तद्व्याप्तौ चेत्तु समव्याप्तौ च परा अन्यथा पूर्वैव तदुक्तं तत्र
एव भविष्ये शुक्लात्तृतीयावैशाखस्य प्रदोषव्यापिनी द्वयेनिशायां पूर्वयामे चेदुक्त
मन्यत्र पूर्वकेति वैशाखशुक्लसप्तम्यां गंगोत्पत्ति तदुक्तं पृथ्वीचंद्रोदये ब्राह्मे वैशा
खशुक्लसप्तम्यां जाह्नवी जाह्नवी पुरा क्रोधात्पीता पुनस्त्यक्ता कर्णरंध्रात्तु दक्षिणा
त्ता तां तत्र पूजयेद्देवीं गंगां गगनमेखलामिति अत्र शिष्टाचारान्मध्याह्नव्यापिनी
ग्राह्या दिनद्वये तद्व्याप्तावव्याप्तौ वैकदेशव्याप्तौ वा पूर्वा युग्मवाक्यात् अत्रैव
बौद्धावतारस्तदुक्तं कल्पतरौ अष्टाविंशतिमे प्राप्ते विष्णुः कलियुगे सति शाक्यो
विनष्टधर्मास्त्र बुद्धो भूत्वा प्रवर्तयत् तत्र पूज्यो भविष्ये सौ पुष्यार्थे दिवसत्रयमि
ति वैशाखशुक्लद्वादश्यां योगविशेषो हेमाद्रौ ज्योतिःशास्त्रे पंचाननस्थो गुरुस्त
मिथुनस्थे मेषे रविः स्याद्द्वादश्यां शुक्लपक्षे पाशाभिधानाकरभे प्रयुक्ता तिथिर्व्यती
पातइतिस्मृतो योगः अस्मिन्स्नातो भूमिहिरण्यवस्त्रदानेन सर्वं परिहाय पापं सुरत्व
मिंद्रत्वमनामयत्वं मर्त्याधिपत्यं लभते मनुष्य इति पंचानने नः सिंहः पाशाभिधा

नातिथिद्वादशीकरभोहस्तः वैशाखस्य शुक्लचतुर्दशी नृसिंहजयंती सा प्रदोषव्यापि
नी ग्राह्या तदुक्तं हेमाद्रौ नृसिंहपुराणे वैशाखे शुक्लपक्षे तु चतुर्दश्यां निशामुखे मज्जन्मस
भवं पुण्यं व्रतं पापप्रणाशनं वर्षे वर्षे तु कर्तव्यं मम संतुष्टिकारणमिति दिनद्वये॰
पित्त्याप्रावशत्तः समव्याप्तौ च परा विषमव्याप्तौ त्वधिकव्याप्तिमती दिनद्वयेप्यव्या
प्तौ परापरदिने गौणकालव्याप्तेः सत्वात् पूर्वदिने च तदभावात् एवं ततो मध्याह्न
वेलायां नद्यादौ विमले जले जलं स्पृष्ट्वा परिधाय ततो वासो व्रतकर्म समारभे॰
दिति तत्रैवोक्तं तत्संकल्परूपव्रतोपक्रमविषयं नत्वेतावता मध्याह्नव्यापिनी ग्राह्ये
ति भ्रमितव्यं पूर्वोक्तवचनविरोधात् वैशाखस्य चतुर्दश्यां सोमवारे निलर्क्षके
अवतारो नृसिंहस्य प्रदोषसमये द्विजा इति टोडरानंदे स्कांदात् कूर्मसिंहेवोद्धक॰
त्वौ च सायमिति पूर्वोक्तपुराणसमुच्चयवचनाच्च इयमेव योगविशेषेणातिप्रशस्ता
तदुक्तं तत्रैव स्वातिनक्षत्रयोगे च शनिवारे तु मद्व्रतं सिद्धियोगस्य संयोगे वणिजेक
रणे तथा पुंसां सौभाग्ययोगेन लभ्यते दैवयोगतः तथा एभिर्योगैर्विनाप्यस्ति मद्दिनं पा
पनाशनं तथा सर्वेषामेव वर्णानामधिकारोस्ति मद्व्रते मद्भक्तैस्तु विशेषेण कर्तव्यं
मत्परायणैः तथा सिंहः स्वर्णमयो देयो मम संतोषकारकः तथा विज्ञाय मद्दिनं
यस्तु लंघयेत्स पापकृत् नरः स याति नरकं घोरं यावच्चंद्रदिवाकरौ इदं च संयोगाप्र

60A

घान्तन्यायेन नित्यं काम्यं च अथात्र विशेषः मध्याह्ने तिलामलकस्नानं कृत्वा नृसिंहदे
वदेवेश तव वत्सादिने शुभे उपवासं करिष्यामि सर्वभोगविवर्जितः इति मंत्रेण संकल्पं
कृत्वाचार्यं वृत्वा सायंकाले हैमीं तु तत्र मन्मूर्तिः स्थाप्या लक्ष्म्यास्तत्पार्श्वे च पलेन वार्ध
दर्द्धेन तदर्धार्धेन वा पुनः यथाशक्ति तथा कुर्याद्वित्तशाठ्यविवर्जित इत्युक्तं नृसिंह
मूर्तिं शक्त्या कृतं स्वर्णसिंहं च कलशोपरि संपूज्य रात्रौ जागरणं कृत्वा प्रातः पु
नः संपूज्य नृसिंहाच्युत देवेश लक्ष्मीकांत जगत्पते अनेनार्चाप्रदानेन सफलाः स्यु
र्मनोरथाः इत्याचार्याय दत्वा मद्वंशे ये नरा जाता ये जनिष्यंति चापरे तांस्त्वमुद्धर दे
वेश दुःसहाद्भवसागरात् पातकार्णवमग्नस्य व्याधिदुःखांबुवारिभिः तीव्रैश्च परि
भूतस्य महादुःखगतस्य मे करावलंबनं देहि शेषशायिन् जगत्पते श्रीनृसिंह
रमाकांत भक्तानां भयनाशन क्षीरांबुधिनिवासिंस्त्वं चक्रपाणे जनार्दन व्रतेना
नेन देवेश भुक्तिमुक्तिप्रदो भवेति प्रीत्यर्थं ये इति संक्षेपः वैशाखपौर्णमास्यां विशे
षः अपरार्के यमः वालिः स्तानान्मुदकुंभं च वैशाख्यां विशेषतः निर्दिश्य धर्म
राजाय गोदानफलमाप्नुयात् सुवर्णतिलयुक्तैस्तु ब्राह्मणान् सप्त पंच च तर्पयेदु
दपात्रैस्तु ब्रह्महत्यां व्यपोहतीति कुंभदानमंत्रस्त्वक्षयतृतीयाप्रकरणे उक्तः भ
विष्येपि वैशाखी कार्त्तिकी माघी तिथयोतीव पूजिताः स्नानदानविहीनास्तान

नेयाः पांडुनंदन अत्र कृष्णाजिनदानं कार्यं तथा च विष्णुः कृष्णाजिने तिलान्कृ
त्वा हिरण्यमधुसर्पिषी ददाति यस्तु विप्राय सर्वं तरति दुष्कृतमिति ॥ ॥ इति
श्रीनारायणभट्टसूनुरामकृष्णभट्टात्मजदिनकरभट्टानुजकमलाकरभट्टकृते नि
र्णयसिंधौ वैशाखः मासः समाप्तः ॥ वृषसंक्रांतौ पूर्वाः षोडश घटिकाः पुण्यकालः
रात्रौ संक्रमे सति प्रागेवोक्तं ॥ हेमाद्रौ शिवरहस्ये ॥ विचित्रदारुपंत्रस्थकं भेरगौक्षे शि
वोपरि मोचयेद्घटं यथा धारा संततास्यात्पदमस्त्विति ज्येष्ठशुक्लतृतीयायां रंभाव्रतमुक्तं
माधवीये भविष्ये ॥ भद्रे कुरुष्व यत्नेन रंभाख्यं व्रतमुत्तमं ज्येष्ठशुक्लतृतीयायां स्नाता निय
मतत्परेति सा पूर्वविद्धा ग्राह्या ॥ हेमाद्रौ तु तृतीया तथा रंभा सावित्री वटपैतृकी कृष्णाष्टमी च भूत
ता च कर्तव्या संमुखी तिथिरिति स्कांदोक्तेः ज्येष्ठशुक्लदशमी दशहरा तदुक्तं हेमाद्रौ ब्रह्म
ज्येष्ठे मासि सिते पक्षे दशमी हस्तसंयुता हरते दश पापानि तस्माद्दशहरा स्मृतेति वाराहे
पि दशमी शुक्लपक्षे तु ज्येष्ठे मासि कुजे दिने अवतीर्णा यतः स्वर्गाद्धस्तर्क्षे च सरिद्वरा
हरते दश पापानि तस्माद्दशहरा स्मृतेति स्कांदे तु दशयोगा उक्ताः यथा ज्येष्ठे मासि
सिते पक्षे दशम्यां बुधहस्तयोः व्यतीपाते गरानंदे कन्याचंद्रे वृषे रवौ दशयोगे नरः
स्नात्वा सर्वपापैः प्रमुच्यते इति अत्र बुधभौमयोः कल्पभेदेन व्यवस्था इयं च व
यैव योगबाहुल्ये सैव ग्राह्या योगाधिक्ये फलाधिक्यात् ज्येष्ठे मलमासे स

ति तत्रैव दशहरा कार्या नन्तमुद्दे दशहरा सनेनोत्कर्षस्तत्रैव विष्णुगादिस्थितिं
माद्रे अत्र पक्षमोक्तेः तथा स्कांदे यां कांचित्सरितं प्राप्य दद्याद्दर्भतिलोदकं मुच्यते
दशभिः पापैः समहापातकोपमैः अत्र विशेषः काशीखंडे ज्येष्ठे मासि सिते पक्षे (
प्राप्य प्रतिपदं तिथिं दशाश्वमेधके स्नात्वा मुच्यते सर्वपातकैः एवं सर्वासु तिथि
षु क्रमस्नायी नरोत्तमः आशुक्लपक्षदशमीं प्रतिजन्माघमुत्सृजेत् तथा लिंगे दशा
श्वमेधे यं दृष्ट्वा दशहरातिथौ दशजन्मार्जितैः पापैः स त्यज्यते नात्र संशयः तथा भ(
विष्योत्तरकाशीखंडयोः निशायां जागरं कृत्वा समुपोष्य च भक्तितः पुष्पैर्गंधैश्च
नैवेद्यैः फलैश्च दशसंख्यया तथा दीपैश्च तांबूलैः पूजयेच्छ्रद्धयान्वितः स्नात्वा
भक्त्या तु जाह्नव्यां दशकृत्वो विधानतः दशप्रसृतिकृष्णांश्च तिलान्सर्पिश्च वै ज
ले सक्तुपिंडान्गुडपिंडान्दद्याच्च दशसंख्यया ततो गंगातटे रम्ये हेम्ना रूपेण वा त
था गंगायां प्रतिमां कृत्वा वक्ष्यमाणस्वरूपिणीं संस्थाप्य पूजयेद्देवीं तथा
भेमत्तपिवा अप्यतत्राप्यराज्ञस्त्रिस्वेत्यटेनैवेभोधि वक्ष्यमाणेन मंत्रेण कुर्यात्
पूजां विशेषतः नारायणं महेशं च ब्रह्माणं भास्करं तथा भगीरथं च नृपतिं हि
मवंतं नगेश्वरं गंधपुष्पादिभिः सम्यग्यथाशक्ति प्रपूजयेत् दशप्रस्थांस्तिलान्

दद्यात् शरद्विप्रेभ्य एवञ्च दश प्रस्थान् यवान् दद्यात्तद्दशसंख्या गावीस्तथा प्र
स्थः षोडश पलानि पलं मुष्टिमात्रं पलं स्मृतमिति महार्णवे उक्तं मत्स्यकच्छप
मंडूकमकरादिजलेचरान् कारयित्वा यथाशक्ति स्वर्णेन रजतेन वा तत्सला
भे पिष्टमयान् अभ्यर्च्य कुसुमादिभिः गंगायां प्रक्षिपेदाज्यदीपांश्चैव प्रचारयेत् १
पुष्पाद्यैः पूजयेद्गंगां मंत्रेणानेन भक्तितः ॐ नमः शिवायै नारायण्यै दशहरायै
गंगायै नमो नमः इति मंत्रं तु यो मर्त्यो दिने तस्मिन्दिवानिशं जपेत्पंचसहस्रा
णि दशधर्मफलं लभेत् काशीखंडे त्वयं मंत्र उक्तः नमः शिवायै प्रथमं नाराय
ण्यै पदं ततः दशहरायै पदमिति गंगायै मंत्र एषवै स्वाहांतः प्रणवादिश्च भवेद्विंश
त्यक्षरो मनुः पूजा दानं जपो होमो नैनैव मनुना स्मृत इति अत्र गंगास्तोत्रपाठमपि
दशवारं कुर्यात् तदुक्तं भविष्ये तस्यां दशम्यामेतच्च स्तोत्रं गंगाजले स्थितः यः प
ठेद्दशकृत्वस्तु दरिद्रो वापि चाक्षमः सोपि तत्फलमाप्नोति गंगां संपूज्य यत्न
तः इति स्तोत्रं च प्रतिपदादि दशम्यांतं [illegible] दिन वृद्धिसंख्यया पठनीय
मिति शिष्टाः अत्र सर्वोपि विस्तरः स्तोत्रादि च भट्टकृत त्रिस्थलीसेतौ रघ
पे विस्तरभीतेर्न लिख्यते एवं कुर्वतः फलमुक्तं काशीखंडे एवं कृत्वा

62A

विधानेन विनष्टाद्यपविवर्जितः उपवासी वक्ष्यमार्गेर्दशपापैः प्रमुच्य
ते सर्वान्कामानवाप्नोति प्रेत्य ब्रह्मणि लीयते इति च अस्यां सेतुबंधरामेश्व
रस्य प्रतिष्ठादिनत्वाद्विशेषेण पूजा कार्या तदुक्तं स्कांदे सेतुमाहात्म्ये ज्येष्ठे
मासि सिते पक्षे दशम्यां बुधहस्तयोः गरानंदे व्यतीपाते कन्याचंद्रे वृषे रवौ द
शयोगे सेतुमध्ये लिंगरूपधरं हरं रामो वै स्थापयामास शिवलिंगमनुत्तमं
ति इति दशहरा ज्येष्ठशुक्लैकादशी निर्जला तत्र निर्जलमुपोष्य विप्रेभ्यो
जलकुंभान्दद्यादिति निर्णयामृते उक्तं मदनरत्ने स्कांदेपि ज्येष्ठे मासि नृपश्रेष्ठ
या शुक्लैकादशी शुभा निर्जले समुपोष्यात्र जलकुंभान्सशर्करान् प्रदाय विप्रमुख्ये
भ्यो मोदते विष्णुसन्निधौ ज्येष्ठपौर्णमास्यां सावित्रीव्रतं तदुक्तं स्कांदभविष्ययोः
ज्येष्ठे मासि सिते पक्षे द्वादश्यां रजनीमुखे व्रतमुपक्रम्य व्रतं त्रिरात्रमुद्दिश्य दिवारात्रिं स्थि
रा भवेदिति अत्रेयमुपसंहृतं ज्येष्ठे मासि सिते पक्षे पूर्णिमायां तथा व्रतं चीर्णं पुरा महाभ
त्या कथितं ते मया नृप इति दाक्षिणात्यास्त्वेतद्वाद्रियंते एतच्चामावास्यायामप्युक्तं
निर्णयामृते भविष्ये अमायां च तथा ज्येष्ठे वटमूले महासती त्रिरात्रोपोषिता नारी
विधिनानेन पूजयेत् मदनरत्ने त्विदं वाक्यं पंचदश्यां तथा ज्येष्ठे इति पठित्वा ज्येष्ठ
पूर्णिमास्यामुक्तं तथा अपराह्णे तत्र योदश्यां नक्तं कुर्यादित्युक्तं द्विप अपाचितं च

नि॰सिं॰
६३

63

दृश्याममायांसमुपोषणमिति तत्रपाश्चात्याःप्रायेणतेहेमाद्रिसमयोद्योतादिस्कंदभाद्र
पदपूर्णिमायामुक्तं तत्तुनेदानींप्रचरति गौडास्तु मेषेवावृषभेवापिसावित्रींतांविनि
र्दिशेत् ज्येष्ठकृष्णचतुर्दश्यांसावित्रीमर्चयेत्स्त्रियाः वटमूलेसोपवासाः ततोवैधव्यमाप्नु
युरिति पाराशरोक्तेश्चतुर्दश्यांप्रदोषव्रतं दिनद्वयेतद्व्याप्तौपरैवेत्याहुः तन्निर्मूलं तत्र
पूर्णिमामावास्येपूर्वविद्धेग्राह्ये भूतविद्धानकर्तव्याअमावास्याचपूर्णिमा वर्जयि
त्वानरश्रेष्ठसावित्रीव्रतमुत्तममिति ब्रह्मवैवर्तात् स्कांदेपि भूतविद्धासिनीवाली
नतुतत्रव्रतंचरेत् वर्जयित्वातुसावित्रीव्रतंतुशिखिवाहनेति मदनरत्नेब्रह्मवै
वर्तेपि प्रतिपत्पंचमीभूतसावित्रीवटपूर्णिमानवमीदशमीचैवनोपोष्याःपरसंयु
ताइति यदात्वष्टादशघटिकाचतुर्दशीतदापराग्राह्या पूर्वविद्धैवसावित्रीव्रतेपंच
दशीतिथिःनाष्टादशादशाभूतस्य सुमुखेनच परेह्नीति माधवः वस्तुतस्तु भूतो
ष्टादशनाडीभिर्दूषयत्युत्तरांतिथिमित्यस्य व्रतांतरे [illegible] साचकात्यायनविशेषतः
प्रवृत्तपूर्वविद्धाविधायवचनेनतस्यबाधादष्टादशनाडीवेधेपिपूर्वैवेत्यपरे
पासाधुः अत्रपौर्णिमानुरोधेनैवयथात्रिरात्रसंपत्तिर्भवति तथा त्रयोदश्यादि
ग्राह्या तस्याःप्रधानत्वात् अयंनिर्णयःपौर्णिमायामपिज्ञेयः पारणंतुपौर्णिमांते
कार्यं अत्रस्त्रीव्रतेषुविशेषःपरिभाषायामुक्तः अत्रविशेषोभविष्ये [illegible] गृहीता

राम
६३

तेपक्षे द्वितीया पुष्यसंयुता तस्यां रथे समारोप्य रामं मां वै भद्रया सह यात्रोत्सवं
प्रवर्त्याथ प्रीणयेच्च द्विजान्बहून् तथा ऋक्षाभावे तिथावेकार्या यात्रा सा प्रीतये मम १
आषाढशुक्लदशमी पौर्णमासी च मन्वादिः सा च पूर्वाह्णव्यापिनीति प्रागुक्तं आषाढ
शुक्लद्वादश्यामनुराधायोगरहितायां पारणं कुर्यात् तदुक्तं भविष्ये आभाकासि
तपक्षेषु मैत्रश्रवणरेवतीसंगमे न हि भोक्तव्यं द्वादशी द्वादशीं हरेत् अस्यार्थः आ
षाढभाद्रपदकार्त्तिकशुक्लद्वादशी अनुराधाश्रवणरेवतीयोगे पारणं न कुर्यात् इति
अत्र यद्यप्येतावदेवोक्तं तथाप्यनुराधाप्रथमपाद एव वर्ज्यः तदुक्तं विष्णुधर्मे १
मैत्रादिपादे स्वपितीह विष्णुः पौष्णान्त्यपादे प्रतिबोधमेति श्रुतेश्च मध्ये परिवर्त्तमेति ति
त्रिप्रबोधपारे न वर्जनमेव वर्ज्यमिति वस्तुतस्तु पूर्ववचनमिदं चानिर्मूलमेव अ
त्रैव विष्णुशयनोत्सव उक्तो हेमाद्रौ ब्राह्मे एकादश्यां शुक्लायामाषाढे भगवान्
हरिः भुजंगशयने शेते क्षीरार्णवे क्षीराब्धौ शेषपर्यंके आषाढ्यां संविशेद्धरिः १
निद्रां त्यजति कार्त्तिक्यां तयोस्तं पूजयेत्सदा ब्रह्महत्यादिकं पापं क्षिप्रमेव व्यपोहति
हिंसात्मकैरलं किं तस्य यज्ञैः कार्यं महात्मनः प्रस्वापे च प्रबोधे च पूजितो येन
केशवः तोडरानन्देऽपि स्कान्दे आषाढशुक्लैकादश्यां कुर्वीत तस्य परमहोत्सवं
सर्वद्वादश्यामयुक्ताः आभाकासितपक्षेषु मैत्रश्रवणरेवती आद्यमध्याव

जलेसदेति
कल्पतरौपा
ठः

63A

वालुकं पात्रे प्रस्थमात्रं युधिष्ठिर ततो वंशमये पात्रे वस्त्रयुग्मेन वेष्टिते सावित्रीं
प्रतिमां कुर्यात्सौवर्णीं नामिरन्मयीं सार्द्धं सत्यवता साध्वीं फलनैवेद्यदीपकैः र
क्तस्याकंठसूत्रैश्च पुष्पैः कुंकुमकेसरैः पूजयेदिति शेषः ॐ रजनी हरिद्राकंठसू
त्रं सौभाग्यतंतुः सविस्तारमाख्यानकं वापि वाचयीत द्विजोत्तमं रात्रौ जागरणं कृत्वा
प्रभाते विमले ततः तामपि ब्राह्मणे दत्वा प्रणिपत्य क्षमापयेत् मंत्रस्तु सावित्रीयं म
या दत्ता सहिरण्या महासति ब्रह्मणः प्रीणनार्थाय ब्राह्मण प्रतिगृह्यतां व्रतेनानेन
राजेंद्र वैधव्यं नाप्नुयात्क्वचिदिति ज्येष्ठपौर्णमास्यां विशेषश्चादित्यपुराणे ज्येष्ठे
मासि तिलान्दद्यात्पौर्णमास्यां विशेषतः अश्वमेधस्य यत्पुण्यं तत्प्राप्नोति
न संशयः विष्णुरपि ज्येष्ठी ज्येष्ठायुता चेत्स्यात्तस्यां छत्रोपानत्प्रदानेन नरो नराधि
पत्यमाप्नोतीति हेमाद्रौ ज्योतिषे ऐंद्रे गुरुः शशी चैव प्राजापत्ये रविस्तथा पूर्णि
मा ज्येष्ठमासस्य महाज्येष्ठी प्रकीर्तिता इयं मन्वादिरपि सा पौर्वाह्णिकी ग्राह्या वि
शेषस्तु चैत्रे उक्तः तथा परार्के वामनपुराणे उदकुंभांबुदानं च तालवृंतं सचंदनं
त्रिविक्रमस्य प्रीत्यर्थं दातव्यं ज्येष्ठमासि तु इति इति भट्टकमलाकरकृते निर्णय
सिंधौ ज्येष्ठमासः मिथुनसंक्रांतौ पराः षोडश घटिकाः पुण्यकालः रात्रौ तु प्राग्व
दुक्तं आषाढशुक्लद्वितीयायां रथोत्सवः तदुक्तं तिथितत्वे स्कांदे आषाढस्य सि

64A

स्वापेऽथ प्रस्वापवर्तनोत्सवाः निशि स्वापो दिवोत्थानं संध्यायां परिवर्तनं अन्यत्र
पादयोगेऽपि द्वादश्यामेव कारयेत् आभाकाद्येषु मासेषु मिथुने माधवस्य च द्वादश्यां
अतपक्षेषु प्रस्वापावर्तनोत्सवं इति भविष्योक्तेः द्वादश्यां संधिसमये नक्षत्राणां
मसंभवे आभाकासितपक्षेषु शयनावर्तनादिकमिति वाराहोक्तेश्च द्वादश्यामि
त्यत्रापि पारणाहोमात्रं विवक्षितं पारणाहे पर्वरात्रेघटादीन्वादयन्नु इति रामार्चि
नचंद्रिकोक्तेः अत्रैकादशी द्वादश्योर्देशभेदेन व्यवस्था इदं च मलमासेऽन कार्यं ईशा
नस्य बलिर्विष्णोः शयनं परिवर्तनमिति कालादर्शे निषेधात् यदपि एकादश्यां तु
गृह्णीयात्संक्रांतौ कर्कटस्य वा आषाढ्यां वा नरो भक्त्या चातुर्मास्यव्रतं क्रियाम् इ
ति हेमाद्रौ ब्राह्मवैवर्ते तदपि मलमासे सति द्रष्टव्यं मिथुनस्थो यदा भानुरमावास्या
द्वयं स्पृशेत् द्विराषाढः स विज्ञेयो विष्णुः स्वपिति कर्कटे इति तत्रैव मोहचूलो
त्तरोक्तेः तत्रैव चातुर्मास्यव्रतारंभ उक्तो भारते आषाढे तु सिते पक्षे एकाद
श्यामुपोषितः चातुर्मास्यव्रतं कुर्यात् यत्किंचिन्नियतो नर इति तस्यानित्यत्वं तत्रैवो
न क्तं वार्षिकांश्चतुरो मासान्वाहयेत्केनचिन्नरः व्रतेन नो चेदाप्नोति किल्बिषं वत्सरोद्भवं (
असंभवे तुलार्केऽपि कर्तव्यं तत्प्रयत्नत इति अस्यारंभश्च शुक्रास्तादावपि कार्यः
नशेषं वनमोदं च शुक्रगुर्वो नवातिघेः एवं उत्स्वचिंतयेच्चादौ चातुर्मास्यविधौ

नरइति हेमाद्रौ वृद्धगार्ग्योक्तेः इदं च द्वितीयाद्यारंभविषयं प्रथमारंभस्तु न भवत्ये
व आशौचमध्येपि द्वितीयाद्यारंभो भवति अशुचिर्वापि यदि वा प्रमादात् व्रतमेतद्वै
नरः कृत्वा समश्नुते सर्वपातकैरिति भार्गवार्चनदीपिकायां स्कान्दोक्तेः आरब्धे सू
तके न स्यादनारब्धे तु सूतकमिति विष्णुवचनाच्च यत्तु असंक्रांतं यद्यामासं दैवे पि
त्र्ये कर्मणि मलमासमशौचं च वर्जयेन्मतिमान्नरः इति हेमाद्रौ चातुर्मास्यव्रतप्रक
रणे भविष्यवचनं तत्सूर्यानुमंत्रणमंत्रवदसंबद्धमध्ये पठितमिति ज्ञेयं अन्यथा
पित्र्यस्य पर्वोक्तस्य विवाहादेश्च चातुर्मास्यव्रते कः प्रसंगप्रकरणे निवेशो वा प्रथ
मारंभविषयं ज्ञेयं केचित्तु प्रतिवर्षं चातुर्मास्यव्रतप्रयोगाणां भिन्नत्वादशौचादि
पाते द्वितीयादिप्रयोगो न भवत्येवेत्याहुः तन्न प्रतिवर्षं च यः कुर्यादेवं वै संस्मरन्
हरिं देहांते तिष्ठत्यग्नेन विमानेनार्कवर्चसा मोदते विष्णुलोके सौ यावदाहूतसंप्ल
वमिति हेमाद्रौ भविष्यवचनादित्यास्तां विस्तरः इदं च शिवभक्त्यादिभिरधिका
रिभिः शिवे वा भक्तिसंयुक्तौ भानौ वा गणनायके कृत्वा व्रतस्य नियमं यथोक्तफ
लभाग्भवेदिति व्रतस्यैव वर्णनात् व्रतग्रहणप्रकारस्तु हेमाद्रौ भविष्ये महापूजां त
तः कुर्याद्देवदेवस्य चक्रिणः जातीकुसुममालाभिर्गंधलेपनेन पूजयेत् सुप्ते त्व
यि जगन्नाथ जगत्सुप्तं भवेदिदं प्रबुद्धे च विबुध्येत प्रसन्नो मे भवाच्युत एवं तां व

65A

तिमां विष्णोः पूजयित्वा स्वयं नरः प्रार्थयेत्तां गतो विष्णोः कृतांजलिपुरस्तथा चतु
रो वार्षिकान् मासान् देवस्योत्थापनावधि इमं करिष्ये नियमं निर्विघ्नं कुरु मेऽच्युत
इदं व्रतं मया देव गृहीतं पुरतस्तव निर्विघ्नं सिद्धिमायातु प्रसादात्तव केशव गृहीते
स्मिन्व्रते देव पंचत्वं यदि मे भवेत् तदा भवतु संपूर्णं त्वत्प्रसादाज्जनार्दन गृहीते स्मि
न्नुते देव यद्यपूर्णे म्रियेयहं तन्मे भवतु संपूर्णं त्वत्प्रसादाज्जनार्दनेति तत्र भार्गवा
र्चनदीपिकायां नारसिंहे परिचर्यायां च भविष्ये श्रावणे वर्जयेच्छाकं दधि भाद्रपदे
तथा दुग्धमाश्वयुजे मासि कार्तिके द्विदलं त्यजेदिति स्कांदेपि चातुर्मास्यकल्पे चत्वा
र्येतानि नित्यान्यानि चतुरामृमवधारणे न प्रथमे मासि कर्तव्यं नित्यं शाकव्रतं न
रैः द्वितीये मासि कर्तव्यं दधिव्रतमनुत्तमं पयोव्रतं तृतीये तु चतुर्थे चापि निशामया
द्विदलं बहुबीजं च वृंताकं च विवर्जयेत् नित्यान्येतानि विप्रेंद्र व्रतान्याहुर्मनीषिणः
जंबीरं राजमाषांश्च मूलकं करतां मूलकं कूष्मांडं चेक्षुदंडं च तन्मासे त्यजेद्बुधः तथा
विशेषात् द्विदलं धान्यं कूष्मांडं तिंतिडीं त्यजेत् जीर्णधान्यं फलं ग्राह्यं कथंचित्का
यशोधनमिति तीर्थसौरभ्ये स्कांदे वार्षिकांश्चतुरो मासान् प्रसुप्ते वै जनार्दने मंचखट्
व्यादिशयनं वर्जयेद्भक्तिमान्नरः अनृतौ वर्जयेद्भार्यां मांसं मधु परौदनं पटो
लं मूलकं चैव वृंताकं च न भक्षयेत् अभक्ष्यान् वर्जयेद्दूरान्मसूरं मांसं सितसर्षं

नि॰सिं॰
६६

66

पं राजमाषान्कुलत्थांश्च । अग्र्यं धान्यं च संत्यजेत् शाकं दधि पयो माषान् स्रा
वरणादिकं संत्यजेत् । अगस्त्येऽदिते वर्ज्जं न संकल्पस्तु पः पर्युपासो ज्ञेयः
चूतोपक्रमात् । अत्र केचित् शाकाख्यं पत्रपुष्पाद्यादित्यमरकोशस्य शाका
ते शिग्रमने नेति शाक इति क्षीरस्वामिना व्याख्यानात् व्यंजनमात्रस्य निषेधा
माचक्षते । अन्ये तु शाकशब्दस्य पत्रादिदशविधशाके योगरूढत्वात् योगा
द्रूढेर्बलीयस्त्वात्तत्पादीनामपि त्यागापत्तेश्च । तत्प्रत्याचक्षते तेन मूलप
त्रकरीराग्रफलकांडाधिरूढकाः त्वक्पुष्पं कवचं चेति शाकं दशविधं
स्मृतमिति क्षीरस्वामिनोक्तस्य शाकनिषेध इति । अपि तु केचित् । अंकुरभवस्त
न्न तत्का नवतत्कालोद्भवाः शाका वर्ज्जनीयाः प्रयत्नतः बहुबीजैर्बीजं च विका म
रि च वर्ज्जयेदिति भविष्यवचनात् नवतत्कालोत्पन्नानां दशविधशाकानां नि
षेधः । अत्र तत्कालोद्भवजातीयत्वं विवक्षितं तेनानयादिशोषितानां वर्षान्त
द्भवानां अपि निषेधः । अत्र तत्कालोद्भवत्वमात्रं विवक्षितं न तु तन्मात्रकालो
द्भवत्वं गौरवात् तेन अन्यकालोद्भवानां सर्वेषां निषेधः इति निष्कर्षः बहुबीजं
निष्पनेकबीजमिति केचित् इतरावयवापेक्षया बीजावयवाधिक्यं बहुबीजत्वादि

राम
६६

G6A

त्यन्ये अवीजं कंदलादि वस्तुत त्विदं महानिबंधेष्वभावान्निर्मूलमेव आचार
प्रदीपे हंताकं चकलिंगं च विल्वोडुंबरभिः स्मृतः उदरे यस्य जीर्यंति तस्य दूरतरो हरिः
तथापरार्के देवलः भ्रम स्वचर्येन तथारौ च सत्वमामिषवर्जनं इत्येवैतानि चत्वारिव
रिष्ठानीति निश्चयः आमिषाणि चोक्तानि रामार्चनचंद्रिकायां पद्मे आलंयगर्जूलं च
में च जंवीरं वीजपूरकं अपक्वशिंबमाषादियद्धि सोरनिवेदितं दग्धमन्नं मसूरं चैमा
संकं च यवधामिषं सर्वं तत देशलभ्यं स्वते दवे विवर्जयेत् पाद्मे कार्त्तिकमाहात्म्ये गोछा
गीमाहिषीडुग्धादन्यदुग्धादि चामिषं धान्ये मसूरकाः प्रोक्ता अन्नं पर्युषितं तथा द्विज
क्रीताः रसाः सर्वे लवणं भूमिजं तथा ताम्रपात्रस्थितं गव्यं जलं पल्वलसंस्थितं आत्मा
र्थे याचितं चान्नमामिषं तत्र मस्वरं तव धैः तथा निष्पावान् राजमाषांश्च मसूरं संधितान्
निच हंतकं चकलिंगं च स्वप्ने देवे विवर्जयेत् संधितानि लवणशाकादीनि तत्रैव वि
धर्मे चतुर्थेपोह्य मासे च हविष्याशी न पापभाक् हविष्याणि तु पद्मे चंद्रोदये भ
विष्ये हैमंतिकं सितं स्विन्नं धान्यं मुद्गाय वास्तिला: कलायकंगुनीवारवस्तूकं
हिलमोचिका षष्टिकाकालशाकं च मूलकं केऊकेतरत् कंदः सैंधवसां
सामुद्रे गव्ये च दधिसर्पिषी पयोनुद्धृतसारं च पनसाम्र मृदरीतकी पिप्पली
जीरकं चैव नागरंगं चतिंतिणी कदलालवलाधात्री फलान्यगुडमैक्षवं अतै

=४= हैमंतम वंत्र्यैतं अस्विन्नं धान्ये व्रीहयो हविष्यं सितश्चैः हाम्मनि निर्त्रिः अनर्णवउड्ड तिलयोः

सीघनूना=४

नि॰सिं॰
९८

प॰१

67

लपक्वं मुनयो हविष्यान्नं प्रचक्षते इति मदनरत्ने वैशिष्टमस्विन्नमन्नं धान्यं
तंडुलाः केमुकं केमुआ इति प्राच्येषु प्रसिद्धः कंदः कालायस्तु सतीनक इत्यम
रः वटुरी इति प्रसिद्धं धान्यं अगस्त्यसंहितायां हैमंताख्यान्नालिकेरफलं चैव
कदली लवली तथा आम्रमामलकं चैव पनसं च हरीतकी व्रतांतरप्रशस्तं च
हविष्यं मन्यते बुधः अन्यदपि व्रतान्युक्तानि हेमाद्रौ भविष्ये स्त्री वा यदि नरो वा
मद्भक्तो धर्मार्थं सुदृढव्रतः गृह्णीयान्नियमानेतान् दंतधावनपूर्वकान् तेषां फ
लानि वक्ष्यामि तत्कर्मपरिपाकतः मधुस्वरो भवेद्राजा पुरुषो गुडवर्जनात्
तैलस्य वर्जनाद्राजन् सुंदरांगः प्रजायते योगाभ्यासी भवेद्यस्तु स ब्रह्मपदमा
प्नुयात् तांबूलवर्जनाद्भोगी रक्तकंठश्च जायते घृतत्यागात्सुलावण्यं सर्वस्निग्ध
तनुर्भवेत् शाकपत्राशनाद्रोगी अपक्वादो मलो भवेत् भूमौ प्रस्तरशायी च वि
ष्णोरनुचरो भवेत् एकांतरोपवासेन ब्रह्मलोके महीयते धारणान्नखरोमणां
च गंगास्नानफलं लभेत् मौनव्रती भवेद्यस्तु तस्याज्ञास्खलिता भवेत् भूमौ
भुंक्ते सदा यस्तु स पृथिव्याः पतिर्भवेत् प्रदक्षिणाशतं यस्तु करोति स्तुतिपाठ
कः हंसयुक्तविमानेन स च विष्णुपुरं व्रजेत् अयाचितेन प्राप्नोति पुत्रान्धर्मा

राम
९८

67A

नरो व्रतः षष्ठान्नकालभोक्ता यः कल्पस्थायी भवेद्दिवि पर्णेषु यो नरो भुंक्ते
कुरुक्षेत्रफलं लभेत् गुडावर्जी नरो दद्यात् द्रुतं ताम्रभाजनं सहिरण्यं नरः श्रे
ष्ठ लवणास्याध्यं विधिः सुप्ते देवे तु यो विष्णोः शिवरत्या गणमर्चयेत् पंच
वर्णैस्तु यो नित्यं स्वस्तिकैः पद्मकैस्तथा स याति रुद्रलोकं हि गाणपत्यमवाप्नु
यात् अन्येषां समभोक्तान्निक्यां दानानि नक्ते वस्त्रयुगं एकांतरोपवासे गौः भू
शयने शय्या षष्ठकालभोजने गौः व्रीहि गोधूमादि त्यागे हैमव्रीह्यादि कंचु
गोयुगं शाकाशने गौः पयोव्रते च मधुदधिघृतव्रते वासो गौश्च तैलत्य
स्वर्णं मुद्गान्नं तांबूलव्रते वासोयुगं मौने घृतकुंभो वस्त्रयुगं घंटा च देवाग्रे रंगमा
लिकाकरणे धेनुर्हेमपद्मे च दीपव्रते दीपिका वासोयुगं च भूमिभोजने च पर्ण
भोजने च कांस्यपात्रं गौश्च चलस्थपदीये गोग्रासे च गौर्नख्ये प्रदक्षिणाशते
वस्त्रं अन्नत्यागे कुंभस्वर्णं गौश्चेत्यादि हेमाद्रौ ज्ञेयं तथा भार्गवार्चनदीपिकायां पा
पाद्मे शयनीबोधिनीमध्ये शमीदूर्वायमार्गकैः भृंगराजेन देवास्तान्नार्चयीत क
दाचन हेमाद्रौ पाद्मे आषाढादिचतुर्मासान् भृंगं वर्जयेत् नरः समाप्तौ च पुनर्दद्या
तिलान् तैलयुतं घटं आषाढादिचतुर्मासान् वर्जयेन्नखकृंतनं सेनाकं गुंजनं चे

68

वमधुसर्पिर्घृतान्वितं कार्त्तिक्यांतत्सुनहैमं ब्राह्मणायनिवेदयेत् अन्यान्यपिकेश
कर्त्तनादिवर्जनसंकल्परूपाणि पृथ्वीचंद्रोदयेज्ञेयानि टोडरानंदे स्कांदे एकांतरंत्र्यं
तरंवाकुर्यान्मासोपवासकं अन्नौदनंफलाहारंनक्तंव्रतमयाचिवा अत्रैवतप्तमुद्रा
धारणमुक्तंरामार्चनचंद्रिकायांभविष्ये शयन्यांचैवबोधिन्यांचक्रतीर्थे तथैवच शं
खचक्रविधानेनवह्नितप्तोभवेन्नरः इति अतप्ततनूर्नतदामोअश्नुत इति ऋग्वेदात्
सहोवाचयाज्ञवल्क्यस्तस्मात्तुमानात्महितायहरिंभजेत् सश्लोकमैत्रोलोर्वेमा
र्गेपितिन्नासंदधत इति शातपथश्रुतेः पूतविद्येमोः अत्र ब्रूचचक्रेशमुत्तमेजत् मांभोधी
तेनैतवेचर्षणीन्द्राः मलेवाह्नोदधन्येपुराणिलिंगान्यतेतप्ताःपुधान्यपंथेत इति सा
मवेदात् अग्निहोत्रंयथानित्यंवेदस्याध्ययनंयथाब्राह्मणस्यतथैवेदंतप्तमुद्रा
दिधारणमितिपद्मपुराणाच्चेति ब्राह्मणःक्षत्रियोवैश्यःशूद्रोवायदिचेन्नरः शंखच
क्रांचिततनुस्तुलसीमंजरीधरः गोपीचंदनलिप्तांगोदृष्टश्चेत्तदघंकुतः इति काशी
खंडात् तत्प्रकारारामार्चनचंद्रिकातोऽवसेयाः ज्ञेयः पृथ्वीचंद्रोदयस्तु यस्तुसंतप्तशं
खादिलिंगांकिततनुर्नरः ससर्वपातकनाशोगतिंचांत्येजन्मकोटिषु द्विजस्तत्रम
शंखादिलिंगांकिततनुर्नरः संभाष्यरौरवंयाति यावदिंद्राश्चतुर्दश इति बृहन्नार
दीयोक्तेः शंखचक्राद्यंकनंच गीतनृत्यादिकंतथा एकाजानेरपंधर्मोनिजा

68A

तुस्याद्विजन्मनः शंखंचक्रं मृदायस्तु कुर्यात्तप्तायसेनवा स शूद्रवद्बहिः कार्यः स
र्वस्मात्द्विजकर्मणः यथाश्मशानजंकाष्ठमनर्हंसर्वकर्मसु तथाचक्रांकितोविप्रःसर्व
कर्मसुनार्हितः तथा शिवकेशवयोरंकान् शूलचक्रादिकान् द्विजः नधारयेत्मतिमा
मान् वैदिके वर्त्मनिस्थितः इतिविष्णवाश्वलायनादिवचनोक्त्त् ऋग्वेदादिश्रुती
नामान्यार्थत्वात् अन्यश्रुतीनांवासत्वात् चक्रादिधारणंशूद्रविषयमित्यूचुः
न्तपेचोदनार्थनिषिद्धमिति श्रीधरस्वामी यद्यपिनिषेधस्य प्राप्तिसापेक्षत्वात्
द्विधिविनाचतदयोगात्उपजीव्यविरोधेनतोपशोकरोतीतिवह्निकल्पोयुक्तस्त
थापिएकजातेरयंधर्मइत्यनेन सामान्यवाक्यानामुपसंहारात् द्विजातिनिषेधो
नित्यानुवादइतितदाशयः अत्रशिष्टाचारएवसंकटपाशैनिःसरणस्थलीतिसं
क्षेपः आषाढपौर्णमास्यांकोकिलाव्रतमुक्तं हेमाद्रौभविष्ये आषाढपौर्णमास्यां
तुसंध्याकालेह्युपस्थिते संकल्पयेन्मासमेकंश्रावणेप्रत्यहंह्ययं स्नानंकरि
ष्येनित्यंब्रह्मचर्यस्थितासती भोक्ष्यामिनक्तंभूशय्यांकरिष्येप्राणिनांदयामिति
अस्यनक्तव्रतत्वात्सायाह्नव्यापिनीग्राह्या अत्रैवशिवशयनोत्सवउक्तो हेमाद्रौवाम
नपुराणे पौर्णिमास्याममानाथः स्वपतेचर्मसंस्तरे वैयाघ्रेजटाभारंसमुद्ग्रथ्याहिवर्मणा
मदनरत्नेप्येवं इयंप्रदोषव्यापिनी अग्रेचव्यासपूजोक्ता तत्रत्रिमुहूर्तोचेत्परैवेति सान्या

पद्धतौ त्रिमुहूर्तोऽधिकं ग्राह्यं पर्वक्षौरप्रणामयोरिति वचनात् ॥ ॥ इति रामकृ
ष्णभट्टात्मजदिनकरभट्टानुजकमलाकरभट्टकृते निर्णयसिंधौ आषाढमासः
॥ ॥ कर्कसंक्रांतौ पूर्वं त्रिंशद्दंडाः पुण्यकालः सूर्योदयोत्तरं संक्रमे तु परत एव पुण्यं ।
रात्रौ तु निर्णयामृते प्राक् परतश्च संक्रमे परार्के हेमाद्यनंतभट्टादिमते पूर्वोत्तरदिन
यो पंचनाड्यः पुण्यकालः धनुर्मीनावतिक्रम्य कन्यां च मिथुनं तथा पूर्वापरवि
भागेन रात्रौ संक्रमते रविः दिनांते पंचनाड्यस्तु तदा पुण्यतमाः स्मृताः उदये चेत्तथा
पंच दैवे पित्र्ये च कर्मणीति स्कांदोक्तेः पूर्वापरविभागेनेति मकरकर्कभिन्नसंक्रां
तिपरं वक्ष्यमाणवचोऽविरोधादित्युक्तं मदनरत्ने तेनायमर्थः रात्रौ पूर्वभागे मक
रे उदये पंचनाड्यः पुण्या रात्रावपरभागे कर्कसंक्रमे दिनांते पंचनाड्यः पुण्याः
विषुवतो पूर्वदिने पंच परदिने पंचेति वाक्यांतरानुरोधात् तेन हेमाद्रिमाधवयोः
सर्ववचनानां चाविरोधः माधवमते तु अर्धरात्रे तदूर्ध्वं च संक्रांतौ दक्षिणायने
पूर्वमेव दिनं ग्राह्यं यावन्नोदयते रविरिति वृद्धगार्ग्योक्तेः मिथुनात्कर्कसंक्रां
तिर्यदि स्यादंशुमालिनः प्रभाते वा निशीथे वा तदा पुण्यं तु पूर्वतः इति भविष्योक्ते
श्च पूर्वदिन एव पुण्यं दाक्षिणात्यास्त्वेतदेवाद्रियंते अत्र रात्रावपि स्नानादि भवतीत्यु
क्तं प्राक् अत्र दानोपवासादि पूर्ववदुक्तं तथा कर्के केशादिकर्तनं निषिद्धं कुंभे कर्कटके

69A

वापिकन्यायांकाले केरवौ रोमरंवंडंगहस्थस्य पितृनप्राशयते यमइतिसमंतुवच
नान्युक्तंजीवपित्रकनिर्णये गुरुभिः अथनदीनांरजोदोषः हेमाद्रौ अत्रिः सिंह
कर्कटयोर्मध्येसर्वानद्योरजस्वलाः नस्नानादीनिकर्माणिनासुकुर्वीतमन
वः इदंचक्षुद्रनदीषु। सिंहकर्कटयोर्मध्येसर्वानद्योरजस्वलाः तासुस्नानंनकुर्वी
तवर्जयित्वासमुद्रगाइतिव्याघ्रोक्तेः मास्येत्वगस्त्योदयावधित्वमुक्तं यावन्नोदेतिर
भगवान्दक्षिणाशाविभूषणं तावद्रजोवहानद्यः करतोयाःप्रकीर्तिताः करतोयाः।
अल्पतोयाः। तथाकात्यायनः याश्रावणप्रगच्छंतिमतीक्ष्णेकुसरितोभुवि तासुप्रा
वृषिनस्नायदसर्वांदशवासरे इदंचापादि स्मृतिसंग्रहे धनुःसहस्राण्यष्टौतुगति
र्यासांनविद्यते नतानदीशब्दवहा गर्तास्तेपरिकीर्तिताः महानदीषुतुभाविष्येउक्तं
आदौतुकर्कटेदेविमहानद्योरजस्वलाः त्रिदिनंतुचतुर्थेह्नि शुद्धास्युर्जाह्नवीयथा
महानद्यश्चवक्ष्ये गोदावरीभीमरथीतुंगभद्राचवेणुकातापीपयोष्णीविंध्यस्य
दक्षिणेतुप्रकीर्तिताः भागीरथीनर्मदाचयमुनाचसरस्वतीविशोकाचविहस्ताच
विंध्यस्योत्तरतःस्थिताः द्वादशैतामहानद्योदेवर्षिक्षेत्रसंभवाः मदनरत्नेपुराणांत
रे महानद्योदेविकाचकावेरीवंजरातथा रजसानप्रदुष्यन्तिस्युः कर्कटादौत्र्यहं।

त्यकात्यायनः कर्कटादौ रजोदुष्टा गोमती वासरत्रयं चंद्रभागा सती सिंधुः स
रयूर्नर्मदा तथा इदं गंगाद्यतिरिक्तविषयं गंगा च यमुना चैव प्लक्षजाता सरस्व
ती रजसा नाभिभूयंते ये चान्ये नदसंज्ञिकाः शोणसिंधुर्हिरण्याख्यः कोकलो
हितघर्घराः शतद्रुश्च नदाः सप्त पावनाः परिकीर्तिता इति देवलोक्तेः यत्तु प्रथमं
कर्कटे देवि त्र्यहं गंगा रजस्वलेत्यादिवचनं तज्जाह्नवीभिन्नगोदावर्यादिगंगा
परमिति मदनरत्ने अन्येषां तु नद्यास्तीरे रजोविषयं गंगाधर्मद्रवः पुण्या यमुना
च सरस्वती अंतर्गतरजोदोषाः सर्वावस्थासु चामला इति निगमोक्तेः तीरवासिनां
तु रजोदोषो नास्ति न तु तत्तीरवासिनामिति निगमोक्तेः रजोदुष्टमपि जलं गंगाज
लयोगे पावनं गंगांभसा समायोगात् दुष्टमप्यंबु पावनमिति मात्स्योक्तेः तत्तन
कूपादौ तु योगयाज्ञवल्क्यः अजा गावो महिष्यश्च ब्राह्मणी च प्रसूतिका भूमि
ष्ठमुदकं चैव दशरात्रेण शुध्यतीति कश्चित्तु दोषमाह व्याघ्रपादः अभावे कूपवा
पीनामनद्याधिपयोस्ततां रजोदुष्टेपि पयसि ग्रामभोगो न दुष्यति भोगास्त्व
अन्येनापि समुद्धृतं इति द्वितीयपादे पाठः तेनोद्धृते न दोषः तथा च तासु स्नानं
नेति प्राग्युक्तमित्याह वसिष्ठोपि उपाकर्मणि चोत्सर्गे प्रेतस्नाने तथैव च चंद्रसूर्यग्र
हे चैव रजोदोषो न विद्यते इत्यलं विस्तरेण श्रावणकृष्णतृतीयामधुस्रवारव्यागु

70A

रीक्षुप्रसिद्धा सापरयुतागृह्येति दिवोदासः श्रावणशुक्लचतुर्थी पूर्वयुता मात्सवि
द्योगात्प्रशस्यादिवचनात् श्रावणशुक्लपंचमी नागपूजायां परैवेति सामान्यनि
र्णये उक्तं चमत्कारचिंतामणौ पंचमी नागपूजायां कार्या षष्ठीसमन्विता तस्यां तु
तुषिता नागा इतरा सचतुर्थिकेति श्रावणे पंचमी शुक्ला संप्रोक्ता नागपंचमी तां परि
त्यज्य पंचम्यश्चतुर्थी सहिता इति मदनरत्नेऽभिधानाच्च तत्र परैवेति अत्र विशेषो हेमा
द्रौ भविष्ये श्रावणे मासि पंचम्यां शुक्लपक्षे नराधिप द्वारस्योभयतो लेख्या गोमयेन
विषोल्बणाः पूजयेद्विधिवद्वीर दधिदूर्वांकुरैः कुशैः गंधपुष्पोपहारैश्च ब्राह्मणानां
च तर्पणैः ये तस्यां पूजयंतीह नागान् भक्तिपुरःसराः न तेषां सर्पवीरभयं भवति क
र्हिचिदिति श्रावणशुक्लद्वादश्यां दधिव्रतं प्रागुक्तं तक्रादीनां त्वनिषेधः तत्र दधिद्र
व्यस्यारंभादिति वक्ष्यते अत्रैव विष्णोः पवित्रारोपणमुक्तं हेमाद्रौ विष्णुरहस्ये श्रा
वणस्य सिते पक्षे कर्कटस्थे दिवाकरे द्वादश्यां वासुदेवाय पवित्रारोपणं स्मृतं
द्वादश्यां श्रावणे वापि पंचम्यामथवा द्विज अनुकूले तु कर्तव्यं पंचदश्यामथापि वे
ति शिवेति तत्रैव कालोत्तरे आषाढांते चतुर्दश्यां नभस्यनभसोस्तथा अष्टम्यां
च चतुर्दश्यां पक्षयोरुभयोः समं इति अन्यदेवतानां तु वक्ष्यते अधिवासनं तु दीपि
कायां गोदोहांतिकाले पूर्वेद्युर्वाधिवासनमिति गौणकालो रामार्चनचं

द्विकायां पवित्रारोपणं विघ्नाद्युपणेन भवेद्यदि कार्त्तिक्येवाथिस्रुक्षा सेत्कर्त्तव्यमि
ति नारदः हेमरौप्यताम्रक्षौमैः सूत्रैः कौशेयपद्मजैः कुशैः काशैश्च कार्पासैर्वा ब्राह्म
एय कार्त्तितैः शुभैः कृत्वा त्रिगुणितं सूत्रं त्रिगुणीकृत्य शोधयेत् तत्रोत्तमं पवित्रं तु अ
ष्टोत्तरशतैस्त्रिभिः सप्तत्या सहितं द्वाभ्यां शताभ्यां मध्यमं स्मृतं साशीतिनाशतेनैव क
निष्ठं तत्समाचरेत् साधारणपवित्राणि त्रिभिः सूत्रैः समाचरेत् उत्तमं तु शतग्रंथि पंचा
शत्तुग्रंथि मध्यमं कनिष्ठं तु पवित्रं स्यादष्टाविंशद्ग्रंथिशोभनं षट्त्रिंशच्चक्रविंशद्वा।
दशेति च केचन चतुर्विंशद्द्वादशाष्टाविंत्येके मुनयो विदुः हेमाद्रौ विष्णुरहस्ये त्वन्य
थोक्तं अष्टोत्तरशतं कुर्याच्चतुःपंचाशदेव वा सप्तविंशतिरेवाथ ज्येष्ठमध्यकनीयसं
अधमं नाभिमात्रं स्यादूरुमात्रं द्वितीयकं प्रलंवं तु जानुमात्रं प्रतिमायां निगद्यते शि
वपवित्रं तु तत्रैव शैवागमे एकादशैत्यथ वा सूत्रैस्त्रिंशता वाष्टयुक्तया पंचाशता
वा कर्त्तव्यं तु स्यग्रंथ्यंतरालकं द्वादशांगुलमानानि व्यासादष्टांगुलानि च लिंगविस्ता
रमानानि चतुरंगुलकानि चेति हेमाद्रौ कालोत्तर युगाधर्मे कृते मणिमयं कार्यं त्रे
तायां हेमसंभवं पट्टजं द्वापरे प्रोक्तं कार्पासं तु कलौ स्मृतं अधिकारणे पित्रे च विष्णुर ग
हस्ये ब्राह्मणः क्षत्रियो वैश्यस्तथा स्त्री शूद्र एव च स्वधर्मावस्थिताः सर्वे भक्तया कुर्युः
पवित्रकं तथा अतो देवेति मंत्रेण द्विजो विष्णोर्निवेदयेत् शूद्रस्य मूलमंत्रेण वा ये

सर्वाप्स्नु पूजयेद्धरिं ॥ यस्तु नित्यं न करोति विधानेन पवित्रारोपणं नृपः ॥ तस्य सांवत्स
रिकी पूजा निःफला मुनिसत्तम ॥ तस्माद्भक्तिसमायुक्तैर्नरैर्विष्णुपरायणैः ॥ वर्षे वर्षे प्रकर्त्त
व्यं पवित्रारोपणं हरेरिति तत्रैवोक्तेः ॥ देवताविशेषे तिथयो पि तत्रैव ॥ धनदस्य रमा
गौरी गणेशः सोमराड्गुरुः ॥ भास्करश्चण्डिकांबा च वासुकिर्ऋषयस्तथा ॥ चक्रपाणि
रनंगश्च शिवो ब्रह्म तथैव च ॥ प्रतिपत्प्रभृतिस्त्वेता पूज्यास्तिथिषु देवताः ॥ यथोक्ताः
शुक्लपक्षे तु तिथयः श्रावणस्य चेति ॥ तथा हेमाद्रौ कालोत्तरे चतुर्दश्यामथाष्टम्यां
सर्वसाधारणं स्मृतमिति ॥ तत्प्रकारस्तु रामार्चनचंद्रिकायां ॥ ततस्तानि पवित्राणि
वैणवे पटले पटले शुभे ॥ संस्थाप्य शुचिवस्त्रेण विधाय पुरतो न्यसेत् ॥ अरत्निसंमितो
वेदीं कुर्यात्तत्र स्वस्तिं शातकुंभे ॥ क्रियालोपविधानार्थं यत्त्वया विहितं प्रभो ॥ म
यैतत्क्रियते देव तव तुष्ट्यै पवित्रकं ॥ न मे विघ्नो भवेद्देव कुरु नाथ दयां मयि ॥
सर्वथा सर्वदा विष्णो मम त्वं परमा गतिः ॥ उपवासेन देव त्वां तोषयामि जगत्प
ते ॥ कामक्रोधादयो प्येते न मे स्युर्व्रतघातकाः ॥ अद्य प्रभृति देवेश यावद्वैशे
षिकं दिनं ॥ तावद्रक्षा त्वया कार्या सर्वस्यास्य नमोस्तु ते ॥ इति देवं संप्रार्थ्य कुं
भं संस्थाप्य तत्र वंशपात्रे ॐ सांवत्सरस्य यागस्य पवित्रीकरणाय भोः ॥ वि

नि॰सिं॰
७२

72

स्त्रलोकात्पवित्राद्य आगछेह नमोस्तु ते अनेनमूलेनचावाह्यतममध्यमकानिष्ठे
षु विष्णुब्रह्मरुद्रान्सात्वरजस्तमोंसदेवत्रयंचनमालायांप्रकृतिंचावाह्येतिमस्यपन्यांत्र १
लविष्णुरुद्रानगंध्रिषु क्रियापौरुषीविराविजया ईशा अपराजिताः मनोन्मनीजयाभ
द्रामुक्तिः स्त्रेत्यावाह्य संपूज्य ॐ संवत्सरकृतार्चायाः संपूर्णफलदाधियत् पवित्रारोपणा
येदं कुरुकं धरतेनमः विष्णुतेजोद्भवं रम्यं सर्वपातकनाशनं सर्वकामप्रदं देवतवां
गे धारयाम्यहमिति देवकरे मंगलसूत्रं बध्वा देवं संपूज्याभिमंत्रयेत् आमंत्रितोसि
देवेश पुराणपुरुषोत्तम प्रातस्त्वां पूजयिष्यामि सान्निध्यं कुरु केशव क्षीरोदधि
महानागशय्यावस्थितविग्रह प्रातस्त्वां पूजयिष्यामि सन्निधौ कुरु तेनमः १
निवेदयाम्यहं तुभ्यं प्रातरेतत्पवित्रकं सर्वथा सर्वदा विष्णो नमस्तेस्तु प्रसीद मे ततः
पुष्पांजलिं दत्वा रात्रौ जागरणं कुर्यादित्यधिवासनं प्रातर्नित्यपूजां कृत्वा गंध
दूर्वाक्षतयुतं पवित्रमादाय देवदेव नमस्तुभ्यं गृहाणेदं पवित्रकं पवित्री
करणार्थाय वर्षपूजाफलप्रदं पवित्रकं कुरुष्वाद्य यन्मया दुष्कृतं कृतं शुद्धो
भवाम्यहं देव त्वत्प्रसादात्सुरेश्वर मूलसंपुटितेनानेन दत्वांगदेवताभ्यो नाम्ना
समर्प्य महानैवेद्यं दत्वा नीराज्य मणिविद्रुममालाभिरित्यादिभिर्दमनारोपोक्तम
ंत्रैः प्रार्थयित्वा गुरवे ब्राह्मणेभ्यश्च दत्वा स्वयं धारयेत् तथा मासं पक्षमहोरात्रं १

राम
७२

72A

त्रिरात्रं धारयेत्तथा देवे तंस्तत्रसंदर्भे देशकालाद्यपेक्षया अकरणे तु तत्रैव पवि
त्रारोपणं कालेन करोति कथंचन तदा भूतं जयेन्मंत्रं स्तोत्रं वापि समाहित इत्युक्तं
इति पवित्रारोपः श्रावणशुक्लचतुर्दशी पूर्वविद्धा ग्राह्या अत्र वक्ष्यो विशेषः चैत्र
शुक्लचतुर्दश्यामुक्तः अथोपाकर्म॰ तत्र बह्वृचानां प्रयोगपारिजाते शौनकः अथा(
श्रावणे मासे श्रवणर्क्षयुते दिने श्रावण्यां श्रावणे मासि पंचम्यां हस्तसंयुते वसेद्धि
दधातीति उपाकर्म यथोदितं अध्यायोपाकृतिं कुर्यात्तत्रोपासनवह्निनेति अत्र पौ
र्णमास्युपसंहारन्यायेन यजुर्वेदिपरेति हेमाद्रिः अत्र हस्तयुता पंचम्युक्तौ कारि
कापि तन्मासे हस्तयुक्तायां पंचम्यां वा तदि ष्यत इति केवलपंचम्यां हस्तयुतेन्यासि
न दिने इति तु हेमाद्रिः उपासनवह्निने तु कर्मद्वयं रदं चेत्पि तौ किकाग्नौ पृथक्कर्तव
ते इति कारकोक्तः लौकिकाग्निना विकल्पते तगाप्यध्यायेरत्वारश्च इतिस्मृत्यन्त
सशिष्याश्चेत्तदधिकारकस्याचार्याग्नौ नान्यस्याग्नावन्योऽप्युपादिति निर्णयामृतो
कि करणं तदभावे तु स्मार्ताग्निरिति निर्णयः यद्यपि दीपिकायां वेदोपकृतिरोधकृ
जनने पक्षे सिते श्रावणे इति श्रौतपक्षेपि सर्वे बह्वृचाः कर्तव्ये नोक्तः वक्ष्यमा
णगार्ग्यवचनेन छंदोगान्वृत्ति विहितस्य तस्याविरोधनः सर्वाश्रुतिप्रहि ष्ठ न

नि.सिं.
७३

73

पायिश्रावणमासस्संबंधस्यतत्रोक्तत्वात्कृष्णपक्षेपिकार्यमिति तदुक्तः तथाचसू
त्रे अथातोध्यायोपाकरणमोषधीनांप्रादुर्भावेश्रावणेनश्रावण्यांपंचम्यांहस्तेन
वा अत्र श्रवणेनेतिमुख्योहस्तेनेतिगौणः तत्राप्ययमथात् तस्यहस्तेउदयपयोगेहेमाद्रौव्यासः धनि
ष्ठासंयुतंकुर्याछ्रावणंकर्मयद्भवेत् तत्कर्मसफलंज्ञेयमुपाकरणसंज्ञितं श्रवणे
नतुयत्कर्मउत्तराषाढसंयुतं संवत्सरकृतोध्यायस्तत्क्षणादेवनश्यतीति गार्ग्यो
पि उदयव्यापितिथेचविष्णुर्हिघटिकाद्वये तत्कर्मसफलंज्ञेयंतस्यपुण्यंपत्वनेनकं
मिति एवंचउत्तराषाढयोगेपरेद्युःश्रवणाभावेघटिकाद्वयन्यूनेवापंचम्यादौका
र्यं नतुपूर्वविद्धायोसंगवमात्रेअपवादाभावात् किंच परेद्युःसंगवास्पर्शेनिषिद्ध
पूर्वाग्रहणेकिंमानंसंगववाक्यंश्रवणवाक्यंचेतिचेन्नहि व्रीहिवाक्याद्दक्षशफवा
क्यात्रमाषमिश्राणामप्युपादानंस्यादितिमहत्त्वंनिषेधानुप्रवेशानेरयेभ्यवाधाचे
तिचेत् इहापितुल्यं एतेनसर्वाथौदयिकंव्याख्यातं निषेधानुप्रवेशोभयत्रतुल्य
त्वात् श्रवणयुक्तदिनेसंक्रांत्यादौतुउपाकर्मनकुर्वीतकर्मात्सागर्यजुर्विदः गृह्य
संक्रांतियुक्तेषुहस्तश्रवणपर्वस्विति हेमाद्रौनिषेधात् पंचम्यादयोग्राह्याः मदनरत्ने
पि यदिस्याच्छ्रावणंपर्वग्रहसंक्रांतिदूषितंस्यादुपाकरणंशुक्लेपंचम्यांश्रवणेथ
त स्मृतिमहार्णवे संक्रांतिर्ग्रहणंवापियदिपर्वणिजायते तन्मासेहस्तयुक्तायांप

राम
७३

नि॰सिं॰
७४

74

चम्यां वा न दिष्यते तत्रापि प्रयोगपारिजाते वृद्धमनुकात्यायने अर्द्धरात्रादधस्ताच्चे(
त्संक्रांतिर्ग्रहणं तथा उपाकर्म न कुर्वीत परतश्चेन्न दोषकृदिति मदनरत्ने गार्ग्योपि
अर्धरात्रादर्वाक्तु ग्रहः संक्रम एव च नोपाकर्म तदा कुर्यात् श्रावण्यां श्रवणेपि वा
एतेन ग्रहसंक्रांतिकाले श्रवणसत्त्वे एव निषेधो नान्यथेति मूर्खशंका परास्ता ग्रहवि
शिष्टानां पूर्णश्रवणपंचम्यां प्रत्येकं निषेधे तत्र युक्तोपाकर्मनिषेधे च विशिष्टोद्देशे(
वाक्यभेदात् पंचम्यां संक्रांतौ निषेधाभावापत्तेश्च तेनार्धरात्रात्पूर्वं ग्रहसंक्रमसत्त्वे
एवोपाकर्मनिषेधो न तु धौयेगे एव यत्तु प्रतिपन्मिश्रिते नैव नोत्तराषाढसंयुते
श्रवणे श्रावणं कुर्याद्ग्रहसंक्रांतिवर्जिते इति प्रतिपन्मिश्रनिषेधकं वचनं तन्निर्मूलं(
अत्र च वेदोपाकरणे प्राप्ते कुलीरे संस्थिते रवौ उपाकर्म न कर्त्तव्यं सिंहयुक्तके इति वच तं॰
नं देशांतरविषयं नर्मदोत्तरभागे तु कर्त्तव्यं सिंहयुक्तके कर्कटे संस्थिते भानावुपा
कुर्यात्तु दक्षिणे इति बृहस्पतिवचनादिति प्रयोगपारिजाते नोक्तं पारस्करमाधवीये
वं सामगानां सिंहस्थरवौ युक्तेस्ताहिरायदं पुरोडाशचतुर्द्धाकरणवदुपसंह्रियतर
ति तद्वयं पश्यामः यत्तु कालादर्शे अध्यायानामुपाकर्म श्रावण्यां तैत्तिरीयकाः ब
ह्वृचाः श्रवणे कुर्युः सिंहस्थेर्कोभवेद्य[illegible]हस्तस्थयुक्तपंचम्यां वा तत्र ग्रहणसंक्रमे अ
सिंहार्के प्रोष्ठपद्यां श्रावणे न भवत्स्ययेति तन्मूलाह्निरवनाद्यित्यं श्रावणेस

राम
७४

74A

स्यात्तदुक्तं मदनरत्ने बृहत्परिशिष्टे ग्रहसंक्रान्तिर्यदा यस्मिन्मासे तु न भवेत्तिचेत् तदा
श्रावणे मासि श्रवणेन तदिष्यते इति तत्राप्यनुक्रमेण कुर्यादेव तादृशार्थं कर्मि ... चक्षते
श्रुतिस्मृत्याद्युक्तं वर्षे नैमित्तिकं वार्षिकं ॥ तच्च श्रवणाभावेऽपि कार्यं उपाकर्मोत्सर्जनं च प
वित्रदमनारोपणमिति दमनारोपे लिखितवचनात् नित्ये नैमित्तिके काम्ये होमयज्ञ
क्रियासु च उपाकर्मणि चोत्सर्गे ग्रहवेधो न विद्यते इति प्रयोगपारिजाते संग्रहोक्तेः प
र्वणि ग्रहणे सति पूर्वविद्धि त्रिरात्रादिवेधाभावं वक्तुमिदं तेन पर्वणि ग्रहणेऽपि चतुर्द
श्यां श्रवणे कार्यमिति हेमाद्रिः अन्ये प्रथमारंभस्तु न भवति गुरुभार्गवयोर्मौढ्ये
बालो वा वार्द्धकेऽपि वा तथाधिमाससंसर्पमलमासादिषु द्विजे प्रथमोपाकृतिर्न स्यात्कृ
तं कर्म विनाशकृदिति तत्रैव कश्यपोक्तेः अत्र प्रथमारंभे वृद्धिश्राद्धं कुर्यादिति नारा
यणवृत्तौ ॥ तच्चाधिमासे न कार्यं उपाकर्म तथोत्सर्गः प्रसवाहे सवाष्टकाः मास
वृद्धौ परे कार्या वर्जयित्वा तु पैतृकमिति ज्योतिःपराशरोक्तेः उत्कर्षः कालवृद्धौ स्या
दुपाकर्मादिकर्मणि अभिषेकादिसूतानां न तत्काले युगादिष्विति कात्यायनो
क्तेश्च यत्तु उपाकर्मणि चोत्सर्गे ग्रहे न दिष्टं साषादितमरतिश्च व्यथं गवत्तत्सास
गाचिवर्ष्यां तेषां संहिताकेऽपि वोक्तेः एतच्चापराह्णे कार्यं उपाकर्मापराह्णे स्यादुत्सर्गः प्रा
तरेवाविति अध्यायानामुपाकर्म कुर्यात्कालेऽपराह्णके तु विसर्गः स्यादिति वेद

विदोविदुरितिच हेमाद्रौ गोभिलोक्तेः वत्सरं तस्त भवेदुपाकृतिः पौर्णमास्यां सर्वा
एवत्विति प्रचेतोवचनात्सर्ववाक्यं सामगविषयं तेषामपराह्णव्यापिनीत्यपदं वक्ष्य
ते सोपि कापि अस्यत्तुविधेः सर्वाह्णः कालः स्मृत इति याज्ञवल्क्यस्त्व पर्वणि कुर्युः।
तच्चापसंत्वैरौदयिकं ग्राह्यमन्यैस्तु पूर्वा पूर्वमेवौदयिके कुर्युः श्रावणेनेति रीत्या
काः बह्वृचाः श्रवणे कुर्युर्ग्रहसंक्रांतिवर्जिते इति गार्ग्योक्तेः संप्राप्तवान् स्मृतौ प्रे
स्मापर्वण्यौदयिके पुनः अन्तोभूते तदिने तस्मिन्नोपाकरणमिष्यत इति कालिकापुरा
ये अयचे होषसंयुक्ते पर्वणि स्यादुपाक्रिया दुःखशोकामयग्रस्ता राष्ट्रे तस्मिन्द्विजा
यप्रति मदनरत्ने हेमाद्रौ गार्ग्येण दोषोक्तेश्च अत्र त्रिंगाभट्टीये विशेषः श्रवणः श्राव
णंपर्वसंगवस्य यदा भवेत तदैवोदयकं कार्यं नान्यदोदयकं भवेत पराशरमाधवीये
पिगार्ग्यः श्रावणी पौर्णमासी तु संगवात्परतो यदि तदैवोदयिकी ग्राह्या नान्यादौ
दयकी भवेत कार्मिकालमहाकालादर्शे निगमः श्रावण्यां प्रोष्ठपद्यां वा प्रतिपत्परा।
मुहूर्तकैः विद्धास्याच्छंदसां तत्रोपकर्मोत्सर्जनं भवेत अत्र पौर्णमासी श्रवणस्य
स्मयोरुपलः अलंतेन ततावपि संगवस्पर्शो उदये संगवस्पर्शे ग्रस्तौ पर्वणि चार्कभे
कर्तृनभस्युपाकर्म ऋग्यजुः सामगाः क्रमादिति पृथ्वीचंद्रः तेनोदये संगवे भयव्यापि
नीमुख्यापरेद्युः संगवाभावे पूर्वेद्युस्तदभावे चैवैकत्र सत्वे पूर्वेद्युस्तदंशे रवे

75A

धात्रिषेधविधानात् सामान्यवाक्यादौ दार्थिकी कर्मण्यपि प्राग्ग्राह्यानपूर्वा संभवति
मिन्नपूर्वविद्धापवादाभावात् नान्यदौदयिकी तस्य पूर्वविद्धापरत्वाभावात् तेन भा
द्रादौ कालांतरे स्यान्न तु निषिद्धे न ह्येकी ह्यलाभे निषिद्धमाचरेदत्युक्तं अतएव
व परेद्युः संभवव्याप्तौ पूर्वविद्धा निषिद्धः तदभावे तेनेति मूल्ये व्यवस्थाप्युक्ता
विधिवैषम्यात् माघनिषेधेपि न प्राप्नोत्यस्य पूर्वविद्धावचनसत्वेहि साधुत्वते ए
वं श्रवणे पित्रेयं विद्धच्चर्क्षे घटकाद्वयमिति पूर्वोक्तविरोधात् तेन प्राशस्त्यमात्र
परत्वेन कात्यायनादीनां तु दिनद्वये पूर्वाह्णव्याप्तौ एकदेशस्पर्शे वा पूर्वैवेति हे
माद्रिः यदपि श्रावणे दुर्गानवमी दूर्वा चैव हुताशनी पूर्वविद्धा प्रकर्तव्या शि
वरात्रिर्बलेर्दिनमिति ब्रह्मवैवर्ते तत्तत्स्वरूपविशेषश्रवणाकर्मादिदैवकर्मविष
यमिति हेमाद्रिः अत एव वचनात् कुलधर्मत्वादावपि पूर्वैव मदनरत्नेप्येवं
८ मतं पारिजातोपि पूर्वविद्धायां श्रावण्यां वाजसनेयिनामुपाकर्मेत्युक्तं मदनरत्ने
तु पर्वण्यौदयिके कुर्युः श्रावण्यां तैत्तिरीयकाः इति बह्वृचपरिशिष्टात् बह्वृचानामुक्तिकर्म
विधानार्थे प्रवृत्ते तैत्तिरीयकर्मविधययोगात् पूर्वोक्तं कालिकापुराणादौ सामान्यत
औदयिकपर्वप्राप्तेस्तन्निषेधेन बह्वृचानां श्रवणविधानात्तैत्तिरीयकपदमनुवा
दत्वात्तस्य च प्राप्ताधीनत्वात्तन्मये यजुर्वेदमात्रपरत्वात्सर्वयजुर्वेद्युपलक्षणा

यं अवपुस्त्यानुवादो वा न तु विधायकं येन विशेषविधिना उपसंहारः स्यात् अ
नुवादत्वाभ्युपगमे न दोषः अन्यथा औदयिकपर्वविशिष्टे पाककर्मोद्देशेन का(
ले विधौ कालविशिष्टे वा औदयिकपर्वविधौ वाक्यभेदापत्तेः तस्मात्तैत्तिरीयकपदावे
ष्टमया सर्वेषु पञ्चवैदिनामौदयिकमेव पर्वेत्युक्तं तन्न न तावत्परिशिष्टे बह्वृचान्
प्रत्येव विधिः धनिष्ठाप्रतिपद्युक्तं त्वाष्ट्रं ऋक्षसमन्विताम् इत्यादि तदुदाहृते एवमप
रिशिष्टे वेदान्तरधर्मविधीनां दर्शनात् नाप्यनुवादोऽयं कालिकापुराणादेर्बह्वृचोदितो
मविततापत्तेः कुर्युरित्यस्य विधित्वेन तस्यैवार्थवादत्वे नैतत्प्राशस्त्यानुवादित्वाच्च न
च तैत्तिरीयकाण्डागतहेतुनाधिरस्ति येनानुवादत्स्यात् न च वाक्यभेदः तैत्तिरीयकमात्र
स्य कर्ममात्रस्य वोद्देश्यत्वाद्योगेन हृ विराजिते हृष्टवर्षे ब्राह्मणमुपनयीत तैत्तिरीयवच
नात्यादिविशिष्टस्योद्देश्यत्वात् उद्देश्यविशेषणं हि विवक्षितं वाक्यभेदो न तु विशिष्ट
स्योद्देशे इति गणकादौ प्रसिद्धं अन्यथोत्तरार्द्धे बह्वृचपदस्याप्यविवक्षापत्त्या श्रवणस
र्वसाधारण्यापत्तेः तस्माद्धेमाद्रिमतमेव युक्तमिति दिक् इदं च शिष्यानध्यापय
त आवसथ्येऽग्नौ अनध्यापयतो नाधिकार इति वार्त्तिके श्रावण्यामधिग्रहणादि
दुष्टायां कात्यायनैः प्रोष्ठपद्यां कार्यं तेन स्तु श्रावण्यां पंचम्यां संक्रान्तिर्गेहृतं
वापि पौर्णमास्यां यदा भवेत् उपाकर्ति स्तु पंचम्यां कार्यं वाजसनेयिभिरिति

76A

स्मृतिमहार्णवे वाजसनेयिगृह्यादिति हेमाद्रिः यत्तु बौधायनः श्रावण्यां
पौर्णमास्यामाषाढ्यां वोपाकृत्योत्सृजेत् तत्यौष्ठ्यामपि दोषे आषाढ्यां कार्यमित्येवमर्थं
न त्वास्वीयविषयं वा सामगास्तु श्रवणे हस्ते कुर्युः बह्वृचाः श्रवणे चैव हस्ते।
सौ सामवेदिन इति निर्णयामृते गोभिलोक्तेः सोप्युत्तरः धनिष्ठाप्रतिपद्युक्तं
त्वाष्ट्रऋक्षसमन्वितं श्रावणं कर्म कुर्वीरन् ऋग्यजुःसामपाठका इ
ति मदनरत्ने: परिशिष्टोक्तेः गार्ग्योपि सिंहे रवौ तु पुष्यर्क्षे पूर्वाह्णे विचरेद्द्विजः छं
दोगामिलिताः कुर्युरुत्सर्गं स्वस्वछंदसां शुक्लपक्षेन हस्तेन उपाकर्मापराह्णिकं
मिति पुष्यर्क्षे पूर्वाह्णे उत्सर्गः अपराह्णिकमुपाकर्मेत्यन्वयः अत्यस्तु विरोधः पू
र्वमेवोक्तः प्रयोगपारिजाते गोभिलः उपाकर्मोत्सर्जने च वनस्थानामपीष्य
ते सांधारणाध्ययनांगत्वात् गृहिणां ब्रह्मचारिणां उत्सर्जनं च वेदानामुपाक
रणकर्म च अकृत्वा वेदजप्येन फलं नाप्नोति मानवः सर्वथालोपेतस्तु धुः उप
वासश्च वेदोदितानां नित्यानामिति मनुना भोजनेनोक्तेः एवमुत्सर्गोपि अ
यप्रसंगाद्वैवोत्सर्जनमुक्तं ते तत्र पौषमासे रोहिण्यां तत्कृष्णाष्टम्यां वा र
कार्यं पौषमासस्य रोहिण्यामष्टकायामथापि वा जलांते छंदसां कुर्यादुत्

णे विधिना ह्यहरिति याज्ञवल्क्योक्तेः श्रावण्यां प्रौष्ठपद्यां चोपाकृत्योत्क्रमे(त्)
णं पौषमूले प्रातिपदि माघमूले प्रतिपदि वा कार्यं अर्धपंचमान्मासान
धीयीतेति तैत्तिरीयोक्तेः यत्तु हारीतः अर्धपंचमान्मासानधीत्योर्ध्वमुत्सृजेत्(अ)
र्धपंचार्धषष्ठान्वेति तदप्युपाकर्मविषयं बौधायनस्तु पौष्यां माघ्यां वा कुर्युः
पौष्यां माघ्यां वोत्सृजेदिति तन्न सूत्रात् तैत्तिरीयैस्तु पौष्यां कार्यं पौष्यां पौर्णमा
स्यां रोहिण्यां वोत्सृजेदिति तत्सूत्रात् बह्वृचैस्तु माघ्यां कार्यं अध्यायोत्सर्ज
नं माघ्यां पौर्णमास्यां विधीयते इति कारिकोक्तेः कातीयास्तु भाद्रपदे कुर्युः उत्स
र्गस्नाति तदा तिष्यान्तिथ्यां प्रोष्ठपदे पि वेति कात्यायनोक्तेः सामगास्तु सिंहार्के पु
ष्ये कुर्युः तथा च सिंहे रवौ तु पितिं गार्ग्यवचनं एवं मुख्ये सर्वैरुपाकर्मदिने वा
कार्यं पुष्ये तूत्सर्जनं कुर्यादुपाकर्मदिनेऽथवेति हेमाद्रौ खादिरगृह्योक्तेः
यदा सिंहस्थे सूर्ये सातितन्मध्यस्थ हस्तनक्षत्रात्प्राक्पुष्यः कर्कस्थो भवति त
दा तस्मिन्पुष्ये उत्सर्गं कृत्वा तदुत्तरहस्ते उपाकर्म सामगाः कुर्युः मासे प्रौष्ठपदे ह
स्तात्पुष्यः पूर्वो भवेद्यदा तदा च श्रावणे कुर्यादुत्सर्गं छंदसां द्विज इति तत्रैव व(च)
परिशिष्टोक्तेः अत्र ह्यापि सौरो मासो ग्राह्यो तेषां सौरस्यैवोक्तेः अत्र विशेष

77A

माह कल्पतरौ वि: उपाकर्मणि चोत्सर्गे यथाकालं समेत्य च ऋषीन् दर्भमया
न् कृत्वा पूजयेत्तर्पयेत्ततः इति उपाकर्मण्युत्सर्गे च त्रिरात्रं पक्षिणीमहोरात्रं वा
नध्याय इति मिताक्षरायामुक्तं अत्र नदीनां रजोदोषो नास्ति उपाकर्मणि चोत्सर्गे र
जोदोषो न विद्यते इति गार्ग्योक्तेरिति अत्रैव रक्षाबंधमुक्तं हेमाद्रौ भविष्ये
ततोऽपराह्णसमये रक्षापोटलिकां शुभां कारयेदक्षतैः शस्तैः सिद्धार्थैर्हेमभूषि
तैरिति अत्रोपाकर्मानंतर्यस्य प्रतीतिर्या वार्षिकस्यानुवादो न तु विधिः गौर
वात्प्रयोगविधिभेदेन कर्माप्योगात् छंदोगादीनां तदयोगाच्च तेन परेद्युरुपाकर
णेऽपि पूर्वेद्युरपराह्णे तत्करणं सिद्धं इदं भद्रायां न कार्यं भद्रायां द्वे न कर्तव्ये
श्रावणी फाल्गुनी तथा श्रावणी नृपतिं हंति ग्रामं दहति फाल्गुनीति संग्रहो
क्तेः तत्र चेत्तु रात्रावपि तदंते कर्मादिति निर्णयामृते मंत्रस्तु येन बद्धो बली रा
जा दानवेंद्रो महाबलः तेन त्वामभिबध्नामि रक्षे मा चल मा चल॥ ब्राह्मणैः क्षत्रि
यैर्वैश्यैः शूद्रैरन्यैश्च मानवैः कर्तव्यो रक्षिकाचारो द्विजान्संपूज्य शक्तितः इति अ
त्रैव हयग्रीवोत्पत्तिः तदुक्तं कल्पतरौ श्रावण्यां श्रवणे जातः पूर्वं हयशिरा हरिः
जगाद सामवेदं तु सर्वकल्मषनाशनं स्नात्वाचांतः पूजयेत्तं शंखचक्रगदाधरं कर्मी

अथाश्वलायनेन श्रवणाकर्माख्यं श्रावण्यां पौर्णमास्यां श्रवणाकर्मेति तत्रा
स्तमयव्यापिनी ग्राह्या अस्तमिते स्थालीपाकं श्रपयित्वेति सूत्रात् अपराह्णनिशी
थप्रयोगात्तः पातनिषमात्तदंगैः प्रसंगात् द्विरुक्तो दोषः अन्यत्पापरेऽस्तु प्राप्तोक्तः प्र
योगः प्रसंगस्य यत्नकास्तु पौर्णमा दर्शशब्दयोः पर्वोन्यक्षणोऽवदहोरात्रवाचित्वात्त
द्वैवकर्मकालव्यापिनी ग्राह्येति विकृतित्वाच्चेयं पर्वेद्रंति श्रावणादिमासचतुष्टये
पक्षद्वयेषु द्वितीयायां अन्य शून्यशयनव्रतं तत्रचंद्रोदयव्यापिनी दिनद्वये त
त्वेपरेति निर्णयामृते इति श्रीमीमांसकरामकृष्णभट्टात्मजकमलाकरभट्ट
कृते निर्णयसिंधौ श्रावणमासः ॥ ॥ सिंहे पराः षोडशघटिकाः पुण्यकालः
अन्यत्सर्वं पूर्ववत् अथ गोप्रसवे अद्भुतसागरे नारदः भानौ सिंहगते चैव यस्य
गौः संप्रसूयते मरणं तस्य निर्दिष्टं षड्भिर्मासैर्न संशयः तत्र शांतिं प्रवक्ष्यामि
येन संपद्यते शुभं प्रसूतां तां तत्क्षणादेव तां गां विप्राय दापयेत् ततो होमं प्रकुर्वी
त घृताक्तै राजसर्षपैः आकृतीनां घृताक्तानामयुतं जुहुयात्ततः व्याहृतिभि
श्चायं होमः सोपवासः प्रयत्नेन दद्याद्विप्राय दक्षिणामिति तथा सिंहराशिगते
सूर्ये गोप्रसूतिर्यदा भवेत् पौषे च महिषी सूते दिवा चाश्वतरी तथा तदानिष्टं
भवेत्ताभिः चिंतनं शांतये शांतिकं चरेत् अस्यवामेति सूक्तेन तद्विप्रो रिति

८

मेत्रतः जुहुयाद्यतिलाज्येन शतमष्टोत्तराधिकं मृत्युंजयविधानेनजुहुयाद्घृत
पायुतं श्रीसूक्तेनतनः स्नापयेच्छांतिसूक्तेनवापुनः मध्यरात्रेनिशीथेवा यदागौः
कं दिनेसदा ग्रामेवास्वगृहेवापि शांतिकंपूर्ववद्दिशेत् एवंश्रावणेवडवाप्र
सवोदिनेनिषिद्धः तदुक्तमथर्ववेदिनांगार्ग्यपरिशिष्टे माघेवृषेचमहिषीश्रा
वणेवडवादिवा सिंहेगावःप्रसूयंतेस्वामिनोमृत्युदायका अत्रतदुक्ताऽमत्ता
रव्याशांतिःकार्याः भाद्रकृष्णतृतीयाकज्जलीसंज्ञा सापराग्राह्येति दिवोदासीये
प्युक्तंवचनंतुहरितालिकाप्रकरणेवक्ष्यामः भाद्रकृष्णचतुर्दशी बहुलाख्याम
ध्यदेशेप्रसिद्धा सासायाह्नव्यापिनीग्राह्या दिनद्वयेतत्त्वपूर्वाग्राह्या गौर्याःच
तुर्थीवटधेनुपूजादुर्गार्चनंदुर्भरहोलिकेच वत्सस्यपूजा शिवरात्रिरेतापरा
न्विताचूतिनंपसराष्ट्रमिति दिवोदासीयेवचनात् अत्रवत्सपूजायाःपूर्व
ग्रुपादानाद्धेनुपूजाशब्देनबहुलाख्यागृह्यतेतिसएवव्याचख्यौ मदनर
च्येवं अत्रगोपूजापायचन्नाशनंचतत्रैवोक्तं भाद्रकृष्णषष्ठीहलषष्ठीसा
सप्तमीयुतेति दिवोदासः भाद्रकृष्णसप्तम्यां शीतलाव्रतंतत्रपूर्वाग्राह्येति
हेमाद्रौ अथजन्माष्टमीसाचकृष्णादिमासेनभाद्रपदकृष्णाष्टमी तथाभा

नि॰ सिं॰
७१

79

द्रपदे मासि कृष्णाष्टम्यां कलौ युगे अष्टाविंशतिमे जातः कृष्णोसौ देवकीसुत इ
ति कल्पतरौ ब्रह्मोक्तेः अत्रेदं माधवमतं अष्टमी द्विधा जन्माष्टमी जयंती चेति
अत्राद्या केवलाष्टमी येन कुर्वंति जानंतः कृष्णजन्माष्टमीव्रतं ते भवंति न
राः प्राज्ञा व्याला व्याघ्राश्च कानने इति स्कांदात् दिवा वा यदि वा रात्रौ नास्ति चेद्रोहि
णी कला रात्रियुक्तां प्रकुर्वीत विशेषेणेंदुसंयुतामिति पुराणांतरात् श्रावणेव
हुले पक्षे कृष्णजन्माष्टमीव्रतं न करोति नरो यस्तु भवति क्रूरराक्षस इति भविष्यो
क्तेश्च केवलाष्टम्या एवोपोष्यत्वागतेः सैव रोहिणीयुक्ता जयंती कृष्णाष्टम्या भ
वेद्यत्र कलैका रोहिणी यदि जयंती नाम सा प्रोक्ता उपोष्या सा प्रयत्नतः इति वह्नि
पुराणाच्च अष्टमी कृष्णपक्षस्य रोहिणीऋक्षसंयुता भवेत्प्रौष्ठपदे मासि जयंती
नाम सा स्मृतेति विष्णुरहस्यादिवचनाच्च ज्योतिरादित्यवत्संज्ञया कर्मभेदः रो
हिणीयोगश्चाहोरात्रे मुख्यः निशीथमात्रे मध्यमः दिवसाद्यावधमः अहो
रात्रे तयोर्योगो ह्यसंपूर्णो भवेद्यदि मुहूर्तमप्यहोरात्रे योगश्चेत्तामुपोषये
दिति वसिष्ठसंहितोक्तेः अर्धरात्रे तु योगोयं तारापत्युदये सति नियतात्मा
शुचिः स्नातः पूजां तत्र प्रवर्त्तयेदिति विष्णुधर्मोक्तेः वासरे वा निशायां वा य

राम
७९

त्रत्वल्यापिरोहिण्यां विशेषेण नभामासे सैवोपोष्या मनीषिभिरिति पुराणां
तराच्च विशेषेणोत्यक्तेः भाद्रपदे पीदं श्रावणे वा नभस्येवेति वक्ष्यमाणत्वे
नैतद्गाल्ल निशीथ एव रोहिणीयोगे जयंती नान्यथेत्याह तत्र वत्सरे वा निशायां
वेति विरोधात् योगविशेषादुक्तात्फलमित्यन्ये त्रेपाकरणे दोषश्रुतेस्सप्तेस्तः तत्र
जन्माष्टमीव्रतं [illegible] नित्यं सर्वोक्तवचनेभ्यः अकरणे निंदाश्रुतेः वर्षे वर्षे तु या
नारी कृष्णजन्माष्टमीव्रतं न करोति महाप्राज्ञ व्याली भवति कानने इति स्कांदे देवी
सा श्रुतेश्च न करोति नरो यस्तु भवति सर्वं मर्त्ये र ज्ञस्त्री लिंगमतंत्रं मदनरत्ने स्कांदे
त्वत्र फलमप्युक्तं जन्माष्टमीव्रतं ये वै प्रकुर्वंति नरोत्तमाः कारयंत्यथवा लोका
न् लक्ष्मीस्तेषां सदा स्थिरा सिध्यंति सर्वकार्याणि कृते जन्माष्टमीव्रते इति जयं
तीव्रतं तु नित्यकाम्यं महाजयापि कृता जयंती मुक्तये नघ धर्ममर्थं च कामं
च मोक्षं च मुनिपुंगव ददाति वांछितानर्थान् ये चान्येप्यतिदुर्लभा इति स्कां
दादौ फलश्रुतेः भ्रूहान्नेन नत्यापे शावहस्तस्य भोजने तत्यापे लभते कोटि
जयंतीविमुखो नरः न करोति यदा विष्णोः जयंतीसंभवं व्रतं यमस्य वशमापे
न्नः सहते नारकीं व्यथामित्यकरणे निंदाश्रुतेश्च यदा च सर्वे द्युः परेद्युर्वा रो

80

हिणीयोगस्तदा जन्माष्टमी जयंत्यां तन्न भिन्ना हेया न तु जन्माष्टमीव्रतं पृथक्
कार्यं विष्णुरहस्ये बलवत्तदुक्तं माधवेनैव यस्मिन्वर्षे जयंत्याख्यो योगो जन्मा
ष्टमी तदा अंतर्भूता जयंत्यां स्यात् दक्षयोगप्रशास्यत इति मदनरत्ने निर्णीया
मृत गौडमैथिलमतेप्येवं केचित्तु रोहिणीसंयुतैवोपोष्या सर्वाघौघविनाशि
नी अर्धरात्रादधश्चोर्ध्वं कालया वा यदा भवेत् जयंती नाम सा प्रोक्ता सर्वपापप्र
णाशिनीत्यग्निपुराणादर्धरात्र एव रोहिणीयोगस्य प्राशस्त्यात् मुहूर्तमपिल
भ्येतेत्यादीनां चार्धरात्रयोगे पूपपत्तेर्जयंतीव्रतं भिन्नमित्याहुः तत्वं तु हे
माद्रिमते पि जयंतीव्रतं भिन्नमेव उदये चाष्टमीत्यस्यानेन जयंतीपरत्वोक्तेः किंच रो
हिण्यामर्धरात्रे च यदा कृष्णाष्टमी भवेत् तस्यामभ्यर्चनं शौरेर्हंति पापं त्रिजन्मजमि
ति विष्णुधर्मोक्तेः समायोगे तु रोहिण्यां निशीथे राजसत्तम समजायत गोविंदो बा
लरूपी चतुर्भुजः तस्मात्तं पूजयेत्तत्र यथा वित्तानुरूपतः इति वह्निपुराणाच्चार्ध
रात्रस्य कर्मकालत्वमवसीयते अतः कर्मणो यस्य यः कालः इत्यादिवचनात्पूर्व
द्युरेव प्राप्तेः परदिने सतोपि रोहिणीयोगस्य न प्रयोजकत्वं अन्यथानुपपत्त्यादे
यितत्वापत्तेः किंच जयंतीशब्दो रात्रिविशेषवचनः अभिजिन्नामनक्षत्रं जयं
ती नाम शर्वरी मुहूर्तो विजयो नाम यत्र जातो जनार्दन इति ब्रह्मांडपुराणात्ते ने

80A

ननु योगि रोहिणीयोगे गौणत्वान्न व्रतभेदः ॥ यत्तु वासरे वा निशायां वेति तत्कैमुतिक-
न्यायेन निशीथयोगस्यैव स्तुत्यर्थं पूर्वदिने इह रात्रियोगाभावे वा प्रशस्त्यार्थमित्या-
हुः अन्ये तु यद्यपि दिवा वा यदि वा रात्रौ नास्ति चेद्रोहिणीकला रात्रियुक्तां प्रकुर्वीर-
न्विशेषेंदुसंयुतामित्यनेन रोहिणीयोगाभावे अर्धरात्रव्याप्तेर्ग्राह्यतोक्ता तथापि
चास्मिन्वर्षे जयंतीयोगो नास्ति तत्र जयंतीव्रतलोपे प्राप्ते अष्टमीमात्रेपि जयंतीव्रतं का-
र्यमित्येवं परमिदं मिति तदाशयः अत्र हि सजातीयावगूर्य विश्वजिन्न्यायेन एषामसं-
भवे कुर्यादिष्टिं वैश्वानरीं द्विज इतिवद्रोहिणीयोगाभावे विधानात्तत्कार्यापत्तिः
स्फुटैव अत एवोक्तं जयंती नाम सर्वहरीति यच्च स्कांदे उदये चाष्टमी किंचित्नवमी
सकला यदि भवेच्च बुधसंयुक्ता प्राजापत्यर्क्षसंयुता अपि वर्षशतेनापि लभ्यते
वा न वा नवेति यच्च पाद्मे प्रेतयोनिगतानां तु प्रेतत्वं नाशितं नरैः ये कृता श्रावणे
मासि अष्टमी रोहिणीयुता किं पुनर्बुधवारेण सोमेनापि विशेषतः किं पुनर्नवमीयु-
क्ता कुलकोट्यास्तु मुक्तिदेति तद्दानादिविषये उपवासाश्रवणादित्यनंतभट्टजयं-
तीपरमिति हेमाद्रिः उदये चंद्रोदये इति केचित् तन्न चंद्रोदयस्तत्वेऽसंदेहात् नवमी
सकलेत्यत्र तावन्मात्रानाभावाच्च तेन पूर्वेद्युः सप्तमी परदिने सूर्योदये घटिकादिग्रा-
ह्या पूर्वविद्धाष्टमीति पाद्मोक्तेः अतो न व्रतभेदो नाप्यंतर्भावः तत्त्वा चिंतावान् गौण

मी

ऽस्तु नवम्यां परमिदं वचनं नवमी सकलपदीति विशेषोक्तेः । एतत्पूर्वदिने जयंत्य
भावपरमित्याहुः । जयंत्यादि सर्वोपवासोदयमिति आचार्यचूडामण्यादयः । वयं तु
सत्यं लोकास्तु जन्माष्टमीमेवानुतिष्ठंति न हि श्रावणेन भवत्येव रोहिणीसहिता
ष्टमी यदा कृष्णा नरैर्लब्धा सा जयंतीति कीर्तिता श्रावणेन भवे योगेन भवेत्स्यैव न भवे
द्ध्रुवमिति माधवीये वसिष्ठसंहितोक्तापि भाद्रे जयंती नापि क्रियेत पद्मपुराणात
फलं स्त्रप्नमेवस्य स्वेच्छे सकाममुपवसेदिति वदितव्ये तन्न नित्यत्वानुपपत्तेः । अत्रैव गौण
मुख्य चांद्राभ्यामेकत एव मासश्च यत्तु तन्न एकवाक्ये उभयनिर्देशो वा राकेंदवयो
गात् अतो जयंतीव्रतस्यापि नित्यत्वादुपवासद्वयं कार्यमिति तिक्रमः । अत एव हेमाद्रि
मदनरत्नादौ जन्माष्टमीव्रतं जयंतीव्रतं च भिन्नमुक्तं भिन्नकालत्वात् सर्वेषामनाच
देत भीदो नेति सिद्धं यद्यपि पूर्वा परा वा त्यापि रोहिणीयुतैव कार्येति गंगाप्रानो ।
रुदं तत्त्वं प्रतीयते जयंतीपरमेवरदं च काम्यमेवेत्यनंतभट्टः तन्न श्रवणे हेमाद्रौ ज्ञेयं नि
त्यकाम्यमिति तत्त्वस्व । ननु यथा विष्णुश्रृंखलयोगेन श्रवणे द्वादशी वामन
जयंत्यादि सर्वे सिद्धिर्येषां वै एकादशीस्य त्यापि परा तथा कला काष्ठा मुहूर्तापि
यदा कृष्णाष्टमी तिथिः नवम्यां सैव ग्राह्या स्यात् सप्तमी संयुता न हीत्यादिवच
नाद्रोहिण्यादियोगाधिक्ये फलाधिक्यात्पैव जन्माष्टम्यां उक्तेति चेत् वा

तत्व्रतभेदं जानीमः ३

81

नि॰ सिं॰
८२

82

संहितोक्तेः ॥ अत्राष्टमी द्विधा रोहिणीरहिता तद्युता च ॥ आद्यापि चतुर्धा पू-
र्वेद्युरेव निशीथयोगिनी परेद्युरेवोभयेद्युरनुभयेद्युश्चेति तत्राद्ययोरसंदे-
ह एव कर्मकालव्याप्तेः जन्माष्टमी रोहिणी च शिवरात्रिस्तथैव च पूर्वविद्धै-
व कर्तव्या तिथिभांते च पारणमिति भृगूक्तेः ॥ अस्यां केवलरोहिण्युपवासो
पि सिद्धः ॥ अंत्ययोः परैव प्रातः संकल्पकालव्याप्तेराधिक्यात् वर्जनीया प्रयत्ने-
न सप्तमीसंयुताष्टमीति ब्रह्मवैवर्तोक्तेश्च एवमंशतः समव्याप्तावपि विषमव्या-
प्तौ त्वाधिक्येन निर्णयः ॥ रोहिणीयुतापि चतुर्धा पूर्वेद्युरेव निशीथे रोहिणी-
युता परेद्युरेवोभयेद्युरनुभयेद्युश्च ॥ अत्राप्याद्ययोरसंदेहः कार्या विद्धापि सप्त-
म्या रोहिणीसहिताष्टमीति पाद्मोक्तेः जयंत्यां पूर्वविद्धायामुपवासं समाच-
रेदिति गारुडाच्च सप्तमीसंयुताष्टम्यां निशीथे रोहिणी यदि भविता साष्टमी
पुण्या यावच्चंद्रदिवाकराविति वह्निपुराणाच्च तृतीयपक्षे परैव वर्जनीया प्र-
यत्नेन सप्तमीसंयुताष्टमी सऋक्षापि न कर्तव्या सप्तमीसंयुताष्टमीति ब्रह्म-
वैवर्तात् चतुर्थपक्षोपि द्वेधा पूर्वेद्युर्निशीथेष्टमी परेह्नि रोहिणी परेह्न्यष्टमी
पूर्वेह्नि रोहिणी उभयेद्युस्तदुभयस्य निशीथासंबंधो वेति आद्ये परेद्युर्ज्ञे

राम
८२

81A

तैर्माख्यानहितत्रव्रतभेदो द्वयोर्नित्यत्वद्वयोरकरणे दोषो वाश्रुतः इहत्वेतैस्त्रिभि
र्हेतुभिः संज्ञाभेदाद्धर्मभेदात्फलभेदात्तथोपवासभेदः स्पष्ट एव एकदेवतात्वा
च्च वणे द्वादशीवन्न पारणा लोपदोषो पि तेन व्रतद्वयमेव युक्तं द्वयोरपि नित्य
त्वात् केचित्तु त्रेतायां द्वापरे चैव राजन्कृतयुगे तथा रोहिणीसहिता चेयं विद्व
द्भिः समुपोषिता अतः परं महीपाल संप्राप्ते तामसे कलौ जन्मतो वासुदेवस्य भ
विता व्रतमुत्तममिति हेमाद्रौ वह्निपुराणात्कलौ जन्माष्टमीव्रतं न जयंतीव्र
तमित्याहुः तन्न तामसे कलावित्युक्तेः परमश्रेयो हेतोरस्यात्कलौ भाविनां
दुर्लभत्वमुच्यते तेन कलौ तामसा न करिष्यंति किंतु धन्या एवेत्यर्थः अन्यथा
माद्यास्त्रानसलग्नाचाराभविष्यति कलौ युगे इत्यादौ विधिकल्पनापत्तेः अत्र निशी
थव्येव ग्राह्य सर्वांकवचनेषु तस्य मुख्यकालत्वोक्तेः अष्टमी शिवरात्रि
स्त्वर्धरात्रादधो यदि दृश्यते घटिकापासा पूर्वविद्धा प्रकीर्तितेति माधवीयेषु
राहंतारात् अर्धरात्रे तु रोहिण्यां यदा कृष्णाष्टमी भवेत् तस्यामभ्यर्चनं
शौरेर्हंति पापं त्रिजन्मजमिति भविष्योक्तेः अष्टमी रोहिणी युक्ता निश्य
र्धे दृश्यते यदि मुख्यकाल इति ख्यात तत्र जातो हरिः स्वयमिति विशिष्ट

र्णि वाताति भगवान्तार्थैः पूर्वविद्धाष्टम्यामपि निषिद्धं नेपारणोक्तेः तेनकलाकाष्ठे१
तिवा वचनांतरवशात्कंचैतीपरमेतत् तत्वेतु अष्टम्याः कर्मकालव्याप्ते दिवा वा यदि वा
रात्रे नास्ति चेद्रोहिणी कला रात्रियुक्तां प्रकुर्वीतेति पूर्वोक्तवाक्यैः रोहिणीयोगा
भावे ग्राह्यत्वोक्तेर्वचनात्कर्मकालव्यापिनी त्वष्टमी पूर्वा परा वाल्पापि रोहिणीयुता
युताग्राह्या माधवमदनरत्ननिर्णयामृतानंतभट्टगौडमैथिलग्रंथादिष्वेवमिति
उपवासद्वयं कार्यं द्वयोर्निस्वत्वादिति तु वयं ...प्रातरेव सप्तमीसंयुताष्टम्यां
भूत्वा ऋक्षे हि योनरः प्राजापत्यद्वितीये हि मुहूर्तार्धं भवेद्यदि तदाष्टयामिकं पुण्यं
प्रोक्तं व्यासादिभिः परैरिति स्कांदात् मुहूर्तेनापि संयुक्ता संपूर्णा साष्टमी भवेत् किं
पुनर्नवमीयुक्ता कुलकोट्यास्तु मुक्तिदेति पाद्माष्टमीयोगरहितया न्यायो ज्ञेय इति भा
वः निंबादित्योपास्तकास्तु जन्माष्टमीरामनवमीशिवरात्र्यादौ पूर्वविद्धां कर्मकाली
नो तिथिं त्यक्त्वा द्वित्रिमुहूर्तापरैवेति ...उदयव्यापिनी ग्राह्या कुले तिथि
द्यो यत्ते निंबार्को भगवान् येषां वांछितार्थफलदइति हेमाद्रौ मात्स्योनां प्रति
सप्तमीवत्ते भविष्योक्तेरित्याहुः तत्र यदि दिने द्वितीये दिवसे तु ...तिथ्यां ...तिः१
स्यात्तदोपवासः पूर्वं प्रकुर्याद्दिवसे द्वितीये दिनेकभक्तोपि तदा व्रतार्थमिति
मात्स्यवाक्येन तस्मै बोधसंहारास्तवीर्यं चेमानाभावात् ...तिथ्यां हीति

82A

यंती योगस्य सत्त्वापरे वेति माधवः तदुक्तं तेनैव यस्मिन्वर्षे जयंत्याख्यो योगो जन्मा
ष्टमी तदा अन्तर्भूता जयंत्यां स्यात् अतः स योगः प्रशस्यते इति पूर्वविद्धाष्टमी यात्तउ
दये नवमीदिने मुहूर्तमपि संयुक्ता संपूर्णा साष्टमी भवेदिति कलाकाष्ठामुहूर्ता
पि यदा कृष्णाष्टमीतिथिः नवमी सैव ग्राह्या स्यात्सप्तमीसंयुता नहीति पाद्मोक्तेश्च हे
माद्रिस्त्वाह अष्टम्याः प्राधान्यात्तस्याश्च पूर्वेद्युः कर्मकाले व्यापित्वात्पूर्वैव पाद्येतु
पूर्वेद्युर्निशीथेऽष्टम्यभावे जयंत्यन्तर्भावोक्तिस्तूत्सवमात्रमित्याहुः अन्येतु
पूर्वविद्धाष्टमीति वाक्ये जन्माष्टम्यां सूर्योदये वेधनिषेधात्कलाघटीमात्रोदयाद
पिकी ग्राह्या कार्या विद्धापि सप्तम्येति जयंतीपरं जयंत्याः पूर्वविद्धायामुपवासे समा
चरेदिति नित्यैकवाक्यत्वात् तत्रापि द्वयोर्नित्यत्वात् कालभेदाच्चोपवासद्वयं भवत्येवं
यदा तु केवलाष्टमी मुहूर्ताधिका तदा त्यागहेतोः सप्तमीवेधस्याभावात् पूर्वैव यदिवा
विप्रत्यक्तदा परदिने ग्राह्यतिथेरभावात् पूर्वैव एवं सर्वाण्येकवाक्यानि
सप्तमीवेधपराणि चेत्तु जन्माष्टमी पूर्वविद्धा सऋक्षा सकला माघीवेत्यत्र नवमी
अष्टाम्युपोष्य व्रतमाचरेदिति व्यासोक्तेर्विद्धायाः स्थले अन्यत्र नवम्यामुपवासः दशमी
वेधे द्वादश्युपवासवदित्याहुः तेनिर्मूलत्वादुपेक्ष्याः मुहूर्तमपि संयुक्तेति रोहि
णीयोगेन्याज्यत्वोक्तेः तिथ्यंतपारणवाक्यानां निर्विषयत्वापत्तेः नच जयंतीपरा

83A

सप्तम्याः उत्तरार्द्धे दिवसे ऽत्यस्यानंतरमन्यथेत्यप्याहारः अन्यथा ऽकरणे पंचम्या
दौ तदापत्तिः शिष्टाचारो नेति चेन्न तत्स्यन्यायवचोविरोधे हेयत्वात् इदानीं कौ
पिनिंद्राकोपासनाभावाच्चेति संक्षेपः इति दिक् पारणं तु तिथिरक्षगुणं हंति
नक्षत्रं च चतुर्गुणं तस्मात्प्रयत्नतः कुर्यात् तिथिभांते च पारणमिति ब्रह्मवैवर्त्तो
क्तेतिथ्यन्तयोर्यदाहेदोन नक्षत्रांतमथापिवा अर्द्धरात्रे तदा कुर्यात्पारणं तु
परेहनीति हेमाद्रौ वचनाच्चार्धरात्रे ऽशुभयोगांते ऽन्यतरांते वेति मुख्यः पक्षः सर्वे
ष्वेवोपवासेषु दिवा पारणमिष्यत इति ब्रह्मवैवर्त्तोक्त्यन्यविषयं दिनमुख्य का
लालाभे अन्यतरांते वा ज्ञेयं गौडास्तु नरात्रौ पारणं कुर्यादृते वै रोहिणी व्रतात् ।
तत्र निश्यपि तत्कुर्याद्वर्जयित्वा महानिशामिति ब्रह्मांडपुराणाद्रात्रौ सार्द्धप्र
हरमध्ये कार्यं महानिशा तु विज्ञेया मध्यमं प्रहरद्वयमिति ... तथा मध्यमप्रहरे ऽमध्ये
... कल्पतरौ मदनरत्ने चैवं कामधेनौ गर्ग
विज्ञेया तु महानिशेति स्मृत्यंतरात् ...
...महानिशा ... विज्ञा यामध्यमं प्रहरद्वयमित्याह ... महानिशा
हेयहि के रात्रौ मध्यमयाम... वेदव्यासपरमेतदित्यस्यैः महानिशायाम
न्यतरांतेनैव तीयदिने पारणं अपरेहनीति पारणोत्तरदिनपरत्वात् उभया

नि॰ सिं॰
८४

84

तोपेक्षणादित्याहुः तच्चेत्तत्र न स्यात् निशान्ते वान्यतरान्तलाभे महानिषेधः माहा
निशायामेव लाभे तत्रैव पारणमिति अशक्तौ तु वह्निपुराणे भान्ते कुर्यात्तिथेर्वा
पि शस्तं भारत पारणमिति गारुडे विष्णुधर्मे च जयन्त्यां पूर्वविद्धायामुपवासं समाच
रेत् तिथ्यन्ते चोत्सवान्ते वा व्रती कुर्वीत पारणं अशक्तौ तु तिथ्यन्ते तिथिभान्ते वा ।
पारणं यत्र चोदितं यामत्रयोर्ध्वगामिन्यां प्रातरेव हि पारणम् सणवोत्सवान्ते तिथ्यन्ते चो
त्सवान्ते वा व्रती कुर्वीत पारणमिति कालादर्शोक्तेरिति संक्षेपः अष्टम्यां विशेषो हेमाद्रौ
भविष्ये ततोष्टम्यां तिलैः स्नातो नद्यादौ विमले जले सुदेशे शोभनं कुर्याद्देवक्याः
सूतिकागृहं तन्मध्ये प्रतिमा स्थाप्या सा चाष्टविधा स्मृता कांचनी राजती ताम्री
पैत्तली मृन्मयी तथा वार्क्षी मणिमयी चैव वर्णकैः लिखिता पथवा सर्वलक्षणसं
पूर्णा पर्यंके च पटावृते देवकी तत्र चैकस्मिन् प्रदेशे सूतिकागृहे प्रसुप्ता च प्र
सूतां च स्थापयेत मंचकोपरि मां तत्र बालकं सुप्तं पर्यंके स्तनपायिनं यशोदां त
त्रैकस्मिन् प्रदेशे सूतिकागृहे तद्वच्च कल्पयेत्पार्श्वे प्रसूतवरकन्यकां कश्य(
पो वसुदेवोयमदितिश्चैव देवकी शेषो वै बलभद्रोयं यशोदादितिरन्वभूत् नंदः
प्रजापतिर्दक्षो गर्गश्चापि चतुर्मुखः गोपेन्द्रः कुंजरश्चैव दानवाः शस्त्रपाणयः

राम
८४

84A

लेखनीयस्तत्रैव कालियो यमुनाह्रदे । तस्यैवमादि यत्किंचिच्छ्रूयते चरितं मम । लेख
यित्वा प्रयत्नेन पूजयेद्भक्तितत्परः । मंत्रेणानेन कौंतेय देवकीं पूजयेन्नरः । गायद्भिः
किन्नराद्यैः सततपरिवृता वेणुवीणानिनादैः भृंगारादर्शकुंभप्रवरकृतकरैः किंक
रैः सेव्यमाना । पर्यंके स्वास्तृते या मुदिततरमुखी पुत्रिणी सम्यगास्ते सा देवी देवमा
ता जयति सुतनया देवकी कांतरूपा । पादौ संवाहयंती श्रीर्देवक्याश्चरणांतिके ।
निषण्णा पंकजे पद्मा नमो देव्यै श्रियै इति । शंखे तोयं समादाय सपुष्पकुशचंदनं ।
जानुभ्यां धरणीं गत्वा चंद्रायार्घं निवेदयेत् । अर्धरात्रे वसोर्धारां पातयेद्गुडसर्पिषा ।
नाडीवर्धापनं षष्ठीनामादेः करणं मम । ततो मंत्रेण वै दद्याच्चंद्रायार्घ्यं समाहितः ।
क्षीरोदार्णवसंभूत अत्रिगोत्रसमुद्भव । गृहाणार्घ्यं शशांकेदं रोहिण्या सहितो मम ।
ज्योत्स्नापते नमस्तुभ्यं नमस्ते ज्योतिषां पते । नमस्ते रोहिणीकांत अर्घ्यं नः प्रति
गृह्यतां ॥ प्रभाते ब्राह्मणान् शक्त्या भोजयेत्तमाचरेः । ॐ नमो वासुदेवा
य गोब्राह्मणहिताय च । शांतिरस्तु शिवं चास्तु इत्युक्त्वा मां विसर्जयेत् । इदं प्रतिमास
कृष्णाष्टम्यां मया प्रोक्तं मदनरत्ने वह्निपुराणे । प्रतिमासं च तत्पूजामष्टम्यां यः क
रिष्यति मम चैवाखिलान् लोकान् स संप्राप्स्यत्यसंशयं । तथा ग्रंथेनेन विधि

नायत्तत्प्रतिमासं नरेश्वरः करोति वत्सरं पूर्णं यावदागमनं हरेः दद्याच्छय्यां ससं
पूर्णां भोगैर्गौर्यास्तैरलंकृतां इति जन्माष्टमीव्रतं भाद्रमावास्यायां कुशग्रहणमुक्तं
हेमाद्रौ मरीचिना मासे नभस्यमावास्या तस्यां दर्भोच्चयो मतः अयातयामास्ते दर्भा वि
नियोज्याः पुनः पुनः नभाः श्रावणः तेन दर्शान्तमासे जन्माष्टम्यनंतरदर्शो लभ्यते म
दनरत्ने तु मासे नभस्येमावास्या तस्यां दर्भोच्चयो मतः इति मरीचिवाक्यमुक्तं नभ
स्ये भाद्रपदः तेन महालयांतर्गतदर्शो लभ्यते पौर्णमास्यंतमासेन सैव वा तेन न वि
रोधः गौणमुख्यचान्द्राभ्यामेक एव दर्श इत्यन्ये भाद्रपदशुक्लतृतीयायां हरितालि
काव्रतमुक्तं तत्र परा ग्राह्या मुहूर्तमात्रसत्वेपि दिने गौरीव्रतं परे शुद्धाधिकायाम
प्येवं गणयोगप्रशंसनादिति माधवोक्तेः आद्या मधुश्रावणिका कज्जली हरिता।
लिका चतुर्थीमिश्रिता स्त्रीभिर्दिवा नक्ते विधीयते तृतीया नभसः शुक्ला मधुश्राव
णिका स्मृता भाद्रस्य कज्जली कृष्णा शुक्ला च हरितालिकेति दिवोदासोदाहृतवच
नात् भाद्रशुक्लचतुर्थी वरदचतुर्थी सा मध्याह्नव्यापिनी ग्राह्या प्रातः शुक्लतिलैः स्ना
त्वा मध्याह्ने पूजयेन्नृपेति हेमाद्रौ भविष्ये तत्रैव पूजोक्तेः मदनरत्नेप्येवं परादि
ने एकांशेन साकल्येन वा मध्याह्नव्याप्त्यभावे सर्वपक्षे पूर्वैव ग्राह्या तथा च हे

85A

८२

हस्यातः चतुर्थी गणनाथस्य मातृविद्धा प्रशस्यते मध्याह्नव्यापिनी चेत्स्यात्पर
तश्चेत्परेऽहनीति मातृविद्धा प्रशस्ता स्याच्चतुर्थी गणनायके मध्याह्ने परतश्चेत्तु
स्यान्नागाविद्धा प्रशस्यते माधवीये स्मृत्यंतराच्च गणेशरूपं स्कांदे कृतं सूर्य
कर्णं नागयज्ञोपवीतं पाशांकुशधरं देवं ध्यायेत्सिद्धविनायकमिति इयं रविभौ
मयोरतिप्रशस्ता भाद्रशुक्लचतुर्थी या भौमेनार्केण वा युता महती सात्र विघ्नेश
मर्चित्वेष्टं लभेन्नरः इति निर्णयामृते वाराहोक्तेः अथ चंद्रदर्शनं निषिद्धं तथा
चापरार्के मार्कंडेय सिंहादित्ये शुक्लपक्षे चतुर्थ्यां चंद्रदर्शने मिथ्याभिदूषणं
कुर्यात्तस्मात्पश्येन्न तं सदेति चतुर्थ्यां न पश्येदित्यन्वयः प्रधानक्रियान्वय
लाभात् तेन चतुर्थ्यामुदितस्य पंचम्यां न निषेधः गौडास्त्वेवमाहुः पराशरोपि
कन्यादित्ये चतुर्थ्यां तु शुक्ले चंद्रस्य दर्शनं मिथ्याभिदूषणं कुर्यात्तस्मात्पश्येन्न
तं सदा सिंहकन्यादित्ययोश्चांद्रभाद्रोल्लक्ष्यते तद्दोषशांत्यै सिंहः प्रसेनमिति
वैयठेदिति श्लोकस्तु विष्णुपुराणे सिंहः प्रसेनमवधीत्सिंहो जांबवता हतः सु
कुमारक मा रोदीस्तव ह्येष स्यमंतकः इति भाद्रशुक्लपंचमी ऋषिपंचमी सा म
ध्यव्यापिनी ग्राह्या प्रजाव्रतेषु सर्वेषु मध्याह्नव्यापिनी तिथिरिति माधवीये

86

सारीतोक्तेः दिनद्वये तत्त्वे हेमाद्रिमते पारा सिता परयुता स्यात्पंचमी दीपिकोक्तेः मा
धवमते पूर्वा युग्मवाक्यान्निर्णयामृतेप्येवम्। अत्र स्कंदषष्ठीं प्रतिमासं स्कंदं जयेत्कृत्वा
भूमिजं शाकेन वर्तनं एवं सप्त वर्षाणि कृत्वा सप्तकं मेषु प्रतिमासं स्कंदपूजापरो ऽष्टि तन्मत्रे
गौणब्रोत्तरशते तिलान् हुत्वा सप्त ब्राह्मणान्भोजयेदिति निर्णयामृते भाद्रशुक्लषष्ठी लर
लिता सैव सूर्यषष्ठीति गुर्जरे प्रसिद्धा सा सप्तमीयुतेति दिवोदासः शुक्ले भाद्रपदे षष्ठ्यां
स्नानं भास्करपूजनं प्राशनं पंचगव्यस्य अश्वमेधफलाधिकमिति वचनात् कल्प
तरौ भविष्ये येयं भाद्रपदे मासि षष्ठी स्याद्भरतर्षभ योस्यां पश्यति गांगेयं दक्षिणा
पथवासिनं ब्रह्महत्यादिपापेभ्यः मुच्यते नात्र संशयः गांगेयः स्वामिकार्तिकेयः भा
द्रशुक्लसप्तम्यामामुक्ताभरणव्रतं तत्र पूर्वा युग्मात् भाद्रशुक्लाष्टमी दूर्वाष्टमी सा पू
र्वा ग्राह्या श्रावणी दुर्गा नवमी दूर्वा चैव हुताशनी पूर्वविद्धा तु कर्तव्या शिवा रात्रिर्ब
लेर्दिनमिति हेमाद्रौ ब्रह्मयमोक्तेः शुक्लाष्टमी तिथिर्या तु मासि भाद्रपदे भवेत् दूर्वा
ष्टमीं तु सा ज्ञेया नोत्तरा सा विधीयत इति पुराणसमुच्चयाच्च यत्तु मुहूर्ते रोहिण्यष्ट
म्या पूर्वा वा यदि वा परा दूर्वाष्टमी तु सा कार्या ज्येष्ठां मूलं च वर्जयेदिति तत्रैव
परा कार्येत्युक्तं तन्न सर्वदिने ज्येष्ठादियोगे दुष्टत्वं दूर्वाष्टमी सदा त्याज्या ज्येष्ठा
मूलर्क्षसंयुता तथा ऐंद्रर्क्षे पूजिता दूर्वा हंत्यपत्यानि नान्यथा भर्तुरायुर्हरा

86A

मूलेतस्मात्तांपरिवर्ज्जयेदिति नज्ञेवत्तान्निषेधात् इदमगस्त्योदयेकन्यार्केचनका
र्ये शुक्लभाद्रपदेमासिदूर्वासंज्ञातयाष्टमी सिंहार्कएवकर्त्तव्यानकन्यार्केक
दाचन सिंहस्थेसौतमासूर्येनुदिते मुनिसत्तमेइतिमदनरत्नेस्कांदोक्तेः अग
स्त्यउदितेतान्नपूजयेदम्पतौइवां वैधव्यंपुत्रशोकंचदशावर्षाणिपंचचेतितत्रैव
दोषोक्तेश्च भाद्रशुक्लाष्टम्यामगस्त्योदयेभाविनिसतिपूर्वंकृष्णाष्टम्यामेवकु
र्यादिति हेमाद्रिदीपिकायांचैवं इदंचव्रतंस्त्रीणांनित्यं यानपूजयतेदूर्वांमोहादि
ह यथाविधि त्रीणिजन्मानिवैधव्यंलभतेनात्रसंशयः तस्मात्संपूजनीयासाप्रति
वर्षंवधूजनैरितिपुराणसमुच्चयात् यदाज्येष्ठादिकंविनाष्टमीनलभ्यतेतदा
तत्रैवोक्तं कर्त्तव्याचैकभक्तेनज्येष्ठामूलंयदाभवेत् दूर्वामभ्यर्चयेद्भक्त्यानवं
ध्यंदिवसंनयेदिति अत्रविधिर्मदनरत्नेभविष्ये शुचौदेशेप्रजातायांदूर्वायांप्र
सन्नात्म स्थाप्यलिंगंततोगंधैःपुष्पैर्धूपैःसमर्चयेत् दध्यक्षतैर्द्विजश्रेष्ठ अर्घ्यंद
द्यात्त्रिलोचने दूर्वाष्टमीभ्यं[illegible]विधिवत्[illegible]जयेच्छ्रद्धयान्वितः मंत्रस्तु त्वंदूर्वेऽमृ
तजन्मासिवंदितासिसुरासुरैः सौभाग्यंसंततिंदेहिसर्वकार्यकरीभवयथा
शाखाप्रशाखाभिर्विस्तृतासिमहीतले तथाममापिसंतानंदेहित्वमजरामरे

नि.सिं.
८७

87

मिति अत्रानग्निपक्वं भक्षयेत् अनग्निपक्वमश्नीयाद्दध्नं दधि फलं तथा अक्षार
लवणं व्रतस्नमश्नीयान्मधुनान्वितमिति तत्रैव भविष्योक्तेः भाद्रपदेऽधिमासे स्या
त्तिनिर्णयदीपे स्कांदे आधिमासेन संप्राप्ते नभस्य उदये मुने अर्वाग्दूर्वाव्रतं कार्यं
परतो नैव कुत्रचित् अथ ज्येष्ठापूजोक्ता माधवीये स्कांदे मासि भाद्रपदे शुक्ले
पक्षे ज्येष्ठर्क्षसंयुता रात्रिर्यस्मिन्दिने कुर्याज्ज्येष्ठायाः परिपूजनमिति इयं ज्ये
ष्ठायोगवशेन पूर्वापरा ग्राह्या दिनद्वये योगे परा पूर्वेद्युरेव रात्रियोगे पूर्वैवा न
वम्यां सा सदा कार्या स्याद्दष्टमी नात्र संशयः मासि भाद्रपदे शुक्लपक्षे ज्येष्ठर्क्ष
संयुता रात्रिर्यस्मिन्दिने कुर्याज्ज्येष्ठायाः परिपूजनमिति तत्रैवोक्तेः अस्या
अपवादः यस्मिन्दिने भवेज्ज्येष्ठा मध्याह्नादूर्ध्वमप्यणुः तस्मिन्नह्नि विधेया पूजा च
न्यूना चेत्पूर्ववासरे इति इदं केवलतिथौ नक्षत्रे चोक्तं तत्राद्यं केवलतिथौ
कार्यं अंत्यं केवलर्क्षे तदुक्तं मात्स्ये प्रत्याब्दिकं तिथावुक्तं पक्षे ज्येष्ठादैवतं
व्रतं प्रतिज्येष्ठं व्रतं पक्षविहितं केवलोडुनि तिथावेवाचरेदाद्यं द्वितीयं केवल
र्क्षे तु इति मदनरत्ने भविष्ये तु वार्षिकमपि नक्षत्रमात्रे उक्तं मासि भाद्रपदे पक्षे शु
क्ले ज्येष्ठा यदा भवेत् तत्रैव ज्ञानावरणं कृत्वा त्रिभिर्मंत्रैश्च पूजयेदिति दाक्षिणात्या

राम
८८

॥ ६ ॥ आभाकासितपक्षेषु मैत्रश्रवणरेवती संगमे नैव भोक्तव्यं द्वादशद्वादशी हरेदिति ॥ ६ ॥

87A

सच्छलएव कुर्वंति तथा मैत्रेणवादये द्देवीं ज्येष्ठायां तु प्रपूजयेत् मूले विसर्जयेद्
देवीं त्रिदिनं व्रतमुत्तममिति मंत्रस्तु एह्येहि त्वं महाभागे सुरासुरनमस्कृते ज्येष्ठे
त्वं सर्वदेवानां मत्समीपगता भवेत्यावाहयिता मतिवर्णामिति संपूज्य ज्येष्ठायै
तेनमस्तुभ्यं श्रेष्ठायै ते नमो नमः सर्वायै ते नमस्तुभ्यं शांकर्यै ते नमो नमः ज्येष्ठे
श्रेष्ठे तपोनिष्ठे ब्रह्मिष्ठे सत्यवादिनि एह्येहि त्वं महाभागे अर्घ्यं गृहाण सरस्वती
त्यर्घः तत्र भाद्रशुक्लद्वादश्यां श्रवणयोगरहितायां पारणं कुर्यात् आभाकासि
तपक्षेष्विति दिवोदासोदाहृतवचनात् उपोष्यैकादशीं मोहात्पारणं श्रावणेष
यदि करोति हंति तत्पुण्यं द्वादशद्वादशीभवमिति तत्रैव स्कांदाद्ये अस्य तत्रै
व प्रतिप्रसवः मार्कंडेयः विशेषेण महीपाल श्रवणं वर्द्धते यदि तिथिक्षयेण भो
क्तव्यं द्वादशीं लंघयेन्न हीति केचित् यदात्वपरिहार्यो योगस्तदा श्रवणनक्षत्रे त्रेधा
विभक्ते मध्यमविंशतिघटिकायोगं त्यक्त्वा पारणं कार्यं तदुक्तं विष्णुधर्मे श्रुते
श्र मध्ये परिवर्तमेति सुप्तिप्रबोधपरिवर्तनमेव वर्ज्यमिति केचित्तु त्रेधा वि
भज्य मध्यपदद्वयं वर्ज्यमाहुः तत्र मूलं चिंत्यं अत्रैव विष्णुपरिवर्तनोत्सवं कुर्या
त् संध्यायां विष्णुं संपूज्य प्रार्थयेत् मंत्रस्तु तिथितत्वे उक्तः ॐ वासुदेव जगन्ना

यच्चान्येषं द्वादशीतत्र पर्वणि न परिवर्तनस्य चस्तु खस्य विहितमाधवेति अत्रैव राजमार्तण्डो
ध्यानेमकोमयराकें गर्गेण द्वादश्यां तु सिते पक्षे मासि प्रोष्ठपदे तथा शक्रमस्याय
पयेद्राजा विश्वं श्रवणवासवे स्पृष्टैव श्रवणद्वादशी तत्रैकादश्यां द्वादश्यां श्रव
णयोगे सैवोपोष्या एकादशी द्वादशी च वैष्णवमपि तत्र चेत् तत्तद्विष्णुशृंखलं ना
म विष्णुसायुज्यकृद्भवेदिति विष्णुधर्मोक्तेः नारदीयेपि संस्पृश्यैकादशीं राजन्
द्वादशीं यदि संस्पृशेत् श्रवणं ज्योतिषां श्रेष्ठं ब्रह्महत्यां व्यपोहतीति द्वादशीश्रवण
स्पृष्टा स्पृशेदेकादशीं स एव वैष्णवो योगो विष्णुशृंखलसंज्ञित इति हेमाद्रौ मात्स्यो
क्तेश्च दिनद्वये द्वादशीश्रवणयोगेपि पूर्वैव निर्णयामृते तु स्पष्टपूर्वार्द्धमन्यथा पठि
तं द्वादशीश्रवणस्पृष्टा स्पृशेदेकादशीं यदीति हेमाद्रिमते एकादश्याः श्रवणयो
गाभावेपि तत्पूर्वद्वादशीयोगमात्रेण विष्णुशृंखलं भवति निर्णयामृतमते
तु श्रवणस्यैकादशीद्वादशीभ्यां योगेन विष्णुशृंखलं नान्यथेति यदा निशीथानं
तरं सूर्योदयावधि कलामात्रमपि श्रवणर्क्षं भवति तदापि पूर्वैव तदुक्तं तत्रैव
नारदीये इमां प्रकृत्य तिथिनक्षत्रयोर्योगो योगश्चैव नराधिप द्विकलो यदि ल
भ्येत स ज्ञेयो ह्याष्टयामिकं इति योगः शिवरात्र्यादौ शिवयोगात् द्वादशीश्रवण

88A

स्पृष्टा कृत्स्नापुण्यतमा तिथिः न तु सा तेन संयुक्ता तावत्येव प्रशस्यते इति मदनरत्ने
मात्स्याच्चादिवोदासीये तु रात्रेः प्रथमपादे चेच्छ्रवणं हरिवासरे तदा पूर्वामुप
वसेत्स्यात्तभोजनेव पारणमित्युक्तं इदं तु निर्मूलत्वात्पूर्वविरोधाच्चोपेक्ष्यं इयं बुध
वासरे तिप्रशस्ता बुधश्रवणसंयुक्ता सैव चेत् द्वादशी भवेत् अत्यन्तमहती सास्याद्
त्तं भवति चाक्षयमिति हेमाद्रौ स्कांदात् यानि तु पठंति उत्तराषाढसंमिश्रा श्रोण
मध्याह्नगा यदि वा श्रवणादीसैव नाराख्या हृतिपुण्यं पुरा कृतं उदयव्यापिनी ग्राह्या
श्रोण्या द्वादशी संयुता विस्पृष्टा संयुता साचेन्नैवोपोष्या शुभेप्सुभिरित्यादीनि व
चनानि तानि निर्मूलानि यदपि स्मृत्यर्थसारे उदयव्यापिनी ग्राह्येत्युक्तं यच्च मद
नारदीये उदयव्यापिनी ग्राह्या श्रवणद्वादशीव्रते इति तद्यदा शुद्धाधिका द्वादशी
परदिने एवोदये श्रवणयोगः पूर्वेद्युश्च न तद्भिन्ने काले योगस्तत्परं दिनद्वयेऽप्यु
दययोगे पूर्वैव वक्ष्यमाणकर्मकालव्याप्तेरित्युक्तं मदनरत्ने यदा त्वेकादश्येव श्रवण
युक्ता न द्वादशी तदापि पूर्वैव यदा न प्राप्यते ऋक्षं द्वादश्यां वैष्णवं क्वचित् एका
दशी तदोपोष्या पापघ्नी श्रवणान्वितेति मदनरत्ने नारदीयोक्तेः यदा परेवर्धे
युता तदा परा तत्र शक्तेनोपवासद्वयं कार्यं एकादशीमुपोष्यैव द्वादशीं स

पक्षेप्येवं द्वादशीतत्र पक्षेनपरिवर्ज्यस्यस्तुरवस्त्वपिहिमाधवेति अत्रैवराजमार्तण्डो
स्थानेमहत्त्वमपरार्के गर्गेण द्वादश्यांतुसितेपक्षे मासिप्रोष्ठपदेतथा श्रवणस्या
पयेद्राजाविष्णुश्रवणवासवे स्यैमेवश्रवणद्वादशी तत्रैकादश्यांद्वादशीश्रव
णयोगेसैवोपोष्याएकादशीद्वादशीचवैष्णवमपितत्रचेत् तत्रविष्णुशृंखलंना
मविष्णुसायुज्यकृद्भवेदितिविष्णुधर्मोक्तेः नारदीयेपि संस्पृश्यैकादशीं राजन्
द्वादशींयदिसंस्पृशेत् श्रवणंज्योतिषांश्रेष्ठं ब्रह्महत्यांव्यपोहतीति द्वादशीश्रवण
स्पृष्टास्पृशेदेकादशीं सएववैष्णवोयोगोविष्णुशृंखलसंज्ञितइतिहेमाद्रौमात्स्ये
ज्ञेप्यत्र दिनक्षयेद्वादशीश्रवणयोगेपिपूर्वैवेतिनिर्णयामृतेत्वस्यपूर्वार्द्धमन्यथापठि
तं द्वादशीश्रवणर्क्षंस्पृशेदेकादशींयदीति हेमाद्रिमते एकादश्याःश्रवणयो
गाभावेपि तद्युतद्वादशीयोगमात्रेणविष्णुशृंखलंभवति निर्णयामृतमते
तुश्रवणस्यैकादशीद्वादशीभ्यांयोगेएवशृंखलंनान्यथेति यदानिशीथानं
तरंसूर्योदयावधिकलामात्रमपिश्रवणर्क्षंभवति तदापिपूर्वैव तदुक्तंतत्रैव
नारदीयेइमांप्रक्रम्यतिथिनक्षत्रयोर्योगोयोगश्चैवनराधिप द्विकलोयदिल
भ्येत सज्ञेयोह्याष्टयामिकंइतियोगः शिवरात्र्यादौशिवयोगात् द्वादशीश्रवण

88A

स्पष्टाक्रांतापुण्यतमा तिथिः नतु सा तेन संयुक्ता तावत्येव प्रशस्यते इति मदनरत्ने
मात्स्ये द्वादशीबोदासीयेन राज्ञेः प्रथमपादे चेच्छ्रवणं हरिवासरे न तदा पूर्वामुप
वसेत्प्रातर्भांत्येव पारणमित्युक्तं इदं तु निर्मूलत्वात् सर्वविरोधाच्चोपेक्ष्यं इयं बुध
वासरे तिप्रशस्ता बुधश्रवणसंयुक्ता सैव चेत् द्वादशी भवेत् अत्यंतमहती सा स्याद्द
त्तं भवति चाक्षयमिति हेमाद्रौ स्कांदात् यानि तु पठंति उत्तराषाढसंमिश्रा श्रवणा
मध्याह्नगापि वा श्रवणर्क्षसैव तारा स्याद्धृतिपुण्यप्रदाहृते उदयव्यापिनी ग्राह्या
श्रवणा द्वादशीसंयुता विश्वर्क्षसंयुता सा चेन्नैवोपोष्या शुभेप्सुभिरित्यादीनि व
चनानि तानि निर्मूलानि यदपि स्मृत्यर्थसारे उदयव्यापिनी ग्राह्येत्युक्तं यच्च बृह
न्नारदीये उदयव्यापिनी ग्राह्या श्रवणद्वादशीव्रते इति तद्यदा श्रवणाधिका द्वादशी
परदिने एवोदये श्रवणयोगः पूर्वेद्युश्चैतद्भिन्ने काले योगस्तत्परं दिनद्वये उ
दययोगे पूर्वैव वक्ष्यमाणकालव्याप्तेरित्युक्तं मदनरत्ने यदा त्वेकादश्येव श्रवण
युक्ता न द्वादशी तदापि पूर्वैव यदा न प्राप्यते ऋक्षं द्वादश्यां वैष्णवं क्वचित् एका
दशी तदोपोष्या पापघ्नी श्रवणान्वितेति मदनरत्ने नारदीयोक्तेः यदा परैव श्र
युता तदा परा तत्र शक्तेनोपवासद्वयं कार्यं एकादशीमुपोष्यैव द्वादशीं स

89

मुपोषयेत् न चात्र विधिलोपः स्यादुभयोर्दैवतं हरिरिति भविष्योक्तेः यत्तु वि
ष्णुधर्मे पारणांतं व्रतं ज्ञेयं व्रतांते विप्रभोजनं असमाप्ते व्रते पूर्वे नैव कुर्याद्व्रतांत
रमिति तदेतद्भिन्नपरं अत्र गौडाः श्रवणराजन्यपरं काम्यं श्रवणद्वादशीव्रतमिति तिस्य
लशीर्षवचनात्काम्यमेवेदं तेनाशक्तस्य नित्यैकादशीव्रतमेवेति मन्यंते द्वादश्या
मुपवासेन स्नात्वा सान्द्रपसर्वशः चक्रवर्तित्वमतुलं संप्राप्नोत्यतुलां श्रियमिति गौडनि
बंधे मार्कंडेयोक्तेश्च द्वाविंशत्यास्तु एकादश्यां नरो भुक्त्वा द्वादश्यां समुपोषणात्
व्रतद्वयकृतं पुण्यं सर्वं प्राप्नोत्यसंशयमिति वराहवामनपुराणोक्तेः [illegible]श्रवणद्वाद
शीव्रतमेवेत्याहुः भक्त्येति फलाद्याहारपरं नत्वन्नपरं अन्नाश्रितानि पापानीति नि
षेधात् उपवासद्वयं कर्तुं न शक्नोति प्रथमेऽह्नि फलाहारी निराहारोऽपरेऽहनीति दिवो
दासीये भविष्योक्तेश्च अशक्तो नगृहीतैकादशीव्रतो यस्तं प्रत्युक्तं मात्स्ये द्वादश्यां शुक्ल
पक्षे तु नक्षत्रं श्रवणं यदि उपोष्यैकादशीं तत्र द्वादशीमर्चयेद्धरिमिति पूजयेन्नत्वु
पवसेदित्यर्थः अगृहीतैकादशीव्रतस्त्वेकादश्यां भुक्त्वा द्वादश्यामुपवसेत् एवमे
कादशीं भुक्त्वा द्वादशीं समुपोषयेत् पूर्ववासरजं पुण्यं सर्वं प्राप्नोत्यसंशयमिति ना
रदीयोक्तेः पारणं तूभयांतेऽन्यतरांते वा कार्यात् तिथिनक्षत्रनियमे तिथिभांते

89A

च पारणमिति स्कांदात् तिथिनक्षत्रसंयोगे उपवासो यदा भवेत् पारणं तु न कर्तव्यं
यावन्नैकस्य संक्षयः इति नारदीयादिति हेमाद्रिः यद्यप्यत्र नक्षत्रमात्रांते ऽपि पारणं प्र
तिभाति तथापि तिथिमात्रांते ऽन्येन त्वक्षांते तिथिमध्ये ऽपि याः काश्चित्तिथयः प्रोक्ताः
पुण्या नक्षत्रयोगतः ऋक्षांते पारणं कुर्याद्विना श्रवणरोहिणीमिति विष्णुधर्मे श्रव
णांतमात्रे पारणनिषेधात् रोहिण्यां तु भांते कुर्यान्निषेधो वा पीति वह्निपुराणात् तदं ते ऽप्य
स्तु न त्वत्रैवमस्तीति नऋक्षांतो ऽनुकल्प इति मदनरत्ने ऽस्तु संभवे तु तिथ्यंते तिथि
भांते वा पारणं यत्राचोदितं यामत्रयोर्ध्वगामिन्यां प्रातरेव हि पारणमिति ज्ञेयं १

२ श्रवणद्वादशी २ यत्तु मदनरत्ने द्वादशी हि द्वौ वा श्रवणांत एव पारणं कुर्यात् पारणं तिथिहद्वौ तु २
द्वादश्यामनुसंक्षयात् हद्वौ कुर्यात्त्रयोदश्यां तत्र दोषो न विद्यते इति वह्निपुराणादि त्यु
क्तं तदेतस्यामेव श्रवणयुतैकादशी विहित विजयैकादशीव्रतपरं न तु श्रवणद्वा
दशीपरमिति मदनरत्ने गौडास्तु श्रवणद्वादशीपरमाहुः अत्र विधिर्मदनरत्ने वि
तस्मिन्दिने तु यः स्नानं यत्र क्वचन संगमे तथा दध्योदनयुतं तस्यां जलपूर्णं घटं द्वि
जे वस्त्रसंवेष्टितं दत्वा छत्रोपानहमेव च न दुर्गतिमवाप्नोति गतिमग्र्यां च विंदति १
मंत्रस्तु विविष्ये घटे जनार्दनपूजामभिधाय नमो नमस्ते गोविंद बुधश्रवणसं

नि.सिं.
९०

10

त्रक अघौघसंक्षयं कृत्वा सर्वसौख्यप्रदो भव प्रीयतां देवदेवेशो मम संशयनाशनः
वामनावतारनिमित्तोपवासस्तु व्रतहेमाद्रौ भविष्ये द्वादश्यास्ते विधिः प्रोक्तः श्र
वणेन युधिष्ठिर सर्वपापप्रशमनं सर्वसौख्यप्रदायकः एकादशी यदा सा स्यात्
श्रवणेन समन्विता विजया सा तिथिः प्रोक्ता भक्तानां विजयप्रदेत्युपक्रम्य श्रवणका
लेवद्गतिर्येगाते सा गुर्विणी भवेत् सम्भवेन वमे मासि पुत्रं सा वामनं हरिमित्या
द्युक्त्वा एतत्सर्वं समभवदेकादश्यां युधिष्ठिर तेनेष्टा देवदेवस्य सर्वेषां विजया तिथिः
एवात्र वृद्धिः समाख्याता एकादश्यां मया तव पूर्वमेव समाख्याता द्वादशी श्रवणा
न्वितेत्युपसंहारादेकादश्यामेव वृद्धिः फलं भागवतेऽष्टमस्कंधे तु द्वादश्यां वाम
नोत्पत्तिरुक्ता श्रोणायां श्रवणद्वादश्यां मुहूर्तेऽभिजिति प्रभुः ग्रह[illegible]नक्षत्रताराद्याश्च
क्रुस्तज्जन्मदक्षिणं द्वादश्यां सविता तिष्ठन्मध्यंदिनगतो नृप विजया नाम सा प्रोक्ता
यस्यां जन्म विदुर्हरेः श्रोणायां चंद्रमश्चाभिजित् श्रवणप्रथमांशाः गौडास्त्वेवं श्रु
त्वकल्पभेदाद्व्यवस्था तद्विधिश्च हेमाद्रौ वह्निपुराणे नदीनां संगमे स्नात्वा पादचैये
द श्रवामनं सौवर्णे वस्त्रसंयुक्तं द्वादश्यां गुलमध्ये तु ततो विधिवत्संपूज्याहेरणम
वेन पात्रेणादद्यादर्घ्यं पुरस्ततः नमस्ते पद्मनाभाय नमस्ते जलशायिने तुभ्यमर्घ्यं प्र

राम
९०

यथा शिवा लवामनरूपिणे नमः कमलकिंजल्कपीतनिर्मलवाससे महाहवरि
पुस्कंधघृष्टस्कंधाय चक्रिणे नमः शार्ङ्गासिखड्गपाणये वामनाय मनायच यज्ञभु
क्फलदात्रे च वामनाय नमो नमः देवेश्वराय देवाय देवसंभूतिकारणे प्रभवे सर्वदेवा
नां वामनाय नमो नमः एवं संपूजयित्वा तु द्वादश्यामुदये रवेः भृंगार सहितं तं तु ब्राह्म
णाय निवेदयेत् वामनः प्रतिगृह्णाति वामनोहं ददामि ते वामनं सर्वतोभद्रं द्विजाय
प्रतिपादयेदिति अनंतभट्टीये त्वाहुः श्रवणद्वादश्यां जनार्दननामा विष्णुः पूज्यते भाद्र
शुक्लैकादश्यां वामनावतार इति श्रवणयुतशुक्लैकादश्यलाभे तद्दशमी विद्धापि श्रवण
युतापि कार्या दशम्येकादशी यत्र सा नोपोष्या भवेत्तिथिः श्रवणेन तु संयुक्ता सा वै
त्यात्सर्वकामदेति वह्निपुराणादिषूक्तं मदनरत्ने पूजा च मध्याह्ने कार्या अत्रोपोष्ये
■ वामनो रामरामावितिपूर्वोक्तवचनात् अत्रैव दुग्धव्रतं संकल्पयेत् तदुक्तं
दुग्धमाश्वयुजे मासीति अत्रेदं चिंत्यते दुग्धव्रते पायसादि वर्ज्यं न वेति नेति केचि
त् नहि प्रकृतिवर्जने विकारवर्जनं युक्तं दधिघृतादीनामपि वर्जनापत्ते नच यत्र
प्रकृतिरसोपलंभस्तद्वर्जनमिति वाच्यं माससविकारस्येष्टदध्यादेरप्यावर्जना
पत्तेः तस्माद्दध्यादिवत्पायसादि भक्ष्यमिति अत्र ब्रूमः यत्राविकारे प्रकृतिरसो
पलंभस्तत्प्रभिन्ना वा तत्र विकारस्यापि निषेधः अस्ति च मांसविकारे मांसत्वाभि

त्तु मांसत्वापात्त यत्तु श्रौतदुग्धदध्यादेरनिषेधापत्तिरिति तन्न श्रौतं दुग्धमिति विकारत
द्धितेन निषेधात् तथा च विज्ञानेश्वरः श्रौतं दुग्धमेकाशफं स्रैणमारण्यकमथाविकमि
त्यत्र श्रौतं दुग्धमिति विकारतद्धिताच्च श्यामाकचरुवादीनामपि निषेधः इत्याह नन्वेवं संधि
न्यनिर्दशावत्सा गोपयः परिवर्ज्जयेदिति संधिन्यादिक्षीरनिषेधेपि दध्यादेर्ग्रह
णं स्यात् सत्यं प्राप्तं वचनेन परं निषेधः तदाह पराकेँ शंखः क्षीराणि यान्यभक्ष्या
णि तद्विकाराशने बुधः सप्तरात्रं व्रतं कुर्यात् प्रयत्नेन समाहित इति व्रतं गोमूत्रया
वकात् तस्मात् पायसोऽदुग्धरसोपलंभाद्वर्ज्जनं अतएवामिक्षायां दधिसत्वेपि माधु
र्योपलंभात्पयोरूपत्वमुक्तं मीमांसकैः तदुक्तं पयएव घनीभूतमामिक्षेत्यभिधीय
यते इति दध्यादिषु तु तदभावाद्वर्ज्जनमिति इति दुग्धव्रतं भाद्रशुक्लचतुर्दश्यामनंत
व्रतं तत्र त्रिमुहूर्त्ताप्यौदयिकी ग्राह्येति माधवः तदुक्तं उदये त्रिमुहूर्त्तापि ग्राह्यानं
तव्रते तिथिरिति मध्याह्ने भोज्यवेलायामिति कथायां श्रवणादुपरि हि देवेभ्यो
धारयतीति वाद्धिधिकल्पनात्प्रजाव्रतेषु सर्वेषु मध्याह्नव्यापिनी तिथिरिति माध
वीयवचनान्मध्याह्नव्यापिनी ग्राह्येति दिवोदासः प्रतापमार्त्तण्डेप्येवं निर्णयः
मतेन घटिकामात्राप्यौदयिकीत्युक्तं तथा भाद्रपदस्यांते चतुर्दश्यां द्विजोत्त

91A

न पौर्णमास्याः समायोगे व्रतं चानंतकं चरेदिति भविष्योक्तेः मुहूर्तमपि चेद्भाद्रे पू-
र्णिमायां चतुर्दशी संपूर्णां तां विदुस्तस्यां पूजयेद्विष्णुमक्षय्यमिति स्कांदाच्चेति
अत्र मूलं चिंत्यं नत्वेवं विधर्मयोर्वादयोर्भिन्नार्थत्वे एकवाक्यतयोगात्संदिग्धे शुवा
क्यशेषादिति न्यायेन पूर्वापरावामध्याह्नव्यापित्वेव मुख्या माधवस्तु सामान्यवा
क्यानिर्णयं कुर्वन्भ्रांत एव पूर्ववचनं त्वेनं तव्रतस्य पुराणांतरेष्वभावान्निबं
धांतरेष्वभावाच्च निर्मूलमेवेति दिक् अगस्त्योदयकृत्येच पूर्णत्वात्सर्वेति युक्तं अथा
गस्त्यार्घः तत्काल उक्तं हेमाद्रौ भविष्ये कन्यायामगते सूर्ये अर्घोगस्त्ये सप्तमे दि
ने कन्यायां समनुप्राप्ते अर्घ्यकालो निवर्तते तेन उदयोत्तरं सप्तदिनमध्ये त्वर्घः य
स्माद्ये अगस्त्यरात्रावुदयाद्यमस्यदानमेतत्सकलं नरेण यावत्समाः सप्तदशाथ
वास्युरथो इममप्यत्र वदंति केचित् यमस्यागस्त्यस्य उदयकालस्तु दिवोदासीये उक्तः
उदेति याम्यां हरिसंक्रमाद्वै रेकाधिके विंशतिमे ह्यगस्त्यः ससप्तमेऽस्तं हि वृषसंक्र।
मात्तु प्रयाति गर्गादिभिरप्यभाणि अत्र विधिर्विष्णुरहस्ये काशपुष्पमयीं रम्यां
कृत्वा मूर्तिं तु वारुणेः प्रदोषे विन्यसेत्कुंभे तु पुष्पधूपविलेपनैः दध्यक्षतबलिं दद्या
त् रात्रौ कुर्यात्प्रजागरं पूजा च वक्ष्यमाणार्घ्यमंत्रेण कार्या प्रभाते तं समादाय

नि.सिं.
२२

९२

यान्पुराणयजलाशयं निशावसानेथांयश्यन् जलांते प्रतिमां मुनेः अर्घ्यंदद्यादगस्त्यायप्रा
भक्त्यासम्यगुपोषितः मास्येतत्र्यंगुष्ठमात्रंपुरुषंतथैवसौवर्णमतस्माय तवाहुदंडं
सुवर्णकाशमयीत्वयाज्ञौ चतुर्भुजंकुंभमुखेनिधायधान्यानिसप्तांकुरसंयुतानि
सकाशपुष्पाक्षतमुक्तिपुक्तं मंत्रेणदद्याद्द्विजपुंगवाय धेनुंवकृष्णोरवतीचदद्यात्स
वस्त्रघंटाभरणंद्विजाय भविष्ये विरूढैः सप्तधान्यैश्चवंशपात्रनिधापितैः सौवर्णरूप्य
यपात्रेणताम्रंवंशमयेनवा सद्भिःस्थितेनतन्मंत्रेणजानुभ्यांधरणींगतः विंध्यरहस्य
अगस्त्यः खनमानेतिपठन्मंत्रमिमंमुने अर्घ्यंदद्यादगस्त्यायपञ्चदेमंत्रविधिस्त्वयं
काशपुष्पप्रतीकाशवह्निमारुतसंभव मित्रावरुणयोःपुत्रकुंभयोनेनमोस्तुते
वातापिर्भक्षितोयेनसमुद्रःशोषितःपुरा लोपामुद्रापतिःश्रीमान् योसौतस्मैनमो नमः
योनोदन्तेनपापानिविलयंयांतिव्याधयः तस्मैनमोस्तुगस्त्यायसशिष्यायसपुत्रि
णे अगस्त्यःखनमानेतिविप्रोर्घ्यंविनिवेदयेत् रात्रिपुत्रिमहाभागेऋषिपत्निव
रानने लोपामुद्रेनमस्तुभ्यमर्घ्यंमेप्रतिगृह्यतां दत्वैवमर्घ्यंकौरव्यप्रणिपत्य
विसर्जयेत् सर्वेनस्त्वंयथाशास्त्रंध्यानमोगस्त्यमहर्षये ऐहिकामुष्मिकीदत्वा
कार्यसिद्धिंद्विजसत्तम विसर्जयित्वागस्त्यंतं विप्रायप्रतिपादयेत् अगस्त्यो

राम
२२

92A

मे मनस्तोस्तु अगस्त्योऽस्मिन् घटे स्थितः अगस्त्यो द्विजरूपेण प्रतिगृह्णातु सत्कृतः ।
दानमंत्रः अगस्त्यः सप्तजन्मार्घ्यं नाशयित्वा वयोरघं अजले विमलं सौख्यं प्रयच्छ त्वं म
हामुने प्रतिग्रहमंत्रः विष्णुरूपस्य पजेदगस्त्यमुद्दिश्य धान्यमेकं फलं रसं होमं कृ
त्वा ततः पश्चाद्भुंजीत मानवः फलं होमाश्वार्घ्यमंत्रेणाज्येन भाविष्ये दत्वार्घ्यं सप्तव
र्षाणि एकैकं दानेन पांडव ब्राह्मणः स्याच्चतुर्वेदः क्षत्रियः पृथिवीपतिः वैश्यश्च धान्य
निष्पत्तिः शूद्रश्च धनवान् भवेत् यावदायुष्यं यः कुर्यात्स परं ब्रह्म गच्छति इत्यगस्त्य
र्घ्यः भाद्रपौर्णमास्यां प्रपितामहात्परं त्रीन् दिव्यश्राद्धं कार्यं तदुक्तं हेमाद्रौ ब्राह्म
मार्कंडेययोः नांदीमुखस्त्वयोक्तं ब्राह्मे पिता पितामहश्चैव तथैव प्रपितामहः ।
त्रयो ह्यश्रुमुखा ह्येते पितरः परिकीर्तिताः तेभ्यः पूर्वतरा ये च प्रजावंतः सुखैधिताः
ते तु नांदीमुखा नांदीसमृद्धिरिति कथ्यते एतच्च प्रत्यब्दमित्युक्तेः पक्षश्राद्धपक्षे सकृ
न्महालयपक्षे चावश्यकमिति प्रयोगपारिजाते अत्र मातामहा अपि कार्याः
पितरो यत्र पूज्यंते तत्र मातामहा अपीति धौम्योक्तेः पितृशब्दस्य च जनकपरत्वे
बहुवचनविरोधेन पितृभावापन्नपरत्वात् वार्षिकेऽवचनान्निवृत्तिः न च जीव
त्तिः न च जीवत्पितृकस्याप्यकार्यां मातृश्राद्धे तदापत्तिः इष्टापत्तेः अत एव स
उक्तं श्राद्धेष्वस्य मातृमातामहयोर्दद्यादिति मदनरत्नकालादर्शौ एतज्जीवपि

का॰

93

तं श्राद्धं वक्ष्यामः केचित्तु आजन्मलक्षणया पित्रादयो यत्र तत्र मातामहास्तेनात्र
नेत्याहुः न चात्र नाम्नां दौहित्रश्राद्धधर्मातिदेशः वैष्णवादिशब्दवच्च देवतापरस्य क
र्मनामत्वाभावात् इन्द्रस्तं समभेध्याये नापि नांदीमुखवत्ते पितृ विशेषणं देवता
यां पारिभाषिकत्वादिति दिक् तथा निर्णयदीपे गार्ग्यः सर्वमासीषु सर्वासु निषि
द्धं पिंडपातनं वर्जयित्वा प्रोष्ठपदीययापार्वणी तथैव सेति ॥ ॥ इति श्रीमीमांसक
रामकृष्णभट्टात्मजभट्टकमलाकरकृते निर्णयसिंधौ भाद्रपदमासः ॥ ॥
कन्यासंक्रमे पराः षोडश घटिकाः पुण्याः शेषं प्राग्वत् अथ महालयः तत्राप
ष्ठीचंद्रोदये ब्रह्ममनुः आषाढमीं विधिं कृत्वा पंचमं पक्षमाश्रिताः कांक्षंति पितरः
क्लिष्टा अन्नमप्यन्वहं जले कन्यायोगे पुण्यतमत्वमाह शाट्यायनिः कन्यास्थार्का
न्वितः पक्षः सात्यंतपुण्य उच्यते इति अत्र विशेषमाह ब्रह्ममनुः मध्ये वापदि वाप्य
ते यत्र कन्यां व्रजेद्रविः स पक्षः सकलः श्रेष्ठः श्राद्धषोडशकं प्रति तथा ब्रह्मांडमा
र्कंडेयौ कन्यागते सवितरि दिनानि दश पंच च पार्वणेनेह विधिना श्राद्धं तत्र वि
धीयते तथा तत्रैव षोडशादिनान्युक्तानि कन्यागते सवितरि यान्यहानि तु षोड
श क्रतुभिस्तानि तुल्यानि देवो नारायणोऽब्रवीत् अत्र हेमाद्रिः षोडशत्वं त्रेधा
व्याचख्यौ तिथिवृद्ध्या पक्षस्य षोडशदिनत्वे श्राद्धानि षोडशेत्येकः पक्षः भाद्रप

प॰

र्णिमया सहेति द्वितीयः आश्विनशुक्लप्रतिपदा सहेति तृतीयः अंत्य एव तु युक्तः अत्र हेतुः
षोडशत्वं यत्तु शुक्लप्रतिपदा सह चेदृक्षया विशेषेण साधि दर्शात्मिका स्यादिति देवलो
क्तः अपरपंचपक्षाः तदुक्तं हेमाद्रौ ब्राह्मे आश्वयुक्कृष्णपक्षे तु श्राद्धं कार्यं दिने दिने त्रि
भागहीनं पक्षं वा त्रिभागं त्वर्धमेव वा दिने दिने इति पूर्वपर्यंतत्वं च मुक्तं त्रिभागहीनमिति
पंचम्यादिपक्षः अर्धमित्यष्टम्यादिपक्षः त्रिभागमिति दशम्यादिः त्रिभागहीनमिति
चतुर्दशी सहित प्रतिपदादि चतुष्टयवर्जनात् निप्रायेणेति कल्पतरुः अत्र दिनपदं ति
थिपरं वीप्सया तत्तत्क्षीयतिथित्वं श्राद्धव्याप्यतावच्छेदकं तेन पंचदशतिथिव्यापि श्रा
द्धं सिध्यति तेन चतुर्दशीनिषेधोऽन्यपक्षपर इति गौडाः तन्न श्राद्धं शस्त्रहतस्यैव चतुर्द
श्यां महालयेऽपि इति विरोधात् पक्षकाम्यत्व दूरणप्रत्ययलोपेन तृतीयभागहीनं ष
ष्ठ्यादिपक्षस्तृतीयभागमेकादश्यादि तदर्धं त्रयोदश्यादिः उत्तरोत्तरलघुकालोक्तेरि
ति तन्न गौणमादिवर्णेन मूलकल्पनालाघवात् पक्षमित्यन्वयापत्तेश्च पंचम्यर्द्धं चतु
र्थ्यादि दशम्यर्द्धं ततोऽप्यतीति विष्णुधर्मोक्तेः षष्ठ्याद्येकादश्यादिपक्षावपि ज्ञेयाविति
तत्वं कालादर्शेऽपि पक्षाद्यादि च दर्शांतं पंचम्यादिर्गतादि च अष्टम्यादि यथाशक्ति कु
र्यादपरपाक्षिकं पक्षादिः प्रतिपत् दिक् दशमी दर्शांतमिति सर्वत्र गौणमेवापि अथाप
रपक्षे श्राद्धं पितृभ्यो दद्यात् पंचम्यादि दर्शांतमष्टम्यादि दशम्यादि सर्वास्मिन्नेति न

थैकास्मिन्नपि दिने श्राद्धमुक्तं हेमाद्रौ नागरखंडे आषाढ्याः पंचमे पक्षे कन्यासंस्थे दिवा
करे यो वै श्राद्धं नरः कुर्यादेकास्मिन्नपि वासरे तस्य संवत्सरं यावत् संतृप्ताः पितरो ध्रु
वमिति अत्र राका राकाव्यवस्थेति प्रांचः तन्न तत्राचकपदाभावात् जयोदश्यादिपक्षे
एव नित्यः नैवं नित्ये दर्शकृतेः ज्ञाते एवकारेण तस्यैव पंचमपक्षायोगव्यवच्छेदो मे
रिति गौडाः तन्न एकस्मिन्नपीति विरोधात् तेन फलभूमार्थिनान्यानि कार्याणीति
तत्त्वं । विधवास्तु विशेषः स्मृतिसंग्रहे चत्वारः पार्वणाः प्रोक्ता विधवायाः सदैव हि
स्वभर्तृश्वशुरादीनां मातापित्रोस्तथैव च ततो मातामहानां च श्राद्धदानमुपक्रमे
त् तथा शाम्भूरांच विशेषेण मतामह्यास्तथैव चेति अत्र तो तु स्मृतिरत्नावल्यां ।
स्वभर्तृप्रभृतित्रिभ्यः स्वपितृभ्यस्तथैव च विधवा कारयेच्छ्राद्धं यथाकालमतंद्रि
ता विधवा स्वयं संकल्पं कृत्वान्यब्राह्मणद्वारा कारयेदित्युक्तं प्रयोगपारिजाते स
कृन्महालये चैव वर्ज्जेतिथ्याद्युक्तं षष्ठी चेन्द्रोदयप्रयोगपारिजातादौ वशिष्ठः नंदा
यां भार्गववदिने चतुर्दश्यां त्रिजन्मसु एषु श्राद्धं न कुर्वीत गृही पुत्रधनक्षयात् जन्म
भे तत्स्वर्वैनरे च त्रिजन्मानि हृद्गार्ग्यः प्राजापत्ये च पौष्णे च पित्र्यक्षे भार्गवे तथा ।
यस्तु श्राद्धं प्रकुर्वीत तस्य पुत्रो विनश्यति प्राजापत्यं रोहिणी पौष्णं रेवती पित्र्यं मघा
न्यान्यपि प्रत्यक्तारादीनि तत्रैव ज्ञेयानि चित्रनंदा एव काम्यश्राद्धारम्भगविनपित्र

१५A

कालभे गंडे वैधृतिपाते न पिंडास्त्याज्यास्तनेयत्राभिरिति संग्रहात् नंदाः प्रतिपत्
षष्ठेकादश्यः अष्टः सप्तमी वृत्तमत्रयोदशी आरो भौम भृगुः शुक्रः अग्निभे कृ
त्तिका वृत्ता लाभं भरणी अत्र पिंडास्त्याज्या इत्याहुः तत्र मूलं मघा एतच्च सकृन्म
हालयविषयं सकृन्महालये काम्ये पुनः श्राद्धे विलेख्यं च अतीत विषये चैव सर्व
मेतन्न विचिंतयेदिति पृथ्वीचंद्रोदये नारदोक्तेः अस्यापवादो हेमाद्रौ अमापाते भर
ण्यां च द्वादश्यां पक्षमध्यके तथातिथिं च नक्षत्रं वारं च न विचारयेत् पाराशर
माधवीय मदनपारिजातादिषु चैवं निर्णयदीपिकायां तु पितृताहेनिषिद्ध
दिनेपि सकृन्महालयः कार्य उक्तं आषाढ्याः पंचमे पक्षे कन्यासंस्थे दिवाक
रे मृताहनि पितुर्यो वै श्राद्धं दास्यति मानवः तस्य संवत्सरं यावत्तृप्ताः पि
तरो ध्रुवमिति नागरखंडोक्तेः यातिथिर्यस्य मासस्य मृताहे तु प्रवर्तते सा
तिथिः पितृपक्षे तु पूजनीया प्रयत्नतः तिथिच्छेदो न कर्तव्यो विनाशौचं यदृच्छ
या पिंडश्राद्धं च कर्तव्यं विधिज्ञेनैव कारयेत् अशक्तः पक्षमध्ये तु करोत्येकादि
नेयदा निषिद्धेपि दिने कुर्यात् पिंडदानं यथाविधीति कात्यायनोक्तेश्च श्राद्धकार
णे पित्र्ये नंदादिषु पिंडानि वेधऽत्याह पाराशरमाधवीये कार्ष्णाजिनिर्नभस्य
स्यापरे पक्षे तथा पक्षे अगमस्ते चित्यं श्राद्धं कार्यं दिने दिने इति इति वीसाव

नि. सिं.
२५

95

ण्याब्दसोमयागवदेकस्याभ्यासेनैकप्रयोगपरमिदं अतः प्रतिपत्प्रभृति ह्येकं वर्द्ध
यित्वा चतुर्दशीं वर्जयेदिति पात्रकल्कीयं पंचम्यादिपक्षविषयं पृथ्वीचंद्रोदये मदन
पारिजाते चैवं अतो नंदादौ सपिंडकश्राद्धे पुत्रवतोप्यधिकारः अत्रिरपि महालये
सपाहे च दर्शे पुत्रस्य जन्मनि तीर्थेपि निर्वपेत्पिंडान् रविवारादिकेष्वपि पूर्वोक्तनंदादि
निषेधस्तु मृताहातिक्रमे योऽशीमास्यादिमृतश्राद्धे च ज्ञेयः यत्तु स्मृत्यर्थसारे ।
विवाहव्रतचूडासु वर्षमर्धं तदर्धकं पिंडदानं मृदा स्नानं न कुर्यात्तिलतर्पणं इति
तस्याप्यपवादो दिवोदासीये बृहस्पतिः तीर्थे संवत्सरे प्रेते पितृयागे महालये ।
पिंडदानं न कुर्वीत पुत्रादि भरणी मघे महालये गयाश्राद्धे मातापित्रोः क्षयेहनि
कृतोद्वाहोपि कुर्वीत पिंडनिर्वपनं सदेति निर्णयदीपे तु नंदादिनिषेधः प्रत्यहं
मित्रश्राद्धविषयः षोडशाहव्याप्तिश्राद्धप्रयोगे केचित्तु प्रत्यहं पिंडदानं कार्यमेवेत्यु
क्तं तदयमर्थः संपन्नः षोडशाहव्याप्तिश्राद्धे क्वचित्पिंडनिषेधः मृताहे सकृन्महाल
ये पितृयाप्रत्यहंश्राद्धभेदे पि क्वचित्पातनादौ तथा अन्यत्र मृताहातिक्रमे च पिंडनि
षेध इति संन्यासिनां तु द्वादश्यां श्राद्धं कार्यं यतीनां च वनस्थानां वैष्णवानां वि
शेषतः द्वादश्यां विहितं श्राद्धं कृष्णपक्षे विशेषतः इति पृथ्वीचंद्रोदये संग्रहोक्तेः
अपरपक्षे श्राद्धाकरणे गौणकालमाह हेमाद्रौ यमः हंसे कन्यास्थे वर्षास्वेषा

राम
२५

केनापिगृहेवसन पंचम्योरंतरोदद्यादुभयोरपिपक्षयोः आश्विनकृष्णपक्षेपंचम्या
मध्येइत्यर्थः तत्राप्यसंभवेभविष्येयेयंदीयान्त्वयाराजन् आख्यातंपंचदशीभुवि
तस्यांदद्यान्नचेद्दत्तंपितृलोकेमहालये तत्राप्यसंभवेभाविष्येयावद्वृश्चिकन्यानुल
योः अमावास्तेदिवाकरः शून्यंप्रेतपुरंतावद्वृश्चिकंयावदागतः ज्ञाते वृश्चिकेस
मतिक्रांतेपितरोदैवतैःसह निःश्वस्यप्रतिगच्छंति आकांक्षंतिस्मपितरः पंचमंपु
रुमाश्रिताः तस्मात्तत्रैवदातव्यंदत्तमन्यत्रनिष्फलंतीतिशयहानिपरंइदंचश्राद्धमन्न
नैवकार्यंनामान्नादिना मृतानांचसपिंडंचगयाश्राद्धंमहालयं आपन्नोपिनकुर्वीत
श्राद्धमानेनकर्हिचित् इतिस्मृतिदर्पणेगालवोक्तेः अथात्रदेवतासंग्रहे तातांबा
त्रितयंसपत्नजननीमातामहादित्रयंसस्त्रिस्त्रीतनयादितातजननीस्वभ्रातरस्त
स्त्रियः तातांबात्मभगिन्यपत्यधवयुग्जायापितासद्गुरुः शिष्याप्ताः पितरोमहा
लयविधौतीर्थेतथान्वर्यदो अस्यार्थः तातत्रयीपितृत्रयी अंबात्रयीच स्मृत्यर्थ
सारोपि महालयेमातृश्राद्धंपृथक्प्रशस्तमिति अत्रविशेषः स्मृतिदर्पणेगाल
वः अनेकामातरोयस्यश्राद्धेचापरपक्षके अर्घ्यदानंपृथक्कुर्यात्पिंडमेकंतु

96

निर्वपेत् जीवन्मातृकस्तु सापत्नमातुरेकोद्दिष्टं कुर्यात्पार्वणं श्राद्धदीपकलिका
यांतु पार्वणमुक्तं अन्वष्टकं च जन्मातुर्गयाश्राद्धं महालयं। पितृपत्नीषु च श्राद्धं कार्यं
पार्वणवद्भवेदिति वृद्धमनूक्तेः सत्स्वीति मातामहानां सपत्नीकत्वे पि विभवे सति मा
तामहीनां पृथक्कार्यं महालये गयाश्राद्धे श्राद्धे चान्वष्टकासु च ज्ञेयं द्वादशदैवत्यं तीर्थे
प्रोष्ठे मघासु चेति निगमोक्तेः हेमाद्रिमते त्वन्नवदैवत्यमेव महालये गयाश्राद्धे वृद्धौ
चान्वष्टकासु च नवदैवत्यमत्रेष्टं शेषं षाट्पौरुषं विदुरिति धर्मोक्तेः तातभ्राता चपि
तृव्यः जननीभ्राता च मातुलः तस्त्रियः पितृव्यस्त्री मातुलानी भ्रातृजायाः पितृष्वसृमा
तृष्वसृभगिन्यो पत्यभर्तृयुक्ताः तेन सापत्न्यादेः सधवायेइति प्रयोगे ज्ञेयः एतासु
सतीषु न तद्भर्तादेर्दानं द्वारलोपात् जायापिता श्वशुरः श्वश्रूरप्युपलक्ष्याः अत्र
मूलं स्मृतिचंद्रिकायां ज्ञेयं अत्र पार्वणैकोद्दिष्टव्यवस्थोक्ता हेमाद्रौ पुराणांतरे उपा
ध्यायगुरुश्वशुरपितृव्याचार्यमातुलाः श्वशुरभ्रातृतत्पुत्रपुत्रगर्त्विक्शिष्यपोष
काः भगिनीस्वामिदुहितृजामातृभगिनीसुताः पितरौ पितृपत्नीनां पितृमातृ
प्रपयस्वसा सखिद्रव्यदशिष्याद्यास्तीर्थे चैवं महालये एकोद्दिष्टविधानेन स्त्रज
नीयाः प्रयत्नतः इति इतरेषां पित्रादीनां पार्वणमपि सिद्धं अत्र क्रमान्यत्वे प्याचा

राद्यवस्था अशक्तो तु परपक्षीचंद्रोदये च तु विंशतिमते एकस्मिन्ब्राह्मणे सर्वाना
चादीन्प्रपूजयेत् दशाहादूर्ध्वं वापिंडान्दद्यादकरणं नन्तु एकोद्दिष्टस्वरूपं चाह याज्ञ
वल्क्यः एकोद्दिष्टं देवहीनमेकार्घ्यैकपवित्रकं आवाहनाग्नौकरणरहितं त्व
पसव्यं वदेति अत्रैकपाकोवैश्वदेवः तन्त्रं पिंडवहिश्चैकमिति स्मृत्यर्थसागरे उ
क्तं अग्न्यपाणिहोमः पिंडश्च द्विजांतिक इत्याह प्रयोगपारिजाते आचार्यः का
म्य मभ्युदये ष्टम्यामेकोद्दिष्टमथाष्टमं चतुर्थ्येष्ठ करे होमः पिंडश्चात्र द्विजांतिक
इति पार्वणैकोद्दिष्टयोः समानतंत्रत्वे अग्निसमीपएव अत्रधूरिलोचनौ वैश्व
देवौ अपि केन्यागते सूर्ये काम्ये च धुरिलोचनाविति हेमाद्रावादित्यपुराणात्
अत्र पूर्ति दिने भिन्नप्रयोगात्वादक्षिणाभेदो वा प्रयोगैकत्वादंते एव वा दक्षिणे
चेति कालहेमाद्रावुक्तं एतच्च संन्यस्तपितृकादिनाजीवत्पितृकेनापि कार्यं
वृद्धौ तीर्थे च संन्यस्ते ताते च पतिते सति येभ्य एव पिता दद्यात्तेभ्यो दद्यात्स्वयं सु
त इति कात्यायनोक्तेः यत्तु कौडिन्यः दर्शश्राद्धं गयाश्राद्धं श्राद्धं चापरपक्षिकं
नजीवत्पितृकः कुर्यात्तिलैस्तर्पणमेव चेति तत्संन्यस्तापित्राद्यातिरिक्तविष
यं काम्यश्राद्धपरं वा अत्र वहुवक्तव्यं मत्कृतजीवत्पितृकनिर्णये ज्ञेयं

एतच्चजीवत्पितृकेनपिंडरहितंकार्यं मुंडनंपिंडदानंचप्रेतकर्मचसर्वशः
नजीवत्पितृकःकुर्याद्गुर्विणीपतिरेवचेति दक्षेणतस्यपिंडनिषेधात् अ
त्रचषट्कृत्यामात्रवार्षिकादौनवचनाद्भवतीतिवक्ष्यामः तथाचागस्त्यः पिंडोय
त्रनिवर्तेतमघादिषुकदाचनसाकल्यंतुतदाकार्यंनियमाद्ब्रह्मवादिभिः साक
ल्यस्वरूपंचवक्ष्यते अत्रश्राद्धांगतर्पणंतुदिनेदिने सकृन्महालयेचैवपरे
द्युस्तिलोदकं गार्ग्योपि पक्षश्राद्धादिकरणेचप्रत्यहंतिलोदकमिति तथाप्रो
गप्यरजाते गर्गः कृष्णेभाद्रपदेमासिश्राद्धंप्रतिदिनंभवेत् पितॄणांप्रत्यहंका
र्यंनिषिद्धाहेपितर्पणं सकृन्महालयेयस्यादष्टकास्वंनएवहि इदंनिषिद्धदि
नेपिकार्यमिति पितृतीर्थेविशेषेणकार्यंप्रेतेचसर्वदेतिस्मृत्यर्थसारोक्तेः तीर्थेति
थिविशेषेचगयायांप्रेतपक्षकेनिषिद्धेपिदिनेकुर्यात्तर्पणंतिलमिश्रितमिति
स्मृतिरत्नावल्यांवचनाच्च एतच्चश्राद्धंमलमासेनकार्यंतदाहनागरः वृद्धिश्राद्धं
तथासोमंमगन्याधेयंमहालयं राजाभिषेकंकाम्यंचनकुर्याद्भानुलंघितेइति १
हेमाद्रौनागरखंडेपि नभोवाथनभस्योवामलमासोयदाभवेत् सप्तमःपितृ
पक्षःस्यादन्यत्रैवतुपंचमः एतच्चपित्रोर्मरणेप्रथमाब्देकृताकृतमितित्रिस्थलीसे

97A

तौभद्राः इदंचनित्यंकाम्यंपुत्रानायुस्तथारोग्यमैश्वर्यमनुलंतथा ।
प्राप्नोतिपंचमेदत्वाश्राद्धंकामांश्चपुष्कलानितिजाबालस्मृतेः हस्त्रिके समतिक्रां
तेपितरोदैवतैःसह निःश्वस्यप्रतिगच्छंति शापंदत्वासुदारुणमिति कार्ष्णाजिन
वचनाच्च तदतिक्रमेप्रायश्चित्तमुक्तंमत्रगविधाने दुरोऽत्रस्वस्यमंत्रंचदशमासद्विमा
सयोः महालयंयदाश्रूनंतदासंपूर्णमेतितदितिद्विमासयोः कन्यातुलयोः महा
लयश्राद्धंयदासीनमित्यर्थः अत्रभरण्यांश्राद्धमतिप्रशस्तं तदुक्तंपृथ्वीचंद्रो
दयेमात्स्ये भरणीपितृपक्षेतुमहतीपरिकीर्तिता अस्यांश्राद्धंकृतंयेनस
गयाश्राद्धकृद्भवेत् पृथ्वीचंद्रोदयेमौधरीयेबृहस्पतिः नभस्यापरपक्षस्य ।
द्वितीयायदियाम्यभे तृतीयाचाग्नितारा भिः सहिताप्रीतिदापितुः शातप
से षष्ठीयोगविशेषेण कपिलासंज्ञातदुक्तंवाराहे नभस्यकृष्णपक्षेतुरो
हिण्यांतुभरस्तुतेः युक्ताषष्ठीपुराणज्ञैः कपिलापरिकीर्तिता व्रतोपवासनिय
मैः भास्करंतत्रपूजयेत् कापिलांचद्विजाग्र्यायदत्वाक्रतुफलंभवेत् पुराणस
मुच्चये भाद्रेमास्यसितेतरपक्षेभानौचैववकारेस्थिते यातेकुजेच रोहिण्यांसाषष्ठी
कपिलाभवेत् अत्रदर्शांतत्वेनमहालयेभाद्रकृष्णपक्षयोः ज्ञेयः इत्युक्तं निर्ण

98

पापन्ते हेमाद्रौ च हस्तार्कसक्तफलानि शायायाप्यः संयोगे तु चतुर्वर्णो निर्दिष्टापरमे
ष्ठिनेति तत्रैवोक्तेः अत्र विशेषो हेमाद्रौ स्कांदे देवदारु तथैवोशीरं कुंकुम
मेला मनःशिलां पत्रकं पद्मकं षष्टीमधुगव्येन पेषयेत् क्षीरेणालोड्य ताकर
कैन स्नानं कुर्यात्समंत्रकं आपस्त्वमसि देवेश ज्योतिषां पतिरेव च पापं नाशय
मे देव वाङ्मनःकर्मकायजं पंचगव्यकृतस्नानैः पंचभंगैस्तु मार्जयेत् पंच
भंगैः पंचपल्लवैः तथा रत्नैर्नानाविधैर्युक्तं सौवर्णं कारयेद् द्वि शक्तितस्तथा
लाहृद्धं तदर्धं कर्षतोपि सौवर्णमरणं कुर्यान्नौकां चैव तथा रथो तथाल्पवि
त्तोपि यः कश्चित्सोपि कुर्यादिमं विधिं प्रभासखंडे स्थापयेद्व्रणं कुंभं चंद
नोदकपूरितं रक्तवस्त्रयुगच्छन्नं ताम्रपात्रेण संयुतं रथो रौक्मपलस्यैव
णकचक्रः स्वचिजितः सौवर्णपलसंयुक्तां मूर्तिं सूर्यस्य कारयेत् ततः स्वर्ण
कपिलां च षोडशोपचारैः संपूज्य दद्यात् दिव्यमूर्तिर्जगच्चक्षुर्द्वादशात्मा दिवा
करः कपिलासहितो देवो मम मुक्तिं प्रयच्छतु तस्मात्त्वं कपिले पुण्या सर्व
लोकस्य पावनी प्रदत्ता सह सूर्येण मम मुक्तिप्रदा भवेति विशेषांतरं तत्रैव ज्ञेय
मिति दिक् इत्थमेव चंद्रषष्ठीव्रतं चंद्रोदयव्यापिनी ग्राह्या उभयत्र तथात्वे

98A

पूर्वा तदुक्तं भविष्ये तद्वद्भाद्रपदे मासि षष्ठ्यां पक्षे सिते परे चंद्र[illegible]षष्ठी व्रतं कुर्या
त्पूर्ववेधः प्रशस्यते चंद्रोदये यदा षष्ठी पूर्वाह्ने वापरेहनि चंद्रषष्ठ्यां सिते पक्षे
सैवोपोष्या प्रयत्नत इति अष्टम्यामाश्लेषायतेन माघावर्षसंज्ञं श्राद्धमुक्तं एते
न माघावर्षं प्रोष्ठपद्या अपरपक्ष इति इदं सप्तम्यादिषु त्रिषु अहःसु कार्यमिति
नारायणवृत्तिः हरदत्तस्तु मघायुक्तवर्षासु भवं त्रयोदशी श्राद्धमिति व्याच
ष्टे ष्टीचंद्रोदये व्याप्ता आषाढ्याः पंचमे पक्षे गयायां मघाष्टमी स्मृता त्र
योदशी गजच्छायायां गयायां तुल्यां तुल्यां तु पेटकैः आश्विन कृष्णाष्टम्यां महा
लक्ष्मीव्रतं तत्र निर्णयामृते पुराणसमुच्चये श्रियार्चनं भाद्रपदे सिताष्टमी प्रा
रभ्य कन्यामगते च सूर्ये समापयेत्तत्र तिथौ च यावत्सूर्यस्तु पूर्वार्धगतो तु च स्या
इति तत्रैव कन्यागते र्के प्रारभ्य कर्त्तव्यं निश्रियोर्चनं हस्तप्रोतदलस्थे र्के तद्व्रतं न
समापयेत् पत्नजनीयाम् हस्तानामष्टमी प्राह विश्रियः दोषैः मतुभिः संत्य
क्ता सर्वसंपत्करीति स्त्रिः पुत्रसौभाग्यराज्यायुः नाशिनी सा प्रकीर्तिता तस्मा
त्सर्वप्रयत्नेन त्याज्या कन्यागते रवौ विशेषेण परित्याज्या नवमी दूषिता यदीति दो
षवचनद्वयं तत्रैवोक्तं त्रिदिने चावमे चैव अष्टमीं नोपवासयेत् पुत्रहा नवमी

विद्धास्यच्छ्रीहस्तार्द्धे[illegible]र्धगे रवाविति त्रिदिनाचसदिनलक्षणं रत्नमालायां यत्रै
कः स्पृशति तिथित्रयावसाने वारस्त्रेदवमदिनं तदुक्तं माधवैः यः स्पर्शाद्भवति ति
थित्रयस्य चाद्योऽत्रिघुस्पृक्कथितमिदं द्वयं च नेष्टं एते च सर्वे निषेधाः प्रथम
मारंभविषयाः मध्ये तु सति संभवे ज्ञेयाः व्रतस्य षोडशाब्दसाध्यत्वेन मध्ये
त्यागायोगात् इयं चंद्रोदयव्यापिनी ग्राह्या तत्रैव पूजायुक्तेः परदिने चंद्रोद
याद्दूर्ध्वं त्रिमुहूर्त्तव्यापित्वे परैव कार्या अन्यथा पूर्वैव पूर्वा वापरविद्धा वा
ग्राह्या चंद्रोदये सदा त्रिमुहूर्त्तापि सा पूज्या परतश्चार्धगामिनीति मदनर
त्ने निर्णयामृते च संग्रहोक्तेः अर्धरात्रिमतिक्रम्य वर्त्तते यो तु रात्रि तिथिः तदा त
स्यां तिथौ कार्यं महालक्ष्मीव्रतं सदेति वचनाच्चेति संक्षेपः इति महालक्ष्मीव्रतनि
र्णयः अथ नवम्यामन्वष्टकाश्राद्धं तत्र कात्यायनः अन्वष्टकासु नवभिः पिंडैः श्रा
द्धमुदाहृतं पित्रादि मातृमध्यं च ततो मातामहांत[illegible]कं अन्वष्टक्ये क्रमः स्मृतः आ
पृथ्वीचंद्रोदये ब्रह्मांडे पितॄणां प्रथमं दद्यान्मातॄणां तदनंतरं ततो मातामहा
नां च अन्वष्टक्ये क्रमः स्मृतः श्राद्धहेमाद्रौ छागलेयः केवलास्तु [illegible]ये का
र्या वृद्धावादौ प्रकीर्तिताः अन्वष्टकासु मध्यस्था नान्या कार्यास्तु मातरः दी

११A

यिकार्यान्तु मातामहश्राद्धमादौ कार्यमित्युक्तं मातृयजने त्वन्वष्टकास्वादितः हेमाद्रौ ब्रा
ह्मेपि अन्वष्टकासु क्रमशो मातृपूर्वं तदिष्यते इति अत्र शाखाभेदेन व्यवस्थेति
पृथ्वीचंद्रोदयः जीवत्पितृकविषयमिति निर्णयदीपः इदं च जीवत्पितृकेणा
पि कार्यं तदुक्तं निर्णयामृते मैत्रायणीयपरिशिष्टे अन्वष्टक्यं गयाप्राप्तौ सत्यां
पत्यस्तेहनि मातुः श्राद्धं सुतः कुर्यात्पितर्यपि च जीवतीति यद्यपि जीवत्पि
तृकस्य पंचाप्यन्वष्टका अवश्यकर्तव्यास्तथाप्यपराह्नस्येयमावश्यकी
योन्वष्टपद्यष्टकास्वयः पितृलोके भविष्यतीति हेमाद्रौपायोक्तः सर्वासामे
व मातॄणां श्राद्धं कन्यागते रवौ नवम्यां प्रदातव्यं ब्रह्मन्नन्नगवराय तदिति स्मृते
नावश्यकत्वोक्तेश्च अत्र सर्वासामित्युक्तेः स्वमातरि जीवंत्यामपि सपत्नमा
तृभ्यो दद्यात् तन्मरणेसति तस्येतास्यश्च दद्यादित्युक्तं जीवत्पितृकनिर्णयग्र
तभिः अत्र सर्वासां नामनिर्देशेनैकोद्दिष्टविधिः पिंडस्तु नामैकेषु द्विवचनादि
प्रयोग इत्युक्तं नारायणवृत्तौ अन्वष्टक्यश्राद्धं तथा गायत्र गोभिलीयानां म
ध्यमायामेव न सर्वासु अन्वष्टक्यं मध्यमायामिति गोभिलगौतमाविति
छंदोगपरिशिष्टात् अत्र भर्तुर्मरणोत्तरं पूर्वमृतमातृश्राद्धं न कार्यमिति

नि०सिं०
१००

100

केचिदाहुः पठंति च श्राद्धं नवम्यां कुर्यान्न नष्टे भर्तरि त्यज्यते इति तदेतन्
न्निर्मूलत्वात्सर्वे[illegible]प्रतारणमात्रं श्राद्धदीपकलिकायां शूले पितृमातृ
कुलोत्पन्नायाः कश्चिन्नसन्तास्त्रियः तदुक्तं श्राद्धशूलपाणौ मात्स्ये अमा
वास्याष्टकासु सपक्षपंचदशीषु चेत्यभिधाय एतच्चानुपनीतोपि कुर्यात्स
र्वपर्वसु श्राद्धं साधारणं नाम सर्वकामफलप्रदं भार्याविरहितोप्येतत्प्र
वासस्थोपि नित्यशः शूद्रोप्यमंत्रवत्कुर्यादनेन विधिना बुधः इति तेन साग्ने
र्गृहे गत्वा वेदमिति परास्तु अन्वष्टकातः पृथगेवेदं मातुः श्राद्धमित्यपि पर
रास्तु लाघवेन मूले क्वाप्यष्टकापदाविशेषाच्च तेन अन्यत्र अष्टकाश्राद्धस्यां
गस्यापि अत्र प्रधानत्ववचनात् तथाग्निपुराणे अन्वष्टकासु वृद्धौ च गयायां च
क्षयेहनि अत्र मातुः पृथक् श्राद्धं अन्यत्र पतिना सह आपस्तंबानां त्वष्टकासु च
वृद्धौ चेति भाष्यकारैः पाठादष्टकायां मातृश्राद्धं छंदोगैस्त्वत्र मातृमातामहश्रा
द्धेन कार्यं किंतु त्रिपुरुषमेव तथा मत्स्यः षट्पदादवसानदिनादिते क[illegible]
समन्वितं भुक्त्वा तथाद्यं श्राद्धं षोडशं प्रत्याब्दिकं वर्षे षोडश पिंडास्तुः षडिति स्थि
तिरिति छंदोगपरिशिष्टात् अन्वष्टकासु तेषां कर्षूविधानादिति शूलपाणिः

100A

यत्तु तन्निरस्तमथ च नवमी मुख्या भाद्रपदे स्त्रिया चत्वारः पार्वणाः कार्याः पितृपक्षे
मनीषिभिरिति तद्देशाचारतो व्यवस्थितं ज्ञेयं इदं जीवत्पितृकेनापि सपिंडकं
कार्यं हेमाद्रौ विष्णुधर्मोत्तरे अन्वष्टकासु च स्त्रीणां श्राद्धं कार्यं तथैव चेत्युपक्र
म्य पिंडनिर्वपनं कार्यं तत्र स्याम पितृसत्तमेति वचनं श्राद्धविधिना पिंडदाने प्राप्ते
पुनरुत्कीर्तनं यस्य जीवत् पितृ गर्भिण्यां पतित्वादि पिंडदानं निषिद्धं तस्य तत्प्रा
प्त्यर्थमिति श्रीतातचरणाः अत्र सुवासिनी भोजनमुक्तं मार्कंडेयपुराणे मातुः श्राद्धे
तु संप्राप्ते ब्राह्मणैः सह भोजनं सुवासिन्यै प्रदातव्यमिति शातातपोऽब्रवीत् भर्तुरग्रे मृ
ता नारी सह दाहेन वा मृता तस्याः स्थाने नियुंजीत विप्रैः सह सुवासिनी तत्रैव मदाल
सावाक्यं स्त्रीश्राद्धपुत्रदेयाः सुरलंकाराश्च योषिते मंजीरमेखलादामकर्णिका
कंकणादय इति अत्रैशाज्ञावत्कल्पमाह स्वलायनः अन्वष्टुहोपवसमासरेदग्निना
वाकक्षमपोषे देशामेष्टके तिनत्चेवानष्टकः स्यादिति हेमाद्रौ पितामहः अमावा
स्याव्यतीपातयोर्णमास्यष्टकासु च विद्वान् श्राद्धमकुर्वाणो नरकं प्रतिपद्यते अ
करणे च प्रायश्चित्तमुक्तं मदनविधाने एभिश्चभिर्जपेन्मंत्रं शतवारं तु तद्दिने

आन्वष्टकं च पक्षश्राद्धं संपूर्णियाति सर्वथेति एतत्पक्षे द्वादश्यां विशेषः पृथ्वी
चंद्रोदये वायवीये संन्यासिनोप्याब्दिकादि पुत्रः कुर्याद्यथाविधि महालयेतुय
च्छ्राद्धं द्वादश्यां पार्वणेन तु तदिति अथ त्रयोदशीश्राद्धं तत्र चंद्रिका त्रयोदशीभाद्र
पदी का मघासु रव्यापिस्तृप्रिया तृप्यंति पितरस्तस्यां सुचर्यंपं च शतं शरामाः मघासु
तायां तस्यां तु जलाद्यैरपि तोषिताः तृप्यंति पितरस्तद्वद्वर्षाणामयुतानृप प्र
योगपारजाते शंखः प्रोष्ठपद्यामतीतायां मघायुक्तां त्रयोदशीं प्राप्य श्राद्धं तु कर्तव्यं
मधुना पायसेन च प्रजामिष्टां यशः स्वर्गमारोग्यं च धनं तथा नृणां श्राद्धे सदा प्री
ताः प्रयच्छंति पितामहाः एतन्नित्यमपि पृथ्वीचंद्रे विष्णुधर्मे प्रोष्ठपद्यामतीतायां त
था कृष्णा त्रयोदशी तु स्थितो एतास्तु श्राद्धकालान्वै नित्यानाह प्रजापतिः श्राद्धमेते
ष्व कुर्वाणो नरकं प्रतिपद्यत इत्युक्तेः एतच्चाविभक्तैरपि पृथक्कार्यं तथा च हेमा
द्रौ विभक्ता विभक्ता वा कुर्युः श्राद्धं पृथक्सुताः मघासु च ततोन्यत्र नाधिकारः पृथ
ग्विनेति अपरार्के वायवीये संसेहस्तस्थिते यातु मघायुक्ता त्रयोदशी तिथिर्वैवस्व
ती नाम सा छाया कुंजरस्य तु अत्र चान्नपिनः सकृत्से भ्रत्या प्रोनोद्यात्रयोदशी पायसं
मधुसर्पिर्भ्यां प्राक्छाये कुंजरस्य चेति विष्णुमनुवचने केवलत्रयोदशी श्रुते

मघायांतु इति कल्पतरुः मूलपाणिस्तु केवलवाक्यानामर्थवादत्वाद्विधौ च
मघायोगश्रुतेर्विधिलाघवाद्विशिष्टमेव निमित्तमित्याह वस्तुतस्तु मधुमांसैश्च
शाकैश्च पयसा पायसेन च एषनो दास्यति श्राद्धं वर्षासु च मघासु चेति विशिष्टवच
ने केवलमघाश्रुते विनिगमकाभावादुभयं भिन्नं निमित्तं पूर्वोक्तवचनाच्च योगापि
केपफलाधिक्यं अत एव याज्ञवल्क्यः वर्षात्रयोदश्यां मघासु च विशेषतः इति त्रयोदशी
श्राद्धं नित्यं अन्यत्काम्यं अत्र त्रयोदश्यां बहुपुत्रपुत्रमारिणस्तु भवेत्ति इत्यापस्तंबो
क्तेः पुत्रमारित्वमपत्यदोषसहितमौरपत्यमात्रार्थिनः सत्यंतरोक्तधनार्थिनो वाधि
कार इति कल्पतरुः अपत्यनिंदया तदर्थिनोनधिकारात्फलंतरकामस्यैवाधिकार
इति हलायुधः एतत्पिंडरहितं कार्यं मघायुतात्रयोदश्यां पिंडनिर्वपणं द्विजः ससंता
नो नैव कुर्यान्नित्यं ते कवयो विदुः इति बृहस्पतिपराशरोक्तेः इदं मलमासेपि कार्यं मघा
त्रयोदशीश्राद्धं प्रत्युपस्थितहेतुकं अनन्यगतिकत्वेन कर्तव्यं स्यान्मलिम्लुचे इति पाठ
कमलाकरोक्तेः यानि तु अंगिराः त्रयोदश्यां कृष्णपक्षे यः श्राद्धं कुरुते नरः पंचत्वं तस्य
ज्ञातीया ज्येष्ठपुत्रस्य निश्चितं वामनपुराणे त्रयोदश्यां तु वै श्राद्धं न कुर्यात्पुत्रवान्गृही
त्यादीनि वचनानि पुत्रविद्विषयाणि वा महालयस्याभिन्नत्रयोदशीविषयाणि वा काम्य।
श्राद्धविषयाणि वा सपिंडकश्राद्धविषयाणि चेति केचित् हेमाद्रिप्रमुखास्त्वेकवर्गी

श्राद्धविषयाणि श्राद्धं नैवैकवर्गस्य त्रयोदश्यामुपक्रमेत् नत्रप्रास्तत्रये यस्य प्रजां
हिंसंति तस्य ते इति कार्ष्णाजिनस्मृतेः यद्यपि पितरो यत्र पूज्यंते तत्र मातामहा अपीति धौ
म्याक्तेर्न केवलपितृवर्गस्य प्राप्तिस्तथाप्यमाताहादिप्राप्तनिषेधोयं पितृव्यादिसर्वश्राद्धप(
रो वेत्याहुः वयं तु पश्यामः पुत्रवद्विषयाण्येवेति असंतानस्तु यस्तस्य श्राद्धे प्रोक्ता
त्रयोदशी संतानयुक्तो यः कुर्यात्तस्य वंशक्षयो भवेदिति हेमाद्रौ नागरखंडोक्तेः
पूर्ववाक्यमप्यसंतानस्यैवैकवर्गनिषेधकमिति अत्र मघात्रयोदशी महालयपु
गादिश्राद्धानां तंत्रेण प्रयोगः न तु प्रसंगसिद्धिरिति अन्यत्र विस्तरः अथ चतुर्दशी
पर्वीचंद्रोदये प्रचेताः वृक्षारोहणलोहाद्यैर्विद्युज्ज्वालाविषाग्निभिः नखिदंष्ट्रि(
विपन्नानां तेषां शस्ता चतुर्दशी ब्राह्मे युवानः पितरो यस्य मृताः शस्त्रेण वा हताः
तेन कार्यं चतुर्दश्यां तेषां तृप्तिमभीप्सिता नागरखंडे अपमृत्युर्भवेत्येषां शस्त्र
मृत्युरथापि वा श्राद्धं तेषां प्रकर्तव्यं चतुर्दश्यां नराधिप मरीचिः विषशस्त्रश्वाप
दाहितिर्यग्ब्राह्मणघातिनां चतुर्दश्यां क्रिया कार्या अन्येषां तु विगर्हिता अ(
त्र ब्राह्मणघाती तेन हतो न तु ब्राह्महा तस्य पतितत्वादिति शूलपाणिः अत्रैकदेश्यवि
शेषणस्याविवक्षितत्वात् स्त्रीणामपि शस्त्रादिहतानामेकोद्दिष्टं कार्यमिति श्री(
दत्तोपाध्यायाः पक्षशाकटायनः जलाग्निभ्यां विपन्नानां संन्यासे वा गृहे पथि (

५ तच्छ्राद्धं पितृगणाम सर्वं भवेत् तच्छ्राद्धं दैवहीनं चेत्सुत्रदारधनक्षयः एकोद्दिष्टं ५×

श्राद्धं कुर्वीत न तेषां नैव वर्ज्यो पितृत्वाच्चतुर्दशीमिति तत्र प्रायश्चित्तार्थजलादिमृतवि
वतमित्याकारे उक्तं अत एव वैधत्यास्सहगमने पि न कार्यमिति हेमाद्रिः एतच्चदै
वयुक्तमेकोद्दिष्टं कार्यमित्युक्तं प्रयोगपारिजाते प्रेतपक्षे च चतुर्दश्यामेकोद्दिष्टं
विधानतः दैवयुक्तमित्येवं मनुरब्रवीत् भविष्ये पि समत्वमागतस्यापि पितुः
शस्त्रहतस्य च चतुर्दश्यां तु कर्तव्यमेकोद्दिष्टं महालये चतुर्दश्यां तु यच्छ्राद्धं सपि
ण्डीकरणे कृते एकोद्दिष्टविधानेन तत्कार्यं शस्त्रघातिन इति संवत्सरप्रदीपे हा
रीतः विश्वेदेवाश्च तत्रापि पितृजित्पित्वादिति मूलात् ये वै शस्त्रहतास्तेषां श्राद्धं कु
र्यात दंष्ट्रितः अत्रैकोद्दिष्टवचनानां निर्मूलत्वं समूलत्वे पि पार्वणेन शाकिपरा
णि विश्वादिवचनैः प्रकरणात्कामयमर्णीय पार्वणावगतेरिति शूलपाणिः
तत्र वाक्येन प्रकरणस्य बाधात् पित्रादीनां पार्वणं भ्रात्रादीनामेकोद्दिष्टमिति
गौडावाचः तत्र पितुरेत्यनेन विरोधात् विशेषवाक्यैर्वैयर्थ्यापत्तेश्च अतः
पूर्वोक्तमेव साधु अत्र शस्त्रहतस्यैव चतुर्दश्यामिति नियमो न तु चतुर्दश्यामेव
शस्त्रहतस्येति श्राद्धं शस्त्रहतस्यैव चतुर्दश्यां महालये इति कालादर्शात् वार्षिका
दीनामकरणोपपत्तेश्च तेन महालये एव दिनान्तरे पार्वणे मातामहादिना प्रप

कार्यमेव पितामहयोपि शस्त्रहतत्वे एकोद्दिष्टद्वयं कार्यं तदुक्तं हेमाद्रौ स्मृत्यंत
रे एकस्मिन्द्वयोर्वैकोद्दिष्टमिति त्रिषु शस्त्रहतेषु पार्वणमेव कार्यं यत्तु देव
स्वामिनोक्तं त्रिष्वपि शस्त्रहतेषु पृथगेकोद्दिष्टत्रयं कार्यं न तु पार्वणमाहप्र
त्यवचनाभावादिति तदयुक्तं पित्रादयस्त्रयो यस्य शस्त्रैर्यातास्त्वनुक्रमात् स
भ्रते पार्वणं कुर्यादाब्दिकानि पृथक्पृथगिति बृहत्पराशरोक्तेः एकस्मि
न्वा द्वयोर्वापि विषशस्त्रेण वा हते एकोद्दिष्टं सुतः कुर्यात्पार्वणं दर्शवद्भवे
दिति स्मृत्यंतराच्चेति पृथ्वीचंद्रोदये उक्तं अपरार्के हेमाद्रौ चैवं यस्त्वत्रैव श
स्त्रादिना हतस्य वार्षिकमेव पार्वणमेकोद्दिष्टं वा कार्यं न तु श्राद्धद्वय प्रसंगे
सिद्धेरिति पृथ्वीचंद्रोदये अत्र श्राद्धाकरणे अग्निमपक्षे दिनांतरे पार्वणेनैव का
र्यमिति तत्रैवोक्तं यद्यपि शस्त्रविषहतानां च शृंगिदंष्ट्रिसरीसृपैः आत्मन
स्त्यागिनां चैव श्राद्धमेषां न कारयेदिति छागलेयोक्तेः शस्त्रादिहतानां श्राद्धं निषि
द्धं तथापि प्रमादमृतानां श्राद्धार्हत्वात्कार्यं ब्रह्मादिभिन्नबुद्धिपूर्वमृतानां तु
कार्यं यत्तु चतुर्दश्यां तर्पणीयास्तु सपिंडोदकक्रिया इति प्रालं तद्बुद्ध्यैणमि

103A

तिस्मलयाशिः लक्षणाया मानाभावान्नतितेनापि कर्त्तव्यं पतितस्य चेतिग
यादिवद्विशेषविधिबलात्पतितानामपि कार्यमिति नव्यगौडाः तत्त्वं तु समत्वमार
गतस्येत्यादिवचनात्तेन क्रियाएणं कार्यं नान्येषामिति वयं प्रतीमः यत्तु मनुः न
पैतृयज्ञियो होमो लौकिकाग्नौ विधीयते न दर्शेन विना श्राद्धमाहिताग्नेर्विधी
यते इति अत्र अपर्वाह्णे तत्त्वेनोक्तं तद्यथाक्रतमेव मन्यन्ते यच्छ्रीचंद्रोदयः आहि
ताग्नेः पितृयज्ञकल्पेन श्राद्धनिषेधार्थमिदं न तु सांकल्प्यादेरपीत्यस्मद्गुरवः क्ष
यपक्षश्राद्धमन्वादिनैव प्राप्तमाहिताग्नेर्दर्शे नियम्यते इति तत्त्वं दर्शेन पार्वणे
न विना श्राद्धं न तेन क्षयाविवार्षिकादौ एकोद्दिष्टं नेति हारीहरः इति चतुर्दशी अ
मायां विशेषमाहापरार्के यमः हंसेकास्थितेयातु अमावास्या करान्विता सा ज्ञेया
कुंजरच्छायेति बौधायनोऽब्रवीत् भारते अजेन सर्वलोहेन वर्षास्तु नियतव्रतः
दि
हस्तिच्छायासु विधिवत्कर्णव्यजनवीजितं श्राद्धं दद्यादिति विशेषः आश्विन
कृष्णप्रतिपदि दौहित्रस्य मातामहश्राद्धमुक्तं हेमाद्रौ संग्रहे जातमात्रोपि दौहि
त्रो विद्यमानेपि मातुले कुर्यान्मातामहश्राद्धं प्रतिपद्याश्विने सिते इति इदं संगवव्या
पिनी ग्राह्येति निर्णयदीपे उक्तं प्रतिपद्याश्विने कृष्णे दौहित्रस्त्वेकपार्वणं श्राद्धं मा

तामहंकुर्यात्सपिंडतां संगवे सदा जातमात्रोपिदौहित्रोजीवत्यपिचमातुले प्रातःसंग
वयोर्मध्ये श्राद्धस्य प्रतिपद्भवेदितिवचनात् अत्रसमूलत्वं विमृश्यं इदंचमल
मासेनकार्यं स्पष्टमासविशेषाख्याविहितं वर्जयेन्मलेइतिनिषेधात् इदंच
जीवत्पितृकेनैवकार्यमितिशिष्टाः इदंचशिष्टाचारात्सापिंडकंकार्यमितिके
चित् पिंडरहितंतदयुक्तंजीवत्पितृकस्य मुंडने पिंडदानेचप्रेतकर्मचसर्वशः
नजीवत्पितृकःकुर्यात् गुर्विणीपतिरेवचेति दक्षेणपिंडनिषेधात् अत्रान्व
ष्टक्यचविशेषवचनाभावाच्चेतिसंक्षेपः इतिश्रीकमलाकरभट्टकृतेनि
र्णयसिंधौ महालयनिर्णयः अथाश्विनशुक्लप्रतिपदि नवरात्रारंभस्तन्नि
र्णयः तत्रभार्गवार्चनदीपिकायां देवीपुराणे सुमेधाउवाच शृणुराजन्
प्रवक्ष्यामिचंडिकायाः जननक्रमं आश्विनस्यासितेपक्षे प्रतिपत्सुशुभेदिनेइ
त्युपक्रम्योक्तं शुद्धतिथौप्रकर्तव्यं प्रतिपच्चोर्ध्वगामिनी आद्यास्तुनाडिकाः
त्यक्त्वाषोडशद्वादशापिवा किंचिन्मुहूर्तमात्रेऽप्यपराह्णेचकर्तव्यं शुद्धसंतति
कांक्षिभिः इदंचापराह्णयोगिन्याः प्रशस्तं द्वितीयदिने प्रतिपदोऽभावे ज्ञेयं
यदासूर्योदये प्रतिपद्भवति तदापरैव तथा तत्रैव देवीपुराणे डामरतंत्रेच

104A

देवीवाक्यं अमायुक्ता न कर्त्तव्या प्रतिपत्पूजने मम मुहूर्त्तमात्रा कर्त्तव्या द्वि
तीयादिगुणान्विता आद्याः षोडशनाडीस्तु लब्ध्वा यः कुरुते नरः कलशस्था
पनं तत्र ह्यरिष्टं जायते ध्रुवं मार्कंडेयदेवीपुराणयोः एवं विद्वान्यदा त्व
न्ना भवेत्प्रतिपदाश्विनी नवरात्रव्रतं तस्यां न कार्यं शुभमिच्छता देशभं
गो भवेत्तत्र दुर्भिक्षं चैव जायते नंदायां दर्शयुक्तायां यत्र स्यान्मम पूजनं इति स्कां
देपि प्रतिपद्याश्विने मासि सा प्रशस्ता शुभदा भवेत् भाद्रपंचदशीक्ष्मानंदायुक्ता
न शस्यते विरुद्धफलदा साहि पुत्रदारभयावहेति तथा वर्जनीया प्रयत्नेन
अमायुक्ता तु पार्थिव द्वितीयादिगुणोपेता प्रतिपत्सर्वकामदा तथा देवीपु
राणे यो मां पूजयते नित्यं द्वितीयादिगुणान्वितां प्रतिपच्छारदीं ज्ञात्वा सो
ऽश्नुते सुखमव्ययं यदि कुर्यादमायुक्तप्रतिपत्स्थापनं मम तस्य संपद्विनाशः
स्यात् ज्येष्ठः पुत्रो विनश्यति अमायुक्ता न कर्त्तव्या प्रतिपच्चंडिकार्चने धनार्थि
भिर्विशेषेण वंशहानिः प्रजायते नदर्शकलया युक्ता प्रतिपच्चंडिकार्चने
उदये द्विमुहूर्त्तापि ग्राह्या सोदयगामिनीति देवीपुराणे याचाश्वयुजि मा
से स्यात्प्रतिपद्भद्रयान्विता शुद्धा मम मार्च्चनं तस्यां शतयज्ञफलप्रदं रुद्रयामले

अमायुक्ता सदा चैव प्रतिपन्निंदिता मता तत्र चेत्स्थापयेत्कुंभं दुर्भिक्षं जाय
ते ध्रुवं प्रतिपत्सद्वितीयायां तु कुंभारोपणकर्मणि इति यद्यपि तद्रूपामलेंशम
रंच निर्मूलं तथाप्यविरोधात्प्रचाराच्चैतद्वचनानि लिख्यंते तिथितत्वे देवी
पुराणेपि प्रातरावाहयेद्देवीं प्रातरेव प्रवेशयेत् ततः प्रातश्च संपूज्य प्रातरेव वि
सर्जयेत् तत्रैव शरत्काले महापूजा क्रियते या च वार्षिकी सा कार्योदयगामिन्या
न तत्र तिथियुग्मता तथा कुहूकाष्टोपसंयुक्तां वर्जयेत्प्रतिपत्तिथिं राज्यनाशा
यया प्रोक्ता निंदिता वाप्यपूजने इति शंभुवचनेषु कलशस्थापने ग्रहणान्न देवप्र
थमदिने निषिध्यते तत्रूपवासादि तस्य प्रतिपद्यमावास्येति युग्मवाक्या
त् शुक्लास्य प्रतिपत्तिथिः प्रथमेतर इति दीपिकोक्तेः शुक्लपक्षे दर्शविद्धेति मा
धवोक्तेश्च पूर्वदिने प्राप्तस्य बाधे मानाभावादिति केचित् वस्तुतः पूर्वोक्तवा
क्येषु चंडिकार्चनपूजनग्रहणादुपवासादेश्चांगत्वात्प्रधानदेवीपूजादाव
पि परेति युक्तं कलशस्थापनग्रहणं तदुपलक्षणं अत एव देवलः व्रतोपवा
सनियमे घटिकैकापि या भवेत् सा तिथिस्तद्दिने पूज्या विपरीतां तु वर्जयेत् के
इति अत्र घटिकामुहूर्तं इति गौडाः यदा तु पूर्वदिने संपूर्णाग्रे च भूत्वा

105A

परदिने वर्धते नवदा संस्पर्शित्वात्समायोगाभावाच्च पूर्वैव यानि च द्वितीयायोग
ति वेधकानि वचनानि केचित्पठंति तान्यपि स्मृत्यधिक निवेधपराणि पर
दिने प्रतिपदो त्र्यंशताऽसत्वे तद्दर्शयुतापि पूर्वैव ग्राह्या तदाह लल्लः तिथिः शरीरं
तिथिरेव कारणं तिथिः प्रमाणं तिथिरेव साधनमिति यानि त्वमायुक्ताप्रक
र्त्तव्येत्यादीनि नृसिंहप्रसादेन वचनानि तानि समूलत्वे सद्येतद्विषयाणि
अत्रेदं तत्त्वं पूर्वोक्तवाक्यानां सर्वेषां हेमाद्याद्युलिखितत्वेन निर्मूलत्वापत्ते
स्त्वान्यनिर्णयस्यानुक्तेः सामान्यनिर्णयात्पूर्वैव प्राप्तावपि गौडनिबंधेषु वि
शेषनिर्णयादौदयिकी ग्राह्या तत्रापि घटिकैकेन्यस्य द्विमुहूर्त्तस्मृतित्वोक्ते
र्द्विमुहूर्त्ता ग्राह्या उदते दैवतभानाविन्यत्र द्विमुहूर्त्तात्रिरकृष्णेति औदयिक्या
द्विमुहूर्त्तत्वनियमात् तेन उदये द्विमुहूर्त्तापीत्याद्यनुसारोपि मुहूर्त्तमात्राकर्त्ते
व्येति तद्द्विमुहूर्त्तस्मृतिः अन्यथा द्विमुहूर्त्तविधिवैयर्थ्यात् केचित्तु मुहूर्त्तमा
त्रेति वचनात्तत्तोन्यमन्यंतत्वे परानेत्याहुः गौडास्त्वप्येवं अत्र देवीपूजैव प्रधानं
उपवासादि त्वंगं अष्टम्यां च नवम्यां च जगन्मातरं शिविकां पूजयित्वाश्विने मा
सि विशोकोजायते नरः इति हेमाद्रौ भविष्योत्तरस्याष्टमीव फलकत्वं धात् नवमीति

ए

नि॰सिं॰
१०६

106

यियं यत्तं त्वध्यायपूजाजयादिकमिति तत्रैव देवीपुराणे च शरत्काले महापूजा
क्रियते या च वार्षिकी इति मार्कंडेयपुराणे च एवं वचनादष्टमीनवमीपूजैव
प्रधानमन्यत्सर्वमंगमिति गौडाः एकाहपक्षोपि कालिकापुराणे यत्त्वेक
स्यामष्टम्यां नवम्यामथ साधकः पूजयेद्वरदां देवीं महाविभवविस्तरैरिति
रूपनारायणीये तु देवीपुराणे महानवम्यां पूजेयं सर्वकामप्रसाधिका सर्वेषु
वत्सवर्णेषु तव भक्त्या प्रकीर्तिता कृत्वाप्नोति यशो राज्यं पुत्रायुर्धनसंपदः सा
त्त्विकाम्या नित्या च एवमन्यैरपि तथा देव्याः कार्यं प्रपूजनं विभूतिमतुलां ल
ब्धुं चतुर्वर्गप्रदायकमिति यो मोहादथवालस्याद्देवीं दुर्गां महोत्सवे न पूजय
ति दंभाद्वा द्वेषाद्वाप्यथ भैरवं क्रुद्धा भगवती तस्य कामानिष्टान्निहंति वै इति
कालिकापुराणे फलनिंदाश्रुतेः वर्षे वर्षे विधातव्यं स्थापनं च विसर्जन
मिति तेषां नित्यत्वे देवीपुराणे च अत्रोपवासादिकमुक्तं हेमाद्रौ भविष्ये एवं च
विंध्यवासिन्यां नवरात्रोपवासतः एकभक्तेन नक्तेन तथैवायाचितेन च पूजनी
या जनैर्देवी स्थाने स्थाने पुरे पुरे गृहे गृहे शक्तिपरैर्ग्रामे ग्रामे वने वने स्नातैः प्र
मुदितैर्हृष्टैर्ब्राह्मणैः क्षत्रियैर्नृपैः वैश्यैः शूद्रैर्भक्तियुक्तैर्म्लेच्छैरन्यैश्च मानवैः स्त्रि

106A

त्रि चन्द्ररूप नारायणी पे भाविष्ये ध्वं नानानाल्होपगणैः पूज्यते सर्वदस्युभिरिति
तन्नामसमपूजापरं विनामंत्रैस्तामसी स्यात्किरातानां तु संमतेति तत्रैवोक्तेः म
दनरत्ने देवीपुराणेपि कन्यासंस्थे रवौ शक्र शुक्लामारभ्य नंदिकां अयाची ह्येक
वै काशी नक्ताशी वाथ वायदः भूमौ शायीत चाम ष्य कुमारी भोजयेन्मुदा वस्त्रा
लंकारदानैश्च संतोष्या प्रतिवासरं वलिं च प्रत्यहं दद्यादोदनं मांसमाषवत् त्रि
कालं पूजयेद्देवीं जपस्तोत्रपरायणः इति नंदिका प्रतिपदि तिथिर्पिलाः षष्ठी
ति गौडः तच्च पूजनं रात्रौ कार्यं आश्विने मासि मेघांते महिषासुरमर्दिनी १
निशास्तु पूजयेद्भक्त्या सोपवासादिकः क्रमादिति देवीपुराणात् संग्रहेपि १
आश्विने मासि मेघांते प्रतिपद्यां तिथिर्भवेत् तस्यां नक्तं प्रकुर्वीत रात्रौ देवीं
च पूजयेत् रात्रिरूपा यतो देवी दिवारूपो महेश्वरः रात्रिव्रतमिदं देवी सर्वपा
पप्रणाशनं सर्वकामप्रदं नॄणां सर्वशत्रुनिवर्हणं रात्रिव्रतमिदं तस्य रात्रौ क
र्तव्यते स्यात्ते नक्तव्रतमिदं यस्मादन्यथा नरके गतिरित्यादि वचनाच्च रात्रि
व्रतत्वमेवाभिप्रेत्य माधवेनोक्तं तस्य नक्तव्रतत्वादिति ननु रात्रिभोजनात्
ननु मासि चाश्विने शुक्ले नवरात्रे विरोधतः संपूज्य नवदुर्गां च नक्तं कुर्या

त्समादितः नवरात्राभिधं कर्म नक्तव्रतमिदं स्मृतं आरंभे नवरात्रस्येत्यादि
स्कांदात् माधवोक्तेश्च नक्तमेव प्रधानमिति चेन्न नवरात्रोपवासतः इत्या
देरनुपपत्तेः तेन पाक्षिकनक्तानुवादोयं ननु रात्रेः कर्मकालत्वे तद्व्यापिनीति
थ्यैव प्रतिपत्स्यादित्यात् मैवं न्यायतः प्राप्तावपि पूर्वोक्तवचनैर्बाधात् यथा पू
र्वेद्युः कर्मकालव्यापिनीमपि त्यक्त्वा स्वल्पापि परैव रामनवमीति प्रागुक्तं य
था वा निशीथे सतीमपि पूर्वां जन्माष्टमीत्यक्त्वा रोहिणीयुक्ता परैवेति मा
धवेनोक्तं तथात्रापि वस्तुतस्तु रात्रेः कर्मकालत्ववचसां हेमाद्याद्यलिख
नात्समूलत्वं विमृश्यमेवास्ति कालं पूजयेदित्यादिपूर्वविरोधात् च माधवो
क्तिस्तु पाक्षिकनक्तानुवाद इत्युक्तं तस्मात्सर्वपक्षेषु परैव प्रतिपदिति सिद्धं
अत्र केचिन्नवरात्रिशब्दो नवाहोरात्रिपरः वृद्धौ मासि रष्टम्यां ह्रासे मा प्रति
पन्निशि प्रारंभेण नवत्वं स्यात्तु नवरात्रमतोर्थवदिति देवीपुराणादित्याहुः
तन्न अति ह्रासवृद्ध्योर्न्यूनाधिकत्वापत्तेः अत्र मूलाभावाच्च तेन तिथिवाच्ये
वायं तदुक्तं तिथिवृद्धौ तिथिह्रासे नवरात्रमपार्थकं अष्टरात्रे न दोषोयं नव
रात्रितिथिक्षये इति स च नवरात्रशब्दः कश्चिल्लक्षणया कर्मवाचीयथा प्रा

रंभो नवरात्रस्येत्यत्रेति दिक् प्रतिपद्यदि चेत्यादियोगनिषेधो भार्गवार्चने ॥
दीपिकायां देवीपुराणोक्तवाक्ये वैधृतयुक्ता चेत् प्रतिपच्चंडिकार्चने तयोरंते वि
धातव्यं कलशारोपणं गृहे इति चित्रावैधृतयुतापि द्वितीयायुता चेत्सैव ग्रा
ह्येत्युक्तं दुर्गोत्सवे भद्रान्विता चेत् प्रतिपन्न लभ्यते चित्तु द्वयोर्योगैरपि संगतासती
सैवापराह्ने विबुधैर्विधेया श्रीपुत्रराज्यादिविवृद्धिहेतुरिति यदा तु वैधृत्या ॥
दिपरिहारेण प्रतिपन्न लभ्यते तदोक्तं तत्रैव कात्यायनेन प्रतिपद्याश्विने मासि
भवो वैधृतिचित्रयोः आद्यपादौ परित्याज्य प्रारंभेन्नवरात्रकमिति भविष्येपि ॥
चित्रावैधृतिसंपूर्णा प्रतिपच्चेद्भवेन्नृप त्याज्यांशास्त्रयस्त्वाद्यास्तुरीयांशे तु पूजन
मिति रुद्रयामलेपि वैधृतौ पुत्रनाशः स्याच्चित्रायां धननाशनं तस्मान्न स्थापयेत्
कुंभं चित्रायां वैधृतौ तथा संपूर्णा प्रतिपद्देवि चित्रायुक्ता यदा भवेत् वैधृत्या वापि यु
क्ता स्यात्तदा मध्यंदिने रवौ अभिजिन्मुहूर्ते यत्तत्र स्थापनमिष्यते इति चित्रादिनि
षेधमूलं चिंत्यं इदं कलशस्थापनं रात्रौ न कार्यं न रात्रौ स्थापनं कार्यं न च कुंभा ॥
भिषेचनमिति मात्स्योक्तेः भास्करोदयमारभ्य यावत्तु दश नाडिकाः प्रातः का
ल इति प्रोक्तः स्थापनारोपणादिषु इति विष्णुधर्मोक्तेश्च रुद्रयामले स्नानं मां

नि०सिं०
१०८

108

गालिकं कृत्वा ततो देवीं प्रपूजयेत् अभाभिर्मर्त्तिकाभिश्च पूर्वं कृत्वात्र वेदिकां
यवान्वै वापयेत्तत्र गोधूमैश्चापि संयुतान् तत्र संस्थापयेत् कुंभं विधिना मंत्रपू
र्वकं सौवर्णं राजतं वापि ताम्रं मृन्मयजं तु वेति अथ पूजाविधि सा च जयंती
मंत्रेण नवाक्षरेण वा कार्या तदुक्तं दुर्गाभक्तितरंगिण्यां देवीपुराणे कुर्याद्देव्या
कृतं मंत्रेण पूजां क्षीरघृतादिभिरिति जयंती मंगला काली भद्रकाली कपा
लिनी दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोस्तु ते अनेनैव तु मंत्रेण जपहोमौ
तु कारयेदिति ॐ दुर्गे दुर्गे रक्षिणि स्वाहेति नवाक्षरः तत्र प्रतिपदि प्रातरभ्यंगं कृ
त्वा देशकालौ संकीर्त्य ममेहजन्मनि दुर्गाप्रीतिद्वारा सर्वापच्छांतिपूर्वकदीर्घायु(
विपुलधनपुत्रपौत्राद्यनवच्छिन्नसंततिवृद्धिस्थिरलक्ष्मीकीर्तिलाभशत्रुपरा
जयसदभीष्टसिद्ध्यर्थं शारदनवरात्रप्रतिपदि विहितकलशस्थापनदुर्गापू
जादि करिष्ये इति संकल्प्य मही द्यौरिति भूमिं स्पृष्ट्वा ओषधयः समिति यवा
न्निक्षिप्य कलशेति कुंभं संस्थाप्य इमं मे गंगे इति जलेनापूर्य गंधद्वारा(
मिति गंधं या ओषधीरिति सर्वौषधीः कांडात्कांडादिति दूर्वाः अश्वत्थे व इति
पंचपल्लवान् स्योना पृथिवीति सप्तमृदः याः फलिनीरिति फलं सहिरत्नानिहि

राम
१०८

108A

रण्यं चाक्षिप्त्वा पुष्पास्तवासा इति वस्त्रेणावेष्ट्य पर्णादर्वीनि पर्णीपात्रं निधाय
तत्र वरुणं संपूज्य जीर्णायां तनायां वा प्रतिमायां दुर्गामावाह्य पूजयेत् तद
पात्र्वोक्तं मंत्रमुक्त्वा आगच्छ वरदे देवि दैत्यदर्पनिषूदनि पूजां गृहाण सुमुखि
नमस्ते शंकरप्रिये सर्वतीर्थमयं वारि सर्वदेवसमन्वितं इमं घटं समागच्छ ति
ष्ठ देवगणैः सह दुर्गे देवि समागच्छ सान्निध्यमिह कल्पय बलिं पूजां गृहाण
त्वमष्टभिः शक्तिभिः सहेत्यावाह्य पूर्वोक्तमंत्रेण षोडशोपचारैः पूजयित्वा मा
षभक्तबलिं कूष्मांडादिबलिं वा निवेदयेत् ततः कुमारीपूजा तदुक्तं हेमाद्रौ स्कां
दे एकैकां पूजयेत्कन्यामेकवृद्ध्या तथैव च द्विगुणं त्रिगुणं वापि प्रत्येकं न
वकं तथा तथा नवभिर्लभते भूमिमैश्वर्यं द्विगुणेन तु एकवृद्ध्या लभेत्क्षेमं ए
कैकेन श्रियं लभेत् एकवर्षा तु या कन्या पूजार्थे तां विवर्जयेत् गंधपुष्पफ
लादीनां प्रीतिस्तस्या न विद्यते तेन द्विवर्षामारभ्य दशवर्षपर्यंता एव पूज्या
न त्वन्याः तासां च क्रमेण कुमारिका त्रिमूर्तिः कल्याणी रोहिणी चंडि
का शांभवी दुर्गा सुभद्रेति नामभिः पूजा कार्या आसां च प्रत्येकं पूजामंत्रा
फलविशेषाश्च तत्रैव ज्ञेया सामान्यतस्तु मंत्राक्षरमयीं लक्ष्मीं मातृणां

नि॰ सिं॰
१०९

109

रूपधारिणीं नवदुर्गात्मिकां साक्षात् कन्यामावाहयाम्यहं एवं सम्यक्चनेकु
मारीणां प्रयत्नतः कंचुकैश्चैव वस्त्रैश्च गंधपुष्पाक्षतादिभिः नानाविधैर्भ
क्ष्यभोज्यैर्भोजयेत्पायसादिभिः तथा गंधस्फुटितशीर्णांगीं रक्तपूयव्रणांकितां
जात्यंधां केकराक्षीं कुरूपां तनुरोमशां संत्यजेद्रोगिणीं कन्यां दासीगर्भसमु
द्भवां तथा ब्राह्मणीं सर्वकार्येषु जयार्थे नृपवंशजां लाभार्थे वैश्यवंशोत्थां सु
तार्थे शूद्रवंशजां दारुणे चांत्यजातानां पूजयेद्विधिना नर इति अत्र वेदपारायण
मप्युक्तं रुद्रयामले एवं च तत्र वेदविदो विप्रान्सर्वान्संसादयेत् तेषां च वरणं का
र्यं वेदपारायणाय वै इति तथा एकोत्तराभिवृध्या नवमीयावदेव हि चंडीपाठं
जपेच्चैव जापयेद्वा विधानतः तिथितत्वे वाराहीतंत्रे प्रणवं चादितो जप्त्वा स्तोत्रं
वा संहितां पठेत् अंते च प्रणवं दद्यादित्युवाचादिपूरुषः आधारे स्थापयित्वा
तु पुस्तकं प्रजपेत्सुधीः हस्तसंस्थापनादेव यस्मात्तद्विफलं भवेत् स्वयं च
लिखितं यच्च अशूद्रेण लिखितं भवेत् अब्राह्मणेन लिखितं तच्चापि विफलं भवे
त् अपि चिह्नदादिकं न्यस्य पठेत्स्तोत्रं विचक्षणः लोकेण हस्यते यत्र प्रणवं तत्र वि
न्यसेत् सर्वत्र पाठो विज्ञेयस्त्वन्यथा विफलं भवेत् एवं नवमीपर्यंतं प्रत्यहं

109A

कुर्यात् अत्र विशेषो हेमाद्रौ देवीपुराणे पदाष्ठे दिवसे कुर्यात्षोडशिकापूजनादि
कं द्विगुणं तन्न हि तृतीयेह्नि त्रिगुणं तत्न परेहनि नवमीतिथिपर्यंतं ह्यध्यापूजाज
पादिकमिति एतेन नवरात्रे पूजैव प्रधानं उपवासादित्वंगमिति गम्यते तिथि
ह्रासे तु तिथिद्वयमिति तिथौ पूजादि महालयश्राद्धवदेकदिने आवृत्त्या कार्य
त्र द्वैतहदेवावृत्तिः तत्र नवरात्रोपवासादि संकल्पं कुर्यात् अस्याशक्तावा
न्येन वा पूजादि कारयेत् स्वयं वा अन्यतो वापि पूजयेत्पूजयीत वेति तत्र शिशि
एवं देवीपुराणात् इदं च देवीपूजनं अशुक्लाशौचादावपि कार्यं तदुक्तं धर्मप्रदी
पे नष्टे मृतके तथा जीवे सिंहस्थे च बृहस्पतौ कार्या चैव सदा देव्याश्चार्चा प्रत्यब्दं
कुलधर्मत इति मलमासे वचनाभावान्न भवति अत्र स्वाश्वस्य अस्त्रपूजन
मुक्तं मदनरत्ने देवीपुराणे आश्वयुक्शुक्ले प्रतिपत्स्वातियोगे शुभे दिने
पूर्वमस्त्रैः सवानाम प्रथमं श्रियमादरात् तस्मात्सर्वेश्व नरैस्तत्र पूज्यासोश्व
ह्यायासु पूजनीयाश्च तद्दिनान्नवमी यावद्देवहि शांतिः स्वस्त्ययनं कार्यं त
दातेषां दिने दिने धान्यमल्लातकं कुष्ठं वचा सिद्धार्थकास्तथा पंचवर्णे
न सूत्रेण ग्रंथितेषांतु बंधयेत् वायव्यैर्वारुणैः सौरैः शाक्रैर्मैत्रैः सवै

पवैः वैश्वदेवैस्तथाग्नेयैर्होमः कार्यो दिने दिने कल्पतरौ हेतदग्रे ऽन्यद
पि ज्येष्ठायोगे पुरा तत्र गजाश्चाष्टौ महाबलाः पृथिवीमवहन् पूर्वं सशैल
वनकाननं कुमुदैरावणौ पद्मः पुष्पदंतोथ वामनः सुप्रतीकोंजनो नील
स्तस्मात्तांस्तत्र पूजयेत् शक्रादेशात्समारभ्य नवम्यंतं च पूर्ववत् अश्ववत्तामा
दादीत्यर्थः अथ प्रतिपदादिषु विशेषो दुर्गाभक्तितरंगिण्यां भविष्ये केशसं
स्कारद्रव्याणि प्रदद्यात्प्रतिपद्दिने पक्वतैलं द्वितीयायां केशसंयमहेतवे प
ट्टडोरमिति गौडपाठः दर्पणं च तृतीयायां सिंदूरालक्तकं तथा मधुपर्कं च
तुर्थ्यां तु तिलकं नेत्रमंडनं पंचम्यामंगरागं च शक्त्यालंकरणानि च षष्ठ्यां
बिल्वतरौ बोधं सायं संध्यासु कारयेत् सप्तम्यां प्रातरानीय गृहमध्ये प्रपू
जयेत् उपोषणमथाष्टम्यां महानिशायां च पूजनं नवम्यामुग्रचंडाद्याः पूजा
कुर्यात् बलिं तथा संपूज्य प्रेषणं कुर्याद्दशम्यां सारवोत्सवैः अनेन विधिना
यस्तु देवीं प्रीणयते नरः स्कांदे वत्यालये देवीं पुत्रधनकांक्षिभिः कृत्यत
त्वाणौ वे लैंगे कन्यायां कृष्णपक्षे तु पूजयित्वा द्रमे पिच नवम्यां बोधये
द्देवीं महाविभवविस्तरैः शुक्लपक्षे चतुर्थ्यां तु देवीकेशविमोक्षणं

110A

प्रातरेव तु पंचम्यां स्नापयेत्तु भैजलैः षष्ठ्यां सायं प्रकुर्वीत विल्ववृक्षे धिवा
सनं सप्तम्यां पत्रिकापूजा अष्टम्यां [illegible] पोषणं पूजा च जा
गरश्चैव नवम्यां विधिवद्बलिः विसर्जनं दशम्यां तु ज्ञीजाकोत्सकमंगलैः अत्र
नवम्यां बोधसमर्थ्येन षष्ठ्यां बोधनमिति स्मार्त्तास्फलभट्टमाधिनः समस्तु अपरत्य
न्येन नवम्यां मन्त्रं कालिकापुराणे एषे मास्य सितेपक्षे नवम्यामार्द्रभे दिवा श्रीवृ
त्वे बोधयामि त्वां यावत्पूजां करोम्यहं अत्र सीव्रत्ते विशेषः पारिभाषायां तेषः (
अप्याशौचे विशेषो निर्णयामृत्ते विष्वरूपनिबंधे आश्विने शुक्लपक्षे तु प्रार
ब्धे नवरात्रके यावशौचे समुत्पन्ने क्रिया कार्या कथं बुधैः सूतके वर्तमा[illegible]
नेच तत्रोत्पन्ने सदा बुधैः देवीपूजा प्रकर्त्तव्या पशुयज्ञविधानतः सूतके प
जनं प्रोक्तं दानं चैव विशेषतः देवीमुद्दिश्य कर्त्तव्यं तत्र दोषो न विद्यते इति का
लादर्शे विश्वरहस्येपि पूर्वं संकल्पितं यच्च व्रतं सुनियतैर्व्रतैः तत्कर्त्तव्यं न
रैः शुद्धं दानार्चनविवर्जितमिति गौडनिबंधे तिथितत्त्वे युक्तं आश्वि
न शुक्लनवम्यादि शुक्लप्रतिपदादि षष्ठ्यादि सप्तम्यादि चैकैकमेऽन्न मध्य
मध्ये आशौचपातेपि न दोषः [illegible] सकल्पो व्रतसत्रयोरिति विष्णु[illegible]तेः इति

आरब्धे स्वयमेव कार्यं अनारब्धे त्वन्येन कारयेदिति दिवोदासः रजस्वला
त्वन्येन कारयेत् सूतकादिवद्विशेषवचनाभावात् स्त्रीणां च नवरात्रे तांबू
लादि चर्वणं भवति तदुक्तं व्रतहेमाद्रौ गारुडे गंधालंकारतांबूलपुष्पमाला
नुलेपनं उपवासे न दुष्यंति दंतधावनमंजनमिति एतत्सभर्तृकोपवासवि
षयं अन्यत्रात्र विशेषः परिभाषायामुक्तः आश्विनशुक्लपंचम्यामुपांगल
लितावृतं महाराष्ट्रेषु प्रसिद्धं तत्र वयघापिकथायां कालविशेषो नोक्तः स्त
घापि रागौ जागरणं कुर्याद्गीतवादित्रनिस्वनैरिति रात्रौ जागरोक्तेः शक्तिपूजा
या रात्रौ प्राशस्त्याच्च रात्रिव्यापिनी ग्राह्येति केचित् वस्तुतस्तु वचनं विना रात्रिपू
जायां मानाभावात् जागरस्य चांगत्वात् युग्मवाक्यात् भुक्त्वा जागरणे नक्ते चंद्र
प्रदुष्टे प्रतेतथा तराकृत्रेषु सर्वेषु रात्रियोगो विशिष्यते इति कालहेमाद्रौ वचना
च्च पूर्वविद्धा ग्राह्या रात्रिशब्दः पूर्वविद्धावचनं हेमाद्रिः अस्य च भुक्त्वा जागर
णरूपत्वादिति साधु प्रतीमः भुक्त्वा जागरणमपगत्येकं पदं तस्मिन् वृत्ते इत्यर्थः
अन्यथा भुक्तेत्यसंगतेः दिवोदासीयेप्येवं आश्विनशुक्लपक्षे मूलनक्षत्रे स
रस्वतीस्थापनं यथोक्तं निर्णयामृते देवीपुराणे मूलेषु स्थापनं देव्याः पूर्वा

111A

पाढासु पूजनं उत्तरासु बलिं दद्यात् श्रवणेन विसर्जयेत् इति रुद्रयामलेपि
मूलनक्षत्रे सुराधीश पूजनीया सरस्वती पूजयेत्प्रत्यहं देवि यावद्वैष्णवम्
ऋक्षं नाध्यापयेन्नचलिखेन्नाधीयीत कदाचन पुस्तकस्थापिते देवि विद्याका
मो द्विजोत्तमः मूलस्याद्यपादे आवाहनमिति शिष्टाः श्रवणाद्यपादे च वि
सर्जयेत् आदिभागे निशायां तु श्रवणस्य यदा भवेत् संप्रेषणं तदा देव्या
दशम्यां च महोत्सव इति चिन्तामणौ ब्रह्माण्डपुराणात् अथ पत्रीगौनिव
धे देवीपुराणे ज्येष्ठानक्षत्रयुक्तायां षष्ठ्यां बिल्वाभिमन्त्रणं सप्तम्यां मू
लयुक्तायां पत्रिकायाः प्रवेशनं पूर्वाषाढयुताष्टम्यां पूजाहोमाद्युपोष
उत्तरेण नवम्यां तु बलिभिः पूजयेच्छिवां श्रवणेन दशम्यां तु प्रणिपत्य विस
र्जयेत् कालिकापुराणे बोधयेद्बिल्वशाखायां षष्ठ्यां देवीं फलेषु च स
प्तम्यां बिल्वशाखां तां आहृत्य प्रतिपूजयेत् पुनः पूजां तथाष्टम्यां विशेषे
ण समाचरेत् जागरं च स्वयं कुर्याद्बलिदानं महानिशि प्रभूतबलिदानं
तु नवम्यां विधिवच्चरेत् विसर्जनं दशम्यां तु कुर्याद्वै शावरोत्सवैः धूली

कर्दमनिक्षेपैः क्रीडाकौतुकमंगलैः सर्वत्रातिथिनक्षत्रयोगादेशमुख्यः कल्पः
तदभावेतुतिथिरेवग्राह्या तिथिः शरीरंदेवस्य तिथौ नक्षत्रमाश्रितं तस्मात्तिथिं
प्रशंसंति नक्षत्रं न सत्रं न तिथिं विनेति विद्यापतिलिखितवचनात् तिथिनक्षत्र
योगे द्वयोरेवानुपालनं योगाभावे तिथिर्ग्राह्या देव्याः स्नानकर्मणीति तत्रै
व देवलोकेप्यत्र च पत्रीप्रवेशात्पूर्वेद्युः सायंकाले बहुभावेन तत्पूर्वदिनेऽधिवा
सनमिति पूर्ववचनादिति कल्पतरुः सायंस्मृतिः फलाति शापमात्रापीनतु
कर्मलोप इत्याचार्यचूडामणिः अत्रक्रमः बिल्वसमीपं गत्वा देवीं बिल्वं च
संपूज्य प्रार्थयेत् तत्र मंत्रः रावणस्य वधार्थाय रामस्यानुग्रहाय च अकाले
ब्रह्मणा बोधो देव्यास्त्वयि हि तानः पुरा अहमप्याश्रितः षष्ठ्यां सायाह्ने बोधयामि स्य
त श्रीशैलशिखरे जात श्रीफलश्रीनिकेतन नेतव्योसि मया गच्छ पूज्यो दुर्गा
स्वरूपत इति एवं देवीमधिवास्य परदिने निमंत्रितबिल्वशाखां पत्रीप्रवेश
पूजां कुर्यात् तदुक्तं हेमाद्रौ लैंगे मूलाभावे तु सप्तम्यां केवलायां प्रवेशयेत्
युग्माभ्यां बिल्वस्य फलाभ्यां शाखिकां तथा तथैव प्रतिमां देव्याः स्नात्वाभ्यु
दयप्रवेशयेत् अत्र चोपवासपूजादौ वैदायिकासप्तमीग्राह्या न तु युग्मवा

द पत्रिकाप्रजा च सर्वा हे एवकार्यानन्तु मूलानुरोधात् मध्याह्नादाविति कृत्यतत्त्वार्णवे उक्तं ४६४

कथात्सर्वा पुगाया वर्षे वृद्धिः सप्तमीपार्वती प्रिया रवेरुदयमीक्षेत तेन तत्रापि र
थियुग्मते ति कृत्यतत्त्वार्णवोदाहृतवचनात् भगवत्याः प्रवेशादिविसर्गान्ता र
स्र याति यावुदयगामिन्यां सर्वास्ताः कारयेद्बुध इति तिथितत्त्वे नंदिकेश्वरपुरा
णाच्च दुर्गाभक्तितरंगिण्यामप्येवं तत्रापि घटिकातोन्यूनत्वे परा न कार्या त्र
तोपवासनियमे घटिकैकापि या भवेदिति देवलोक्तेरिति गौडाः दाक्षिणा भा६
त्यास्तु पूर्ववचनमदृष्ट्वा युगमवाक्यात्सर्वां कुर्वंति पत्रिकास्तु रंभा कच्वी हरि
द्रा च जयंती बिल्वदाडिमौ अशोको मानकश्चैव धान्या दिनव पत्रिका इति तत्त्वे
वोक्ताः अस्यामेव सप्तम्यां देवी त्रिरात्रमुक्तं हेमाद्रौ प्रतिपदादिनवतिथि
षु उपवासादिकरणासामर्थ्ये सप्तम्यादि दिनत्रये वा कुर्यात् तदाह धौम्यः
आश्विने मासि शुक्ले तु कर्त्तव्यं नवरात्रकं प्रतिपदादिक्रमेणैव यावच्च नवमी भ
वेत् त्रिरात्रं वापि कर्त्तव्यं सप्तम्यादि यथाक्रममिति अन्यत्रापि अयाचानव
रात्रं च सप्तपंचत्रिकं दिवा एकभक्तेन नक्तेनायाचितोपोषितैः क्रमादिति र
दिवेत्येकरात्रमुक्तं देवीपुराणे नवरात्रव्रतेशक्तः त्रिरात्रं चैकरात्रकं व्रतं चर
तियो भक्तस्तस्मै दास्यामि वांछितमिति तत्रापि सप्तम्याः पूर्वोक्तो निर्णयः।

नि॰सिं॰
११३

113

अत्र तिथियोगपक्षे तत्रैणोपवासः तिथिद्वयनिमित्तं पूजादिकं तु भेदेन अत्र
च विशेषो निर्णयामृते भविष्ये सप्तम्यां नवगेहानि दारुजानि नवानि च ए
कं वा विचित्रभावेन कारयेत्तु समाहितः दुर्गागृहं प्रकर्तव्यं चतुरस्रं सुशोभ
नं तन्मध्ये वेदिकां कुर्याच्चतुर्हस्तां समां शुभां तस्यां सिंहासनं क्षौमं कंबलाजि
नसंयुतं तत्र दुर्गां प्रतिष्ठाप्य सर्वलक्षणसंयुतां सर्वदेवमयीं प्रौढां यौवनोन्मा
दशालिनीं भुजैश्चतुर्भिश्चित्रैर्दशाभिर्वापि भूषितां तप्तहाटकवर्णाभां त्रिने
त्रां शशिशेखरां अनेककुसुमाकीर्णां कपर्देन सुशोभितां नितंबवसनबद्ध
किंकिणीक्वणनादिनीं शूलचक्रगदाशक्तिवज्रचापासिधारिणीं घंटाक्षमाला
करकपानपात्रलसत्करां तदग्रे छिन्नशिरसं महिषं रुधिराप्लुतं निःसृतार्द्ध
तनुं कंठनाले च मौसिधारिणं देवीधृतकरग्रीवं शूलेनोरसि ताडितं नाग
पाशेन विशिष्टं हर्यक्षेणापि विद्रुतं चमद्रुधिरवक्त्रेण धुन्वतोर्ध्वसटानन्तथा
सर्वतो मातृचक्रेण सेव्यमानं सुरैस्तथा तयेति तत्र देवी प्रकर्तव्या हेमी वा र
राजती तथा महाभीलक्षणोपेता पञ्चशूले च पूजयेत् वार्क्षी दारुमयी देवी मृ
न्मयी स्थापने विशेषो दुर्गाभक्तितरंगिण्यां देवीपुराणे यास्यास्याः शुभदा दुर्गा य

राम
११३

113A

वीस्याजयवर्द्धिनी पश्चिमाभिमुखी नित्यं तस्यां प्यासोम्यदिङ्मुखी प्रतिमाभावेपि
विशेषस्तत्रैव हेममयी राजतमृद्दारु शैल चित्रार्पिताऽपि वा खड्गशूले चिंता देवी सर्व
कामफलप्रदा पद्यञ्चास्याः पृथक् प्रोक्तं तस्मिंस्तां प्रतिपूजयेत् देवी भक्त्या चिंताः पुंसो
राज्याः पुःसुखवंतसौख्यदा कथ्यते तत्वाणि वे कालिकापुराणे लिंगस्थां पूजयेद् देवी
मंडलस्थां तथैव च पुस्तकस्थां महादेवीं पावके प्रतिमासु च चित्रे च त्रिशिखे खड्गे।
जलस्थां चापि पूजयेत् बिल्वपत्रैर्यथा देवीं तथा जन्ती पुस्तकैः नानाविधकनैवेद्यै
र्धूपदीपैर्मनोहरैः भगलिंगाभिधानैश्च भगलिंगप्रदीपकैः भगलिंगक्रियाभि
श्च प्रीणयेद्धरचंडिकां परैर्नाभिध्यतेयस्तु यः परान्वाक्षिपत्यपि तस्य क्रुद्धा भगव
ती शापं दद्यात्सुदारुणं चित्रमन्त्यप्यादौ स्नानाद्यसंभवे तत्रैवोक्तं अंतिकस्थापितेखड्
गे स्थापयेद्दर्पणोष्यवेति अथ सप्तमीपूजाविधिः प्रतिपत्सूक्तविधिना फलसंकीर्त
नांते नवपत्रिकामन्त्रमयदुर्गापूजा बलिदानानि करिष्य इति संकल्प पूर्वं निमंत्रि
तबिल्वसमीपं गत्वा संपूज्या गध सर्वकल्याणीति पूर्वोक्तं मंत्रं पठित्वा बिल्वहस्त
महाभाग सदा त्वं शंकरप्रिय प्रिय ~~पत्रीत्वां तत्र शाखां च पूज्या दुर्गेति च सस्त~~ निः १
गृहीत्वा तव शाखां च देवीपूजां करोम्यहं सारवाछेदोद्भवं दुःखं न च कार्यं त्वया प्र

मो गृहीत्वा तव शाखां च पूज्या दुर्गेति स्मृतिः उत्तिष्ठ पत्रिके देवि सर्वकल्याण
हेतवे पूजां गृहाण सकलामस्माकं वरदा भव मेरुमंदरकैलासहिमवा[illegible]च्छिख
रे गुरौ जातः श्रीफलवृक्ष त्वमंबिकायाः सदा प्रिया इति संप्रार्थ्य ॐ छिंधि फट् फट् ॐ
फट् स्वाहेति छित्वा संपूज्य ॐ चामुंडे चल चल इति वाद्यघोषेण देवीं तां च गृहं वे
श्य आरोपितासि दुर्गे त्वं मन्मय्यां श्रीफलेपि च स्थिरा नित्यं तां तु भक्त्या च गृहे त्वं का
मदा भवेति स्थिरीकृत्य रंभादिपत्रिकाः पंचगव्येन पंचामृतेन च स्नपयित्वा वस्त्रे
ण वेष्टयित्वा स्थापयेत् ततः पूर्ववत् संकल्पं कृत्वाक्षतानादाय देवीमावाहयेत् त
त्र मंत्रः आवाहयाम्यहं देवि मन्मय्यां श्रीफलेन या कैलासशिखराद्देवि विंध्याद्रेर्हि
मपर्वतात् आगत्य बिल्वशाखायां चंडिके कुरु संनिधिं स्थापितासि मया दुर्गे पू
जये त्वां प्रसीद मे आयुरारोग्यमैश्वर्यं देहि देवि नमोस्तु ते दुर्गे दुर्गे स्वरूपासि सुर
तेजोमये र्चिते सदानंदकरे देवि प्रसीद मम सिद्धये एह्येहि भगवत्येव शत्रुक्षयजय
प्रदे भक्तितः पूजयामि त्वां दुर्गे देवि सुरार्चिते पल्लवैश्च फलोपेतैः पुष्पैश्च सुमन
नोहरैः पल्लवैः संस्थिते देवि पूजये त्वां प्रसीद मे दुर्गे देवि समागच्छ सान्निध्यमिह
कल्पय यज्ञभागान् गृहाण त्वं योगिनीकोटिभिः सहेति ततो मूलमंत्रेण पाद्यं।

114A

दिग्धांतोपचारैः संपूज्य अमृतोद्भवं च श्रीवृक्षं शंकरस्य सदा प्रियं विल्वप
त्रं प्रयच्छामि पवित्रं ते सुरेश्वरीति विल्वपत्रं ब्रह्मविष्णुशिवादीनां द्रोणपुष्पं स
दा प्रियं ततो दुर्गे प्रयच्छामि सर्वकामार्थसिद्धये इति द्रोणपुष्पं निवेद्य धू
पादि दक्षिणांतां पूजां मूलेन कृत्वा प्रार्थयेत् ॐ महिषघ्नि महामाये चामुंडे
मुंडमालिनि आयुरारोग्यमैश्वर्यं देहि देवि नमोस्तु ते कुंकुमेन समालब्धे
चंदनेन विलेपिते विल्वपत्रकृतापीडे दुर्गेहं शरणं गतः रूपं देहि यशो देहि
भगं भगवति देहि मे पुत्रान् देहि धनं देहि सर्वान् कामांश्च देहि मे सर्वमंगल
चैव
मांगल्ये इति च संप्रार्थ्य पत्रिकाः पूजयेत् कदल्यां ब्रह्माणीं दाडिमे रक्तदंति
कां धान्ये लक्ष्मीं हरिद्रायां दुर्गां माने चामुंडां कच्वां कालिकां विल्वे शिवां अशो
के शोकरहितां जयंत्यां कार्त्तिकीं वा वाद्यैः संपूज्य दुर्गायै वलिं दद्यात् अत्र शास्त्रा
दिपूजावश्यकेन ततः स्तुतिं पठेत् तदुक्तं शिवरहस्ये दुर्गां शिवां शांतकरीं ब्र
ह्माणीं ब्रह्मणः प्रियां सर्वलोकप्रणेत्रीं च प्रणमामि सदा शिवां मंगलां शो
भनां शुद्धां निःकलां परमां कलां विश्वेश्वरीं विश्वमातां चंडिकां प्रणमाम्यहं
सर्वदेवमयीं देवीं सर्वरोगभयापहं ब्रह्मेशविष्णुनमितां प्रणमामि सदा

उमां विंध्यस्थां विंध्यनिलयां विव्यस्थानविलासिनीं योगिनीं योगमातां च चं-
डिकां प्रणमाम्यहं ईशानमातरं देवीमीश्वरीमीश्वरप्रियां प्रणतोस्मि सदा दुर्गां
संसारार्णवतारिणीं य इदं पठति स्तोत्रं शृणुयाद्वापि यो नरः समुक्तः सर्वपा-
पेभ्यः मोदते दुर्गया सह अथ महाष्टमी सा च परयुता शुक्लपक्षेष्टमी चैव शु-
क्लपक्षे चतुर्दशी पूर्वविद्धा न कर्तव्या कर्तव्या परसंयुता इति ब्रह्मवैवर्तात्
मदनरत्ने स्मृतिसंग्रहे शरन्महाष्टमी पूज्या नवमीसंयुता सदा सप्तमीसंयु-
ता नित्यं शोकसंतापकारिणी जंभेन सप्तमीयुक्ता पूजिता तु महाष्टमी वर्ज-
नीया प्रयत्नेन मनुजैः शुभकांक्षिभिः सप्तमीशल्यसंयुक्तां मोहादज्ञानतोपि वा
महाष्टमीं प्रकुर्वाणो नरकं प्रतिपद्यते सप्तमीकलया यत्र परतश्चाष्टमी भवे-
त् तेन शल्यमिदं प्रोक्तं पुत्रपौत्रक्षयप्रदं तथा पुत्रान्पशून्हंति हंति राष्ट्रं सराजकं
हंति जातानजातांश्च सप्तमीसहिताष्टमी तेनात्र त्रिमुहूर्तैव वेधः [illegible] ना
त्तिथिप्रकाशे सायंगता पूर्वयुतेति मान्या प्रातः प्रयातोत्तरसंयुतेति एकेयुन
वैधमुशंति नूनं वृद्धिर्घटीभिस्तिथिसंचयस्य पैठीनसिः पक्षद्वयेपि तिथय-
स्तिथिं पूर्वां तथोत्तरां त्रिभिर्मुहूर्तैः विध्यंति सामान्योयं विधिः स्मृतः तदा घटि

115A

कामाजाय्यैादपिकीग्राह्या व्रतोपवासनियमेघटिकैकापदाभवेदितिदेवलोक्तेः
गौडअप्येवमाहुः अत एवोक्तंभोजराजेन नचसप्तमीशाल्यसमोपहतेति इयं
मौमेतिप्रशस्ता अष्टम्यामुदितेसूर्येदिनांतेनवमीभवेत् कुजवारोभवेत्तत्रपूज
नीयाप्रयत्नतइतिमदनरत्नेवचनात् सप्तमीशल्यसंविद्धा वर्ज्जनीयासदाष्टमी ।
स्तोकापिसामहापुण्यायस्यांसूर्योदयोभवेदिति मदनरत्नेस्मृतिसमुच्चयवच
नात् अष्टमीनवमीयुक्तानवमीचाष्टमीयुतेतिपाद्मवचनाच्च इयमेवनवमी
मूलयुक्ताचेन्महानवमीसंज्ञा अश्वयुक्शुक्लपक्षेयाष्टमीमूलेनसंयुता सा ।
महानवमीप्रोक्तात्रैलोक्येपिसुदुर्लभेति हेमाद्रौस्कांदात् मूलयुक्तापिसप्तमी
युताचेत्त्याज्यैवेत्युक्तं निर्णयामृते दुर्गोत्सवे मूलेनापिहिसंयुक्तासदात्याज्याष्ट
मीबुधैः लेशमात्रेणसप्तम्याअपिस्याद्यदिदूषितेति महाष्टमीपूर्वेद्युः पूर्वाह्णि
व्यापित्वे पूर्वान्यथाऽपरैवेतिनिर्णयदीपमतं एतच्चनष्टत्वादुपेक्ष्यं रूपनारायण
धृते देवीपुराणे सप्तमीवेधसंयुक्ता यैः कृता तु महाष्टमी पुत्रदारधनैर्हीना
भ्रमंतीहपिशाचवत् यत्तु सप्तम्यामुदितेसूर्ये परतोष्टमीभवेत् तत्रदुर्गो
त्सवंकुर्यान्नकुर्यादपरेहनीति । विश्वरूपनिबंधवचनं तदाश्विनकृष्णाष्ट

नि॰सिं॰
११६

116

मीविषये कन्यायांसूर्यशुक्लपक्षेतु पत्रिकायाष्टमीदिने नवम्यां बोधयेद्देवींगी
तवादित्रनिस्वनैरिति देवीपुराणे तत्रापिप्रदोषेरिति हेमाद्रौनिर्णया
मृतेचोक्तं यानितु भद्रायांभद्रकाल्यास्तुमध्येस्यादर्चनक्रिया तस्मादैसप्त
मीविद्धाकार्यादुर्गाष्टमीबुधैरिति यच्चमोहचूडोत्तरेऽपिमूलेचवाश्विनस्य
सिताष्टम्यामर्द्धरात्रेतुपार्वती भद्रकालीसमुत्पन्नाप्रबोधादासमावृते
तया तत्राष्टम्यांभद्रकालीदक्षयज्ञविनाशिनी प्रादुर्भूतामहाघोरायोगिनी
कोटिभिःसहेति यच्चमदनरत्नेमहाष्टम्याश्विनेमासिपूर्वाकल्याणकारिणी
सप्तम्यापिपुनाकार्यायदिनस्यात्परेहनि मूलेनतुविशेषस्तत्रेतिताः निपरदि
नेष्टम्यभावविषयाणीतिमदनरत्नेउक्तं यत्तुतत्रैवपरादिनेष्टमीसत्वेपि
पूर्वविद्धाविधायकंवचनं यदाष्टमीतुसंप्राप्यास्तंयातिदिवाकरः तत्रदुर्गो
त्सवंकुर्यान्नकुर्यादपरेहनि दुर्भिक्षंतत्रजानीयान्नवम्यांयत्रपूज्यतेइति
तत्परादिनेदशम्यांनवम्यभावविषयं यदास्तोदयेनस्यान्नवमीचाप
रेहनी तथदाष्टमींशुक्लवीनसप्तम्यासहितानरूपेतितत्रैवस्पष्टमितिसंग्र

116A

प्रोक्तः उत्तरास्तिथयो यत्र क्षयं यांति नराधिप पूर्वाष्टमी तदा कुर्यादन्यथा त्व
शुभं भवेदिति दुर्गोत्सवोक्तेश्चेति मदनरत्ने वस्तुतस्तु इदं वचनद्वयं अष्टमीनव
म्योः सूर्योदयद्वयासंबंधपरं अन्यथा पूर्वोक्तविरोधादिति दिक् यत्तु अष्ट
मी च नवमी चाहं नावयोरंतरं क्वचित् सर्वसिद्धिप्रदास्ता मि भक्त्या यामर्चिताह
मिति देवीपुराणं तद्विद्धिकरणमध्ये पूजाविधानार्थं विधिं त्यक्त्वा महाष्ट
म्यां मम पूजां करोति यः तस्य पूजाफलं नस्यान्नेनाहमवमानतेति तद्गोवोक्तेरिति
निर्णयामृते तथा कालिकापुराणे सप्तम्यां पत्रिकापूजा अष्टम्यां चाप्युपोष
णं पूजा च जागरश्चैव नवम्यां विधिवद्बलिरिति अष्टम्युपवासश्च पुत्रवता न
कार्यः उपवासं महाष्टम्यां पुत्रवान्न समाचरेत् यथा तथा वा पूतात्मा व्रती देवीं प्रपू
जयेदिति तद्गोवोक्तेः रूपनारायणीये ब्राह्मे अष्टोर्थ्ये पूजनीया सा तस्मिन्नहनि मा
नवैः उपोषितैर्वस्त्रधूपमाल्यरत्नानुलेपनैः पक्वभिः पानकैः हृद्यै रात्रौ जा
गरणेन च दुर्गागृहे च रासाणि पूजितव्यानि पंडितैः वाद्यभोगानि चित्रा
णि कवचान्यायुधानि च अग विशेषो हेमाद्रौ निर्णयामृते च भविष्ये कन्या
गते सवितरि शुक्लपक्षेष्टमी युता मूलनक्षत्रसंयुक्ता सा महानवमी स्मृता

त्रि·सिं·
११८

117

नवम्यां पूजिता देवी ददात्यभिमतं फलं सा पुण्या सा पवित्रा च सा धन्या सुखदा
यिनी तस्यां सदा पूजनीया चामुंडा मुंडमालिनी सदैव भक्तैर्नित्यमपि तस्यां ब
लिरुपयुज्यंते प्राणिनो महिषादयः सर्वे ते स्वर्गं निर्यांति घ्नतां पापं न विद्यते याव
न्न चालयेच्छागं पशुस्तावन्न हन्यते न तथा बलिदानेन पुष्पधूपविलेपनैः य
था संतुष्यते मेषैर्महिषैर्विंध्यवासिनी एवं च विंध्यवासिन्यां नवरात्रोपवास
तः एकभक्तेन नक्तेन स्वशक्त्या याचितेन च पूजनीया जनैर्देवी स्थाने स्थाने पुरे
पुरे स्नातैः प्रमुदितैः हृष्टैः ब्राह्मणैः क्षत्रियैर्नृपैः वैश्यैः शूद्रैर्भक्तियुक्तैर्म्लेच्छैर
न्यैश्च मानवैः स्त्रीभिश्च कुरुशार्दूल तद्विधानमिदं शृणु जयाभिलाषी नृपतिः
प्रतिपत्प्रभृति क्रमात् लोहाभिसारकं कर्म कारयेद्यावदष्टमीमिति लोहाभि
सारकविधानं तत्रैवोक्तं प्रागुदक्प्रवणे देशे पताकाभिरलंकृतं मंडपं का
रयेद्दिव्यं नव सप्त करं परं षोडशहस्तमित्यर्थः आग्नेय्यां कारयेत्कुंडं हस्तमा
त्रं सुशोभनं मेखलात्रयसंयुक्तं योन्यश्वत्थदलाभया राजचिह्नानि सर्वा
णि शस्त्राण्यस्त्राणि यानि च आनीय मंडपे तानि सर्वाण्यप्यधिवासयेत् तत्र
स्थो ब्राह्मणः स्नातः शुक्लांबरधरः शुचिः ओंकारपूर्वकैर्मंत्रैः तल्लिंगैर्जुहुयात्

राम
११७

घृतं शताव्हमंत्रैर्होतव्यं पंचसंघृतसंस्कृतं कृतशेषं ततो रंगस्तोराजानमुपहार
येत् लौहाभिसारिकं कर्म तेनैव ऋषिभिः स्मृतं घृतयज्ञस्य पनानास्तान् गजा
श्व समलंकृतान् भ्रामयेन्नगरे नित्यं नंदिघोषपुरःसरं प्रत्यहं नृपतिः स्नात्वा
संपूज्यं पितृदेवताः पूजयेद्राजचिह्नानि फलमाल्यविलेपनैः तस्याभिसरणाच्छ
त्रो विजयः समुदाहृतः पूजामंत्रान्प्रवक्ष्यामि पुराणोक्तान् हं तव येः पूजि
ता प्रयच्छंति कीर्तिमायुर्यशो बलं अथ मंत्रा विष्णुधर्मोक्ताः छत्रस्य।
यथांबुदः छादयति शिवायेमां वसुंधरां तथाच्छादय राजानं विजयारोग्य वृ
द्धये चामरस्य शशांककरसंकाशक्षीरडिंडीरपांडुर। प्रोत्सारयाशु दुरितं चा
मरामरदुर्लभं अथाश्वस्य गंधर्वकुलजातस्त्वं माभूयाः कुलदूषकः।
ब्रह्मणः सत्यवाक्येन सोमस्य वरुणस्य च प्रभावाच्च हुताशस्य वर्द्धयत्वं तु
रंगमान् तेजसा चैव सूर्यस्य मुनीनां तपसा तथा रुद्रस्य ब्रह्मचर्येण पवन
स्य बलेन च स्मर त्वं राजपुत्रासि कौस्तुभं च मणिं स्मर यां गतिं ब्रह्महा गच्छे
त् मातृहा पितृहा तथा भूमिहा नृतवादी च क्षत्रियाश्च पराङ्मुखः सूर्याचंद्रम
सौ वायुर्यावत्पश्यंति दुःकृतं व्रज त्वं तां गतिं क्षिप्रं तच्च पापं भवेत्तव विकृते

यदि गच्छेयाः पुष्पाभुनितुरंगम रिपून्विजित्य समरे सहभर्त्रा सुखी भवेत् ।
अथ ध्वजस्य राज्ञः केतो महावीर्य श्यामवर्णाश्चैयास्य हं पक्षिराज नमस्ते त्वत्ता
यानारायणध्वज काश्यपेयात्मणमूतनागरे विष्णुवाहन अप्रमेय दुराधर्ष
रणे देवारिसूदन गरुत्मान्मारुतगतिस्त्वयि सन्निहितो यतः सार्वत्या
पुमश्चधान्यत्र रक्षांच चरिपून्दह अथ पाताकायाः अनन्तः वसवो रुद्रा वा
युः सोमो महर्षयः नागाः किन्नरगंधर्वयक्षभूतगणा ग्रहाः प्रमथास्तु महा
दित्यैर्भूतैः सोमातृभिः सह राज्ञः सेनापतिः स्कंदो वरुणश्चोश्रितत्त्वाय प्रहंत
रिपून् सर्वान् राजा विजयमृच्छतु यानि प्रयुक्तान् परिभिराद्धानि समंत
तः पतंतु परिशत्रूणां हतानि तव तेजसा हिरण्यकश्यपोर्द्धे युद्धे देवासु
रे तथा कालनेमिवधे यद्वद्यद्वत्त्रिपुरघातने शोभितासि यथैवाद्य शो
भयास्मान् संस्मर नीलान्वेतानिमान् दृष्ट्वा नश्यत्वाशु नृपारयः दह त्वाशु
रिपून् व्याधिभिर्विविधैर्घोरैः शस्त्रैश्च युधि निर्जिताः पूतना रेवती नाम्ना ।
कालरात्रिश्च या स्मृता दहत्वाशु रिपून्सर्वान् पताके त्वं ममार्चिता अथ ग
जस्य कुमुदैरावणौ पद्मः पुष्पदंतो यवामनः सुप्रतीकोंजनो नील

118A

एते हि देवयोनयः तेषां चैव ज्ञातयो ज्ञाश्च वनान्यद्रौ समाश्रिताः मंदो भद्रो मह्रा
श्चैव गजः संकीर्ण एव च वने वने प्रसूतास्ते यूथानि सुमहांति च पांतु त्वां व
सवो रुद्रा आदित्यास्समरुद्गणाः भर्तारं रक्षनागेंद्र त्वामिवस्य ति पाल्यतां अश्वाप्नु
हि जयं युद्धे गमने स्वस्तिनोव्रज श्रीस्ते सोमाद्बलं विष्णोस्तेजः सूर्याज्जवो निला
त स्थैर्यं मेरा जयं रुद्राघरो देवात्पुरंदरात् युद्धे रक्षं तु नागास्त्वां दिशश्च सह देवतैः
अश्विनौ सह गंधर्वैः पांतु त्वां सर्वतः सदेति अथ खड्गमंत्रः [illegible] सिर्विशसनः खड्
तीक्ष्णधारो दुरासदः श्रीगर्भो विजयश्चैव धर्मधारस्तथैव च इत्यानि तव नामानि
स्वयमुक्तानि वेधसा नक्षत्रं कृत्तिका तेन गुरुर्देवो महेश्वरः रोहिण्यश्च शरीरं ते
दैवतं च जनार्दनः पिता पितामहो देवस्त्वं मा पालय सर्वदा नीलजीमूतवर्णोका
शः तीक्ष्णदंष्ट्रः कृशोदरः भावशुद्धो मर्षणश्च अतितेजास्तथैव च इयं येन धृता
क्षोणी हतश्च महिषासुरः तीक्ष्णधाराय शुद्धाय तस्मै खड्गाय ते नमः अथ छुरिका
याः सर्वायुधानां प्रथमं निर्मितासि पिनाकिना शूलायुधाद्विनिः कृष्य कृत्वा
मुष्टिग्रहं शुभं चंडिका याः प्रदासि दत्तासि सर्वदुष्टनिवर्हिणी तया विस्तारिता
चासि देवानां प्रतिपादिता सर्वसत्त्वांगभूतासि सर्वाशुभनिवर्हिणी छुरिके

रक्ष मां नित्यं शांतिं च धन नमोस्तु ते अथ कटारकपूजा रक्षांगानि गजानां रभर
क्ष वाजिधानानि च मम देहं सदा रक्ष कटारक नमोस्तु ते कटारको मध्यदेशे कटा
रीति प्रसिद्धा धनुःपूजा सर्वायुधमहामात्र सर्वदेवारिसूदनः चाप मां समरे
रक्ष त्वं साकं शरवरैरिह घंटे त्वमेन रक्षार्थं संहायकरेण च त्रयीमूर्तिगतं देवधनु
रसंत्रन मां त्वहं कुंतपूजा प्रासपातपराक्रम त्वमनयानाकमायया गदस्माणजी
वितं ते वामम सैन्यं च रक्ष तं चर्मपूजा शर्मप्रद त्वं समरे चर्मसैन्ये च शोघमे र
क्ष मां रक्षणी योहं तापनेय नमोस्तु ते अथ दुंदुभिमंत्र दुंदुभि त्वं सपत्नानां घोषो हृ
दयवर्द्धनः भव भूमिप सैन्यानां तथा विजयवर्द्धनः यथा जलमृत्तघोषेण हा
हृष्यंति च बर्हिणः तथास्तु तव शब्देन हर्षोस्माकं मुदावह यथा जीमूतशब्दे
न स्त्रीणां त्रासोभिजायते तथा तवात्र शब्देन त्रस्यंत्व स्मद्विषो रणे अथ शंखमंत्र पुण्य
त्वं पुण्य शंखानां मंगलानां च मंगलं विष्णुना विधृतो नित्यं अतः शांतिप्रदो
भव अथ सिंहासनमंत्र विजयो जयदो जेता रिपुघाती प्रियंकरः दुःखहा
धर्मदः शांतः सर्वारिष्टविनाशनः एते वै सन्निधौ यस्मात्तव सिंहासन स्थिताः
तेन सिंहासने नित्यं वेदे मंत्रो [illegible] त्वयि स्थितः शिवः शांतस्त्वयि शक्रः

119A

सुरेश्वरः नमस्ते सर्वतोभद्र भद्रदो भवबन्धपतेः त्रैलोक्यजय सर्वस्व सिंहास
न नमोऽस्तु ते तथैव कर्मचिह्नानि स्थानिपद्मानि शिल्पिभिः लोहाभिसारिकं
कर्म कार्यं एवं मंत्रपूर्वकं नियमं कृत्वा तथाष्टम्यां प्रभाते स्नानमाचरेत् कुंकु
म चंदनं चंपकं चन्दनैः सुमैः शैलपिष्टैः सुचर्चितगात्री देवी कुसुमैरभ्यर्चयेत् वकुभिः
कुमुदैः सपद्मपुष्पैः सदीपधूपैः सनैवेद्यैः मांसैर्बलिभिरुपहारैर्मंगलशब्दैः सम
च्छलितैः विहृतच्छत्रैर्यानैः स्यन्दनैः शितशस्त्रधारिजनलोकैः तुष्टैः पक्षस्त्रादित
निवेद्यते सर्वमेव भगवत्यै दुर्गा सा पूजनीया च ताद्दिने द्रोणपुष्पकैः ततः
खड्गं नमस्कृत्य शत्रूणां वधसिद्धये रक्षेत विजयं राज्यं सुराभिषेकं चास्त्रे नृपः
पुनः पुनः प्रणम्यार्थी संस्मरन् हृदये शिवां सर्वहन्त्रे जितकोऽरण्य प्रवृष्ट्यां जगर
त्रिशि नटननृत्यगीतैश्च कारयेच्च महोत्सवं एवं हृष्टैर्निशां नीत्वा प्रभाते अरुणो
दये घातयेत् महिषान् मेषान् रक्तदत्तो नानकं परान् शतमर्धं शतं वापि तदर्धं वा
पयोध्या सुरासवभृतैः कुंभैस्तर्पयेत् परमेश्वरीं कापालिकेभ्यस्तद्देयं दासी
दासजनेन तथा ततोऽपराह्णसमये नवम्यां वै रथेस्थितं भवानीमामयेद्राष्ट्रं
स्वयं राजा सशब्दवान् कश्चित्चोपोषितो वीरो विधृतो न्येन खड्गवान् भर्ते

120 भ्यस्त्वबलिं दद्यान्मंत्रेणानेन सामिषं सरक्तं सजलं चान्नं गंधपुष्पाक्षतैर्युतं त्री
स्त्रीन्वारान्मूलेन दिग्विदिक्षु क्षिपेद्बलिं मंत्रश्च बलिं गृह्णंत्विमं देवा आदित्या व
सवस्तथा मरुतश्चाश्विनौ रुद्राः सुपर्णाः पन्नगा ग्रहाः असुरा यातुधानाश्च
पिशाचोरगराक्षसाः डाकिन्यो यक्षवेताला योगिन्यः पूतनाः शिवाः जृंभकाः
शांतिकर्तारो ब्रह्माद्याश्च महर्षयः मा विघ्नं मा च मे पापं मा संतु परिपंथिनः सौम्
या भवंतु तृप्ताश्च भूतप्रेताः सुखावहाः इति इति महाष्टमी महानवमी तु
पूर्वयुता ग्राह्या पूर्वोक्तवचनात् नवमी दुर्गाव्रते श्रावणीति दीपिकोक्तेः
श्रावणी दुर्गनवमी दूर्वा चैव हुताशिनी पूर्वविद्धा प्रकर्तव्या शिवारात्रिर्बले
र्दिनमिति हेमाद्रौ पाद्मोक्तेश्च भविष्येपि आश्वयुक्शुक्लपक्षे तु अष्टमी
मूलसंयुता सा महानवमी राम त्रैलोक्येपि सुदुर्लभेति मूलमुपलक्षणं दुर्गा
पूजासु नवमी मूलाद्यानक्षत्रयान्विता महती कीर्तिता तस्यां दुर्गा महिषम
र्दिनी इति मदनरत्ने लैंगात् अत्र पूजयेदित्यग्रे शेषः यानि तु सा कार्योदयगा
मिन्येति तिथ्याबुदयगामिन्यामित्यादि प्रागुक्तानि तानि नवमीभिन्नतिथिपरा
णि नवम्यां विशेषोक्तेः वेधश्च मुहूर्तत्रये ज्ञेयः यद्यपि हेमाद्रिमते मुहूर्त

120A

द्यात्मापिवेधोस्तितथापिसूर्योदयगावसः सायंतु त्रिमुहूर्त्तएव तदुक्तं दीपि
कायां त्रिमुहूर्त्तगातुसकलासायेइति माधवोपि सायंतुतरयात्तदस्य।
जयाद्वनविध्यतेइति तेनत्रिमुहूर्त्तयोगेपूर्वानवमी पूर्वोक्तवचनात् नकु
र्यान्नवमीतातदशम्यान्तुकदाचनेति स्कांदे परानिषेधाच्च त्रिमुहूर्त्तयोगा
भावेतुनिषिद्धापिपरैवकार्येतिनिःकर्षः यत्तु नवम्यांचजपेहोमंस
मीप्यप्रवणेपिचेतिसंग्रहोक्तेः व्रतेजागरश्चैवनवम्यांविधिवद्बलिरि
तिदेवीपुराणाच्चनवम्यांहोमबल्यादिविहितं तत्राष्टमुख्यत्वमुक्तं नवमीमुहू
र्त्तैवाकलायदि सातिथिःसकलाज्ञेयालक्ष्मीविद्याजपार्थिभिरिति सौ
रपुराणात् सूर्योदयेपरैरिक्ता पूर्णास्यादपरायदि वलिदानं प्रकर्त्तव्यं त
त्रदेशाष्टुभावहं वलिदाने ह्यत्रेष्टम्यां पुत्रभंगोभवेन्नृपेति मदनरत्ने देवीपुरा
णाच्च वल्यादौपराकार्यं उपवासादौतुपूर्वेति मदनरत्नेउक्तं व्रतीमार्त्ते
ऽप्येवं यत्तु अष्टम्यां वलिदानेन पुत्रनाशोभवेद्ध्रुवमितिकालिकापुराणं
तत्संधिपूजापरं अष्टमीनवमीसंधौ तत्तीयारवत्कपद्यतेइति तत्रैव
तदुक्तेः कामरूपनिवंधे अष्टम्याशेषदंडस्तु नवम्याः पूर्वएवच तत्रयाक्रि

पतो पूजा विहितो यासां महाफला अष्टमी पातो भवत्येव आश्विने पूजयित्वा तु अर्धरात्रे अष्टमीषु च घातयंति पशून् भक्त्या ते भवंति महाबला तथा कन्यासंस्थे रवावीशे शुक्लाष्टम्यां प्रपूजयेत् सोपवासो निशार्द्धे तु महाविभवविस्तरैः तथा पशुघातश्च कर्त्तव्यो गवलाजदधस्तथेति रूपनारायणीय देवीपुराणात् तथैव च विष्णु तस्मादियं महापुण्या नवमी पापनाशिनी उपोष्या सुप्रयत्नेन सततं सर्वपार्थिवैः निर्णयदीपेतु महानवमी पर दिने परा हि व्यापित्वे परा अन्यथा पूर्व आवर्त्तनात् पूर्वकालेन नवमी स्यात्परे दिने दुर्गोत्सवात तत्र पूर्वेद्युः पूर्वाह्ने त्वष्टमी प्रपदीति धौम्य वचनादित्युक्तं अस्य नवारा दनवमी विषयत्वे समूलत्वं च विमर्शं यानन्तु नंदायां ज्वालितो वह्निः पूर्णायां पशुघातनं भद्रायां गोकुलक्रीडा तत्र राज्यं विनश्यतीत्यादि नवम्यामपराह्णे तु बलिदानं प्रशस्यते दशम्यां वर्जयेत्तत्र नात्र कार्या विचारणेति नंदायादर्शने रक्षा बलिदानं दशासु च भद्रायां गोकुलक्रीडा देशनाशाय जायते इति ब्रह्मवैवर्त्त नारदादि वचनानि तानि मूलाधिक निषेधपराणीति मदनरत्ने तथा कालिकापुराणे नवम्यां बलिदानं तु कर्त्तव्यं वै यथाविधि जपहोमं च विधिवत्कुर्यात्तत्र विभूतये के

121A

श्चित्त पूर्वाषाढायुताष्टम्यां पूजाहोमाद्युपोषणमिति पूर्वोक्तदेवीपुराण
दष्टम्यां होममाहुः अन्ये तु द्विविधवाक्यबलादष्टम्यामारभ्य नवम्यां समाप
यंति समुच्चयस्तूपयुक्तः रुद्रयामले तु विकल्प उक्तः तत्तु निर्मूलं दुर्गाभक्तितरं
गिण्यादि गौडग्रन्थे त्वपि नवम्यां होम उक्तः होमे च विशेष उक्तो गमरत्ने पायसंस
र्पिर्वा युक्तं तिलैः शुक्लैर्विमिश्रितं होमयेद्विधिवद्ब्रह्मन्यावद्दशांशमन्त्रपो त्वम रुद्राध्याये
यथा होमं मंत्रेणैकेन साधयेत् तथा स्तोत्रजपे होमं श्लोकेनैकेन धारयेत् यद्याप
त्र शान्तौ जाप्यहोमे मंत्रो नवाक्षरः ऐं ह्रीं क्लीं चामुण्डायै विच्चे इति वाक्षर इति केचि
त् पूजोक्तो ग्राह्य इति तन्न युक्तं रुद्रयामलेऽपि प्रधानद्रव्यमुद्दिष्टं पायसान्नं तिलास्त
था विंशकैः सर्षपैः शुभैः लाजादूर्वाङ्कुरैरपि यवैर्वा श्रीफलैर्दिव्यैर्नानाविधफ
लैस्तथा रक्तचंदनखण्डैश्च गुग्गुलैश्च मनोहरैः प्रतिश्लोकं च जुहुयात् पायसान्न
ल सर्पिषेत्युक्तं दुर्गाभक्तितरंगिण्यां तु तिलैर्जयंती मंत्रेण च होम उक्तं पुरश्चर
णकार्ये तु बिल्वपत्रयुतैस्तिलैरिति कालिकापुराणे बिल्वपत्रैश्चेति स्मार्ताः
तत्र अग्रमानाभावात् अथ बलिदानं तत्र स्वमेध्यछागमहिषस्वमांसानां

उत्तरोत्तरप्राशस्त्यफलविशेषश्चान्यतोवसेयः इतिदिक् वलिप्रकारस्तुदे
वीपुराणे कन्यासंस्थेरवौशुक्लाष्टम्यांप्रपूज्यतु द्रोणपुष्पैश्चविल्व
मृजातीपुन्नागचंपकैः पंचाब्दलक्षणोपेतंगंधपुष्पसमन्वितं विधिवत्कालि
कालीतिजप्त्वाखड्गेनघातयेत् ॐकालिकालियज्ञेश्वरिलोहदंडायैनमइ
तिमंत्रं तदुत्थरुधिरंमांसंगृहीत्वा पूतनादिषु आदिशब्दाच्चरकीविदारीपा
पराक्षस्यः नैरृतेभ्यःप्रदातव्यंमहाकौशिकमंत्रितं मंत्रस्तुवक्ष्यते तथा तस्या
ग्रतोनृपः स्नायात्कृत्वाशत्रुंतुपैष्टकं खड्गेनघातयित्वातुदद्यात्स्कंदविशाखयोः
ब्राह्मणोब्राह्मणेनचकूष्मांडादिभिर्वलिदानंकार्यं तदुक्तंकालिकापुराणे कू
ष्मांडमिक्षुदंडंचमांसंसारसमेवच एतेवलिसमाःप्रोक्तास्तृप्तौछागसमाःसदा रुद्र
यामलेपिछागाभावेतुकूष्मांडंश्रीफलंवामनोहरं वस्त्रवेष्टितंकृत्वाछे
दयेत्छुरिकादिना तथा ब्राह्मणेनसदादेयंकूष्मांडंवलिकर्मणि श्रीफलं
वासुराधीशछेदनैवतुकारयेत् छेदेविकल्पः माषान्नेनवलिर्देयोब्राह्म
णेनविजानता कालिकापुराणे उत्तराभिमुखोभूत्वावलिंपूर्वमुखंतथा
निरीक्ष्यसाधकःपश्चादिमंमंत्रमुदीरयेत् पशुस्त्वंवलिरूपेणममभाग्यादुपस्थि

122A

।तः प्रणमामि ततः सर्वस्वरूपिणं वलिरूपिणं चंडिकाप्रीति[illegible]दानेन दानुराय छि
नाशने चामुंडा वलिरूपाय वले तुभ्यं नमोस्तु ते यज्ञार्थे वलयः सृष्टाः स्व
यमेव स्वयंभुव अतस्त्वां घातयाम्यद्य तस्माद्यज्ञे वधोऽवधः ऐं ह्रीं श्रीमि
ति मंत्रेण तं वलिं मत्स्यरूपिणं । चिंतयित्वान्यसेत्तुभ्यं मस्तकं तस्य तु भैर
वः रसनां तु चंडिकायाः सुरलोकप्रसाधकः ह्रीं ह्रीं खड्गेति मंत्रेण ध्यात्वा
खड्गं च पूजयेत् पूजयित्वा ततः खड्गं आं हुं फट् इति मंत्रकैः गृहीत्वा विम
लं खड्गं छेदयेद्वलिमुत्तमं ओं ह्रीं ऐं ह्रीं कौशिकीति रुधिरेण आप्यायतामिति
वलिदानेन दुर्गायाः सर्वत्रायं विधिः स्मृतः मत्स्यकैः नवम्यां पूर्ववत् पूजा
कर्तव्या भक्तिमिच्छता दक्षिणां वस्त्रयुग्मं च आचार्याय निवेदयेत् अथा
त्र प्रसंगाच्छ्रुत चंडीविधानमथोच्यते वाराहीतंत्रे संकटे समनुप्राप्ते दुश्चि
कित्स्यामये तथा जातिभ्रंशे कुलच्छेदे आयुषो नाश आगते वैरिवृद्धौ व्या
धिवृद्धौ धननाशे तथा क्षये तथैव विविधोत्पाते तथा चैवातिपातके कुर्या
द्यत्नाद्यत्नाद्वाति ततः संपद्यते शुभं श्रेयो वृद्धिः शतचंडीगोत्र वाद्धितायापरं (
मनसा चिंतितं देवि सिध्येदष्टोत्तराद्घतात् सहस्रावर्तनात् लक्ष्मीमावृणोति
स्वयं स्थिरा भुक्त्वा मनोरथान्कामं नरो मोक्षमवाप्नुयात् चंड्याः शतावृत्तिपा

ढाः सर्वाः सिद्ध्यंति सिद्धयः रुद्रयामले शतचंडीविधाने च प्रोच्यमानेश्रणुष्वतत्।
सर्वोपद्रवनाशार्थं शतचंडी समारभेत् षोडशस्तंभसंयुक्तं मंडपं पल्लवोज्ज्वलं व
स्रकोणयुतां देवीं मध्ये कुर्यात्त्रिभागतः पंक्तौ ष्टकचितां रम्यां मध्यभाये हस्तसं
मितां पंचवर्णैरजोभिश्च कुर्यान्मंडलकं शुभं पंचावर्णैर्वितानं च किंकिणी।
जालमंडिते आचार्येण समं विप्रान्वरयेद्दश सुव्रतान् ईशान्यां स्थापयेत्कुं
भं पूर्वोक्तविधिनाहरेत् वारुण्यां च प्रकर्तव्यं कुंडं लक्षणलक्षितं मूर्तिं देव्याः
प्रकुर्वीत सुवर्णस्य पलेन वै तदर्द्धेन तदर्द्धेन तदर्धेन महामते अष्टादशभु
जां देवीं कुर्याद्वा अष्टकरामपि पट्टकूलयुगच्छन्नां वेदीमध्ये निधापयेत् देवीं
संपूज्य विधिवज्जपं कुर्युर्दश द्विजाः शतमादौ शतं चांते जपेन्मंत्रेन वाह्णिकं
चंडीसप्तशतीमध्ये संपुटोयमुदाहृतः एकं द्वे त्रीणि चत्वारि जपेद्दिनचतुष्ट
यं रूपाणि क्रमशस्तद्वत्स्वजनादिकमाचरयेत् पंचमे दिवसे प्राप्ते होमं कुर्यात्
विधानतः गुडूची पायसं दूर्वा तिलान्बिल्वान्यवानपि चंडीपाठस्य होमं तु
प्रतिश्लोकं दशांशतः होमं कुर्याद्ग्रहादिभ्यः समिदाज्यचरून्क्रमात् कृत्वा
पूर्णाहुतिं दद्याद्द्विजेभ्यो दक्षिणां क्रमात् कपिलां गां नीलमणिं श्वेताश्वं छ

123A

त्र चामरे अभिषेकं ततः कुर्याद्यजमानस्य ऋत्विजः एवं कृते मरेशानसर्व
सिद्धिः प्रजायते इति अथ सहस्रचंडी साच तत्रैवोक्ता सहस्रचंडीविधानम्
लु विष्णोर्मिहामते राज्यभ्रंशे महोत्पाते जनमारे महाभये गजमारे श्वमारे च पर
चक्रभये तथा इत्यादिविविधे दुःखे क्षयरोगादिजे भये सहस्रचंडिकापाठं कुर्या
त्कारयेत्तथा जापकापाठकास्थाप्याः शय्यादानं तथैव च सप्तन्यग्रोधाचभद्रा
नं श्वेताश्वं च मनोहरं पंचनिष्कामितास्वर्ति कर्तव्याचार्धमानतः अष्टाद
शभुजादेवी सर्वाघुधविभूषिता अवारितान्नदानं च सहस्रं प्रत्यहं विभो एते
वा नियताहारः पयः पानेन वर्तयेत् एवं चंडिकापाठं सहस्रं तु समाचरेत् त
स्य स्यात्कार्यसिद्धिस्तु नात्र कार्या विचारणेति एतद्वचं पद्यपि महानिबंधेषु ना
स्ति तथापि प्रवरद्वैतत्वादुक्तमितिदिक् पाठात्सर्वाः सिध्यंति सिद्धयः इति शत
चंडीसहस्रचंडीसहस्रचंडीविधिः अथ नवरात्रपारणानिर्णयः साच दशा
म्यां कार्या आश्विने मासि शुक्ले तु कर्तव्यं नवरात्रकं प्रतिपदादिक्रमेणैव
यावच्च नवमी भवेत् त्रिरात्रं वापि कर्तव्यं सप्तम्यादिय पक्रममिति हेमाद्रौ
सोम्यवचनात् नवमीति पिपर्यंतं तत्रापूजाजयादिकं इति प्रागुक्तवचने

र्नवमीपर्यंतं प्रधानभूतमर्चनाद्युक्तेरुपवासादेरंगत्वेन तत्पर्यंतत्वात् अत्रादि
शब्देनोपवासोक्तेः पूर्वोक्तत्रिरात्रव्रतेन नवम्या अप्युपोष्यत्वाच्च नवपारणा
तत्वेन त्रिरात्रत्वं विष्णुत्रिरात्रादौ तथाप्रशक्तेः न चात्रोपवासो मानाभावो
इति वाच्यं एवं च विंध्यवासिन्यां नवरात्रोपवासतः एकभक्तेन नक्तेन तथैवा
याचितेन च पूजनीया जनैर्देवी स्थाने स्थाने पुरे पुरे इति हेमाद्रौ भविष्योक्तेः
नवरात्रसमाख्याता नवम्या अप्युपोष्यत्वाच्च ननु तिथिह्रासेष्टावष्टौ वासा
भवंति कथं समाख्या तेन कर्मविशेषे नवरात्रशब्दो रूढः अत एवोक्तं देवीपुरा
णे तिथिवृद्धौ तिथिह्रासे नवरात्रमपार्थकमिति चेन्न तिथिह्रासेपि नवति
थीनामुपोष्यत्वान्नवरात्रत्वाक्षतेः एतेन नवरात्रीणां प्राधान्यात् ह्रासे अमामादाप
नवत्वमिति गौडोक्तिः परास्ता यत्तु देवीपुराणे कन्यासंस्थे रवौ शक्र शुक्लामारभ्य नं
दिकां अयाची ह्येकभक्ते वा नक्ताशी अथवा पदकृत् इति व्रतचतुष्टयमुक्तं तल्लोकसार
भिसारकविषयं तस्य जायाभिलाषी नृपतिः प्रतिपत्प्रभृतिक्रमात् लोकाभिसा
रकं कर्म कारयेत् यावदष्टमी मितिभविष्योक्तेः अष्टमीपर्यंतमेवोक्तेः रूपनारायणे
नतु नंदादिव्रतप्रयोगं रुपगेवोक्तम् तस्य नवम्यां पुराणमुक्तं यद्देपि निर्णये

124A

आश्विने शुक्लपक्षे तु नवरात्रमुपोषितः नवम्यां पारणं कुर्याद्दशमीमिश्रिता न
चेत् दशमीमिश्रिता यत्र पारणे नवमी भवेत् दुःखदारिद्र्यदा ज्ञेया तत्र पारणतः वि
नाशिनीति ब्राह्मणालिखितं वचनं यत्तु तदुपासनेऽइति वदंति अष्टम्या सह कार्या
स्यात् नवमी पारणादिने यो मोहात् दशमीवेधे नवम्यां चंडिकां यजेत् पारणं च प्रकु
र्याद्वै तस्य पुण्यं निरर्थकं नवम्यां पारिता देवी कुलवृद्धिं प्रयच्छति दशम्यां पारिता
देवी कुलनाशं करोति वै तस्मात् पारणं कुर्यान्नवम्यां विबुधाधिप इत्यादीनि तानि
यदि समूलानि तदा होमाभिसारकनंदादिव्रतचतुष्टयविषयाणि तस्याष्टमीप
र्यंतमेवोक्तेरित्युक्तं प्राक् अन्यथा महाष्टम्यां परविद्धायां पारणविधाने पूर्वं निवे
दितो विरोधो दुर्वारः स्यात् यानि तु केश्चिल्लिखितानि नवम्यां पारणविधायकानि
वचनानि तानि हेमाद्र्यादिविरुद्धत्वान्निर्मूलानि समूलत्वेपि पदादिनद्वये नवमी
तदा द्वितीयदिने उपोष्य तृतीयदिने पारणा न किंतु नवमीमध्ये कार्येत्येवं नेयानि शि
वरात्रिपारणावत् अत्र केचित् पारणे हि सूतकादिप्राप्तौ तदंतिक्रमस्य पारणं कु
र्यादित्याहुः तन्न इदं काम्योपवासेऽप्रक्रांते त्वं तत्रारम्भ तस्तु तके नग काम्यव्रतं

कुर्याद्दानार्चनविवर्जितमिति माधवीकौर्मोक्तेः व्रतयज्ञविवाहेषु श्राद्धे हो
मेर्चने जपे प्रारब्धे सूतकं न स्यादनारब्धे तु सूतकं इति विष्णुवचनाच्च शौचे
मध्येपि कर्तव्यतावगतेः पारणांतत्वाद्व्रतस्य प्रारंभस्तु तेनैवोक्तः प्रारंभो वरणं
यज्ञे संकल्पो व्रतसत्रयोः नांदीमुखं विवाहादौ श्राद्धे पाकपरिक्रियेति रुद्रयाम
लेपि सूतके पारणं कुर्यान्न च संध्याहोमपूर्वकं तदंते भोजयेद्विप्रान् दानं दद्याच्च
शक्तित इति तदंते सूतकांते एवं स्त्रीभिरपि रजोदर्शनमध्ये कार्तिक्यामेव पारणं
संप्रवृत्तेपि रजसि न त्याज्यं द्वादशीव्रतमिति माधवीये ऋष्यशृंगवचनात् द्वाद
शीव्रतमित्युपलक्षणं प्रारब्धदीर्घतपसां नारीणां यद्रजो भवेत् न तत्रापि व्र
तस्य स्यादुपरोधः कदाचिनेति तत्रैव सत्यव्रतवचनात् किंच एकादश्यादे च
पंचधा शौचपाते मासांते पारणापत्तिः मासोपवासांते पंचधा शौपाते जीव
नारंभवश्च यत्तु नियमास्था यदा नारी प्रपश्येदंतरा रजः उपोष्यैव तु नारा
त्रीस्नात्वा शौचं चरेद्व्रतमित्यंगिरोवचनं यच्च हारीतवचनं नियमस्था व्रतस्था
स्त्रीरजः पश्येत्तायचन त्रिरात्रं नाक्षिपेदूर्ध्वं व्रतशेषं समापयेत इति तद्विधवो
पवासविषयं तासां तत्र भोजननिषेधादिति केचित् वयंतु प्रागुक्तसत्यव्र

125A

तवचने दीर्घतपसामिति विरोधे लोपादानाद्द्वादशीव्यतिरिक्तसकलैकदेशोपवा
सविषयोयं निषेधः त्रिरात्रिनवरात्रादिदीर्घव्रतेषु तु रजोमध्येपि पारणेति ब्रूमः
अशौचमध्ये तु सर्वोपि पारणं भवति प्रागुक्तकौर्मवचनादिति सिद्धं अयं चो
पवासपारणानिर्णयः सर्वव्रतेषु बोधव्यः रत्यलभ्यवसा दशम्यं देवीं विसर्जयेत्
तदुक्तं दुर्गाभक्तितरंगिण्यां देवीपुराणे ततः प्रातः पूजयित्वा दशम्यां विधिपू
र्वकं संप्रेषणं तु कर्तव्यं गीतवादित्रनिःस्वनैः रूपं देहि यशो देहि भगं भगवति
देहि मे पुत्रान्देहि धनं देहि सर्वान्कामांश्च देहि मे महिषघ्नि महामाये चामुंडे मुं
डमालिनि आयुरारोग्यमैश्वर्यं देहि देवि नमोस्तु ते इति संप्रार्थ्य देवीं तु ततः उत्था
पयेद्बुधः उत्तिष्ठ देवि चंडेशि शुभां पूजां प्रगृह्य च कुरुष्व मम कल्याणमष्टाभिः श
क्तिभिः सह गच्छ गच्छ परं स्थानं स्वस्थानं देवि चंडिके व्रज स्रोतोजलं वृद्ध्यै स्थीयतां च
जले त्विहेति उत्थाप्य जलं नीत्वा दुर्गे देवि जगन्मातः स्वस्थानं गच्छ पूजिते संवत्सरे
व्यतीते तु पुनरागमनाय वै इमां पूजां मया देवि यथाशक्त्योपपादितां रक्षार्थं त्वं
समादाय व्रज स्वस्थानमुत्तममिति जले प्रवाहयेत् इयमेव विजयदशमी सा च द्वि
तीयादिने श्रवणयोगाभावे पूर्वा ग्राह्या तदुक्तं हेमाद्रौ स्कांदे दशम्यां तु नरैः सं

न्यकुसुमाञ्जिनीयापराजिता ऐशानीं दिशमाश्रित्य अपराह्णे प्रयत्नतः या पूर्णा नव
मीयुक्ता तस्यां पूजापराजिता क्षेमार्थं विजयार्थं च पूर्वोक्तविधिना नरैः नवमीशे
षयुक्तायां दशम्यामपराजिता ददाति विजयं देवी पूजिता जयवर्द्धिनी तथा आश्विने शु
क्लपक्षे तु दशम्यां पूजयेन्नरः एकादश्यां न कुर्वीत पूजनं चापराजितमिति यदा तु पू
र्वदिने श्रवणयोगाभावः परदिने चाल्यापितयोगिनी तदा परैव तथा च हेमाद्रौ व्रत
काण्डे कश्यपः उदये दशमी किंचित्संपूर्णैकादशी यदि श्रवणर्क्षं यदा काले सा तिथि
र्विजयाभिधा श्रवणर्क्षे तु पूर्णायां काकुत्स्थः प्रस्थितो यतः उल्लङ्घयेयुः सीमानं
तद्दिनर्क्षे ततो नरा इति काले पराह्णे परदिने पराह्णे श्रवणाभावे तु सर्वपक्षेषु पूर्वैव
मदनरत्ने एवं ज्योतिर्निबन्धे रत्नकोशे च नारदः ईषत्संध्यामतिक्रान्तः किंचिदुद्भि
न्नतारकः विजयो नाम कालोयं सर्वकार्यार्थसिद्धिदः इषस्य दशमीं शुक्लां पूर्व
विद्धां न कारयेत् श्रवणेनापि संयुक्तां राज्ञां पट्टाभिषेचने सूर्योदये यदा राजन्
दृश्यते दशमी तिथिः आश्विने मासि शुक्ले तु विजयां तां विदुर्बुधाः अत्रायं नि
र्गलितार्थः अपराह्णो मुख्यः कर्मकालः तत्रैव पूजायुक्तेः प्रदोषो गौणः तत्र
दिनद्वये अपराह्णव्यापित्वे पूर्वा प्रदोषव्याप्तेराधिक्यात् दिनद्वये प्रदोष।

126A

श्वाश्विनेपरा अपराह्णे श्वाश्वेराधिक्यात् श्रवणस्तु रोहिणीवद् प्रयोजकः दिन
द्वयेपराह्णास्पर्शेतु पूर्वा तत्रापिपर दिनेपराह्णे श्रवणसत्त्वेपरे ति दिक् अत्रवि
शेषो भार्गवार्चनदीपिकायां भविष्ये शमीपूजनंजन्नपेभ क्लानामभयंकरं अर्च
यित्वा शमीवृक्षमर्चयेच्च ततः पुनः शमीमंत्रस्तु हेमाद्रौगोपथब्राह्मणे अमं
गलानां शमनीं शमनीं दुष्कृतस्यच दुःस्वप्ननाशनींधन्यां प्रपद्येहंशमींशुभां
तथा भविष्ये शमीशमयतेपापं शमीलोहितकंटिका धारिण्यर्जुनबाणानां
रामस्यप्रियवादिनी करिष्यमाणयात्रायां यथाकालं सुखंमया तत्रनिर्वि
घ्नकर्त्रीत्वंभवश्रीरामपूजितेइति तथागृहीत्वासाक्षतामार्द्रां शमीमूलगतांमृ
दं गीतवादित्रनिर्घोषैरानयेत्स्वगृहं प्रति ततो भूषणवस्त्रादि धारयेत्स्वज
नैससहेति ततन्नलनीराजनमुक्तं हान्यस्त्वे तत्रमंत्र चतुरंगवलंमह्यं निरावि
ष्टं व्रजत्विह सर्वत्रविजयोमेस्तु त्वत्प्रसादात्सुरेश्वरी गौडनिवंधे ज्योतिषे कृ
त्वानीराजनंराजाबलवृद्ध्ययथाक्रमं शोभनंखंजनंपश्येज्जलगोगोष्ठ
संनिधौ अस्यफलानिशुभाशुभदेशास्तत्रैवज्ञेयाः आश्विनपौर्णमा
सीपराग्राह्या सावित्रीव्रतमंतरेण भवतो मापोर्णमास्योपरेइतिदीपिको।

क्तेः अत्र विशेषस्तिथितत्त्वे लैंगे आश्विने पौर्णमास्यां तु चरेज्जागरणं निशि
कौमुदी मास माख्याता कार्या लोकैर्विभूतये कौमुद्यां पूजयेल्लक्ष्मीमिंद्रमै
रावतस्थितं सुगंधिर्निशि सद्वेषः अक्षैर्जागरणं चरेत् तथा निशीथे वरदा ल
क्ष्मीः कोजागर्तीति भाषिणी तस्मै वित्तं प्रयच्छामि अक्षैः क्रीडां करोति यः त
त्रैवाश्वयुजीकर्मोक्तमाश्वलायनेन आश्वयुज्यामाश्वयुजीकर्मेति तच्चैतत्प
र्वणि कार्यं विकृतित्वात् आग्रयणं तु पर्वणि कार्यं शरद्याग्रयणं नाम पर्वणि
स्यात्तदुच्यते इति शौनकोक्तेः तत्रापि विशेषः पर्वणि कार्यमिति प्रागुक्तं तच्च द
र्शपूर्णमासयोरेककर्मत्वेनैकद्रव्यनियमात् दर्शारब्धाः परं पौर्णमासे व्याप्त
प्रागमेव तिरिति हेमाद्र्यादयः व्रीहिभिरिष्ट्वा व्रीहिभिरेव यजेतापयवेभ्यः इति श्रु
तेस्तद्ग्रहणे केस्मृतिपादेस्यष्टं दर्शेष्ट्याः परमुक्तमाग्रयणकं प्राक्पौर्णमासाच्च
तदिति दीपिकोक्तेश्च तच्चाग्रयणं त्रेधा व्रीह्याग्रयणं यवाग्रयणं श्यामाका
ग्रयणं चेति एषां कालः सूक्तो गृह्ये मेधी व्रीहिभिः एवाभ्यां शरद्वसंतयोर्यजेत
श्यामाकैर्नीवारैर्वर्षास्वापत्काले नान्येन पुराणैर्वेति आपस्तंबोपि व
र्षासु श्यामाकैर्यजेत शारदं व्रीहिभिर्वसंते यवैर्यथर्तु वेणुयवैरिति तत्रापि
श्यामाकाग्रयणमानेन्यमिति नरेतु अनाहिताग्नेर्नित्यं यवाग्रयणं च कार्यमि

127A

तिस्मार्तवृत्तावुक्तत्वात् सूत्रे व्रीहिप्रवदेवतासंबद्धानामेवमंत्राणामाम्नानाच्च आ
हिताग्नेस्तूक्तयवाग्रयणस्याप्यनित्यत्वं अग्रपिवा क्रियायवेष्विति सूत्रात् यद्वा व्रीह्या
ग्रयणेन समानतंत्रता स्यामावे तत्र प्रस्तरं कुर्यान्नाग्रयणं यदि वा तदपि समा
नतंत्रता स्यामित्यादि नारायणवृत्तौ परिशिष्टमवतां सुलभमित्यलं इदं च पूर्वा
भावे देवनक्षत्रे कृत्तिकादिविशाखांते कार्यमिति स्मृत्यर्थसारे उक्तं बौधा
यनीकेशवस्वामिनाप्येवमुक्तं यदा त्वेतदाश्विनपौर्णमास्यां क्रियते तदे
ककालत्वादाग्रयणकर्मणोस्य च समानतंत्रता भवति तदेतत्तद्वृत्तिकृता
ऽऽग्रयणकवर्हिरिध्माद्यैर्नित्यसूत्रेस्य दृष्टमुक्तं अस्याकरणे प्रायश्चित्तमुक्तं अस्य ति
चंद्रिकायां कात्यायनेन नित्ययज्ञान्यपेचैव वैश्वदेवहयस्य च अनिष्ट्वा नवयज्ञे
न नवान्नप्राशने तथा भोजने पतितान्नस्य चरुर्वैश्वानरो भवेत् कारिकापि
अकृताग्रयणोश्नीयान्नवान्नं यदि वै नरः वैश्वानराय कर्तव्यश्चरुः पूर्णाहुति
स्तथैवेति जलाग्निविधाने तु समिंद्रगायामंत्रेण वर्षैर्वर्षैर्जपेदुक्तं आग्रयणं यदा
स्यन्नं तदा संपूर्णमेतितादेतुक्तं एतच्चापद्धिमलमासे कार्यमन्यथा नेति प्र
युक्तं अन्योप्याहिताग्न्यादिविशेषः कौस्तुभादेर्ज्ञेयः संक्षेपस्तु इति श्री

भट्टकमलाकरकृते निर्णयसिंधौ आश्विनमासः अथ कार्त्तिकः तुला
संक्रमे प्रागपरा दश घटिकाः पुण्याः रात्रौ प्रागुक्तं अथ कार्त्तिकस्नानं तत्र
पृथ्वीचंद्रोदये विष्णुस्मृतिपाद्मयोः तुलामकरमेषु प्रातःस्नानं विधीयते ॥ हवि
ष्यं ब्रह्मचर्यं च महापातकनाशनमिति सौरमास उक्तः प्राप्यास्त्रे तदेवाद्वियंते
दाक्षिणात्यास्तु आश्विनस्य तु मासस्य या शुक्लैकादशी भवेत् कार्त्तिकस्य व्रता
नीह तस्यां वै प्रारभेत्सुधीरिति यामोक्तेर्भार्गवार्चने च प्रारभ्यैकादशीं शुक्लां मा
श्विनस्य तु मानवः प्रातःस्नानं प्रकुर्वीत यावत्कार्त्तिकभास्करः इति विष्णुरहस्यो
क्तेश्च हेमाद्रौ चादिपुराणे पूर्णे आश्विने युजे मासि पौर्णमास्यां समाहितः इत्युक्तेः का
मासं समग्रं परया च भक्त्या समाप्यते कार्त्तिकपौर्णमास्यामित्युक्तेर्विधानं चाश्वि
न शुक्लैकादश्यां पौर्णमास्यां वारभ्य कार्त्तिकशुक्लद्वादश्यां पौर्णमास्यां वा समा
पयेदित्याहुः मदनपारिजाते विष्णुः कार्त्तिकं सकलं मासं नित्यस्नायी जितें
द्रियः जपन् हविष्यभुक्शांतः सर्वपापैः प्रमुच्यते अत्र देशविशेषः पाद्मे का
र्त्तिकं प्रक्रम्य कुरुक्षेत्रे कोटिगुणं गंगायामपि तत्समः ततोधिकः पुष्करे स्याद्
द्वारवत्यां च भार्गव पुण्या पयस्विनी सैव मुनयो मथुराधिका दुर्लभः कार्त्तिको

128A

विप्रामप्युशयांनत्त्रणामिह यत्रार्चितः स्वकंरूपं भक्तेभ्यः संप्रयच्छतीति इदंच
स्नानं काशीस्थपंचनदेप्यतिप्रशस्तं शतं समास्तपस्तप्त्वा कृते यत्प्राप्यते फलं ।
तत्कार्तिके पंचनदे सकृत्स्नानेन लभ्यते कार्तिके विंदुतीर्थे यो ब्रह्मचर्यपराय
णः स्नास्यत्यनुदिते भानौ भानुजात्तस्य भीः कुतः इत्यादिकाशीखंडोक्तेः भानुजो यु
मः स्नानमंत्राश्च तत्रैव कार्तिकेहं करिष्यामि प्रातःस्नानं जनार्दन प्रीत्यर्थं तव देवे
श दामोदर मया सह इमं मंत्रं समुच्चार्य मौनी स्नायाद्व्रती नर इति अर्घ्यमंत्रोपि तत्रैव ।
व्रतिनः कार्तिके मासि स्नातस्य विधिवन्मम गृहाणार्घ्यं मया दत्तं दनुजेंद्रनिषूद
न नित्यनैमित्तिके कृष्ण कार्तिके पापनाशने गृहाणार्घ्यं राधया सहितो हरे इमौ मं
त्रौ समुच्चार्य योर्घ्यं मह्यं प्रयच्छति सुवर्णरत्नपुष्पाद्यैः पूर्णं शंखेन पुण्यवान् सुवर्ण
पूर्णा पृथिवी तेन दत्ता न संशय इति एवं संपूर्णस्नानाशक्तौ स्मृत्वा स्नायात् वाराणस्या
पंचनदे सकृत्स्नानात्कार्तिके अमी ते पुण्यवपुषः पुण्यभाजो तिनिर्मला इति काशी
खंडोक्तेः अथ मालाधारणं तत्र स्कांदे द्वारकामाहात्म्ये निवेद्य केशवे मालां तुल
सीकाष्ठसंभवां वहते यो नरो भक्त्या तस्य नैवास्ति पातकं न जह्यात्तुलसीमालां ।
धात्रीमालां विशेषतः महापातकसंहर्त्री धर्मकामार्थदायिनी विष्णुधर्मे स्पृशे

नुयानिलोमानिधात्रीमालाकलेवरणां तावद्वर्षसहस्राणिवैकुंठेवसतिभ्र
वेत् मालायुग्मंयोनित्यंधात्रीतुलसीसंभवं वहतेकंठदेशेतुकल्पकोटिदिवं
वसेत् तुलसीकाष्ठसंभूतेमालेकृष्णजनप्रिये बिभर्मित्वामहंकंठेकुरुमांकृ
ष्णवल्लभं एवंसंप्रार्थ्यविधिवन्मालांकृष्णगलेर्पितां धारयेत्कार्तिकेयोवैसग
च्छेत्वैष्णवंपदं इति यथाकाशीखंडे कार्तिकेमासिमेयात्रायैः स्नात्वाभक्तितत्परैः विं
दुतीर्थेस्नानस्त्तेनैस्तेषांमुक्तिर्नदूरतः भार्गवार्चनदीपिकायांनृसिंहपुराणे स्नग
स्तिकुसुमैर्देवयोर्चयेच्चजनार्दनं दर्शनात्तस्यदेवर्षेनरकंनाश्नुतेनरः। विहायस
र्वपुष्पाणिमुनिपुष्पेणकेशवं कार्तिकेयोर्चयेद्भक्त्यावाजपेयफलंलभेत्
स्कांदेकार्तिकेमाहात्म्ये मालतीमालयाविष्णुःकेतक्याचैवपूजितः समाःसह
स्त्रंसुप्रीतोभवतेमधुसूदनः पृथ्वीचंद्रोदयेपाद्मे कार्तिकेनार्चितःयैस्तुकम
लैःकमलेक्षणः जन्मकोटिषुविप्रेंद्रनतेषांकमलागृहे तथा कार्तिकेकेशवे
पूजा तेषांनामास्तुतैःस्नाताः तेनिर्भत्स्यरवेःपुत्रंवसंतित्रिदिवेसदा तुलसीद
ललक्षेणकार्तिकेयोर्चयेद्धरिं पत्रेपत्रेमुनिश्रेष्ठमौक्तिकंलभतेफलं तथास्कां
देकार्तिकमाहात्म्ये धात्रीछायांतुयःकुर्यात्पिंडदानंमहामुनेमुक्तिंप्रयांतिर

129A

पितरः प्रसादान्माधवस्य तु धात्रीफलविलिप्तांगो धात्रीफलविभूषणः धा
त्रीफलकृताहारो नरो नारायणो भवेत् धात्रीछायां समाश्रित्य योर्चयेच्चक्रधा(
रिणं पुष्पेपुष्पेश्वमेधस्य फलं प्राप्नोति मानवः तथा स्कांदे कार्त्तिके मासि विप्रें
द्र धात्रीवृक्षोपशोभिते वने दामोदरं विष्णुं चित्रान्नैस्तोषयेद्विभुं मूलेन पायसा(
न्नाद्य होमं कुर्याद्विचक्षणः ब्राह्मणान् भोजयेच्च तथा स्वयं भुंजीत बंधुभिरिति
तथा कार्त्तिके द्विदलव्रतं प्रागुक्तं कार्त्तिके द्विदलं त्यजेदिति पाद्मेपि कार्त्तिक
माहात्म्ये राजिकां मादकं चैव नैवाद्यात्कार्त्तिकव्रती द्विदलं तिलतैलं च तथा
न्नमातिदूषणं स्कांदेपि कार्त्तिके वर्ज्जयेत्तद्वद्द्विदलं बहुबीजकं माषमुद्ग(
मसूराश्च चणकाश्च कुलत्थकाः निष्पावा राजमाषाश्च आढक्यो द्विदलं स्मृ
तं अन्नान्यपि जीर्णानि सर्वाण्येतानि वर्जयेत् अत्र केचित् उत्पन्ने सम
ये दलद्वयं यस्य भवति तत् अतः पूर्वं गत्या द्विदलमुच्यते इत्याहुः उदाहरंति च (
बीजमेव समुद्भूतं द्विदलं चांकुरं विना दृश्यते यत्र सस्येषु द्विदलं तन्निगद्यते (
अन्ये तु लक्षणाप्रमाणाभावात् वचनस्य च निर्मूलत्वाद्द्विदलात्मकं यस्य सस्यस्य रूपं
तदेव वर्जयेदित्याहुः तथा नारदीये कार्त्तिके वर्जयेत्तैलं कार्त्तिके वर्ज्जयेन्मधु

कार्त्तिके वर्जयेत्कांस्यं कार्त्तिके शुक्रसंधितं कांस्यं तत्पात्रभोजनं भुक्तं पर्यु
षितं संधितं लवणं शा तत्रैव कार्त्तिके विष्णुमस्त्यगेरे दीपदानाद्दिवं व्रजेत् त
था कार्त्तिके तु कृत्ता दीक्षा नृणां जन्मविमोचनी तथा कार्त्तिके कृच्छ्रसेवीयः प्राजा
पत्यपरोयं प्यावा एकांतरोपवासी च त्रिरात्रोपोषितोपि च षड्रात्रद्वादशपक्षं वामा
सं वाचरवर्णिति एकभक्तेन नक्तेन तथैवायाचितेन वा उपवासेन भैक्षेण व्रजते
परमं पदं अन्येपि नियमाः प्रागुक्ताः गत्राद्यमुक्तं स्कांदे व्रीहयो यवगोधूमाः
प्रियंगुतिलशालयः एते हि सात्विका प्रोक्ताः स्वर्गमोक्षफलप्रदः काशीखंडे
ऊर्जे यवान्नमश्नीयादेकान्नमथवा पुनः हंताकं सूरणं चैव शूककरीशिंबीश्च व
र्जयेत् पष्ठीचंद्रादये पाद्मे नोर्जे वंध्यो विधातव्यो व्रतिना केनचित् क्वचित्
अप्यनारदीये अव्रतेन क्षपेद्यस्तु मासं दामोदरप्रियं । तिर्यग्जोनिमवाप्नोति
नात्र कार्यविचारणा अन्यान्यपि तांबूलतैलकेशकर्तनादिवर्जनसंकल्प
रूपाणि प्रागुक्तानि तथा कार्त्तिके आकाशदीप उक्तो निर्णयामृते पुष्करपु
राणे तुलायां तिलतैलेन सायंकाले समागते आकाशदीपं यो दद्यान्मासमे
कं हरिं प्रति महितां श्रियमाप्नोति रूपसौभाग्यसंपदमिति तद्विधिश्च

130A

हेमाद्रौ आदिपुराणे दिवाकरेस्ताचलमौलिभूते गृहादद्दूरे पुरुषप्रमाणं ।
प्रयामतिर्यग्ज्वितवह्निदारुमारोप्य भूमावथ तस्य मूर्ध्नि काचाचनस्त्रोष्टदलाकृ
तिस्फुटयाभिर्भवेदष्टदिशानुसारी जात्यकर्णिकायां तु महाप्रकाशो दीपः प्रदे
योदलगास्तथाष्टौ निवेद्य धर्माय हराय भूम्यै दामोदरायाप्यथ धर्मराज्ञे
प्रजापतिभ्यस्त्वथ धर्मराज्ञे प्रजापतिभ्यस्त्वथ सत्पितृभ्यः प्रेतेभ्य एवाप्यत
मःस्थितेभ्यः इति अपरार्के त्वन्यो मंत्र उक्तः । यथा दामोदराय नभसि तुला
यां लोलया सह प्रदीपं ते प्रयच्छामि नमोनंताय वेधसे इति कार्त्तिक कृष्ण चतु
र्थी करकचतुर्थी सा चंद्रोदयव्यापिनी ग्राह्या तत्रैव पूजाद्याम्नानात् कार्त्ति
क कृष्ण द्वादशी गोवत्ससंज्ञा सा प्रदोषव्यापिनी ग्राह्या दिनद्वये तत्त्वे पूर्वा यु
गमवाक्यात् तत्र पूजा वटस्यैव कर्त्तव्या प्रथमे हनी इति निर्णयामृतेभिधाना
च्च अत्र विशेषो मदनरत्ने भविष्ये सवत्सां तुल्यवर्णां च शीलिनीं गां पयस्वि
नीं चंदनादिभिरालिप्य पुष्पमालाभिरर्चयेत् अर्घ्यं ताम्रमये पात्रे कृत्वा पुष्पा
क्षतैस्तिलैः पादमूले न दद्यात् वै मंत्रेणानेन पांडव क्षीरोदार्णवसंभूते सुरासुरन
मस्कृते सर्वदेवमये मातर्गृहाणार्घ्यं नमो नमः ततो माषादिसंसिद्धान् वट ।

क्तान् विनिवेदयेत् सुरभित्वंजगन्मातर्देवि विष्णुपदे स्थिता सर्वदेवमये ग्रा
सं मया दत्तमिदं ग्रासं ततः सर्वदेवमये देवि सर्वदेवैरलंकृते मातर्ममाभिलषि
तं सफलं कुरु नंदनि इति प्रार्थयेत् तथा तद्दिने तैलपक्वं च स्थालीपक्वं पृथि
ष्टर गोक्षीरं गोघृतं चैव दधितक्रं च वर्जयेत् ज्योतिर्निबंधे नारदः आश्विने कृ
ष्णपक्षेतु द्वादश्यादिपंचसु तिथिषूक्तः पूर्वरात्रेनृणां नीराजनविधिः नीराज
येयुर्देवांस्तु विप्रान् गाश्च तुरंगमान् ज्येष्ठान् श्रेष्ठान् जघन्यांश्च मातृमुख्या।
श्च योषित इति निर्णयामृते स्कांदे कार्तिकस्यासिते पक्षे त्रयोदश्यां निशामुखे
यमदीपं बहिर्दद्यादपमृत्युर्विनश्यति मंत्रस्तु मृत्युना पाशदंडाभ्यां कालेन श्या।
मया सह त्रयोदश्यां दीपदानात् सूर्यजः प्रीयतां ममेति कार्तिककृष्णचतुर्दश्यां
प्रभाते चंद्रोदयेभ्यंगं कुर्यात् तदुक्तं हेमाद्रौ निर्णयामृते च भविष्योत्तरे कार्ति
के कृष्णपक्षे तु चतुर्दश्यामिनोदये अवश्यमेव कर्तव्यं स्नानं नरकभीरुभिः इन
क्षंदुः मदनरत्ने विधूदय इति पाठः दिनोदय इति पाठात् सूर्योदयोत्तरं त्रिमुहूर्ते
स्नानं वदतां गौडानां तदनुसारिणां चात्रैव पूर्वविद्धचतुर्दश्यां कार्तिकस्य सि
ते परे पक्षे प्रत्यूषसमये स्नानं कुरु त्वं प्रयत्नत इति स्मृतिदर्पणेपि चतुर्दश्यां

131A

श्वयुजस्य कृष्णा स्वात्यर्कयुक्ता भवेत् प्रभाते स्नानं समाभ्यज्य नरैस्तु कार्य्यं सुगं।
धतैलेन विभूतिकामैरिति पद्मे चंद्रोदये ब्राह्मे आश्विनकृष्णपक्षस्य च
तुर्दश्यां विधूदये तिलतैलेन कर्तव्यं स्नानं नरकभीरुणेति कर्त्तव्यमंगलस्नानं
नरैर्निरयभीरुभिरिति कालादर्शे पाठः उभयत्राश्वयुगित्यमावास्यांतमासम
भिप्रेत्योक्तं तथा तैले लक्ष्मीर्जले गंगा दीपावल्याश्चतुर्दशी प्रात्य्येति शेषः प्रा
तः स्नानं तु यः कुर्याद्यमलोकं न पश्यतीति दिनद्वये पि चंद्रोदये चतुर्दशी प्राप्त
स्त्वे तदाभावेप्यरुणोदये संपूर्णे खंडे वा दिनद्वये चतुर्दशीसत्त्वे च पूर्वदिने
भ्यंगं कुर्यात् पूर्वविद्धचतुर्दश्यामिति वचनात् पूर्वदिने परदिन एवं वा सत्वे।
सैव ग्राह्या दिनद्वयेप्यसत्वे सैव ग्राह्या दिनद्वयेप्यसत्वेऽरुणोदयव्यापिनी ग्रा
ह्या पक्षे प्रत्यूषसमये इन्दुक्षेः वक्ष्यमाणवचनाच्च तदभावेतु चतुर्दशीह्रासप
क्षे पूर्वेद्युः पूर्वविद्धि त्रयोदशीमध्य एवाभ्यंगं कुर्यादिति दिवोदासः केचिदत्र
वचनस्यापि साधितत्वेन वदंति तिथ्यादौ तु भवेद्यावान् ह्रासो वृद्धिः परेहनि ता।
वान् ग्राह्यः स पूर्वे स्यात् परत्वे पि स्वकर्मणीति तन्मंदं नदीदं पूर्वदिनस्पर्शं ग्रा
ह्यत्वविधाने नक्तैकभक्तजन्माष्टम्यादेर्द्विदिनद्वये कर्मकालव्याप्तिभावे सर्वं।

पूर्वदिनस्यग्राह्यत्वप्रसंगात् । किंतु पक्षैकभक्तादौ दिनद्वये कर्मकालव्याप्त्यभा
वे वा कल्पांतरेणान्यायेन वा पूर्वदिनस्य ग्राह्यत्वमुक्तं तत्र मुख्यकाले तन्निषेधैरभावे
ऽपि तत्रैवनुष्ठानबोधकमिदं नचात्र तदस्तीति यत्किंचिदेतत् तेन चतुर्दशी याम
गामिनी ग्राह्या अत एव सर्वे नूतनारायणाः तथा ह्यश्वचतुर्दश्यामाश्विने कौद
यान्तरा यामिन्याः पश्चिमे यामे तैलाभ्यंगो विशिष्यते इति मृगांकोदयवेला
यां त्रयोदश्यां यदा भवेत् दर्शो वा मंगलस्नानं दुःखशोकभयप्रदमिति कालद
र्शे त्रयोदशीनिषेधाच्च तेनापमर्षः यथाग्निहोत्रे यावज्जीवसायंप्रातःकाले
तु व्याप्यकालस्य गुरुत्वं तथात्र चतुर्दशीचतुर्थयामेरुणोदये चंद्रोदयना
मुहूर्तेनरस्य व्याप्यत्वाद्गुरुत्वमिति तदपि त्रयोदशी यदा प्रातः क्षयं याति चतु
र्दशी रात्रिशेषे त्वमावास्या तदाभ्यंगे त्रयोदशीति वचनं तु हेमाद्रिनिर्णी
यामृताद्यालिखितं तच्चेनानिर्मूलसमूलत्वेपि न चतुर्दश्याः सूर्योदयद्वयो
संबंधित्वरूपः क्षयोत्र विशेषविवक्षितः सूर्योदयात् प्राक् संप्राप्तौ चंद्रोदयका
लसत्वे च तत्क्षये वानंगीकारात् । किंतु अभ्यंगकालात् प्राक् समाप्तिरूपोत्र
ह्रासः क्षयशब्देन विवक्षितः स चारुणोदयात् चतुर्थयामात् वा प्राक् यदा स्या

सत्वात्परमिदं अत एव सर्वैर्नारायणेन चतुर्थयाममंत्रे स्नानमुक्तं तथा चो
द्यान्ते तत्र याह्नाभ्यचतुर्दश्यामिति ज्योतिर्निबंधे नारदोपि इषासितचतुर्दश्या
मिंदुक्षयतिथावपि ऊर्जादौ स्वातिसंयुक्ते यावद्दीपावली भवेत् कार्यात्संलग्न
मेतन्मदीयोत्सवदिनत्रयं येतु त्रयोदशीमध्ये स्नानं मा कुर्तोवामासयंनविमृइ
त्यलंभयसापदपि अरुणोदयतोन्यत्र रिक्तायां स्नाति यो नरः तस्याब्दिकभवो
धर्मो न इयत्येव न संशयः इति दिवोदासीये भविष्य वचनेनेतन्मुख्यकालेऽरुणोद
ये चतुर्दश्यभावे पितृत्रयेवस्नातव्यमित्येव परमिति सर्वेरिवं चतुर्घटिकात्मको
ऽरुणोदये काई इति तत्रैवोक्तं ॥ तथा मदनरत्ने पाद्मे अपामार्गमथो तुंबीं प्र
पुन्नाटमथापरं भ्रामयेत्स्नानमध्ये तु नरकस्य क्षयाय वै प्रपुन्नाटक्रमदः
मंत्रस्तु सीतालोष्ठसमायुक्त सकंटकदलान्वित हर पापमपामार्गभ्राम्यमाणः
पुनः पुनरिति अस्यामेव प्रदोषे दीपान् दद्यादित्युक्तं हेमाद्रौ स्कांदे ततः प्र
दोषसमये दीपान्दद्यान्मनोरमान् ब्रह्मविष्णुशिवादीनां भवनेषु मठेषु चेति
दिवोदासीये पिचाले अमावास्या चतुर्दश्योः प्रदोषे दीपदानतः यममार्गांधका
रेभ्यो मुच्यते कार्तिके नरः एवं इति योत पूर्वेद्युः प्रदोषे दीपान् दत्वा परे ह्युः स्नाया

दितिदिवोदासीये उक्तं तत्रैवलैंगे माघपत्रस्य शाकेन भुक्त्वा तत्रदिने नरः प्रेता
स्मापांचतुर्दश्यां सर्वपापैः प्रमुच्यते अथ यमतर्पणमुक्तं मदनपारिजाते ब्राह्म
पुना दीपोत्सवचतुर्दश्यां कार्यंतु यमतर्पणं मदनरत्ने चाप्ते अपामार्गस्यप
त्राणि भ्रामयेच्छिरसोपरि ततस्तु तर्पणं कार्यं धर्मराजस्यनामभिः यमाय धर्म
राजाय मृत्यवे चांतकाय च वैवस्वताय कालाय सर्वभूतक्षयाय च औडुंबरा
य दध्नाय नीलाय परमेष्ठिने वृकोदराय चित्राय चित्रगुप्ताय वैनमः इति तथा
यज्ञोपवीतिना कार्यं प्राचीनावीतिनाथवेति इदं जीवत्पितृकेनापि कार्यं जी
वत्पिता पि कुर्वीत तर्पणं यमभीष्मयोरिति पाद्मोक्तेः अत्र भीष्मतर्पणमप्यु
क्तं दिवोदासीये तत्प्रकारस्तु माघे वक्ष्यते इति नरकचतुर्दशी कार्त्तिका
मावास्यायां प्रातरभ्यंगं कुर्यात् तदुक्तं कालादर्शे प्रत्यूष आश्वयुग्दर्शे
कृताभ्यंगादिमंगलैः भ तव्या प्रयजयेद्देवीमलक्ष्मीविनिवृत्तये अस्य व्याख्या
ने अादिशब्दात्पंचत्वगुदकस्नानादेरुपसंग्रहः तदुक्तं पुष्करपुराणे स्वातिस्थिते
रवाविंदुर्यदि स्वातिगतो भवेत् पंचत्वगुदकस्नायी कृताभ्यंगविधिर्नरः नीरा
जितो महालक्ष्मीमर्चयन् श्रियमश्नुते आश्वयुग्दर्शे इति दर्शशब्दः प्रत्यूषस्वाति

पुक्रान्तितिथिपरः तदुक्तं ब्राह्मे ऊर्जेकृष्णद्वितीयांत तिथिश्च स्वातिऋक्षगे मान
वो मंगलस्नायी नैव लक्ष्म्या वियुज्यते तत्रैव ईषेभूते च दर्शे च कार्त्तिकप्रथमेऽ
दिने यदा स्वाती तदाभ्यंगः स्नानं कुर्याद्दिनोदये कश्यपसंहितायां तु दीपावलीद
र्शप्रगम्य इंदुक्षयेपि संक्रान्तौ रवौ पाते दिनक्षये तत्राभ्यंगो न दोषाय प्रातः पापापनुत्त
ये इति स्वातियोगं विनाप्यभ्यंग उक्तः मात्स्ये दीपैर्नीराजनादत्र सेयं दीपावली स्मृ
ता ग्रत्र विशेषो हेमाद्रौ भविष्ये दिवा तत्र न भोक्तव्यमृते बालातुराज्जनात् प्रदो
षसमये लक्ष्मीं पूजयित्वा ततः क्रमात् दीपवृक्षाश्च दातव्याः शक्त्या देवगृहेषु च
तत्रैवाभ्यंगमभिधाय एवं प्रभातसमये त्वमावास्यां नराधिप कृत्वा तु पार्वणश्रा
द्धं दधिक्षीरघृतादिभिः दीपान्दत्वा प्रदोषे तु लक्ष्मीं पूज्य यथाविधि स्वलंकृतेन भोक्त
व्यं सितवस्त्रोपशोभिना अयं प्रदोषव्यापी ग्राह्यः तुलासंस्थे सहस्रांशौ प्रदोषे भूतद
र्शयोः उल्काहस्ता नराः कुर्युः पितॄणां मार्गदर्शनमिति ज्योतिषोक्तेः । दिनद्वये सत्त्वे
परः दंडैकरजनीयोगे दर्शः स्यात्तु परेऽहनि तदा विहाय पूर्वेद्युः परेह्नि सुखरात्रि
केति तिथितत्त्वे ज्योतिर्वचनात् दिवोदासीयेऽपि प्रदोषस्य कर्मकालत्वात् अ
र्द्धरात्रे भ्रमत्येव लक्ष्मी राश्रयितुं गृहान् अतः स्वलंकृता लिप्ता दीपैर्जाग्रज्जनोत्सवाः
सुधाधवलिताः कार्याः पुष्पमालोपशोभिता इति ज्ञालेऽस्य प्रदोषार्द्धव्यापिनीम

रव्या एकैकव्याप्तौ परैव प्रदोषस्य मुख्यत्वादर्धरात्रे नुष्ठेयाभावाच्च यत्तु अपराह्णे प्रक
र्तव्यं श्राद्धं पितृपरायणैः प्रदोषसमये राजन् कर्त्तव्या दीपमालिकेति क्रमः संपूर्णेतिर
पावेव तत्तत्कर्मकालव्याप्तेर्बलवत्त्वादित्युक्तं अत्रैव दर्शे परराते अलक्ष्मीनिःसारण
मुक्तं मदनरत्ने भविष्ये एवं गते निशीथे तु जने निद्रार्द्धलोचने तावन्नगरनारीभिः
स्तूर्पडिंडिमवादनैः निष्कास्यते प्रहृष्टाभिरलक्ष्मीः स्वगृहांगणात् कार्त्तिकशुक्लप्र
तिपदि गोक्रीडनमुक्तं निर्णयामृते अस्यामेव रात्रौ बलेः पूजोक्ता हेमाद्रौ भविष्ये
कृत्येन तत्सर्वमेवेह राज्ञो दैत्येंद्रं वर्णकैः पंचरंगकैः गृहस्य मध्ये शालायां विशाला
यां ततोर्चयेत् लोकाश्चापि गृहस्यांतः शय्यायां शुक्लतंडुलैः संस्थाप्य बलिराजानं फ
लैः पुष्पैश्च पूजयेत् मंत्रस्तु पाद्मे बलिराज नमस्तुभ्यं दैत्यदानववंदित इंद्रशत्रोम
राराते विष्णुसांनिध्यदो भवेदिति तथा बलिमुद्दिश्य दीयंते दानानि कुरुनंदन या
नि तान्यक्षयाण्याहुर्मयैवं संप्रदर्शितमिति तदेतत्सर्वं विद्धायां प्रतिपदि कर्त्तव्यं
पूर्वविद्धा प्रकर्त्तव्या शिवारात्रिर्बलेर्दिनमिति हेमाद्रौ पाद्मोक्तेः माधवोपि व
स्तूत्सवं च पूर्वेद्युरुपवासवदाचरेदिति निर्णयामृतेपि पाद्मे कुहूः प्रतिपन्मिश्रा
तत्र गाः पूजयेन्नृपः पूजनाद्गीर्णा वर्धंते प्रजा गावो महीपतिरिति तथा भद्रा

134A

यां गोकुलक्रीडा सदेशो वै विनश्यति भद्रायां द्वितीयायां तथा प्रतिपद्यग्निकारणं
द्वितीयायां तु गोवर्द्धनं छत्रच्छेदं करिष्यति विज्ञना राष्ट्रकुलक्षयमिति तथा प्रतिपद्द
र्शसंयोगे क्रीडनं तु गवां मतं परविद्धेषु यः कुर्यात् पुत्रदारधनक्षयं इति देवलवचना
च्च एते च विधिप्रतिषेधाः पूर्वदिने प्रतिपदः सायाह्नव्यापित्वे द्वितीयदिने चंद्रदर्श
नसंभवे च ज्ञेयाः गवां क्रीडादिने यत्र रात्रौ दृश्येत चंद्रमाः सोमो राजा पशून् हंति सु
रभीः पूजकांस्तथेति पुराणसमुच्चयात् दिनद्वये सायाह्नव्यापित्वे तु परैव ग्राह्या
वर्धमानतिथौ नंदा यदा सार्द्धत्रियामिका द्वितीया वृद्धिगामित्वादुत्तरा तत्र चो
च्यते इति तथा पुराणसमुच्चये त्रियामगा दर्शतिथिर्भवेच्चेत्सार्धत्रियामा
प्रतिपद्विवृद्धौ दीपोत्सवे तत्र मुनिभिः प्रदिष्टे अतोऽन्यथा पूर्वयुते विधेये इति पुरा
णसमुच्चयादिति निर्णयामृतकारः सार्धत्रियामिकेत्यनेन चंद्रदर्शनाभावा उ
क्तः द्वितीयायाः पंचधा भक्तदिन चतुर्थांशरूपापराह्णव्याप्तावेव चंद्रदर्शनासंभ
वात् वयं त्वेतद्वचनद्वयं पूर्वसिद्धिसंभव एवेदितव्यमिति ब्रूमः दिनद्वये प्रति
पदः सायाह्नव्याप्त्यभावे तु पूर्वैव रात्रौ बलिपूजाविधानेन कर्मकालव्या
प्तित्वात् परदिने च चंद्रोदयेत निषेधादिति दिक् मदनरत्ने तु पूर्वविद्धायां गो॥

ग नीराजनमंगलमालिके तु तत्र कार्ये कार्तिके शुक्लपक्षे तु विधानं द्वि
तीयं भवेत् नारीनीराजनं प्रातः सायं मंगलमालिका यदा च प्रतिपत्स्वल्पा २
नारीनीराजनं भवेत् द्वितीयायां तदा कुर्यात्सायं मंगलमालिकामिति ब्राह्मोक्तेश्च
लभ्यते यदि वा प्रातः प्रतिपद् घटिकाद्वयं तस्यां नीराजनं कार्यं सायं मंगलमालि
केति भविष्योक्तेः प्रातर्वा यदि लभ्येत प्रतिपद् घटिकाशुभा द्वितीयायां तदा कु
र्यात्सायं मंगलमालिकां कार्तिके शुक्लपक्षादौ त्वमावास्या घटीद्वयं दर्शभंगाभ
यान्नैव कुर्यान्मंगलमालिकामिति देवीपुराणोक्तेश्च तत्र विशेषो हेमाद्रौ ब्रा
ह्मे बलिप्रतिपदं प्रक्रम्य तस्मात् द्यूतं प्रकर्तव्यं प्रभाते तत्र मानवैः तस्मिन् द्यूते जयो
यस्य तस्य संवत्सरं जयः पराजयो विरुद्धश्च लाभनाशकरो भवेत् दयितानाभिश्च
सहितैर्नेया सा च भवेन्निशेति अथ गोवर्धनपूजादिमार्गपालीपूजनादि चो
क्तं हेमाद्रौ निर्णयामृते च स्कांदे प्रातर्गोवर्धनं पूज्य द्यूतं वापि समाचरेत् भू
षणीयास्तथा गावः पूज्याश्च वाहदोहनाः गोवर्धनश्च गोमयेन कार्यश्चित्रे वा
मंत्रस्तु गोवर्धनधराधार गोकुलत्राणकारण बहुबाहुकृतच्छाय गवां
कोटिप्रदो भव गोमंत्रस्तु लक्ष्मीर्या लोकपालानां धेनुरूपेण संस्थिता घृतं
वहति यज्ञार्थे मम पापं व्यपोहतु तत्रैव स्कांदे ततो पराह्णसमये पूर्वस्यां दि

ता भारत मार्गपालीं प्रबध्नीयात्तुंगे स्तंभेथ पादपे कुशकाशमयीं दिव्यां लंबकैः
र्बहुभिर्युतां दृष्ट्वा तां गजानश्वान् सायमस्यास्तलेनयेत् कृते होमे द्विजेंद्रैस्तु
बध्नीयान्मार्गपालिकां नमस्कारं ततः कुर्यान्मंत्रेणानेन सुव्रत मार्गपालि
नमस्तेस्तु सर्वलोकसुखप्रदे विधेयैः पुत्रदाराद्यैः पुनरेहि व्रतस्य मे नीरा
जनं च तत्रैव कार्यं राष्ट्रजयप्रदं राजानो राजपुत्राश्च ब्राह्मणाः शूद्रजातयः मार्ग
पालीं समुल्लंघ्य नीरुजः सुखः सुखान्विताः तत्रैवादित्यपुराणे कुशकाशमयीं कु
र्याद्दिव्यां वेष्टिकां सुदृढां नवां तामेकतो राजपुत्रा हीनवर्णास्तथान्यतः गृहीत्वा
कर्षयेयुस्तां यथासारं मुहुर्मुहुः जये च हीनजातीनां जयो राज्ञस्तु वत्सरमिति
यमद्वितीयायां प्रतिपद्युता ग्राह्येत्युक्तं निर्णयामृतादौ यमद्वितीया मध्या
ह्नव्यापिनी पूर्वविद्धा चेति हेमाद्रिः अत्र विरोधे हेमाद्रौ स्कांदे ऊर्जे शुक्ल
द्वितीयायामपराह्णेऽर्चयेद्यमं स्नानं कृत्वा भानुजायां यमलोकं न पश्यति ऊ
र्जे शुक्लपक्षे द्वितीयायां पूजितस्तर्पितो यमः वेष्टितः किन्नरैर्हृष्टैस्तस्मै यच्छ
ति वांछितं तथा भविष्ये प्रथमास्त्रावहो मासि सितपा भाद्रपदे परा तृतीया

ऊर्ज्जे मासि चतुर्थी कार्त्तिके भवेत् आवलीकलुषानाम तथा भाद्रपदे परा ।
तृतीया ऊर्ज्जे मासि चतुर्थी कार्त्तिके भवेत् आवलीकलुषानाम तथा भाद्रे च
गौरी मता आश्विने प्रेतसंचारा कार्त्तिके याम्यका मता तत्र प्रथमायां भ्रातृद्वि
तीयायां सरस्वतीपूजां तृतीयां श्राद्धमुक्ता चतुर्थ्यां मता कार्त्तिके शुक्लपक्षे
स्य द्वितीयायां युधिष्ठिर यमो यमुनया पूर्वं भोजितः स्वगृहेऽर्चितः अतो यम ।
द्वितीयेयं त्रिषु लोकेषु विश्रुता अस्यां निजगृहे विप्र न भोक्तव्यं ततो नरैः
स्नेहेन भगिनीहस्ताद्भोक्तव्यं पुष्टिवर्धनं दानानि च प्रदेयानि भगिनीभ्यो विधानतः
स्वर्णालंकारवस्त्रान्नपूजासत्कारभोजनैः सर्वा भगिन्यः संपूज्या अभावे प्रति
पन्नकाः प्रतिपन्ना मता भागिन्यः प्रतेहेमाद्रिः पितृव्यभगिनीहस्तात्प्रथमायां ।
युधिष्ठिर मातुलस्य सुताहस्ता द्वितीयायां तथा नृप पितृमातृस्वसुः कन्ये तृ
तीयायां तयोः करात् भोक्तव्यं सहजायाश्च भगिन्या हस्ततः परं सर्वासु भगिनी
हस्ताद्भोक्तव्यं बलवर्धनं यस्यां तिथौ यमुनया यमराजदेवः संभोजितः
प्रतिजागतस्वसृजोहृदेन तस्यां स्वसुः करतलादिह यो भुनक्ति प्राप्नोति रत्न
सुखधान्यमनुत्तमं सः गोडारक यमं च चित्रगुप्तं च यमदूतांश्च पूजयेत् अर्घ्य

136A ४१२

श्रात्र प्रदातृ श्रीयमाय सहजद्वयैः मंत्रः एह्येहि मार्तंडजपाशहस्त यमांतकालो
कधरामरेश भ्रातृद्वितीयाकृतदेवपूजां गृहाण चार्घ्यं भगवन्नमस्ते भ्रातस्तवा
नुजाताहं भुंक्ष्व भक्तमिदं शुभं प्रीतये यमराजस्य यमुनाया विशेषतः ज्येष्ठाग्रजाते
ति वदेत् इति स्मार्ताः इत्यत्र दानमित्यप्याहुः ब्रह्मांडपुराणेपि यातु भोजयते नारी भ्रातरं
युग्मके तिथौ अर्चयेच्चापि तांबूलैर्न सा वैधव्यमाप्नुयात् भ्रातरायुः क्षयो राजन् भवेन्नैत्र
कर्हिचित् इति कार्तिकशुक्लनवमी युगादिः सा पौर्वाह्णिकी ग्राह्या पक्षस्यत्वात्
शुक्लत्वात् प्रागुक्तं अत्रैव विष्णुत्रिरात्रमुक्तं हेमाद्रौ पाद्मे कार्तिके शुक्लनवमीमवा
प्य विजितेंद्रियः हरिं विधाय सौवर्णं तुलस्या सहितं विभुं पूजयेद्विधिवद्भक्त्या
व्रती तत्र दिनत्रयं एवं यथोक्तविधिना कुर्याद्वैवाहिकं विधिमिति कार्तिक
शुक्लैकादश्यां भीष्मपंचकव्रतमुक्तं नारदीये व्रतीनरैः प्रयत्नेन कर्तव्यं भीष्मपं
चकं कार्तिकस्यामले पक्षे स्नात्वा सम्यग्यतव्रतः एकादश्यां तु गृह्णीयाद्व्र(
तं पंचदिनात्मकं इति तद्विधिस्तु नद्यां गोमयेन स्नात्वा मौनी पंचामृतैः पंच
गव्यैर्विष्णुं संस्नाप्य संपूज्य पायसं निवेद्य द्वादशाक्षरमष्टोत्तरशतं जप्त्वा

ॐनमोविष्णवेतिषडक्षरेणघृताक्तान्यवान्व्रीहीन्वाष्टोत्तरशतंहुत्वाभूमौस्वपेत् एवं
पंचदिनेषुकुर्यात् विशेषस्तुपाद्मे हरेःकमलैःपादौसंपूज्यत्रिर्गोमयंप्राश्यद्विती
येबिल्वपत्रैर्जानुनीसंपूज्यगोमूत्रंतृतीयेभृंगराजेननाभिंसंपूज्यक्षीरंचतुर्द
श्यांकरवीरैःस्कंधंसंपूज्यदधि पौर्णमास्यांहोमांतेलौहींपापप्रतिमांखड्गचक्रह
स्तांकृष्णवस्त्रवेष्टितांप्रस्थतिलोपरिस्थांकृत्वाधर्मराजनामभिःकरवीरैःसंपू
ज्ययदन्यजन्मनिकृतंमिथ्याजन्मनिवापुनः तत्सर्वंप्रशमंयातुमत्पापंतवपूजना
दिति पुष्पांजलिंक्षिप्त्वाकृष्णप्रतिमांचपूज्यविप्रायदत्वाविप्रान्संभोज्यदक्षिणां
दत्वापंचगव्यंप्राश्यपौर्णमास्यांनक्तंभुंजीतेतिलघुनारदीये पंचगव्यप्राशनं
षडक्षरेणेतिहेमाद्रिः हेमाद्रौभविष्येतुशाकैर्मुन्यन्नैर्वापंचाहंवर्तनमुक्तं अंते
प्युक्तं पक्षीश्वपंचकमितिप्रार्थितमपूर्वियामेकादशीप्रभृतिपंचदशीनिरतंमुन्यन्न
भोजनपरस्यनरस्यतस्मिन्निष्टंफलंदिशतिपांडवशार्ङ्गधन्वेति तथापाद्मेपंचा
हंपंचगव्याशीभीष्मायार्घ्यंचपंचसु अहस्सुसर्वेष्वितिदद्यात्मंत्रेणानेनसंयुतात्
सत्यव्रतायशुचयेगांगेयायमहात्मने भीष्मायैतद्ददाम्यर्घ्यमाजन्मब्रह्मचारिणे
वैयाघ्रपद्यगोत्रायेतिचसव्येनानेनमंत्रेणतर्पणमावश्यकमिति कार्तिके
गंगाजठरसंभूतःशांतनेयोमहामुनिः दिव्यदानंकरिष्यामिभीष्मोवैप्रीयतामिति २

137A

शुक्लद्वादश्यां रेवती नक्षत्र योगरहितायां पारणं कार्यं तदुक्तं आभाकासितपक्षे
श्रुमैत्रश्रवणरेवति संगमे नाहि भोक्तव्यं द्वादश द्वादशीर्हरेद्दिनि यदा तु रेवती यो
गरहिता द्वादशी सर्वपानलभ्यते तदा रेवत्याश्च तुर्थपादं वर्जयेत् वचनं तु प्रागु
क्तं लघुनारदीये कार्त्तिके शुक्लपक्षस्य कृत्वा चैकादशी नरः प्रातर्दत्वा शुभान्कुं
भान्प्रयाति हरिमंदिरं मदनरत्ने वाराहे एकादशी सा मुख्या कार्त्तिके मासि भामि
नि उत्तराभाद्रसंयोगे अनंता सा प्रकीर्तिता तस्यां याज्ञि यत्नेभद्रे सर्वमानंत्यमश्नु
ते अस्यां मेघराज्ञो देवो स्वापनमुक्तं हेमाद्रौ ब्राह्मे एकादश्यां शुक्लायां का
र्त्तिके मासि केशवं प्रसुप्तं बोधयेद्रात्रौ श्रद्धाभक्तिसमन्वितः इति मदनरत्ने भ
विष्ये कार्त्तिके शुक्लपक्षे तु एकादश्यां प्रयास्तु तं मंत्रेणानेन राजेंद्र देवमुत् च
थापयेद्द्विजः रामार्चनचंद्रिकायां तु द्वादश्यामुक्तं पारणाहे सर्ववाद्येघंटा
दीन वादयन्नमुद्रिति अत्र देशाचारतो व्यवस्था तत्रैव देवदेवस्य स्नानं पूर्वं
महत्भवेत् महापूजा ततः कृत्वा देवमुत्थापयेत्सुधीः मंत्रान्स्कंदपुराणे
उक्तः ॐ ब्रह्मेंद्ररुद्राग्निकुबेरसूर्यसोमादिभिर्वंदित वंदनीय बुध्यस्व
देवेश जगन्निवास मंत्रप्रभावेन सुखेन देव इयं हि द्वादशी देव प्रबोधार्थं विनि

138

र्भिन्ना त्वयैव सर्वलोकानां हितार्थं शेषशायिना । उत्तिष्ठोत्तिष्ठ गोविंद त्यज नि-
द्रां जगत्पते । त्वयि सुप्ते जगन्नाथ जगत्सुप्तं भवेदिदं । उत्थिते चेष्टते सर्वमुत्तिष्ठो-
त्तिष्ठ माधव । गता मेघा वियच्चैव निर्मलं निर्मला दिशः । शारदानि च पुष्पाणि गृह्-
ण मम केशव । इदं विष्णुरिति प्रोक्तो मंत्रमुत्थापने हरेरिति । एवमुत्थाप्य तदग्रे
चातुर्मास्यव्रतसमाप्तिं कुर्यात् । तदुक्तं भारते । चतुर्धा गृह्य वै चीर्णं चातुर्मास्य-
व्रतं नरः । कार्तिके शुक्लपक्षे तु द्वादश्यां तत्समापयेत् । लघुनारदीये चातुर्मास्य-
व्रतानां च समाप्तिः कार्तिके स्मृता । मंत्रश्च निर्णयामृते सनत्कुमारेणोक्तः । इ-
दं व्रतं मया देव कृतं प्रीत्यै तव प्रभो । न्यूनं संपूर्णतां यातु त्वत्प्रसादाज्जनार्दनेति । अ-
थ वाराहोक्तो विधिनीविधिः । एकादश्यां रात्रौ कुंभे घृतपात्रोपरि हैमं माषमिति
मत्स्यं पंचामृतेन संस्नाप्य कुंकुमपीतवस्त्रयुगपाद्यैः संपूज्य मत्स्यादिदशा-
वतारान्संपूज्य जागरं कृत्वा प्रातर्देवमाचार्याय वस्त्राद्यैः संपूज्य जगदादिर्जग-
द्योनिर्जगदादिरनादिमान् जगदाद्यो जगद्योनिः प्रीयतां मे जनार्दन इति दत्वा द-
क्षिणां दत्वा ब्राह्मणान् भोजयेदिति । तथा ब्राह्मे । समाप्ते पारवे रात्रौ भ्रामयेत्स्यं-
दने स्थितं । जगत्पतिं देवदेवेशं नगरे पार्थिवः स्वयं । चतुरो वार्षिकान्मासान्
नियमं यस्य यत्कृतं । कथयित्वा द्विजेभ्यस्तु दद्यात् भक्त्या सदक्षिणं । यस्य भक्ष्य

138A

स्य नियमं कृत्वा तत्र दुग्धं दद्यादित्यर्थः इदं शुक्लाशक्तादावपि कार्यं अशक्तश्चेत्पुत्र
जामन्येन कारयेत् कार्त्तिकद्वादशी पौर्णमासी च मन्वादिः सा पौर्वाह्णिकी ग्रा
ह्या अन्यत्रागुक्तं कार्त्तिकशुक्लचतुर्दशी वैकुण्ठसंज्ञा सा निशीथव्यापिनी ग्रा
ह्या तदुक्तं हेमाद्रौ भविष्ये कार्त्तिकस्य सिते पक्षे चतुर्दश्यां नराधिप सोमवा
सरस्र संपूज्य हरिं रागो जितेन्द्रिय इति अस्या एव विश्वेश्वरप्रतिष्ठादिनत्वात्तन्त्री
त्यर्थं पदोपवासादि क्रियते नाद अरुणोदयव्यापिनी ग्राह्या तदुक्तं त्रिस्थली
सेतौ सनत्कुमारसंहितायां वर्षे च हेमलंवाख्ये मासे श्रीमति कार्त्तिके शुक्ल
पक्षे चतुर्दश्यामरुणाभ्युदये प्रति महादेवतिथौ ब्राह्मे मुहूर्ते मणिकर्णि
के स्नात्वा विश्वेश्वरो देवो विश्वेश्वरमपूजयदिति तत्स्वदिने चोपवासः का
र्यः प्रभाते विमले स्नात्वा पूजां महाकृत्वा दण्डपाणिमहाधाम्नि वनेऽस्मिन् सा
नपराणा इति तद्वो वोक्तेः अत्र कार्त्तिकव्रतोद्यापनमुक्तं पाद्मे कार्त्तिकमा
हात्म्ये अथोर्जव्रतिनः सम्यगुद्यापनविधिं शृणु ऊर्जशुक्लचतुर्दश्यां कुर्या
दुद्यापनं व्रती तुलस्या उपरिष्टात्तु कुर्यान्मण्डपिकां शुभां तुलसीमूलदेशे
सर्वतोभद्रमेव च तस्योपरिष्टात्कलशं पंचरत्नसमन्वितं पूजयेत्तत्र देवेशं सौ

वर्णांगिरुर्वन्नृतपा रात्रौ जागरणं कुर्याद्गीतवाद्यादिमंगलैः ततस्तु पौर्णि
मास्यां वै सपत्नीकान द्विजोत्तमान् त्रिंशत्मितान्नर्चयेकं वास्य शक्त्या वा निमं
त्रयेत् प्रीतो देवाइति द्वाभ्यां ज्ञकुर्यान्निलयापसं ततो गां कपिलां दद्यात्स्ज्ञ
येद्विधिवत्कृतं इति [illegible] कार्तिकी पौर्णिमासी परा ग्राह्या अमापौर्णमास्यो
परे इति दीपिकोक्तेः अत्र विशेषो हेमाद्रौ ब्राह्मे पुराणे महाकार्तिकी स्याद्जी
वेंद्रोः कृत्तिकास्तु च तथा आग्नेयं तु यदा ऋक्षं कार्तिक्यां भवति क्वचित् म
हती सा तिथिर्ज्ञेया स्नानदानेषु चोत्तमा यदा तु याम्यं भवति ऋक्षं तस्यां तिथौ
क्वचित् तिथिः सापि महापुण्या मुनिभिः परिकीर्तिताः प्राजापत्यं यदा ऋ
क्षं तिथौ तस्यां नराधिप सा महाकार्तिकी प्रोक्ता देवानामपि दुर्लभेति पा
द्मे विशाखासु यदा भानुः कृत्तिकासु च चंद्रमाः स योगः पद्मको नाम पुष्करे
ष्वतिदुर्लभः इति पद्मकं पुष्करे प्राप्य कापिलायः प्रयच्छति स हित्वा सर्वपापा
नि विष्णुर्वं लभते पदं गौडग्रंथे यमः आषाढ्यामथ कार्तिक्यां माघ्यां गीन्
पंच वा द्विजान् तर्पयेत्पितॄन् पूर्वं तत्तदस्याक्षय्यमुच्यते यमः कार्तिक्यां पु
ष्करे स्नातः सर्वपापैः प्रमुच्यते माघ्यां स्नातः प्रयागे तु मुच्यते सर्वकि

139A

लिखितैः अस्यामेव सायंकाले मत्स्यावतारः जातः तदुक्तं पाद्मे कार्तिकमाहात्म्ये
वरान्दत्वा यतो विष्णुर्मत्स्यरूपोऽभवत्ततः तस्यां दत्तं हुतं जप्तं तदक्षय्यफलं स्मृतं
इति अत्र त्रिपुरोत्सव उक्तो मार्गे वाचनदीपिकायां पौर्णमास्यां तु संध्यायां कर्तव्य
स्त्रिपुरोत्सवः दद्यादनेन मंत्रेण प्रदीपांश्च सुरालये कीटाः पतंगाः मशकाश्च वृक्षाः जले स्थले ये वि
चरंति जीवाः दृष्ट्वा प्रदीपं न च जन्मभागिनो भवंति नित्यं श्वपचा हि विप्राः अत्र विशेषा
[illegible] तदुक्तं मात्स्ये कार्त्तिक्यां यो वृषोत्सर्गं कृत्वा नक्तं समाचरेत् शैवं पदमवा
प्नोति शिवव्रतमिदं स्मृतमिति अत्र कार्त्तिके यद्दर्शनमुक्तं काशीखंडे कार्त्तिक्यां कृ
त्तिकायोगे यः कुर्यात्स्वामिदर्शनं सप्तजन्म भवेद्विप्रो धनाढ्यो वेदपारगः इति ॥
इति श्रीभट्टकमलाकरकृते निर्णयसिंधौ कार्त्तिकः समाप्तः मार्गशीर्षे कृ
ष्णाष्टमी कालाष्टमी सा च रात्रिव्यापिनी ग्राह्या मार्गशीर्षासिताष्टम्यां काल
भैरवसन्निधौ उपोष्य जागरं कुर्वन्सर्वपापैः प्रमुच्यते इति काशीखंडात् रा
त्रिव्रतत्वाच्च गतेः रुद्रव्रतेषु सर्वेषु कर्तव्या संमुखी तिथिरिति ब्रह्मवैवर्ता
च्च दिनद्वये रात्रौ रात्रिव्याप्तावुत्तरैव भैरवोत्पत्तेः प्रदोषकालीनत्वादिति केचित्
तन्न शिवरहस्ये मध्याह्ने भैरवोत्पत्तेः श्रवणात् तथा च तत्रैव नित्ययात्रादिकं कृ

त्वा मध्याह्ने संस्थिते जागरे वा विष्णुपक्रम्य प्रदक्षिणात् रुद्रेण जातेत्युक्तं तदोग्ररूपानव
धानतः श्रीकालभैरवः आविरासीत्तदा लोकान् भीषयन्नखिलानपीति
अत्रोपवासमेव प्राधान्यमुक्तं तत्रैव उपोष्य स्यां गम्भं तमर्घ्यदानमिहस्मृतं तथा जा
गरणं रात्रौ पूजायामचतुष्टये संध्यायामपि पूजैवोक्ता तेन मध्याह्नव्यापिनी
युक्ता दिनद्वये रात्रौ संपूर्णायां वा तद्व्याप्तौ परैव पूर्वोक्तवचनात् रणान्तु प्रा
तरेव यामत्रयोर्ध्वगामिन्यां प्रातरेव हि पारणेति वचनात् अत्र च कालभैरव
पूजोक्ता त्रिस्थलीसेतौ कृत्वा च विविधां पूजां महासंभारविस्तरैः नरो मार्ग
सिताष्टम्यां वार्षिकं विघ्नमुत्सृजेत् तथा तीर्थे कालोदके स्नात्वा कृत्वा तर्प
णमुत्तरः विलोक्य कालराजानं निरयादुद्धरेत्पितॄनिति इयं च कार्त्तिक्यनंतर
गौणचांद्राभिप्रायेण मार्गशीर्षशुक्लपंचम्यां नागपूजोक्ता हेमाद्रौ स्कांदे शु
क्ला मार्गशिरे पुण्या श्रावणे या च पंचमी स्नानदाने बहुफला नागलोकप्रदायि
नीति इयं नागपूजायां षष्ठीयुतैव ग्राह्या पंचमी नागपूजायां कार्या षष्ठी समन्
विता तस्यां तु तुष्टिता नागा इतरा सचतुर्थिकेति मदनरत्ने वचनात् मा
र्गशीर्षशुक्लषष्ठी चंपाषष्ठीति महाराष्ट्रेषु प्रसिद्धा सा उत्तरयुता ग्राह्या व

140A

एम्र्न्योरिति युग्मवाक्यात् पूर्वाह्ने दैविकं कुर्यादिति वचनाद स्य चैदैवक
र्मत्वात्र इयमेव योगविशेषेण चंपेत्युच्यते तदुक्तं ब्रह्मांडपुराणे मल्लारिमा
हात्म्ये मार्गेभाद्रपदे शुक्ला षष्ठीवैधृतिसंयुता रविवारेण संयुक्ता सा चंपेती
ह कार्तिकेति विशाखाभौमयोगेन साप्यांपेतीह विश्रुतेति मदनरत्ने पाठः
मार्गशीर्षे मले पक्षे षष्ठ्यां वारे मुमालिनः शततारा च वै द्रे लिंगं स्याद्दृष्टगोचरमि
ति इयं योगवशेन पूर्वा परा वा कार्या पंचा षष्ठी सप्तमी युतेति दिवोदासः इयमे
कं, व स्कंदषष्ठी सापि युताहस्मा षष्ठमी स्कंदषष्ठी। शिवरात्रिचतुर्दशी एताः पू
र्वयुताः कार्यास्तिथ्यंते पारणं भवेदिति भृगुरुक्तेः परेह्नि राज्ञा वा यया मध्ये
पारणं संभवेदिदं प्रन्ययोत्तरे वेति दिवोदासः अत्र षष्ठ्यां षष्ठीसु सेनावि
दारकः स्कंद महासेन महाबल रुद्रो मात्रिज षड्चक्र गंगागर्भ नमोस्तु ते
इति राजतं स्कंदं संपूज्य विप्राय दद्यादिवोदासः मार्गशीर्षे शुक्ला चतु
र्दश्यां पिशाचमोचनं तीर्थे श्राद्धं त्रिस्थलीसेतौ भट्टैरुक्तं तस्य प्राप्ते पे
शाच्य स्वपित्राद्युद्देशपकात्वे पार्वणत्वादपराह्णव्यापिनी ग्राह्या अत्रात ना
म पिशाचाद्युद्देशपक्षे त्वेकोद्दिष्टत्वान्मध्याह्नव्यापिनीति कलधर्मेत्वत्रादे

तत्रैव मार्गशीर्षपौर्णमास्यां दत्तात्रेयोत्पत्तिः तदुक्तं स्कांदे सह्याद्रिखंडे मार्ग
शीर्षे तथा मासि दशमे ह्नि स्तुतिं मेले मृगशीर्षयुते पौर्णमास्यां जनस्य च वासरे ज
नयामास देदीप्यमानं पुत्रं सती शुभं तं विष्णुमागतं ज्ञात्वा अत्रिर्नामाकरोत्स्वयं द
त्तवान् स्वस्य पुत्रत्वाद्दत्तात्रेय इतीश्वरमिति इयं प्रदोषव्यापिनी ग्राह्याः मार्गपौर्ण
मानंतराष्टमी अष्टका एवं पौषादिमासत्रयेपि हेमंतशिशिरयोश्चतुर्णामप
राणामष्टमीष्वष्टका एकस्यां वेत्याश्वलायनोक्तेः एकस्यामष्टम्यां वैकार्ये
ति हरदत्तः कश्चित्यं च मुक्ताः प्रोष्ठपद्यष्टकास्त्रयः पितृलोके भविष्यसीति पा
द्मवचनात् तत्पूर्वसप्तमीपूर्वेद्युः तत्परनवमी अन्वष्टकास्तु च श्राद्धमुक्तं
कालादर्शे मार्गशीर्षे च पौषे च माघे प्रौष्ठे च फाल्गुने कृष्णपक्षे तु पूर्वेद्युः
रन्वष्टक्यं तथाष्टका इति मन्त्रे विस्तरः अमावास्यात्रिप्रोष्टकातिस्रोऽन्वष्ट
का इति पद्मकौर्मे अमावास्याष्टकातिस्रः पौषमासादिषु त्रिषु इति तच्च त
द्व्याश्रमनावश्यकत्वार्थं प्राचामन्याच तुर्थी स्यात्तां च कुर्यात्प्रयत्नतः इति चार
पुत्रस्त्रांडपुराणात् श्राद्धमेतेष्वकुर्वाणो नरकं प्रतिपद्यत इति विष्णूक्तेरि
ति शूलपाणिः सारवाभेदात्सप्तयस्येति तत्त्वं वायुब्रह्मांडयोः अर्घपापथेः

141A

सदाकार्यामांसैरन्वासदाभवेत् शाकैः कार्यात्तीयास्यादेवद्रव्यगतो विधिः पौ
षादिक्रमः अन्वष्टका तु प्रागेव निर्णीताः तत्राष्टम्यपराह्णव्यापिनी ग्राह्या अ
पराह्णादनपर्यंतं श्राद्धं पार्वणवद्वेदित्याश्वलायनकारिकोक्तेः पराह्णकालत्वा
च्च पार्वणस्य पूर्वेद्युरन्वष्टकाश्राद्धयोस्तु अष्टम्यनुरोधेन निर्णयः अत एव सू
त्रे पूर्वेद्युः पितृभ्यो दद्यात् अपरेद्युरन्वष्टक्यमिति च अत्र कामकालौ विश्वेदेवौ
इष्टिश्राद्धे क्रतुदक्षाचाष्टम्यं कामकालकाविति सायणीये शौरेवोक्तेः अयश्रा
द्धाकरणे प्रायश्चित्तमुक्तं गृह्यविधानेणभिर्धुमिर्जयेन्मंत्रशतवारं तु तद्दिने आ
न्वष्टक्यं यदा स्यात् स्यं संपूर्णं यातिसर्वथेति अष्टाक्यो त्वाश्वलायनः अतश्वोभूते
ष्टकाः पशुनास्थालीपाकेन वानडुहो यवसमाहरेदग्निना वा कक्षमुपोषे
देषामेष्टकेति न त्वेवानष्टकः स्यादिति मार्गशीर्षादिकमलमासे सति तत्रा
ष्टका न कार्याः चतुर्णामिति ग्रहणादित्युक्तं नारायणवृत्तौ काठकगृह्येपि म
हालयाष्टकाश्राद्धोपाकर्माद्यपि कर्म यत् स्पष्टमासविशेषाख्याविहितं वर्ज्ये
न्मल इति मार्गादिरविवारे कृष्णकाम्यं व्रतमुक्तं हेमाद्रौ तत्र भक्ष्याण्युक्तानि संग्रहे प
ञ्चत्रिंवततस्यात्रिपलमथपिष्टं तं मार्गशीर्षादि भक्ष्यं मुष्टित्रितयं तिलानां त्रि

पलं दधितथादुग्धकं गोमयंचत्रितयंतोयांजलीनांत्रिमरिचकमयोत्रिःपलाः २
सक्तवःस्युर्गोमूत्रंशार्करासद्धविरितिविधिनाभानुवारेक्रमेण इतिश्रीभट्टक
मलाकरकृतेनिर्णयसिंधौमार्गशीर्षः धनुःसंक्रमेपराःषोडशघटिकाःपुण्याः
अन्यत्पूर्ववत् अत्रौत्सर्गिकनिर्णयोवक्ष्यमाणोऽपाकर्मप्रसंगात् प्रायेणोक्तःकल्प
तरौभविष्ये पौषेमासियदादेविअष्टम्यांबुधोभवेत् तस्यांस्नानंजपोहोम
स्तर्पणंभोजनं मत्प्रीतयेकृतंदेविशतसाहस्त्रिकंभवेत् अत्रैवरोहिण्यार्द्रायो
गेपुण्यतमत्वंतत्रैवज्ञेयं पौषशुक्लैकादशीमन्वादिः साचोक्ताप्राक् पौषपौर्णिमा
नंतराःसप्तम्यष्टमीनवम्योष्टकाद्याःप्रागुक्ताः पौषामावास्यायामर्द्धोदययोग
विशेषः तदुक्तंमदनरत्नेमहाभारते अमार्कपातश्रवणैर्युक्ताचेत्पौषमाघयोः
अर्धोदयःसविज्ञेयःकोटिसूर्यग्रहैःसमइति पुष्यमाघयोर्मध्यवर्तिनीपौषपौ
र्णिमास्युत्तरामावास्येत्यर्थइतिभट्टाः पुष्यस्यमाघस्यचेत्यर्थउक्तो मदनरत्ने तत्र
हेमाद्रिविरोधात् तत्रहिमाघएवोक्तः तिथ्यादिवैवयोगःशस्तोयंनतुरात्रौकदा
चनेति हेमाद्रौमदनरत्नेचस्कांदे माघामायांव्यतीपाते आदित्येविष्णुदैवते
अर्धोदयंतद्विख्यातंसहस्रार्कग्रहैःसमं तत्रैवमाघमासेकृष्णपक्षेपंचदश्यां

142A

रवेर्दिने वैष्णवेनन्नक्षत्रेण व्यतीपाते सुदुर्लभे व्रतं कुर्याद्विसर्गेणान्वयः तत्रै
व ब्रह्मविष्णुमहेशानां सौवर्णीः पलसंख्यायाः प्रतिमास्तु कर्त्तव्यास्तदर्द्धेन
द्विजोत्तम साग्रं शतत्रयं शंभोर्द्रोणानां तिलपर्वतः कर्त्तव्यो पर्वतो विष्णुरुद्रयोः
सर्वसंख्याया शय्यात्रयं ततः कुर्यादुपस्करसमन्वितं तिलैर्हेमं कृत्वा प्रतिमाद
यादित्युक्तं स्कांदे अर्धोदये तु संप्राप्ते सर्वं गंगासमं जलं शुद्धात्मनो द्विजाः सर्वे
भवेयुर्ब्रह्मसंमिताः यत्किंचिद्दीयते दानं तद्दानं मेरुसन्निभमिति अत्र दानवि
शेषा निर्णयामृते स्कांदे चतुःषष्टिपलं श्रेष्ठं अर्घमंत्रं तत्र कारयेत् चत्वारिंशत्पलं
चापि पंचविंशतिरेव च अर्घमंत्रे पात्रं तच्च कांस्यमयमित्युक्तं तत्रैव एवं सुघटि
तं कार्यं कांस्यभाजनमुत्तममिति तथाभिधाय पायसं तत्र पद्मम् अष्टदलं लिखे
त् वर्तुलं च तस्य कर्णिकायां तु कर्षमात्रे सुवर्णकं तदभावे तु तदर्धं वा तदर्धं या
पि कारयेत् भूमौ तं तण्डुलैः शुद्धैः कृत्वाष्टदलमुत्तमं अर्घमंत्रं स्थापयेत्तत्र ब्रह्मविष्णु
शिवात्मकं तेषां पूजा ततः कार्या श्वेतमाल्यैः सुशोभनैः वस्त्रादिभिरलंकृत्य
ब्राह्मणाय निवेदयेत् मंत्रस्तु सुवर्णपात्रसामत्रय प्रसादेन त्रयीमयं अर्घपात्रेः ता
रकं यस्मात्तद्गृहाण द्विजोत्तम समग्रमेव लोपच्छी सम्यग्दातव्यं फलं तत्फलं

लभते मर्त्यः कृत्वेदं दानमुत्तममिति ॥ इति श्रीभट्टकमलाकरकृते निर्णयसिंधौ पौ
षः ॥ अथ माघस्नानं तत्र विष्णुः तुलामकरमेषेषु प्रातःस्नायी सदा भवेत् द्वादश्यां
पौर्णमास्यां वा शुक्लपक्षे समापनमिति पाद्मेति पौषस्यैकादशीं शुक्लामार
भ्य स्थंडिलशायः मासमात्रं निराहारस्त्रिकालस्नानमाचरेत् त्रिकालमर्चयेद्वि
ष्णुं त्यक्तभोगो जितेंद्रियः माघस्यैकादशीं शुक्लां यावद्विधाधरो मेति त्रिकाल
स्नानं मासोपवासविषयं निराहारस्त्वशक्तैः पयश्चंद्रोदये त्वन्यथोक्तं विष्णुः दर्शं
वा पौर्णमासीं वा प्रारभ्य स्नानमाचरेत् पुण्यान्यहानि त्रिंशत्तु मकरस्थे दिवाकरे
इति अत्र दर्शमिति शुक्लादिमुख्यचांद्राभिप्रायेण अयं तु पक्षो नेदानीं प्रचरति ॥
अत्राधिकारिणो भविष्ये ब्रह्मचारी गृहस्थो वानप्रस्थोथ भिक्षुकः बालवृद्ध
युवानश्च नरनारीनपुंसकाः स्नात्वा माघे शुभे तीर्थे प्राप्नुवंतीप्सितं फलं पाद्मे
सर्वेधिकारिणो ह्यत्र विष्णुभक्तौ यथा नृप ब्राह्मे उष्णोदकेन वा स्नानमशक्ये
सति कुर्वते हृष्टेषु सर्वगात्रेषु उष्णोदं न विशिष्यते वेश्मवासस्ते गौडनिबंधे
च स्कांदे पौष्यां तु समतीतायां यावद्भवति पूर्णिमा माघमासस्य तावद्धि प्र
जा विष्णोर्विधीयते पितॄणां देवतानां च मूलकं नैव दापयेत् ब्राह्मणो मूल
कं भुक्त्वा चरेच्चांद्रायणव्रतं अन्यथा याति नरकं भक्षविट्पूयद्राण्यचो वर्जनी

३४

143A

येप्रयत्नेन मलके मदिरोपमं यदा तु माघो मलमासो भवति तदा काम्यानां
तत्र समाप्तिनिषेधात् मासद्वयं स्नानं तन्नियमाश्च कर्त्तव्याः मासोपवासचान्द्रा
यणादि तु मलमासे एव समापयेत् तदुक्तं दीपिकायां नियतत्रिंशद्दिनत्वाच्छुभे
मास्यारभ्य समापयेत्तन्मलिने मासोपवासव्रतमिति स्नानारंभे च मंत्रो विष्णु
नोक्तः तत्र चोत्थाय नियमं गृह्णीयाद्विधिपूर्वकं माघमासमिमं पूर्णं स्नास्येहं दे
व माधव तीर्थस्यास्य जले नित्यमिति संकल्प्य चेतसीति प्रत्यहं मंत्रश्च पाद्मे दुः
खदारिद्र्यनाशाय श्रीविष्णोस्तोषणाय च प्रातःस्नानं करोम्यद्य माघे पापविना
शनं मकरस्थे रवौ माघे गोविंदाच्युत माधव स्नानेनानेन मे देव यथोक्तफलदो
भव इमं मंत्रं समुच्चार्य स्नायान्मौनसमन्वित इति प्रत्यहं सूर्यार्घमंत्रश्च पृथ्वीचंद्रो
दये माघे सवित्रे प्रसवित्रे च परं धाम जले मम त्वत्तेजसा परिभ्रष्टं पापं यातु सह
स्रधेति स्नानकालश्च सूर्योदयः त्रिस्थलीसेतौ मकरस्थे रवौ यो हि न स्ना
त्यभ्युदिते रवाविति माघमासे रटंत्यापः किंचिदभ्युदिते रवाविति च पाद्म
वचनात् संप्राप्ते माघमासे तु तपस्विजनवल्लभे क्रोशंति सर्ववारीणि

नि॰सिं॰
१४४

144

सम्यग्दृष्टेति भास्करे पुनीमः सर्वपापानि त्रिविधानि विनाशय इति नारदीयोक्तेः
यो माघमास्युषसि सूर्यकरान्विते तु स्नानं समाचरति चारुनदीप्रवाहे उद्धृत्य सप्त
पुरुषान्पितृमातृवंश्यान् स्वर्गं प्रयात्यमरदेहधरो नरोऽसौ इति भविष्योत्तरवच
नाच्च ब्राह्मे त्वरुणोदय उक्तः अरुणोदये तु संप्राप्ते स्नानकाले विचक्षणः माधवा
त्रिपुरं ध्यायन्यः स्नाति सुरपूजित इति तथा अरुणोदयमारभ्य प्रातःकालाव
धि प्रभो माघस्नानवतां पुण्यमुक्तं मानतत्र च धारयत्तुत्तमं तु सनक्षत्रं लुप्ततारं तु म
ध्यमं सवितर्युदिते भूप ततो हीनं प्रकीर्तितमिति तेनात्र शक्त्यपेक्षया व्यवस्था
इदं च स्नानं प्रयागेऽति प्रशस्तं काश्याः शतगुणं प्रोक्तं गंगायमुनसंगमे सहस्र
गुणिता सापि भवेत्पश्चिमवाहिनी पश्चिमाभिमुखी गंगा कालिंद्या सह संग
ता हंति कल्पकृतं पापं सा माघे नृप दुर्लभेत्यादि पाद्मादिवचोभ्यः विवित्त
रस्तु मत पितामहकृत प्रयागसेतौ तेयः ब्राह्मे यत्र कुत्रापि वा माघे प्रयागं स्मर
एतान्वितः करोति मज्जनं तीर्थसलभेऽङ्गमज्जनं तथा समुद्रेऽप्यति प्रशस्तं
तडके पर्वीचंद्रोदये प्रभासखंडे माघे मासि च यः स्नायान्नैरंतर्येण भावतः
पौडरीकफलं तस्य दिवसे दिवसे भवेत् माघस्नानं काम्यमेवेति भट्टाः विस्तार

144A मे

दिवाकेयसदावश्यशाब्दान्नित्यत्वाचगतेर्नित्यकाम्यमितियुक्तं मासपर्यंतं
स्नानासंभवेतु अहस्कोह्वा स्नायात् अस्मिन्योगेत्वशक्तोपिस्नायादपिदिन
त्रयंप्रयागेमाघमासेतु अहःस्नानस्ययत्फलं नाश्वमेधसहस्रेणतत्फलंलभ
तेभुवीत्यादिपाद्मादिवचनात् अत्रमकरसंक्रमस्यसप्तमीमाघीतिअस्यइत्ये
के माघशुक्लदशम्यादिइत्यन्ये मकराद्यत्र्यहइत्यपरे माघस्याद्यत्र्यहइतिके
चित् त्रयोदश्यादीतिवहव महामाघीपुरस्कृत्यसप्तौतद्दिनत्रयमितिपाद्मोक्तेः
एतस्यार्थवादत्वाद्यत्किंचिद्दिनत्रयमितिमदहः तत्त्वंतुसंदिग्धेवाक्यशेषा
दितिन्यायात्त्रयोदश्यादेवेतिप्रयागंविनापिपाद्मे अस्मिन्योगेत्वशक्तोस्नाया
दपिदिनत्रयं माघस्नानेनियमास्तुनारदीये नवह्निंसेवयेत्स्नातोह्यस्नातोपिव
राननेहोमार्थंसेवयेद्वह्निंशीतार्थंनकदाचन अहन्यहनिदातव्यास्तिलाःश
र्करयान्विताः त्रिभागस्तुतिलानांहिचतुर्थः शर्करान्विताः अनभ्यंगीवरारोहे
सर्वंमासंनयेद्व्रती तथा अप्राप्तंनशरीरस्यतुयःकार्यंस्नानमाचरेत् पदेपदेश्व
मेधस्यफलंप्राप्नोतिमानवः तथा शंखचक्रधरंदेवंमाधवंनामपूजयेत्
वह्निंहुत्वाविधानेनततस्तस्यैकाशनोभवेत् भूशय्याब्रह्मचर्यं एरशक्तःस्ना

नं समाचरेत् अशक्तौ त्र्यहस्वचर्यादौ स्वेच्छा सर्वेजकप्यते तिलस्नायी तिलोद्वर्ती ति
लहोमी तिलोदकी तिलभुक् तिलदाता च षट् तिलाः पापनाशना इति तथा प्रया
गं संभवेकार्यं दशाश्वमेधोत्तरस्य प्रयागतीर्थस्नानमुक्तं काशीखंडे काप्युक्ते प्रया
गे ये तपसि स्नान्ति मानवाः दशाश्वमेधजनितं फलं तेषां भवेत् ध्रुवमिति स्नानो
त्तरं भदनपारजाते विघ्नः काष्ठमौनी नमस्कृत्य पूजयेत्तु गुरुं चोत्तमं अवश्यमेव च
कार्त्तिक्यं माघस्नानमिति स्मृतिः भविष्ये तैलमामलकाश्चैव तीर्थे देयास्तु नि
त्यशः ततः प्रज्वालयेद्वह्निं सेवनार्थं द्विजन्मने एवं स्नानावसाने तु भोज्यं देयमवा
रितं भोजयेद्द्विजदंपती भूषयेद्वस्त्रभूषणैः कंबलाजिनरत्नानि वासांसि विवि
धानि च चोलकानि च देयानि प्रच्छादनपटस्तथा उपानहौ तथा गुप्तमोचको
पापमोचको अनेन विधिना दद्यात् माधवः प्रीयतामिति पाद्मे भूमेशायी
न होतव्यमाज्यं तिलसमन्वितं तथा अन्नं चैव यथाशक्त्या देयं माघे नराधि
प स्ववर्णे रक्तिकामात्रं दद्याद्वेदविदे तथा माघान्ते तु विशेषो नारदीये ।
माघावसाने शुभगे षड्रसं भोजने स्मृतं सूर्यो मे प्रीयतां देवो विष्णुमूर्तिर्नि
रंजनः दंपत्योर्वा समीस्तदंके सप्तधान्यसमन्विते त्रिंशत्तु मोदका देयाः शर्करा
तिलसंयुता इति अथैकादशीविधानेन व्रतस्योद्यापनं तथेति पाद्मवचनात् ।

145A

पूर्वेह्नि उपवासपूजनादि कृत्वा परेह्नि तिलचवाज्यैः रथ्योत्तरशतं होमं कृत्वा स
वित्रे प्रसविजे चेति पूर्वोक्तं मंत्रमुक्त्वा दिवाकर जगन्नाथ प्रभाकर नमोऽस्तु ते
परिपूर्णं कुरुष्वेदं माघस्नानमुपःपते इति क्षमापयेदिति संक्षेपः मकरसंक्रांतौ
हेमाद्रिमते परतः चत्वारिंशन्न कर्कटके नज्यो मकरे तु दशाधिका इति ब्रह्मवै
वर्तात् माधवमते तु विंशतिः त्रिंशत्कर्कटके पूर्वा मकरे विंशतिः परे इति वृद्धवसिष्ठोक्तेः
यदा तु पूर्वास्तात्पूर्वं संक्रांतिर्भवति तदोभयमते पूर्वमेव पुण्यकालः रात्रौ तु प्रदोषे निशी
थे वा मकरसंक्रमे माधवमते द्वितीयदिनमेव पुण्यं यद्यस्तमयवेलायां मकरं याति भास्क
रः प्रदोषे वार्द्धरात्रे वा स्नानं दानं परेहनीति वृद्धगर्गवचनात् अस्तमयः प्रदोषः प्रदो
षे पूर्वरात्रे कार्मुकं तु परित्यज्य झषं संक्रमते रविः प्रदोषे चार्द्धरात्रे वा स्नानं दानं परेहनीति
भविष्योक्तेश्च नदाभोक्ताः परेहनीति हेमाद्रौ पाठः कालादर्शनिर्णयामृतमदनपारिजा
तादयोप्येवमूचुः दाक्षिणात्यास्त्वेतदेवाद्रियंते यत्तु हेमाद्रिणोदाहृतं वा शब्दो यथार्थे द्वितीय
स्तथार्थे यथा प्रदोषे पूर्वेद्युस्तथार्द्धरात्रे परेह्नि इत्युक्तेः तस्येन मोस्तु तेन परेह्नि पुण्यं व

कुंप्रदोषे इति दिनद्वये पुण्यनिरासार्थमर्द्धरात्रग्रहणं हेमाद्रिस्त्वंधे सारानंतभट्टादिम
तेतु निशीथात्पूर्वं पश्चाच्च संक्रांतौ पूर्वदिने परदिने वा पुण्यं धनुर्मीनावतिक्रम्य कन्यां च मि
थुनं तथा पूर्वापरविभागेन रात्रौ संक्रमणं यदा दिनांते पंचनाड्यस्तु तदा पुण्यतया स्मृताः
उदयेपि तथा पंच दैवे पित्र्ये च कर्मणीति स्कंदवचनात् पूर्वापरविभागेनेति मकरकर्क
भिन्नविषयं पूर्वोक्तवचोविरोधादिति मदनरत्ने उक्तं षडशीतिमुखेतीते अतीते चोत्तरायणे
इत्यादिविरोधाच्च तेन पूर्वैकवाक्यतयाऽयमर्थः रात्रौ पूर्वभागे मकरसंक्रमे परेह्न्युदये
पंचनाड्यः पुण्याः रात्रावपरभागे कर्कसंक्रमे पूर्वदिनांते पंचनाड्य इति एवं सर्वेषाम
विरोधः मकरे सामान्येन परदिने पुण्यत्वेपि पुण्यातिशयार्थमिदं यत्तु देवलयस्त्वाम्बै आ
सन्नसंक्रमं पुण्यं दिनार्द्धं स्नानदानयोः रात्रौ संक्रमणे भानोर्विषुवत्ययने दिवेति अत्र मा
धवः अयने दिवा जाते तदर्द्धं पुण्यं कर्के पूर्वं मकरे त्वंत्यं एतन्मध्ये दिनायनपरमिति हेमा
द्रिस्तु रात्रौ विषुवत्यासन्नदिनार्द्धं पुण्यमयने त्वासन्नं दिनं पुण्यं दिने इति पाठे उभय
त्र दिनार्द्धं पुण्यमित्याह एतद्वोक्तं दीपिकायां अयनमधः पश्चान्निशीथाद्भवेत्

146A

यद्यासन्नमहत्त्वादर्धमथवा पुण्यमिति तत्त्वंतु आसन्नसंक्रमनित्यस्य वि
घुवत्येवान्वयः अयने रात्रौ सति दिने पुण्यं कास्मिन्नित्यपेक्षायां कर्के पूर्वं क्लि
मकरे परे श्रीति वाक्यांतरं च सादर्थे उच्यमानेन कोपि विरोधः पत्वेनंतभट्टः
अर्धनिशीथात् प्राग् यदा भवेत् अयनं विषुवत्र प्राग्दिनांतिमनाडिकाः पंच पुण्य
तमाः पश्चान्निशीथाच्चेद्भवेत्तथा आद्यापरदिनस्यापि तद्वदित्येव निर्णयः इति
अपरार्केप्येवं अस्तंगते यदा सूर्ये मकरं याति दिवाकरः प्रदोषे वार्द्धरात्रे वा तदा पु
ण्यं दिनद्वयमिति बौधायनवचनात् दिनद्वये वा पुण्यकालः तदा पुण्यं दिनांतर वत् ८
मिति मदनरत्ने पाठः गुर्जरप्राच्योदीच्यास्त्विदमेवाद्रियंते अत्रापि पूर्वेवारंभये
तिथितत्त्वादिगौडग्रंथास्तु प्रदोषार्धरात्रभिन्नरात्रेः पूर्वभागे पूर्वदिनेऽपरभा
गे परदिने पुण्यमन्यसंक्रांतिवत् विशिष्यचैतेन निर्देशात् प्रदोषस्य प्रदोषो
स्तमयादूर्ध्वं घटिकाद्वयमिष्यते इति वत्सोक्त इत्याहुः तत्र अस्तंगते इति त्रित
यवेव पर्यवसायते: अतः प्रदोषपदेन तद्भिन्नैव रात्रिरुच्यते अत एव यावन्नोदय
तेरविरिति वृद्धगार्ग्यादिनिर्द्दक्षिणायने सर्वरात्रौ संक्रमे पूर्वदिनमुक्तं व
त्सोक्तिरप्यध्ययनापरा इह त्रिमुहूर्त्ता एव प्रदोष मकरेदानविशेषो हेमाद्रौ स्कांदे

धेनुं तिलमयीं राजन् दद्याद्यस्तूत्तरायणे । सर्वान् कामानवाप्नोति विंदते पर
मं सुखं ॥ विष्णुधर्मेपि उत्तरे त्वयने विप्रा वस्त्रदानं महाफलं ॥ तिलपूर्णमनडु
हं दत्त्वा रोगैः प्रमुच्यते इति शिवरहस्येपि ॥ तस्यां कृष्णतिलैः स्नानं कार्यं चोद्वर्तनं (
शुभैः ॥ तिलदेयाश्च विप्रेभ्यः सर्वदैवोत्तरायणे ॥ नान्यो देवाय विप्रेभ्यो हाटकेन
समं ददेत् ॥ उत्तरायणमासाद्य नरः कस्मात्स शोचति ॥ तथा मकरे राज्ञा वपि स्ना
ह्वादि भवतीत्युक्तं प्राक् ॥ प्राक् माघायां योगविशेषोदयः प्रागेवोक्तः ॥ माघकृ
ष्णचतुर्दश्यां यमतर्पणमुक्तं हेमाद्रौ यमेन ॥ अरुणोदये काले माघकृष्णच
तुर्दशी स्नातः संतर्प्य तु यमं सर्वपापैः प्रमुच्यते इति ॥ माघशुक्लचतुर्थी तिलच
तुर्थी सा प्रदोषव्यापिनी ग्राह्या माघशुक्लचतुर्थ्यां तु नक्तव्रतपरायणाः ॥ येत्वा
ढुंढे च पिष्ट्यंति तेषां स्युरस्तु रद्धामिति काशीखंडात् ॥ माघमासे चतुर्थ्यां तु तस्मि
न्काल उपोषितः । अर्चयित्वा तु यो देवि जागरं तत्र कारयेदिति स्यालीसेतोलैंगा
च्च इयमेव कुंदचतुर्थी सा प्रदोषव्यापिनी ग्राह्या ॥ माघशुक्लचतुर्थ्यां तु कुं
दपुष्पैः सदाशिवं संपूज्य योहि नक्ताशी स प्राप्नोति श्रियं नर इति कालादर्शोक्तो
मौक्तेः ॥ माघशुक्लपंचमी तदुक्तं हेमाद्रौ वाराहे ॥ माघशुक्लचतुर्थ्यां तु वरमारा

147A

ध्यचप्रियः पंचम्यां कुंदकुसुमैः पूजां कुर्यात्समृद्धये इयं माधवमते पूर्वाह्णे मा(
द्विमते परा चैत्रशुक्ले श्रीपंचमीति दिवोदासः माघशुक्लसप्तमी रथसप्तमी
सा अरुणोदयव्यापिनी ग्राह्या सूर्यग्रहणतुल्यात् शुक्ला माघस्य सप्तमी अ
रुणोदयवेलायां तस्यां स्नानं महाफलमिति चंद्रिकायां विष्णुवचनात् अरु
णोदयवेलायां शुक्ला माघस्य सप्तमी प्रयागे यदि लभ्येत कोटिसूर्यग्रहैः समं इति व
चनाच्च यत्तु दिवोदासीये अचला सप्तमी दुर्गा शिवरात्रिर्महाभरः द्वादशी वत्स
पूजायां सुखदा प्राग्युता सदेति षष्ठीयुतत्वमुक्तं तद्यदा पूर्वेद्युर्घटिकाद्वयं(
षष्ठी सप्तमी च परेद्युः क्षयवशादरुणोदयात्पूर्वं समाप्यते तत्परं ज्ञेयं तत्र ष
ष्ठ्यां सप्तमी दायं पूर्वे स्यादरुणोदये स्नानं कार्यं मदनरत्ने भविष्योत्तरे माघे
मासि सिते पक्षे सप्तमी कोटिभास्करा कुर्यात्स्नानार्घ्यदानाभ्यामायुरारो
ग्यसंपदः अविधिर्भविष्ये कृत्वा षष्ठ्यामेकभक्तं सप्तम्यां निश्चलं जलं रा
त्यंते वालये यास्तुंबं दत्वा शिरसि दीपकं तथा जलं प्रकंपनकेन चाल्यते(
यावत्तावत्स्नानं समाचरेत् सौवर्णे राजते पात्रे भानवा लांबुमयेत्तवा ते
लेन वर्त्तिं दत्वा महारजनरंजिता महारजनं कुसुंभं समाहितमना भूत्वा

नि॰सिं॰
१४८

148

कृत्वा शिरसि दीपंकं भास्करं हृदये ध्यात्वा इमं मंत्रमुदीरयेत् नमस्तेस्तु रुद्र
रूपाय रसानां पतये नमः वरुणाय नमस्तेस्तु हरिवास नमोस्तु ते जले परि
हरे दीपं ध्यात्वा संतर्प्य देवता इति स्नानमंत्रः स्कांदे सौरखंडे यद्यज्जन्मकृतं पापं
मया जन्मसु सप्तसु तन्मे रोगं च शोकं च माकरी हंतु सप्तमी एतज्जन्मकृतं पापं
यच्च जन्मांतरार्जितं मनोवाक्कायजं यच्च ज्ञाताज्ञाते च ये पुनः इति सप्तविधं पा
पं स्नानान्मे सप्तसप्तिके सप्तव्याधिसमायुक्तं हर माकरि सप्तमि एतन्मंत्रत्रयं ज
प्त्वा स्नात्वा पादोदकेन नरः केशवादित्यमालोक्य क्षणान्निःकलुषो भवेत् दि
वोदासीये मदनरत्ने च इक्षुदंडेन जलं वाऽऽलोड्य पीत्वा सप्तार्कपत्राणि बदरीपत्रा
णि च शिरसि निधाय पूर्वोक्तैर्मंत्रैः स्नात्वा तिलपिष्टमयां रूपे हेमं सूर्यं सं
पूज्य विप्राय दद्यात् अर्घमंत्रं मदनरत्ने सप्तसप्तवह प्रीत सप्तलोकप्रदीपन।
सप्तमीसहितो देव गृहाणार्घ्यं दिवाकर ततः जननी सर्वलोकानां सप्तमी स
प्तसप्तिके सप्तव्याहृतिके देवि नमस्ते सूर्यमंडले इति प्रार्थयेत् सौरागमे अ
र्कपत्रैः सबदरैर्दूर्वाक्षतसचंदनैः अष्टांगविधिना चार्घ्यं दद्यादादित्यतुष्टये अ
त्र दानविशेषो मदनरत्ने भविष्ये ताम्रपात्रे यथाशक्त्या मन्मये वाऽपि शक्ति

मानू स्थापयेत्तिलपिष्टं च सघृतं सगुडं तथा कांचनं तालकं कृत्वाऽग्रेतन्मास्ति
लपिष्टजं संछाद्य रक्तवस्त्रेण पुष्पैर्धूपैः रथार्चयेत् दानमंत्रस्तु आदित्यस्य
प्रसादेन प्रातःस्नानफलेन च दुष्टदौर्भाग्यदुःखघ्नं मया दत्तं तु तालकं तालकंक
र्णाभरणं तत्रैव भविष्योत्तरे एवंविधं रथवरं रथवाजियुक्तं हैमं च दैमयातदी
धितिनातसमेतं दद्याच्च माघसितसप्तमिवासरे यः सोसंगचक्रगतरेव महीं भुनक्ति
इयं मन्वादिरपि इयं च शुक्लपक्षस्यत्वात्यौदयिकी ग्राह्या यदा माघो मलमासो भ
वति तदा मासद्वये मन्वादिश्राद्धं कुर्यात् मन्वादिकं तैर्थिकं च कुर्यान्मासद्वयेपि चे
ति स्मृतिचंद्रिकोक्तेः माघशुक्लाष्टमी भीष्माष्टमी तदुक्तं हेमाद्रौ पाद्मे माघमासि सिता
ष्टम्यां सतिलं भीष्मतर्पणं श्राद्धं च ये नराः कुर्युस्ते स्युः संततिभागिन इति भारते
पि शुक्लाष्टम्यां तु माघस्य दद्याद्भीष्माय यो जलं संवत्सरकृतं पापं तत्क्षणादेव न
श्यतीति धवलनिबंधे स्मृतिः अष्टम्यां तु सिते पक्षे भीष्माय तु तिलोदकं अन्नं च वि
धिवद्दद्युः सर्वे वर्णा द्विजातयः सर्ववर्णा इति द्विजातय इति संबोधनं तर्पणमंत्रस्त
त्रैव भीष्मः शांतनवो वीरः सत्यवादी जितेंद्रियः आभिरद्भिरवाप्नोतु पुत्रपौत्रोचितां
क्रियां वैयाघ्रपद्यगोत्राय सांकृत्यप्रवराय च अपुत्राय ददाम्येतज्जलं भीष्माय॥

य वर्मणे । वसूनामवताराय शंतनोरात्मजाय च अर्घ्यं ददामि भीष्माय आबाल।
ब्रह्मचारिणे इति एतच्च जीवत्पितृकस्यापि भवति जीवत्पितापि कुर्वीत तर्पणं
यमभीष्मयोरिति पाद्मोक्तेरिति जीवत्पितृनिर्णये पितृनिर्णये पितृचरणैरुक्तं । ७५
एतच्चापसव्येन कार्यमिति दिवोदासीये अत्र श्राद्धं काम्यं तर्पणं नित्यं ब्राह्मणाद्याश्च
ये वर्णा दद्युर्भीष्माय नो जलं संवत्सरकृतं तेषां पुण्यं नश्यति सत्तमेति मदनरत्ने वच
नात् माघशुक्लद्वादशी भीमद्वादशी त्वया कृतमिदं वीर तव नाम्ना भविष्यति सा
भीमद्वादशी ह्येषा सर्वपापहरा शुभेति हेमाद्रौ पाद्मवचनात् इयं सर्वव्रतानुगमवा।
क्यात् माघीपूर्णिमा परेद्युर्ग्राह्या तथा हेमाद्रौ ब्राह्मे मघास्थायो गुरुजीवे ह्येषा महा
माघीति कथ्यते तत्रैव ज्योतिषे मेषपृष्ठे यदा सौरिः सिंहे च गुरुचंद्रमाः भास्करः
श्रवणे चैव महामाघीति सा स्मृता तथा भविष्ये वैशाखी कार्त्तिकी माघी तिथयो
ऽतीव पूजिताः स्नानदानविहीनास्ता न नेयाः पांडुनंदन तथा तिलपात्राणि देया
नि कंचुकाः कंबलास्तथेति माघपूर्णिमानंतराष्टमी माघी अष्टका तन्निर्णयः प
रमतः तथा च तस्य अष्टकास्तु शाकादिनियमावश्यकी हेमंतशिशिरयोश्चतुर्णामपर।
पक्षाणामष्टमीष्वष्टका एकस्यां चेत्याश्वलायनोक्तेः तथा माघाष्टकां प्रक्रम्य।

149A

ताम एकाष्टके त्याचक्षत इत्यापस्तंबवचनाच्चेत्यादि प्रयोगपारिजाते ज्ञेयं इति श्रीभट्ट
कमलाकरकृते माघः समाप्तः फाल्गुन कृष्णाष्टम्यां विशेषः कालांतरे फा
ल्गुनस्य च मासस्य कृष्णाष्टम्यां महीपते इत्युपक्रम्य जाता दाशरथेः पत्नी तस्मिन्नहनि जा
नकी उपोषितो रघुपतिः समुद्रस्य तटे तदा रामपत्नी च संप्राप्ता सीता जनकनंदनीति
फाल्गुनकृष्णचतुर्दशी शिवरात्रिः सा च केषुचिद्वचनेषु प्रदोषव्यापिनी ग्राह्योक्ता
केषुचिन्निशीथव्यापिनी तत्राद्या माधवीये वायवीये त्रयोदश्यस्तगते सूर्ये चतसृष्वे
व नाडिषु भूतविद्धा तु या तत्र शिवरात्रिव्रतं चरेत् स्मृत्यंतरेपि प्रदोषव्यापिनी ग्राह्या
शिवरात्रिचतुर्दशी रात्रौ जागरणं यस्मात्तस्मात्तां परितोषयेत् अत्र प्रदोषो रात्रिः (
उत्तरार्द्धे तस्या हेतुत्वोक्तेः कामिकेपि आदित्यास्तमये काले अस्ति चेद्या चतुर्दशी त
द्रात्रिः शिवरात्रिः स्यात्सा भवेदुत्तमोत्तमेति द्वितीयापि तत्रैव नारदसंहितायां अर्द्ध
रात्रियुता यत्र माघकृष्णचतुर्दशी शिवरात्रिव्रतं तत्र कुर्याज्जागरणं तथेति ईशान
संहितायां माघकृष्णचतुर्दश्यामादिदेवो महानिशि शिवलिंगतयोद्भूतः कोटिसू
र्यसमप्रभः तत्कालव्यापिनी ग्राह्या शिवरात्रिव्रते तिथिः अर्द्धरात्रादधश्चोर्ध्वं
युक्ता यत्र चतुर्दशी तन्निशायामेव कुर्वीत शिवरात्रिव्रतं व्रती नार्धरात्रादधश्चोर्ध्वंयु

नि॰सिं॰
१५०

150

न्नायगचतुर्दशी नैवतत्रव्रतंकुर्यात्पुरैरैश्वर्यहानितः अर्द्धरात्रिश्च द्वितीययामांत्यतृ
तीययामाद्यघटीद्वयरूपइतिमाधवः वचनंतूक्तंप्राक् एवंसतिपूर्वेद्युरेवोभयव्या
प्तौपूर्वैव त्रयोदशीयदादेवि दिनभुक्तिप्रमाणतः जागरे शिवरात्रिःस्यान्निशिपूर्णाच
तुर्दशीतिस्कांदोक्तेः दिनभुक्तिरस्तमयः जयंती शिवरात्रिश्चकार्येभद्राजयान्वितेति
स्कांदाच्च दिनद्वयेनिशीथव्याप्तौतु हेमाद्रिमते पूर्वा अर्द्धरात्रात्पुरस्ताच्चेज्जयायोगो
यदाभवेत् पूर्वविद्धैवकर्तव्याशिवरात्रिः शिवप्रियैरितिपाद्मवचनात् मदन
रत्नेप्येवं गौडास्त्वप्येवमाहुः निर्णयामृतेतु सर्वापिशिवरात्रिः प्रदोषव्यापिन्ये
व अर्द्धरात्रवाक्यानिकैमुतिकन्यायेनप्रदोषस्तावकानीत्युक्तं तन्न अर्धरात्र
स्यपूर्वकर्मकालोक्तेः परदिनेप्रदोषनिशीथोभयव्याप्तिसत्वादपरैवेतितुमाधवः
इदमेवचयुक्तंप्रतीमः परेद्युः प्रागुक्तार्धरात्रस्यैकदेशव्याप्तौपूर्वेद्युः संपूर्णत
द्व्याप्तौचसत्यपिपरेद्युः प्रदोषनिशीथोभययोगेपूर्वेद्युः संपूर्णव्याप्तेःपूर्वैव व्या
प्त्यार्धरात्रं यस्यांतुलभ्यतेयाचतुर्दशी तस्यामेवव्रतंकार्यमत्प्रसादार्थभिर्न
रैः तद्द्वयोर्योग्यतान्विताभक्त्या साकार्या व्रतिभिः सदेतिमाधवधृतेशानसंहितोक्तेः
पूर्वेद्युः निशीथस्यपरेद्युः परेद्युः प्रदोषस्येत्येकैकव्याप्तौतुपूर्वैव जयायोग

राम
१५०

150A

स्य प्राशस्त्यात् तच्चोक्तं नागरखंडे माघफाल्गुनयोर्मध्ये असिता या चतुर्दशी ।
अनंगेन समायुक्ता कर्तव्या सा सदा तिथिः रितिपाद्मेति अर्धरात्रात्पुरस्ताच्चेज्जया
योगो यदा भवेत् पूर्वविद्धैव कर्तव्या शिवरात्रिः शिवप्रियैरिति स्कांदेपि भवेद्य
त्र त्रयोदश्यां भूतव्याप्ता महानिशा शिवरात्रिव्रतं तत्र कुर्याज्जागरणं तथेति मह
तामपि पापानां दृष्टा वै निष्कृतिः पुरा न दृष्टा कुर्वतां पुंसां कुहूयुक्तां तिथिं शिवा
मिति स्कांदे दर्शयोगस्य निंदितत्वाच्च यदा चतुर्दशी पूर्वेद्युर्निशीथादूर्ध्वं प्र
वृत्ता परेद्युश्च निशीथादर्वागेव समाप्ता तदा परेद्युरेकव्याप्तिसत्वात् परैव मा
घासिते भूतदिने हि राजन्नुपैति योगं यदि पंचदश्या जयाप्रयुक्तां न तु जातु कुर्या
च्छिवस्य रात्रिं प्रियकृच्छिवस्येति वचनात् एवं दिनद्वये प्रदोषव्याप्त्यभावे निशी
थव्याप्तिसत्वात् पूर्वैव तेन दिनद्वये निशीथव्याप्तौ प्रदोषव्याप्त्या निर्णयः । दिनद्वये
प्रदोषव्याप्तौ निशीथेन निर्णयः एकैकव्याप्तौ तु निशीथेन निर्णय इति इयं च
रविभौमसोमवारेषु शिवयोगे चातिप्रशस्ता हेमाद्रौ तीर्थखंडे लैंगे फाल्गुनस्य ।
चतुर्दश्यां कृष्णपक्षे समाहिताः कृत्तिवासेश्वरं लिंगं सर्व्वे यंति शिवं शुभं तेयां
ति परमं स्थानं सदा शिवमनामयं शिवरात्रिपारणेन विरुद्धवाक्यानि दृश्यंते ।
स्कांदे कृष्णाष्टमी स्कंदषष्ठी शिवरात्रिचतुर्दशी एताः पूर्वयुताः कार्यास्तिथ्यं

ते पारणं भवेदिति जन्माष्टमी रोहिणी च शिवरात्रिस्तथैव च पूर्वविद्धैव क
र्तव्या तिथिभांते च पारणमिति तिथिमध्ये पि पारणं स्कांद उक्तं उपोषणं चतुर्द
श्यां चतुर्दश्यां तु पारणं कृतैः सुकृतलक्षैश्च लभ्यते वाथवा नवा ब्रह्मांडोदर
मध्ये तु यानि तीर्थानि संति वै संस्नातानि भवंतीह भूतायां पारणे कृते तिथी
नामेव सर्वासामुपवासव्रतादिषु तिथ्यंते पारणं कुर्याद्विना शिवचतुर्दशीमिति
अत्र यामत्रयादर्वाक् चतुर्दशीसमाप्तौ तदंते तदूर्ध्वगामिन्यां तु प्रातस्तिथिमध्य
एवेति हेमाद्रिमाधवादयो व्यवस्थामाहुः तन्न तिथ्यंते तिथिभांते वा पारणं यत्र
चोदितं यामत्रयोर्ध्वगामिन्यां प्रातरेव हि पारणेत्यादिसामान्यवचनैरेव व्यव
स्थासिद्धेरुभयविधिवाक्यवैयर्थ्यस्य दुःपरिहरत्वात् वयं तु तिथ्यंते पारणं भवेदि
ति जन्माष्टम्यादिविषयमेव न तु शिवरात्रविषयं तदुपादाने तु पूर्वमुक्तत्वेनात्रक
थनार्थं कथमन्यथा स्कांदे एतन्मन्त्र हृदयवाक्यवत्तिथिमध्ये पारणविधानं घ
टते तस्माद्विना शिवचतुर्दशीमिति पर्युदस्तशिवरात्र्याः सर्वप्रकारेणापि तिथिमध्य
एव पारणेति क्रमः शिष्टाचारोप्येवमेव दीपिकायां तु रात्रावपि तिथ्यंत एवोक्तं ।
व्रतं तिथ्यंते निशीथेपि वा पारणीयादिति मदनरत्नकालादर्शयोस्तु सामस्तमय
पर्यंतं व्यापिनी चेत्परेऽहनि दिवैव पारणं कुर्यात् पारणे नैव दोषभागित्युक्तं

151A

तत्र तिथिमध्येपारणविधानन्निषिद्धे फलायोगाच्च तिथ्यंतानपेक्षणं द्वे
धाप्रशस्तयाचतुर्थपादासंगतेः तेनेदंशिवरात्रिभिन्नव्रतपरंज्ञेयं इदंचव्रतंसंयो
गपृथक्त्वन्यायेननित्यंकाम्यंच तथाचमाधवीयेस्कांदे परात्परतरंनास्ति शिवरा
त्रिःपरात्परा नपूजयतिभक्त्येशंरुद्रंत्रिभुवनेश्वरं जंतुर्जन्मसहस्रेषुभ्रमतेनात्र
संशयइति अकरणेप्रत्यवायश्रुतेः वर्षेवर्षेमहादेविनरोनारीपतिव्रता शिवरा
त्रौमहादेवंनित्यंभक्त्याप्रपूजयेत् इतिवीप्साश्रुतेः अर्णवोयदिवाशुष्येत्क्षीयते
हिमवानपि चलंत्येतेकदाचिद्वैनिष्फलंहि शिवव्रतमितिवचनाच्चनित्यता सम
भक्त्यतुयोदेविशिवरात्रिमुपोषकः गणत्वमक्षयंदिव्यमक्षयंशिवशासनं २ वि
सर्वान्भुक्त्वामहाभोगान् ततोमोक्षमवाप्नुयादितिस्कांदात् द्वादशाब्दिकमेतत्
स्याच्चतुर्विंशाब्दिकंतुचेति तत्रैवेशानसंहितावचनात्काम्यता तत्रैवशिव
रात्रिव्रतंनामसर्वपापप्रणाशनं आचंडालमनुष्याणांभुक्तिमुक्तिप्रदाय
कं अत्रजागरोपवासपूजाःसमुदिताःव्रतंनतुप्रत्येकं समुदितानांफल
संबंधात् यत्तु अथवाशिवरात्रिंचपूजाजागरणेनयेत् तथा अखंडितव्रतोयो
हिशिवरात्रिमुपोषयेत् सर्वान्कामानवाप्नोतिशिवेनसहमोदते वाक्यद्वय

णायविशेषेणोव्रतस्तु नोपियः पुमान् जागरं कुरुते यस्तु स रुद्रसमतां व्रजेदित्यादि
स्कांदं तदनंतकल्पत्वाद्दशांकपरं माघेतरप्रतिमासशिवरात्रिस्तु शिवरात्रिशब्द
स्य माघकृष्णचतुर्दश्यामेव रूढत्वात् माघमासस्य शेषे या प्रथमे फाल्गुनस्य च
कृष्णा चतुर्दशी सा तु शिवरात्रिः प्रकीर्तितेति हेमाद्रौ वचनाच्च नायं निर्णयस्तत्रोति
रात्रौ यामचतुष्टये पूजाविधानाद्यस्मिन्दिनेऽधिका रात्रिव्याप्तिः सा ग्राह्या सा-
म्येतरवैवेति हेमाद्रिस्तु चिंत्यवान् वस्तुतस्तु प्रतिमासकृष्णचतुर्दश्यामपि सर्वका-
मप्रदकृष्णचतुर्दश्यां शिवरात्रिव्रतमित्युपक्रम्य चतुर्दशाब्दं कर्तव्यं शिवरात्रिव्रतं
शुभमिति हेमाद्रौ कालोत्तरे शिवरात्रिशब्दप्रयोगात् कौंडपायनामयनाग्निहो-
त्रे नैत्यकाग्निहोत्रधर्माइव तद्धर्मप्राप्तिः स्यादेव अतः प्रदोषनिशीथोभयव्याप्तैव
निर्णय इति वयं प्रतीमः अस्यारंभो हेमाद्रौ स्कांदे आदौ मार्गशिरे मासि दीपोत्स-
वदिनेपि वा गृह्णीयान्माघमासे वा द्वादशैव सुयोषयेत् दोषोघवमयासाम्यकृष्णा-
याश्चतुर्दशी द्वादशास्त्वपि मासेषु प्रकुर्यादिह जागरं तथा एवं द्वादशवर्षेषु द्वादशै-
वत्तयोधनात् वरयेदिति शेषः चतुर्दशावा विप्रानाचार्यं च सत्याकुंभोपरिन्यसेत् दे-
वस्तु मयासहितं शिवं सौवर्णं पघ्यपवारौप्येसभे संस्थितं शुभे इत्युक्तेः हेमीमूर्तिसं

152A

पूज्य स्थिरं चरं वा लिंगं पंचामृतसहस्रशतपंचाशतदध्यन्यतरकुंभैः संस्नाप्य संपूज्य जा
गरं कृत्वापरेद्युस्तिलान्सहस्रं शतं वा हुत्वा विप्रेभ्यो वस्त्राणि द्वादश गाश्च दत्वाचार्याय धे
नुं शय्यां च दत्वा विप्रान्भोजयेदिति मदनरत्ने उक्तं माघामावास्यायुगादि तदुक्तं माघ
मासे त्वमावास्येति [illegible] तथान्योपि विशेषो विष्णुपुराणे माघासिते पंचदशी
कदाचिदुपैति योगं यदि वारुणेन ऋक्षेण कालः स परः पितॄणां न ह्यल्प
पुण्यैर्नृप लभ्यते सा वा इति वारुणं शतभिषा इदं च कुंभादित्ये ज्ञेयमिति हेमाद्रिः भा
रते काले धनिष्ठा यदि नाम तस्मिन् भवेत्तु भूपाल तदा पितृभ्यः दत्तं तिलान्नं प्रद
दाति तृप्तिं वर्षायुतं तत्कुलजैर्मनुष्यैरिति फाल्गुनपौर्णमासी होलिका सा च सा
यान्हव्यापिनी ग्राह्या सायान्हे होलिकां कुर्यात्पूर्वान्हे क्रीडनं गवामिति वचनादिति नि
र्णयामृते उक्तं ज्योतिर्निबंधे तु प्रतिपद्भूतभद्रासु यार्चिता होलिका दिवा संवत्सरं
च तद्राष्ट्रं पुरं दहति साद्भुतं प्रदोषव्यापिनी ग्राह्या पौर्णिमा फाल्गुनी सदा तस्यां भद्रा
मुखं त्यक्त्वा पूज्या होला निशामुखे इति नारदवचनात् प्रदोषव्यापिनीत्युक्तं हे
माद्रौ मदनरत्ने च भविष्ये अस्यां निशागमे पार्थ संरक्ष्याः शिशवो गृहे गोमये
नोपलिप्ते च सचतुष्के गृहांगणे इत्यादिना तत्रैव तद्विधानाच्च तेनेयं पूर्वे

विद्धाश्रावणीदुर्गानवमीदूर्वाचैवहुताशिनी पूर्वविद्धैवकर्त्तव्याशिवरात्रिर्बलि
दिनमिति बृहद्यमवचनादेव तत्तेषु दिनद्वये प्रदोषव्याप्तौ परैव पूर्वदिने भद्रास
त्वात् तत्रच होलिकानिषेधात् तदुक्तं निर्णयामृते मदनरत्ने च चण्डराणसमुद्भ
ये भद्रायां दीपिता होली राष्ट्रभंगं करोति वै नगरस्य च नैवेष्टा तस्मात्तां परिवर्जये
त् तथा भद्रायां द्वे न कर्त्तव्ये श्रावणी फाल्गुनी तथा श्रावणी नृपतिं हंति ग्रामं द
हति फाल्गुनी तथा दिनार्द्धात्परतोपि स्यात् फाल्गुनी पौर्णिमा यदि रात्रौ भद्राव
साने तु होलिका दीप्यते तदेति यदा तु पूर्वदिने चतुर्दशी प्रदोषव्यापिनी परदिने च
पूर्णिमा क्षयवशात्सायाह्नात्प्रागेव समाप्यते तदा पूर्वदिने संपूर्णरात्रौ भद्रा
सत्वात्तत्रच तन्निषेधात्परेहनि प्रतिपद्येव कुर्यात् सार्द्धयामत्रयं वा स्यात् द्वितीय
दिवसे यदा प्रतिपद्येव कुर्यात् सार्द्धयामत्रयं वा स्यात् द्वितीयदिवसे यदा प्रतिप
द्वर्धमाना तु तदा सा होलिका स्मृतेति भविष्यवचनादिति निर्णयामृतकारः मदन
रत्नेप्येवं यत्तु वह्नौ वह्निं परित्यजेदिति भविष्ये वह्नौ होलिकायां वह्निं प्रतिपदं व
र्जयेदित्यर्थः तदुक्तं भिन्नविषयमिति तत्रैवोक्तं अन्ये तु तस्यां भद्रामुखं त्यक्त्वेति (
प्रदोषव्यापिन्यां तस्यां तथा पूर्वदिने तदा भद्रामुखं वर्जयित्वा होलिकायाः प्रदीप (
नमिति नारदवचनात् निशागमे प्रपूज्येत होलिका सर्वदा बुधैः न दिवा पूजयेत् (

153A

ढुंढा राक्षसी जिता दुःखदा भवेदिति दिवोदासीये वचनात् यामत्रयोर्ध्वगा चेत्प्रतिपत्तु भ
वेत्तिथिः भद्रामुखं परित्यज्य कार्या होला मनीषिभिरिति विद्याविनोदेभिधाना
च्च भद्रामुखं विहाय पूर्वेदिन एव कार्येत्याहुः भद्रामुखं तु नाड्यः पंच वदनं ग
लकस्तथैकेति रात्रमालोक्यं ज्ञेयं शिष्टाचारोप्येवमेव अत्र चेच्चंद्रग्रहणं तदा तु
नोक्तं शिभद्रावर्ज्यपौर्णमास्यां होलिकादीपनं अथ यपरेह्नि ग्रस्तोदयस्तदा पूर्व
दिने भद्रावर्जे रात्रिचतुर्थयामे विष्टिपुच्छे वा होला कार्या ग्रहोत्तरं प्रतिपत्त्वात्सर्वेच
दिवा होलानिषेधादिति दिवोदासचंद्रप्रकाशे वस्तुतस्तु परदिने प्रदोषे पौर्णमा
सीसत्वे कर्मकालस्य रात्रिचतुर्थयामादिगौणकालग्रहणे मानाभावात् भद्राभा
वाच्च ग्रहणकाल एव होला कार्या न च सर्वेषामेव वर्णानां सूतकं राहुदर्शने ।
स्नात्वा कर्माणि कुर्वीत शृतमन्नं विवर्जयेदिति निषेधात् वाच्यं शृतं न होलेति वाच्यं ।
तस्योत्तरार्धशेषत्वात् पूजामंत्रस्तु अस्माभिर्भयसंत्रस्तैः कृता त्वं होलि बालिशैः
अतस्त्वां पूजयिष्यामि भूते भूतिप्रदा भवेति यत्तु वार्तिककारैर्होलाका आचार प्रा
प्तत्वमुक्तं तद्धेमाद्र्याद्युदाहृतभविष्यवचनान्यसिद्धानि कृत्वा चिंत्या ज्ञेया अस्याश्चि
करणवत् कृत्वाशिनी मलमासेन भवति इयं मन्वादिरपि सा तु पूर्वाह्णिकी ग्राह्या

ह्यामलमासे सति मन्वादिश्राद्धं मासद्वये कार्यमित्युक्तं प्राक् कृत्यचिंतामणौ ब्राह्मे
नरो दोलागतं दृष्ट्वा गोविंदं पुरुषोत्तमं फाल्गुन्यां संयतो भूत्वा गोविंदस्य पुरं व्रजे
त् चैत्रकृष्णप्रतिपदि वसंतोत्सवः सा चोदयिकी ग्राह्या प्रवृत्ते मधुमासे तु प्रति
पद्दिने रवाविति भविष्योक्तेः दिनद्वये तद्व्याप्तौ पूर्वा वत्सरादौ वसंतादौ बलि
राज्ये तथैव च पूर्वविद्धैव कर्तव्या प्रतिपत्सर्वदा बुधैरिति वृद्धवशिष्ठवचनात्
अत्र विशेषो हेमाद्रौ भविष्ये चैत्रे मासि महाबाहो पुण्ये तु प्रतिपद्दिने यस्तत्र श्वप
चं स्पृष्ट्वा स्नानं कुर्यान्नरोत्तमः न तस्य दुरितं किंचिन्नाधयो व्याधयो नृपेति तथा प्र
वृत्ते मधुमासे तु प्रतिपद्युदिते रवौ कृत्वा चावश्यकार्याणि संतर्प्य पितृदेवताः
वंदयेद्धोलिकाभूतिं सर्वदुःखोपशांतये मंत्रश्च वंदितासि सुरेंद्रेण ब्रह्मणा शंक
रेण च अतस्त्वं पाहि नो देवि भूते भूतिप्रदा भवेति अत्रैव चूतकुसुमप्राशनमु
क्तं तत्रैव पुराणसमुच्चये वृत्ते तुषारसमये सितपंचदश्यां प्रातर्वसंतसमये समु
पस्थिते च संप्राश्य चूतकुसुमं सह चंदनेन सत्यं हि पार्थ पुरुषोथ समाः सुखी स्या
त् मंत्रस्तु चूतमग्र्यं वसंतस्य माकंदकुसुमं तव सचंदनं पिबाम्यद्य सर्वकामार्थ
सिद्धये इति चैत्रामावास्या मन्वादिः सा चापराह्णव्यापिनी ग्राह्या कृष्णपक्षस्य त्वो

154A

त् इति फाल्गुनः एवं निरूपितमिदं गहनं तु कालतत्त्वं विचार्य वचनैरनयै
श्च सम्यक् तद्दोषदृष्टिमपहाय विवेचनीयं विद्वद्भिरन्यविरतं प्रणतोऽस्मि
तेषु मयासद्भासद्भावप्रदिगादितं मंदमतिना किमेतन्नह्यध्यवसितमपि स्व
ल्पमतिना तदेवं यत्किंचिद्रुदितमिह विख्यातमहिमा प्रतापोऽयं सर्वो विकसति
तु पित्रोश्चरणयोः यो भाट्टतंत्रगहनार्णवकर्णधारः शास्त्रांतरेष्वखिलेष्वपि
मर्मभेत्ता योऽत्र श्रमः किल कृतः कमलाकरेण प्रीतो मुनास्तु स हरिर्बुधरामकृ
ष्णः ॥ ॥ इति श्रीमन्नारायणभट्टसूरिसूनुरामकृष्णभट्टकमलाकरकृते निर्
णयसिंधौ संवत्सरकृत्यनिरूपणं नाम द्वितीयः परिच्छेदः अथ प्रकीर्णकनि
र्णयः ॥ ॥ श्रीरामकृष्णतनयः कमलाकरसंज्ञितः निरूप्य तिथिकृत्यं तु प्रकी
र्णं वक्तुमुद्यतः तत्रादौ संस्कारेषु गर्भाधानं तत्र प्रथमरजोदर्शने दुष्टमासग्रहण
संक्रमादिफलं तत्र शांत्यादि च पितृकृतं भट्टकृतप्रयोगरत्ने ज्ञेयं किंचित्तूच्यते म
दनरत्ने नारदः अमारिक्ताष्टमीषष्ठीद्वादशीप्रतिपत्स्वपि परिघस्य तु पूर्वार्धे व्य
तीपाते च वैधृतौ संध्यासूर्यप्लवे विष्ट्यामशुभं प्रथमार्तवं रोगी पतिव्रता दुःखी
पुत्रिणी भोगभागिनी पतिव्रता क्लेशभागी सूर्यवारादिषु क्रमात् वैधव्यं स्तुतैला

=५= नाभिमूले स्थितं पुष्पं चतुर्दलसमन्वितं तस्मिन्सर्वाश्रदं धत्ते गर्भसंभवकारणं अधोमुखं स्थितं
स्त्रीणां न कालमकुलाकृतिं नालामरंवयः प्राप्तिमुकुलं विकसेद्वेत् उत्फुलं कुरुं स्त्रीणां स्व
=भावेन स्रवेद्रजः तदा प्रभृति सर्वासां मासि मासि भवेदिति =५=

भक्ष्मे मैथुने राज्यविवर्धनं मित्रलाभः शत्रुवृद्धिः कुलर्द्धिर्बंधुनाशनं मरणं वंशवृ
द्धिश्च निरोहाराकुलक्षेय तेजेश्च स्तननाशश्च कलहो निवृत्तिधिक्रमात् गर्गः सुभगा
चैव दुःखशीला वंध्या पुत्रसमन्विता धर्मयुक्ता व्रतेनृश्चीच परसंतानमोदिनी सुपुत्रा च
बहुपुत्रा पिवे रमता सदा दीना प्रजावती चैव पुत्री भार्या चित्रकारिणी साध्वी पतिप्रिया
नित्यं सुपुत्रा कष्टचारिणी स्वकर्मनिरता हिंसा पुण्यपुत्रादिसंयुता नित्यं धनचयाश्रि
ता पुत्रधान्यसमन्विता सर्वैकचारा पुण्यवती दस्त्रभोदेः क्रमात्फलं नारदः कुलीरहे
षचापांत्यनक्रनृयुक्कन्यान्त्यलाघटाः राशयः शुभदा ज्ञेया नारीणां प्रथमार्त्तवे गा
र्गः सुभगा श्वेतवस्त्रा स्याद् दृढवस्त्रा पतिव्रता क्षौमवस्त्रा शिल्पि शास्यान च वस्त्र
सुखान्विता दुर्भगा जीर्णवस्त्रा स्याद्रोगिणी रक्तवाससा नीलांवरधरा नारी पुत्रवि
ना विधवा ततः वस्त्रेस्त्वविषमारक्तविंदवः पुत्रमाप्नुयात् समाश्चेत्कन्यकाचिर
तिफलं स्यात्प्रथमार्त्तवे अथ स्त्रीसंगवर्जनमाह वशिष्ठः प्रभृतदोषेयदिह स्व
ते न तत्सुखं तदा शांति कर्मकार्यविवर्जयेदेव तदेक शय्यां यावद्रजोदर्शनमत्र मे
दिन्योतिर्निबंधे वशिष्ठः आद्यार्त्तवो योषिमुत्तेर्णमधुस्तुचिनभस्याश्च कृपा
पवाराविज्ञापवर्षौ चषष्ठः पितृपरसदने रात्रिसंध्यापराह्ने मिश्रो ग्राम्यलती

155A

ग्रांविवरमनरुणाल्पाधिकास्त्रंचराष्टोत्पातःपापस्यलग्नंनसम्हत्पाजरत्नीलर
ज्ञोवरंच आघ्रैन्द्रिभगानानारी विष्कुंभेचेद्रजस्वला वंध्याचैवातिगंडेच मूले
मूलवत्तीभवेत् गंडेतुदुःशीलीनारी व्याघातेचात्मघातिनी वज्रेचूस्वैरिणीप्रो
क्ताघातेचपतिघातिनी परिघे मृतवंध्याचवैधृतौपतिमारिणी रोषास्तुभाव
नायोगायथानामफलप्रदाः शांतिमासु प्रयोगपारज्ञाने शौनकः सार्द्धवानं
तु नारीणां शांतिंच स्यामि शौनकः पंचमेक्रिंचतुर्थेवागतहातिथ्यपुरःसरं द्रो
णप्रमाणधान्येन व्रीहिराशित्रयं भवेत् कुंभत्रयंन्यसेद्वासोतंतुवस्त्रादिवेष्टि
ते स्तक्तेनायनवर्चैन प्रस्तुवस्त्रैपरत्यय ऊठचायप्रवतस्त हज्ञायम्या चततः अ
मात् मध्यकुंभेक्षिपेद्वान्यमोषधानिचहेमच उदुंबरःकुशादूर्वाराजीवंवटवि
ल्वकाः विष्णुक्रांताथतुलसीवर्द्धिवंशाबरवपुष्पिका शतावर्यश्वगंधाचनि
र्गुंडी शार्षपद्वये अपामार्गः पलाशश्चयनसोजीवकस्तथा प्रियंगवश्वगोधूमा
व्रीहयोस्थस्यएवच क्षीरंदधिचसर्पिश्चपयपत्रंतन्योत्पलंकांरटअयंगंडजावचाभ
द्रकमुस्तकाः द्वात्रिंशदौषधानीत्यथासंभवमाहरेत् मृत्तकाश्वोषधादीनितु
त्संगेणक्षिपेत्क्रमात् कुंभोपरिन्यसेत्पात्रंकार्यं मृदुदेणुताम्रजं भुवनेश्वरी ।

न्यसेत्तत्र इंद्राग्नी च पुरंदरं जपेद्गायत्रीमाहोमाच्छ्रीसूक्तं च जपेत्ततः स्थापनं वै
दक्षिणे कुंभः ऋत्विगेको जपेदथ चत्वारि रुद्रसूक्तानि च तन्मंत्रोत्तराणि च संस्थ
णं नरं कुंभं श्रीतद्रुद्रसंख्यया ऐन्द्र इंद्राग्निसूक्तं च तत्रैव संस्थापनं जपेत्
कुंभस्य पश्चिमे देशे शांतिहोमं समाचरेत् दूर्वाभिस्तिलगोधूमैर्यायसेनस्तते ।
न च तिलस्तिमिश्रैव दूर्वाभिरेकैकाचाहुतिर्भवेत् अष्टोत्तरसहस्रं वा शतमष्टोत्तरं तु
वा गायत्र्यैव तद्धोतव्यं स्थविरत्रयं च तद्ध्वयं ततः स्विष्टकृतं हुत्वा समुद्राद्रूर्मिसूक्ततः ।
संततामाज्यधारां तां स्रग्गोहुतिमथाचरेत् अथाभिषेकं कुर्वीत प्रतिकुंभस्थितोद
कैः आपोहिष्ठेति तिसृभिः सूक्तेच ततः परं इंद्रोग्नेर्गात्रचेनैव पावमानेन क्रमेण
तउभयं पुनः सुवघनस्त्वाग्निदा विशालकया त्र्यंबकेन मंत्रेण जातवेदस एकया
समुद्रज्येष्ठा इत्यादि त्रायंतां च त्रिभिः क्रमात् इमा आपश्चैनैव वेदस्य त्वेति मंत्र
तः मंत्रेणापनमीशानं त्वमग्नेरुद्र इत्यथ तमस्य हीति मंत्रेणा भुवनस्य पितरं तथा
जातेरुद्रेति मंत्रेण शिवसंकल्प मंत्रतः इंद्रत्वा वृषभं पंच मंत्रैश्चैवाभिषेचयेत् धेनुं
पयस्विनीं दद्यादाचार्याय च भूषणैः सदक्षिणामनुहां प्रदद्याद्रुद्रजापिने महाशांतिं
प्रजाप्याथ ब्राह्मणान् भोजयेत्ततः इति नारदः तत्र शांतिं प्रकुर्वीत घटेन दूर्वाति

156A

लाक्षतैः प्रत्येकाष्टशतं चैव गायत्र्याज्जुहुयात्ततः स्वर्णं गोभूतिलान्दद्यात्सर्वदोषापनुत्त
ये प्रकारांतरं मदनरत्ने ज्ञेयं विस्तरान्नोच्यते गृहणे रजोदर्शने तु जातकर्म प्रसूतिवेशां
तिं वर्ज्यमिः प्रथमार्तौ विशेषः स्मृतिचंद्रिकायां प्रथमर्तौ पुष्पिण्याः पतिपुत्रवती स्त्रि
याः अक्षतैरासनं कृत्वा तस्मिं तामुपवेशयेत् हरिद्रागंधपुष्पादीन् दद्युस्तांबूलकं स्र
जं दीपैर्नीराजनं कुर्यात्सदीपे वासयेद्गृहे लवणापूपमुद्गादि दद्यात्ताभ्यः स्वशक्तितः
ति द्वितीयाधर्मस्तत्रिया नाद्यपारजातेदक्षः अंजनाभ्यंजने स्नानं प्रवासं दंतधाव
नं न कुर्यात्सा त्रिवा नारी ग्रहणामीक्षणं तथा अग्निरपि वर्जयेत्मधुमांसं च पात्रेष
वै च भोजनं गंधमाल्यं दिवास्वापं ताम्बूलं चास्य शोधनं दग्धे शरावे भुंजीत पिबेद्वा
जलिना पिबेत् मदनरत्ने हारीतः रजः प्राप्ता चेदधः शयीत भूमौ काष्ठमौपसंपात्रेण न्नमे
येच्चाश्नीयात् इति विष्णुधर्मे आहारं गोरसानां न पुष्पालंकारधारणं अंजनं केकतंगं
धाः पीठशय्याधिरोहणं अग्निसंस्पर्शनं चैव वर्जयेद्वा दिनत्रयं तथा प्रथमर्तौ पूर्वं
स्त्रीगमनं न कार्यं प्राग्रजोदर्शनात्पत्नीं नेयाद्गत्वा पतत्यधः व्यर्थीकारेण शुक्रस्य ब्र
ह्महत्यामवाप्नुयादिति तत्रैवाश्वलायनोक्तेः तत्रजस्तौ गमनमाहस्म पाहवल्क्यः षो
डशर्तुनिशाः स्त्रीणां तस्मिन्युग्मासु संविशेदिति अन्त्यजावद्याहृग्गौतमः अग्र

नि.सिं.
१५८

157

।३।८।२५।८।१८।

तावुपेयात्सर्वेत्रवाप्रतिषिद्धवर्जमिति मनुः ऋतुः स्वाभाविकः स्त्रीणां रात्रयः षोडश
स्मृताः तासामाद्याश्चतस्रस्तु निंदितैकादशी च या त्रयोदशी च शेषास्युः प्रशस्ता दशरात्र
यः मदनरत्ने देवलः तस्मात्रिरात्रिं चांडालीं पुष्पितां परिवर्जयेत् तत्रतिथ्यादीनाहश्री
धरः षष्ठ्यष्टमीं पंचदशीं चतुर्थीं चतुर्दशीमप्युभयत्रहित्वा शेषाः शुभाः स्युस्तिथयो निषे
केवाराः शशांकार्यसितेंदुजानां उभयत्र पक्षद्वये आर्यो गुरुः सितः शुक्रः इंदुजो बुधः।
विष्णुप्रजेशरविमित्रसमीरपौष्णमूलोत्तरावरुणभानि निषेककार्ये पूज्यानि पुष्य
वसुशीतकराश्विचित्रादित्याश्च मध्यमफला विफलास्तुरत्ये विष्ण्वादिदेवत्यनक्षत्राण्यु
क्तानि रत्नमालायां भेशादस्त्रयमाग्निधातृशशिनः सर्वादितिर्वाक्पतिः कद्रूजाः पि
तरो भगोर्यमरवीत्वाष्ट्राद्वयो मारुतः शक्राग्नी त्वथ मित्रवासवऋतिस्तोयं च विश्वे
विधिर्गोविंदो वसवोंबुपाजचरणाहिर्बुध्न्यपूषाभिधाः उत्तराशब्देनोत्तरात्रयं श्र
वणमूलस्य पूज्यत्वमुक्तं याज्ञवल्क्येन त एवं गच्छन् स्त्रियं क्षामां मघां मूलं च वर्जयेत्
इत्युक्तं तेन पूर्वं च मूलं चिंत्यं अत्र समास्तु पुत्रा विषमास्तु कन्येति तेयं युग्मासु
पुत्रा जायंते स्त्रियोयुग्मासु रात्रिषु इति हेमाद्रौ शंखोक्तेः तत्राप्युत्तरोत्तराः प्रश
स्ता तदाहापस्तंबः तत्राप्युत्तरोत्तराः प्रशस्तेति तत्रैव व्यासः रात्रौ चतुर्थ्यां पुत्रः स्यादल्पा
युर्धनवर्जितः पंचम्यां पुत्रिणी नारी षष्ठ्यां पुत्रस्तु मध्यमः सप्तम्याम[illegible]जा योषिदष्टम्यां

राम
१५८

मीश्वरः पुमान् नवम्यां सुभगा नारी दशम्यां प्रवरः सुतः एकादश्यामधर्म्या स्त्री
द्वादश्यां पुरुषोत्तमः त्रयोदश्यां सुता पापा वर्णसंकरकारिणी धर्मज्ञश्च कृतज्ञश्च
आत्मवेदी दृढव्रतः प्रजायते चतुर्दश्यां पंचदश्यां पतिव्रता आश्रयः सर्वभूतानां
षोडश्यां जायते पुमानिति अत्र चतुर्थदिननिषेधेपि स्नातां चतुर्थे दिवसे रात्रौ गच्छे
द्विचक्षण इति महाभारतोक्तेश्चतुर्थेहनि स्नाता या युग्मासु वा गर्भं संदधातीति हारी
तोक्तेर्विकल्पो ज्ञेयः तत्रापि स्नानेपि रजस्वलायाश्च चतुर्थेहनि शस्यते गम्यानिवृ
त्ते रजसि नानिवृत्ते कथंचनेत्यापस्तंबोक्तेश्चैव स्याज्ज्ञेया अत्र सर्वासु युग्मासु गमन
मावश्यकं युग्मास्विति बहुवचननिर्देशात् इति विज्ञानेश्वरः तत्रैकस्यां रात्रौ सकृदेव
कार्यं सुस्थइंदौ सकृत्पुत्रं लक्षण्यं जनयेत्पुमानिति याज्ञवल्क्योक्तेः इदं चर्तौ गमनम
न्यकाले प्रतिबंधादिगमनासंभवे श्राद्धैकादश्यादावपि कार्यं ब्रह्मचार्येव पर्वण्याद्या ना
ऋतस्वस्त्रव जेयेदिति याज्ञवल्क्योक्तेः मारव्यातंचेदंमिताक्षरायां यःश्राद्धादौ ब्रह्मचर्यविर
हिते तत्राप्यृतौ गच्छतो न ब्रह्मचर्यस्खलदोष इति पर्वाणीति बहुवचनेनाष्टमीचतुर्दश्यो
ग्रहणानिति च मदनरत्नेप्येवं यत्तु हेमाद्रौ शिवरहस्ये दिवा जन्मदिने चैव न कुर्यान्
मैथुनं व्रती श्राद्धं दत्वा च भुक्त्वा च श्रेयोर्थी न च पर्वस्विति तदनृतुविषयं ब्रह्मचार्येव
भवति यत्र तत्राश्रमे वसन्निति मनूक्तेः दर्शादौ तु न भवत्येव पर्वणां पृथुदत्तत्वात्

माधवीयेतु ऋतुकालं नियुक्तो वा नैव गच्छेत् स्त्रियं क्वचित् तत्र गच्छन् समाप्नोति
ह्यनिष्टफलमेव तु इति सद्भिरुक्तेः श्राद्धे ब्रह्मचर्यं नियतमित्युक्तं पर्वणी चंद्रोदये
प्येवं एतत्सति संभवे ज्ञेयं अनेकभार्यस्य तु यौगपद्ये हेमाद्रौ कश्यपः यौगपद्ये तु
तीर्थानां विवाहक्रमशो व्रजेत् रक्षणार्थमपुत्राणां ग्रहणक्रमशो विदुरिति गृहणाग्र
तु ग्रहणं ऋतुविधाने विष्णुर्योनिं व्रजेत्युक्तं योनिस्पृष्टा त्रिमिथ्युती गर्भाधाने
ततः कुर्यात्सुपुत्रो जायते ध्रुवं अगमने दोषमाह पराशरः ऋतुस्नातां तु यो भार्यां स
न्निधौ नोपगच्छति घोरायां भ्रूणहत्यायां पच्यते नात्र संशयः अस्यापवादमाह मद
नरत्ने व्यासः व्याधितो बंधनस्थो वा प्रवासेष्वथ पर्वसु ऋतुकालेपि नारीणां भ्रूण
हत्याप्रमुच्यते वृद्धां वंध्यामसद्वृत्तां मृतापत्यामपुष्पिणीं कन्यां च बहुपुत्रां च वर्ज
यन्मुच्यते भयात् वृद्धां गतरजस्कां गर्भाधानेंगहोमाकरणे प्रायश्चित्तमाह पारजा
ते आश्वलायनः गर्भाधानस्याकरणात्तस्यां जातस्तु दुष्यति अकृत्वा गां द्विजे द
त्वा कार्यास्तु सवनं प्रति गर्भाधानं च मलमासस्थुक्तादावपि कार्यं उत्सवेषु च स
र्वेषु सीमंत ऋतुजन्मसु सुरासुरेज्ययोश्चैवं मौढ्यदोषो न विद्यते इति ज्योतिर्निबं
धे स्मृतेः ऋतौ गमने पराशरः ऋतौ तु गर्भशंकित्वात्स्नानं मैथुनिनः स्मृतं अनृ
तौ तु यदा गच्छेच्छौचं मूत्रपुरीषवत् क्षीणं तु नस्नानं उभावप्यशुची स्यातां दंपती शय

158A

नंगतो शयनाद्यपि नानारी अशुचिः पुमान् इतिहदिशानातयोक्तेः अत्र कश्चिद्विशेषउ
च्यते तत्र रात्रौ रजसि जननादौ च रात्रिं त्रिभागां कृत्वा आद्यभागद्वये चेत्पूर्वदिनगता
हं परतस्तूत्तरमिति मिताक्षरायां यत्तु प्रागर्द्धरात्रात् प्राग्वा सूर्योदयात् पूर्वदिनमि
त्युक्तं तत्र देशाचाराद्व्यवस्था तया सप्तदशादिनपर्यंतं पुना रजोदृष्टौ स्नानमात्रम
ष्टादशे एकरात्रं ऊनविंशे द्व्यहः विंशत्प्रभृति त्रिरात्रमिति तत एव तत्रैव यत्तु चतुर्दशा
दिनादर्वाग् अशुचित्वं नास्ति एकादशे दिने एकरात्रं द्वादशे द्विरात्रं ऊर्ध्वं त्रिरात्रमिति
प्रयोगपारिजाते यच्चैवं रोगजे तु तत्रैव विशेषः संग्रहे रोगेण यद्रजः स्त्रीणामन्वह
प हि प्रवर्त्तते नाशुचिः सा भवेत्तेन नैस्याद्वैकारिकं मतमिति कर्माधिकारस्तु रजोनिवृ
त्त्यैव साध्वारान् तावत्स्यात् स्नातापि स्त्री रजस्वला यावत्प्रवर्त्तमानं हि रजो नैव
प्रवर्त्तते इति श्राद्धहेमाद्रौ शौरेवोक्तेः तत्रापि स्वकालेऽशुचिरेवेत्याह [illegible]: रो
गजे वर्त्तमानेऽपि काले निर्याति कालजं तस्मात्कालेऽप्रमत्तास्याद्व्यत्यासे संकरो भवेत्
तथा रजस्वला या रजस्वलान्तरस्पर्शेऽकामतः स्नानं कामतः उपवासः पंचगव्या
शनाच असवर्णानां तु ब्राह्मण्याः क्षत्रियादिस्पर्शे क्रमेण एककृच्छ्रार्द्धपादोनकृ
च्छ्रकृच्छ्राः क्षत्रियादीनां तु कृच्छ्रपाद एव क्षत्रियादीनां हीनवर्णास्पर्शे त्रिरात्र
मुपवासः वैश्यस्त्र्योः सवर्णास्पर्शेऽहोरात्रं द्विरात्रं च एतच्च कामतः अकामत

स्तः प्राक्स्पृष्टेरनशनं अकामतश्चण्डालादिस्पर्शेप्यनशनमेव प्राक्स्पृष्टेः कामत
स्तु प्रथमेह्नि त्र्यहः द्वितीये द्व्यहस्तृतीये एकाहः अस्पर्शेतु द्व्यहएकाहो चाभ्यञ्जना
याश्चण्डालादिस्पर्शे अहोरात्रं उच्छिष्टयोः स्पर्शेतु कृच्छ्रमित्यादि मिताक्षरायां तेषं स्प
त्ययसारेणु सर्वत्र वा लापत्यायाः स्पर्शे स्नाने कृते भुक्तिः पश्चाद्दर्शेन प्रत्याम्नाय दू
ति स्नानविधिं चाह पराशरः स्नाने नैमित्तिके प्राप्ते नारी यदि रजस्वला पात्रान्तरितं तो
येन स्नानं कृत्वा व्रतं चरेत् सिक्तगात्रा भवेदद्भिः सांगोपांगा कथंचन न वस्त्रपीडनं कु
र्यान्नान्यद्वासश्च धारयेत् अथ रजस्वलास्नानं देवजानीयात् वसन्तः ब्रह्मानुराधाश्वि
नसोमभेषु हस्तानिलार्कं लवासवेषु विसार्यमस्तोत्तरभाद्रभेषु वरांगनास्नानवि
धिः प्रदिष्टः ज्वरे तु एना ज्वराभिभूतायाना रजसा च परिप्लुता कथं तस्या भवेच्छौचं
शुद्धिस्यात्केन कर्मणा चतुर्थेहनि संप्राप्ते स्पृशेदन्या तु तां स्त्रियं सा सचेलावगाह्या
पः स्नात्वा स्नात्वा पुनः स्पृशेत् दशद्वादशकृत्वो वा आचामेच्च पुनःपुनः अन्ते च वाससां
त्यागः ततः शुद्धा भवेत्तु सेति इदं चातुरमात्रे ज्ञायं आतुरे स्नान उत्पन्ने दशकृत्वो ह्यनातुर
इति पराशरोक्तेः रजसो ज्ञानेतु परासरमाधवीये प्रजापतिः अविज्ञाते मले सा च मलवद्व
सना यदि कृतं गृहेषु दुष्टस्या बुद्धिस्तस्याः त्रिरात्रतः देवजानीये कारिकायां उच्छिष्टान्तर
द्विजातीनां रजस्त्री यद्यपि स्पृशति उपवासमधोच्छिष्टे ऊर्ध्वोच्छिष्टे अहं क्षिपेत् अथ पुंसव

159A

नेपृथेगायाराजाते जाते जातकर्मादिः द्वितीये वा तृतीये वा मासि पुंसवनं भवेत् व्यक्ते
गर्भे भवेत् कार्यं सीमंतेन सहाथवा बृहस्पतिः तृतीये मासि कर्त्तव्यं गृष्टेरन्यत्र शो
भनं गृष्टे चतुर्थे मासे तु षष्ठे मास्यथवाष्टमे सहात्रस्तनागृष्टिः एतेन प्रतिगर्भमा
पि भवतीति ज्ञायते बह्वृचकारिकापि कर्त्ता स्याद्देवरस्तस्याप्यस्यापत्युरसंभवः
आवर्त्तेत इदं कर्म प्रतिगर्भमिति स्थितिः ब्राह्मे गर्भाधानादिसंस्कर्त्ता पिता श्रेष्ठतमः
स्मृतः अभावे स्वकुलीनः स्याद्बांधवो वान्यगोत्रजः मदनरत्ने सत्यव्रतः मृते देशांत
रगते भर्त्तरि स्त्रीय एव संस्कृता देवरो वा गुरुर्वापि विंशयो वापि समाचरेत् हेमाद्रौ यमः
प्रथमे मासि द्वितीये वा यदा पुत्रस्तेन चेद्भ्रमायुक्तः स्यादिति वराहः हस्तो मूलं श्रव
णः पुनर्वसुमृगशिरस्तथा पुष्यः पुंसंज्ञकेषु कार्येषु एतानि शुभानि धिष्ण्यानि अनुराधा
नुहाविशाखाधर्येन्ने रतिस्मृतेः गर्गोपि पुन्नाम श्रवणे तिष्योहस्तस्त्रैव पुनर्वसुः अभि
जित्प्रोष्ठपाद्वैवमनुराधा तथाश्वयुक् नृसिंहः रिक्तां पर्वं च नवमीं त्यक्त्वा पुंसवने शु
भाः ज्योतिर्निबंधे वशिष्ठः मत्स्यमीनेसौरे स्तनहानिरिंदोः मृतप्रजा पुंसवने बुधस्य
काकी च वंध्या भवती स्मृते स्त्री पुत्रलाभो रविभौमजीवैः ग्रंथ चन लो नभस्याप्य
यमेव कालः दीपिकायां तु चतुर्थे नवलोभनमित्युक्तं अथ सीमंतः हेमाद्रौ वैज
वापः अथ सीमंतोन्नयनं चतुर्थे पंचमे षष्ठे चेति वशिष्ठः चतुर्थे सप्तमे मासि वा

षष्ठे वाप्यथवाष्टमे हेमाद्रौ शंखः गर्भस्पंदने सीमंतोन्नयनं यावद्वा न प्रसवः का
र्ष्णाजिनिः गर्भलंभनमालभ्य यावन्न प्रसवस्तावत् सीमंतोन्नयनं कुर्यात् शंखस्य व
चनं यथा मासश्चात्र सौरः सावनो वा कालविधाने चतुर्थे षष्ठे मासे भावि सौ
रेण गर्भे प्रथमे विधेयं सीमंतकर्म द्विजभामिनीनां मासेष्टमे विष्णुबलिं च कु
र्यात् वशिष्ठः चतुर्थे सावने मासि षष्ठे वाप्यथवाष्टमे ज्योतिर्निबंधे नारदः ।
अरिक्तापर्वदिवसे कुजजीवार्कवासरे कालविधाने सीमंते तिष्यहस्तादितिहरिश
शिभ्रुत्योष्णविध्युत्तराख्याः पक्षच्छिद्रं च रिक्तां परित्यज तिथिमथ पापवारास्तु प्रशस्ताः
अदितिः पुनर्वसुः पक्षच्छिद्रं चाह वशिष्ठः चतुर्दशी चतुर्थी च अष्टमी नवमी तथा ।
षष्ठी च द्वादशी चैव पक्षच्छिद्राह्वयाः स्मृताः क्रमादेतासु तिथिषु वर्जनीयाश्च नाडिकाः भू
ता ५ षष्ठमनु १४ नवं २५ क ९ दश १० शेषास्तु शोभनाः कालनिर्णये शुभसंस्थे निशा
नाथे चतुर्थी च चतुर्दशी पौर्णमासीं प्रशंसंति केचित्सीमंतकर्मणि बृहस्पतिः पूर्व
पक्षः शुभः प्रोक्तः कृष्णः श्चांत्यत्रिकं विना चतुर्दशी चतुर्थी च शुक्लपक्षे शुभप्रदे नार
दः विप्रक्षत्रिययोः कुर्याद्दिवा सीमंतकर्म तत् वैश्यशूद्रकयोरेतद्दिवा निश्यपि केचि
न्वाराः पूर्वोक्ता एव एतच्च सकृत्कृतं गर्भे वा कार्यमिति हेमाद्रिः सकृच्च कृतसंस्का
राः सीमंतेन द्विजस्त्रियः यं यं गर्भं प्रसूयंते स सर्वः संस्कृतो भवेदिति हारीतोक्तेः सीमं

त्रि

160A

तोनयनं कर्मनस्त्रीसंस्कारश्चयते ।केचिद्गर्भस्यसंस्कारात्प्रतिगर्भंप्रयुंजते इति
हेमाद्रौविष्णुवचनाच्च सकृदवस्त्रीयद्यकृतसीमंताप्रसवेत्तुकथंचन गृहीतपुत्रा
विधिवत्पुनःसंस्कारमर्हतीति सीमंतेभोजनेप्रायश्चित्तमुक्तं पराशरमाधवीयेधौ
म्येन ब्रह्मौदनेचसोमेचसीमंतोन्नयनेतथा जातकर्मनवश्राद्धे भुक्त्वाचांद्रायणंच
रेत् उग्रविधानेतु अराद्वेजपेन्मंत्रं शतवारं नसंशयः सीमंतेचपदाभ्यंक्तोम
च्यते किल्बिषात्तदेति अथगर्भिणीतत्पतिधर्माः वराहः सामिषमशनंयत्नात्प्रम
दापरिवर्जयेदतःप्रभृतिः गृहकारिका अंगारभस्मास्थिकपालचुल्लीरूर्ध्वादिकेषू
पविशेन्नारी सोलूखलाधोदृषदादिकेवायंत्रेतु बाह्येनतथोपविष्टा नोमार्जनीगो
मयपिंडकादौकुर्यान्नवारिण्यवगाहनंसा अंगारभूत्वा[illegible]तनखैर्लिखेत्क्ष
मांकलिं वपुर्भंगमयोन कुर्यात् नोमुक्तकेशी विवस्त्रापवास्याङ्क्ते नसंध्यावसरे
नरोते नामंगलंवाक्यमुदीरयेत्साऽस्त्यालयेहास्तत्लेनयायात् विष्णुधर्मोत्तरे
कटुतीक्ष्णकषायाणि अत्युष्णलवणानिच आयासंचव्यवायंचगर्भिणीवर्जयेत्
सदा प्रयोगपारिजाते कश्यपः गर्भिणीकुंजराश्वादिशैलहर्म्यारोहणं व्यायामं
शीघ्रगमनंशकटारोहणंत्यजेत् शोकंरक्तविमोक्षंचसाध्वसंकुक्कुटासनं व्यवसा
यंदिवास्वापंरात्रौजागरणंत्यजेत् मदनरत्ने स्कांदे हरिद्रांकुंकुमंचैवसिंदूरंकज्जलं

नि॰सिं॰
१६१

161

तथा कुर्यात्स कं च तांबूलं मंगल्याभरणं शुभं केशसंस्कारकबरीकर्णविभूषणं
भर्तुरायुष्यमिछंती दूरयेद्गर्भिणी नहि बृहस्पतिः चतुर्थे मासि षष्ठे वाप्यष्टमे ग
र्भिणी यदा यात्रा नित्यं विवर्ज्या स्यादाषाढे तु विशेषतः याज्ञवल्क्यः दोहृदस्या
प्रदानेन गर्भो दोषमवाप्नुयात् वैरूप्यं मरणं वापि तस्मात्कार्यं प्रियं स्त्रियाः दोहृदं गर्भि
णीप्रियं तत्रैवाश्वलायनः वपनं मैथुनं तीर्थं वर्जयेद्गर्भिणीपतिः श्राद्धं च सप्त
मान्मासादूर्ध्वं चान्यत्र वेदवित् श्राद्धं तद्भोजनमिति प्रयोगपारिजातः कालविधाने मृ
तेपि दीपिकायां च क्षौरं शवानुगमनं नखकृंतनं च युद्धादिवास्तुकरणं त्वतिदूरया
नं उद्वाहमौपनयनं जलधेश्च गाहमायुःक्षयार्थमिति गर्भिणिकापतीनां रत्नसंग्र
हे गालवः दहनं वपनं चैव चौलं वै गिरिरोहणं नावश्चारोहणं चैव वर्जयेद्गर्भिणीप
तिः अन्यत्रापि प्रव्यक्तगर्भापतिरभियानं मृतस्य वाहं दस्तुरकर्म संगं न स्यात्तुपने
नगयादितीर्थयागादिकं वास्तुविधिं न कुर्यात् प्रव्यक्तगर्भा वनिता चेत्मासत्रया
त्परा षण्मासात्परतः सूतिनवमेरिष्टवासिनी अप्रसूतिगृहप्रवेश गर्गः रोहि
ण्येंद्रवपौष्णेषु स्वात्योर्वरुणयोरपि पुनर्वस्वोः पुष्यहस्तधनिष्ठानुराधसु च मैत्रेत्वाद्रे
तेयाश्विन्यां सूतकागारवेशनं एतद्वसंभवे प्रसूतिसंभवे काले सद्य एव प्रवेशये
दिति वशिष्ठोक्तेः तत्रैव नैऋत्यां कार्यं वारुण्यां भोजनगृहं नैऋत्यां सूतिका

राम
१६१

161A

गृहमिति वशिष्ठोक्तेः विष्णुधर्मे: दशाहं सूतकागारमायुधैश्च विशेषतः वह्नि
नातिंदुकालातैः परशुकुंभैः प्रदीपकैः मुसलेन तथा वारिवार्णिकैश्चित्रकेन च ।
अथ जातकर्म पारजाते वशिष्ठः श्रुत्वा जातं पिता पुत्रं सचैलं स्नानमाचरेत् मनुः
प्राङ्नाभिवर्द्धनात्पुंसो जातकर्म विधीयते वर्द्धनं छेदनं हेमाद्रौ वैजवापः जन्मनो
नंतरं कार्यं जातकर्म यथाविधि दैवादतीतकालं चेदतीते सूतके भवेत् षष्ठीचं द्वाद
शे विष्णुधर्मे अच्छिन्ननाभिकर्तव्यं श्राद्धं वै पुत्रजन्मनि पुत्रपदेन कन्यासंगृह्यते ।
तदाह तत्रैव कार्ष्णाजिनिः प्रादुर्भावे पुत्रपुत्र्योर्ग्रहणे चंद्रसूर्ययोः स्नात्वानंतरमात्मी
यान् पितॄन् श्राद्धेन तर्पयेत् एतच्च रात्रावपि कार्यं पुत्रजन्मनि यात्रायां शर्वर्यां दत्तम
क्षयमिति तत्रैव व्यासोक्तेः वैजवापः जातमात्रकुमारस्य जातकर्म विधीयते स्नान
प्राशनं ततः पश्चान्नाभिकीर्तनतोपि वा एतेन नैमित्तिकामपीदं जाते छिवदाशौचांते
कार्यमिति शंकाधराः परास्ता जाते कुमारे पितॄणामामादात्सुवर्णं पतदहरित हारीतोक्तेश्च
आमश्राद्धमामेन हेम्ना वा कार्यमित्युक्तं षष्ठीचं द्वादशे आदिपुराणे जातश्राद्धेन दद्या
त्पक्वान्नं ब्राह्मणेष्वपीति हेमाद्रिस्तु पुत्रजन्मनि कुर्वीत श्राद्धं हेम्नैव बुद्धिमान्
न पक्वेन न चामेन कल्याणान्यभिकामयान्निति संवर्तोक्तेः हेम्नैवेत्याह एतच्च जन
नाशौचे मरणाशौचे च कार्यमित्याह मिताक्षरायां प्रजापतिः आशौचे तु समुत्पन्ने ।

पुत्रजन्मयदाभवेत् कर्तुस्तात्कालकी शुद्धिः पूर्वाशौचे न शुद्ध्यति केचित्तु मृताशौ
चस्य मध्ये तु पुत्रजन्म यदा भवेत् आशौचापगमे कार्यं जातकर्म यथाविधीति स्मृ
तिसंग्रहोक्तेराशौचांते कार्यमित्याहुः स्मृत्यर्थसारेपि किंत्वत्र उक्तः सद्धच्च वचर
क्षिप्रमेधेषामुदयेपि च गुरौ स्मृकैरथवा केंद्रे जातकर्मच नामच स्मृदिलक्षणमा
ह श्रीधरः रोहिण्युत्तरसंस्थिरं गिरिशामूलेंद्रोजेरगादारुणं क्षिप्रं चाश्वि दिने सपुष्य
मनलेंद्राग्नीन् साधारणं उग्रं पूर्वमथांतकं मृदु गतित्वाष्ट्रान्त्यमैत्रं वरं विष्णुस्वा
ति वातो ध्रुवस्यदिनयः कुर्यात्स्वसंज्ञाफलं अत्र सर्वत्र जातनामकर्मादावुक्तकालाति
क्रमे नक्षत्रादिकं ज्ञेयं देशकालोपघाताद्यैः कालातिक्रमणं यदि अनस्तगे ज्यैद्रुसि
ते तत्कार्यं चोत्तरायणे इति मदनरत्ने नारदोक्तेः बृहस्पतिरपि मुख्यालाभे विधिज्ञेन
विधिः क्रियते प्रमादतः नक्षत्रतिथिलग्नानां विचार्येवं पुनः पुनः सूतके संध्यादौ
विशेषं वक्ष्यामः अथ जन्मनि दुष्टकालाः तत्र गंडांतं ज्योतिर्निबंधे नारदः पूर्णा
नंदाख्ययोस्तिथ्योः संधिर्नाडीद्वयं तथा गंडांतं मृत्युदं जन्मयात्रोद्वाहव्रतादिषु कुर
लीरसिंहयोः कीटचापयोर्मीनमेषयोः गंडांतरालं स्यात्तु घटिकार्धं मृतिप्रदं सार्पं
द्रपौष्णभेष्वत्यषोडशांशा भसंधयः तदग्रभेष्वाद्यपादा भानां गंडांतसंज्ञकाः रत्नमा
लायां पौष्णाश्विन्योः सार्पपित्र्यर्क्षयोश्च यच्च ज्येष्ठामूलयोरंतरालं तद्गंडांतं स्याच्चतु

र्धं

नोक्तिकंदि यामा जन्मोद्वाहकालेषु निषिद्धं रत्नसंग्रहे नवनीतादिवे सर्वेषां गंडजाता
नां परित्यागो विधीयते वर्जयेद्दर्शनं सम्राङ्वं तच्च षण्मासिकं भवेत् तिथ्यर्क्षगंडे पितृ
मातृनाशो लग्नेतु संधौ तनयस्य नाशः सर्वेषु नो जीवति दैवितिं च ध्रुवं जीवति पुनः स्या
द्बहुवारणो भवः अथ शैषांदानं उत्तरगार्ग्ये तिथिगंडे त्वनडुहं नक्षत्रे धेनुरुच्यते कां
चनं लग्नगंडे तु गंडदोषो विनश्यति उत्तरे तिलपात्रं स्यात् पुष्ये गोदानमुच्यते अजाप्रदा
नं त्वाश्लेषा स्यात् पूर्वाषाढे च कांचनं उत्तराति ष्ष्ये त्रिरात्रस्तु पूर्वाषाढे द्भवस्य च कुर्यात् शांतिं प्र
यत्नेन नक्षत्राकरजां बुधः अथाश्लेषाफलं मूर्धास्यनेत्रगलकांसयुगं च वाहू हृद्जानु
गुह्यपदमित्यहिदेहभागः चास्माद्भिनेत्रकृततभुक्क्तिनागरुद्रषड्वादयं च शिरस्स्थः क्र
मशस्तु नाश्यः राज्यं पितृक्षयो मातृनाशः कामक्रिया रतिः पितृभक्तो बली स्वघ्नः त्यागी
भोगी धनी क्रमात् ज्येष्ठाफलमधुना त्रसप्तामले ज्येष्ठादौ जननी मातृ द्वितीये जननी पि
ता तृतीये जननी भ्राता स्वयं माता चतुर्थके आत्मानं पंचमे हंति सर्वं हंति दशांशक
इति अथ मूलफलं स्पष्टः अभुक्तमूलसंभवं परित्यजेत् बालकं समष्टकं पिताथवा
न तन्मुखं विलोकयेत् तदाद्यपादके पिता विपद्यते जननेऽन्यथा तृतीयके धनक्षयश्च
तुर्यकः शुभावहः प्रतीपमंत्यपादतः फलं तदेव सार्पभे अभुक्तमूलं त्वाह वसिष्ठः
ज्येष्ठांते घटिका चैका मूलादौ घटिकाद्वयं अभुक्तमूलमित्याहुः जातं तत्र विवर्जयेत्

त केचिज्ज्येष्ठांत्यं मूलाद्यं च पादं अभुक्तमूलमाहुः कश्यपसंहितायां त्वन्यथोक्तं मू-
लाद्यपादजो हंति पितरं तद्द्वितीयजः मातरं स्वं तृतीयोर्थांस्तु हंति तुरीयजः फलं तद्दे-
वसार्पर्क्षे प्रतिपत्त्वेत्यपादतः अथ मूलवृक्षः जयार्णवे मूलं स्तंभस्त्वचा शाखा पत्रं
पुष्पं फलं शिखा वेदाश्च मुनयः पक्षेनदशाश्च १० वसवस्त्वष्ट च नंदाः बाणाः परसा रुद्रा ११ मूलभेदः प्रकीर्त्तितः मूले मूलविनाशाय स्तंभे हानिधनक्षयः त्वचि भ्रातृविना-
शाय शाखा मातृविनाशकृत् पत्रे सपरिवारः स्यात् पुष्पे नृपवल्लभः फले तु लभ-
ते राज्यं शिखायामल्पजीवितं अन्यत्र त्वन्यथोक्तं मूलं सप्तघटीषु मूलहननं स्तंभेष्टसु
त्वक्षयं त्वचि दिग्बंधुविनाशनं च विटपे रुद्रैर्हतो मातुलः पत्रेर्कैः सुहृतीस्तु बाणाः कुसुमे मं-
त्री फले सागरैः राजा वह्निशिखाल्पमायुरिति सत् मूलांघ्रिपे स्यात् फलं भूपालवल्लभः
वृषालिसिंहेषु घटे च मूलं दिवि स्थितं युगमतुलांगनांत्ये पातालगं मेषधनुःकुलीरन-
क्रेषु मर्त्ये स्थितिसस्मरंति स्वर्गे मूलं भवेद्राज्यं पाताले च धनागमं मृत्युलोके यदा मूलं
तदा शून्यं समादिशेत् वसिष्ठः नैऋत्यभोद्भूतसुतः सुता वाक्षिप्रादवर्षं श्वसुरं निहंति
तदंत्यपादेजनितो न हंति तस्योक्रमेणाहिभवे कलत्रं श्वशुरेशात्ताराजनिताधवाग्रजं
द्विदैवताराजनिता तदेवरं पुरंदर्क्षे जनितः सुतस्तयास्वस्याग्रजं हंति नपुंसकापदि प्र-
योगपारिजाते मूलजाश्वसुरं हंति व्यालजा च तदंगनां माहेंद्रजाग्रजं हंति देवरं द्वि-

163A ह॰

चदेवजान्नसिंप्रसादे धवाग्रजं हंति सुरें जातमजैवपत्न्याभगिनीपुमांस्त्र द्विदे
वजादेवरमाशु हन्याज्ज्येष्ठानुजामाशु द्विहंति स्तनुः पत्न्यग्रजामग्रजामग्रजांवा हंति
ज्येष्ठर्क्षजः पुमान् तथा भार्यास्वसारं वा शालकं वा द्विदैवजः कन्यका देवरं हंति वि
शाखांत्यसमुद्भव आद्यपादत्रये नैव आद्यमेतपुमान् भवेत् नहन्यादेवरं कन्या तु
लामिश्र द्विदैवता नहक्षांत्योद्भवा वर्ज्याडया ह्याश्विकपुष्ववत् चित्राद्यर्धे पुष्यमध्ये
द्वियदि पूर्वाषाढाधिष्ण्यपदे तृतीये जातः पुत्रः स्योत्तराद्ये विधत्ते मातापित्रोर्भ्रातरं
बालनाशं द्विमासं चोत्तरादोषः पुष्ये चैव त्रिमासिकैः पूर्वाषाढाष्टमे मासि चित्रा
षाण्मासिकं फलं नवमासं तथाश्लेषा मूले चाष्टकवर्षके ज्येष्ठा पंचदशे मासि पु
त्रदर्शनवर्जिता वशिष्ठः अतीपाते गलानि स्यात्परिघे मृत्युमादिशेत् वैधृतौ पि
तृहानिः स्याद्वेष्टं दावधतां व्रजेत् मूले समूलनाशः स्यात्कुलनाशो ध्रुतौ भवेत् वि
ज्ञातं गोचर्महीने च संध्ययोरुभयोरपि एवं एषपि प्रसूतौ च सर्वारिष्टभयप्रदः तदेव
त्साद्यंतजातस्य पादजातस्तथैव च तस्माच्छांति प्रकुर्वीत नराणां क्रूरचेतसां गर्गः कृष्णां
चतुर्दश्यां योषं कुर्यादादौ सुभस्मृतं द्वितीये पितरं हंति तृतीये हंति मातरं चतुर्थे मा
तुलं हंति पंचमे वंशनाशनं षष्ठे तु धननाशः स्यात्सप्तमे वंशनाशने देवकीर्तिः
यद्येकस्मिन्दिने जायेते दुहितरौ वा पुत्रौ पितुरंतकारकौ चेत्तेषां परे प्रीतिरस्त

लास्यात् गर्गः एकस्मिन्नेव नक्षत्रे भ्रात्रोर्वा पितृपुत्रयोः प्रसूतिस्तनयो पुत्रो मृ
त्युर्भवेदेकस्य निश्चितं शौनकः ग्रहणे चंद्रसूर्यस्य प्रसूतिर्यदि जायते व्याधिपीडां त
दा स्त्रीणामादौ तत्र तु दर्शनात् मृत्युं संजायते यस्य तस्य मृत्युर्न संशयः शांतिस्तत्र।
नक्षत्राधिपते रूपं स्वर्णेन प्रकल्पयेत् सूर्यग्रहे सूर्यरूपं हैमं चंद्रं तु राजतं राहुरू
पं प्रकुर्वीत नागैनैव विचक्षणः नागः सीसं बपाणां चैव रूपाणां स्थापनं तत्र कार
येत् श्वेतकुंभेन वाप्यापस्य स्वर्भानोरिति प्रजा मंत्रः नक्षत्रदेवता यास्तन्मंत्रेण संयज्ये
त् ततो जेत् सर्वं समिद्भिश्चार्कसंभवैः चंद्रग्रहे च पालाशैर्दूर्वाभी राहुमेव च समिद्भिर्जु
हुयादष्टशतं मंत्रेण यज्ञ कुर्याद्बुधः आज्येन चरुणा चैव तिलैस्तु हुयात् ततः पंचगव्यैः
पंचरत्नैः पंचत्वक् पंचपल्लवैः जलैरोषधिसंयुक्तैः स्वस्त्यभिषेकं समाचरेत् मंत्रैर्वारुणैः।
संभृतैरापो हिष्ठादिभिस्त्रिभिः इमं मे गंगे रतस्तत्वायामीति मंत्रकैः यजमानस्ततो
दद्याद्दक्षिणां शक्तितः स्वयं मात्स्ये अकालप्रसवा नार्यः कालातीतप्रजास्तथा विकृ
तप्रसवाश्चैव युग्मप्रसवकास्तथा अमानुषा अमुंडाश्च अप्रजातव्यंजनास्तथा ही
नांगा अधिकांगाश्च जायंते यदि वा स्त्रियः पशवः पक्षिणश्चैव तथैव च सरीसृपाः
विनाशं तस्य देशस्य कुलस्य च विनिर्दिशेत् निर्वासयेत्तां नगरात्ततः शांतिं समा।
चरेत् विरुद्धधर्मेष्वतरे उपरि प्रथमं यस्य जायंते च शिरो द्विजाः दंतैर्वा सह यस्य स्या।

164A

ऽज्ञान्मभार्गवसत्तम द्वितीये च तृतीये च चतुर्थे पंचमे तथा यदा दंताः प्रजायंते मा
त्रि चैवमसंशयं मातरं पितरं वापि स्वादेदात्मानमेव च गजच्छायागते काले नौस्थ
वा स्थापयेद्द्विज तर भार्गवैतु धर्मज्ञ कांचने वा वरासने सर्वौषधैः सर्वगंधैर्बीजैः
पुष्पैः फलैस्तथा पंचगव्येन रत्नैश्च पताकाभिश्च भार्गव स्थालीपाकेन धाना
रं पूजयेदनंतरं सम्राहं चात्र कर्तव्यं तथा प्राशनभोजनं भद्रासने निवेशयेनं स्नाड्डि
मूलैः फलैस्तथा सर्वौषधैः सर्वगंधैः सर्वबीजैस्तथैव च स्नापयेत्पूजयेच्चाग्नि
वह्निं सोमं समीरणं पर्वतांश्च तथा रव्यात्तान्देवदेवं च केशवं एतेषामेव जु
हुयात् घृतमग्नौ यथाविधि ब्राह्मणानां तु दातव्या ततः संपूज्य दक्षिणा ज्ञेल
यामले पुण्यमंदंत निर्मुक्ति रूपं वा लस्य चेद्भवेत् ज्ञोरायमातुलस्येह तदा प्रा
ज्ञामर्षिभिः सौवर्णे राजते वापि ताम्रे कांस्यमये तु वा दध्योद[illegible]ने न संपूर्णं पा
त्रं दद्याद्धि रोणकरे समंत्रं भाजनं दत्वा समर्पयेत् मातुलः शिशुं सालंकारं सव
स्त्रं च शिरस्तु माल्लिंग्य सादरं तत्र मंत्र रक्ष मां भागिनेय त्वं रक्ष मे सकलं कुलं
गृहीत्वा भाजनं सान्नं प्रसन्नो भव मे सदा निर्विघ्नं कुरु कल्याणं निर्विघ्नाय च त्व
मातरं मप्युत्तमनमाशिष्टैः चिरंजीव मया सह एवं कृते विधाने तु विघ्नः को
पि न जायते इति सूर्याचिकपांतिः शांति सर्वं स्वे सुतं त्रयेस्तां चेत्स्या त्त्र

पैवास्ततो यदि मातापित्रोः कुलस्यापि तदानिष्टं समुद्भवेत् ज्येष्ठनाशो धनैर्हानिः
दुःखं वा सुमहद्भवेत् जातस्यैकादशाहे वा द्वादशाहे शुभे दिने आचार्यः सत्विजो स्नात्वा
ग्रहयज्ञपुरस्सरं ब्रह्मविष्णुमहेशेंद्रप्रतिमाः स्वर्णतः कृताः पूजयेद्धान्यराशिस्थ
कलशोपरि शास्त्रितः पंचमे कलशे रुद्रं पूजयेद्रुद्रसंख्यया रुद्रसूक्तानि चाचा
र्योतिस्रः क्रामि सर्वशः आचार्यो जुहुयात्तत्र समिदाज्यतिलान्पृथक् अष्टोत्तरस
हस्रं वा शतं वाष्टशतं तु वा देवताभ्यश्चतुर्वक्त्रादिभ्यो ग्रहपुरःसरं ब्रह्मादिमंत्रै
रिंद्रस्य यत इंद्रभयामहे ततः स्विष्टकृतं हुत्वा बलिं पूर्णाहुतिं ततः अभिषेकं कु
टुंबस्य कृत्वाचार्यं प्रपूजयेत् हिरण्यं धेनुरेका च ऋत्विजां दक्षिणा ततः आज्यस्य वी
क्षणं कृत्वा शांतिपाठं तु कारयेत् इति अन्येषु मूलादिगंडेषु शांत्यादि प्रयोगपारिजा
ते ज्ञेयं मिताक्षरायां मार्कंडेयः रक्षणीया तथा षष्ठी निशा तत्र विशेषतः रात्रौ जागरणं
कार्यं जन्मदानां तथा बलिः धनुर्बाणः शस्त्रहस्ता नृत्यगीतैश्च योषितः रात्रौ जागरणं
कुर्युर्दशम्यां चैव सूतके व्यासः सूतिकावासनिलया जन्मदा नाम देवताः तासां जाग
निमित्तं तु शुद्धिर्जन्मनि कीर्तिता प्रथमे दिवसे षष्ठे दशमे चैव सर्वदा त्रिष्वेतेषु न
कुर्वीत सूतकं पुत्रजन्मनि अपरार्के ब्राह्मे कन्यास्तनस्रोणकाद्या वा तथा षष्ठी चैव पंचमी
औरंडनार्थाच बालानां षष्ठी च रिपुरक्षणी एवं ह्रेन पूजनीया वैवै रपत्राक्ष्ये हिंजाति

भिः राकानुमतिः सिनीवाली कुहूरिति चतस्रः कन्याः इत्यर्थः अथ दत्तकपुत्र
परिग्रहविधिः पारिजाते शौनकः अपुत्रो मृतपुत्रो वा पुत्रार्थं समुपोष्य च वा
ससी कुंडले दत्त्वा उष्णीषं चांगुलीयकं वध्वन्नेनैव संभोज्य ब्राह्मणांश्च विशेषतः
अन्वाधानादिकं तंत्रं कृत्वाज्यांतं यथाविधि दातुः समक्षं गत्वा तु पुत्रं देहीति याचयेत्
दाने समर्थो दाता तस्मै ये यज्ञेनेति पंचभिः देवस्य त्वेति मंत्रेण हस्ताभ्यां परिगृह्य च अं
गादंगेत्यृचं जप्त्वा आघ्राय शिशुमूर्धनि गृहमध्ये तमाधाय चरुं हुत्वा विधानतः य
स्त्वा हृदेत्यृचा चैव तुभ्यमग्रे ऋचैकया सोमो ददद् इत्येताभिः प्रत्यृचं पंचभिस्तथा स्वि
ष्टकृदादि होमं च हुत्वा शेषं समापयेत् ब्राह्मणानां सपिंडेषु कर्तव्यः पुत्रसंग्रहः तदभा
वे सपिंडो वा अन्यत्र तु न कारयेत् मिताक्षरा दौत्तं व्याहृतिभिराज्येन होम उक्तः तत्रैव वसि
ष्ठः न त्वेवैकं पुत्रं दद्यात्प्रतिगृह्णीयाद्वा न स्त्री पुत्रं दद्यात्प्रतिगृह्णीयाद्वा अन्यत्रानुज्ञाना
द्भर्तुरिति यत्तु मंत्रकहोमस्य पुत्रप्रतिग्रहांगत्वाद्व्याहृत्यादिमंत्रपाठे च स्त्रीशूद्रयोरनधिका
रात्तयोर्दत्तकः पुत्रो न भवत्येवेति शुद्धिविवेके रुद्रधरेणोक्तं तन्न भर्त्रनुज्ञया स्त्रिया अ
पि प्रतिग्रहोक्तेः यद्यपि मंत्रातिं विना भार्यायाश्च वदद्ध्वरूपदत्तकत्वं होमसाध्यमुक्तं स्त्रि
याश्च होमासंभवस्तथापि विप्रद्वारादिवाद्विप्रद्वारा होमादि कारयेदिति हरिनाथादयः संभ
वति चैवं एवं शूद्रस्यापि शूद्रा शूद्रधर्मात्ताद्दत्तिस्मृतेः अत एव शूद्रकर्तृकहोमो
विप्रद्वारैव पराशरेणोक्तः दक्षिणार्थं तु यो विप्रः शूद्रस्य जुहुयाद्धविः

रांतिपुष्ट्यादिसिद्धये वैदिकैर्मंत्रैर्जुहोतितत्स्यविप्रस्यैव दोषः अद्रक्तहोमफलं
लभेतेवेतिव्याचचक्षे ~~अत्रविशेषोऽनुपरेसोऽनंतेनगर्भेन्तनयास्त्रियाऽप्रतिप्रति~~
दत्तकेविशेषः कालिकापुराणे पितृगोत्रेणयः पुत्रः संस्कृतः पृथिवीपते आ
चूडांतंन पुत्रः सपुत्रतांयातिचान्यतः चूडोपायेन संस्काराः निजगोत्रेण वैकृताः।
दत्ताद्यास्तनयास्तेस्युरन्यथा दासउच्यते ऊर्ध्वं तु पंचमाद्वर्षान्न दत्ताद्याः सुताः नृप।
गृहीत्वा पंचवर्षीयं पुत्रेष्टिं प्रथमंचरेदिति यत्तु हेमाद्रौ दत्तः विक्रयेचैवदानेचनने
याःस्युरनिच्छवः दारापुत्राश्च सर्वस्वमात्मन्येवतुयोजयेदिति यच्चयाज्ञवल्क्यः स्वकु
टुंबाविरोधेनदेयंदारसुतादृतेइति तद्दुर्भिक्षस्वदानानिषेधपरं अथयमयोः संस्कार
क्रमार्थंज्येष्ठकनिष्ठभावउच्यते मनुः जन्मज्येष्ठेन चाह्वानं सुब्रह्मण्यास्वपि
स्मृतं यमयोश्चैवगर्भेषुजन्मतोज्येष्ठतास्मृता देवलोपि यस्यजातस्ययमयोः
पश्यंतिप्रथमंमुखं संतानः पितरश्चैवतस्मिन्ज्येष्ठ्यंप्रतिष्ठितं भागवतेतु
द्वौतदाभवतोगर्भौसूतिवेशविपर्ययादित्युक्तेः पश्चाद्भवस्य ज्येष्ठत्वमुक्तं गृह्य
देशाचारतोव्यवस्था अथसूतकास्नानं सोतिषेकरेदुर्भाग्यानिलयासवात्यने
दवाश्लिषक्षवभोद्विपुंसो तिथ्यावारिक्षेभमासमेनंनिभूसूतिकास्नानविधिर्मुनी
न्द्रः अथनामकर्म मदनरत्ने बृहस्पतिः द्वादशे दशमेवापि जन्मतोपि त्रयोद

166A

शे षोडशे विंशतौ चैव द्वात्रिंशे वर्णतः क्रमात् याज्ञवल्क्यः अहन्येकादशे ना
म हेमाद्रौ भविष्ये नामधेयं दशम्यां तु द्वादश्यां मासि केचन अष्टादशेऽहनि त
था वदंत्यन्ये मनीषिणः दशम्यामतीतायामित्यर्थः ज्ञेयं आशौचापगमे नामधेयमि
ति विज्ञानेश्वरः गृह्यपरिशिष्टे जननाद्दशरात्रे व्युष्टे शतरात्रे संवत्सरे वा नामकरणं
व्युष्टेऽतीते ज्योतिर्निबंधे गर्गः अमासंक्रांतिविष्ट्यादौ प्राप्तकालेऽपि नाचरेत् श्री
धरः मित्रादित्यमघोत्तराराजभिक् स्वातीधनिष्ठाच्युतप्राजेशाश्विराधाकपौष्णमदि
नक्षत्रेषु व्येकराशौ स्थिरे छिद्रां पंचदशीं विहाय नवमीं षष्ठीं द्वेष्टमे भागे वक्राचार्याः
स्तन पादभागादिवसे नामानि कुर्याच्छिशोः मनुः शर्मांतं ब्राह्मणस्य स्याद्वर्मांतं
क्षत्रियस्य तु वैश्यस्य धनसंयुक्तं शूद्रस्य प्रेष्यसंयुतं मदनरत्ने नारदीये स्तनका
ले नामकर्म विधेयं स्वकुलोचितं नाम पूर्वं तु मासस्य मंगलं तस्तु समाहरेत् त
त्रैव गार्ग्यः मासनाम गुरोर्नाम दद्याद्बालस्य वै पिता कृष्णोऽनंतोऽच्युतश्चक्री
वैकुंठोऽथ जनार्दनः उपेंद्रो यज्ञपुरुषो वासुदेवस्तथा हरिः योगीशः पुंडरीकाक्षो
मासनामान्यनुक्रमात् अत्र मार्गशीर्षादि चैत्रादि वा क्रम इति मदनरत्ने तन्मा
सनाम पूर्वमंत्रयात्सर्वथा चैव हि देवालयगजाश्वानां हस्तीनां वापि कूपयोः स
र्वौषधीनां पण्यानां चित्राणां योषितां तु एणे कायानां चक्रवीनां च पश्वादी

नांचसर्वेषां राजप्रसादयात्स्वनांनामकर्मविशिष्यते नाक्षत्रमपिनामकार्यं अ
भिवादनीयंचस्मृतीसेतत्तन्मातापितरौविद्यातामोपनयनादित्याश्वलायनोक्तेः कु
लदेवतानक्षत्रसंबंधं पितानामकुर्यादिति मदनरत्ने शंखोक्तेः तच्चनक्षत्रपादाक्ष
राद्यक्षरंकुर्यादित्युक्तंपरिशिष्टे तदक्षरादिकंनामयस्मिन्धिष्ण्येपदक्षरामिति स्पष्ट
र्शनभाष्येतुरोरेममस्येविष्णुर्हरिर्दौदोढंत्येचवांतस्थवशाष्पुरुषे गोत्रेषुनाम्नोः
कपरः स्वरोंत्यः स्वायोरदीर्घः सविसर्गश्चेः इत्युक्तंठांत्येति प्रोष्ठपदेत्वत्रादौठान्स्वरे
चवृद्धिः प्रौष्ठपादइति अत्रमघभरणीशब्दः स्फुटतावुक्तः श्रवणादौचवादिर्वृद्धिः र
अपभरणः अप्रापभरणइत्यादि मदनरत्नेवशिष्ठः जन्माहेद्वादशाहेवादशाहेवा
विशेषतः उत्तरारेवतीहस्तमूलपुष्या सवारुणाः श्रवणादिमैत्रंचस्वातीमृ
गशिरस्तथा प्राजापत्येधनिष्ठाचप्रशस्तानामकर्मणि अथखट्वारोहः पारि
जाते बृहस्पतिः खट्वारोहस्तुकर्तव्योदशमेद्वादशेपिवा षोडशेदिवसेचापिद्वावि
शेदिवसेपिवा ज्योतिर्निबंधे कारत्रयेवैष्णवरेवतीष्वादितिद्वयेचाश्विनकपू
र्वेषु कुर्याद्धिस्तनंतुयतेष्वनहर्दोदोलनंवैसुखनोभवंति तत्रैव आंदोलो
शायनेपुंसोद्वादशोऽदिवसः शुभः त्रयोदशस्तुकन्यायानक्षत्रविचारणा अन्य
स्मिन्दिवसेचेत्स्यान्नियोगस्येप्रशस्यते अथदुग्धपानं नृसिंहः एकत्रिंशात्

167A

दिनेचैवयथः शंखेन पाययेत् अन्नप्राशननक्षत्रादिवसोदयराशिषु अथ कर्णवे
धः मदनरत्ने वशिष्ठः श्रीधरो मासे षष्ठे सप्तमे वाष्टमे वा वेध्यौ कर्णौ द्वादशो वा
ऽशोह्निमध्येनाह्नः पूर्वभागेन रात्रौ नक्षत्रे द्वेद्वे तिथी वर्जयित्वा अथ जन्ममासो वर्ज्य
ज्योतिर्निबंधे गार्गः मासे षष्ठे सप्तमे वाप्यष्टमे मासि वत्सरे कर्णवेधं प्रशंसंति पु
ष्ट्यायुःश्रीविवृद्धये मदनरत्ने प्रथमे सप्तमे मासि अष्टमे दशमेऽथवा द्वादशे च तथा कु
र्यात्कर्णवेधं शुभावहं हेमाद्रौ व्यासः कार्त्तिके पौर्णमासे वा चैत्रे वा फाल्गुनेऽपि वा
कर्णवेधं प्रशंसंति शुक्लपक्षे शुभे दिने श्रीधरः हरिहरकरचित्रासौम्यपौष्णोत्त
राश्वादितिवसुपुष्यबटालोसिंहत्वज्येष्ठलग्ने राशिगुरुबुधकाव्यानां दिने पर्वरिक्ता
राहिततिथिषु शुद्धे नैधने कर्णवेधः मदनरत्ने बृहस्पतिः द्वितीया दशमी षष्ठी स
प्तमी च त्रयोदशी द्वादशी पंचमी शस्ता तृतीया कर्णवेधने सौवर्णी राजपुत्रस्य रा
जती विप्रवैश्ययोः शूद्रस्य वायसी सूची मध्यमाष्टांगुलात्मिका हेमाद्रौ देवलः
कर्णरंध्रे रवेश्छाया न विशेदग्रजन्मनः तं दृष्ट्वा विलयं याति पुण्यौघाश्च पुरातनाः
शंखः अंगुष्ठमात्रसुषिरौ कर्णौ न भवतो यदि तस्मै श्राद्धं न दातव्यं दत्तं चेदासुरं भ
वेत् अथ ताम्बूलभक्षणं चंडेश्वरः सार्द्धमासद्वये दद्यात्ताम्बूलं प्रथमं शिशोः कर्पू
रादिकसंमिश्रं विलापाहितायच मूलार्काचित्रकरतिष्यहरीन्द्रभेष्ठपौष्णे तथाम्र

168

गशिरोदितिवासवेषु अर्कैंदुजीवभृगुबोधनवासरेषु तांबूलभक्षणे विधिरे
भिः प्रदिष्टः अथ निष्क्रमणं ज्योतिर्निबंधे यमः तृतीये वा चतुर्थे वा मासि निष्क्र
मणं भवेत् यमः ततस्तृतीये कर्तव्यं मासि सूर्यस्य दर्शनं चतुर्थे मासि कर्तव्यं श
शिनोभ्युदयदर्शनं अत्र सूर्येंदोः कर्मणि येचतयोः श्राद्धं न विद्यत इति वृद्धे योगपरि
शिष्टाछंदोगानां निष्क्रमणे वृद्धिश्राद्धं नास्तीति कल्पतरुः व्यासः मैत्रेपुष्यपुनर्वसुप्र
यमभेप्येष्मेन कूले विधौ हस्ते चैव सुरेश्वरं च मृगभे ताराशुद्धौ तथास्तु च कुर्यान्नि
ष्क्रमणं शिशोर्वृषघटेरीसुके च रिक्ते तिथौ कंन्याके भतुलामृगागिभवने सौम्यग्र
हालेकिते मदनरत्ने अन्नप्राशनकाले वा कुर्यान्निष्क्रमणं क्रियां विष्णुधर्मे दि
गीशानां दिने तत्र तथा चंद्रार्कयोर्द्विजः पूजनं वासुदेवस्य गगनस्य च कारयेत् व
हिर्निःकाशये क्रेत्ता कं रवपुण्याहनिस्वनैः चंद्रार्कयोर्दिगीशानां दिशां च गगन
स्य च निक्षेपार्थमिमं दायित्येते रक्षंतु सर्वदा अप्रमत्तं प्रमत्तं वा दिवारात्रमथापि वा
रक्षंतु सततं सर्वे देवाः शक्रपुरोगमाः अथोपवेशनं प्रयोगपारिजाते पाद्मे विष्णु
धर्मे च पंचमे च तथा मासि भूमौ तमुपवेशयेत् तत्र सर्वे ग्रहाः शस्ता भौमोप्यत्र वि
शेषतः उत्तरात्रितयं सौम्यं पुष्यार्क्षं शाक्रदैवतं प्राजापत्यं च हस्तश्च शस्तमाश्विनमि
त्यमं वराहं पूजयेद्देवं पृथिवीं च तथा द्विज रक्षैनं वसुधे देवि सदा सर्वगतं शुभे आ

नि

168A

पुः प्रमाणांसकलांमिश्रियस्त्वहरिप्रिये अचिरादायुषस्तस्य येकेचित्परिपंथिनः
जीवतारोग्यवित्तेषु निर्दहस्त्वचिरेणतान् वरेण्याशेषभूतानां मातात्वमसिका
मधुक् अजरावाप्रमेयाचसर्वभूतनमस्कृता चराचराणांभूतानां प्रतिष्ठाना
थयाहसि कुमारंपाहिमातस्त्वंब्रह्मातदनुमन्यतां अथान्नप्राशनं परिजाते
नारदः जन्मतोमासिषष्ठेस्यात्सौरेणान्नाशनंपरं तदभावेष्टमेमासिनवमेद
शमेपिवा द्वादशेवापिकुर्वीत प्रथमान्नाशनंपरं संवत्सरेवासंपूर्णेकेचिदिच्छंति
पंडिताः मदनरत्ने लौगाक्षिः षष्ठेन्नप्राशनंजातेषुचेति शंखः संवत्सरेन्नप्राशन
मर्धसंवत्सरेवेति नारदः षष्ठेवाप्यष्टमेमासिपुंसांस्त्रीणांतुपंचमे सप्तमेमासिवा
कार्यंनवान्नप्राशनंशुभं रिक्तांदिनक्षयंनंदां द्वादशीमष्टमीममां त्यक्त्वान्य
तिथयः प्रोक्ताः सितजीवज्ञवासराः चंद्रवारंप्रशंसंतिकेचिच्चान्येत्रिकंविना
श्रीधरः आदित्यतिष्यवसुसौम्यकरानिलाश्विचित्राऽजचिह्नवरुणोत्तरपौष्ण
मित्राः बालान्नभोजनविधौदशमेविधौदशमे विष्णुद्वेषि द्वाविहायनवमीतिथयः
शुभाः स्युः वशिष्ठः बालान्नभुक्तौव्रतबंधनेचराजाभिषेकेखलुजन्मधिष्ण्य
शुभंत्वनिष्टंसततंविवाहेसीमंतयात्रादिषुमंगलेषु मार्कंडेयविष्णुधर्मयोः ब्रह्मा
णंशंकरंविष्णुंचंद्रार्कौचदिगीश्वरान् भवंदिगाश्वसंपूज्यकृत्वावह्नौतथाचरुं देव

तापुरतस्तस्य धान्यं तत्संगरात्रं च अस्ते कृतस्य दातव्यमन्नं पात्रे सकांचनं मध्वाज्यदधि
संयुक्तं प्राशयेत्तापसंततं चेति अथाब्दपूर्तिः व्यवहारनिर्णये नवांवरधरो भूत्वा पू-
जयेच्च चिरायुषं मार्कंडेयं नरो भक्त्या पूजयेत्प्रयतस्तथा ततो दीर्घायुषं व्यासं रामं
द्रौणिं कृपं बलिं प्रह्लादं च हनूमंतं विभीषणं मयाचयेत् स्वनक्षत्रं जन्मतिथिं प्राप्य
संपूजयेन्नरः षष्ठीं च दधिभक्तेन वर्षे वर्षे पुनः पुनः तिथितत्त्वे एतन्नामाभिलिखितहो-
मोप्युक्तः आदिपुराणे सर्वैस्तु जन्मदिवसे स्नातैर्मंगलवारिभिः गुरुदेवाग्निविप्राश्च
सम्पूजनीयाः प्रयत्नतः स्वनक्षत्रं च पितरौ तथा देवः प्रजापतिः प्रतिसंवत्सरं यत्नात्कर्त-
व्यश्च महोत्सवः कृत्यचिंतामणौ गुडदुग्धतिलान्धान्यं हस्ते ग्रंथिं च बंधयेत् गुग्गु-
लुं निंबसिद्धार्थं दूर्वागोरोचनादिकं संपूज्य भानुविघ्नेशौ महर्षिं प्रार्थयेदिदं चिरजी-
वी यथा त्वं भो मुनीनां प्रवरो द्विज कुरुष्व मुनिशार्दूल तथा मां चिरजीविनं मार्कंडेय म-
हाभाग सप्तकल्पांतजीवन आयुरारोग्यसिद्ध्यर्थमस्माकं वरदो भव सतिलं गुड-
संमिश्रमंजल्यर्धमितं पयः मार्कंडेयात्तवरं लब्ध्वा पिबाम्यायुर्विवृद्धये इति पयः
पिबेत् तिथितत्त्वे स्कांदे खंडनं नखकेशानां मैथुनाध्वगमौ तथा आमिषं कल-
हं हिंसां वर्षवृद्धौ विवर्जयेत् तत्रैव दीपिकायां कृतांतकुजयोर्वारे यस्य जन्मति-
तिर्भवेत् अनर्घयोगसंप्राप्तौ विघ्नस्तस्य पदे पदे कृतांतः शनिः तस्य सवीय

धिस्नानं गुरुदेवाग्निपूजनं तद्वन्मनुः स्मृते जन्मनि संक्रांतौ श्राद्धे जन्मदिने तथा ।
अस्पृश्यस्पर्शने चैव न स्नायादुष्णवारिणा ॥ अत्र जन्मतिथिरौदयिकी ग्राह्या ॥ यु
गाद्यावर्षवृद्धिश्च सप्तमी पार्वतीप्रिया । रवेरुदयमीक्षंते न तत्र तिथियुग्मता ॥ इति कृ
त्यतत्त्वार्णवे वचनात् ॥ अथ कुटिसत्रे प्रयोगपारिजाते ब्राह्मे प्रतिसंवत्सरांते दे ।
वक्षेन्नरांगिविधिं परः दत्त्वा गोभूहिरण्यादि तथा स्वर्णादिनिर्मितं वध्याम्बा क
दिसूत्रे चैव वासः संगृह्य नूतनं दूर्वांकुरैर्वा आज्येन च तरुणां वा पिनाकिनं ।
आयुष्यहोमं कृत्वा च तर्पयेत्पितृदेवताः ॥ अथ चौलं प्रयोगपारिजाते वृद्धवसि
ष्ठः जाताधिकारात् जन्मादि तृतीयेब्दे तु चौलकं । आद्ये वर्षे कुर्वते केचित्पंचम
वे द्वितीयके उपनीत्या सहैवेच्छिकल्याः कुलधर्मतः ॥ बृहस्पतिः तृतीयेब्दे शि
शोर्गर्भाज्जन्मतो वापि शोभनः । पंचमे सप्तमे वापि स्त्रियाः पुंसोऽपि वा समं ॥ तत्रै
व नारदः जन्मतस्तु तृतीयेब्दे श्रेष्ठमिच्छंति पंडिताः । पंचमे सप्तमे वापि जन्मतो
मध्यमं भवेत् ॥ अधमं गर्भतः स्यात्तु नवम्येकादशेऽपि चेति ॥ पारिजाते बृहस्प
तिः उत्तरायणगे सूर्ये विराबाले सौम्यगोलके । शुक्लपक्षे शुभं प्रोक्तं कृष्णपक्षे ।
शुभेतरत् ॥ आशुभेषां त्रिभागः स्यात् कृष्णपक्षे त्रिधा कृते ॥ तत्रैव वशिष्ठः

द्वितिपंचमसप्तम्यामेकादश्यां तथैव च दशम्यां च त्रयोदश्यां कार्यं क्षौरं विजानता
नं सिंहीये वष्ठ्यष्टमी चतुर्थी च नवमी चतुर्दशी द्वादशी दर्शपूर्णे द्वे प्रतिपच्चैव
निंदिताः वशिष्ठः रवेरंगारकस्यैव सूर्यपुत्रस्य चैव हि निंदिता दिवसाः क्षौ
रे शेषाः कार्यकराः शुभाः ज्योतिर्निबंधे बृहस्पतिः पापग्रहेंशगे वा रादौ विप्रा
णां शुभदं रवेः क्षत्रिणवक्षौरे उत्तमा नव तारकाः स्त्री एवोत्तराणि वा पश्च रोहिणी
वारुणं तथा क्षौरे च मध्यमाः प्रोक्ताः शेषा ह्यादशगर्हिताः निधने जन्मनक्ष
त्रे वैनाशे चंद्रमोष्टमे विपत्करे वधे क्षौरं प्रत्यरे वा विवर्जयेत् अत्र लग्नशुद्धिर
न्ये च योगा ज्योतिर्विद्भ्यो ज्ञेयाः अन्ये च विशेषाः श्मश्रुकर्मनिर्णये वक्ष्यंते एत
च्चा शिशोर्मातरि गर्भिण्यां पानकार्यं तदाह ज्योतिर्निबंधे मदनरत्ने च बृहद्गार्ग्यः
पुत्र चूडा ह्नतो माता यदि सा गर्भिणी भवेत् शस्त्रेणाम्सृत्युमाप्नोति तस्मात्क्षौ
रं विवर्जयेत् अस्यापवादमाह तत्रैव नारदः स्सूनौ मातरि गर्भिण्यां चूडाकर्म
न कारयेत् पंचाब्दात् प्रागयोर्ध्वं तु गर्भिण्यामपि कारयेत् यदि गर्भविपत्तिः स्यात्
च्छिशोर्वा मरणं यदि सहोपनीत्या कुर्याच्चेत्तदा दोषो न विद्यते बृहस्पतिः गा
र्भिण्यां मातरि शिशोः कर्म न कारयेत् व्रताभिषेकेप्येवं स्यात्कालो वेद

वृत्तेऽपि गर्भिण्यामपि पंचमासपर्यंतं नदोषस्तदुक्तंमुहूर्त्तदीपिकायां गार्ग्येण
पंचममासादूर्ध्वं मातुर्गर्भस्यजायतेमृत्युरिति मदनरत्ने बृहस्पतिः पुत्रचूडाकृ
तौ माता गर्भिणी यदि वा भवेत् विपद्यतेऽग्रतस्तत्र दंपती शिशुरव्ययः गर्भे मातुः।
कुमारस्य न कुर्याच्चौलकर्मतु पंचमासदधः कुर्यादत ऊर्ध्वं न कारयेत् गर्गः ह्युत्तर
स्योत्पादनं यस्य लग्नं तस्य न कारयेत् दोषनिर्गमनात्पश्चात्तस्यो धर्मं समाचरेत्
लग्नमितिमंगलेष्वलक्षणं ज्योतिर्गर्गः विवाहोत्सवयज्ञेषु माता यदि रजस्वला
तदा समृत्युमाप्नोति पंचमं दिवसं विना वसिष्ठः यस्य मांगलिकं कार्यं तस्य माता र
जस्वला अर्धं तदेवा तत्रैव बृहस्पतिः प्राप्तमभ्युदयश्राद्धं पुत्रसंस्कारकर्मणि पत्नी
रजस्वला चेत्स्यान्न कुर्यात्तत्पिता तदा पितेति कर्तृमात्रोपलक्षणं संकटे तु वाक्ये सायु
क्तं अलाभे सुमुहूर्तस्य रजोदोषे उपस्थिते श्रियं संपूज्य विधिवत्ततो मंगलमाच
रेत् एतच्च मंडनोत्तरं न कार्यं न मंडनाच्चापि हि मंडनं च गोत्रैककार्यायां यदि नाब्दभेद इ
ति मदनरत्ने वसिष्ठोक्तेः तत्रैव कात्यायनः कुले ऋतुत्रयादर्वाक् चंडनान्नतु मंड
ने प्रवेशान्निर्गमो नैवो न कुर्यान्मंगलत्रयं बृहन्मनुः एकमातृजयोरेकवत्सरे
पुरुषस्त्रियोः न समानक्रियां कुर्यान्मातृभेदे विधीयते आर्षोऽचेत्तु संग्रहे संकटे
समनुप्राप्ते सूतके समुपागते कूष्मांडीभिर्घृतं हुत्वा गां च दद्यात्पयस्विनीं चूडाय

नयनोद्दृष्व्यतिष्टादिकमाचरेदिति ज्योतिर्निबंधे षष्टे द्वादशे वर्षे वि।
वाहाद्वितयेऽब्दे च । पत्न्यां च जायायां नेष्यते मुंडनं क्वचित् अन्योपि विशेषो वा
ह प्रकरणे वक्ष्यते दीपिकायां न चूडाजन्मभार्गनेघ्रदारुणेषु शनौ कुजे प्रतिप
द्भद्रारिक्तासु विद्यारंभस्तु पंचमे प्रयोगरत्ने मध्ये शिरसि चूडा स्याद्वसिष्ठानां तु
दक्षिणे उभयोः पार्श्वयोः त्रिकश्यपानां शिखामता माधवीये प्येवं आपस्तंब
स्त्वाह लक्ष्मीकेशान्विनीय यथर्षि शिखा निदधाति यथर्षिप्रवरसंख्यया तासां
मध्ये शिखावर्जं मुंडनं वपनं कार्यं प्रतिदिशं प्रवपतीत्युपनयने नैवोक्तेः ।
रिक्तो वा एषोऽनपिहितो यन्मुंडस्तस्यैतदपिधानं यच्छिखेति श्रुतेः विशिखो व्यु।
पवीतश्च यत्करोति न तत्कृतमिति निषेधाच्च सर्वेषु वचनात् शिखं वपनमिति
सुदर्शनभाष्ये उक्तं यत्तु कुमाराविति शिखंडवेति लिंगात् स्मृत्यंतरे अपरार्के
मदनरत्ने च लौगाक्षिः दक्षिणतः कंबुजा वशिष्ठानां उभयतोऽत्रिकश्यपानां
मुंडा भृगवः पंचचूडा अंगिरसो वाजिमेके मंगलार्थं शिखिनोन्ये यथा कुलध
र्मं वेति कंबुजा शिखा वाजिः केशपंक्तिः स्मृत्यंतरे प्येते एका शिखा दक्षिणे वशि
ष्ठगोत्रस्य पंचांगिरसां भृगोस्तु नैका शिखा कश्यपगोत्रजानां शिखोभयत्रापि
यथाकुलं वा एतद्व्यतिरिक्तविशेषं मूर्द्धस्यानियताः केशा इति वशिष्ठोक्तेः

171A

यत्तु पापे इति तदुक्तं अत एव हारीतः स्त्रीशूद्रौ तु शिरो वांछित्वा क्रोधाद्वैराग्यतोपि
वा प्राजापत्यं प्रकुर्वीतां निष्कृतिर्नान्यथा भवेत् एतत्परिग्रहपक्षे अत्र देशभेदा
द्व्यवस्थेति दिक् ज्योतिर्निबंधे नर्मदोत्तरदेशे तु सिंहस्थे देवमंत्रिणि शुभकर्म न ।
कुर्वीत निषेधो नान्यदक्षिणे अत्र भोजने प्रायश्चित्तमुक्तं पराशरमाधवीये निर्वृ
त्ते चूडहोमे तु प्राङ्नामकरणात्तथा चरेत्सांतपनं भुक्त्वा जातकर्मणि चैव हि अतोन्ये
ष्वतु संस्कारेषूपवासेन शुध्यति एते संस्काराः स्त्रीणाममंत्रकाः कार्याः होमस्तु समं
त्रकाः कार्याः होमस्तु समंत्रकाः कार्याः होमस्तु समंत्रक इति प्रयोगपारिजाते आ
श्वलायनोपि होमस्तु त्वेन पुंवत्स्यात् स्त्रीणां चूडाकर्मतावपीति मनुरपि अमंत्रिका ।
तु कार्येयं स्त्रीणामावृदशेषतः इति हेमाद्र्यमंत्र इत्येके संस्काराः स्त्रीणां होमकास्तु श्री
स्तुरिति स्मृत्यर्थसारे होमो नेति वृत्तिकृत् अथ विद्यारंभः मदनरत्ने नृसिंहः अप्र
रस्वीकृतिं कुर्यात्प्राप्ते पंचममहायने उत्तरायणगे सूर्ये कुंभमासं विवर्जयेत् दीपिका
यां वर्षे पंचमेन्यके काले षष्ठीरिक्तां शनिकुजं अनध्यायान्विना नत्वा देवं गणपं क ।
तं गुरुं श्रीधरः हस्ताहित्यसमीरमित्रपुरजिद्योषाश्वि चित्राश्रुते पौषार्कवर्कशशादिनो
दयाहितेरागो स्थिरे चोभये पक्षे सर्वनिशाकरे प्रतिपदं रिक्तां विहायाष्टमीं षष्ठीं ।
मसृड्भाजि भवने प्रोक्ताक्षरस्वीकृतिः विश्वधर्मोत्तरे प्राप्य पंचमं तु हरिं लक्ष्मीं

नि.सिं.
१७२

172

पादेवीसरस्वती स्वविद्यास्तत्रकारांस्त्रस्त्रांविद्याश्चविशेषतः एतेषामेवदेवानां ना
म्नातज्जुहुयाद्घृतं दक्षिणाभिर्द्विजेंद्राणां कर्तव्यंचात्रपूजनमिति अथधनुर्विद्या
दीपिकायां अदितिगुरुत्यमार्कस्वातिचित्राग्निपित्र्यध्रुवहरिवसुमूलेष्विंदुभागा
त्ययेषु शनिशशिबुधवारेविष्कंभाद्येवियोगेषुसमयतिथियोगेचापविद्याप्रदानं
अथानुपनीतस्यविशेषः गौतमः प्रागुपनयनात्कामचरवादभक्षाइति भक्षणंल
शुनादेरपीतिहरदत्तः अपरार्के वृद्धशातातपः शिशोरभ्युक्षणंप्रोक्तंबालस्याचम
नंस्मृतं रजस्वलादिसंस्पर्शेस्नानमेवकुमारके प्राक्चूडाकरणाद्बालप्रागन्नप्राश
नाच्छिशुः कुमारकस्तुविज्ञेयोयावन्मौंजीनिबंधनं आपस्तंबोपि अन्नप्राशना
दूर्ध्वंतोभवत्यासंवत्सरादित्येके इतिगौतमोपि नतदुपस्पर्शनादाशौचं तस्या
नुपनीतस्यचंडालादिस्पर्शे स्याद्यपिस्पर्शान्नस्नानेइदंचषष्ठवर्षात्प्राक् ऊर्ध्वंतुस्ना
नंभवत्येव बालस्यपंचमाद्वर्षादर्वाक्शौचमाचरेदितिस्मृतेः कामचारादिकेप्ये
वं उक्तैकादशवर्षस्यपंचवर्षात्परस्यच चरेद्गुरुः सुहृद्वैवप्रायश्चित्तंविशुद्धये अतो
बालतस्यास्नानापराधोनपातकमिति स्मृतेरितिहरदत्तः स्मृत्यर्थसारेप्येवं
अथोपनयनं आश्वलायनः गर्भाष्टमेष्टमेवाब्देपंचमेसप्तमेवा। द्विजत्वंप्राप्नु
याद्विप्रोवर्षेत्वेकादशेनृपः मनुः ब्रह्मवर्चसकामस्यकार्यंविप्रस्यपंचमे रा

राम
१७२

172A

ब्रह्मवलार्थिनः षष्ठे वैश्यस्यार्थार्थिनोऽष्टमे विष्णुः षष्ठे तु धनकामस्य विद्याका
मस्य सप्तमे अष्टमे सर्वकामस्य नवमे कांतिमिच्छतः आपस्तंबः गर्भाष्टमेषु ब्राह्मण
मुपनयीत बहुवचनं गर्भषष्ठगर्भसप्तमयोः प्राप्त्यर्थमिति सुदर्शनभाष्ये केचि
त्तु विप्रस्य बहुवचनमन्यंते आपस्तंबः अथ काम्यानि सप्तमे ब्रह्मवर्चसकामम् अष्टम आयुःका
मं नवमे तेजस्कामं दशमेऽन्नाद्यकाममेकादशे इंद्रियकामं द्वादशे पशुकाममुपनये
त् गौणकालमाह मनुः आषोडशाद्ब्राह्मणस्य सावित्री नातिवर्तते आद्वाविंशात्क्ष
त्रबंधोराचतुर्विंशतेर्विशः ज्योतिर्निबंधे अथ जा वा कुजा वैश्या स्वाध्याये रू धर्मवद्व
स्रक्तोपनयाः सर्वे ह्यबला एवं ते स्मृताः गर्गः विप्रं वसंते क्षितिपं निदाघे वैश्यं घनांते
व्रतिनं विदध्यात् माघादिशुक्रांतकपंचमासाः साधारणा वसकलद्विजानां हेमाद्रौ
ज्योतिषे माघादिषु च मासेषु मौंजी पंचसु शस्यते पारिजाते बृहस्पतिः उच्चापकूली
रस्थो जीवो ह्यशुभगोचरः अतिशोभनतां दद्याद्विवाहोपनयादिषु रत्नमालायां नजन्म(
ऽधिष्ण्ये न च जन्ममासे न जन्मकाले यदि नो विदध्यात् ज्येष्ठेन मासि प्रथमस्य सूनोरन्य म
पास्तु तथाप्यपि मंगलानि राजमार्तंडः जातं दिनं दूषयते वसिष्ठो ह्यष्टौ च गर्गो
नियतं दशात्रिः जातस्य पक्षं किल भागुरिश्च शेषाः प्रशस्ताः खलु जन्ममासि जन्म
मासेति यो मे च विपरीत दले सति कार्यं मंगलमित्याहुर्गर्गभार्गवशौनकाः जै

न्ममासनिषेधेपिदिनानिदशवर्जयेत् आरभ्यजन्मदिवसाच्छुभास्तुतिथयोपरे ।
गर्भान्तरे व्रतेजन्मत्रिकादिस्थोजीवोपिदृष्टोर्चनात्स्यात् शुभोतिकालेतुर्याष्टव्ययर
स्थोपिगुरुरर्चनात् शुद्धिर्नैवगुरोर्यस्यवर्षेप्राप्तेष्टमेयदि चैत्रेमीनगतेभानौतस्यो
पनयनंशुभं जन्मभाद्दशमेसिंहे नीचेवाशत्रुभेगुरौ मौंजीबंधःशुभःप्रोक्तश्चैत्रे
मीनगतेरवौ नारदः बालस्यबलहीनोपिशांत्याजीवोबलप्रदः यथोक्तवत्सरेकार्यम
नुक्तेचोपनायनं शांतिश्चात्रेववक्ष्यते ज्योतिर्निबंधेनृसिंहः तृतीयापंचमीषष्ठीद्वि
तीयाचापिसप्तमी पक्षयोरुभयोश्चैव विशेषेणसमर्जिताः धर्मकामौसितेपक्षे
कृष्णेचप्रथमातथा शुक्लत्रयोदशीकेचिदिच्छंतिमुनयस्तथा टोडरानंदेवशिष्ठः
नैमित्तिकमनध्यायंकृष्णेचप्रतिपद्दिनं मेखलाबंधनेशस्तं चौलेवेदव्रतेष्वपि
प्रशस्ताप्रतिपत्कृष्णेनापरेवापरसंमता एतदतीतकालस्यापीस्यवटोरुपनयन
विषयेप्रशस्ताप्रतिपत्कृष्णकदाचिच्छुभगेविधौ चंद्रेबलयुतेलग्नेवर्णीलोंमतिलं
घनेइति व्यासोक्तेरिक्तेरित्याहुः एवंसप्तम्यपि तस्यागलग्रहत्वोक्तेः बृहस्पतिः
शुक्लपक्षःशुभःप्रोक्तः कृष्णश्चांत्यत्रिकेविना तथा।मिथुनेसंस्थितेभानौज्येष्ठमा
सेनदोषभाक् मदनरत्नेनारदः दिनर्क्षेनावसंतेनकृष्णपक्षेगलग्रहे अपराह्णे
चोपनीतःपुनःसंस्कारमर्हति अपराह्णस्तुधाभक्तदिनस्यतृतीयोंशइत्युक्तं ततो

173A

वृवसंतेग लग्नहोनदोषायेत्यर्थः नारदः कृष्णपक्षेचतुर्थ्यांचसप्तम्यादिदिनत्रये त्रयोद
श्यांचतुष्कंच अष्टावेतेगलग्रहाः वशिष्ठः पापांशकगतेचंद्रे अरिनीचास्थितेपिच
अनध्यायेचोपनीतः पुनःसंस्कारमर्हति अनध्यायस्य पूर्वेद्युस्तस्तवैवापरेहनि व्र
तबंधंविसर्गंचविद्यारंभनंकारयेत् राजमार्तंडः आरंभानंतरंयत्रप्रत्यारंभोनसिध्य
ति गर्गादिमुनयःसर्वेतमेवाहुर्गलग्रहं ज्योतिर्निबंधे अष्टकासुचसर्वासुयुगमन्वं
तरादिषु अनध्यायंप्रकुर्वीत तथासोपपदास्वपि सोपपदास्तुरत्नसारे सिताज्येष्ठे
द्वितीयाच आश्विनेदशमीसिता चतुर्थीद्वादशीमाघेएताःसोपपदाःस्मृताः एवंप्रदोषा
दिवर्ज्यं प्रदोषस्वरूपमाह गोभिलः षष्ठीचद्वादशीचैव अर्द्धरात्रोननाडिका प्रदोष
मिहकुर्वीतत्तृतीयान्नवयामिका ज्योतिर्निबंधेव्यासः याचैत्रवैशाखसिता तृती
यामाघस्यसप्तम्यथफाल्गुनस्य कृष्णेतृतीयोपनयेप्रशस्ताः प्रोक्ताभारद्वाजमुनींद्र
मुख्यैः अप्रत्यापिकृष्णप्रतिपद्वतादेयं यत्तहरहज्ञार्ग्यैः अनध्यायेप्रकुर्वीतयस्तुनैमि
त्तिकोभवेत् सप्तमीमाघशुक्लेतु तृतीयाचाक्षयातथा वृधाजयेडुवाराश्च प्रशस्तानिव्र(
तबंधने इति तत्प्रायश्चित्तार्थोपनयनविषयं स्वाध्यायविषुज्ञोपस्ताहस्तप्रतिपदादयः
प्रायश्चित्तनिमित्तानेमेरवे [illegible] लाबंधनेमता इतितेनोक्तेरितिनिर्णयामृते
कालादर्शे पक्षयस्याथोपेतपूर्वस्येत्युक्ता अनिरुक्ते परिदानंकालश्चैन्याश्चलायने

नेपुनरुपनयनेकालानियमउक्तस्तथापिनिमित्तानंतरमेवसः तदानीमकरणेतु
सर्वोक्तकालोज्ञेयः प्रतिवेदमुपनयनेकालानियमइतित्वयुक्तं। गर्गः ग्रहेरवौहोरव
निश्चकंपेवोत्कृष्टमोल्कापतनादिदोषे व्रतेदशाहानिवदंतितद्दशाहस्तुयोदशाहानिवदंति
केचित् संकटेतुचंडेश्वरः दाहेदिशांचैवधराप्रकंपेवज्रप्रपातेयविदारणेच केतोर
तथोल्काप्रस्तकाणप्रपातेमहेनकुर्यात्व्रतमंगलानि तद्वैववेदव्रतोपनयनेस्वाध्या
याध्ययनेतथा तदोषोयद्द्युवांसोयपदास्वध्ययनेपिच हेमाद्रौज्योतिषे हस्तत्रयेपु
ष्यमिनिष्यमपीष्माश्विसोम्यादितिविष्णुभेषु शस्तेतिथौचंद्रबलेनपुंसांकार्योद्विजा
नांव्रतबंधमोक्षौज्योतिर्निबंधेनारदः श्रेष्ठान्यर्कत्रयांत्येज्यचंद्रादितिगुरुत्रयाणिच वि
ष्णुत्रयाश्विमित्राख्ययोनिभान्युपनायने बृहस्पतिः त्रिषूत्तरेषुरोहिण्यांहस्तेमैत्रेच
वासवेत्वाष्ट्रेसौम्यपुनर्वस्वोरुत्तमंकर्मपनयनं ज्योतिर्निबंधेव्यृचां हस्तत्रयेसार्पमृगादिति
मूलेषुचऋचां यजुषांपौष्णमैत्रार्कादित्यपुष्यमृडध्रुवैः सामगानांहरीणार्कवसुपुष्यो
त्तराश्विभैः धनिष्ठादितिमैत्रार्काश्वि [illegible] योषमेषपर्वणां राजमार्तंडस्तु प्राक्तनस्य
पुनर्वस्वनिषेधेति ताराचंद्रानुकूलेषुग्रहादेषुशुभेष्वपिपुनर्वसौकृतोविप्रः पुनः
संस्कारमर्हति ज्योतिर्निबंधेनारदः सर्वेषांजीवशुक्रौतुवारौप्रोक्तौव्रतेशुभौ चं
द्रार्कौमध्यमौज्ञेयौसामगानांकुजयोः कुजः शाखाधिपतिवारश्चशाखाधिपबलंतत

174A

या शाखाधिपपतिलग्नं तु लग्नं त्रिपयन्नित्ते शाखाधिपास्तु रत्नसंग्रहे ऋगथर्व
साम यजुषामधिपा गुरुः सौम्यभौमासिताजीव सितौ विप्रादीनां [illegible] रो घ्र ग्रहवि
शां चंद्र इति परिजाते बृहस्पतिः बह्वृचानां गुरुर्वीरे यजुर्वेदं ज्ञबान्बुधे सामगानां
धरासुनो रथर्ववेदिनां रवेः अत्र लग्नस्थ्यादि देवज्ञेभ्योऽवसेयं विस्तारभयान्नोच्य
ते तत्र: सत्येहि पूर्वसंध्यायां वा रिदोय दिगर्जति तद्दिने स्वादनध्यायो ब्रतं न त्रि विव
तीयेत् ज्योतिर्निबंधे नारदीये [illegible] नेनस्वाध्यायस्त्व कालिकः तदोपनयनं कार्यं
वेदारंभं न कारयेत् एतच्च [illegible] चातिरिक्तानां तद्दिने वेदारंभाभावात् अतस्तेषां
मुपनयनं न भवत्येव एतच्च प्रातः स्तनिते सायं स्तनिते तु दिवैव च चतुष्टयपि त्वासा
यं संध्योत्तरं होमं कुर्यात् न संध्यागर्जितकालेन [illegible] स्यात् दूषिते ब्रह्मौदनं प

त्रि

चेदग्नौ पक्वं चेद् [illegible] ते ब्रह्मौदनं पचेदग्नौ [illegible] मन्नं न दुष्यतीति संग्रहोक्तेरि
ति प्रयोगरत्ने महेश्वरणाः अत्र शांतिस्तु कान्त सिंहप्रसादे ब्रह्मौदनविधेः प्र
वं प्रदोषे गर्जितं यदि तदा विप्रकारं तेयं वटो रध्ययनस्य तत् तस्य शांतिप्रकारं तु व
क्ष्ये शास्त्रानुसारतः प्रधानं वाप संसाज्यं द्रव्यं शांति प्रजो भवेत् स्कंदे बृहस्पतेर्वि
[illegible] पठेत्तत्र तावि [illegible] गायत्री चैव मंत्रः स्यात् [illegible] सर्पिषा येनं तु सवत्स
कां दद्यादाचार्याय पयस्विनी ब्राह्मणानभोज्य [illegible] ततो ब्रह्मौदनं चरेत् उप

नयने चाधिकारिणः माधवीये वृद्धमनुः पिता पितामहो भ्राता ज्ञातयो गोत्र
जाग्रजाः उपायनेऽधिकारी स्यात्पूर्वाभावे परः परः प्रयोगरत्ने पितैवोपनयेत्पुत्रं तद
भावे पितुः पिता तदभावे पितुर्भ्राता तदभावेऽपि सोदरः पितेति विप्रपरं न क्षत्रियादेः ।
तेषां पुरोहित एव उपनयनस्य दृष्टार्थत्वात् तेषां चाध्ययनेऽनधिकारात् अत्रापि त्वसत्ये
ज्येष्ठभ्रात्रभावेऽधिकारः असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैः इति पारिजातव
त्वयोक्तेः मातृदोषे तु प्रागुक्तं अयं च मूकादीनां विशेषः प्रयोगपारिजाते ब्रा
ह्मे ब्राह्मण्यां ब्राह्मणाज्जातो ब्राह्मणः स इति स्मृतिः तस्मात् षण्ढबधिरकुब्जवामन
पंगुकुष्ठजडगद्गदरोगार्तशुष्कांगविकलांगिषु मत्तोन्मत्तेषु मूकेषु शयनस्थे निरिन्द्रिये ।
ध्वस्तपुंस्त्वेषु चैतेषु संस्काराः स्युर्यथोचितम् मत्तोन्मत्तौ न संस्कार्याविति केचित्प्रचक्षते
कर्मस्वनधिकाराच्च पातित्यं नास्ति चैतयोः तदपत्यं च संस्कार्यमपरे त्वाहुरन्यथा सं
स्कारं मंत्रहोमादीन् करोत्याचार्य एव तु उपनेयांश्च विधिवदाचार्यः स्वसमीपतः ।
आनीयाग्निसमीपे वा सावित्रीं स्पृश्य वा जपेत् कन्यास्वीकरणादन्यत्सर्वं वि
प्रेण कारयेत् एवमेतद्द्विजैर्जातो संस्कार्यौ कुंडगोलकाविति स्मृत्यर्थसारे
ऽयं कुंडगोलकयोः संस्कार्यत्वं श्राद्धे निषेधश्च क्षेत्रजपुत्रविषयः अन्यस्यापि वि
वाहस्यैव विधिस्स्मृतिरिति वचनाद् ब्राह्मण्ये चोपनयनाद्यप्राप्तेः इत्यपरार्कः गा

175A

उपदेशश्चोत्तरतोऽग्नेः कार्यः उत्तरेणाग्निमुपविशतः प्रह्वमुखमाचार्यः प्रत्यङ्मुख
इतरो धीमहि भो इति शांखायनसूत्रोक्तेः यच्च कात्यायनेनाप्यस्मै सावित्रीमन्वाहोत्तरतो
ऽग्नेः प्रत्यङ्मुखायोपविष्टायाद्दक्षिणतस्तिष्ठत आसीनाय वैके इति विकल्प उक्तस्तथापि कुल
तीयानामेव सः बह्वृचानां तु तरत एव वेदे कुर्यात् भिक्षायां विशेषमाह कात्यायने
मातरमेवाग्रे भिक्षेत पाराशरमाधवीये मातरं वा स्वसारं वा मातुर्वा भगिनीं निजां
भिक्षेत भिक्षां प्रथमं या चैनं न विमानयेत् अथ संस्कारलोपे शौनकः आरभ्याऽऽ
धानमाचौलात्कालेऽतीते तु कर्मणां व्याहृत्याज्यं स्तसंस्कृत्य हुत्वा कर्म यथाक्रमं एते
ष्वेकैकलोपे तु पादकृच्छ्रं समाचरेत् चूडायामर्धकृच्छ्रं स्यादापद्यत्वेवमीरितं अ
नापदि सर्वत्र द्विगुणं द्विगुणं चरेत् पारिजाते कात्यायनः लुप्ते कर्मणि सर्वत्र प्रायश्चि
त्तं विधीयते प्रायश्चित्ते कृते पश्चात् लुप्तं कर्म समाचरेत् स्मृत्यर्थसारे चैवं कालि
कार्याणां प्रायश्चित्ते कृतेऽतीते कर्म कृताकृतमित्युक्तं प्रायश्चित्ते कृते पश्चादतीतमपि
कर्मैव कार्यमित्येके आचार्यान्यत्वन्येन विपश्चित इति त्रिकाण्डमण्डने नतु कालाद्
तीतेषु कार्येषु प्राप्तवत्स्वपरेषु च कालातीतानि कृत्वैव विदध्यादुत्तराणि तु इत्युक्तं
तत्र सर्वं यन्त्रेणानीदोपस्थं कुर्यात् देशकालकर्तृकैक्यात् गणशः क्रियमाणा
नां मातृणां पूजनं सकृत् सकृदेव भवेच्छ्राद्धमादौ न पृथगादिष्विति छन्दोगपरि

प

नि॰सिं॰
१७६

176

शिष्टात् एतद्बहूनामपत्यानां युगपत्संस्कारकरणविषयमिति बोपदेवः अप्रतीतसंस्का
राणां युगपत्कारत्वेऽप्यन्ये तत्रापि यो तस्य उपनीत्या सहैव प्रतिपक्षे उपनीतिदिनेएवान्
ष्ठानं न परेद्युर्दिने सहत्वस्य दिवसैक्ये सन्निकृष्टतरत्वात् ब्रह्मचारीऐवं उपनीतिदि
ने मध्याह्नसंध्यामाह पारिजाते जैमिनिः यावद्ब्रह्मोपदेशः कृतस्तावत्संध्यादिकं न
च ततो मध्याह्नसंध्यादि सर्वं कर्म समाचरेत् इति ब्रह्मगायत्री यत्तु वचनं उपायनेऽतु क
र्तव्यं सायंसंध्या उपासनं आरंभे द्वस्त्रयं तत्त मध्याह्नेऽतु परेद्युनीति तच्छाखांतरविषयमि
ति पारिजातः विकल्प इत्युक्तं परे यामः उपनयनाग्निस्त्रिरात्रं धार्यः अहमेतमग्निं धा
रयं तिस्रीत्यापस्तंबोक्तेः ब्रह्मयज्ञे विशेषमाह तत्रैव जैमिनिः अनुयाकृत देवस्य कर्त
व्यो ब्रह्मयज्ञकः वेदस्यानेऽतु सावित्री गृह्यते तत्समाप्यत इति ॥ स्त्रीप्राणहिंसनभास्क
रालोकनाश्लीलपरिवादादि वर्जयेत् मनुः अभ्यंगमंजनं चाक्ष्णोरुपानच्छत्रधारणं व
र्जयेत् इति प्रकृतं पारिजाते कौर्मे नादर्शं चैव वीक्षेत नाचरेद्दंतधावनं गुरूच्छिष्टं भेषजा
र्थं प्रयुंजीत न कामतः एतन्नित्यमध्यादि विषयं अन्यस्य गुरूच्छिष्टस्य सर्वदा प्राप्तेः स
चेद्व्याधीयीत कामं गुरोरुच्छिष्टं भेषजार्थं सर्वं प्राश्नीयादिति वशिष्ठोक्तेः ज्येष्ठभ्रातुरि
त्यपि ज्ञेयं पितुर्ज्येष्ठस्य च भ्रातुरुच्छिष्टं भोज्यमित्यापस्तंबोक्तेः गुरुपुत्रे तु स्मृत्यंतरेउ
क्तं गुरुवद्गुरुपुत्रः स्यादन्यत्रोच्छिष्टभोजनात् प्रचेताः तांबूलाभ्यंजनं चैव कांस्य

राम
१७६

176A

पात्रे च भोजनं यतिश्च ब्रह्मचारी च विधवा च विवर्जयेत् यमः मेखलामजिनं दंडं
मुपवीतं च नित्यशः कौपीनं कटिसूत्रं च ब्रह्मचारी तु धारयेत् अग्नींधनं भैक्षचर्यमधःश
य्यं गुरोर्हितं कुर्यादिति शेषः मेखलामाहाश्वलायनः तेषां मेखला मौंजी ब्राह्मणस्य
धनुर्ज्या क्षत्रियस्य मौर्वी वैश्यस्येति आचार्यः त्रिवृता मेखला कार्या त्रिवारं स्यात्समा
वृता तंतुग्रंथयस्त्वस्यः कार्याः पंच वा सप्त वा पुनः अत्र प्रवरं संख्यया नियम इति वृद्धाः
अथ दंडः मनुः ब्राह्मणो बैल्वपालाशौ क्षत्रियो वाटखादिरौ पैप्पलौडुंबरौ वैश्यो
दंडानर्हंति धर्मतः एषामभावे गौतमः यज्ञियो वा सर्वेषां मूर्धललाटनासाग्रप्रमा
ण इति अजिनमाहाश्वलायनः अथ तेन वाससा संवीतं मैणेयेनाजिनेन ब्राह्म
णं रौरवेण क्षत्रियमाजेन वैश्यमिति यद्यप्यैणेयशब्देन मृगीचर्मैवोच्यते एणस्तु
ढत्रितयाणि निरूढितः एणेयमेणपाश्वमाघमेणस्यैणमुभे त्रिष्वित्यमरकोशा
त् तथापि कृष्णरुरुबस्ताजिनानीति शंखोक्तेः सर्वेषां वा रौरवमिति यमोक्ते
श्च मृगचर्मणा सह विकल्पो ज्ञेयः वस्त्राजिनयोस्तु विकल्पः कार्पासं वा विकृतं र
क्तमिति गौतमोक्तेः अथ यज्ञोपवीतं मनुः कार्पासमुपवीतं स्याद्विप्रस्योर्ध्ववृतं
त्रिवृत् पारजाते देवलः कार्पासक्षौमगोवालशणवल्कतृणादिकं यथासंभ

निं॰सिं॰
१७७

177

यतो धार्यमुपवीतं द्विजातिभिः तन्नवतंतुकार्यं सावित्र्या त्रिगुणं कुर्यान्नवसूत्रं तंतु
द्वेन इति तेनैवोक्तेः भृगुः छंदोगपरिशिष्टे त्रिवृदूर्ध्ववृतं कार्यं तंतुत्रयमधोवृतं त्रिवृ
तं चोपवीतं स्यात्तस्यैको ग्रंथिरिष्यते ऊर्ध्ववृतं दक्षिणकरमूर्ध्वं कृत्वा वलितं वामावर्त
वलितं त्रिगुणं कृत्वा दक्षिणावर्तं वलितं कार्यं स एकस्तंतुः एवं त्रितंतुकमित्यर्थः
कात्यायनः पृष्ठदेशे च नाभ्यां च धृतं यद्विंदते कटिं तद्धार्यमुपवीतं स्यान्नातिलंबं न चो
च्छ्रितं । वशिष्ठः नाभेरूर्ध्वमनायुष्यमधो नाभेस्तपःक्षयः तस्मान्नाभिसमं कुर्यादु
पवीतं विचक्षणः पारिजाते देवलः उपवीतं वटोरेकं द्वे तथेतरयोः स्मृते एकमेव य
तीनां स्यादिति शास्त्रस्य निर्णयः स एव बहूनि वायुःकामस्य तंत्रमंत्रमात्स एव य
ज्ञोपवीतमिति वामाहृत्वा वापि धारयेत् हेमाद्रौ यज्ञोपवीते द्वे धार्ये श्रौते स्मार्ते च क
र्मणि तृतीयमुत्तरीयार्थे वस्त्राभावे तदिष्यते देवलः सावित्र्या दशकृत्वोद्भिर्मंत्रिताभि
रुपस्पृशेत् विच्छिन्नं वाप्यधोयातं भुक्त्वा निर्मितमुत्सृजेत् मनुः मेखलामजिनं दंडमु
पवीतं कमंडलुं अप्सु प्राश्य विनष्टानि गृह्णीतान्यानि मंत्रवत् अथैतल्लोपे प्रायश्चित्तं मनुः
अकृत्वा भैक्षचरणमसमिध्य च पावकं अनातुरः सप्तरात्रमवकीर्णिव्रतं चरेत् अग्न
त्यागं यदि त्यागेन याज्ञवल्क्यः मैत्र्याग्निकार्यं त्यक्त्वा तु सप्तरात्रमनातुरः कामावक
कीर्ण इत्याभ्यां तु जुहुयादाहुतिद्वयं उपस्थानं ततः कार्यं संमासिंचंत्वनेन तु मंत्रा

177A

स्मृतिमिताक्षरायां सकृद्दोषेतु अघविधाने मानस्तोकेजपेन्मंत्रं शतसंख्यं शिवालये अ-
ग्निकार्यं विनाभुंक्ते न पापं ब्रह्मचारिणः स्मृत्यर्थसारेतु संध्याग्निकार्ययोर्लोपे स्नात्वाष्ट
सहस्रं जपः भिक्षालोपेऽष्टशतं अभ्यासे द्विगुणं पुनः संस्कारश्चेत्युक्तं अपरार्के संवर्तः
यः संध्यां चैव नोपास्ते अग्निकार्यं यथाविधि गायत्र्यष्टसहस्रं तु जपेत्स्नात्वा समाहितः पारि-
जाते शातातपः ब्रह्मचारी तु योऽश्नीयान्मधु मांसं तथैव च प्राजापत्यं चरेत्कृच्छ्रं व्रतशेषं समाप-
येत् अघविधाने तं वो धिया जपेन्मंत्रं लक्षं चैव शिवालये ब्रह्मचारी स्वधर्मघ्नस्कन्ने च
स्रणिमेतितत् स्त्रीसंगे तु मनुः अवकीर्णी तु काणेन गर्दभेन चतुष्पथे स्थालीपाक-
विधानेन यजेद्दैवं निरृतिं निशि विस्तरस्तु मिताक्षरायां ज्ञेयः उपवीतनाशे तु हारीतः म-
नो व्रतपते भिन्नस्तस्याज्याहुती हुत्वा पुनः प्रतीयात् तत्रैव मरीचिः ब्रह्मसूत्रं विना भुं-
क्ते विण्मूत्रं कुरुतेऽथवा गायत्र्यष्टसहस्रेण प्राणायामेन शुध्यति अभिवादनप्रत्य-
भिवादनादौ विशेषः स्मृत्यर्थसारपारिजातादौ ज्ञेयः यमः आपानयिकनीयांसं सं-
ध्यायामभिवादयेत् विना शिष्यं च पुत्रं च दौहित्रं दुहितुः पतिं अथ पुनरुपनयनं
पारिजाते शातातपः लशुनं गृञ्जनं जग्ध्वा पलाण्डुं च तथा शुनं उष्ट्रमानुषकेभाश्व
रासभीक्षीरभोजनात् उपायनं कर्तव्यं तप्तकृच्छ्रं चरेन्मनुरिति हेमाद्रौ वृद्धमनुः
जीवन् यदि समागच्छेद् घृतकुंभे निमज्ज्य च उद्धृत्य स्नापयित्वास्य जातकर्मादि कार

येत् तथैव याज्ञे प्रेतशय्याप्रतिग्राही पुनः संस्कारमर्हति चंद्रिकायां बौधायनः सिं
धुसौवीरसौराष्ट्रान् तथा प्रत्यंतवासिनः अंगवंगकलिंगांश्च गत्वा संस्कारमर्हति
मनुः अज्ञानात्प्राश्य विण्मूत्रं सुरासंसृष्टमेव च पुनः संस्कारमर्हंति त्रयो वर्णा द्वि
जातयः मिताक्षरायां पाराशरः यः प्रत्यवसितो विप्रः प्रव्रज्यातो विनिर्गतः अनाशक
निवृत्तश्च गार्हस्थ्यं चेच्चिकीर्षति स चरेत्त्रीणि कृच्छ्राणि त्रीणि चांद्रायणानि च
जातकर्मादिभिः सर्वैः संस्कृतः शुद्धिमाप्नुयात् तथापिजादिव्यतिरेकेण ब्रह्म
चारिणः प्रेतकर्मकरणे पुनरुपनयनमित्यपरार्कादयः त्रिस्थलीसेतौ कर्मनाश
जलस्पर्शात् करतोयाविलंघनात् गंडकीबाहुतरणात् पुनः संस्कारमर्हति गौडास्तु
करतोयाजलस्पर्शात् कर्मनाशाविलंघनादिति तत्र दानधर्मेषु करतोयास्नाने
प्रशस्याक्तेः करतोये सदानीरे सरिच्छ्रेष्ठेति विश्रुते आप्लावयसि पौण्ड्रान्पापं हर करो
द्भवे इति स्मृतिदर्पणे चंद्रकीलिखितं स्नानमंत्राद्य पराशरः अजिनं मेखलादंडौ भै
क्षचर्या व्रतानि च निवर्तंते द्विजातीनां पुनः संस्कारकर्मणि हरदत्तस्तु यः एकं वे
दमधीत्यान्यं वेदमध्येतुमिच्छति तस्य पुनरुपनयनं तेन प्रतिवेदमुपनयनं कर्तव्य
मित्याह अन्ये नैतन्मन्यंते सर्वेभ्यो वै वेदेभ्यः सावित्र्यनूच्यत इत्यापस्तंबोक्तेः तद्विर
धिकारिकायां वेदांतमधीत्य यजुः ऋग्वेदं जन्यधीयते उपनीतिरियं तेषां मलंकर

178A

णां वर्जितं तद्वैतदुपनीतस्य प्रायश्चित्तं यदा भवेत् कृताकृतं तं च वपनं मेधाजननमेव च
मेधाजननसंज्ञा वेष्टनं चर्या भवेदिह अनुप्रवचनीयश्च तदभावे हृदयं न हि परिदानं न कार्यं स्या
न्निमित्तानंतरं त्विदं एवं स्याद्वाचयेत्स्थाने तत्सावित्र्यहेणीमहइति यत्तु हारीतः द्विविधाः स्त्रि
यः ब्रह्मवादिन्यः सद्योवध्वश्च तत्र ब्रह्मवादिनीनामुपनयनमग्नींधनं वेदाध्ययनं स्वगृ
हे च भैक्ष्यचर्येति सद्योवधूनां तूपनयनं कृत्वा विवाहः कार्य इति तत्तु युगांतरवि
षयं पुराकल्पे तु नारीणां मौंजीबंधनमिष्यते अध्यापनं च वेदानां सावित्रीवाचनं तथे
ति यमोक्तेः अथानध्यायपारिजाते हारीतः प्रतिपत्सु चतुर्दश्यामष्टम्यां पर्वणोर्द्वयोः श्वोन
ध्यायेप्यशर्वर्यां नाधीयीत कदाचन नारदः अयने विषुवे चैव शयने बोधने हरेः अनध्या
यस्तु कर्तव्यो मन्वादिषु युगादिषु निर्णयामृते चातुर्मास्यद्वितीयासु मन्वादिषु अनध्या
यस्तु कर्तव्यो याचसोपपदा तिथिः गर्गः ऋचा चतुर्भिःपश्येत या द्वितीया विधुक्षये चातु
र्मासद्वितीयास्ताः प्रवदंति मनीषिणः स्मृत्यर्थसारेपि आषाढी कार्तिकी फाल्गुनी समी
पस्थद्वितीयासु चेति मनुः उपाकर्मणि चोत्सर्गे त्रिरात्रं क्षपणं स्मृतं अष्टकासु त्वहो
रात्रमृत्वंतासु च रात्रिषु इति उत्सर्गे तु मनूक्तपक्षिणी त्वहोरात्राभ्यामहस्य विकल्प इति वि
ज्ञानेश्वरः अष्टकाशब्देन सप्तम्यादिदिनत्रयं ग्राह्यमिति सोष्टकास्त्रिरात्रमन्वाष्टिके इति गौतमो
क्तेः ऋत्वंतास्तिथि सौरऋत्वंतास्तु चांद्रास्तु तस्य पर्वणीत्वेन व निषेधसिद्धेरिति सर्वज्ञनारा
यणः एते नित्या नैमित्तिकाश्चाह याज्ञवल्क्यः त्र्यहं प्रेते त्वनध्यायः शिष्यर्त्विग्गुरुबंधु

179

षु उपाकर्मणि प्राचोत्सर्गे स्वशाखाश्रोत्रिये तथा संध्यागर्जितनिर्घातभूकंपोल्का
निपातने समाप्य वेदं द्युनिशामारण्यकमधीत्य च पंचदश्यां चतुर्दश्यामष्टम्यां रा।
हुसूतके ऋतुसंधिषु भुक्त्वा वा श्राद्धिकं प्रतिगृह्य च पशुमंडूकनकुलश्वाहिमा
र्जारमूषकैः कृतेंतरे त्वहोरात्रं शक्रध्वजविदो विदुः केचिद्देशे यावत्तद्दिननाडिकाः।
तावदेवत्वनध्यायो नतन्मिश्रादिनांतरे प्रदोषं त्वाह प्रजापतिः षष्ठी च द्वादशी चैव अर्ध।
रात्रोननाडिकाः प्रदोषे न त्वधीयीत तत्तीनवनाडिका निर्णयामृते गर्गः रात्रौ यामत्रया
र्द्वाक्सप्तमी वा त्रयोदशी प्रदोषस्तु विज्ञेयः सर्वविद्याविगर्हितः रात्रौ नवसु नाडीषु च
तुर्थी यदि दृश्यते प्रदोषः स तु विज्ञेयो वेदाध्ययनगर्हितः कौर्मे अनध्यायस्तु नांगे
षु नेतिहासपुराणयोः न धर्मशास्त्रेष्वन्येषु पर्वण्येतानि वर्जयेत् शौनकः नित्ये जपे च
काम्ये च क्रतौ पारायणेपि नानाध्यायोस्ति वेदानां ग्रहणे स्मृतः इत्यनध्यायाः अथ
महानाम्न्यादिव्रतं श्रीधरः तिथिनक्षत्रवारांशवर्गोदयनिरीक्षणं चौलवत्समाख्यातं
सगोदानव्रतेषु च एतेषां लोपे शौनकः व्रतानि विधिनाकृत्वा स्वशाखाध्ययनं चरेत्
अकृत्वा भ्यसते येन स पापी विधिघातकः प्रत्येकं कृच्छ्रमेकैकं चरित्वाज्याहुतीः शतं।
हुत्वा चैव तु गायत्र्या स्वाध्यायादिन्याह शौनकः स्मृत्यर्थसारे तु त्रीन्य द्वादश वा कृच्छ्रान्
कृत्वा पुनर्व्रतं चरेदित्युक्तं अथ समावर्तनं सुरेश्वरः सौमभानुज्ययोर्वारे नक्षत्रे च

179A

शङ्कुपाते तथोद्भवे ग्रहणे श्रुतिरोक्ता वधिग्रस्तास्ते त्रिहस्तम्भुक्तं प्राक् स्मृत्यर्थसा
रे तु रात्रौ ग्रहे तिस्रो रात्रीः दिवा वा ग्रहे त्र्यहम्भुक्तं स्तु सोरः भुक्त्वोपुत्त्सवा वेशधं ऊर्ध्वमो
जनाद्युत्सवे गौतमोक्तेः आह्निक मदेकोद्दिष्टमित्रं तत्र तु त्र्यह इति मनुः स्मृत्यर्थसारे चै
वं यत्तु पञ्चाशत्तरात्रयोऽयमहसुपवासो विप्रवासश्चेति गौतमोक्तं तत्स्वयमाध्ययने पातृवर
त्वचः स्वक्रोष्टुगर्दभभाल्लूकसाम वाणार्त्तनिःस्वने अमेध्य शवशूद्रान्त्यस्मशानपति
तांतिके देशेऽशुचा पैवात्मनि च विद्युत्स्तनितसंप्लवे भुक्त्वार्द्रपाणिरंभोन्तरर्धरात्रेऽतिमा
रुते पांसुप्रवर्षे दिग्दाहे संध्यानीहारभीतिषु धावतः प्रतिगंधे च शिष्टे च गृहमागते खर
रोष्ट्रयानयानहस्त्यश्वनौवृक्षेरिणरोहणे सप्तत्रिंशदनध्यायानेतांस्तात्कालिकान्विदुः बा
णविंधः पातितं तु पीलोतिहरदत्तः अमेध्यास्त्रानकादयस्तनितं गर्जः वर्षाजोन्यत्र गर्जे हृष्टि
विद्युतां योगपद्ये आकालिकः वर्षासु तात्कालिकः इति नारायणः संध्यागर्जे तु सारीतः
सायंसंध्यास्तनिते रात्रिः प्रातः संध्यास्तनिते होरात्रं रात्रौ विद्युत्यपररात्रवधि विद्युतिन
तौ चापररात्रौ दिवेति गौतमोक्तेः दिनतृतीयस्तु तरं तु विद्युति सर्वरात्रमित्याहरव त्रिभा
गादि प्रवृत्तो सर्वमिति अर्धं त्र प्रधयामद्वयेऽति विज्ञानेश्वरः मध्यं दंडचतुष्टये इति
निर्णयामृते मनुः नविवादे न कलहे न सेनायां न संगमे न भुक्तमात्रे नाजीर्णे न

वमित्वानस्तूतक रुधिरे चस्रते गात्राच्छस्त्रेणाच परिक्षते केर्मे श्लेष्मातकस्यछाया
यां शाल्मलेर्मधुकस्यच कदाचिदपिनाध्येयं कोविदारकपित्थयोः मनुः शयानः
पौढपादश्च कृत्वाचैवावसक्थिकां नाधीयीतामिषं जग्ध्वा सूतकान्नाद्यमेवच पौढपा
दः पादोपरिपादं दत्त्वा आसनारूढपौढोनेति हरदत्तः सोपपदास्वपिप्रागुक्तं स्मृत्यर्थ
सारे श्रवणद्वादशीमहाभरण्योः प्रेतद्वितीयापारस्यसप्तम्यामाकाशे शवदर्शने चाहो
रात्रं असपिंडे गुरौ त्रिरात्रं आचार्ये उपाध्याये च पक्षिणी आचार्यभार्यापुत्रशिष्ये
ष्वहोरात्रं अग्न्युत्पाते गोविप्रहतौ त्रिरात्रं श्रपने विषुवे च पक्षिणी अकालवृष्टौ
च आरण्यमार्जारसर्पनकुपंचनस्वादेरन्तरागमने त्रिरात्रं आरण्यश्वसृगालादिवा
नररजकादौ द्वादशरात्रं खरवराहोष्ट्रचंडालसूतिकोदक्याशवादौ मासं गोगवया
जानाविकादौ त्रिमासं शशमेषमृपाकादौ षण्मासं गजगंडसारससिंहव्याघ्रम
महापपिक्षूतघ्नादावब्दमनध्यायः पोभनदिने चानध्यायः विवाहप्रतिष्ठोद्यापन
दिष्वासमाप्तेः सगोत्राणामनध्यायः उदये स्तमये चापिमुहूर्तत्रयगामियत् तद्दिनं
तदहोरात्रं चानध्यायविदोविदुः केचिदाहुः क्वचिद्देशे यावत्तद्दिननाडिकाः तावद
देवत्वनाध्यायो न तन्निशादिनांतरे प्रदोषं त्वाह प्रजापतिः षष्ठीच द्वादशीचैवश्च
र्धरात्रो न नाडिकाः प्रदोषे नाधीयीत तृतीनवनाडिका निर्णयामृते गर्गः रात्रौ

180A

यामजयादर्वाक् सप्तमी वा त्रयोदशी प्रदोषः स तु विज्ञेयः सर्वे शिष्टा विगर्हितः रात्रौ
नवस्तु नाडीश्चचतुर्थी यदि दृश्यते प्रदोषः स तु विज्ञेयो वेदाध्ययनगर्हितः कौर्मे
अनाध्यायस्तु नांगेषु नेतिहासपुराणयोः न धर्मशास्त्रेष्वन्येषु पर्वण्येतानि वर्जये
त् शौनकः नित्ये जपे च काम्ये च क्रतौ पारायणेपि च नानाध्यायोस्ति वेदानां ग्रह
णे ग्राहणे स्मृतः इत्यनध्यायाः अथ महानाम्न्यादिव्रते श्रीधरः तिथिनक्षत्रवारो
पवरोधयनिरीक्षणं चौलवत्सेनाख्यातं सगोदानव्रतेष्वपि च एतेषां लोपे शौनकः
व्रतानि विधिनाकृत्वा स्वशाखाध्ययनं चरेत् अकृत्वाभ्यस्यते येन स पापी विधि
घातकः प्रत्येकं कृच्छ्रमेकैकं चरित्वा ज्याकृतिशतं कृत्वा चैव तु गायत्र्या स्नायादित्या
ह शौनकः स्मृत्यर्थसारे तु त्रीन्द्वादशावकृच्छ्रान् कृत्वा पुनर्व्रतं चरेदित्युक्तं अथ
समावर्तनं सुरेश्वरः भौमभानुजयोर्वारे नक्षत्रे च व्रतोदिते ताराचंद्रविशुद्धौ च
स्यात्समावर्तनक्रिया वशिष्ठः स्नानं मध्याह्नकाले तु होरायां कारयेच्छुभे सर्वा
हे त्वकभौवेत्तु कुर्यात् स्नानं यथाविधि सर्वर्तवो विवाहस्य इति स्मृ० त्वायदादक्षि
णायने विवाहस्तदा समावर्तनमपि तत्रैव अन्यथोदगयने समावर्तनेऽनाम्नीने ति
ष्ठेनोति विरोधः स्यादित्युक्तं सुदर्शनभाष्ये एतच्च ब्रह्मचारिव्रतलोपप्रायश्चित्तं कृ
त्वायं नदाहवो बौधायनः शौचसंध्यादर्भाभिक्षाग्निकार्यरहित्यकौपीनोपवीतमेखल

लादंडाजिनाधारणं दिवास्वापछत्रपादुकास्रग्विधारणंगंधनानुलेपनांजनाद्यूत
नृत्यगीतवाद्यभिरतौब्रह्मचारकृच्छ्रगंपंचरेत् महाव्याहृतिहोमंपादित्रयोदशहोमं
चकुर्यात् समावर्त्तनेनोत्तरं एवंमृतानांत्रिरात्रमाशौचंकार्यं आदिष्टी[illegible]नोदकं
कुर्यादाव्रतस्यसमापनात् समाप्तेतूदकंदत्वात्रिरात्रमशुचिर्भवेदितिमनूक्तेः
आदिष्टीब्रह्मचारीतिविज्ञानेश्वरः ब्रह्मचर्येयदिकश्चिन्म्रियतेतस्तदात्रिरात्रमध्ये वि
विरुः कार्यान्यथानेतिसिध्यति जननेतुसत्यपिनत्रिरात्रे तत्रातिक्रांताशौचाभावादु
दकंदत्वेतिवचनाच्चेतिदिक् स्नातकव्रतान्याहव्यासः यज्ञोपवीतद्वितयंसोदकं
चकमंडलुं छत्रंचोष्णीषममलेपादुकेचाप्युपानहौ रौक्मेचकुंडलेवेदः कृत्तके
शनखः शुचिः वेदोदर्भवटुः मनुः उपानहौचवासश्चधृतमन्यैर्नधारयेत् उप
वीतमलंकारंस्रजंकरकमेवच अन्यान्यपिचकूचगरुडस्मृत्यादिभ्योज्ञेयानि अथ
छुरिकावंधः ज्योतिर्निवंधेनारदः छुरिकावंधनंवक्ष्येनृपाणांप्राक्करग्रहात् विवा
होक्तेषुमासेषुशुक्लपक्षेप्यनस्तगे जीवेशुक्रेचभूपुत्रेचंद्रताराबलान्विते मौंजी
वंधर्क्षतिथिवारेषुचित्रकुजवर्जितवासरे संग्रहे शूद्राणां राजपुत्राणांमौंज्यभा
वेस्त्रवंधनं मौंजीवंधोक्ततिथ्यादौकार्यंदेवीमादितनंदिनंविना अथविवाहः याज्ञ
वल्क्यः अविप्लुतब्रह्मचर्योलक्षण्यांवाह्यांतरलक्षणैर्युक्तांवाह्यानिकांशरीर

181A

एवंशादौ प्रसिद्धानि अंतरात्यंतैषापिंडान् कन्यायाश्चलायनेनोक्तानि मनुः असपिंडा
च या मातुरसगोत्रा च या पितुः सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने ॥ असपिंडा
सापिंड्यरहिता तच्चैकशरीरावयवान्वयेन भवति एकस्य हि पितृमातृवा शरी
रस्यावयवाः पुत्रपौत्रादिषु साक्षात्परंपरया वाप्यनुक्रमेणागितादिरूपेणानुस्यूताः ।
एवं पित्न्याः पत्यासह भ्रातृपत्नीनां च परस्परं नैतत्संभवति तथाप्याधारत्वेनैकशरी
रावयवान्वयोस्त्येव उपस्थिमिरस्थीनि इति मंत्रलिंगात् एकस्य हि पितृशरीरस्यावय
वाः पुत्रद्वारा नाशाहिता इति विज्ञानेश्वरादयः वाचस्पतिः ॥ चंद्रिकापरार्के मेधाति
थिमाधवादयस्तु एकपिंडदानक्रियान्वयित्वं सापिंड्यं लेपभाजश्चतुर्थाद्याः पित्रा
द्याः पिंडभागिनः पिंडदः सप्तमस्तेषां सापिंड्यं साप्तपौरुषमिति मात्स्योक्तेः न च पितृव्यादि
ष्वेतन्नास्तीति वाच्यं तत्कर्तृकश्राद्धे देवतात्वेनैतत्सत्त्वात् देवदत्तकर्तृकश्राद्धे हि
ये देवता भूतास्तेषां मध्ये यः कश्चिदन्यकर्तृकश्राद्धेनुप्रविशति तेषां सापिंड्यं तद्भा
र्याणामपि भर्तृकर्तृकश्राद्धे सहाधिकारित्वेन तदन्वयात् एवं च सा गला भर्तुः ।
पिंडे गोत्रे च सूतके इति स्मृतेश्च स्त्रीणां च येन गमयेत्वात्तस्य सापिंड्यनिमित्तत्वमा
नाभावात् न च मातुलादिष्वेतन्नास्तीति वाच्यं मातामहरूपदेवतैक्यात् ननु मरुशि
ष्यादेरपि श्राद्धदेवतात्वात् सपिंडत्वं स्यात् किं बहुना सर्वाभावेनुत्पत्तिः कारयेत्

नि॰सिं॰
१८२

182

स्यरिक्थतस्मिति मार्कंडेयपुराणाद्दौहित्रो पि श्राद्धकर्तृत्वान्न सापिंड्यप्रसंगः सत्यं पंचमा
त्सप्तमादूर्ध्वं मातृतः पितृतस्तथेति याज्ञवल्क्यवचनेन मातापितृसंबंध एव तत्सत्त्वात् ऊर्ध्वं
सापिंड्यनिवृत्तेस्तद्विरोधः न नु पंचमत्वादि यत्र नियम्यते जननमातृतोपि इत्यादि वाक्यभेदा
न्नैवं मातृकुले पंचमत्व पितृकुले सप्तमत्वस्य च बोधने तुल्यत्वान्न पौरुषेयत्वाद
दोष इति चेत् तुल्यमुभयत्रापि अन्यकर्तृके राज्ञस्तत्पितॄणां वा देवतात्वाभावा
च्च किंच अवयवान्वयपक्षे यथायोगं कृत्या परिहारः। तथेहापि तेन मातृकुले पितृ
कुले चैकपिंडदानक्रियान्वयित्वं सापिंड्यमित्याहुः तेनैकस्य विप्रादेः शूद्रापुत्रादयस्तत्र
द्रूसपिंडा भवंति अत्र केचित् उभयतः सपिंड्यनिवृत्तावेवोद्वाहो नान्यथेत्याहुः शुद्धिचिं
तामणि वाचस्पति हरदत्तादयस्तु सगोत्रत्व सापिंड्यस्य स प्रतियोगिकत्वेन संयोग
वदुभयनिरूप्यत्वादेकतो निवृत्तावन्यतो निवृत्तेरावश्यकत्वान्मूलपुरुषमारभ्या
ष्टमो वरः मूलपुरुषमारभ्य द्वितीया तृतीयादिकामुद्वहेदित्याहुः शिष्टास्तु नवध्र
वरयोस्तातः सापिंड्यं किंतु कूटस्थसंततित्वान्न सापिंड्येनैव अतो ष्टमवरं प्रति
कन्यर्थ्या असापिंड्ये पि कन्यायाः कूटस्थेन सापिंड्यात्तत्संततिः स्यात्त्वाद्वरस्तां प्र
ति सपिंड एवेत्यविवाहः सापिंड्यासापिंड्ययोः प्रतियोगिभेदेनाविरोधादित्याहुः
इदमेव युक्तं आशौचे प्येवं सापिंड्यं ज्ञेयं यत्तु मध्ये विच्छिन्नमपि सापिंड्यं मंडूक

राम
१८२

182 A

स्मृतिवत् पुनरसपिंडसापिंड्ययोर्दोषः अनुवर्त्तते यथा क्रूरस्यात्यं चमयोः कन्ययोः पुत्रै
तत्र निवृत्तिः तदपत्ययोस्त्वनुवृत्तिस्तत्रापि न सपिंडसापिंड्ययोर्दोषः संबंधभेदात्
अत्र क्रूरस्य मात्स्य...णाना कार्या तदुक्तं वध्वा वरस्य वा तातः कूटस्थात् यदि स
प्तमः पंचमी चेत्तयोर्मातानं सापिंड्यं निवर्त्तत इति कूटस्थो मूलपुरुषः विस्तरूपनि
वंधे एवमुक्तप्रकारेण पितृवंधुसप्तमात् ऊर्द्ध्वमेव विवाह्यत्वं पंचमान्मातृवं
तः संतानो भिद्यते यस्मात् वैजाडुभयजाचत माद्यपगाण्डोमान् वरं यावच्च कन्य
कां स्मरति तथा च नारदः आसप्तमात् पंचमाच्च बंधुभ्यः पितृमातृतः अविवाह्या सगो
त्रा च समानप्रवरा तथा अत्र बंधुभ्य इति पंचमी निर्देशात् पितुः पितृष्वसृपुत्रात् सप्तमी
मातुः पितृष्वसृपुत्राच्च पंचमीमपि त्यजेत् एवमन्यबंधुष्वपि) तत्रापि विगोत्रात्यये ऽ
न्यगापि विवाहं कुर्यात् वक्ष्यमाणवचनात् विगोत्रगणानां च मातामहगोत्रापेक्षा
यात् त्रिरवापेक्षया अन्वयापितुः पितामह प्रसंग इति संबंधतत्वादयोगो ऽनंतराः
दुहितृदौहित्री पुत्री परिणया स्यात् वध्वा मातामहगोत्रापेक्षया तु विगोत्रं तद्गो
त्रेन विवाहप्रसंग इति संबंधतत्वादयोगो ऽनंतराः संबंधविवेके मूलपाणिग्र
प्याह पंचमात्सप्तमादर्वाग पितृगोत्रांतरितापि विवाह्या असंबंधा भवेन्मातुः

पिंडेनैवोदकेनवा स विवाहाद्द्विजातीनां त्रिगोत्रांतरितावधीति वृहन्मनू
नूक्तेः सन्निकर्षेपिकर्तव्यं त्रिगोत्रात्परतो यदीति देवलोक्तेश्च एतच्चद
क्षिणात्यानामन्वेते यत्तु वशिष्ठः पंचमीं सप्तमींचैव मातृतः पितृतस्तथेति
यच्च विष्णुपुराणे पंचमीं मातृपक्षाच्च पितृपक्षाच्च सप्तमीं गृहस्थउद्वहेत्कन्यां न्या
य्येन विधिनान्नृपेति पंचमीं सप्तमीं मतीत्येति व्याख्येयं पंचमे सप्तमे चैव येषां वैवाहिकी
क्रिया क्रियापरा अपि हि ते पतिताः शूद्रतां गताः इत्यपरार्के मरीचिवचनात् सारलतायां शा
खांतरितोसपिंडता तु सर्वेषां गोत्रतः साप्तपौरुषी पिंडश्चोदकदानंच अशौचवचनादा
नुगं गोत्रसंतानं आशौचवत्तानामिव्याप्य गच्छतीत्यर्थः शुद्धिविवेके शुद्धिचिंतामणौ
च ब्राह्मणे सर्वेषामेव वर्णानां विज्ञेया साप्तपौरुषी सपिंडता ततः पश्चात्समानोदकध
र्मिता ततः कालवशात्तु विस्मृतौ वासगोत्रतः समानगोत्रतः समानोदकसंज्ञा
तु तावन्नाशापि नश्यति सप्ताहद्वयः सोदकास्ततो गोत्रजाः ततोवंशस्य उपविभक्त
धनात्वेन सपिंडापरिकीर्तिताः तेनाविभक्तधनाभावेविभक्तः सपिंडो धनहारीना
न्यथेत्यर्थः तेनविवाहे आशौचे धनग्रहणेच त्रिधा सापिंड्यं सिद्धं यत्तु पंचमीं मातृतः
परिहरेत्सप्तमीं पितृतो स्त्रीं मातृतः पंचमीं पितृतो वेति पैठीनसिस्मृतौ त्रीनित्यनुक
स्यइति माधवोक्तेः पंचमीं सप्तमीं चैव मातृतः पितृतस्तथा दशभिः पुरुषैः ख्याता

183A

त्र श्रोत्रियाणां महाकुलात् उद्वाहे सप्तमादूर्ध्वं तदभावे तु सप्तमीं पंचमीं तदभावे तु पितृ
पक्षे षष्ठ्यां विधिः सप्तमीं च तथा षष्ठीं पंचमीं च तथैव च एवमुद्वाहयेत्कन्यां न दोषः शाका
टायनः तृतीयां वा चतुर्थीं वा पक्षयोरुभयोरपि विवाहयेन्मनुः प्राह पाराशर्यो गिं
रायमः यस्तु देशानुरूपेण कुलमार्गेण चोद्वहेत् नित्यं स व्यवहार्यः स्याद्वेदाच्चै
तन्न हीयते इति चतुर्विंशतिमतात् चतुर्थीमुद्वहेत्कन्यां चतुर्थः पंचमोपि वा परा
शरमते षष्ठीं पंचमो न तु पंचमीमिति पराशरोक्तेश्चानुकल्पत्वेनापदि पंचम्यादिप
रिणयनं कार्यमिति प्रतीयते अत्र हि तदभावे इति स्पष्टमेवानुकल्पत्वमुक्तं। तन्न य ३६
थाश्रुतं ज्ञेयं निर्मूलत्वात् सर्वोक्तमरीचिवचोविरोधात् वक्ष्य विकल्पासंभवा
त् पंचमात्सप्तमाद्धीनां यः कन्यामुद्वहेद्द्विजः गुरुतल्पी स विज्ञेयः सगोत्रां चैव मु
द्वहन्निति विष्णूक्तेश्च तस्मात्समूलत्वे सति मदनपारिजातादौ पुराणादिशादन्नकस्त्व
पन्नसंबंधायत्र प्रवेशो ब्राह्मणादीनां क्षत्रियादिसपिंडविषये वा पूर्वोक्तानि ज्ञेया
नि न त्वनुकल्प इति भ्रमितव्यं यत्तु स्मृतिचंद्रिकामाधवादयस्त्वाहुः तृतीये संग
च्छावहै चतुर्थे संगच्छावहा इति शतपथश्रुतेः तृतीं जकुमातुस्येव योषाभागस्ते
ये त्वष्ट संपदियामि वेति गर्भेतनोजेनिता दंपती कृत्तिति च मंत्रवर्णात् मातृस्व
स्रसुतां केचित्पितृष्वसृसुतां तथा विवाहंति क्वचिद्देशे संकोच्यापि सपिंडतामि

पाराशरस्य मूलत्वात्

ति शातातपोक्तेश्च मातुलकन्योद्वाहः कार्यः यद्यपि पितृष्वसृकन्योद्वाहोपि प्रा-
प्तस्तथाप्यस्वर्ग्यं लोकविद्विष्टमिति निषेधाद्वचनांतरेण तदुद्वाहस्याविधाना-
न्नकार्यः अयं तु दाक्षिणात्यशिष्टाचारात्कार्य इति न च पूर्वोक्तस्मृतीनां अर्थवा-
दमात्रता मतांतरेण सिद्धो उपरि देवेभ्यो धारयतीतिवदनुपपत्त्या विधिकल्पनात्
यत्तु शातातपः मातुलस्य सुतामूढ्वा मातृगोत्रां तथैव च समानप्रवरां चैव त्यक्त्वा
चांद्रायणं चरेत् यच्च मनुः पैतृष्वसेयीं भगिनीं स्वस्रीयां मातुरेव च मातुश्च भ्रातुरा-
प्तस्य गत्वा चांद्रायणं चरेत् एतास्तिस्रस्तु भार्यार्थे नोपयच्छेत्तु बुद्धिमान् यच्च व्यासः
मातुः सपिंडा यत्नेन वर्जनीया द्विजातिभिरिति तद्गांधर्वादिविवाहोढमातृविषयं ।
तत्र पितृगोत्रान्विसने अतएव मार्कंडेयपुराणे गंधर्वादिविवाहेषु पितृगोत्रेण
धर्मविदिति ब्राह्मादिविवाहे तु परिणेत्रैवेति भेदः सोमेश्वरोपि तृतीयाध्याये वाक्य-
पादे मातुलकन्योद्वाहस्तु दाक्षिणात्यस्मृतिविरोधेनाचारप्राप्तस्यास्य वार्त्तिके चाधो-
त्तावपि पूर्वोक्तश्रौतलिंगवत्तीयस्त्वादस्य कर्त्तव्यतामाह तदेतद्दूत्रकस्य पालकद-
त्रिममातृसोदरकन्याविषयत्वे नासवर्णा मातुकन्याविषयत्वेन चोपपन्नमथ्यविवा-
हितं रमणीयं यथा ... तथापि कलौ नाचन्निषिद्धमेव गोत्रान्मातुः सपिंडाच्च वि-
वाहो गोवधतुल्यः ... दिपुराणात् माधवीये बौधायनोप्यस्य निंदामाह पंच-

पि

य

184A

धाविप्रतिपत्तिर्दक्षिणात्येन योत्तरत्र तरुणीविक्रयोऽनुपेतेन स्त्रिया च सह भोजनं पर्युषितान्नभो
जनं मातुलपितृष्वसृदुहितृगमनमिति पश्चोत्तरतः सीधुपानादिकमुक्त्वा इतरान्कुर्व
न्नुष्यन्ति इतरइतरस्मिन्निति भट्टसोमेश्वरेणापि स्मृतिविरुद्धा मातुलकन्याविवाहादि
नाम स्मार्तवचनादेशामाण्यमित्युक्तं तत्तदस्यान्तिरपि उद्धृत्य तेन दाक्षिणात्ये मातुला
स्य सुताद्विजैः मातस्या दाक्षनराः सर्वे व्यभिचारनतास्त्रियः नष्टतास्त्रियः उत्तरामध्य
पाश्चैव स्वस्वपान्वषणं राजस्वलाद्यन्यनाचारत्वमाह अतएव देमाड्रोसामे कर्णाटकादीना
न्तत्काचरणमाद्वेनन वेधः वोपदेवेनापि लिखितं ब्राह्मणे यजमानस्तजो दाहीयत्र वै ह्ली च
पतिः श्राद्धं न गच्छन्त्रितिप्राः कृतं पञ्चनिरामिषमिति तस्मात्ततः पंचपितृतः सप्तचन्यतो
द्वहेदिति सिद्धं संबंधविवेके स्मृत्यन्तरः ब्राह्मणानामेकपिण्डस्वधानामादशमाद्भवेविच्छित्ति
र्भवति आसप्तमाद्विच्छित्तिर्भवति भ्रातृजीयात्पिंडविच्छित्तिरन्यथापि पिंडशौचक्रिया
विच्छिदा त्रिपुरुषा स्त्री भवति अस्यार्थमाह शूलपाणिः जीवत्पित्रादित्रिकस्य वृद्धप्रपिता
महादयस्त्रयः श्राद्धदेवतात्वात्पिंडभाजो भवंति तदूर्ध्वं त्रयो नवपुरुषपर्यन्ता लेपभाजः
श्राद्धकर्तुश्च दशमादि दशमादूर्ध्वं सापिण्ड्यनिवृत्तिः दशमादिरुपलक्षणं तेन पितृर
पितामह जीवनेन नवपुरुषपर्यन्तं पितृजीवने चाष्टपुरुषपर्यन्तं सापिण्ड्यमिति तेन अ
पुत्रधनग्रहणे सन्निहिताभावे साप्तपुरुषपर्यन्तमधिकारः धनग्राहिणामारभ्य तृतीयः
पौत्रः तदूर्ध्वं श्राद्धविच्छेदः अन्यथा धनहारित्वे श्राद्धाद्याकरणे ब्रह्महेत्यर्थः भ्रातृजीया

नि॰सिं॰
१८५

185

दित्यत्रूढकन्याविषयं अप्रमातॄणां तु स्त्रीणां त्रिपुरुषी विज्ञायते इति विशिष्टोक्तेः एत
च्छौचविषयं सापिंड्यं न तु विवाहे तत्रोद्वाहे क्वचनैः पंचमात्सप्तमाच्च नियमादि
ति मेधातिथिप्रमुखदाक्षिणात्याः वाग्दानोत्तरमेवादेति शुद्धिविवेकः मातृकुलाद्येषु
कानकन्याविषयं चैतत् अन्यथा अप्रमातॄणां यथा स्त्रीणां सापिंड्यं साप्तपौरुषं प्रमातॄ
णां भर्तृसापिंड्यं प्राह देवः प्रजापतिरिति कौर्मेण विरोधः स्यादिति रत्नाकरस्मृतितत्त्वा
दिगौडग्रंथाः पुत्रे चैतत् अन्यथा कन्योत्पत्तौ पुरुषत्रयपर्यंतमेव स्यात्तत्कं स्यात्तो
र्ध्वं सापत्नमातामहकुले त्वाह मिताक्षरायां शंखः यद्येकजाता बहवः पृथक्
क्षेत्राः पृथक् जनाः एकपिंडाः पृथक् शौचाः पिंडस्त्वावर्त्तते त्रिपुरुषं पृथक्क्षेत्राः भि
न्नजातीयस्त्रीषु जाताः पृथक् जनाः सजातीयभिन्नमातृषु जाताः अत्र त्रिपुरु
षं सापिंड्यमिति विज्ञानेश्वरो व्याचख्यौ पृथ्वीचंद्रोदये सापिंड्यदीपिकायां चैवं
मदनपारिजाते तु पृथक्क्षेत्राः भिन्नमातृजाः पृथग्जनाः भिन्नजातीयाः एवं वि
जातीयसापत्नमातृकुलविषयं सवर्णसापत्नमातृकुले चतुःपुरुषं सापिंड्यं पं
चमीं सप्तमीं चैव मातृतः पितृतस्तथेति वशिष्ठोक्तेः सप्तमीमिति ब्राह्मणादीनां स्व
स्त्रियादिदारोत्पन्नपितृकुलविषयं चेत्युक्तं तत्स्वकपोलकल्पितत्वाद् यांतरविरो
धाच्च निर्मूलं पितृपत्न्यः सर्वा मातर इत्युक्तो स्वमतं भ्रातृपत्यानि भागिनेयानीर
ति पृथक्कुच अन्यथा सपिंडत्वेन निषेधात्सापत्नमातुलत्वादिनिर्देशोऽपृथक्

राम
१८५

=३= कपोलकल्पेति पदं भावार्थांगम्यमित्युच्यते =

185A

अत एवैतेन स्मृतिकौमुद्यां तु वर्णितः सापत्नमातामहकुलपरत्वेन तथैव शंखवच
नं व्याख्यातं तेन वासिष्ठं पंचमीं सप्तमीं श्रुतीत्यत्र व्याख्येयं तस्मात्सा चैव व्याख्या
युक्ता प्रयोगरत्ने भट्टैः स्मृतितत्वादि गौडग्रंथेषु सपत्नमातामहकुले यावदुक्तं वाच
निकमेव सापिंड्यमुक्तं यथाह सुमंतुः मातृपितृसंबंधा आ सप्तमादविवाह्या आ
वंती आ पंचमादन्येषां पितृपत्न्यः सर्वा मातरस्तद्भ्रातरो मातुलास्तद्भगिन्यो मा
तृष्वसारस्तद्दुहितरश्च भगिन्यस्तदपत्यानि भागिनेयानि अन्यथा शंकरकारि
णः स्युस्तथाध्यापयितुरेतदेवेति आ पंचमादिति मातृकुले त्रिगोत्रांतरितविषयं
चेति प्राच्याः मातृस्यैस समानप्रवराचैव शिष्यसंततिरेव च प्रसादातृगुरोश्चैव संततिः
प्रतिषिध्यते तद्भगिन्यो मातृष्वसार इति तु आकरे न पठितं क्वचिद्वचनादविवाह्यः
यथाहऽपरार्के शिष्टो विरुद्धसंबंधामुपयच्छेतेत्युक्त्वा विरुद्धसंबंधः स्वयमेवोक्तः

ख

यथा भार्यासुदुहिता पितृसपत्नीस्वसा चेति बौधायनः मातुः सपत्न्या भगिनीं तत्
सुतां च विवर्जयेत् पितृसपत्न्या भगिनीं तत्सुतां च विवर्जयेत् अतो मातृष्वसुः सा
पत्नपुत्रकन्याप्यविवाह्या सापत्नमातृकुलजा नमेति मदनपारिजातोक्तेरिति केचि
त् केचित्तु ज्येष्ठो भ्राता पितुः सम इति मनूक्तेस्तत्पत्न्या मातृत्वात् तत्पितुर्मातामहत्वा
ज्ज्येष्ठभ्रातृपत्नीभगिनी न विवाह्याः तथा उत्पादकब्रह्मदात्रोर्गरीयान् ब्रह्मदः पिते

तिमनूक्तेर्ग्रहणात्त्रिपुरुषं साापिंड्यं सखापिनिर्णयः अतस्तेषां कन्यानोद्वाह्या २
गायत्र्या उपदेष्टुश्च कन्यां नैवोद्वहेत द्विजः गुरोश्च कन्यां शिष्यो वा तत्संतत्यापि नेष्य
ते पुरुषत्रयपर्यंतं भ्रात्रादेर्नैतादिष्यते वा कसंबंधकृतानां तु स्नेहसंबंधभागिनां २
विवाहो जनकर्तॄणां लोकगर्हाप्रसज्यत इति वचनाच्चेत्याहुः तन्न मल्लविसंदत्तकवि
षयेऽनूच्यते तत्रैव गौतमः ऊर्ध्वं सप्तमात्पितृबंधुभ्यो बीजिनश्च मातृबंधुभ्यः
पंचमादिति बंधुग्रहणात्रदत्तकमात्रपरमिदं किंतु संतानेपि एतत्स्वेगादित ह्यान्तु
व्यायणापरमिति हरदत्तः उपरतिचंद्रिकायां अपरस्मृतिचंद्रिका नियोगाद्युत्पा
दयति तस्माद्बीजिनोप्यूर्ध्वं सप्तमात्पंचमादित्यर्थ इति दत्तकस्य जनकविषयमेतदिति सा
पिंड्यमीमांसायां तेन दत्तस्य जनककुले साप्तपौरुषं जननीकुले पांचपौरुषं साापिं
ड्यं दत्तक्रीतादिपुत्राणां बीजवत्सपिंडता सप्तमी पंचमी चैव गोत्रित्वं पालकस्य चेति
वृहन्मनूक्तेः बीजतश्चेति गौतमोक्तेश्च पालकपितृकुले तु पंचपुरुषं पालकमा
तृकुले त्रिपुरुषं तथा चापरार्के पैठीनसिः त्रीन्मातृतः पंचपितृतः पुरुषानतीत्योद्वहे
दिति एतत्सारवत्याचख्यौ दत्तकादीन्पुत्रान्पितृपक्षे तानि वृत्तपिंडगोत्रार्षेयान्प्रत्ये
तदुच्यते पंचपितृतः इति नान्यात्प्रतीति यत्तु वृद्धगौतमः स्वगोत्रेष्ठकृतयेस्तु दत्त
क्रीतादयः सुताः विभिन्नगोत्रमायांति न साापिंड्यं विधीयते यच्च वसिष्ठः अन्य शा

ख्वोढ्रवोदत्तः पुत्रश्चैवोपनायितः स्वगोत्रेण स्वशाखोक्तविधिनास्यात्स्वशाखभा
गिमीति यच्च नारदः धर्मार्थं वर्धिताः पुत्रास्तत्र क्षेत्रेण पुत्रवत् अंशपिंडविभागित्वं ते
षु केवलमीरितमिति तत्पालककुले साप्तपौरुषं सापिंड्यं नेत्येवंपरं न तु सर्वथा सापिं
ड्यनिषेधपरमिति सापिंडमीमांसायां मदनपारिजातादपि दत्तकानुप्रवेशेऽल्पसापिंड्यं
प्रतिभाति पूर्ववचसां महानिबंधेष्वप्यनुपलंभात् परार्कादिलिखनाभावात्सर्वा
र्थ एव स्यात् यास्य प्रतिभातानन्तस्य त्वाधीरे तल्लिखितं तेषामेव शोभते मम तु पालककु
ले एकपिंडदानक्रियान्वयित्वरूपं साप्तपौरुषमेव सापिंड्यं बीजिनश्चेति गौतमोक्ते
र्जनककुले पितावदेव त्रीन्मातृतः इत्यादि तु सर्वेषां मातृकुलपरं यथैकजातानां वदव
इति शाखैकवाक्यत्वादिति युक्तं प्रतिभाति अत एवास्य द्यामुष्यायणत्वं हेमाद्रिप्रव
रमंजरीहलिकनारायणादिभिरुक्तं भट्टसोमेश्वरेणापि पृथायाः कुन्तिभोजस्य पालक
कन्यात्वेपि ऊर्ध्वं सप्तमात्पितृबंधुभ्यो बीजिनश्चेति गौतमोक्तेर्दत्तिभार्यापृथायाज
नकस्य शूरसेनस्य कुलेपि साप्तपौरुषं सापिंड्यमुक्तमपि वा कारणागतदृणे इत्यत्र
सापिंड्यदीपिकायां तु दत्तौरसादीनां जनकगोत्रेणोपनयने कृते जनककुले साप्त
पौरुषं सापिंड्यं पालकमातापितृकुले त्रिपुरुषं पिंडनिवृत्यान्निवृत्यलक्षणं
त्रिपुरुषं सापिंड्यं पालगोत्रेणोपनयने तत्कुले साप्तपौरुषमित्युक्तं तत्र दृ

ड्रोपायनसंस्कारा निजगोत्रेणैव वै कृता दत्ताद्यास्तनयास्ते स्युरन्यथा दासउ
च्यते इति कालिकापुराणात् उपनयनोत्तरं दत्तकनिषेधात् त्रिपुरुषमित्यत्रापि र
स्तलं मस्तग्यामित्यलं बहुना मातापितृद्वारकसापिंडवतीनां कन्यानामियं सरणी रा
मवाजपेयिनोक्ता उद्वोढुः पितरौ पितुश्च पितरौ तज्जन्महेतुद्वंद्वं पितृद्वंद्वं तस्य च तत्क्रम
षट् च ततोऽप्यस्य क्रमात् षोडश वंशारंभकदंपतिप्रमितिरित्यासप्तमकक्षरदाणके
कान्वयकन्यकाः पितृकुले त्वसप्तकक्षं भवे यद्यप्येकस्यैव द्वयोः सुतास्तु तदपी
ह तु संबंधसाम्यदेकैव गणितेत्येव धार्यता एकस्मान्मिथुनात् सुतौ च दुहितारौ द्वंद्व
त यत्तद्वयं तद्वयात् तस्माद्द्वंद्वं चतुष्कं अष्ट च ततोऽतः षोडशातो रदाः यावत्सप्तमकक्षमगित्रसे
तवः कन्या इहैकान्वये ताडदंतैर्गुणिता रसैकरवद्वेशा वंशा सापिंडाः पितुः मातृजन्मद
दंपतीच्चामिथुनद्वंद्वं तयोः सागरास्तस्याः पंचमकक्षमध्ये मितिरित्यैकान्वयः पुंसुते
द्वंद्वाद्द्वंद्वयुगं ततोऽप्यष्टतोऽप्यपंचककक्षे शरक्षोणयः सप्तगुणाः शराभ्रविधवो मातुः
सपिंडाः कुले कुलद्वयस्य कन्यकायुत्तामिथः सपिंडकाः द्विमांस्ततद्वरधरा द्वेशा विवा
हकर्मवर्जिता इति एतच्च सर्ववर्णसाधारणं सर्वत्र सापिंड्यसद्भावादिति विज्ञानेश्वरो
क्तेः आ पंचमात्सप्तमादूर्ध्वं मातृतः पितृतः क्रमात् सापिंड्यनानिवर्तेत सर्ववर्णेष्वयं वि
धिरिति हरनाथधृतदेवलवचनाच्च संबंधतत्वे तु मतुः पितृष्वसृसुतां मातृष्वसृ

187A

सुतां मातुलसुतां मातृसगोत्रां समानार्षेयां यो विवाह्य चांद्रायणं चरेत्परित्यज्यैनां मातृ
वद्बिभृयादिति दिक् ऋषेरिदमार्षं प्रवरः गोत्रप्रसिद्धं समाने आर्षे गोत्रे यस्य तस्मा(
ज्जातायां न भवतीति तौ अथ संक्षेपेण गोत्रप्रवरनिर्णयः तौ च भिन्नौ निषेधे निमित्तं
सगोत्राय दुहितरं न प्रयच्छेदित्यापस्तंबोक्तेः असमानप्रवरैर्विवाह इति गौतमोक्तेश्च (
तत्र गोत्रलक्षणमाह प्रवरमंजर्यां बौधायनः विश्वामित्रो जमदग्निर्भरद्वाजोथ गोत
मः अत्रिर्वसिष्ठः कश्यप इत्येते सप्तर्षयः सप्तानामृषीणामगस्त्याष्टमानां यदपत्यं
तद्गोत्रमिति यद्यपि केवलभार्गवेष्वार्ष्टिषेणादिषु केवलांगिरसेषु च हरितादिषु
नैतत् भृग्वंगिरसोरनंतर्गतेः तथाप्यपत्यापत्यैरेवेति केचित् अत एव स्मृत्य
र्थसारे प्रवरैक्यादेवागोत्रविवाह उक्तः यद्यपि वसिष्ठादीनां न गोत्रत्वमुक्तं तेषां सप्त
र्षित्वेन तदपत्यत्वाभावात् तथापि तत्सर्वभाविवसिष्ठाद्यपत्यत्वेन गोत्रत्वं
युक्तं अत एव सर्वेषां परेषां चैतन्नोक्तं अत्र विशेषः स्मार्तकृते प्रवरदर्पणे ज्ञेयः प्र
वरास्तु प्रवरणानि प्रवराः कल्पकारा हि वासिष्ठेति होता वसिष्ठवदित्यध्वर्युरित्या
दिना येषां वरणमामनंति ते प्रवराः तच्च वरणं यद्यपि गोत्रभृतस्यापि क्वचिद्द
श्यते तथापि पूर्वैश्च दिकृद्विभेदो द्रष्टव्यः अन्यथा तेषां आर्षेय इत्यादिनिर्दे
शानुपपत्तेः अन्ये तु तद्गोत्राणां आर्षेय इति भेदमाहुरिति परंपरं प्रथममित्या

श्वलायनश्चैनोक्तेऽस्त्र न त्वं तु गोत्रभृत्तस्य पितृपितामहा एव प्रवराः पितैवागोत्र
पुत्रोऽथ पौत्र इति शातातपस्मृतेः अत्र विशेषमाह बौधायनः एक एव ऋषिर्याव
त्प्रवरेष्वनुवर्त्तते तावत्समानगोत्रत्वमन्यत्र भृग्वंगिरसां गणादिति अस्यार्थ
स्तारः त्रियमाणत्वयावापि सन्नयावानुवर्त्तनं एकस्य दृश्यते यत्र तज्ज्ञेत्रं तस्य
कथ्यते भृग्वंगिरोगणेषु तु माधवीयेऽस्त्यंतरे पंचानां त्रिषु सामान्यादविवा
हस्त्रिषु द्वयोः भृग्वंगिरोगणेष्वेवं शेषेष्वेकोऽपि चारयेत् एकोऽपि समानः प्रवरो वि
वाहं वारयेदित्यर्थः बौधायनोऽपि भृग्वंगिरसां वाधिकृत्य द्व्यार्षेयसंनिपातेऽ
विवाहस्त्र्यार्षेयाणां त्र्यार्षेयाणां त्र्यार्षेयसन्निपातेऽविवाहः पंचार्षेयाणामिति २
भृग्वंगिरोगणेष्वपि जमदग्निगौतमभारद्वाजेष्वेकप्रवरसाम्ये सर्वेषां मध्ये समा
नगोत्रत्वादेव विवाहः इति दिक् अथ गोत्राणि प्रवराश्चोच्यंते तत्र बौधायनः गो
त्राणां तु सहस्राणि प्रयुतान्यर्बुदानि च ऊनपंचाशदेवैषां प्रवरा ऋषिदर्शनात् त
त्र सप्त भृगवः वत्सा विदा आर्ष्टिषेणा यस्का मित्रयुवाः वैन्याः शुनका इति वात्सानां
भार्गवच्यावनाप्नवानौर्वजामदग्न्येति भार्गवौर्वजामदग्न्येति वा भार्गवाप्नवानेति वा २
विदानां पंच भार्गवच्यावनाप्नवानौर्ववैदेति भार्गवौर्वजामदग्न्येति वा एतौ जाम
दग्न्यसंज्ञौ आर्ष्टिषेणानां भार्गवच्यावनाप्नवानार्ष्टिषेणानूप्येति भार्गवार्ष्टिषेण

188A

न्नपेतिवा एवंत्रयाणांपरस्परमविवाहः वात्स्यानांभार्गवच्यवनाप्नवानेति वत्स
पुरोधसयोः पंच भार्गवच्यवनाप्नवानत्वासपौरोधसेति वैजवनिमथितयोः पंच भार्ग
वच्यवनाप्नवानवैजवनैमथितेति एते त्रयः क्वचित् एषामपि पूर्वैरपि विवाहः अ
नन्तरमुक्तस्यास्य बयोन्यस्य विरोधामत्स्येनप्रवरदर्पणेत्रेयः यस्कानांभार्गववैतहव्य
सावेदसेति मित्रयुवानांभार्गववाध्र्यश्वदिवोदासेति भार्गवच्यवनदैवोदासेतिवा
वाध्र्यश्वेत्येकोवा वैन्यानांभार्गववैन्यपार्थेति एते एव स्येताः शुनकानांशुनके
तिवा गार्त्समदेतिवा भार्गवगार्त्समदेति द्वौवा भार्गवशौनहोत्रगार्त्समदेति त्रयोवा
वेदविश्वज्योतिषांभार्गववेदवैश्वज्योतिषेति शाठरमाठराणांभार्गवशाठरमाठ
रेति एतौ द्वौ क्वचित् यस्कादीनां स्वगणे त्वन्यत्र सर्वैर्विवाहः तदुक्तं स्मृत्यर्थसारे यस्कामि
त्रयुवोवैन्यः शुनका प्रवरैक्यतः स्वस्वहित्वागणे सर्वैर्विवाह्याः परावरैरिति अथां
गिरसः ते गौतमाः भरद्वाजाः केवलांगिरसश्चेति त्रिधा तत्र तत्र गौतमाः दश अयास्या
शारद्वताः कौमंडाः दीर्घतमसः औशनसाः कारेणुपालयः राहूगणाः सोमराजका वाम
देवाः बृहदुक्थाश्चेति तत्रायास्यानामांगिरसायास्यगौतमेति शारद्वतानामांगिरस
गौतमशारद्वतेति कौमंडानामांगिरसौतथ्यकाक्षीवतगौतमकौमंडेतिवा आंगिरसौशि
र्घस्यौशिजगौतमकाक्षीवतेतिवा आंगिरसौतथ्यगौतमौशिजकाक्षीवतेति त्रयोवा दी

नि॰सिं॰
१८५

189

र्घतमसामांगिरसौतथ्यकाक्षीवतगौतमदैर्घतमसेति आंगिरसौतथ्यदैर्घतमसे
तित्रयोवा औशनसामांगिरसगौतमौशनसेतित्रयः कारेणुपालानांमांगिरसगौ
तमकारेणुपालेतित्रयः राहूगणानामांगिरसराहूगणगौतमेति सोमराजकाना
मांगिरससोमराजकगौतमेति वामदेवानामांगिरसवामदेव्यगौतमेति बृहदुक्था
नामांगिरसबार्हदुक्थ्यगौतमेति आंगिरसवामदेवबार्हदुक्थेतिच उतथ्यानामां
गिरसौतथ्यगौतमेति राघुवानामांगिरसराघुवगौतमेति एतेषांद्वौकचित् एषांस
र्वेषांगौतमानामविवाहः अथभरद्वाजः तेचत्वारः भरद्वाजाः गर्गाऋक्षाःकपयइति
भरद्वाजानामांगिरसबार्हस्पत्यभारद्वाजेतित्रयः गर्गाणामांगिरसबार्हस्पत्यभारद्वा
जसैन्यगार्ग्येतिपंच आंगिरससैन्यगार्ग्येतिवा अंत्ययोर्व्यत्ययोवा भारद्वाजगार्ग्यसै
न्येतिवा गर्गभेदानामांगिरसतैत्तिरिकापिभुवेति ऋक्षाणांकापिलानांचांगिरसबा
र्हस्पत्यभारद्वाजवांदनमात्तवचसेतिपंच आंगिरसवांदनमात्तवचसेतित्रयोवा क
पीनामांगिरसामहीयवौरक्षयसेति आत्मभुभुवामांगिरसभारद्वाजबार्हस्पत्यमंत्रव
रात्सभवेतिपंच अत्रंकचित् भारद्वाजानांसर्वेषामविवाहः अथकेवलांगिरसः
हरितानामांगिरसांबरीषयौवनाश्वेति आग्रेमांधातावा कुत्सानामांगिरसमां
धातृकौत्सेति काण्वानामांगिरसाजमीढकाण्वेति आंगिरसघोरकाण्वेति

राम
१८५

189A

रथीतराणामांगिरसवैरूपराथीतरेति आंगिरसवैरूपपार्षदश्वेति वा अष्टा
दंष्ट्रपार्षदश्ववैरूपेति वा अंत्ययोर्व्यत्ययो वा मुद्गलानामांगिरसभार्म्यश्वमौद्गल्ये
ति आद्यः तार्क्ष्यो वा आंगिरसतार्क्ष्यमौद्गल्येति वा विष्णुवृद्धानामांगिरसपौरुकु
त्सत्रासदस्यवेति एषां स्वगणं विहाय सर्वैर्विवाहो भवति हरितकुत्सयोस्तु न भव
ति अथात्रयः ते चत्वारः आत्रेया वाद्भुतकाः गविष्ठिरा मुद्गला इति अर्चनानामात्रेया
र्चनानसश्यावाश्वेति वाद्भुतकानामात्रेयार्चनानसवाद्भुतकेति धनंजयमात्रेयार्चना
नसधनंजयेति केचित् गविष्ठिराणामात्रेयार्चनानसगाविष्ठिरेति आत्रेयगावि
ष्ठिरपौर्वातिथ्येति वा मुद्गलानामात्रेयार्चनानसपौर्वातिथ्येति वामरथ्यसुमंगल
वैजवापानामात्रेयार्चनानातिथ्येति आत्रेयार्चनानसगाविष्ठिरेति च सुमंगला
नामत्रिसुमंगलश्यावाश्वेति केचित् अत्रेः पुत्रिकापुत्राणामात्रेयवामरथ्यपौ
त्रिकेति अत्रीणां सर्वेषामविवाहः अथ विश्वामित्राः ते दश कुशिको लोहिताः
रौक्षकाः कामकायना अजाः कता धनंजयाः अघमर्षणाः पूरणाः इंद्रकौशिका
इति कशाका इति कुशिकानां वैश्वामित्रदेवरातौदलेति लोहितानां विश्वामि
त्राष्टकलोहितेति अंत्ययोर्व्यत्ययो वा वैश्वामित्रमाधुछंदसाष्टकेति वा विश्वा
मित्राष्टकेति वा रौक्षकानां वैश्वामित्रगाथिनरैवणेति वैश्वामित्ररौक्षक

रैवणेतिवा कामकायनानांवैश्वामित्रमादसदेवतरसेति अजानांवैश्वामित्र
माधुछंदसाजेवैश्वामित्राश्मरथ्यवाधूलेतिवा अघमर्षणानांविश्वामित्राघ
मर्षणकौशिकेति पूरणानांविश्वामित्रपौरणेति द्वौवैश्वामित्रदेवरातपूरणेतिवा
इंद्रकौशिकानांविश्वामित्रेंद्रकौशिकेतिद्वौ धनंजयानांविश्वामित्र[illegible]लेति
माधुछंदसधानंजयेति वैश्वामित्रमाधुछंदसाघमर्षणेतिवा कतानांवैश्वामित्रकात्या
सीलेति एते वैश्वधायनोक्ताः राहिणानांवैश्वामित्रमाधुछंदसरौहिणेति रेणूनांवै
श्वामित्रगाथिनरैणवेति वेणूनांवैश्वामित्रीगाथिनवैणवेति जह्नूनांवैश्वामित्र
शालंकायनकौशिकेति आश्मरथ्यानांवैश्वामित्राश्मरथ्यवाधूलेति उदवेणूनां
वैश्वामित्रगाथिनवैणवेति एते आश्वलायनमात्स्योक्ताः अन्येत्वन्येपिबहूगणाउ
क्ताः तेन्वग्रमतोक्तास्तेयाः एषांविश्वामित्राणांमविवाहः अथकश्यपाः तेपंचनि
ध्रुवाः कश्यपाः शांडिला रैभ्याः लौगाक्षयश्च निध्रुवाणांकाश्यपावत्सारनैध्रुवेति
कश्यपानांकाश्यपावत्सारासितेति रैभ्याणांकाश्यपावत्साररैभ्येति शांडिलानां
काश्यपावत्सारशांडिल्येति अंत्यस्यानेदेवलोवाऽसितोवा शांडिल्यासितदेवलेतिवा
काश्यपासितदेवलेतिवा अंत्ययोर्व्यत्ययोवा देवलासितेतिद्वौवा लौगाक्षीन्व
स्याप्तः एषांकश्यपानांमविवाहः अथवसिष्ठाः तेपंचवशिष्ठाकुंडिनाउपम

190A

न्यवः पराशरा जातूकर्ण्याश्चेति वसिष्ठानां वासिष्ठेंद्रप्रमदाभरद्वस्विति वसिष्ठेत्ये
वा कौंडिन्यानां वासिष्ठमैत्रावरुणकौंडिन्येति उपमन्यूनां वासिष्ठेंद्रप्रमदाभरसच्चे
ति वासिष्ठाभरद्वस्विंद्रप्रमदेति वा आर्षेयो ऋषयो वा पाराशराणां वसिष्ठशाक्त्यपा
राशर्येति जातूकर्ण्यानां वसिष्ठात्रिजातूकर्ण्येति वासिष्ठानां सर्वेषां मविवाहः
अगस्त्यास्त्रिभिन्ना अथागस्त्याः ते चत्वारः इध्मवाहाः सोमवाहाः सांभवाहा यज्ञवा
हाश्चेति आध्मानामागस्त्यदार्ढ्यच्युतेध्मवाहेति आगस्त्येत्येको वा सोमवाहनामाग
स्त्यदार्ढ्यच्युतसोमवाहेति सांभवाहानां सांभवाहोन्त्यः यज्ञवाहानां यज्ञवाहोन्त्यः आद्यो
पूर्वोक्ताश्चैव सारवाहानां नंदनास्त्रयः दर्भवाहानां नंदनास्त्रयः अगस्तानामागस्त्य
माहेंद्रमायोभुवेति पूर्णमासानामागस्त्यपौर्णमासपारणेति हिमोदकानामागस्त्य
हैमवर्चिहैमोदकेति पाणिकानामागस्त्यपैनायकपाणिकेति एतेषु क्वचित् अग
स्तीनां सर्वेषामविवाहः अथ द्विगोत्राः शौंगशैशिरीणामांगिरसबार्हस्पत्यभारद्वाज
कात्याक्षीलेति पंच कात्याक्षीलयोः स्थाने शौंगशैशिरी वा आंगिरसकात्याक्षी
लेति त्र्यो वा एषां भरद्वाजैर्विश्वामित्रैश्चाविवाहः एवं कपिलानां कतानां च सं
वतिप्रतिमायादीनामांगिरसगौरिवीतसांकृत्येति एषां गौरिवीतसांकृत्येति वा
एषां स्वगणस्यैव वसिष्ठैः शौंगशैशिरैर्लौगाक्षिभिश्चाविवाहः कश्यपैरपीति प्रवरो

नि॰ सिं॰
१९१

१९१

ग

गपारिजाते लौगाक्षीणां काश्यपा वत्सारवासिष्ठेति काश्यपा वत्सारासितेतिवा
एतेऽहर्वसिष्ठा नक्तं काश्यपाः एषां वसिष्ठैः कश्यपैः संहत्याद्यैश्च विवाहः देवरात
स्य जामदग्न्यैर्विश्वामित्रैश्च विवाह इति प्रयोगपारिजाते तत्र युक्तं अयं यो यद्यैवांगि
रसस नयेयानवपुत्रतां आंगिरसोऽजन्यजागति अत कविः इत्यंगारोगणस्येत्वेन
भार्गवजामदग्न्यत्वे स्मृतेर्हरिवंशादिस्मृतेश्च विरोधात् तेन द्वौ देवरातौ एकांगि
रसः अन्यस्तु अन्यो भार्गवस्तयोः कल्पभेदेपि आंगिरसेन देवरातेनैव मदग्नेन भवत्ये
व विवाहः धनंजयानां विश्वामित्रैरत्रिभिश्च विवाहः जातूकर्ण्यानां वसिष्ठैरत्रिभिश्च
विवाहः एवं दत्तकक्रीतकृत्रिमस्वयंदत्तः पुत्रिकापुत्रादीनाम् उत्पादकपालकयोः
पितृगोत्रप्रवरा वर्ज्या इति प्रवरमंजरी नारायणवृत्ति प्रयोगपारिजातादयः अ
त्र सर्वत्रोपपत्तयः मूलं च मन्तव्यं तत्प्रवरदर्पणे ज्ञेयमिति दिक् क्षेत्रे वैश्ययोस्तु पुरोहित
गोत्रप्रवरा वेति सर्वसिद्धान्तः यद्यपि वह्वृचपरिशिष्टेपि भरद्वाजयोर्विवाहस्तु उक्तस्तथापि
भरद्वाजाश्च कपयो गर्गा रौक्षायणा इति चत्वारोपि भरद्वाजगोत्रे क्वचिन्नं कुमिथः क
पिगर्गभरद्वाजा मिथो रौक्षायणा द्विजाः नोद्वहेयुः सगोत्रत्वात् प्रवरे क्वचित् इ
ति स्मृत्यर्थसाराद्युक्तेरविवाह एव तयोरिति प्रवरमंजरी स्वगोत्रप्रज्ञानेन तु सत्या
षाढाः आपस्तम्बवैखानसबौधायनाः पुरोहितप्रवरेणाचार्यप्रवरेण चेति आचार्यगोत्राप्र

राम
१९१

191A

वरानभिज्ञस्तु द्विजस्स्वयं दत्वात्मानं तु कस्मैचित् तद्गोत्रप्रवरो भवेत् यद्वास्य गोत्रप्रवरावि
धुरो जमदग्निजः विवाहं च न तेनैव गोत्रेण तु समाचरेत् इति कश्चित् अथ मातृगोत्रनि
र्णयः शातातपः मातुलस्य सुतां मूढो मातृगोत्रां तथैव च समानप्रवरां चैव गत्वा चांद्रा
यणं चरेत् यद्यपि सगोत्रां मातुरप्येके नेच्छंत्युद्वाहकर्मणि जन्मनाम्नोरविज्ञाने तूद्व
हेदविशंकितः इति व्यासोक्तेरज्ञाननामत्वेन सगोत्रत्वदोषस्तथापीनेदं कलौ प्रवर्त्तते गो
त्रान्मातुः सपिंडाच्च विवाहो गोवधस्तथेति कलिवर्ज्येषूक्तेः इदं मातृगोत्रवर्जनं मा
ध्यंदिनीयानामेव मातृगोत्रं माध्यंदिनीयानामपुत्रायाश्चेति सत्याषाढोक्तेरिति कश्चित्
महाराष्ट्रकल्पितं तन्निर्मूलं अन्यथा गुर्जरादेः कातीयस्य कुतो निषेधः अतएवास्य प्रव
रमंजरीकारः दोषस्यातिगुरुत्वात् सर्वेषां मातृगोत्रं वर्ज्यमिति कन्यायाः प्रवर एकः व
रमातृगोत्रस्य भवति तदा भगिनी ज्ञेया इत्यर्थः यत्र तु एकस्मिन् प्रवरे तुल्ये मातृगोत्रे
वरस्य च तमुद्वाहं न कुर्वीत सा कन्या भगिनी स्मृतेति मातृकुले प्रवरचिंतनमुक्तं तदास्त
णादि विवाहोढापरामिति दिक् विस्तरस्तु ग्रंथांतरेभ्यो ज्ञेयः सगोत्रादिविवाहे प्रायश्चित्तं
स्मृत्यर्थसारे इयं सगोत्रसंबंधे विवाहविषये स्थिते यदि कश्चिदज्ञानतस्तां कन्यामसृष्टोप
गच्छति गुरुतल्पव्रतात् छेदं गर्भे सुतं ज्ञात्वा तां व्रजेत् भोगतस्तां परित्यज्य पालयेज्जननी
मिव अज्ञानादैदैवैः ऊर्ध्वे त्रिभिर्गर्भैस्तु कश्यपः एवं सापिंड्येपि सपिंडापत्यदारेषु

ण त्यागो विधीयते इति हरदत्तोक्तेः तिथितत्वे बौधायनः सपिंडां सगोत्रां चेदमत्योपय
छेन्मातृवदेनां बिभृयात् कन्याविवाहकाल उक्तो ज्योतिर्निबंधे षडब्दमध्ये नोद्वाह्या क
न्या वर्षद्वयं यतः सोमो भुंक्ते ततस्तद्वद्गंधर्वश्च तथानलः राजमार्तंडः अयुग्मे दुर्भगा ना
री युग्मे तु विधवा भवेत् तस्माद्गर्भान्विते युग्मे विवाहे सा पतिव्रता मासत्रयादूर्ध्वमयुग्म
वर्षे युग्मेपि मासत्रयमेव यावत् विवाहशुद्धिं प्रवदंति संतो वत्स्यादयः स्त्रीजनिजन्ममासा
त्पराशरमाधवीये तु जन्मतो गर्भाधानाद्वा पंचमाब्दात्परं शुभे कुमारीवरणं दानं मेखला
बंधनं तथेत्युक्तं संबंधतत्वे यमः कन्या द्वादशवर्षाणि याप्रदत्ता वसेद्गृहे ब्रह्महत्या पितुस्त
स्याः सा कन्या वरयेत्स्वयं भारते त्रिंशद्वर्षो षोडशाब्दां भार्यां विंदेत नग्निकां दशवर्षाष्टवर्षां वा
धर्मे सीदति सत्वरः अप्राप्ते प्रवृत्ते रजसि कन्यां दद्यात्पिता सकृत् तत्रैव सप्तसंवत्सरादूर्ध्वं वि
वाहः सार्ववर्णिकः कन्यायाः शस्यते राजन्नन्यथा धर्मगर्हितः रामार्तंडः राडुग्रस्ते तथा
युद्धे पितृणां प्राणसंशये अतिप्रौढा च या कन्या चंद्रलग्नबले [illegible] न तु मनुः त्रिंशद्वर्षो वहे
त्कन्यां हृद्यां द्वादशवार्षिकीं त्र्यष्टवर्षोष्टवर्षां वा धर्मे सीदति सत्वरः यद्यपि विवाहः
स्त्वष्टवर्षायाः कन्यायाः शस्यते बुधैः इति सवर्तोक्तेरनंतरं रजस्वलोत्पादेश्च दशवर्षादूर
र्ध्वं विवाहो निषिद्धस्तथापि दाराभावे द्वादशषोडशाब्दे ज्ञेये त्रीणि वर्षाण्यृतुमती कांक्षेत
पितृशासनमिति पराशरमाधवीये बौधायनोक्तेश्च मनुः स्त्रीसंबंधे दशैतानि कु

192A

त्नानि परिवर्जयेत् हीनाऽऽक्रियां किंपुरुषनिर्द्वंद्वो रोमशाऽऽर्शसकुक्षयाः मांगल्याः प
स्मारिश्छित्रकुलानि वा तथा नर्क्षवृक्षनदीनाम्नीं त्यपर्वतनासिकां न पक्ष्यहिप्रेष्यना
म्नीं न च भीषणनामिकां यमः तस्मादुद्वाहयेत् कन्यां यावन्नर्तुमती भवेत् तथास्थले
नदीनां फलं प्राग्गुरुक्तं तथा वर्णो वश्यग्रहमैत्र्यादिषट्कविचारो ज्योतिषि द्योतितः
वित्तारान्नुनोच्यते अथ गुर्वर्कबलं ज्योतिर्निबंधे गर्गः स्त्रीणां गुरुबलं श्रेष्ठं पु
रुषाणां रवेर्बलं तयोश्चंद्रबलं श्रेष्ठमिति गर्गेण भाषितं जन्मत्रिदशमारिस्थः प
जयाशुभदो गुरुः विवाहेऽथ चतुर्थाष्टदशास्थो मृतिप्रदः देवलः नष्टात्मजा धनवती वि
धवा कुलीना पुत्रान्विता हतधवा सुभगा च पुत्रा स्वामिप्रिया विगतपुत्रधवा धनाढ्या
वैधव्या भवेत्सुरगुरौ क्रमशोऽभिजन्म बृहस्पतिः वृषचापकुलीरस्थो जीवोऽप्यशुभगो
चरः अतिशोभनं तं दद्यात् विवाहोपनयादिषु लल्लः द्वादशदशमचतुर्थैजन्मनिषष्ठा
ष्टमे तृतीये च प्राप्ते पाणिग्रहे जीवे वैधव्यमाप्नोति गर्गः सर्वथापि शुभं दद्याद्द्वा
दशाब्दात्परं गुरुः पंचवर्षाद्वयोरेव शुभगोचरता मता सप्तमात्पंचवर्षेषु स्वोच्चस्वर्क्षग
तो यदि अशुभोऽपि शुभं दद्यात् शुभदः किं पुनः रजस्वलायाः कन्यायाः गुरुशुद्धिं
रविशुद्धिं च
न चिंतयेत् अष्टमेऽपि प्रकर्तव्यो विवाहस्त्रिगुणार्चनात् अर्कगुर्वोर्बलं गौर्या रोहिण्य
र्कबला स्मृता कन्या चंद्रबला प्रोक्ता हयली लग्नतोबला अष्टवर्षा भवेद्गौरी नव

नि॰ सिं॰
१९३

193

वर्षाचरोहिणी दशवर्षा भवेत्कन्या अतऊर्ध्वं रजस्वला अथ बृहस्पतिशांतिः १
शौनकः कन्यकोद्वाहकालेतु आनुकूल्यं न विद्यते ब्राह्मणस्योपनयने गुरोर्वि२
धिरुदाहृतः सुवर्णेन गुरुं कृत्वा पीतवस्त्रेण वेष्टयेत् ईशान्यां धवलं कुंभं धान्योपरि
निधाय च दमनं मधुपुष्पं च पलाशं चैव सर्षपान् मांसीगुडूच्यपामार्गीविडंगीशंखि
नीवचा सहदेवीहरिक्रांता सर्वौषधिशतावरी बलां च सहदेवी च निशाद्वितयमेव
च कृत्वा ज्यभागपर्यंतं स्वशाखोक्तविधानतः ग्रहोक्तमंडले भ्यर्च्य पीतपुष्पाक्षता
दिभिः देवपूजोत्तरे काले ततः कुंभानुमंत्रणं अस्यसमिध आज्यं पायसं सर्पिषा यु
तं यवव्रीहितिलाः साज्या मंत्रेणैव बृहस्पतेः अष्टोत्तरशतं सर्वं होमशेषं समापयेत् १
पुत्रदारसमेतस्य अभिषेकं समाचरेत् कुंभाभिमंत्रणेनैव समुद्रज्येष्ठमंत्रतः प्र
तिमां कुंभवस्त्रं च आचार्याय निवेदयेत् कुं[illegible]ब्राह्मणान्भोजयेत्पश्चाच्छुभ
दः स्यान्न संशयः इति बृहस्पतिशांतिः शौनकः गुर्वादित्ये मतीपाते वक्रातीचारगे
गुरौ नष्टे शशिनि शुक्रे वा बाले वृद्धे पवा गुरौ पौषे चैत्रे पवर्षा शु एरर्घ्यधिकमास
के केतुद्गमे निरंशे अर्के सिंहस्थे मरसंक्रमणे विवाहव्रतयात्रादिपुरहर्म्यगृहादिकं सौ
रं विद्योपविधां च यत्नतः परिवर्जयेत् मदनपरिजाते ज्योतिःसागरे बालेऽस्तगे नष्टे शु
क्रे वृद्धे जीवे नष्टे जीवे बाले जीवे सिंहे जीवे सिंहे आदित्ये जीवादित्ये नयामलिम्लुचे

राम
१९३

मासि स्तरार्चैर्यतिचारगे वापीकूपविवाहादिक्रियाः प्रागुदितास्त्यजेत । सिंहस्थं मकर
स्थं च गुरुं यत्नेन वर्जयेत् लल्लः अतीचारगतो जीव स्तं राशिं नैति चेत्पुनः लुप्तः संवत्स ।
रो ज्ञेयः सर्वकर्मबहिष्कृतः । सिंहस्थगुरोरपवादमाह पराशरः गोदा भागीरथीमध्ये
नोद्वाहः सिंहगे गुरौ मघास्थे सर्वदेशेषु तथा मीनगते रवौ वासिष्ठोपि । विवाहो दक्षि
णे कूले गौतम्या नेतरत्र तु भागीरथ्युत्तरे कूले गौतम्या दक्षिणे तथा विवाहो व्रतबं
धश्च सिंहस्थे येन दुष्यति कन्यादातृक्रममाह याज्ञवल्क्यः पिता पितामहो भ्राता स
कुल्यो जननी तथा कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परः अप्रयच्छन्समाप्नोति भ्रूणहत्या
मृतावृतौ गम्यं त्वभावे दातॄणां कन्या कुर्यात्स्वयंवरं भ्रातॄणां संस्कृतानामेवाधिका
रमाह याज्ञवल्क्यः असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैः भगिन्यश्च निजा ।
सं ६ देशाद्दत्त्वांशं तु तुरीयकं अत्र च कारेण पूर्वैः स्वैरित्यस्यानुवृत्तेर्विवाहपर्याप्तद्रव्यदाने ।
च संस्कृतग्रहणं व्यर्थं स्यात् अतः कर्तृनियमोयं तेनानुपनीतभ्रातृमात्रादिसत्त्वे मात्रादेरे ।
वाधिकारो न भ्रातुरित्युक्तं संबंधतत्त्वादौ कन्यास्वयंवरे मातृदातृत्वे च ताभ्यामेव नांदी
श्राद्धं कार्यं तत्र च स्वयं प्रधानसंकल्पमात्रं कृत्वाऽन्यद्ब्राह्मणद्वारा कारयेदिति प्रयोगपारिजा
ते वस्तुसंस्कृतभ्रात्राद्यभावे स्वयमेव नांदीश्राद्धं कुर्यान्नमाता पुत्रेषु विद्यमानेषु नान्यं
वै कारयेत्स्वधामिति निषेधाऽनुपनयनेन कर्माधिकारस्यज्ञातत्वाच्चेति पृथ्वीचंद्रोदयः माध

नि॰ सिं॰
१९४

194

तीये परार्के च नारदः पिता दद्यात्स्वयं कन्यां भ्राता वानुमते पितुः मातामहो मातुलश्च
सकुल्यो बांधवस्तथा माता त्वभावे सर्वेषां प्रकृतौ यदि वर्तते तस्यामप्रकृतिस्थायां कन्यां
दद्युः स्वजातयः सकुल्यो पितृपक्षीयः बांधवो मातृवंश्यः मदनपारिजाते कात्यायनः
स्वयमेवौरसीं दद्यात्पित्रभावे स्वबांधवाः मातामहस्ततोन्यां हि माता चाधर्मजां सुतां ततो
न्यामौरसीभिन्नां धर्मजां नियोगात् क्षेत्रजां मातामहो माता मातुलो वा दद्यात् तेनौरसी
दाने पितृबंधुष्वसत्सु मातामहादीनां नाधिकारः अस्यापवादस्तत्रैव दीर्घप्रवासयुक्ते
षु रोगे दुःखेषु च बंधुषु माता तु समये दद्यादौरसीमपि कन्यकां मनुः यदा तु नैव कश्चि
त्स्यात्कन्या राजानमाव्रजेत् परकीयकन्यादाने विशेषो मदनरत्ने स्कांदे आसीनस्य म
त्व स्ववर्णेन न परकीयां तु कन्यकां धर्मेण विधिना दानं सगोत्रेपि युज्यते अत्र प्रकृ
तिस्थग्रहणादप्रकृतस्थदत्तमकृतमेव स्वयं त्रो यदि तत्कार्यं कुर्यादप्रकृतिं गतः तदप्यकृतमेव
स्यादस्वातंत्र्यस्य हेतुत इत्यपरार्के नारदोक्तेः यादत्तु सप्तपदी विवाहे होमादिप्रधाने
जातं तदंगवैकल्येपि नाहतिर्विवाहस्य गौडा अप्येवमाहुः तत्रैव मरीचिः गौरीं दद
न्नाकपृष्ठं वैकुंठं रोहिणीं ददत् कन्यां ददद्ब्रह्मलोकं रौरवं तु रजस्वलां अथ मासनि
र्णयः तत्र जन्ममासे निषेधः प्रागुक्तः ज्योतिःप्रकाशे व्यासः माघफाल्गुनवैशाखे
यद्वा मार्गशीर्षके ज्येष्ठे वाषाढमासे च शुभगा वित्तसंयुक्ता श्रावणे वा पौषे

राम
१९४

194A

च कन्या भाद्रपदे तथा चैत्राश्वयुक्कार्त्तिकेषु याति वैधव्यतां लघु नारदः माघफा
ल्गुनवैशाखज्येष्ठमासाः शुभावहाः कार्त्तिको मार्गशीर्षश्च मध्यमो निंदिताः परे व
सिष्ठः पौषेपि कुर्यान्मकरस्थितेर्के चैत्रे भवेन्मेषगते यदा स्यात् प्रशस्तमाषाढहांतं
विवाहं वदंति गर्गा मिथुनस्थितेर्के चंडेश्वरः मार्गे मासि तथा ज्येष्ठे क्षौरं परिणयं
व्रतं ज्येष्ठपुत्रदुहित्रोश्च यत्नेन परिवर्जयेत् कृत्तिकास्थं रविं त्यक्त्वा ज्येष्ठपुत्रस्य ।
कारयेत् रत्नकोशे जन्मर्क्षे जन्मदिवसे जन्ममासे शुभं त्यजेत् ज्येष्ठमास्याद्यगर्भे
स्य शुभं वर्ज्यं स्त्रियाश्चापि पराशरः अज्येष्ठा कन्यका यत्र ज्येष्ठपुत्रो वरो यदि व्यत्ययो ।
वा तयोस्तत्र ज्येष्ठो मासः शुभप्रदा मिहिरः ज्येष्ठस्य ज्येष्ठकन्याया विवाहो न प्रशस्यते ।
तयोरन्यतरे ज्येष्ठे ज्येष्ठो मासः प्रशस्यते द्वौ ज्येष्ठौ मध्यमौ प्रोक्तावेकज्येष्ठं सुखाव
हं ज्येष्ठत्रयं न कुर्वीत विवाहे सर्वसंमतं यत्तु सर्वकालमेके विवाहमिति तदासुरादिवि
वाहविषये धर्म्यविवाहेषु कालपरीक्षणान्नाधर्म्येष्विति गदाधरपरिशिष्टात् रत्नमा
लायामसत्येवं अथदशदोषाः व्यहतोत्रये वेधश्च लत्ता च तथैव पातः खार्जूरवेधौद
शायोगचक्रं युतिश्च जामित्रमुपग्रहश्च वाणाख्यवर्ज्जौ च दशैव दोषाः एषां लक्षणं ज्यो
तिषे ज्ञेयं अतीचारगे गुरौ तु वसिष्ठः अतीचारगते जीवे वर्जयेत्तदनंतरं विवाहादि
शुभकार्येषु अष्टाविंशतिवासरान् रत्नमालायां एकपंचनवयुग्मषड्दशत्रीणिसप्त

चतुरष्टरष्टरष्टलाभदः द्वादशाजहृष्टभादिराशितो घातचंद्र इति कीर्तितो बुधैः ना
रदः भवाग्ग्नानंदहस्ताम्बरसाद्दिग्वह्निशैलजाः वेदावसुशिवादित्या घातचंद्रो यथाक्र
मं यात्रायां युद्धकार्येषु घातचंद्रं विवर्जयेत् विवाहे सर्वमांगल्ये चौलादौ व्रतबंध
ते घातचंद्रो नैव चिंत्य इति पाराशरोऽब्रवीत् ज्योतिर्निबंधे विवाहचौलव्रतबंधने
षु पट्टभिषेके च तथैव राज्ञां सीमंतयात्रासु तथैव जाते नो चिंतनीयः खलु घात
चंद्रः नारदः अकालजा भवेस्त्रद्विद्युन्नीहारस्वनः प्रत्यर्कपरिवेषेंद्रचापाभ्रध्व
नयो यदि दोषाय मंगले न्यूनमदोषायैव कालजाः अकालवृष्टिस्वरूपमाह लल्लः
पौषादिचतुरो मासाः प्रोक्ता वृष्टिरकालजेति सार्ङ्गधरः निर्घाते क्षितिचलने ग्रहयुद्धे
राहुदर्शने चैव आपंचदिनात्कन्यापरिणीता नाशमुपयाति उल्कापातेंद्रचापप्रबलघ
नरजोधूमनिर्घातविद्युद्वृष्टिप्रत्यर्कदोषादिसकलबुधैस्त्याज्यमेवैकरात्रं दुःस्वप्नेदु
र्निमित्येप्यशुभफलदशादुर्मतो भ्रांतबुद्धौ चौले मौंजीनिबंधे परिणयनविधौ सर्वदा सा
ज्यमेव ज्योतिःप्रकाशे अर्वाकू षोडशनाड्यः संक्रांतेः पुण्यदाः परतः उपनयनव्रतया
त्रापरिणयनादौ विवर्ज्यास्ताः गर्गः दिग्दाहे दिनमेकं च ग्रहे सप्तदिनानि तु भूकंपे
च समं त्यक्त्वा त्र्यहमेव तु वर्जयेत् उल्कापाते त्रिदिवसं धूमे पंचदिनानि च वज्रपा
ते चैवाह्नं वर्जयेत्सर्वकर्मसु दर्शनादर्शनाद्राहुकेत्वोः सप्तदिनं त्यजेत् यावत्के

195A

लग्नमस्तावदष्टमः सप्तयोगो भवेत् अस्यापवादो ज्योतिःसागरे अष्टादिवसत्रयम
ध्ये मृत्युदानीयं यदा भवति उत्पातदोषशमनं तद्दैवज्ञं प्राचार्याः संवेधतत्त्वे मृ
त्यौ इने दोषोऽस्ति हन्ति ब्राह्मे चैतत्ते सति अथापरिहार्थं कन्यायां वैधव्ययोगे विशे
ष उच्यते मार्कंडेयपुराणे बालवैधव्ययोगेन कुंभद्रुप्रतिमादिभिः कृत्वा लग्नं ततः
पश्चात्कन्योद्वाह्येति चापरे तत्र पुनर्भूदोषाभावउक्तो विधानखंडे स्वर्णांबुपिप्प
लानां च प्रतिमा विष्णुरूपिणी तया सह विवाहे तु पुनर्भूत्वं न जायते सूर्यारुण
संवादे विवाहात्पूर्वकाले च चंद्रताराबलान्विते विवाहोक्ते च मंडपे कुंभेन सह चो
द्वहेत् सूत्रेण वेष्टयेत्पश्चाद्दशतंतु विधानतः कुंकुमालंकृते देहे तयोरेकांतमंदिरे तु
तः कुंभं वनिः सार्धप्रमज्य सलिलाशये ततोऽभिषेचनं कुर्यात्पंचपल्लववारिभिः कुं
भप्रार्थनात्तत्रैव वरुणांगस्वरूपाय जीवनानां समाश्रय पतिं जीवय कन्यायाश्चिरं
पुत्रसुखं कुरु देहि विष्णुवरान् देव कन्यापालनरपदः स्वतः ततो लंकारवस्त्राभ्यां
वराय प्रतिपादयेत् इति कुंभविवाहः मूर्तिदानमपि तत्रैवोक्तं ब्राह्मणेन साधुमा
नं संपूज्य विधिवद्धारहेतोः तस्मै दद्याद्विधानेन विष्णोर्मूर्तिं चतुर्भुजां शुद्धवर्णेन सु
वर्णेन वित्तशाठ्याय वा पुनः निर्मितां रुचिरां शंखगदाचक्राब्जसंयुतां दद्यात्तां वा
सप्तसीकमुदोत्पलमालिनीं सदक्षिणां च तां दद्यान्मंत्रमेनमुदीरयेत् यन्मया प्राचि

जनुविघ्नंत्यापत्तिसमागमं विघ्नोपविघ्नशान्त्यर्थंदत्तोवाचिरन्तया प्राप्यमानंमहा
घोरंयशः सौख्यधनापहं वैधव्याद्यत्तिदुःखौघनाशायसुखलब्धयेवद्धसौभाग्य
लब्धोचमहाविष्णोरिमांतत्रं सौवर्णीं निर्मितां शक्त्याताभ्यांसंप्रददेद्विज स्त्रन
छायाहमस्मीतित्रिवारंप्रजपेदिति एवमाश्विनितस्यौकसः गृहीत्वास्वगृहंविशेत्
ततोवैवाहिकंकुर्याद्दिधिषिदाता स्मृतीहश अन्येप्यश्वत्थविवाहं वृक्षसिंचनादयस्त
त्रैवज्ञेयाः विस्तारभयान्नोच्यंते अथप्रतिकूलादि ज्योतिर्निबंधे गर्गः कृतेतुनि
श्चयेयपश्चात्मृत्युर्भवतिकस्यचित् तदानमंगलंकुर्यात्कृतेवैधव्यमाप्नुयात् ज्यो
तिर्मेधातिथिः वधूवरार्थंघटितेसन्निश्चिते वरस्यगेहेप्यथकन्यकायाः मृत्युर्य
दिस्यान्मनुजस्यकस्यचित्तदानकार्यंखलुमंगलंबुधैः मंगलंविवाहः स्मृति
चंद्रिकायां कृतेवाङ्निश्चयेपश्चात्मृत्युर्गच्छेत्स्वगोत्रिणः तदानमंगलंकार्यंनो
रीवैधव्यदंध्रुवं भृगुः वाग्दानानंतरंयत्रकुलयोः कस्यचित्मृतिः तदोद्वाहोनैवका
र्यः स्ववंशक्षयदोयतः शौनकः वरवध्वोः पितामातापितृव्यश्चसहोदरः एतेषांप्र
तिकूलंचमहाविघ्नप्रदंभवेत् पितापितामहश्चैवमाताचैवपितामही पितृव्यस्त्रीसु
तोभ्राताभगनीयाविवाहिता एभिरत्रविपन्नैश्चप्रतिकूलंबुधैःस्मृतं अन्यैरपिवि
पन्नेसत्सु केचिद्दूचुर्नतद्भवेत् मांडव्यः वाग्दानानंतरंमातापिताभ्राताविपद्यते

196A

विवाहो नैव कर्तव्यः स्ववंशहितमिच्छता ॥ संकटे तु मेधातिथिः वाग्दानानंत
रं यत्र कुलयोः कस्यचिन्म्रियते तदा संवत्सरादूर्ध्वं विवाहः शुभदो भवेत् स्थ
तिरुक्तवत्स्यां पितुरब्दमशौचं स्यात्तदर्द्धं मातुरेव मासत्रयं तु भार्यायास्तदर्धं भ्रातृपु
त्रयोः अन्येषां तु सपिंडानां मासाशौचं मासमीरितं तदंते शांतिकं कृत्वा ततो लग्नं वि(
धीयते ज्योतिःप्रकाशे प्रतिकूलेपि कर्तव्यो विवाहो मासतः परं शांतिं विधाय
गां दत्वा वाग्दानादि चरेत्पुनः शांतिं विनायके शांतिं तथा च मेधातिथिः संकटेस
मनुप्राप्ते याज्ञवल्क्येन योगिना शांतिरुक्ता गणेशस्य कृत्वा तां शुभमाचरेदिति प्रतिकू
लेन कर्तव्यो गद्धपावहत्त्रयं प्रतिकूलेपि कर्तव्यमित्याहुर्वृद्धविष्णवे प्रतिकूले सपि
इस्य मासमेकं विवर्जयेत् ज्योतिःसारे दुर्भिक्षे राष्ट्रभंगे च पित्रोर्वा प्राणसंशये प्रौढा
यामपि कन्यायां नानुकूल्यं प्रतीक्ष्यते मेधातिथिः पुरुषत्रयपर्यंतं प्रतिकूलं स्वगो
त्रिणां प्रवेशान्निर्गमस्तद्वत्तथा मुंडनमंडने प्रेतकर्माण्यनिर्वर्त्य चरेन्नाभ्युदयक्रि
यां आचतुर्थात्ततः पुंसि पंचमे शुभदं भवेत् अपरजोदोषे निर्णयः माधवीये (
प्रारंभात् प्राग्विवाहस्य माता यदि रजस्वला निवृत्तिस्तस्य कर्तव्या सहात्वस्मृतिचो
दनात् प्रारंभान्नांदीश्राद्धात् नांदीश्राद्धं विवाहादावित्यादिना तस्यैव प्रारंभोक्तेः
मेधातिथिः चौले च व्रतबंधे च विवाहे यज्ञकर्मणि भार्या रजस्वला यस्य

प्राप्तस्त्वस्य न रोधनं वध्वरान्यतमयोर्जननी चेद्रजस्वला तस्याः शुद्धेः परं कार्यं मां
गल्यं मनुरब्रवीत् वृद्धमनुः विवाहव्रतचूडासु माता यदि रजस्वला तदा न मंगलं
कार्यं शुद्धौ कार्यं शुभेप्सुभिः गर्गः यस्योद्वाहादि मांगल्ये माता यदि रजस्वला तदा
न तत्प्रकर्तव्यमायुःक्षयकरं यतः नांदीश्राद्धोत्तरं रजोदोषे तु कपर्दिकारिकासु स्मृति
कौदक्ययोः शुध्यै गां दद्याद्धोमपूर्वकं प्राप्ते कर्मणि शुद्धिः स्यादितरस्मिन्न शुध्य
ति अलाभे सुमुहूर्तस्य रजोदोषे उपस्थिते श्रियं संपूज्य तत्कुर्यात्पाणिग्रहणमंग
हैमीं माषमितां पद्मां श्रीसूक्तविधिनार्चयेत् प्रत्यृचं पायसं हुत्वाभिषेकं समा
चरेदिति अथैकक्रियानिर्णयः ज्योतिर्निबंधे वृद्धमनुः एकमातृजयोरेकवत्स
रे पुत्रयोः स्त्रियोः न समानक्रियां कुर्यान्मातृभेदे विधीयते एतेन एकस्य पुंसो विवाहद्व
यमेकाह्नि निषिद्धं मातृभेदाभावात् नारदः पुत्रोद्वाहात्परं पुत्रीविवाहो न ऋतुत्र
ये न तयोर्व्रतमुद्वाहान्मंडनादपि मुंडनं वराहः विवाहस्त्वेकजातानां षण्मासा
भ्यंतरे यदि असंशयं त्रिभिर्वर्षैस्तत्रैका विधवा भवेत् मदनरत्ने वसिष्ठः न पुं
विवाहोर्ध्वमृतुत्रयेपि विवाहकार्यं दुहितुः प्रकुर्यात् न मंडनाच्चापि हि मुंडनं च
गोत्रैकतायां यदि नाब्दभेदः एकोदरभ्रातृविवाहकृत्यं स्वसुर्न पाणिग्रहणं वि
धेयं षण्मासमध्ये मुनयः समस्त च न मंडनं [illegible] मंडनतो कार्यं एतदपवाद

स्तत्रैवक्रतत्त्रयस्यमध्येचेदन्याब्दस्यप्रवेशनंतदाह्येकोदरस्यापिविवाहस्तत्प्रश।
स्यते सारावल्यां फाल्गुनेचैत्रमासेतुपुत्रोद्वाहोपनेभेदाब्दस्यकुर्वीतननुत्रयवि.
लंघने संहिताप्रदीपे ऊर्ध्वंविवाहात्तनयस्यनैवकार्योविवाहोदुहितुःसमार्द्धम्प्राप्यकन्या
प्रसरात्रयंचवधूवेश्यात्स्वगृहेनवाहो मदनरत्नेवसिष्ठः द्विशोभनंत्वेकगृहेपिनेष्टंप्र
न्तपश्चात्तुविभिर्दिनैस्तु आवश्यकंशोभनमुत्सवोवाद्वारेय्यवाचार्यविभेदतोवा एकोदर
प्रसूतानांभगिनीनांकार्यत्रयंभवेत् भिन्नोदरप्रसूतानांनेतिशातातपोब्रवीत् ज्योतिर्निबंधेकात्या
नः कलेऽजस्तत्रयादवीकु मुंडनाच्चतुमंडनं प्रवेशान्निर्गमोनेष्टोनकुर्यान्मंगलत्रयं कुर्वेतिम
नयः केचिदन्यस्मिन्वत्सरेलघु लघुवागुरुवाकार्यंपूर्वंनैमित्तिकंतुयत् पुत्रोद्वाहः प्र
वेशाख्यः कन्योद्वाहात्तुनिर्गमः मुंडनंचौलमित्युक्तं व्रतोद्वाहोत्तुमंगलं चौलंमुंड
नमेवोक्तंवर्जयेन्मुंडनात्परं मौंजीचोभयतःकार्याज्ञोमौंजीनमुंडनं अभिन्नेव
त्सरेपिस्यात्तदहस्तत्रभेदयेत् अभेदेतुविनाशःस्यान्नकुर्यादेकमंडपे संकटेतु
कपद्दिकारिकावराहमिहिरस्य उद्वाह्यपुत्रीनपिताविदध्यात्पुत्र्यंतरस्योद्वहनंक
दापि यावच्चतुर्थदिनमत्रपूर्वंसमाप्यचान्योद्वहनंविदध्यात् कश्यपः मौंजीवं
धस्तयोद्वाहः षण्मासाभ्यंतरेपिच पुत्रोद्वाहंतुकुर्वीत विभक्तानांनदोषकृत्।
ज्योतिर्निबंधे विवाहमारभ्यचतुर्थिमध्येश्राद्धंदिनंदर्शनंयदिस्यात् वेधममा

नि॰सिं॰
१९८

198

प्नोति तदाष्टकन्याजीवेत्पतिश्छेदनपत्यता स्यात् तथा विवाहमध्ये यदि चेत् ।
क्षयाहस्तत्र स्वधाकरवाः पितरो न यांति कृते विवाहे परतस्तु कुर्याच्छ्राद्धं स्वधा ।
भिर्न तु दूषयेत्तथैवाभ्युदयं दूषयंति स्वधाभिरिति स्मृतेः मासिकविषये हेमाद्रौ शा
ट्यायनिः प्रेतमासिकानि सर्वाणि सपिंडीकरणं तथा अपकृष्यापि कुर्वीत कर्तुं नांदी
मुखं द्विजः तद्वद्विनायकश्चैवमाह तत्रैव उशनाः वृद्धिश्राद्धविहीनस्तु प्रेतश्राद्धा
नि यश्चरेत् स श्राद्धी नरके घोरे पितृभिः सह मज्जतीति मेधातिथिः प्रेतकर्माण्यनि
वर्त्यं च चरेन्नाभ्युदयक्रियां आचतुर्थं ततः पुंसि पंचमे शुभदं भवेत् स्मृत्यंतरे सपिंडी
ता करणादर्वागपकृत्यापि पुनरप्यपकृष्यंते कृष्णुत्तरनिषेधनात् स्मृतिसारावल्यां
भ्रातृयुग्मे स्वसृयुग्मे भ्रातृस्वसृयुगे तथा एकस्मिन् मंडपे चैव न कुर्यान्मंडनद्वयं सोदर
विषयमेतत् यमः एकोदरप्रसूतानामेकस्मिन्वासरे पुनः विवाहं नैव कुर्वीत ।
मंडनोपरि मंडनं गार्ग्यः भ्रातृयुग्मे स्वसृयुग्मे भ्रातृयुग्मे तथा न कुर्यान्मंगलं किंचिदे
कस्मिन्मंडपेऽहनि एकस्मिन्वासरे प्राप्ते कुर्यात् यामलजातयोः क्षौरं चैव विवाहं च
मौंजीबंधनमेव च ज्योतिर्विवरणे एकोदरयोर्द्वयोरेकदिनोद्वाहने भवेन्नाशः नवांत
रे एकदिने केऽप्याहुः संकटे च शुभे जातं विवाहाच्छुभदो नरस्य नारीविवाहेन समस्त
त्रयं स्यात् नारीविवाहान्नदहेऽपि प्रशस्तं नरस्य पाणिग्रहमाहुराचार्याः भिन्नमातृजयो

राम
१९८

198A

स्त एकवासरे विवाहमाह मेधातिथिः पृथक्कुमारजयोः कार्यो विवाहस्त्वेकवासरे
[illegible]स्मिन्मंडपे कार्यं पृथग्वेदिकयोस्तथा पुष्पपट्टिकयोः कार्यं दर्शनं न शिरस्थयाः मे
[illegible]नीभ्यां सुभार्याभ्यां च यावत्सप्तपदी भवेत् यमयोस्तु विशेषः भट्टकारिकायां एक
स्मिन् वत्सरे चैव वासरे [illegible]मंडपे तथा कर्तव्यं मंगलं स्वसृभ्रात्रोर्यमलजातयोः ।
ज्योतिर्निबंधे नारदः प्रत्युद्वाहो नैव कार्यो नैकस्मै दुहितृद्वयं नैवैकजन्ययोः पुं
सोरेकजन्ये तु कन्यके तथा नैव कदाचिदुद्वाहो नैकदा मुंडनद्वयं नैकजन्ये तु कन्ये
द्वे पुत्रयोरेकजन्ययोः न पुत्रीद्वयमेकस्मै प्रदद्यात्तु कदाचनेति कन्यायारजोदर्शने तु
अपरार्के संवर्तः माता चैव पिता चैव ज्येष्ठभ्राता तथैव च त्रयस्ते नरकं यान्ति दृ
ष्ट्वा कन्यां रजस्वलां हारीतः पितृगेहे तु या कन्या रजः पश्यत्यसंस्कृता सा कन्या वृ
षली ज्ञेया तत्पतिर्वृषलीपतिः देवलात्रिकश्यपाः पूर्वोढैतदेव भ्रूणहत्या पितुस्त
स्याः सा कन्या वृषली स्मृता यस्तां समुद्वहेत्कन्यां ब्राह्मणो ज्ञानदुर्बलः अश्राद्धेय
मपांक्तेयं तं विद्याद्वृषलीपतिं माधवीये बौधायनः त्रीणि वर्षाण्यृतुमती कांक्षेत
पितृशासनं विष्णुः ऋतुत्रयमुपास्यैव कन्या कुर्यात्स्वयंवरं अगवरस्य दोषा
भावमाह यमः कन्या द्वादशवर्षाणि याप्रदत्ता वसेद्गृहे भ्रूणहत्या पितुस्तस्याः

नि.सिं.
१९९

199
दि

साकन्या वरयेत्स्वयं एवं चोपनतां पत्नीं नामन्येत् कदाचन ननु तां वधकी विघात्म
नुस्वायंभुवोऽब्रवीत् मनुः अलंकारं नाददीत पित्र दत्तं स्वयंवरे पितृदत्तं मातृदत्तं ते
यस्याद्यदि तं हरेत् वरं प्रत्याहृत्यापि तेन दद्याच्छुल्कं न कन्यामृतुमतीं हरन् स हि स्वाम्या
म्यादतिक्रमेदृतूनां प्रतिरोधनात् अत्र प्रायश्चित्तमुक्तं माश्वलायनेन कन्यामृतु
मतीं शुद्धां कृत्वा निःकृतिमात्मनः शुद्धिं च कारयित्वा तामुद्वहेदाश्वलायनस्सुधीः पिता अ
लंकृत्य पुत्र्यास्तु कन्यां ये दातितः सुधीः दानाविधिमहेयं त्वात्यालयेच्च रजोवती दद्या
त्तदहस्तुसंख्यापाः शास्त्रः कन्यापिता यदि दानं च्यैकापितिनिः स्वेन दानेन तस्या यथा
विधि दद्याद्ब्राह्मणायैव मतिनिश्चयः सदक्षिणं तस्यातीतं हि संख्येषु वराय प्रतिपादये
त् दुर्योग्यादिदिने कन्या रात्रावपीतागवाययः अहृष्टरजसे दद्यात्कन्यायै रत्नभूषणं
तामुद्वहन्वरश्चापि कूष्मांडैर्जुहुयात् द्विजाः इति मदनपारिजाते पत्रपर्श्वः विवाहे वि
तते तंत्रे होमकाल उपस्थिते कन्यामृतुमतीं दृष्ट्वा कथं कुर्वंति याज्ञिकाः स्नापयि
त्वा तु तां कन्यामर्चयित्वा यथाविधिः युंजानमाहुतिं कृत्वा ततस्तत्र प्रवर्तयेत् अत्रांगा
ध्वाध्य्वे विवाहास्त एव स्याचा करैतेषां संकटे पैशाचमासुमाधर्वीयेवस्त्रः सर्वो
पायैरसाध्या स्यान्तु कन्या पुरुषस्य या चौर्येणापि विवाहेन सा विवाह्या रहः।इतिगा

राम
१९९

1 99A

गांधर्वादिविवाहेष्वप्युदकपूर्वकं दानमाह तत्रैव यमः नोदकेन न वाचा वा कन्या याः पतिरुच्यते पाणिग्रहणसंस्कारात्पतित्वं सप्तमे पदे पाराशरमाधवीये दे वलोपि गांधर्वादिविवाहेषु पुनर्वैवाहिको विधिः कर्त्तव्यश्च त्रिभिर्वर्णैः सम येनाग्निसाक्षिकः तत्रैव परिशिष्टे गांधर्वासुरपैशाचा विवाहा राक्षसश्च यः पूर्वं परिश्रयस्तेषां पश्चाद्धोमो विधीयते अतो होमादावकृते भार्यात्वाभावाद्दात्रंतराय देयाः तथा च तत्रैव वसिष्ठबौधायनौ बलादपहृता कन्या मंत्रैर्यदि न संस्कृता अन्यस्मै विधिवद्देया यथा कन्या तथैव सेति मदनपारिजाते नारदः पाणिग्रहणिका मंत्रा नियतं दारलक्षणं तेषां निष्ठा च विज्ञेया विद्वद्भिः सप्तमे पदे स्मृतिचंद्रिकायां मयू रार्के चैवं आशौचे तु याज्ञवल्क्यः दाने विवाहे यज्ञे च संग्रामे देशविप्लवे आपद्यपि च कष्टायां सद्यः शौचं विधीयते केषामित्यपेक्षिते ब्रह्मपुराणेऽप्युक्तं दातुः प्रतिग्र हीतुश्च कन्यादाने च नो भवेत् । विवाहपिष्टो कन्यायाः लाजाहोमादिकर्मणि ति व्रतयज्ञविवाहेषु श्राद्धे होमार्चने जपे आरब्धे सूतकं न स्यादनारब्धे तु सूत कमिति विष्णुवचनाच्च आरंभस्तेनैवोक्तः प्रारंभो वरणं यज्ञे संकल्पो व्रतस त्रयोः नांदीमुखं विवाहादौ श्राद्धे पाकपरिक्रियेति वरणमिति मधुपर्कय

रं गृहीतमधुपर्कस्यायजमानाद्यऋत्विजः पश्चादशौचेतिपतिते न भवेदिति निश्चय
इति व्यासोक्तेः मधुपर्कात्पूर्वं तु भवत्येवाशौचमिति शुद्धिविवेकः रामांडभाष्ये
प्येवं नांदीमुखावधिप्रस्मृत्यंतरे एकविंशत्यहर्यज्ञे विवाहे दशवासराः त्रिषट्चौ
लोपनयने नांदीश्राद्धं विधीयते आरंभोवेपिलग्नंतातरामावेगयविष्णुः न देवप्र
तिष्ठाविवाहयोः पूर्वं संभृतयोरपीति अत्र प्रायश्चित्तमाह मदनपारिजाते विष्णुः
अनारब्धविशुद्ध्यर्थं कूष्मांडैर्जुहुयाद्घृतं गां दद्यात्पंचगव्याशी ततः सूतकी सं
गृहेपि संकटे समनुप्राप्ते सूतके समुपागते कूष्मांडीभिर्घृतं हुत्वा गां च दद्यात्पय
स्विनीं चूडोपनयनोद्वाहप्रतिष्ठादिकमाचरेत् यदेवसूतकप्रतिस्तदेवाभ्युदय।
क्रिया अन्नादिष्वविशेषः षट्त्रिंशन्मते विवाहोत्सवयज्ञेषु अंतरामृतसूत
के परैरन्नं प्रदातव्यं भोक्तव्यं च द्विजोत्तमैः परैरसगोत्रैः भुंजीतेष्वनुविप्रेष्वत्यंचेत।
रामृतसूतके अन्यगेहोदकाचांता सर्वे ते शुचयः स्मृताः एतदाशौचात्पूर्वं सम्प
त्वन्नतात्वविषयं तत्रैवशेषमन्नं त्याज्यमित्यर्थः पृथक्हात्तेनव्रतहस्पतिराह
विवाहोत्सवयज्ञेषु त्वंतरामृतसूतके पूर्वसंकल्पितान्नेषु दोषः परिकीर्ति
तइति धर्मार्थविराहकरणेफलमुक्तं महाभारते ज्ञात्वास्त्वचिन्नसामर्थ्यादे

200A

कं चोद्वाहयेद्द्विजं तेनाप्याप्नोति तत्स्थानं शिवभक्तो नरो ध्रुवं अपरार्के दक्षः मातृ
पितृविहीनं तु संस्कारोद्वहनादिभिः यः स्थापयति तस्येह पुण्यसंख्या न विद्यते ॥
मदनरत्ने भविष्ये विवाहादिक्रियासिद्धिकारणं यः प्रयच्छति धर्मज्ञः सोश्वमेध
फलं लभेत् कन्यागृहे भोजनं न वै यो पितृनैव च अप्रजायां तु कन्यायां न भुंजीत क
दाचन दौहित्रस्य मुखं दृष्ट्वा किमर्थमनुशोचति अपरार्के आदिपुराणे विहं तु
जामातरं मन्येत तस्य कोपं न कारयेत् अप्रजायां तु कन्यायां नाश्नीयात्तस्य वै गृ
हे दौहित्रदेयानं वै कन्यां दत्वा श्नीयात्कदाचन अश्य भुंजीत मोहाद्वै तत्र पापेन रौरवे
तृ तत्रैव कश्यपः अहतं यत्र निर्मुक्तं वासः प्रोक्तं स्वयंभुवा शास्त्रं तन्मौंगलिके
तावत्कालं न सर्वदा यत्र निर्मुक्तं नूतनं विवाहमध्ये स्त्रिया सह भोजने पि न दोषः
इत्याह हेमाद्रौ प्रायश्चित्तकाण्डे गालवः विवाहकाले यात्रायां पथि चौरसमाकुले
असहायो भवेद्विप्रस्तदा कार्यं द्विजन्यभिः एकयानसमारोह एकपात्रे च भोज
नं विवाहे पथि यात्रायां कृत्वा विप्रो न दोषभाक् अन्यथा दोषमाप्नोति पश्चाच्चान्द्रा
यणं चरेत् मिताक्षरायामप्येवं रत्नमालायां मूलमैत्रभ्रोहिणीकरैः मघोत्त
माहृतमघोत्तराचितैः भौमसौरिरविवारवर्जिते पाणिपीडनविधिर्विधीयते ॥
अंगानि छन्नमगादौ दानमुक्तं ज्योतिषे विषुतारे गुडं दद्यान्नि धने तिलकांचनं प्रत्य

रैलवं दद्यात्क्षांगं दद्याद्द्विजन्मसु चंडे च शंखं वलवलं चत्वारो तिथयो विरुद्धे त्वय
नं तुलाभ्यां धान्यं च दद्यात्करणे च वारे योगे विरुद्धे कनकं प्रदेयं विवाहे मंडपमा
ह वसिष्ठः षोडशारत्निकं कुर्याच्चतुर्द्वारोपशोभितं मंडपं तोरणैर्युक्तं तत्र वेदिं
प्रकल्पयेत् अष्टहस्तंतु रचयेन्मंडपं बाह्निपट्टकं दैवज्ञमनोहरे: चित्राविशाखा
शततारकाश्विनीज्येष्ठाभरण्योऽस्य भवाश्चतुष्टयं हित्वा प्रशस्तफलं तैलवेदिका
प्रदानकं कंडनमंडपादिकं हेमाद्रौ व्यासः कंडनदलनयवारकमंडपमृद्वेदिवर्णा
कायं खिलं तत्संबंधि गतागतमृक्षैर्वैवाहिके कुर्यात् यवारकं चैकसारः इति
प्रसिद्धं उद्वर्तनं वैवाहिके तु दिवसे शुभे वाप्यतिथौ शुभे चतुर्थिकं प्रकुर्वीत वि
धिदृष्टेन कर्मणा वेदीमाह नारदः हस्तोच्छ्रितां चतुर्हस्तैश्चतुरस्रां समंततः स्तंभैश्च
तुर्भिः सुश्लक्ष्णां वामभागे स्वसद्मनि समां तथा चतुर्दिक्षु सोपानैरुपशोभिता प्रागु
दक्प्रवणां रंभास्तंभहंसशुकादिभिः एवंविधामारुरुक्षेन्मिथुनं साग्निवेदिका
मिति सप्तर्षिमते मंगलेषु च सर्वेषु मंडपो गृहमानतः कार्यः षोडशहस्तो वा न्यू
नहस्तो दशावधिः स्तंभैश्चतुर्भिरेवात्र वेदी मध्ये प्रतिष्ठिता हस्तावध्याः सोपानं
पश्चिमतः उपरिभागे उक्तपरिमाणाद्द्विगुणं अपसदाहरणे ज्योतिर्निबंधे नारदः
कर्तव्यं मंगलेष्वादौ मंगलांकुरार्पणं नवमे सप्तमे वापि पंचमे दिवसेऽपि वा ।

201A

तृतीये बीजनक्षत्रे शुभवारे शुभोदये सम्यग्गृहाण्यलंकृत्य वितानध्वजतो
रणैः सह वादित्रनृत्याद्यैर्गत्वा प्रागुत्तरां दिशं तत्र मृत्सिकता श्लक्ष्णां गृहीत्वा शु
न रणतः मृन्मयेषु यवा वैणवेषु पात्रेषु योजयेत् अनेकबीजसंयुक्तां तोयपुष्पो
पशोभिता शौनकः आधानं गर्भसंस्कारं जातकर्म च नाम च हित्वान्यत्र विधात
व्यं मंगले कुरवापनं बृहस्पतिः आत्यंतिकेषु कार्येषु कार्ये सद्योंकुरार्पणं अ
त्रैव वाग्दानं हरिद्रावंदनं च कार्यं ज्योतिःप्रकाशे चतुर्थो मंडपः षष्ठः सप्तमः पंच
मस्तथा नवमैकादशाष्टौ वा तृतीयके विवाहभे रवौदये वा कन्यावरणमाच
रेत् वरस्यापि वरणमाह चंडेश्वरः उपवीतं फलं पुष्पं वासांसि विविधानि च देयं
वराय वरणे कन्याभ्रात्रा द्विजेन वेति वाग्दानानंतरं वरमरणे पराके स्मृतिचंद्रिकायां
च वशिष्ठः अद्भिर्वाचा च दत्तायां म्रियेतोर्ध्वं वरो यदि न च मंत्रोपनीता स्यात् कुमा
री पितुरेव सा यत्तु नारदः उद्वाहितापि सा कन्या न चेत्संप्राप्तमैथुना पुनः संस्कार
मर्हेत यथा तथैव सेति यच्च कात्यायनः वरो जघन्यजातीयः पतितः क्लीब एव वा
विकर्मस्थः सगोत्रो वा दासो दीर्घामयोऽपि वा ऊढापि देया सान्यस्मै सप्रावरणभू
षणेति इदं कलौ निषिद्धं देवरेण सुतोत्पत्तिर्दत्ता कन्या न दीयते इत्यादित्यपुराणे

कलौनिषेधात् दत्ताशब्दऊढापरः।ऊढायाःपुनरुद्वाहमितिहेमाद्र्युक्तेः देशांतरगम
नेतुकात्यायनः वरयित्वातुयःकश्चित्प्रणश्येत्पुरुषोयदा ऋत्वागमांस्त्रीनतीत्यकन्या
न्यंवरयेद्वरं अपरार्केनारदोपि प्रतिगृह्यतुयःकन्यांवरोदेशांतरंव्रजेत् त्रीनृतून्ससम
तिक्रम्यकन्यान्यंवरयेद्वरं शुल्कदानेतुमनुवसिष्ठौ कन्यायांदत्तशुल्कायांम्रियेतयदिशुल्कर
दः देवरायप्रदातव्यायदिकन्यानुमन्यते चंद्रिकायां कात्यायनः प्रदायशुल्कंसंगच्छेद्यःकन्या
यास्त्रीधनंतथा धार्यासावर्षमेकंतुदेयान्यस्मैविधानतः अनेकेभ्योहिदत्तायामनूढा
यांतुतत्रैव सर्वागतश्चसर्वेषांलभेताधवरस्ततो यश्चाहरेणदत्तंतस्याप्रतिलभेनसः अ
थागच्छेत्त्वोढायांदत्तंसर्वंवरोहरेत् याज्ञवल्क्यः दत्तामपिहरेत्पूर्वाच्छ्रेयांश्चेद्वर आव्र
जेत् पूर्वस्यदोषसत्वेइदमितिविज्ञानेश्वरः संबंधतत्वेवसिष्ठः कुलशीलविहीनस्य
पंढादिपतितस्यच अपस्मारिविधर्मस्यरोगिणांवेषधारिणां दत्तामपिहरेत्कन्यां
सगोत्रोढांतथैवच मनुः षंढांधबधिरादीनांविवाहोस्तियथोचितं विवाहासंभवेतेषां
कनिष्ठोविवाहेतदा पितृव्यपुत्रेसापत्न्येपरदारसुतेषुच विवाहाधानयज्ञादौपरिवे
दोनदूषणं अन्यद्ग्रंथविस्तरभीतेर्नोच्यतेइतिदिक् अथनांदीश्राद्धेविशेषंतदाधिका
रिविशेषंचाग्रेवक्ष्यामः इदंचाद्यविवाहेपिताकुर्यात् द्वितीयादौवरएवनांदीश्राद्धंपि
ताकुर्यादाद्येपाणिग्रहेपुनः अतऊर्ध्वंप्रकुर्वीतस्वयमेवतुनांदिकामितिस्मृतेः त्रिकां
डमंडनोपि पित्रोस्तुजीवतोःकुर्यात्पुनःपाणिग्रहेयदा पितृनांदीमुखंश्राद्धंनोक्तंत

202A

स्यामनीविमिरिति रेणुकायनमाह नारदः षडंगुलमितोत्सेधं द्वादशांगुलमायतं कु
र्यात्पात्रं तालवत्ताम्रपात्रं तद्दशभिः पलैः ताम्रपात्रे जलैः पूर्णे मज्जत्पात्रे व्यपवाश्रमे मंडला
र्धोदयं वीक्ष्य रवेस्तत्र विनिक्षिपेत् तत्र मंत्रः मुख्यं त्वमसि यंत्राणां ब्रह्मणा निर्मितं
पुरा भावाभावाय दंपत्योः कालसाधनकारणमिति वरस्य मधुपर्कमाह याज्ञव
ल्क्यः प्रतिसंवत्सरं त्वर्घ्याः स्नातकाचार्यपार्थिवाः प्रियो विवाह्यश्च तथा यज्ञे प्रत्यृत्वि
जः पुनः अत्र विशेषो गृह्यपरिशिष्टे वरस्य पाभवेच्छाखा तच्छाखागृह्यचोदितः म
धुपर्कः प्रदातव्योऽन्यशाखेऽपि दातरि अत्र वरदातृशब्दौ कन्यात्विगाद्युपलक्षणं तदा
हुः अध्वर्युशाखया मधुपर्क इति अर्च्यस्य पच्छाखीयं कर्मतच्छाखया मधुपर्क इति
याज्ञिकाः अयं तत्र वरणाद्वस्त्रं स्वयजमानशाखयैव मधुपर्क इत्याह तत्तु नाद्रियंते ह्यज्ञाः
अत्रं पचाराततभवेद्दृष्टा तदर्धेनतु विष्टर इत्यादि गृह्यपरिशिष्टोदेर्विष्टरादिलक्षणं म र
धुपर्कादिविधिश्च स्वगृह्याद्ज्ञेयः कन्यादाने प्रपितामह पूर्वं कृतेस्तुकेस्म तर्थसारे नांदीमु
खे विवाहे च प्रपितामहपूर्वकं नाम सकान्ते येद्दानन्यत्र पितृपूर्वकं नांदीमुखे वि
इति बह्वृचाद्यतिरिक्तविषयं गृह्यपरिशिष्टे पित्राद्यानुलोम्यान्नानातु आसः मुक्तासन्तु
हृदेत्कन्यांसा विक्रीतगृहणं तया उपोषितः स्तुतां दद्याद् र्चितायाद्विजायतु भुक्तेति मधु
पर्के वैधव्यभोजनपरं गृह्यपरिशिष्टे कन्यां वरयमाणानामधर्मोऽविधीयते प्रत्यङ्—

मुखावरयंतिप्रतीच्यमुखः इति प्राङ्मुखाः मदनरत्ने अप्यसंगः वरगोत्रसमुच्चार्यप्रपिताम
हपूर्वकं नामसंकीर्तयेद्विद्वान् कन्यायाश्चैवमेवहि तिष्ठन्पूर्वमुखो दाता वरः प्रत्यङ्
मुखो भवेत् मधुपर्कार्चितायैनां तस्मै दद्यात्सदक्षिणां उदपात्रं ततो गृह्य मंत्रेणानेन
दापयेत् गौरीं कन्यामिमां विप्र यथाशक्ति विभूषितां गोत्राय शर्मणे तुभ्यं दत्तां विप्र समा
श्रय भूमिं गां चैव दासीं च वासांसि च स्वशक्तितः महिषीं वाजिनं चैव दद्यात्स्वर्णम
णीनपि सः ततः स्वगृह्यविधिना होमाद्यं कर्म कारयेत् यथाचारं विधेयानि मंगल्यकार
णकानि च एतत्कन्यादाने त्रिः कार्यमिति शौनकः गृहप्रवेशनीयहोमे विशेषमाह आश्व
लायनः अर्द्धरात्रे व्यतीपाते तु परेद्युः प्रातरेव हि गृहप्रवेशनीयः स्यादिति यज्ञविदो विदुः
इति औपासनहोमे विशेषमाह शौनकः यदि रात्रौ विवाहाग्निरुत्पन्नः स्यात्तथा सति उ
पक्रम्योत्तरस्याह्नः सायं परिचरेदमुं यदि रात्रौ नवनाडीमध्येऽग्निरुत्पत्तिस्तदा तद्देवहोमारंभः
तदुत्तरं चेत्परदिने सायमारंभ इति सुदर्शनभाष्ये उक्तं अथ देवकोत्थापनं समेव दिवसे
कुर्यात् देवकोत्थापनं बुधः षष्ठे च विषमे नेष्टं मुक्त्वा पंचमसप्तमौ निर्णयदीपे गार्ग्यः
नांदीश्राद्धे कृते पश्चाद्यावन्मातृविसर्जनं दर्शश्राद्धं क्षयश्राद्धं स्नानं शीतोदकेन च अप
सव्यं स्वधाकारं नित्यश्राद्धं तथैव च ब्रह्मयज्ञं चाध्ययनं नदीसीमातिलंघनं उपवास
व्रतं चैव श्राद्धभोजनमेव च नैव कुर्युः सपिंडाश्च मंडपोद्वासनावधिः बृहस्पतिः तीर्थे

203A

विवाहे यात्रायां संग्रामे देशविप्लवे नगरग्रामदाहे च स्पृष्टास्पृष्टिर्न दुष्यति योग्यपात्रव
त्वचः न स्नायादुत्सवे तीर्थे मंगलं विनिवर्त्य च अलभ्यज्यस्तु हद्वंद्वं चैषित्वे इष्टदेवतां ८
ज्योतिषे स्नानं सचैलं तिलमिश्रकर्म प्रेतानुपानं वलशप्रदानं अपूर्वतीर्थामरदर्शनं
च विवर्जयेन्मंगलतोब्दमेकं मासषट्कं विवाहादौ व्रतप्रारंभणे न च जीर्णभांडादिनस्या
सं ज्यं गृहं मार्जनं तथा ऊर्ध्वं विवाहात् सुतस्य तथा च व्रतबंधनात् आत्मनो मुंडनं नैव वर्षं
वर्षार्द्धमेव च अभ्यंगो स्नानके चैव विवाहे सुतजन्मनि मांगल्येषु च सर्वेषु न धार्यं गो
पिचंदनं ज्योतिर्निबंधे उद्वाहात् प्रथमे शुचौ यदि वसेद्भर्तुर्गृहे कन्यका हन्यात् जननी
क्षये निजतनुं ज्येष्ठे पतिज्येष्ठकं पौषे च श्वसुरं पतिं च मलिने चैत्रे स्वपित्रालये तिष्ठति पि
तरं निहंति न भयं तेषामभावे भवेत् निबंधे विवाहात् प्रथमे पौषे आषाढे वाधिमासके
न सा भर्तृगृहे तिष्ठेच्चैत्रे पितृगृहे तथा हेमाद्रौ संवत्सरे विवाहव्रतचूडासु वर्षमर्द्धं तदर्द्ध
कं पिंडदानं मृदा स्नानं न कुर्यात्तिलतर्पणं अथ वधूप्रवेशः ज्योतिर्गर्गे मार्गशीर्षे त
था माघे माधवे ज्येष्ठसंज्ञके सुप्रशस्ते भवेद्देहे गृहप्रवेशो नववधूयोषितां नारदः आद्यो
द्वाहदिवसात् षष्ठे वाप्यष्टमे दिने वधूप्रवेशः संपत्त्यै दशमेऽप्यसमे दिने संग्रहे विवाहमा
रभ्य वधूप्रवेशो युग्मे तिथौ षोडशवासरांतरात् ऊर्ध्वं तु अब्दे युजि पंचमांतादतः परस्ता
न्नियमो न चास्ति नारदः समे वर्षे समे मासे यदि नारी गृहं व्रजेत् आयुष्यं हरते भर्तुः

सानामरणं व्रजेत् प्रयोगरत्नेतु वधूप्रवेशः प्रथमेतृतीयेशुभप्रदः पंचमेप्यथवा
ब्दे द्वितीयकेवाप्यचतुर्थेकेवाषष्ठेवियोगाय पष्ठेदुःखदः स्यादित्युक्तं तत्रमूलंचिं
त्यं वृद्धवसिष्ठोपि षष्ठाष्टमेदशमेदिनेवाविवाहमारभ्य वधूप्रवेशः पंचांगसं
शुद्धिंदिनंविनापिविधावसज्ञोवर्णोपिकार्यं लल्लः स्वभवनपुरप्रवेशोदेशानां
चिप्रवेतयोर्वाहे नववध्वागृहगमने प्रतिशुक्रविचारणानास्ति मांडव्यः नित्यया
नेगृहेजीर्णे प्राशनांतेषु सप्तसु वधूप्रवेशमांगल्येन मौढ्यं गुरुशुक्रयोः ज्योतिः
प्रकाशे वामेशुक्रे नवोढायाः सुखं हानिर्दक्षिणे धनं धान्यंच पृष्ठस्थे सर्वनाशः
पुरस्थिते नवोढायास्तत्रैव धर्म्ययद्युक्तं संमुखेभृगौ तदेव विवधे ज्ञेयं केवलं तु विरा
गमे सर्वतोभ्युदितेशुक्रेप्रयायाद्दक्षिणेपरे पश्चादशुदोचैवयायाज्ञ्यैवोत्तरेदिशो
ध्रुवहारत्नतोयोष्माच्छ्रमाश्रवणाद्वयुगे हस्तत्रये मूलमघोत्तरासु पुष्येचमेगेच
वधूप्रवेशोरिक्तेतरैर्वर्कभूजेचशस्तः गर्गः व्यतीपातेचसंक्रांतौग्रहणेवैधृता
वपि श्राद्धंविनाशुभंनैव प्राप्तकालेपिमानवः तथा अमासंक्रांतिविष्ट्यादौ प्राप्तका
लेपिनाचरेदिति अथ द्विरागमनं ज्योतिर्निबंधे माघफाल्गुनवैशाखेशुक्लपक्षेशुभे
दिने गुर्वादित्यविशुद्धौस्यान्नित्यं पत्नीद्विरागमः बादरायणः नाहारांशुदिनोत्तरादि

गुरुब्रह्मानुराधाश्विनी शाक्रे भास्करवायुविष्णुवरुणत्वाष्ट्रे प्रशस्ते तिथौ कुंभाजालिग
नेरवौ शुभकरे प्राप्ते दये भार्गवे जीवे शास्त्रुजितां दिने नवचवध्वे गृहप्रवेशः शुभः अथ पुनर्विवा
हः श्रीधरीये पुनर्विवाहं वक्ष्यामि दंपत्योः शुभदं लग्नेंदुलग्नयोर्दोषे ग्रहताराद्रि
संभवे अन्येष्वशुभकालेषु दुष्टयोगादिसंभवे विवाहेवापि दंपत्योराशौचादिसमुद्भवेत् ।
तस्य दोषस्य शांत्यर्थं पुनर्वैवाह्यमिष्यते याज्ञवल्क्यः सुरापी व्याधिता धूर्ता वंध्यार्थघ्न्य प्रियं
वदा स्त्रीप्रसूश्चाधिवेत्तव्या पुरुषद्वेषिणी तथा मनुः वंध्याष्टमेधिवेद्याब्दे दशमे तु मृतप्रजा
एकादशे स्त्रीजननी सद्यस्त्वप्रियवादिनी इति संग्रहे तु अप्रजां दशमे वर्षे स्त्रीप्रजां द्वादशेमन्यजेत्
मृतप्रजां पंचदशे सद्यस्त्वप्रियवादिनीं एकामुत्क्रम्य कामार्थमन्यां लब्धुं य इच्छति समर्थ
स्तोषयित्वार्थैः पूर्वीं कामयां वहेत् याज्ञवल्क्यः आज्ञासंपादिनीं दक्षां वीरसूं प्रियवादिनीं ।
त्यजन्दाप्यस्तृतीयांशमद्रव्यो भरणं स्त्रियाः मनुः अधिविन्ना तु या नारी निर्गच्छेद्रुषिता गृ
सा
हात् सा सद्यः सन्निरोद्धव्या त्याज्या वा कुलसन्निधाविति हेमाद्रौ कात्यायनः अग्निशिष्टा
दिशुश्रूषां बहुभार्यः सवर्णया कारयेत्तद्बहुत्वे ज्येष्ठया गर्हिता न चेति याज्ञवल्क्यः
सत्यामन्यां सवर्णायां धर्मकार्यं न कारयेत् सवर्णासु विधौ धर्म्ये ज्येष्ठया न विनेतरा द्विती
यविवाहहोमाग्निमाह कात्यायनः सदारोन्यान्पुनर्दारानुद्वोढुं कारणांतरात् यदि इच्छे
दग्निमान्कर्तुं क्व होमोस्य विधीयते स्वाग्नावेव भवेद्धोमो लौकिके न कदाचन त्रिकां

उमेऽनोपि आद्यायां विद्यमानायां द्वितीयामुद्वहेद्यदि तदा वैवाहिकं कुर्यादावसथ्येऽ
ग्निमान् सुदर्शनभाष्ये तु द्वितीयविवाहो लौकिक एव न पूर्वोपासनेस्तु क्रमश्चंद्वासंभवेत्ता
त्रेच अग्निद्वयसंसर्गः कार्यः तमेवाह शौनकः अथाग्न्योर्गृह्ययोर्योगं सपत्नीभेदजात
योः सहाधिकारसिद्ध्यर्थमहं वक्ष्यामि शौनकः अरोगामुद्वहेत्त्वन्यां धर्मलोपभयात्

पतत्र

स्वयं कृतैं विवाहे च त्रेतांते तु परेहनि पृथक् स्थंडिलयोरग्नी समाधाय यथाविधिः तंत्रं
कृत्वाज्यभागांतमन्वाधानादिकं ततः जुहुयात्पूर्वपत्न्यग्नौ तेनान्वारब्ध आहुतीः अग्नि
मीले पुरोहितं सूक्तेन नवर्चेन तु समिद्धेन समाधाय अयं ते योनिरित्यृचा प्रत्यवरोहेत्य
नया कनिष्ठाग्नौ निधाय तत आज्यभागांतं तंत्रादि कृत्वारभ्य तदादितः समन्वारब्धस्तता
ध्यां आग्नीध्यां जुहुयाद्धृतं चतुर्गृहीतमेताभिर्दशभिः बर्हिर्यथाक्रमं अग्नावग्नि
श्चरतीत्यग्निनाग्निः समिध्यते अस्तीदमिति त्रस्रभिः पाहि नो अग्न एकया ततः स्वि
ष्टकृदारभ्य होमशेषं समापयेत् गोयुग्मं दक्षिणा देया श्रोत्रियायाहिताग्नये वत्सारे काम्य
दि मतमाश्वलायनेनैव तां पुनः आदधीतान्यया सार्धमाधानविधिनागसीति बौधायनस्तु
तु अथ यदि गृहस्थो द्वे भार्ये विंदेत कथं तत्र कुर्यादिति यस्मिन्काले विंदेत उभावग्नी प
रिचरेदपराग्निमुपसमाधाय परिस्तीर्याज्यं विरूप्य स्रुचि चतुर्गृहीतं गृहीत्वान्वार
ब्धायां जुहोति॥

भ्रातं न देत दार्त्रस्यात्तिवेलं वाम्भक्षाथुक्तस्य भवतीति बौधायनोक्तेरिति मदनरत्ने वृ
द्धगार्ग्यः पुष्याग्नेयमुत्तरादित्यपौष्णज्येष्ठाचित्रार्कद्विदैवं कुभेषु कुर्युर्वह्न्याधानमायं
वसंतग्रीष्मोष्ण्यांते शेषवर्षविप्रादिवर्णाः कालादर्शे अग्निहोत्रं दर्शपूर्णमासावप्युत्तरा
यणे उपक्रमेयथाकालमुपासीरन् द्विजातयः सोमं च पशुबंधं च सर्वाश्च विकृती
रपि सौम्यायनेयथाकालं विदध्युर्गृहमेधिनः अत्र विशेषः पूर्वमुक्तः अग्निहोत्रका
लउक्तश्छंदोगपरिशिष्टे उदितेनुदिते चैव समयाध्युषिते तथा सर्वथावर्तते यज्ञ इतीयं
वैदिकी श्रुतिः एषां स्वरूपं तत्रैव रात्रेः षोडशे भागे ग्रहनक्षत्रभूषिते कालेत्वनुदितं
ज्ञात्वा होमं कुर्याद्विचक्षणः तथा प्रभातसमये नष्टे नक्षत्रमंडले रविर्यावन्न दृश्येत स
मयाध्युषितं च तत् रेखामात्रं प्रदृश्येत रश्मिभिश्च समन्वितः उदितं तं विजानीयात्त
त्र होमं प्रकल्पयेत् आश्वलायनः उषोदयं उषित उदिते वा सायं तु स एव अस्तमि
ते होम इति स एव प्रदोषांतो होमकालः संगवांतः प्रातरिति छंदोगपरिशिष्टे या
वत्सम्यग्भाव्यंते नभसि ऋक्षाणि सर्वतः न च लोहिततां मायेति तावत्सायं तु हूयते औ
पासने च एवं तस्याग्निहोत्रेण प्रादुःकरणहोमकालो व्याख्यातो इति आश्वलायनो
क्तेः अथावसथ्याधानं पारस्करः आवसथ्याधानं दारकाले दायाद्यकाल एकेषामिति
दायाद्यकालो विभागकाला मदनरत्ने व्यासः अग्निर्वैवाहिको येन न गृहीतः प्रमादि

207

नापि तर्ह्युपरते तेन ग्रहीतव्यः प्रयत्नतः यो गृहीत्वा विवाहाग्निं गृहस्थ इति मन्यते
अन्नं तस्य न भोक्तव्यं वृथापाको हि स स्मृतः ज्येष्ठभ्रातरि पितरि वा साग्नौ कनिष्ठ
स्य पुत्रस्य वाग्न्यभावेन दोषः तदाह तत्रैव गार्ग्यः पितृपाकोपजीवी वा भ्रातृपाकोप
जीवकः ज्ञानाध्ययननिष्ठो वा न दुष्येताग्निना विना गृहस्थस्याप्यध्ययनमाह सत्य
व्रतः अनधीत्य द्विजो वेदं स्नात्वोद्वाह्य यथा तथा अधीते ब्रह्मचर्येण सांगं वेदं गुरो
र्गृहे इदं चाधानं ज्येष्ठेऽकृताधानेन कृताधानेन कार्यं दाराग्निहोत्रसंयोगं कुरुते
योऽग्रजे स्थिते परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वज इति मनुशातातपोक्तेः स्मा
र्त्तेप्येवं सोदर्ये तिष्ठति ज्येष्ठे न कुर्याद्दारसंग्रहं आवसथ्यं तथाधानं पतितस्तु भ
वेदिति तत्रैव गार्ग्योक्तेः आज्ञायां त्वदोषमाह स एव मनुः ज्येष्ठो भ्राता यदा तिष्ठेदाधाने
नैव चाश्रयेत् अनुज्ञातस्तु कुर्वीत शंखस्य वचनं यथा आह वसिष्ठः अग्रजस्तु य
दानग्निरादध्यादनुजः कथं अग्रजानुमतः कुर्यादग्निहोत्रं यथाविधिः हारीतः सोदरा
णां तु सर्वेषां परिवेत्ता कथं भवेत् दारैस्तु परिविद्यन्ते नाग्निहोत्रेण नेज्यया अधिका
रिणोऽपि भ्रातुरनुज्ञया कुर्यादिति मदनपारिजातः विवाहस्त्वनुज्ञयापि नेत्यर्थः सो
दरोक्तेरसोदराणां न दोषः तदाह हेमाद्रौ वसिष्ठः पितृव्यपुत्रान् सापत्नान् परना
रीपुत्रांस्तथा दाराग्निहोत्रसंयोगे न दोषः परिवेदने परनारीसुता दत्तकादयः दत्तका
मपि सोदरे दोष एव देशान्तरे विशेषमाह स एव अष्टौ दश द्वादश वर्षाणि ज्येष्ठं भ्रातरम

207A

निविष्टमप्रतीक्षमाणः प्रायश्चित्तं भवतीति क्लीबादावप्यदोषमाह कात्यायनः
देशांतरस्थक्लीबैकवृषणानसहोदरान् वेश्याभिसक्तान्पतितान् शूद्रतुल्यानतिरोगिणः
जडमूकांधबधिरकुब्जवामनखंजकान् अतिवृद्धानभार्यांश्च कृषिसक्तान्नृप
स्य च धनवृद्धिप्रसक्तांश्च कामतोऽकारिणस्तथा कुटिलोन्मत्तचौरांश्च परिविंदन्न
दुष्यति एवं ज्येष्ठे छिन्नहस्तादावपि न परिवेत्तृत्वं तदाह त्रिकांडमंडनः दर्शेष्टिं पौ।
र्णमासेष्टिं सोमं त्वामग्निसंग्रहं अग्निहोत्रं विवाहं च प्रयोगे प्रथमे स्थितं न कुर्या।
त् जनके ज्येष्ठे सोदरे चाप्यकुर्वति क्षेत्रजादावनीजाते विद्यमानेऽपि सोदरे नाधिकारवि
घातोऽस्ति भिन्नोदर्येऽपि चौरसे पंगवंधमूकबधिरपतितोन्मादद्रूषणे सन्यस्ते छिन्नहस्तादे
यहाबाटादिदूषणे जनके सोदरे ज्येष्ठे कुर्यादेवेतरः क्रियामिति आरोहतं दशांतरा छा।
रीरममेत्याध्यानैमंत्रवर्णाच्च शर्करीरंगुली तेनरत्नेषु तं अंगवैकल्यात्स्वेमाङ्कि
नाम्नित्वधिक्रियैतैव नित्येच आधानं तु न कुर्यात्तस्यानैमित्तिकत्वादिति एवं चोत्तरं गु
णोपि खंडगुल्मकाणविकर्णादत्वस्यैवाधिकारः एकादशस्तु दशांतरं गतेः शारीरकार्श्य
वा विवृत्ति विद्धमिति। हिरण्यकेशिसूत्रे कर्मशक्तिहेतोरेवांगवैकल्यस्य निषेधात् ।
अत एव द्राह्यायणस्मिन्सूत्रे याज्य अप्रथमे स्विलिमिठुणे रिति कारणादेन्यूनांगस्याप्यधिका
रउक्तः अपरार्केऽप्युक्तमाः पितापितामहो यस्य अग्रजो वापि कस्य चित् तयाग्निहोत्रमं

त्रेषु न दोषः परिवेदने पितुराज्ञायामप्यदोषमाह मदनरत्ने सुमंतुः पित्रा यस्य तु नाधी
तं कथं पुत्रस्तत्कारयेत् अग्निहोत्रेऽधिकारोऽस्ति शंखस्य वचनं यथेत्यनाधीतं कृतमित्यर्थः
एतदाज्ञायामेवेति हेमाद्रिः यत्तु पितुः सत्यप्यनुज्ञाने नादधीत कस्य च नेति तत्सत्यधि
कारे ज्ञेयं अथ शूद्रस्य संस्काराः यमः शूद्रोप्येवं विधिः कार्यो विना मंत्रेण संस्कृतः नके
न चित्समस्त जच्छंदसां न प्रजापतिः छंदसा मंत्रेण व्यासोपि गर्भाधानं पुंसवनं सीमंतो जात
कर्म च नामक्रियैव निष्क्रमोऽन्नप्राशनं वपनाक्रिया कर्णवेधो व्रतादेशो वेदारंभक्रिया
विधिः केशांतः स्नानमुद्वाहो विवाहाग्निपरिग्रहः तेनाग्निसंग्रहश्चैव संस्काराः षोडश
स्मृताः तत्रैवोक्तमाह नवैताः कर्णवेधांता मंत्रवर्जं क्रियाः स्त्रियाः विवाहो मंत्रतस्तस्याः शू
द्रस्यामंत्रतो दश इति मदनरत्ने हिरण्यगर्भदाने तु गर्भाधानं पुंसवनं सीमंतोन्नयनं
तथा कुर्युर्हिरण्यगर्भस्य ततस्ते द्विजपुंगवा [illegible] जातकर्मादिकाः कुर्युः क्रियाः
षोडश चापरा इत्यगस्त्रियाः जातकर्मनामकरणनिष्क्रमान्नप्राशनचूडाविवाहाः षट्
शूद्राणां तु षोडशोक्ते पंचमहायज्ञाश्चेत्येकादशोक्तं रूपनारायणे हरिहरभाष्ये रेव
णाङ्कधरस्तु द्विजानां षोडशैव स्युः शूद्राणां द्वादशैव हि पंचैव मिश्रजातीनां संस्काराः कु
लधर्मतः वेदव्रतोपनयनमहानाम्नीमहाव्रतं विना द्वादश शूद्राणां संस्कारा नाममंत्रतः इ
त्याह अपरार्के तु गर्भाधानमृतौ पुंसवनं स्यादित्याह एतच्चैतद्वर्णस्यापरं नाद्विजातिमागपरे

तथा सत्युपनयनं विधाय वाच्यं स्यादिति तेन तन्मते विष्टोभवंति व्रात्येन विवाहमात्रं सं
स्कारं शूद्रोपि लभतां सदेवत्तु वचनं अत्र च सत्सच्छूद्रगोचरत्वेन देशभेदाद्वा व्यवस्थायाः मनुः
न शूद्रे पातकं किंचिन्न च संस्कारमर्हतीति तदर्थमाह मेधातिथिः यत्सामान्येनो निषिद्धं
तेषां न तत्तादि न तदतिक्रमे स्य पापं यथा द्विजानां उपनयनरूपं संस्कारं च नार्हतीति तेच
लक्ष्मीकार्याः शूद्रो वर्णश्चतुर्थोपि वर्णत्वाद्धर्ममर्हति वेदमंत्रस्वधास्वाहावषट्कारादिभिर्वि
नेति व्यासोक्तेः अमंत्रस्य तु शूद्रस्य विप्रो मंत्रेण गृह्यते इति मरीच्युक्तेश्च इयं परिभाषा सर्वा
र्था तेन शूद्रधर्मेषु सर्वत्र विप्रेण मंत्रः पठनीयः सोपि पौराण एवेति शूलपाणिः एवं स्त्रीणा
मपीति दिक्॥ इति रामकृष्णभट्टात्मजकमलाकरभट्टकृते निर्णयसिंधौ संस्कारनिर्णयः॥ धी॰ ८
अथ प्रकीर्णकालस्य तत्र जलाशयस्य वराहः हस्तो मघानुराधापुष्यधनिष्ठोत्तराणि रोहि
ण्याः शतभिषगित्यारंभे कूपानां शस्यते भगणः हेमाद्रौ भविष्ये तस्मिन्सलिलसंपूर्णे
कार्त्तिके केचित् विशेषतः मुनयः केचिदिच्छंति ब्रुवंति ते चोत्तरायणे न कालनियमे
तत्र सलिलं तत्र कारणं दीपिकापि मार्तंडे तु शुद्धो मुरजिद्दशायने माघबहुकस्य पु मैत्रे
ष्येमूलादाद्योत्तराश्विभश्रवणगुरुकरेपौष्णशाक्रां जेचंद्रे ब्राह्मेच पूर्णा मदनरविति
थौ २२ सद्वितीया तृतीये कार्या तोयं प्रतिष्ठाद्गुरुसितदिने कालशुद्धे सुलग्ने वराहः
आग्नेये यदि कोणे ग्रामस्य पुरस्य वा भवति कूपः नित्यं स करोति भयं दाहं च समानसंप्रा

यः नैऋत्ये बलभयं वनिताक्षयं च वायव्ये दिक्त्रयमेतत्त्यक्त्वा शेषास्तु शुभावहाः कू-
पाः वास्तुशास्त्रे भृतिपुष्टिपुत्रहानिपुरंध्रीनाशं मृत्युं संपदं शत्रुबाधां किंचित्सौख्यं शंभुको-
णादिकुर्यात्कूपो मध्ये गेहमर्थक्षयं च उत्सर्गविधिश्चोक्तो बह्वृचपरिशिष्टे अथातो वापी-
कूपतडागयज्ञं व्याख्यास्यामः पुण्येहन्युदकसमीपेग्निं समाधाय वारुणं चरुं श्रपयित्वाज्यभा-
गौ ते आज्याहुतीर्जुहुयात् समुद्रज्येष्ठेति पंच ततो हविषस्तत्त्वायामीति पंच त्वन्नोऽअ-
ग्ने इति द्वे इमं मे वरुणेति च स्विष्टकृतं नव संमार्जनं ते धेनुं तारयेत् तामनुमंत्रयेदिदं सलि-
लं पवित्रं कुरुष्व शुद्धाः पूता अमृताः संतु नित्यं मां तारयंती कहतीर्थाभिषेकं लोकाल्लो-
कं तरते तीर्यते चेति पुच्छमन्वारभ्य उत्तीर्य योऽस्मात्तिस्त्रयापराजितायां दिश्युत्थाय ये-
त्स्यप्रसादाद्भवतीति हि श्रुतं चेदिंद्रकृएवतीत्यलंकृतां च प्रायच्छ्यादितरां वा शक्त्या द-
क्षिणां ततउत्सृजेद्देवपितृमनुष्याः प्रीयंतामिति ब्राह्मणान्भोजयित्वा स्वस्त्ययनं वाचयी-
त विस्तरस्तु मात्स्ये कौस्तुभे च जलाशयोत्सर्गविधौ ज्ञेयः कूपादेरुत्सर्गाकरणे दोष-
उक्तो भविष्ये सदा जलं पवित्रं स्यादपवित्रमसंस्कृतं कुशाग्रेणापि राजेंद्र न स्प्रष्टव्यमसं-
स्कृतं तथा वापीकूपतडागेषु जलं स्यादसंस्कृतं अपेयं तद्भवेत्सर्वं पीत्वा चांद्रायणं चरेत्
अथ वृक्षारोपणं चंद्रेश्वरः आदित्यचंद्रपितृतिष्यविशाखपौष्णमूलोत्तरात्रयतुरंगमवारु-
णेषु एतेषु तारकगणेषु हितं नराणां वृक्षादिरोपणमिहोपदिशंति धीराः अथ मूर्तिप्रतिष्ठा

विशिष्टः हस्तत्रयेमित्रहरित्रयेचपौष्णद्वयादित्याष्ट्रेज्यभेषु तिस्रोत्तराधाः त्वष्टाशाक
भेषु सर्वामरस्थापनमुत्तमं स्यात् मात्स्येचैत्रेवा फाल्गुनेवापिज्येष्ठे वा माधवेत
था माघेचसर्वदेवानांप्रतिष्ठाशुभदाभवेत् नारदस्तु चैत्रंनिषेधति विचैत्रेष्वेवमा
सेषुमाघादिषुचपंचसुइतितेनात्रविकल्पः अत्र माघमासेविष्णुप्रतिष्ठामतिरिक्त
विषयः माघेकर्तुर्विनाशायफाल्गुनेशुभदाभवेदितिविष्णुधर्मोक्तेरितिहेमाद्रिः मात्स्ये
प्रतिपत्सुद्वितीयायांतृतीयायांधनप्रदा चतुर्थ्यांनाशमाप्नोतियमस्यस्यात्तुरवाव
हा विनायकस्यदेवस्यतथातत्रहितप्रदा पंचम्यांश्रीयुताकर्तुर्वरदाचतथाभवेत् ष
ष्ठ्यांलक्ष्मीयुतानित्यंसप्तम्यांरोगनाशिनी अष्टम्यांधान्यबहुलानवम्यांचविनश्य
ति भद्रकाल्याः सन्तानंकर्तुर्भवतितद्दृष्ये धर्मवृद्धिकरीज्ञेयादशम्यांतुतथाति
थौ एकादश्यांतथायुक्ता द्वादश्यांसर्वकामदा त्रयोदश्यांतथाज्ञेयाचतुर्दश्यांविन
श्यति कृष्णपक्षेपंचदश्यांकर्तुः क्षयकरीभवेत् पंचदश्यांतथापक्षेशुक्ले सर्वकाम
करीभवेत् आषाढेद्वेतथामूलमुत्तरात्रयमेवच ज्येष्ठाश्रवणरोहिण्यः पूर्वाभा
द्रपदातथा हस्ताश्विनीवासवान्तराधैंदवजीवभेषुगदितंविष्णोः प्रतिष्ठापनंपुष्यश्रु
त्यभिजित्सुरेशस्मरकयोर्विनाधिपस्कंदयोत्रमैत्रिगस्त्वेः करोतिगरभेदुर्गादिका
नांशुभं गणपरिहृद्रक्षोयक्षभूतासुराणांप्रथमफणिसरस्वत्यादिकानांचपौष्णे

ष्वपि सिंहगते तन्नाम्नो वासवे लोकपानां निगदितमखिलानां स्थापनं च स्थिरेषु ते त
त्विनी क्षेमकृद्दग्निदाहविधायिनी स्यादुन्नदा हृदा च आनंदकृत्कल्पविनाशिनी च
सूर्यादिवारेषु भवेत्प्रतिष्ठा माधवीये वैखानसः माघे भैरववाराहनरसिंहत्रिविक्र
माः महिषासुरहंत्र्यश्च स्थाप्या वै दक्षिणायने वैशाखेप्यथ लिंगप्रतिष्ठायां विशेषः हे
माद्रौ लक्षणसमुच्चये उत्तराशागते भानौ लिंगस्थापनमुत्तमं दक्षिणे त्वयनं प्राज्य त्रिव
र्षीये मयावहं स्वर्गदे स्थापनं नेष्टं तस्माद्दक्षिणायने स्थापनं तु प्रकर्तव्यं शिशिरा
दावृतुत्रये प्राहुः स्थापितं लिंगं भवेद्वरदयोगदं हेमंते ज्ञानदं चैव लिंगस्यारोपणं म
तं रत्नावल्यां माघफाल्गुनवैशाखज्येष्ठाषाढेषु पंचसु मासेषु शुक्लपक्षेषु लिंगस्था
पनमुत्तमं विष्णोरप्याह तत्रैव वैखानसः मार्गशीर्षादिमासौ द्वौ निंदितौ ब्रह्मणा पुरा
मासेषु फाल्गुनः श्रेष्ठः श्रेष्ठो वैशाख एव च तथैवाप्याश्वयुग्मासे श्रावणे मासि वा भवेत् बोधा
यनस्तु गे विष्णुप्रतिष्ठामुपक्रम्य द्वादश्यां श्रवणायां वा यानि चान्यानि पुण्यनक्षत्राणीति
कार्तिकादिविशाखांतेष्वित्यर्थः सर्वदेवेषु मासविशेषो हेमाद्रौ विष्णुधर्मे माघे कर्तुर्वि
नाशाय फाल्गुने शुभदा भवेत् लोकानंदकरी चैत्रे वैशाखे वरदा श्रुता आज्ञापुत्रास
दा ज्येष्ठे आषाढे धर्मवृद्धिदा श्रावणे धनहीनास्यात् प्रोष्ठपदे विनश्यति आश्विने ना
शमाप्नोति वह्निना कार्तिके तथा सौम्ये सौभाग्यमतुलं पौषे बहुविरक्ततमा दोषान्विता
थिमासे स्यात्कर्तुर्नाशनमेव चेति अत्र श्रावणाश्विनयोर्निषेधः मार्गशीर्षे विधिश्च

पु

विष्णुव्यतिरिक्तविषयः तत्र तस्योक्तेः देवीस्थापने तत्रैव विशेषो देवीपुराणे देव्या माघे
श्विने मासि उत्तमा सर्वकामदा तथा न तिथिर्न च नक्षत्रं नोपवासोत्र कारणं सर्वकालं प्र
कर्तव्यं कृष्णपक्षे विशेषतः अन्यच्चात्र विचारो हेमाद्रौ ज्ञेयः नारदः हंत्यर्थहीना कर्तॄ
रं मंत्रहीनास्तु ऋत्विजं स्त्रियं लक्षणहीना तु न प्रतिष्ठासमो रिपुः अत्राधिकारिणश्चोक्ताः
हान्यकल्पतरौ देवीपुराणे वर्णाश्रमविभेदेन देवी स्थाप्यास्तु नान्यथा ब्रह्मा तु ब्राह्मणैः
स्थाप्यो गायत्री सहितः प्रभुः चतुर्वर्णैस्तथा विष्णुः प्रतिष्ठाप्यः सुखार्थिभिः भैरवो
पि चतुर्वर्णैरंत्यजानां तथा मतः मातरः सर्वलोकैस्तु स्थाप्याः पूज्याः सरोत्तम लि
गं गृहीपतिर्वापि संस्थाप्य तु यजेत्सदा शिवसर्वस्वे भविष्ये यस्तु पूजयते लिंगं
दावादिं सो जगत्यत्तिं ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वा मत्परायणः तस्य प्रीतः प्रदास्या
मि प्रभावान् लोकान्नुत्तमान् तिथिंतत्रैस्कादे शूद्रः कर्माणि यो नित्यं स्वीयानि कुरु
ते प्रिये तस्याहमर्चां गृह्णामि चंद्रखंड विभूषिते ब्रह्मचारी गृहस्थो वा वानप्रस्थ
श्च यतेः एवं दिने दिने वै पूजयेद्देविकायतिं संन्यासी देवदेवेशं प्रणवेनैव पूजय
त् नमोंतेन शिवो नैव स्त्रीणां पूजाय विधीयते एतच्च पुराणप्रसिद्धजीर्णलिंग
पूजाविषयं यानि तु त्रिस्थलीसेतौ नारदीये यः शूद्रेणार्चितं लिंगं विष्णुं वा प्रणमे
न्नरः न तस्य निःकृतिर्दृष्टा प्रायश्चित्तायुतैरपि नमेद्यः शूद्रसंस्पृष्टं लिंगं वा हरिमे

वच स सर्वपातकनाभोगी यावदाचंद्रतारकं पारंवऽप्यर्जितं लिंगं ये त्वा पारंपर्यागतं त्यजेत्
आभीरप्यर्जितं लिंगं नत्वा नरकमश्नुते योषिद्भिः प्रर्जितं लिंगं विछिन्नं वापि नमेन्नयः
सकोटिकुलसंयुक्तः आकल्पं रौरवं वसेदित्यादीनि तानि नूतनस्थापितलिंगादिविष
याणि यदा प्रतिष्ठितं लिंगं मंत्रविद्भिर्यथाविधि तदा प्रभृति शूद्रस्य योषितां वापि नस्पृशेत्
दिति तत्रैवोक्तेः प्रतिष्ठायां तु शूद्रादीनां नाधिकारः स्त्रीणामनुपनीतानां शूद्राणां च न
रेश्वरः स्थापने नाधिकारोस्ति विष्णोर्वा शंकरस्य च यः शूद्रसंस्कृतं लिंगं विष्णुं वापि
नमेन्नरः इहैवात्यंतदुःखानि परत्यामुष्मिके किम् शूद्रो वानुपनीतो वा स्त्रियो वा पति
तोपि वा केशवं वा शिवं वापि स्पृष्ट्वा नरकमश्नुते इति हस्तन्नारदीयस्कांदोक्तेरिति त्रि
स्थलीसेतौ पितामहचरणाः चतुर्वर्णैरिति पूर्वोक्तवचनाद्धिम्बादिप्रतिष्ठायां शूद्र
स्य विकल्प इति तु युक्तं परयामः तत्रैव गौतमः शिवार्चनं सदा स्थेयं शुचिः कुर्यादुदङ्मु
खः वाचस्पति ध्रृतं प्राङ्मुखः पश्चिमोदगास्यस्तु प्रातः सायं निशासु चेति प्रयोगपारिजा
ते गृह्यपरिशिष्टे प्रतिमाः प्राङ्मुखो यजेतान्यत्र प्राङ्मुखः एतच्च स्थिरप्रतिमाविषयं
अन्यत्र बालार्चास्तु अथ प्रतिमाः भार्गवार्चनदीपिकायां वक्ष्ये सौवर्णी राजती
ताम्री मन्मयी च तथा भवेत् पाषाणधातुयुक्ता वा रीतिकांस्यमयी तथा रीतिः
पित्तलं शुद्धदारुमयी वापि देवतार्चा प्रशस्यते अंगुष्ठपर्वादाभ्य वितस्तिं यावदे

211A

वज्र गृहेष्ठप्रतिमाकार्यानाधिकारास्यतेबुधैः पंचरात्रेतु गृहदारु लाक्षागोमेदमधूच्छि
ष्टमयी नात्विति निषेध उक्तः भागवते शैली दारुमयी लौही लेप्या लेख्या च सैकती
मनोमयी मणिमयी प्रतिमाष्टविधा स्मृता काष्ठमधूकस्यैव तत्र काष्ठेषु मधुकमा
नीयचवसुंधरे कृत्वा तत्प्रतिमां चैव प्रतिष्ठाविधिना चयेदिति वाराहोत्तरे देवीपुराणे
सप्तांगुलं समारभ्य यावच्च द्वादशांगुलं गृहेष्वर्चा समाख्याता प्रासाचाधिका मुभा
तिथितत्त्वे कालिकापुराणे प्रतिमायाः कपोलौ द्वौ स्पृष्ट्वा दक्षिणपाणिना प्राणप्र
तिष्ठाकं तेव्यात्तस्यां देवत्वसिद्धये वासुदेवस्य बीजेनतत्त्वहि इत्यनेनच तथैव हृदयेंगु
ष्ठं दत्त्वा शरशम्भवमंत्रवित् एभिर्मंत्रैः प्रतिष्ठां तु हयोपि समाचरेत् अस्यै प्राणाः प्रति
ष्ठंतु अस्यै प्राणाः क्षरंतु वा अस्यै देवत्वमर्चायै मेहेति यच्च कश्चन हयशीर्षपंचरात्रे ।
अर्चकस्य तपोयोगादर्चनस्यातिशायनात् आभिरूप्याच्च बिंबस्य देवः सान्निध्य
मृच्छति प्रयोगपारिजाते व्यासः प्रतिमापरयंत्राणां नित्यस्नानं न कारयेत् कारये
त्पर्वदिवसे यदा वा मलधारणे लिंगे विशेष इति पित्ततत्त्वे भविष्ये मृदश्मगोशाक्रासि
गोशाक्रासिक्ताम्रकांस्यमयेनया कृत्वा लिंगं समभ्यर्च्य वसेत्कल्पयुतं दिवि दांत
विन्न [illegible] धूंदं लिंगं स्फाटिकं सर्वकामदं कृत्वा संपूज्य विप्रेंद्र तस्य सेवाञ्छितं फलं त
त्रैव कालको मृद्यां स्कादे अक्षादन्यपरीमाणं न लिंगं कुत्रचिन्नरः कुर्वीतांगुष्ठ

तोऽह्रस्वं न कदाचित् समाचरेत् अष्टौ रीतिर्गुञ्जाः गुञ्जैः पंचाख्यमाषकाः ते षोडशा
क्षः कर्षोऽस्त्रीत्यमरकोशात् प्रयोगपारिजाते क्रियासारे नवाष्टस[प्ता]ङ्गुलिकं लिंग
मेवं विमिहोच्यते षट्पंचकं च तन्मानं मध्यमं त्रिविधं स्मृतं त्रिद्व्येकांगुलमानं यत्रैः
विधं तत्कनीयसं एवं नवविधं प्रोक्तं वरलिंगं यथाक्रमं अथ पंचसूत्रनिर्णयः गौ
तमीयतंत्रे लिंगमस्तकविस्तारो लिंगोच्छायसमो मतः परिधिस्त[...]त्रिगुणितस्तच्च हृत्पी
ठे व्यवस्थितं प्रणालिकान्तमेवस्यात् पंचसूत्रविनिर्णयः अत्रेदं तत्त्वं ।लिंगमस्तकवि
रं लिंगोच्छ्रितासमं कृत्वा तत्त्रिगुणं स्त्रवेष्टनां हि लिंगस्थौल्यं कृत्वा तत्समे हातं चतुरस्रं
वा पीठविस्तारमधश्चोर्ध्वं च कुर्यात् पीठोच्चता तु लिंगोच्चतातो द्विगुणा पीठमध्ये लिं
गाद्विगुणस्थूलं पीठोच्चतात्तृतीयांशेन कण्ठं कृत्वा तस्योर्ध्वं मधश्च समं च संग्रहयेवा
कृत्वा लिंगविस्तारं षष्ठांशेन पीठोपरि बाह्ये मेखलां कृत्वा तदंतः संलग्न तत्समं
त्र
खातं कृत्वा पीठं वहिर्लिंगसमं लिंगं पीठपदार्द्धं वा मूले दैर्घ्यसमविस्तारायामेन त
दर्द्धविस्तारां तत्तृतीयांशेन मध्ये खातां पीठात्समे खलां च नालिकां कुर्यात् अत्र मू
लं सिद्धान्तशेखरं शैवागममेव तत्रैव पंचैव ग्राह्ये सर्वेत्रैव प्रशस्तो ग्रः शिवसूर्या
चैर्नैविना नत्रैव चाराहृपास्ययोः गृहे लिंगद्वयं नार्च्यं शालग्रामद्वयं तथा द्वे च

212A

ॐ दारुकायास्तु नार्च्या स्फटिकं तथा शक्तित्रयं तथा नार्च्यं गणेशत्रमेव च दौर्गं रवे
नार्च्ये पैत्वेव भग्नां च प्रतिमां तथा नार्च्ये पद्मं तथा मत्स्यकूर्मादि दशकं तथा गृहे ग्निदग्धा
भग्नास्त्वनार्च्याः पूज्या वसुंधरे एतासां पूजनान्नित्यमुद्वेगं प्राप्नुयाद्गृही शालग्रामाः
समाः पूज्याः समेषु द्वितयं न हि विषमा नैव पूज्यास्तु विषमे त्वेकमेव हि शालग्रा
मशिला भग्ना पूजनीया सचक्रका विष्णुपुराणे ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चापि
वीयते स्वधर्मतत्परो विष्णुमाराधयति नान्यथा अथ भक्तानामपृथग्देवपूजामाह प्र
योगपारिजाते आश्वलायनः पृथग्गृह्यैकपाकानां ब्रह्मयज्ञो द्विजातिनां अग्निहोत्रं सु
रार्चा च संध्या नित्यं भवेत्पृथक् तत्र विष्णुधर्मे शालग्रामशिला वापि चक्रांकितशि
ला तथा ब्राह्मणः पूजयेन्नित्यं क्षत्रियादिर्न पूजयेत् शूद्रस्यशीहि सद्दिमपूजाविषयं ।
शूद्रो वानुपनीतो वा स्त्रियो वा पतितोपि वा केशवं वा शिवं वापि स्पृष्ट्वा नरकमश्नुते
ब्राह्मणोपि हरिं विष्णुं न स्पृशेच्छूद्र यद्धति सतथा मृतनाया वा तस्यानास्तीह निष्कृतिः
स्त्रीणां मनुपनीतानां शूद्राणां च जनेश्वरः पूजनेनाधिकारोस्ति विष्णौ वा शंकरस्य
वेति स्कांदात् स्पर्शरहितानां तयोर्भवत्येव तत्र वोक्ते चत्वारो ब्राह्मणैः पूज्यास्त्रयो
राजन्यजातिभिः वैश्यैर्द्वावेव संपूज्यो तथैकः शूद्रजातिभिरिति स्कांदाच्च अन्त्ये तु
दीक्षितादीक्षितविषयत्वेन व्यवस्थामाहुः विष्णुधर्मे तयोरसंभवे चावैसा चेहन्नव

धास्मृता रत्नजा हेमजा चैव राजती ताम्रजा तथा रैतिकचीतथा लौही शैलजा द्रुम
जातथा अतोधमा च विज्ञेया मृन्मयी प्रतिचया एवं फलानि तत्रैव ज्ञेयानि तत्रैव पा
द्मे शालग्रामं प्रक्रम्य तत्राप्यामलकी तुल्या सूक्ष्मा सूक्ष्मैव या भवेत् यथा यथा शि
ला सूक्ष्मी तथा स्यात्तु महत्फलं तथा यवमात्रं तु गर्तः स्यात् यावार्धं लिंगमुच्यते शि
वनाभिरिति ख्यातस्त्रिषु लोकेषु दुर्लभः तत्रैव शालग्राममयी मुद्रा संस्थिता यत्र कुत्रचि
त् वाराणस्यां यवाधिकं समंताद्योजनत्रयं येन तानत्समीपेत मृत्तो वानीयतेति कं
सर्वो मोक्षमवाप्नोति सत्यं सत्यं न चान्यथा तत्रैव चक्रांकं मिथुनं यज्ज्पनैकं चक्रांकमर्च
येत् चक्रांकमिथुनात्तसार्द्धं शालग्रामं प्रपूजयेत् तत्रैव वाराहे ह्यष्टदेशेषु चौवापि चक्रां
कोपतिष्ठति योजनानां तथा त्रीणि मम क्षेत्रं वसुंधरे तत्रैव शालग्रामं प्रक्रम्य क्रय
क्रीता परिज्ञेया मध्यमा याचिताधमा प्रयोगपरिजाते वाराहे एते लक्षणसंपन्ना पारंप
र्यक्रमागता उत्तमा सा तु विज्ञेया गुरुदत्ता चितसमा अथ पार्थिवपूजा नंदिपुराणे आ
युष्मान् बलवान् श्रीवान् पुत्रवान् धनवान् सुखी वरमिष्टं लभेल्लिंगं पार्थिवं यः समर्च
येत् तस्मात्तु पार्थिवं लिंगं ज्ञेयं सर्वार्थसाधकं तत्रैव गोभूहिरण्यवस्त्रादिवलिपुष्प
निवेदने ज्ञेयो नमः शिवायेति मंत्रः सर्वार्थसाधकः सर्वमंत्राधिकश्चायमों
काराद्यः षडक्षरः भविष्ये मन्त्रयोष्ठौ शिवस्यैताः पूर्वादिक्रमयो आग्नेय्यंताः

प्रपूज्यास्तु वेद्यां लिंगे शिवं यजेत् अत्र न प्राचीमगतः शंभोरिति रुद्रयामले नि
षेधान्नांतरालं प्राची किंतु प्रसिद्धैवेति चिंतत्वे देवीपुराणे स्नदाहरणसंघट्टे प्रति
ष्ठाकालमेव च स्नपनं पूजनं चैव विसर्जनमतःपरं हरो महेश्वरश्चैव शूलपाणिः
पिनाकधृक् पशुपतिः शिवश्चैव महादेव इति क्रमः स्कांदे अष्टकाण्यपि च पंचा(
णि श्रीहरस्य निवेदयेत् तत्रैव भविष्ये धात्तूरकैस्तु यो लिंगं सकृत्संपूजयते नरः(
मा गोलक्षफलं प्राप्य शिवलोके महीयते योगिनीतंत्रे शिवागारे झल्लकं च सूर्या
गारे च शंखकं दुर्गागारे वंशवाद्यं मधुरीं च वादयेत् अथ हेमाद्रौ स्कांदे स्पृष्टा रुद्रस्य
निर्माल्यं सवासा आप्लुतः शुचिः प्रयोगपारिजाते क्रियासारे मध्यमानामिकामध्ये
पुष्पं संगृह्य पूजयेत् अंगुष्ठतर्जन्यग्राभ्यां निर्माल्यमपनोदयेत् अपनीतं च निर्मा
ल्यं चंडेशाय निवेदयेत् अभ्यंगं मस्तकं लिंगे सदा कुर्वीत पूजकः शूलपाणौ लैंगे वरं
प्राणपरित्यागः शिरसो वापि कर्तनं न चैवाप्यपूज्य संभुंजीत शिवलिंगं महेश्वरं स्तनके मते
के चैव च न त्याज्यं शिवपूजनं तिथितत्त्वे लैंगे विना भस्मत्रिपुंड्रेण विना रुद्राक्षमालया
पूजितोपि महादेवो न स्यात्तस्य फलप्रदः तस्मान्मृदापि कर्तव्यं ललाटे वै त्रिपुंड्रकं रुद्राक्ष
६२ धारणे विशेषः शिवरहस्ये एकवक्त्रः शिवः साक्षाद्ब्रह्महत्यां व्यपोहति अवध्यत्वं प्रति
हितत्वं तीव्रवह्निस्तंभं करोति च द्विवक्त्रो हरगौर्यः स्यात् गोवधाद्यघनाशकृत् त्रिवक्त्रो घ

त्रिजन्माद्यपापराशिं प्रनाशयेत् चतुर्वक्त्रः स्वयं ब्रह्मा नरहत्यां व्यपोहति पंचवक्त्रस्तु का
लाग्निरगम्याभक्ष्यपापनुत् षड्वक्त्रस्तु गुहो ज्ञेयो भ्रूणहत्यादि नाशयेत् सप्तवक्त्रस्त्वनं
तः स्यात्स्वर्णस्तेयादिपापहृत् विनायकोऽष्टवक्त्रः स्यात्सर्वानृतविनाशकृत् भैरवो
नववक्त्रस्तु शिवसायुज्यकारकः दशवक्त्रः स्मृतो विष्णुर्भूतप्रेतभयापहः एकाद
दशमुखो रुद्रो नानायज्ञफलप्रदः द्वादशास्यस्त्वादित्यः सर्वरोगनिवर्हणः त्रयोद
काम शमुखः सर्वकामफलप्रदः चतुर्दशास्यः श्रीकंठो वंशोद्धारकरः परः इति तथा विनामे
नैकाणयो धत्ते रुद्राक्षं भुवि मानवः स पाति नरकान् घोरान् यावदिन्द्राश्चतुर्दश पंचामृत
पंचगव्यं स्नानकाले प्रयोजयेत् गैयं वक्त्रादिमंत्रेण तथा तत्र प्रयोजयेत् पद्मे अघोरेभ्यों
ह्रं अघोरेतर ओं ह्रों ह्रौं नमस्ते रुद्ररूपक्रे स्वाहा अनेनाभिमंत्र्य धारयेत्पा अष्टोत्तरशतं का
र्यं चतुः पंचाशद्देवता सप्तविंशतिमाना वा ततो हीना स्मृता बुधैः प्रजापतिः मोक्षा
र्थी पंचविंशत्या धनार्थी त्रिंशता जपेत् पुष्ट्यर्थी पंचविंशत्या पंचदशयाभिचारके स
प्तविंशति रुद्राक्षं भुवि सन्मुखं तस्य प्रीतो भवेत् रुद्रः स्वपदं च प्रयच्छतीति बोपदेवः ।
रुद्राक्षाः कंठदेशे दशनपरिमितान्मस्तके विंशती द्वे षट् षट् कर्णप्रदेशे करयुग
ले द्वादश द्वादशैव बाह्वोरिंदोः कलाभिर्नयनयुगकृते एकमेकं शिखायां व
क्षस्यष्टाधिकं यः कलयति शतकं स स्वयं नीलकंठः तत्रैवाशिवधर्मे स्नानं
राम

×४× रुद्राक्षमालया देहे यस्त्वया यत्करोति नरः पुण्यं स सर्वकोटिगुणं भवेत् मोदशाति द्विजेभ्यश्च ४

214-A

पलशतं ज्ञेयमभ्यंगः पंचविंशतिः पलानां द्वे सहस्रे तु महास्नानं प्रकीर्तितं पंचषट्
विंशत्पलं लिंगेऽभ्यंगं कारयेदथ शिवस्य सर्पिषा स्नानपूर्वं पलशतेन च तावता मधुना (
चैव दध्ना चैव ततः पुनः तावतैव च क्षीरेण गव्येनैव भवेत्ततः अयः सार्द्धसहस्रेण पला
नामैक्षवेन च रसेन कारयेत्स्नानं भक्त्या चोष्णांबुना ततः विष्वादौ तु स्कांदे क्षीराद्द (
शगुणं दध्ना घृतेनैव दशोत्तरं घृतादष्टगुणं क्षौद्रं क्षौद्राच्चैवैक्षवं तथा ब्रह्मस्ते देवा (
नां घृतिमायत्र्यघृताभ्यंगक्षमा भवेत् पलानि तत्र देयानि अर्द्धपापंचविंशतिः इदं कौशे
कृताभिप्रायेण संग्रहे विष्वक्सेनाय दातव्यं नैवेद्यस्य शतांशकं पादोदकं प्रसादं च (
लिंगे चंडेश्वरायेत् पंचायतनसन्निवेशमाह वोपदेवः शंभौ मध्यगते हरीनहरभूदेव्यो
हरौ शंकरेभास्येनागसुता रवौ हरगणेशाजांबिकाः स्थापिताः देव्यां विष्णुहरेभव
क्त्ररवयो लंबोदरेऽजेश्वरीनांबाः शंकरभागतोऽतिसुखदा व्यस्तास्तु ते हानिप्रदाः शंक
रभागतः ईशानकोणादारभ्य प्रदक्षिणमित्यर्थः अत्र दिक्स्वरूपमुक्तं प्रयोगपारिजा
ते मंत्रशास्त्रे देवस्य मुखमारभ्य दिशं प्राचीं प्रकल्पयेत् तदादि परिवाराणां मंगाद्याव
रणस्थितिः अत्र क्रमः पार्श्वे रविर्विनायकश्चंडी ईशो विष्णुः पंचमः अनुक्रमेण पू
ज्यंते व्युत्क्रमे तु महद्भयं तथा पूज्यपूजकयोर्मध्ये प्राची प्रोक्ता विचक्षणैः अथ कोण
वादिमतं त्रयः वोपदेवः केचिद्गोवादाय ड्डये प्रजाक्कृत समात्रिना वाधोन्न हस्तनिश्री

वि. १		स्स
	शि	
दे		ग
शि	२	ग
	वि	
दे		स्स
शि	३	ग
	स्स	
दे		वि
वि	४	शि
	दे	
स्स		ग
वि.	५	शि
	ग	
दे		स्स

नि॰सिं॰
२१५

215

पद्माद्यगे विनायकचये अत्र केचिदित्याद्यैः केशवविष्ण्वादिचतुर्विंशतिमूर्त्तयोऽभि-
धीयंते शालुशंखवात् चेगोक्रगदेत्तेये इत्यर्थः शिष्टे भुजे पद्मं संत्यर्थितः सिद्धं अत्र दक्षिणो-
र्ध्वकरक्रमेण ज्ञेयं दक्षिणोर्ध्वकरक्रमादिति हेमाद्रौ वचनात् विशाद्वे विपरीतं गजे
त्यर्थः अत्रापि पूर्वादित्यनुवृत्तिः शंखाद्गदाचक्रे इत्यर्थः गये इत्यत्र पूर्वादित्यनुवर्त्तते शंखा-
द्गदापद्मे इत्यर्थः विपरीतेपद्मे गदे रत्रापि शंखात्ज्ञेये चये चक्रपद्मे शंखाचक्रपद्मे इत्य-
र्थः विइत्यत्रापि पद्मचक्रे इत्यर्थः तेन गये इत्यष्टौ मूर्त्तयः चये इत्यत्र च अत्रमलं हेमाद्रौ
ज्ञेयं अस्य बौधायनसूत्रे गौविन्नमी चानुरूत्यलिंगाच्चाप्रतिष्ठोच्यते यजमानः पूर्वो-
क्तकाले पूर्वेद्युः दशद्वादशषोडशान्यतरस्तंभमंडपं कृत्वाग्नेये हस्तमात्रं चतुरस्रं कुंडं स्थं-
डिलं वा सर्वतो हस्तमात्रां वेदिं नैरृत्यां वास्तुमंडलं मध्ये वेदी तदुपरि सर्वतोभद्रं चक्र
त्वा प्राणानायम्यास्यां मूर्त्तौ देवस्य सान्निध्यार्थं दीर्घायुर्लक्ष्मीसर्वकामसमृद्ध्यक्षय्य
सुखकामोऽमुकमूर्त्तिप्रतिष्ठां करिष्य इति संकल्प्य गणेशपूजनपुण्याहवाचन
मातृपूजा नांदीश्राद्धानि कृत्वाचार्यं चतुरोऽत्विजश्च वृत्वा वस्त्राद्यैः प्रपूजयेत् अथाचा
र्योपदत्रसंस्थितमिति सर्षपान् विकीर्य यो हिरण्येति कुशोदकेन भूमिं प्रोक्ष्य देवा
आयांतु यातुधाना अपयांतु विष्णोदेवयजनं रक्षस्वेति भूमौ प्रादेशं कृत्वा समन्तान्ना
तुला पद्धति मार्गेण मंडपप्रतिष्ठां कृत्वा वा पंचगव्याहिरण्यपत् दूर्वाश्वत्थपला

राम
२१५

215·A

णपर्णौं तपो हिवेति तिसृभिः हिरण्यपर्णेति च तसृभिः पवमानः सुवर्जन इत्यनुवाके
नाभि विच्य व्याहृतिभिरिदं विष्णुरिति फलपचदूर्वाः समर्घ्य रक्षोहणमिति हस्तेकं
कणं बध्वा वाससाच्छाद्य अवतेहेडमुदुत्तममिति जलेधिवासयेत् इदं वैधायनोक्तं तु
नप्रलिंगे चाग्निं प्रतिष्ठाप्य गोक्षीरेनीवारचारुं कृत्वा विष्णुमंत्रेण शतसमधिमय पि
त्वाज्यभागांते पलाशोदुंबराश्वत्थशम्यपामार्गसमिद्भिराज्येन चरुणा तिलैर्वा प्रत्ये
कं विंशतिमष्टौ वा हुत्वा लोकपालमूर्तिमूर्त्तिपतिभ्यो हुत्वा स्थाप्यदेवमंडले पूर्वो
क्तसमित् तिलनैवाज्येर ष्ट सहस्रमष्टशतं मष्टाविंशतिं वा हुत्वा अग्नि[illegible]र्भिः स्थि
नुवाके लक्षणाहुतिं जुहुयात् प्रतिद्रव्यहोमांते देवं पादनाभिशिरःसु स्पृशेत् आश्व
होमेचोत्तरतः सजलंकुंभे संपातान्नयेत् तेषां मंत्रा इंद्रायेंदो इतींद्रस्य सोमेति
पृथिवीमंत्रैः अघोरेभ्य इति तत्पतेः सर्वस्य अग्न आ याहीत्यग्नेः अग्निं दूतमित्यग्नि
मंत्रैः नमः शर्वाय च पशुपतये चेति पशुपतेः यमाय सोमं यमस्य असि हि
वीरेति यजमानमंत्रैः स्वःशिशुं तत्पते रुग्रस्य अस्तुन्वतन्निर्ऋतेः आकृष्णेन सूर्य
मंत्रैः योरुद्रो अग्नौ इति तत्पते रुद्रस्य इमं मे वरुण स्य शन्नोदेवी जलमंत्रैः न
सोमवायवे स्य आनो नियुद्भिः वायोः वात आ वातु वायुमंत्रैः तमीशानं तस्य
नेरीशानस्य आप्यायस्व कुबेरस्य वयं सोम सोममंत्रैः तमुष्टवयेति महादेवस्य

नि॰सिं॰
२१६

216

अग्निर्वा ईशानस्य आदित्यवत्स्येत्याकाशस्य उग्र उग्राय चेति तत्पत्ने भीमस्य १
ततो देवस्य पादौ स्पृशेत् एवं द्वितीयो जत्वानाभि तृतीये मध्यं चतुर्थे उरः पंचमे शि
रः स्पृष्ट्वा प्रतिपर्यायं संपातजलेन देवमभिषिंचेत् ततः स्विष्टकृदादि शेषं समाप्यार्चां
शोधयेत् स्थिरलिंगार्चादौ तु नेदानीमग्निस्थापनहोमादिकार्यं ततो देवं नत्वा स्वा
गतं देवदेवेश विश्वरूप नमोस्तु ते मृडेपि त्वदधिष्ठिरेमुद्धिं कुर्मः सहस्रवतामिति संप्रार्थ्य
उत्तिष्ठ ब्रह्मणस्पते इति सकृत्विगुत्थाप्य पूर्ववन्मकृते गन्धद्वारमाण्ऽधुनावाकार्यं अग्निः
सन्निमिति सूक्तमग्निपदस्थेनं पठित्वा नत्सहितं पुनः पठेत् एवमष्टसहस्रमष्टाविंशतिं वा
पठन् जलं पातयेत् ततोर्चां द्वादशवारं मृदाजलेन च प्रक्षाल्य मंत्रवत्यं चगव्ये कृत्वा पयः
पृथिव्यामावो राजानमिति च स्नाप्य आप्यायस्व दधिक्राव्णस्तेजोसि मधुवाता आ
यं गौरिति पंचामृतैः संस्नाप्य लिंगं चेत् नमस्ते रुद्र मन्यव इत्यष्टाभिः संस्नाप्य घृतेनाभ्यज्यो
द्वर्तनेनोद्वर्त्यौष्णोदकेन प्रक्षाल्य गंधद्वारां संपातोदकेनाभिषिच्य सवस्त्रवेष्ट्रत्वर्भिः कु
मैरापो हि ष्ठेति तिसृभिराकालरोधितिति च प्रत्येकं समुद्रज्येष्ठेतिचतुर्भिराकालरोधितिचाभि
लितैः संस्नाप्योदुंबरादिपीठे चार्चामुपवेश्य परितोष्टदिक्षु सजलं कुंभान्स्थाप्य तेषु गं
धपुष्पदूर्वाक्षताद्येस सप्तमृदः द्वितीये पुष्करपर्णशमीविकंकतारमंतकत्वचं
पल्लवांश्च तृतीयादिषु सप्तधान्यपंचरत्नफलपुष्पाणि कुशदूर्वारोचनासंपा

तोदकगंधफलसर्वौषधीः स्निग्धाक्रमेणापो हि ष्ठेति त्रिभिर्हिरण्यवर्णा इति चतुर्भिः प
वमानानुवाकेन चाभिषिंचेदेककुंभे शमीपलाशवटखदिरबिल्वाश्वत्थविकंकतपनसा
म्रशिरीषोडुंबराणां पल्लवान्कषायांश्चाभिषिञ्चाः श्वत्थेव इत्यभिषिच्य पंचरत्नोदके
ना हिरण्यवर्णा इति संस्नाप्य वाससी दत्त्वोपवीतादि दीपांतं कृत्वा हिरण्यगर्भः प्रजा
मयः प्राणतः यस्येमे येन द्यौः यं क्रंदसी आपो ह यत् यश्चिदापो इत्यष्टौ पिष्टदीपान्
दत्वा सुवर्णशलाकया पात्रे जसपात्रस्थमधुघृतं च गृहीत्वा चित्रं देवानामित्तेजोसीति मंत्रा
भ्यां ॐ नमो भगवते तुभ्यं शिवाय हरायनमः हिरण्यरेतसे विरूपाक्षो विश्वरूपायेत्यनेन
मः इति च दक्षिणे सव्ये देवनेत्रे मंगाहत्यालिखेत् अंगं जातं त्वेत्यंजनेन मधुना चोत्तरा
देवस्य त्वेति मध्वाज्यशर्करामिश्रं कृत्वा तेनैवांजनेन पुनरंजयेत् अग्न आयाहीति शेषः
स्थिरलिंगे तत्स्वर्णस्त्र्यागंधेन ॐ नमो भगवते रुद्राय हिरण्यरेतसे पराय परात्मने त्रि
शूलरूपायोमाप्रियाय नमः इत्युक्त्वा जनादिना जपेत् ततः कर्ता चार्याय गामश्वं चित्वाम्य स्वर्णद
क्षिणां दद्यात् अथाचार्यः प्रत्यृचमादौ प्रणवं वदन् पुरुषसूक्तेन स्तुत्वा वंशपात्रे
पंच वर्णान्दत्तेन देवस्य नीराजनं कारयित्वा रुद्राय चतुर्थ्यादौ दद्यात् मंत्रस्तु ॐ नमो
रुद्राय सर्वताधिपतये दीप्तमूलाधराय मादधिताय विश्वाधिपतये रुद्राय वै नमो
नमः शिवभगाहिंत कर्मास्तु स्वाहेति अग्न्याय पर्णे भूतेभ्यो नम इति केचिदेतद्रा

यैस्थिरप्रतिष्ठायामिच्छंति अथाचार्यः सर्वतोभद्रे देवानावाहयेत् मध्ये ब्रह्मा
णं पूर्वादिदिक्षु इंद्रादिलोकपालान् ईशानेंद्राद्यंतरालेषु वसून् रुद्रान् आदित्या
न् अश्विनौ विश्वान् देवान् पितॄन् नागान् स्कंदहाषौ ब्रह्मेशानाद्यंतरालेषु दत्ते
विष्णू दुर्गा स्वधा धाकारं मृत्युरोगान् समुद्रान् सरितः मरुतः गणपतिं चेति मध्ये
एवं पार्थिवीमेतं स्थाप्य देवं चावाह्य प्रागादि वज्रशक्तिं दंडखड्गपाशांकुशगदा
त्रिशूलं तद्बाह्ये गौतमं भरद्वाजं विश्वामित्रं कश्यपं जमदग्निं वशिष्ठमत्रिमरुंधतीं च
तद्बहिः सेनवगणान् तद्बाह्ये ऐंद्री कौमारी ब्राह्मी वाराही चामुंडा वैष्णवी माहेश्वरी वैन
नायकीति एतानामभिरावाह्य संपूज्यार्चायां देवं तन्मंत्रेणावाह्य मंडलमध्ये चौक्तप्रतिष्ठा
भवेत्ति निविश्य संपूज्य वर्मा मंडले देवानां नाभिस्तिलाज्येन दशदशाहुतीर्हुत्वाराध्यायां
देवनारोप्य पुरुषसूक्तकारनारायणाभ्यां सूक्ताभ्यां देवे न्यासं कुर्यात् यथा पुरुषात्म
नेनमः प्रकृतितत्त्वाय नमः बुद्धितत्त्व अहंकारत मनस्ते सर्वांगे प्रकृतितत्त्व बुद्धिः हृदि
शब्दतत्त्व शिरसि स्पर्शतत्त्वचि रूपतत्त्व हृदि एवं रसगंधश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवक्
पाणिपादपायूपस्थपृथिव्यप्तेजोः वाय्वाकाशसत्त्वरजस्तमो देहतत्त्वानि विन्य
सेत् ततः पुरुषसूक्तस्याग्रमस्गंधपंचरत्नैः तदुत्तरं कलशैः तं यज्ञमिति तिस्रः

नाभिहृत्कंठंच तस्मादश्वेति हृदयं बाह्वोः ब्राह्मणोस्येति हृदयं नासयोः नाभ्येति
हृदयमक्ष्णोः अंत्यां शिरसि केचित्तत्त्वन्यासमन्यथाहुः पुरुषप्रकृतिमहदहंका
रतत्त्वानि शब्दस्पर्शरूपरसगंधतन्मात्राणि आकाशवायुतेजोप्पृथिवीश्रोत्र
त्वक्चक्षुरसनघ्राणवाक्पाणिपादपायूपस्थमनस्तत्त्वानीति केचिदेतानि स्थिर
लिंगादावेवेच्छंति ततः सुखशायी भवेति शय्यायां देवं स्थापयित्वा मंडलशय्ययो
रंतरालेन गंतव्यमिति प्रेष्यं दत्वा मंडलदेवताभ्यो नाममंत्रैः पायसेन चरुणा वा बलीद
द्यात् नीवारचरुरेवेणादिग्बले नेदं स्थिरप्रतिष्ठायां स्थिरलिंगार्चादौ त्वयं विशे
षः अग्निस्थापनहोमवर्जं सर्वं पूर्ववत्कृत्वा इदानीमग्निस्थापनं कृत्वा पूर्वोक्तहो
मं कुर्यात् नात्र नैवारश्चरुः विष्णोस्सर्वोक्तहोमं कृत्वा पुरुषसूक्तेन प्रत्यृचमाज्यं
हुत्वेदं विष्णुरिति पादौ स्पृष्ट्वा पुनस्ता एव हुत्वाऽतो देवेति शिरः स्पृष्ट्वा पुनस्ता एव
हुत्वा पुरुषसूक्तेन सर्वांगं स्पृशेत् स्थिरलिंगं चेदग्निस्थापनादि पूर्वोक्तसमिदाज्याहु
हुतीर्हुत्वा यात इषुरित्यनुवाकांतं द्रापेसहस्राणीत्यनुवाकाभ्यां च प्रत्यृचमाज्यं हु
त्वा सर्वो वै रुद्र इति मूलं स्पृशेत् पुनस्ता एव हुत्वा कद्रुद्रायेति मध्यं पुनस्ता एव हुत्वा
नमो हिरण्यबाहव इत्यग्रं पुनस्ता एव हुत्वा परे रुद्रेण सर्वांगं स्पृशेत् ततो धामं

तइति पूर्णाहुत्यान्त्वा एवमधिवासनं कृत्वा परेद्युः सद्ये वा पीठिकां स्थापयित्वा मह
स्थिरित्या वाद्यादिदिति द्यौरिति स्तुत्वा ओं नम इति संपूज्य तेनैव पूर्णाहुतिं हुत्वोत्तिष्ठ ब्र
ह्मणस्पत इति देवमुत्थाप्य पुष्पं दत्वा पुरुषसूक्तेन स्नात्वोदुत्यमित्युत्थाप्य कनिक्र
ददिति सूक्तेन विष्णुं सद्योजातमिति पंचान्नवाके लिंगगर्भप्रवेश्य पीठिकायां इंद्रादि
नामभिरष्टरत्नानि क्षिप्त्वा सप्तधान्य रूप्य हेम मनःशिलाः क्षिप्त्वा पायसेन संलिप्य प्रणवे
नांगन्यासं कृत्वा स्वर्णशलाकामंतरितां कृत्वा ओं स्थलगेन प्रतितिष्ठ परमेश्वरेत्यु
क्त्वातो देवेति विष्णुं रुद्रेण च लिंगं स्थापयेत् ततः प्राणप्रतिष्ठा चलार्चायां त्वधिवासनोत्ते
परेद्युरुत्तिष्ठ ब्रह्मणस्पत इति देवमुत्थाप्य पुरुषसूक्तेन नरनारायणाभ्यां स्नात्वा घृते श्री
हविषं कृत्वा तद्देवता मंत्रेण दशाहुतीर्हुत्वा नामभिर्जुहुयात् अग्नये स्वाहा सोमाय ध
न्वंतरये कुह्वै अनुमत्यै प्रजापतये परमेष्ठिने ब्रह्मणे अग्नये सोमाय अग्नये न्नादाय
अग्नयेन्नपतये प्रजापतये विश्वेभ्यो देवेभ्यः भूर्भुवः स्वः अग्नये स्विष्टकृते इति ततः स
प्तते पुनस्त्वेत्याभ्यां पूर्णाहुतिः तस्मा आचार्यो याज्योषधीरिति सर्वौषधीः समर्च्य संपातो
दकं देवमंत्रेण शतवारमभिमंत्र्य तेनैवाभिषिंचेत् तत उत्तिष्ठेति देवमुत्थाप्य विश्वतश्च
क्षुरित्युपस्थाय देवं ध्यात्वा जपेद्ब्रह्मणे नमः एवं विष्णवे रुद्राय इंद्राय इंद्रादीनष्टौ वसु
भ्यो रुद्रेभ्यो आदित्येभ्यो अश्विभ्यां मरुद्भ्यः कुबेराय गंगादिमहानदीभ्यो गनी सोमाभ्यामिं

218-A

द्राग्निभ्यां द्यावापृथिवीभ्यां धन्वन्तरये सर्वेशाय विश्वेभ्यो देवेभ्यो ब्रह्मणे इति ततः सं
पातोदकेन यजमानमभिषिच्य देवं ध्यात्वा प्रतिष्ठ परमेश्वरेति पुष्पांजलिं निवेद्य स
च्चिदानंदं ब्रह्मैव भक्तानुग्रहाय गृहीतविग्रहं करचरणाद्यवयविनं शंखचक्रा
युधवंतं निजवाहनाद्युपेतं निजहृत्कमले वा स्थितं सर्वलोकसाक्षिणमखिलार्थयांसं परं
मेव्यासिपरमां [illegible] नामयेति मंत्रेण पुष्पांजलिं [illegible] विभाव्यार्चायां विन्यस्य प्राण
प्रतिष्ठां कुर्यात् यथा प्राणप्रतिष्ठामंत्रस्य ब्रह्मविष्णुरुद्रा ऋषयः ऋग्यजुःसामा(
नि छंदांसि क्रियामयवपुः प्राणाख्या देवता आं बीजं क्रों शक्तिः प्राणप्रतिष्ठायां वि
नियोगः ततो न्यासादीन् क्रमेण शिरोमुखहृदयगुह्यपादेषु विन्यस्य ओं कं खं गं
घं ङं अं पृथिव्यप्तेजोवाय्वाकाशात्मने आं हृदयाय नमः ओं शब्दस्पर्शरूप
रसगंधात्मने शिरसे स्वाहा ओं टं [illegible] श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मने ओं शि
खायै ओं तं [illegible] वाक्पाणिपादपायूपस्थात्मने ऐं कवचाय हुं ओं पं [illegible] वच
नदानविहरणोत्सर्गानंदात्मने क्रों नेत्रत्रयाय ओं यं रं लं वं शं षं सं हं लं क्षं अं मनो
बुध्यहंकारचित्तात्मने अः अस्त्राय फट् एवं आत्मनि देवे च कृत्वा देवस्य हृद्याज
पेत् ओं आं ह्रीं क्रों यं रं लं वं शं षं सं हं सः देवस्य प्राणा इह प्राणाः ओं आं हं सः देव(

स्यजीवइह स्थितः ॐ आं ह्रीं हंसः देवस्य सर्वेंद्रियाणि इह स्थितानि ॐ आं ह्रीं हंसः देवस्य
वाङ्मनश्चक्षुःश्रोत्रघ्राणप्राणा इहागत्य स्वस्तये सुखेन सुचिरं तिष्ठंतु स्वाहेति
ततो चार्घ्यं गंधं दत्वा जपेत् अस्यै प्राणाः प्रतिष्ठंतु अस्यै प्राणाः प्रतिष्ठंतु अस्यै प्रा
णाः क्षरंतु च अस्यै देवत्वमर्चायै मामहेति च कश्चनेति ततः प्रणवेन संरुध्य सजी(
वं ध्यात्वा ध्रुवा द्यौरिति मंत्रं च जप्त्वा कर्णे गायत्रीं देवमं
त्रं च जप्त्वा पुरुषसूक्तेनोपस्थाय पादनाभिशिरःसु स्पृष्ट्वा इह देव धा(?)ति त्रिर्जपेत् ततः
कर्ता स्वागतं देवदेवेश मद्भाग्यात्त्वमिहागतः प्राकृतं त्वं मदृष्ट्वा मा बालवत् परिपालय
धर्मार्थकामसिद्ध्यर्थं स्थिरो भव शुभायनः तावत्त्वयात्र देवेश स्थेयमस्मानुकंपया
भगवन्देवदेवेश त्वं पिता सर्वदेहिनां येन रूपेण भगवं स्त्वया व्याप्तं चराचरं तेन रूपेण
देवेश स्वार्चायां सन्निधो भवेति नमेत् एतदंतं सर्वदेवादेवानां समानं देवसंत्र मूलमंत्रो
वैदिको वागमाद्यः अथाचार्यः कर्ता वा लिंगमर्चां वा ॐ भूः पुरुषमावाहयामि ॐ
भुवः ॐ स्वः ॐ भूर्भुवः स्वरावाहयामीत्यावाह्य प्रणवेनासनं दत्वा तेनैव दूर्वाश्यामाक
पप विष्णुक्रांतातिलमिश्रं पाद्यं इमा आपः शिवतमाः पूताः पूततमा मेध्या मेध्यतमा अमृता
अमृतरसाः पाद्यास्ता जुषतां प्रतिगृह्णातु भगवान्महाविष्णुर्विष्णवे नमः इति पाद्यं भग
वान्महादेवो रुद्रायनमः इति लिंगे इमा आपः आचमनीयास्ता जुषतामित्याचमनी

219-A

यं अर्घो इत्यर्घं ततो वेदमंत्रैः संसाध्येदं विष्णुरिति विष्णोर्नमोऽस्तु नीहग्रीवायेति लिं
गे प्रतिसरं विसृजेत् इमे गंधाः शुभा दिव्याः सर्वगंधैरलंकृताः पूता ब्रह्मपवित्रेण पूताः
सूर्यस्य रश्मिभिः पूता इत्यादि पूर्ववत् इति गंधं इमे माल्याः शुभा दिव्याः सर्वमाल्यै
रलंकृताः पूता माल्यानि इमे पुष्पाणि इति पुष्पं वनस्पतिरसो धूपो गंधाढ्यो धूप उत्तमः आ
घ्राणः सर्वभूतानां धूपोऽयं प्रतिगृह्यतां प्रतिगृह्णात्वित्यादि धूपं ज्योतिः शुक्रं च तेजश्च
देवानां सततं प्रियः प्रभाकरः सर्वभूतानां दीपोऽयं प्रतिगृह्यतां इति दीपं दत्वा विष्णोः संक
र्षण वासुदेव प्रद्युम्नानिरुद्ध पुरुषोत्तमाधोक्षज नरसिंहाच्युत जनार्दनोपेंद्र हरि कृष्णेति
द्वादशनामभिः पुष्पाणि समर्प्य तैरेव तर्पणं कृत्वा पायसगुडोदनचित्रोदनानि पवित्रे
ते विततमिति निवेद्य कृशरं पूर्वोक्तनामभिर्हुत्वा तेनैव शार्ङ्गिणे श्रियै सरस्वत्यै विष्व
वे इति हुत्वा विष्णुर्नैकं तदस्य प्रियं प्रतद्विष्णुः परो मात्रया विचक्रमे त्रिर्देव इति जुहु
यात् लिंगे [illegible] ततः कृत्वा भवाय देवाय शर्वाय ईशानाय पशुपतये रुद्राय उग्राय भी
माय महते देवाय नम इति पुष्पाणि दत्वा तैरेव तर्पणं कृत्वा पवित्रं ते इति पायसं गुडो
दनं च निवेद्य पूर्वोक्तनामभिः कृसरं हुत्वा भवस्य पत्न्यै स्वाहेत्याद्यष्टभिः गुडोदनं हु
त्वा भवस्य देवस्य सुताय स्वाहेत्याद्यैः हरिद्रोदनं हुत्वा त्र्यंबकं मनो महांतं मानस्तोके
आराते गोघ्न विकिरिद्र विलोहित सहस्राणि सहस्रशः इति द्वादश एतैर्हुत्वा शिवा

य शंकराय सहमानाय शितिकंठाय कपर्दिने ताम्राय अरुणाय अपगुरमाणाय (
हिरण्यबाहवे सस्पिंजराय बभ्रुशाय हिरण्याय इति च जुहुयात् ततः स्विष्टकृदादि शेषं
समाप्य पूर्वोक्तिसर्वहविर्भिर्विष्णवे लिंगाय वा बलिं दद्यात् मंत्रस्तु त्वामेकमाद्यं पुरु
षं पुरातनं नारायणं विश्वसृजं यजामहे त्वमेव यज्ञो विहितो विधेयस्त्वमात्मनात्म
न् प्रतिगृह्णीष्व हव्यमिति लिंगे तु नारायणपदे रुद्रं शिवमिति वदेत् ततो ब्रह्मस्य परोग्नि
र्भुवः स्वरोमिति हुतशेषं निधाय प्रदद्यात् द्वादशानि सुवर्णकांचनागां दत्वा ऋत्विग्भ्यो यदि दक्षि
णां दत्वा शतं द्वादश वा विप्रान् भोजयेदिति संक्षेपः प्रसादमात्रेण तु नेनैव मात्स्योक्तं जल(
लाशय प्रतिष्ठाविधिमेव कुर्यात् गोरुत्तारणपात्री प्रक्षेपादि तु न भवति द्वारलोपात्
वारुणहोमस्थाने वास्तुहोमः अन्यत्तद्वदेव ॥ इति भट्टकमलाकरकृते लिंगार्चा
प्रतिष्ठाविधिः अथ पुनः प्रतिष्ठा ॥ तामाधिकृत्य हयशीर्षपंचरात्रे चंडलामयसंस्प
र्शदूषिता वह्निना अथवा अप्युण्यजनसंस्पृष्टा विप्रस्तु तत्र दूषिता संस्कार्येति शेषः पदा
र्पादशैलप्रासले खंडिते स्फुटिते दग्धे भ्रष्टे मानविवर्जिते यागहीने पशुस्पृष्टे प(
तिते दुष्टभूमिषु अन्यमंत्रार्चिते चैव पतितस्पर्शदूषिते दशस्वेतेषु नो चक्रुः सन्निधानं
दिवौकसः यागः पूजा पशुमर्दनादिषु तत्रैव पंचरात्रे खंडिता स्फुटिता दग्धा यस्मा
दर्चा भयावहा तस्मात्समुद्धरेत्तां पूर्वोक्तविधिना नरः सिद्धांतशेखरे चौरचंडा

220-A

लपतितस्रोदक्यास्पर्शने सति शिवाद्युपहतौ चैव प्रतिष्ठां पुनराचरेत् पंचरात्रेऽर्चायां
नादिसंस्थाने प्रतिष्ठां पुनराचरेत् जलाधिवासचिह्नितेनोन्मीलनवर्जितां शुद्धि
विवेके विष्णुः द्रव्यवत्कृतशौचानां देवतार्चानां भूयः प्रतिष्ठापनेन शुद्धिरिति अर्चाः
प्रतिमाः तत्र द्रव्यस्पर्शनादेः कृतशौचं कृत्वा पुनः प्रतिष्ठां कुर्यात् यदि त्वर्चः स्पृष्ट्वार्चस्य सा
रे त्वेतत् तद्विधिर्बौधायनसूत्रे पूर्वं प्रतिष्ठितस्याशुद्धिः पूर्ववमेकरात्रं द्विरात्रमेकमासे द्वि
मासं च अर्चनादिविच्छेदे शूद्ररजस्वलाद्युपस्पर्शने जलाधिवासं कृत्वा कलशेन स्नापयेत् ।
ततः पंचगव्येन परं शुद्धोदकेन स्नापयेत् अष्टसहस्रमष्टशतमष्टाविंशतिं वा कलशैः पुरुष
सूक्तेन ततः पुष्पाणि दत्वा गुडौदनं निवेदयेदिति बुद्धिः पूर्ववत्तु विच्छेदे पूर्वोक्तां प्रतिष्ठां
पुनः कुर्यात् पूर्वोक्तविष्णुवचनात् इदं मलमासशुक्रास्तादावपि कार्यमिति मदनर
त्नेहेमाद्रौ च देवार्चाप्रासादभेदनेऽप्यमलपालिकारण्यः वापीकूपारामसेतुसभातडागवृक्ष
देवतायतनभेदेन प्रायश्चित्ते चतस्रश्चाहुतीर्जुहुयादिदं विष्णुर्मानस्तोके विष्णोः कर्मा
णि पादेनास्येति यादेवानामुत्सादयति तस्यै देवतायै ब्राह्मणान् भोजयेदिति शंखलि ।
खितौ प्रतिमारामकूपसंक्रमध्वजसेतूनिपानभेगेषु तत्समुत्थानं प्रतिसंस्कारोष्टश
तं चानिपानितानामिति समुत्थानं प्रतिक्रिया प्रतिसंस्कारः पुनः प्रतिष्ठा अष्टशतं पाला
देऽस्त्रेत्यर्थः अथ जीर्णोद्धारः स च लिंगादौ दग्धे भग्ने च क्षिते वाकार्यः अथ पंचानादिसि

द्वप्रतिष्ठितलिंगादौ भग्नादिदुष्टेपि न कार्यः तत्र तु महाभिषेकं कुर्यादिति त्रिविक्रमः कर्मा
मकदेवस्य जीर्णोद्धारं करिष्ये इत्युक्त्वा पुण्याहं वाचयित्वाचार्यमृत्विजश्च वृत्वा लिंगे ॐ व्या
पकेश्वर शिरसे स्वाहेत्येवं षडंगन्यासं कृत्वाऽघोरमंत्रेण तत्त्वशक्तिप्रतिष्ठाप्याघोरेण घृतसर्षपैः
सहस्रं हुत्वेंद्रादिभ्यो नाम्ना बलिं दत्वा जीर्णादेवं प्रणवेन संपूज्य ब्रह्मादिमंडलदेवानां होमं
पूर्वोक्तं कृत्वा देवं प्रार्थयेत् जीर्णं भग्नमिदं चैव सर्वदोषावहं नृणां अस्योद्धारे कृते शांतिः
शास्त्रेस्मिन्कथिता त्वया जीर्णोद्धारविधानं च न्यपरांस्त्वहितावहं तदधितिष्ठतो देव प्रहरा
मितवाज्ञयेति ततः क्षीराज्यमधुदूर्वाभिः समिद्भिश्चाष्टोत्तरशतं देवमंत्रेण हुत्वा सहस्रं च
हुत्वा पायसेन शं कृत्वा लिंगं प्रार्थयेत् लिंगरूपं समास्थाय येनेदं समधिष्ठितं यायास्त्वं सम्प्र
तं स्थानं संत्यज्यैव शिवाज्ञया अत्र स्थाने च याधिसर्वाधीश्वरे यंता शिवेन सह संतिष्ठेत्तिमं
त्रितजलेनाभिषिच्य विसर्जयेत् ततोस्त्रमंत्रितेन खनित्रेण खात्वा लिंगमादाय नद्यादौ वंम
देवेन लिंगं प्रणवेन मस्त्रं निक्षिपेत् दारुजं तु मधुनाभ्यज्याघोरेण दहेत् हेमरत्नादिमयं तु द
ग्धं च शिवाद्युनस्तत्रैव स्थापयेत् ततः शांत्यै अघोरेण तिलैः सहस्रं हुत्वा प्रार्थयेत् भगव
न्भूतभव्येश लोकनाथ जगत्पते जीर्णलिंगसमुद्धारः कृतस्त्वदाज्ञया मया अग्निना दा
रुजे दग्धं क्षितं शैलादिकं जले प्रायश्चित्ताय देवेश अघोरास्त्रेण तर्पितं ज्ञानतो ज्ञा
नतो वापि यथोक्तं न कृतं यदि तत्सर्वं पूर्णमेवास्तु त्वत्प्रसादान्महेश्वरेति ततोपज

मानः प्रार्थयेत् गोविप्रशिल्पिमुख्यानामाचार्यस्य च यद्बलः शांतिर्भवतु देवेशस्य धिद्रंजा
पतामिदं मर्त्यानां तु विशेषः त्वत्प्रसादे न निर्विघ्नं देहं निर्माय यत्यसौ वासं कुरुष्व रम्ये
ह्यतानंतं चाल्पकेगृहे वसत्वं कोशं सहितेविहरस्व निर्वितस्वैवत् यावत्कारयते भक्तः ।
कुरु तस्य च वांछितमिति ततो नवां मूर्त्तिलिंगं वा क्वचित्प्रोक्तविधिना स्थापयेत् मत्स्यचैचि
पुराणे स्पष्टं इति जीर्णोद्धारः अथ तुलसीग्रहणं देवयाज्ञिककृते स्मृतिसारे वैधृतौ च
व्यतीपाते भौम भार्गव भानुषु पर्वद्वये च संक्रांतौ द्वादश्यां सूतकद्वये तुलसीं ये विचि
न्वंति ते छिंदंति हरेः शिरः विष्णुधर्मोत्तरे रविवारं विना दूर्वां तुलसीं द्वादशीं विना
जीवितस्याविनाशाय प्रविचिन्वीत धर्मवित् तथा संक्रांतावर्कपक्षांते द्वादश्यां नि
शि संध्ययोः ये छिंदंति तुलसीपत्रं ते छिंदंति हरेर्मस्तकं पाद्मे द्वादश्यां तुलसीपत्रं धात्रीप
त्रं च कार्त्तिके लुनाति स नरो गच्छेन्निरयानतिगर्हितान् रुद्रयामले द्वादश्यां च दिवास्वा
पस्तुलसीवचयस्तथा विष्णोश्चैव दिवास्नानं वर्जनीयं सदा बुधैः विष्णुधर्मे न छिंद्यात्
तुलसीं विप्रा द्वादश्यां वैष्णवः क्वचित् देवार्थे तुलसीछेदो होमार्थे समिधां तथा इंदुक्षये
न दुष्येत गवार्थे तु तृणस्य च ग्रहणमंत्रस्तु पाद्मे तुलस्यमृतजन्मासि सदा त्वं केशवप्रिये
केशवार्थे विचिन्वामि वरदा भव शोभने इति पारिजाते दक्षः समित्पुष्पकुशादीनां द्वि
तीयः प्रहरामतः अथ पुष्पादेः पर्युषितत्वं भार्गवार्चने भविष्ये प्रहरं तिष्ठते जाती कर

नि॰ सिं॰
२२२

222

ग॰ १

वीरमहर्निशं तुलस्यां बिल्वपत्रेषु सर्वेषु जलजेषु च न पर्युषित[illegible]दोषोऽस्ति मालाकारगृहे
पि च बृहन्नारदीये वर्ज्यं पर्युषितं पुष्पं वर्ज्यं पर्युषितं जलं न वर्ज्यं तुलसीपत्रं न वर्ज्यं जाह्न-
वीजलं तत्रैव पाद्मे तुलसी पर्युषिता नैव बिल्वं तु त्रिदिनावधि पद्मं पंचदिनात्याज्यं शेषं
पर्युषितं विदुः स्कांदे पालाशं दिनमेकं तु पंकजं च दिनत्रयं पंचाहं बिल्वपत्रं च दशाहं तुल-
सीदलं पदार्थादर्शे राघवभट्टस्त्वन्यथा बिल्वाया मौ गं जा मौ तुलसिकशतैः केतकी भृंग दूर्वा
मंदा भौ जा मे दर्भा मुनि तिल न गौर ब्रह्मक रमन्नी चंपा श्वाराति कुंभी दमनम रुच का बिल्वतो
हानि शस्ता त्रिंशत् ३॰ अ ३ का २ धी ६ शो ११ दधि ४ नि पि ९ वसु ८ भू १ भू १ यमा २ भू य एवं अ-
स्यार्थः शता शतावरी मंदः मंदारः अहिर्नागकेसरः मुनिरगस्त्यः अश्वारातिः करवीरः कुं-
भी पाटलेति केदेवनिर्णये अरयः षट् षट् ईशाः एकादश उदधयश्चत्वारः निधयो नव वद
सवोऽष्टौ भूरेकः यमौ द्वौ बिल्वमारभ्याहि पर्युषितगणना यित्वा दर्भामारभ्य पुनस्त्रिंशदादिगण-
येदेत्यर्थः एतद्दिनेत्तरं पर्युषितानीत्यर्थः होडरानंदे स्कांदे मनुमुपक्रम्य तस्य माला भग-
वतः परमप्रीतिकारिणी शुष्का पर्युषिता वापि न दुष्टा भवति क्वचित् तिथितत्वे मात्स्ये
बिल्वपत्रं च माध्यं च तमालामलकीदलं कल्हारं तुलसी चैव पद्मं च मुनिपुष्पकं एतत्प-
र्युषितं न स्यात् कुरण्टक[illegible]कालिकास्तथा [illegible]रतिसारावल्यां जलजानां च सर्वेषां पञ्जाणामा-
स तस्य च कुरण्टकस्य[illegible]जातस्तु वर्णि[illegible]तयोरपि न पर्युषितदोषोऽस्ति तीर्थतोयस्य चैव

राम
२२२

222-A

मकुलैर्नार्चयेद्देवं चंपकैर्नलजैर्विना ॥ अथ शिवनिर्माल्यनिर्णयः सिद्धांतशेख
रे धराद्रिरत्नमारत्नताम्ररौप्यांशुकादिकान् विहाय शैवं निर्माल्यं चंडेशाय नि
वेदयेत् अन्यद्वस्त्रादि पानीयं तांबूलं गंधपुष्पकं दद्याच्चंडाय निर्माल्यं शिवभु
क्तं तु सर्वशः अथापि शिवचंडनामाज्ञाभंगे न लक्षकं धनस्य भक्षणे तेषां पादो न लक्षमी
रितं निर्माल्ये भक्षिते लक्षयादतः शुद्धिरीरितः दानं च भक्षणात्समं तदर्धं तदुपक्षणे १
अकामाद्भक्षणे यद्वा निर्माल्यस्य जपेत्सुधी ब्रह्मपंचकसहस्रं धर्मेण साहितं ततः काम
तो भक्षणे दीक्षाप्रायश्चित्तं न चान्यतः निर्माल्यलंघने घोरे पूजयेदयुतं ततः स्पर्शाल्लंघ
न समो विक्रयो भक्षणेन च स्मृतः त्वर्थसारेऽपि शैवसौरनिर्माल्यनैवेद्यभक्षणे चांद्र
अभ्यासे द्विगुणं मत्याभ्यासे प्रतनं अन्यनिर्माल्येष्वनापद्येवमिति इदं च ज्योति
र्लिंगाद्यतिरिक्तविषयं तथा च पुरुषार्थप्रबोधे भविष्ये ज्योतिर्लिंगं विना लिंगं
यः पूजयति सत्तमाः तस्य नैवेद्यनिर्माल्यभक्षणात्तप्तकृच्छ्रकं शालिग्रामोद्भवे
लिंगेर्बाणलिंगे स्वयंभुवि रसलिंगे तथार्षे च सुरसिद्धप्रतिष्ठिते हृदये चंद्रकां
ते च स्वर्णरूप्यादिनिर्मिते शिवदीक्षावता भक्तेनेदं भक्ष्यमितीर्यते तथा बाण
लिंगे स्वयंभूते चंद्रकांते हृदि स्थिते चांद्रायणसमं ज्ञेयं शंभोर्नैवेद्यभक्षणम्

लिंगेस्वयंभुवेबाणेरत्नजेरसनिर्मिते सिद्धप्रतिष्ठितेचैवनचंडाधिकृतिर्भवेत् १
यत्रचंडाधिकारोस्तितद्भोक्तव्यंनमानवैः चंडाधिकारोयत्रभोक्तंतन्नभक्तितः त्रै१
विक्रम्यां बाणलिंगेचलोहेचसिद्धलिंगेस्वयंभुवि प्रतिमासुचसर्वासुनचंडोधिकृ
तोभवेत् अत्रब्रह्महत्यापिप्रायश्चित्ताचानिर्माल्यंयस्तुधारयेत् तस्यापापंमहद्घोरंना
शायिष्येमहाव्रतेतिस्कांदात् अमुचिनानग्राह्यंशिवनिर्माल्यंकिंतुस्नात्वेतिस्मार्त्ताः अनुप
नीतेनग्राह्यमिति श्रीदत्तः शिवदीक्षाहीनैर्नग्राह्यमितिशैवाः त्रिस्थलसेतौहेमाद्रौपारि
शिष्टे अग्राह्यंशिवनैवेद्यंपत्रंपुष्पंजलंफलं शालग्रामशिलासंगात्सर्वंयातिपवि
त्रता पंचायतनपूजायांतत्रैवनिवेदितमित्यर्थः शिवपुराणे येवीरभद्रशापिताः शिव
भक्तिपराङ्मुखाः शंभोरन्यत्रदेवेषुयेभक्त्यायेनदीक्षिताः तेषामनर्हमीशस्यतत्प्रसाद
चतुष्टये काशीखंडे जलस्यधारणंमूर्ध्निविश्वेशस्नानजन्मनः एषजालंधराबंधःस
मस्तसुखवल्लभः तथा स्नापयित्वाविधानेनयोलिंगस्नपनोदकं त्रिःपिबेत्त्रिविधंपापं१
तस्येहाशुविनश्यति लिंगस्नपनवार्भिर्यःकुर्यात् मूर्धाभिषेचनं गंगास्नानफलंत
स्यजायतेत्रविपाप्मनः इदंपूर्ववाक्यवशात् विश्वेशरविषयमितिकेचित् काशीस्थ
पुराणप्रसिद्धसर्वलिंगविषयं काशीखंडरत्नेसर्वव्याने तथैवदर्शनादित्यन्ये अथ
कृच्छ्रमहार्णवमार्तंडः अरकोदतरयोम्र्वेदमवमघा स्नलान्तराधामिश्री प्राजापत्यकर

हि दैवतत्रउरुप्रालयेयपादेषु च निर्हेषे हयमे हलेक्ष समनो मालाभिस्यार्चितैर्दत्वा
क्षेत्रपतेर्वलिंहरधरः क्षेत्रं ततः कर्षयेत् प्राजेशश्रवणोत्तरादितिमघामार्तंडतिष्या
श्विनीपौष्णानुभमरीचय शतभिषक् स्वाती विशाखवात्तया जीवार्केंदुसितेंदुनं
दनदिने लग्नेव सौम्योदये सस्यानां वपनं तथैव लग्नेशस्तास्त्यारोपणे चंडेश्वरः
हस्तचित्रादितिस्वातीरेवत्याश्रवणत्रये स्थिरलग्ने गुरोर्वारे वीजधार्यं तु ऋ
योः ॐ धनदाय सर्वलोकहिताय देहि मे धान्यं स्वाहा लेखयित्वा रमेत्र मंत्र धान्यागारे
निधापयेत् सस्यवृद्धिं परां कुर्यात् सृजितं प्रतिसृजयेत् दक्षिणादिङ्मुखगमनंगमनमि
नवासु नारीषु व्ययमपि सस्य धान्यानां नवधान्य धवासरे केषुः शनिवारे च नो कार्यो
धनधान्यव्ययो बुधेः अथ वस्त्रीपतिः रोहिणीषु करपंचके श्विने श्वुत्तरासु च पु
नर्वसुद्वये रेवतीषु वसुदैवते च भेन नव्यवस्त्रपरिधानमिष्यते जीर्णं रवौ सततमेव बु
भिराद्रमिंदौ मैमेषु चैव बुधदिने तु भवेद्धनाय ज्ञानाय मंत्रिणि भृगोप्रियसंगमा
यमंदे मलाय च नवांवरधारणं स्यात् रोहिणीगुरुपुनर्वसूत्तरेषा विभ ति नव च सु
श्रवणे स्नानयोषिद्वलं च तैयति स्नानमाचरति वारुणे प्रिया अथालंकारवलयादि
देवतं वल्लभः नासत्यपुष्यवसुभिः करपंचके न मार्तंड भौम गुरु दानव मंत्रिवारे
मुक्तासुवर्णमणिविद्रुमशंखदंतरक्तांवराणि विधृतानि भवंति सिद्ध्यै ज्योतिर्नि

वंधे हस्तानुराधमृगाश्विधनिष्ठपुष्याचित्रोत्तरासु च पुनर्वसुरोहिणीषु लग्ने स्थि
रे रविसुतेंदुजजीववारे हेमादिधारणविधिः कथितोत्तराणां तत्रैव चक्रीपतिः पौ
ष्णाश्विनीवसुकराधिषु पंचभेषु कौसुंभहेममणिविद्रुमकाचशंखाः नार्या
धृताः सुमरवार्थकरा भवेति त्र्युत्तरादितिगुरुश्च सुरवाय भर्तुः तत्रैव शंखवादिवर
रत्नानि पुष्यादितयुत्तरासु च रोहिण्यां नैव गर्हितं भर्तृजीवितकांक्षिणी अथ पस्सूची
कर्म वासवादितिन्तराश्व मैत्रे चेंद्राश्विनीषु च सूचीकर्म तन्तुवालोमेभिः स्मृतैः प्रश
स्यते अथ शय्या हस्तादितिमखगुरूत्तराणि पौष्णाश्विसलेंदुभचित्रभानि वारे कुजीवेंदु
सिते दुजानां शय्यासमारंभणमुत्तमं स्यात् अथ परास्त्रधारणं पुष्ये चादितिचित्रपवनान
ये शाक्रोत्तरा रेवती स्वाती वाजि विशाखमित्रसहिते भानौ गुरौ भार्गवे कुंभे कीटवृषे मृ
रव
गपतौ चेंदौ मृगे वा सिते सन्नाहः शरखड्गभल्ककुंतधुरिकाधार्यो नृपाणां हिता अथ स्वामि
सेवा अथ चंडेश्वरः रोहिण्युत्तरपौष्णे श्रवसुवासवपाणयोरपि सेवेत स्वामिनं भृत्यः श्रु
भवारोदये तथा ज्योतिर्निबंधे दासीदासादिभृत्यानां कुर्यात्संग्रहणं बुधे स्थिरलग्ने मृ
मैत्रे दृष्टे मंदवारे विशेषतः अथ गजाश्वदोलासरथ पौष्णप्रजेशादितिभद्वयान्हस्ता
दिवह्न्यश्ववणोत्तराणि दोलादिमातंगतुरंगमाणरोहणे भीष्टफलप्रदानि अथ
नृत्यं हस्तः पुष्यो वासवरोहिणी च ज्येष्ठा पौष्णं वारुणं चोत्तराश्च सर्वाचार्यैः की

224-A

तितकुरुवर्तीन्नत्यारंभे शोभनोयं भागैव ॥ अथ राजदर्शनं श्रीपतिः मृगाश्विति
ष्यश्रवणचित्राहस्तधनवत्याष्टाभसदभानि मैत्रेणयुक्तानि नरेश्वराणां विलोकने भा
नि शुभप्रदानि ॥ अथ क्रयविक्रयौ भाद्रद्वयत्रिदशमंत्रिदिवाकरेषु मूलानि लोनरत्न
रंगामरेवतीषु सारंयाणिरजनीकरमैत्रभेषु लाभैः सदैव भवति क्रयविक्रयाभ्यां वस्त्रेतु
चित्राधनमित्रास्वातीरेवतीचाश्विनी शुभा ॥ श्रवणश्रुतया प्रोक्तो वस्त्राणां क्रयणे शुभः
अथ सेवाः स्वातीयुक्ते मंदवारे हयलग्ने शुभे दिने सेवनं वधने कार्यं ध्रुवभे चार्कजवयोः
अथ पशुक्रयं श्रीपतिः चित्रौरौवैसमवरो हि एणोषुचतुर्दशी दर्शादिनाष्टमीषु स्थानं प्रवे
शं गमनं विदध्यात्पशुमानुपश्नांनकदाचिदेव ॥ चंडेश्वरः हस्तमूलविशाखवासुरेवत्यामव
रोत्तया मैत्रे च वारुणोश्विष्य क्रयणमुच्यते पूर्वात्रयाम्रतमघर्क्षवह्नुर्तशानेषु रुद्राग्निवाजिव
सुवासणं शंकरेषु एतेषु गोमहिषदंतितुरंगमादिनानाप्रकारपशुजातिगतिः प्रशस्ता
अथ गजदंतच्छेदः ज्योतिर्निबंधे त्वाष्ट्रे वैष्णव अश्विन्यामादित्ये वसुदैवते दंतिनां शुभं दं
कर्मसु ब्रह्महस्ते च कीर्तितं ॥ अथ निक्षेपः भरणीत्रीणि पूर्वाणि प्राद्रौश्लेषा मघानत्याचि
त्राज्येष्ठा विशाखा च मूलं मृगपुनर्वसू एभिर्दत्तं प्रयुक्तं च यच्च निक्षिप्यते धनं पश्च
तो धावमानस्य धनिनो पपद्यते ॥ अथ ऋणमोक्षः श्रीधरः वागीशमंददिवसां वाकल

त

गुरुयुक्ते रिक्तासु मंददिवसे कुलिकोदये च मैत्रद्वितीयपदमैत्रमुहूर्ते युक्ते राशयुग्मे च क्षण
मोक्षमुशंतिसंतः ॥ अथ राजमुद्रा ॥ मृदुध्रुवक्षिप्रचरेषु भेषु योगे प्रशस्ते शनिचंद्रवर्ज्यैवारे तिथौ
योषणीजयाढ्ये च मुद्राप्रतिष्ठाशुभदा हि राज्ञां ॥ अथ नौः ॥ चंडेश्वरः ॥ पौष्णाश्विनीतुरगवारुणमित्र
चित्रासौम्यानिलधनिष्ठावसवोनलं च त्यक्त्वा शनिवारे च जीवभृगुनंदनके प्रशस्ते नौकादि संघटनं ।
चित्रासौम्यानिलश्रवणाद्या वसवानलांत्यमघाः नि वारेच जीव भृगुनंदनके प्रशस्ते नौका दि संघटनं ।
वाहनमेषु कुर्यात् ॥ अथ भोगः ॥ गुरुभरविभानुराधाविधातृपौष्णाश्विरोहिणी स्यात् स्वो
वाहनमेषु कुर्यात् ॥ अथ भोगः ॥ गुरु भर विभानुराधा विधातृ पौष्णाश्वि रोहिणी स्यात् स्वो
द्वारासकुर्याच्छयनासनभोगभोगादि ॥ अथ स्मश्रुकर्म ॥ श्रीपतिः ॥ पुष्ये पौष्णे चाश्विनी ष्वेदं
वे च शाक्रे हस्तत्रये त्रिके भेष्वदित्यां क्षौरं कार्यं वेष्णवादित्रये च मुक्त्वा भौमादित्ययातां गिवारान् न
स्नातमुक्तो त्कटभूषितानामभ्यक्तयात्रासमरोत्सुकानां क्षौरं विदध्यान्निशिसंध्ययो वा जिजी
विषुः लां न वमे न वाह्नि ॥ त्रिस्थलीसेतौ वृद्धगार्ग्यः ॥ रव्यारसौरवारेषु रात्रौ पाते व्रताहनि श्रा
द्धाह प्रतिपद्रिक्ता भाद्राः क्षौरेषु वर्जयेत् ॥ गार्ग्यः ॥ षष्ठ्यमावास्यांनिशि पाते चतुर्दश्यष्टमीतथा
आसु संनिहितं पापं तिष्ठते तैलमांसयोः क्षुरे ॥ राजमार्तंडः ॥ देवकार्ये पितृश्राद्धे रवेरंशापरिक्षये ।
क्षौरकर्म न कुर्वीत जन्ममासे च जन्मभे ॥ बृहस्पतिः ॥ राजकार्ये नियुक्तानां नराणां भूप
जीविनां श्मश्रुलोमनखच्छेदे नास्ति कालविशोधनं ॥ तथा क्षौरं नैमित्तिकं कार्यं निषे
धे सत्यपि ध्रुवं पात्रादिमृति दीक्षासु प्रायश्चित्ते च कीर्तितं ॥ केचित्तु नरा द्वैमन्यथा पठंति
मुंडनस्य निषेधेपि कर्तनं तु विधीयते इति नारदः ॥ नृपाविप्राज्ञयायज्ञेमरणेवंधे

मोक्षणे उद्वाहे रविलवारर्क्षतिथिषु क्षौरमिष्टं भारते प्राङ्मुखश्मश्रुकर्माणि का
र्याणि समाहितः उदङ्मुखो वाथ भूत्वानयानुपूर्व्विं दत्तेमहन्त अपरार्के उदङ्मुखः प्राङ्मु
खो वा वपनं कारयेत्सुधी केशश्मश्रुलोमनखान्युदक्संस्थानि वापयेत् दक्षिणं कर्म
मारभ्य धर्मार्थपापसंक्षये शिखाद्यं नवसंस्कारे शिखाद्यंतं शिरोवपयेत् यतीनां तु विधे
योनिगमे कक्षोपस्थशिखावर्जं अरत्नुसंधिषु वाययोदिति अन्येपि विधिप्रतिषेधाः
प्रागुक्ताः अथ धनसंग्रहः त्रसातिलार्कमघमूलत्रिपूर्वरौद्रयोग्यानुराधगुरुविष्णु
विशाखयुक्ते वारेकुजार्कभृगुनंदनसोमजानां श्रेष्ठं धनस्यकरणं भवति प्रशस्तं अ
थनवान्ने श्रीपतिः रेवतीमृगतिपुनर्वसुहस्तश्रवण पयगापिहितीयेव अत्रेषुग
दितंयपुकानां प्राशनेनवचान्नविधाने अथनवभोजनपात्रे ज्योतिर्निबंधे भो
ज्यपात्रेसुधासिंधौयद्येद्वा समाहरेत् तत्रान्नप्राशनप्रोक्ते कालेभोजनमाचरेत् अ
थनवपर्णफलादिभक्षणे चंडेश्वरः मूलाश्विमैत्रकरातिष्यहरींदुभेषुपोष्णोत्तरैंदवपु
नर्वसुवासवेषु वारेषु भूमितनयार्कजवारवर्जं तावत्कनूतनफलाद्यशने हिताय
अथ होमे आहुतिपातः ज्योतिषे तरणिविडुगुभास्करिचंद्रमाकुजसुरेज्य विधु
तुंदकेतवः रविभतो दिनभं गणयेत्क्रमात् प्रतिखगं त्रितयं त्रितयं न्यसेत् दिनकरा
र्किंतमः कुजकेतवो हुतभुजोनभसोस्त्वितरे शुभाः दहनचक्रमिदं प्रविलोक्यतोहवन

कर्मणि सर्वसमृद्धये अत्र शांतिरुक्ता विष्णुधर्मे क्रूरग्रहसमुत्थे चैव संजाते ह्यवने अ
मे शांतिं विधाय गां दद्याद्ब्राह्मणाय कुंडं विने आयसीं प्रतिमां कृत्वा निक्षिपेत्ताम
धोमुखीं गोमूत्रमधुगंधाद्यैरर्चितां प्रतिमां ततः स्वस्थानं निधाय संप्रज्वल्य तत्र होमो वि
धीयते अत्रापवादः क्रियासारे नित्ये नैमित्तिके दुर्गाहोमादौ न विचारयेत् अथ ज्व
रादौ फलं श्रीपतिः स्वात्यश्लेषार्द्रासु सर्वासु शाक्रे रोगोत्पत्तिर्जायते यस्य पुंसः तद्वैद्य
ज्याव्याहृतो निप्रपन्नः स्यादुग्धाश्लेषेन्द्रजन्मापि वैद्यः व्याध्युत्पत्तिर्यस्य पौष्णे समित्रे
प्राणेशाणे जायते तस्य कृच्छ्रात् वैश्वे सौम्ये रोगमुक्तिः स्तिमासार्द्धं शात्यास्या ह्वासराणे मघा
सु पक्षाद्धस्ते वासवे सद्धिदैवे मूलाश्विन्योरग्निधिष्ण्येन वाहात् याम्ये त्वाष्ट्रे वैष्णवे वा
रुणे वै नैरुज्यं स्यादहस्मेकादशाहात् ज्योतिषे सवन आहिर्बुध्न्येति ष्यसंस्रेयमारव्य
प्राजापत्यादित्ययोः सप्तरात्रात् ज्योतिषे एकाहानिर्धनेन्द्रे शातहस्तानिलाः वारुणावि
पत्यर्वनाः सप्तकाविलमपक्षमासयुगलं मासो म्रतिः पक्षकः द्वौ मासौ च विंशतिर्द्दि
शानि सीः पक्षांतपक्षानखा मासो पक्ष नखां दशांतपक्षककुभः पीडादिनान्यश्वि
भात् दैवज्ञः उ वरुणारौ द्वावासवेंद्वाविपर्वेयमदहन्तविशाखा पापवारेण युक्ता
तिथिषु नवमि षष्ठी द्वादशी वा चतुर्थी भवति मरणयोगो रोगिणां कालहेतुः १
के अत्र कुंभे हैमीं नक्षत्रदेवताप्रतिमां संपूज्य द्वादशदलेषु संकर्षणादि द्वादशाम्

र्त्तिः द्वादश्यादित्यान्वासंस्पृज्य दूर्वासमितिलक्षैराज्यैः गायत्र्या तद्दैवत्याये अष्टोत्तरेण

तं कृत्वा दध्योदनं बलिं दत्वाचार्याय गां प्रतिमां च दत्वा विप्रान् भोजयेदिति संक्षेपः विशे

षस्तु व्रतहेमाद्रौ पद्यादर्शे च ज्ञेयः अथ भैषज्ये चंडेश्वरः मूलानुराधमृगतिष्यपु

नर्वसौ च पौष्णाश्विनीश्रवणशाक्रकरगयेच वारेषु वाक्पतिसितेंदुदिने प्रशस्तं

भैषज्यभक्षणमभीष्टुदिने नराणां अथारोग्यस्नानं श्रीपतिः इंदौ वारे भार्गवे च(

ध्रुवेषु सार्पादित्यस्वातिपुष्येषु भेषु मैत्रे चांत्येवापि कुर्यात्कदाचिन्नैव स्नानं रोग(

निर्मुक्तजंतुः चरे विलग्ने रविभौमवासरे रिक्ते तिथौ स्याद्बहुले च पक्षे धिष्ण्ये च

रे रोगानिपीडितानां स्नानं नराणां नितरां तत्त्वकारि अथ दंतधावनं पृथ्वीचंद्रोदये विष्णुः

प्रतिपद्दर्शषष्ठीषु चतुर्दश्यष्टमीषु च नवम्यां भानुवारे च दंतकाष्ठं विवर्जयेत् ना

रदः चतुर्दश्यष्टमीयोर्मासीसंक्रमणेषु च नंदासु च नवम्यां च दंतकाष्ठं विवर्जये

न् श्राद्धे यज्ञे च नियमे तथा प्रोषितभर्तृका व्यतीपाते च संक्रांत्यां नंदाभूताष्टपर्व

सु तैलं भोगं रतिं मांसं दंतकाष्ठं च वर्जयेत् वशिष्ठः रात्र्यर्कशुक्रवारेषु कुजाहे न तवा

सरे जन्माहे श्राद्धदिवसे दंतकाष्ठं विवर्जयेत् हेमाद्रौ स्कांदे अभ्यंगे जलाधिस्नाने दंत

धावने मैथुने जाते च निधने चैव तत्कालव्यापिनी तिथिः संवर्त्तः रवौ विवाहे श्रा

शौचे वर्जयेद्दंतधावनं व्यासः अलाभे दंतकाष्ठानां निषिद्धायां तथा तिथौ अपां
द्वादशगंडूषैर्विदध्याद्दंतधावनं अथामलकस्नानं व्यासः श्रीकामः सर्वदा स्नानं कु
र्वीतामलकैर्नरः सप्तमीं नवमीं चैव पर्वकालं विवर्जयेत् चंद्रसूर्योपरागे च स्नान
मामलकैस्त्यजेत् ऋतुः षष्ठी च सप्तमी चैव नवमी च त्रयोदशी संक्रांतौ रविवारे च स्नान
मामलकैस्त्यजेत् यत्तु नवमी दशमी चैव तृतीया च त्रयोदशी प्रतिपद्द्वादशी हस्ता स्ना
नं तासु विवर्जयेत् पक्ष दर्शस्नानं न कुर्वीत मातापित्रोस्तु जीवतोः पुत्रः कुर्वन्नेराच
ष्टे पित्रोर्हन्ति जीवतोः इति कण्वयमाद्यैः स्नानमात्रं निषिद्धं तद्गौणार्थस्नानपरं न नि
त्यनैमित्तिकपरमिति हेमाद्रिः अथ तैलनिषेधः कात्यायनः पक्षादौ च रवौ षष्ठ्यां रि
क्तायां च तथा तिथौ तैलेनाभ्यंगमानस्तु चक्षुर्भिः परिहीयते गर्गः पंचदश्यां चतुर्दश्या
मष्टम्यां रविसंक्रमे द्वादश्यां सप्तमी षष्ठ्योस्तैलस्पर्शं विवर्जयेत् न च कुर्यात्तृतीयायां त्रयो
दश्यां तिथौ तथा शाश्वतीं गतिमन्विच्छन् शश्वत्साम्यामपि पंडितः तत्रैवायुर्वेदवत्सदि
नक्षये षष्ठ्यामेकादश्यां च पर्वसु द्वादश्यां च चतुर्दश्यां पंचम्यां प्रतिपत्तिथौ व्रते श्राद्ध
दिने जन्मत्रितये श्रवणाश्विपाः ज्येष्ठोत्तरा फाल्गुने च व्यतीपाते च वैधृतौ विष्टियोगे
च संक्रांतौ मन्वादिषु युगादिषु नाभ्यंगं तत्र बालानां वृद्धानां तु न दोषकृत् इति अथ स
रत्नावले संक्रांतिमन्वव्यतिपातवैधृतीषष्ठ्यष्टमीपर्वसु नार्कभूसुते स्नाने द्वितीया।

६

दशमीचगर्दिताचषष्ठ्यादिमापारादधावनेधमाः अस्यापवादमाह तत्रैवप्रचेताः ।
सार्षपंगंधतैलंयत्तैलंपुष्पवासितं अन्यद्रव्ययुतंतैलंनदुष्यतिकदाचन आयुर्वेदे नि
षिद्धतिथिवारर्क्षेग्रहणेष्वपिराजिष्णु किंचिद्विधृतउक्तंप्रयादरजान्वितं भानोर्दूर्वा
न्वितंभौमभस्मयुक्तंपुष्पयुग्गुरौ सर्वेषांसर्वदातैलंभ्यंगेवुनदुष्यति मंगलेष्वप्यदोषः
मंगलंयविधानेस्नानेवाद्धिस्वैतास्तवेषुच तेषुमात्रसमायुक्तंमध्याह्नान्त्राकृतंदिष्यतेइति
मदनपारिजातेकात्यायनात्रेः देमाद्रौवृहस्पतिः तैलाभ्यंगोनार्कवारेनभौमेनोसंक्रां
तौवैधृतौविष्टिवष्ट्योः पर्वस्वष्टम्यांचेष्टः प्रोक्तान्त्यक्त्वावासरेसर्पस्तनोः तिलस्नाननि
षेधस्तुः षट्त्रिंशन्मते नव्यासप्तम्यमावास्यासंक्रांतिग्रहजन्मसुधनपुत्रकलत्रार्थीतिल
पिष्टंनसंस्पृशेत् अथगृहारंभः ज्योतिर्निबंधेवादरायणः वैशाखेफाल्गुनेपौषेश्रा
वणेमार्गशीर्षके गृहारंभः शिलान्यासःस्तंभारंभःप्रशस्यते नारदः सौम्यफाल्गुनवै
शाखमाघश्रावणकार्त्तिकाः मासास्युर्गृहनिर्माणेपुत्रारोग्यधनप्रदाः ।। ज्योतिस्तत्वे
पूर्वापरास्यंमनभौत्ययोवेयाम्योत्तरास्यंसहसिद्धितोये कार्यंगृहेजीवबुधर्क्षगार्केनी
चास्तगेजीवसितेप्यच्यहित्वा रत्नमालायां कर्कनक्रहरिकुंभगतेर्के पूर्वपश्चिममुखा
निगृहाणि तौलिमेषवृषवृश्चिकयातेदक्षिणोत्तरमुखानिवदंति देवज्ञवल्लभ गो
कोधान्यंपंचताभिःपशुतेस्वामिनैःस्वंसंगरंभृत्यनंशं स्वंश्रीप्राप्तिवृद्धिभीतिंचलक्ष्मी

कर्कटेत्वाद्यगृहारंभकाले गर्गः त्रिउत्तरामृगरोहिण्यां पुष्ये मैत्रे करत्रये धनिष्ठा
द्वितीये पौष्णे गृहारंभः प्रशस्यते रोहिण्यां श्रवणत्रये अदितिपुष्ये हस्तत्रये मूलके रे
वत्युत्तरफाल्गुनीषु गृहारंभे मैत्रोत्तराषाढयोः शस्तो वास्तुः कुजार्कवर्जितदिने गोकुंभसिं
हेषु रवेः कन्यायां मिथुने नभः शुचिसहोराधोर्जके फाल्गुने व्यवहारसारे शिलान्यासः
प्रकर्तव्यो गृहाणां श्रवणमृगे पौष्णे हस्ते च रोहिण्यां पुष्याश्विन्युत्तरात्रये वास्तुप्रदी
पे अधोमुखैर्भैर्विदधीत खातं शिलास्तथैवोर्ध्वमुखैश्च पट्टं तिर्यङ्मुखैर्द्वारकपाट
यानं गृहप्रवेशो मृदुभिर्ध्रुवैश्च लल्लः स्नानं च पाकं शयनं च भोज्यं गजालयं वाजिगृहं
धनस्य देवस्य पूर्वादिदिशि क्रमेण मध्ये समाश्रयनिवेशनाय शल्यशास्त्रे कन्यासिं
हे तुलायां भुजगपतिमुखं शंभुकोणेऽग्निखातं वायव्ये स्यान्नदास्यं त्वलिधनमकरे ईशखा
तं वदंति कुंभे मीने च मेषे [illegible] नैर्ऋतिदिशि मुखं खातवायव्यकोणे चाग्नेकोणमु
खं वै वृषमिथुनगते कर्कटे रक्षखातं तत्त्वचिंतामणौ पर्वदैर्घ्यं गृहादीनां त्रिंशद्ध
स्ततोऽधिकं नतत्र चिंतयेद्धीमान् गुणानायव्ययादिकान् राजमार्तंडः आयव्ययौ
मासशुद्धिं तृणागारे न नाचिंतयेत् शिलान्यासादिनो कुर्यात्तृणागारे पुरातने व्यव
हारतत्त्वे निषिद्धेष्वपि कालेषु स्वानुकूले शुभे दिने तृणकाष्ठगृहारंभे मासदोषो न
विद्यते चंडेश्वरः पूर्णादित्यष्टमीयावत्सर्वास्यं वर्जयेद्गृहं उत्तरास्यं कुर्वीत नवम्यादि

228-A

चतुर्द्दशी अमावास्याष्टमी यावत्स्थिमास्यं विवर्जयेत् नवम्यादौ तथा यामं यावत्तु
हस्ताचतुर्द्दशी ध्रुवं द्वादशायवास्तुत्वा कर्त्तव्यं वास्तुरोपणं सायाह्नवर्जे दिवसरात्रौ तस्य त्वा
महानिशा वराहः दक्षिणपूर्वकोणे कृत्वा पूजां शिलान्यसेत् प्रथमां त्रेषाः प्रदक्षि
णेन स्तंभाश्चैवं समुत्थाप्याः अथ गृहप्रवेशः बृहस्पतिः नैऋत्यां दक्षिणद्वारं भद्रायां प
श्चिमेन तु जयायामुत्तरद्वारं पूर्णायां पूर्वतो विशेत् वशिष्ठः कृत्वाग्नुकं पृष्ठतो वा
मतोऽर्के विप्रान् पूज्यान गतः पूर्णकुंभ दध्यक्षत रंभातोरण स्रग्वितानैः स्त्रीभिः स्रग्वीणी र
तवाद्यैर्विशेद्व्यव द्वारतत्वे सौम्यायने श्रावणे मार्गपौषे जन्मर्क्षलग्नोपचयांशे र
वामगतेऽर्के गृहं वास्तुपूजां कृत्वा विशेद्देश मन कूटम्बुदं वास्तुशास्त्रे लग्नात्मागादितो
दिक्षु द्वौ द्वौ राशी नियोजयेत् एकमेकं न्यसेत्कोणे सूर्यवामं विचिंतयेत् वशिष्ठः चं
द्रताये सितवासरे वृतु श्रीकरं सुतमहार्थलाभदं सूर्यसूनु दिवसे स्थिरप्रदं किंतु चौरभ
यमत्र निर्द्दिशेत् रत्नकोशे पुष्ये धनिष्ठा मृदु वारुणेषु स्वायंभुवर्क्षे त्रिषु चोत्तरासु र
अक्षीणचंद्रे शुभदे नृपस्य तिथौ विरिक्ते च गृहप्रवेशः नारदः प्रवेशो मध्यमो ज्ञेयः
सौम्यकार्तिकमासयोः तमाघफाल्गुन वैशाखज्येष्ठमासेषु शोभनः अकपाटमनाच्छ
त्रमदत्वबलिभोजनं गृहं न प्रविशेद्धीमानापदामेकरं हि तत् प्रवेशश्च वास्तुपूजा कृत्वा
कार्यः जीर्णे द्वारे तथो द्याने तथा गृहनिवेशने नवप्रासादभवने प्रासादे नवे प्रासाद

परिवर्त्तने द्वाराभिवर्त्तने द्वाराभिवर्त्तनेन च प्रासादेषु गृहेषु च वास्तूपशमनं कुर्यात्
सर्वमेव विचक्षण इति मात्स्योक्तेः तत्रैव कृत्वाग्रतो द्विजवरानथ पूर्णकुंभं दध्यक्षताम्र
दलपुष्पफलोपशोभं दत्वा हिरण्यवसनानि तथा द्विजेभ्यो मंगल्यशांतिनिलयं स्व
गृहं विशेच्च गृह्योक्तहोमविधिना बलिकर्म कुर्यात्प्रासादवास्तुशमने च विधिर्य उक्तः
संतर्पयेद्द्विजवरानथ भक्ष्यभोज्यैः शुक्लांबरः स्वभवने प्रविशेत्सधूपं अथ कलिवर्ज्यानि
बृहन्नारदीये समुद्रयातुः स्वीकारः कमंडलुविधारणं द्विजानामस
वर्णासु कन्यासूपयमस्तथा देवराच्च सुतोत्पत्तिर्मधुपर्के पशोर्वधः मांसदानं तथा
श्राद्धे वानप्रस्थाश्रमस्तथा दत्ताक्षतायाः पुनर्दानं परस्य च दीर्घकालं ब्रह्मचर्यं नरमे
धाश्वमेधकौ महाप्रस्थानगमनं गोमेधश्च तथा मखः इमान् धर्मान् कलियुगे वर्ज्या
नाहुर्मनीषिणः कमंडलुः सोदकं च कमंडलुमित्युक्तेः मन्मयावदत्तां ऊढां ऊढायाः पुन
रुद्वाहं ज्येष्ठांशं गोवधस्तथा कलौ पंच न कुर्वीत भ्रातृजायां कमंडलुमिति हेमाद्रौ
वचनात् ऊढायाः पुरापुरुषसंयोगान्न तु ते दयेति केचन तेत्यादिभिर्विवाह्यतेत्युक्ताः
हेमाद्रौ ब्राह्मे गोत्रान्मातुः सपिंडाच्च विवाहो गोवधस्तथा नराश्वमेधौ मद्यं च वर्ज्यं हि
जातिभिः गोत्रात् गोत्रजायाः पितृष्वसुः मातुः सपिंडान्मातुलात्तत्कन्यायाश्च विवाहः
कलौ न कार्यः तेन पाणिन तद्विधायकानि नानानि युगांतरविषयाणि तथा च व्यासः

२२१-A

त्तीयां मातृतः कन्यां तद्वत्पितृतस्तथा सप्तमे न वोढुमिच्छंति विप्राः पितापि विमो
हिताः इत्यौकलौतन्निंदामाह मातृस्तृतीयां मातुलकन्यामिति उक्तं चैतत्प्राक् मद्यं
स्त्रीभ्यश्च सुरामाचामन्नित्यादिना विहितमपि वर्ज्यं हेमाद्रौ आदिपुराणे
विधवायां प्रजोत्पत्तौ देवरस्य नियोजनं बालायाः क्षतयोन्यास्तु वरेणान्येन संस्कृतिं
कन्यानामसवर्णानां विवाहश्च द्विजन्मभिः आततायि द्विजाग्र्याणां धर्मयुद्धेन
हिंसनं द्विजस्याब्धौ तु नौयातुः शोधितस्यापि संग्रहः सत्रदीक्षा च सर्वेषां कमंड
लुविधारणं महाप्रस्थानगमनं गोसंज्ञप्तिश्च गोसवे सौत्रामण्यामपि सुराग्रहण
स्य च संग्रहः अग्निहोत्रहवण्याश्च लेहो लीढापरिग्रहः सत्रे स्वाध्यायसापेक्षमघसं
कोचनं तथा प्रायश्चित्तविधानं च विप्राणां मरणांतिकं संसर्गदोषस्तेयान्यमहापा
तकनिःष्कृतिः वरातिथिपितृभ्यश्च पशूपाकरणक्रिया दत्तौरसेषां तु पुत्रत्वेन परि
ग्रहः सवर्णान्यांगनादुष्टैः संसर्गः शोधितैरपि अयोनौ संग्रहे वृत्ते परित्यागो गुरु
स्त्रियाः परोद्देशात्मसंत्याग उच्छिष्टस्यापि वर्जनं प्रतिमाभ्यर्चनार्थाय संकल्पश्च
सधर्मकः अस्थिसंचयनादूर्ध्वमंगस्पर्शनमेव च शामित्रं चैव विप्राणां सोमवि
क्रयणं तथा षड्भक्तानशनेनापहरणं हीनकर्मणः माधवीये पृथ्वीचंद्रो
दये च शूद्रेषु दासगोपालकुलमित्रार्धसीरिणः भोज्यान्नता गृहस्थस्यती

र्थसेवातिदूरतः ।शिष्यस्य गुरुदारेषु गुरुवद्वृत्तिरीरिता आपद्वृत्तिर्द्विजाग्र्याणामश्वस्त
निकता तथा प्राणांते द्विजाग्र्याणां प्रजारत्नापरिग्रहः ब्राह्मणानां प्रवासित्वं मुखाग्नि
धमनाक्रिया वलात्कारादिदुष्टस्त्रीसंग्रहो विधिचोदितः यतेश्च सर्ववर्णेषु भिक्षाचर्या
विधानतः नवोदके दशाहं च दक्षिणा गुरुचोदिता ब्राह्मणादिषु शूद्रस्य पचनादिक्रिया
पि च भृग्वग्निपतनैश्चैव वृद्धादिमरणं तथा गोतृप्तिशिष्टे पयसि शिष्टैराचमनक्रि
या ।पितापुत्रविरोधेषु साक्षिणां दंडकल्पनं यतेः सायंगृहत्वं च सूरिभिस्तत्वदर्शिभिः
एतानि लोकगुप्त्यर्थं कलेरादौ महात्मभिः निवर्तितानि विद्वद्भिर्व्यवस्थापू
र्वकं बुधैः सुराग्रहणस्य तत्कर्तुः संग्रहो व्यवहारः न च मद्यचेति सामान्येन नि
षिद्धस्यानेनोपसंहार इति वाच्यं निषेधस्य निहातिमात्रफलत्वेन विशेषा
नपेक्षत्वात् न हिंस्यादित्यस्य न ब्राह्मणं हन्यादित्यनेनोपसंहारे हिंसां गरस्यादे
व त्यागे ते च निरूपितेनैव तद्देमाद्रिणान्यतेन्दुपस्यते वचनेलिए काहा ग्रहणः श्रुधे
हो ऽग्निर्वेदसमाप्तिनिरसूयकः शुद्धस्याशौचस्य संकोचः नतस्यानि स्थूतिर्दृष्टा श्रुद्ध
क्विन पतनादते स्तेनकस्य प्रायश्चित्तस्य विधानं उपदेशः कलौ कर्तैव लिप्यते इति व्या
सोक्तेः पतितसंसर्गदोषसत्वापि पातित्यं नेत्यर्थः अन्यथा संसर्गः शोधितेरपीति

230-A

विरोधापत्तेः स्तैयतिन्नेमहापापैरहस्यकृते प्रायश्चित्ते नेत्यर्थः सवर्णान्यासु सवर्णान
न्यायादिस्तत्रयाकृष्टैः अयोनौ शिष्यादौ चतत्कृतपरिज्याशिष्यगागुरुगाचत्युक्तस्यागः
परोद्देशेन ब्राह्मणघर्षं आत्मत्यागः यद्वा परोद्देशात्मात्यगोदानं मनसा पात्रमुद्दिश्ये
त्युक्तं उद्दिष्टस्य कृस्य वर्जनं प्रतिग्रहसमर्थोपीत्युक्तं चैतन ग्रहणेन प्रातिमाष्यजा स्था
रौ च कालाधिक्ये यं स्पर्शनं तु त्रिभागतरत्युक्तः स्पर्शः षाडिति उपोषितस्याहं स्थित्वा
धान्यमक्षीहराणाद्धरेदित्युक्तमन्नचौर्यं आपादि आदद्याति: मुखेनैवधमेदाग्निमित्युक्तं
धमनं दशाहे नैवमधीयेत भूमिस्थ चन वोदकमित्युक्तोदशाह ऊरवेत्तु वरं दत्वेत्युक्ता दक्षि
णा स्वदेहदास गोपालोपि कंडूयनस्नेह पंकं पचेद्दुग्धेन पाचेत्ते एतान्यन्न प्रभुञ्जीत भो
ज्यानि मनुरब्रवीदित्य परार्केस्तु मंत्रक्ता स्वद्रस्यपाकाक्रिया पितापुत्रविवादे तु साक्षि
णां त्रियणोदमस्त्युक्तः सायं गृहं चो विधर्मे सन्नमसलेरत्युक्तं पृथ्वीं चद्रेणतु आटंति
वसुधां विप्राः पृथिवीदर्शनायच आनिकेताश्च नाहाराय च सो यं गृहास्तमेते इति विष्णुपु
राणोक्तो निषिद्धः तेनाज्ञातशीलयोः पादेः श्राद्धादौ विनियोगेन कार्यः कलावित्यर्थे उक्तः
एतानि वर्ज्यानीत्यर्थः निगमः अग्निहोत्रं गवालंभं संन्यासं पलपैतृकं देवराच्च सुतो
त्पत्तिः कलौ पंचविवर्जयेत् अग्निहोत्रं तदर्शमाधानं एतत्तु सर्वाधानपरं अर्धाधानं स्म
र्तं श्रौत स्मार्ताग्न्योस्तत्पृथक्कृतिः सर्वाधाने तयोरैक्यकृतिः एवं युगाश्रिते तिलोगा

नि॰ सिं॰
२३१

231

क्तिवचनादितिस्मृतिचंद्रिकायां एतेन चत्वार्यब्दसहस्राणि चत्वार्यब्दशतानि च क
लेर्यदा गमिष्यंति तदा त्रेतापरिग्रहः संन्यासश्च न कर्तव्यो ब्राह्मणेन विजानतेति व्या
सवचनं व्याख्यातं सर्वाधानेपि विशेषमाह देवलः यावद्वर्णविभागोस्ति यावद्वेदः प्र
वर्तते संन्यासं चाग्निहोत्रं च तावत्कुर्यात्कलौ युगे इति संन्यासस्त्रिदंडः ॥ इति श्रीमन्ना
रायणभट्टसूरिसूनुरामकृष्णभट्टात्मजदिनकरभट्टानुजकमलाकरभट्टकृते निर्णय
सिंधौ तृतीयपरिच्छेदे कलिवर्ज्यानि ॥ नानानिबंधवैमत्यभ्रांतचित्तोद्दिधीर्षया क
मलाकरसंज्ञेन क्रियते श्राद्धनिर्णयः तत्स्वरूपमाह पृथ्वीचंद्रोदये मरीचिः प्रेतं पितॄं
श्च निर्दिश्य भोज्यं यत्प्रियमात्मनः श्रद्धया दीयते यत्र तच्छ्राद्धं परिकीर्तितं ब्राह्मणस्वीका
रांतः चतुर्थ्यंतपदोपनीतपित्राद्युद्देश्यकस्त्यागः श्राद्धमित्यर्थः तत्र यद्यपि होमपिं
डभोजनानि प्रधानानीति हेमाद्रिः होमश्च पिंडदानं च तर्पणं ब्राह्मणभोजनं श्राद्धशब्दाभि
धेयं स्यादेकस्मिन्नौपचारिक इति श्रीधरश्च तथापि क्वचिद्विशेषं प्रवक्ष्यामः निमि
त्ते देवभोजनस्य पिंडदानेचानिषेधेन प्राधान्ये विरुणद्धि असोमयाजिनो दधिपयो
पणवत् यच्च शूलपाणिः नित्यश्राद्धमदैवं स्यादर्घ्यपिंडविवर्जितमिति स्मारीतौ नि
त्यश्राद्धमर्घ्यादौ पिंडनिषेधोस्ति न च प्राप्तिं विना सः न चातिदेशं विना प्राप्तिः न चांगत्वं
विनातिदेशः प्रधानस्यानतिदेशात् समन्मे उपकारकत्वेनातिदेशोक्तेः तेन भोजनं प्राधा

राम
२३१

231-A

नेऽपिंडेऽगं पिंडदानमात्रविधिस्त्वगम्भ्यत्त्वात्कर्मान्तरमेव प्रकरणान्तरन्यायादिति तत्र
जातश्राद्धेन दद्यात्तु पक्वान्नं ब्राह्मणेऽप्यपीति न पक्वं भोजयेद्द्विजान् स्मृत्युक्तेऽपि कदाचनेत्य
थैर्जातश्राद्धस्य शूद्रश्राद्धादौ भोजनस्य निषेधेनांगत्वापत्तेः नत्वोपदेशो करोतीवद्व्युत्पत्ती व्य
विरोधेन विकल्पापत्तेश्च तेन श्राद्धशब्दाभिधेयत्वेनोभयप्राप्तौ निषेधपर्युदासावाना
सौमयाजी सन्नयेदितिवत् इति तत्त्वे धर्मप्रदीपे यजुर्वेदिपिंडदानं तु बह्वृचानां द्विजा
र्चनं श्राद्धशब्दाभिधेयं स्यादुभयं सामवेदिनां तत्र पितॄनुपजनेऽपितृभ्यो दद्यादित्युभ
यप्रयोगदर्शनाद्यागदानोभयात्मकं पितरो देवता इति पित्रुद्देश्यकत्वाद्यागत्वे विप्र
पेक्षयाच दानत्वमित्यविरुद्धं एतेन नायं यागः देवतोद्देशेन त्यागो यागः यागोद्देश्याच
देवतेत्यात्माश्रयादिति गौडमतमपास्तं वैधव्यशब्दविशेषोद्देश्यत्वस्य तस्येदमिति।
स्वत्वारोपप्रतियोगित्वस्य वा देवतात्वात् तत्रैव समन्तुः श्राद्धात्परतरं नान्यच्छ्रेयस्करमुदा
हृतं श्राद्धपुराणे न संति पितरश्चेति कृत्वा मनसि यो नरः श्राद्धं न कुरुते तत्र तस्य रक्तं पि
बंतिते तद्वेदनाद्यविश्वामित्रः नित्यं नैमित्तिकं काम्यं वृद्धिश्राद्धं सपिंडनं पार्वणं चेति।
विज्ञेयं गोष्ठ्यां शुध्यर्थमष्टमं कर्मांगं नवमं प्रोक्तं दैवकं दशमं स्मृतं यात्रास्वेकादशं
प्रोक्तं पुष्ट्यर्थं द्वादशं स्मृतमिति एषां लक्षणानि भविष्ये अहन्यहनि यच्छ्राद्धं तन्नित्य
मिति कीर्तितं वैश्वदेवविहीनं तदशक्तावुदकेन तु एकोद्दिष्टं तु यच्छ्राद्धं तन्नैमित्तिकमुच्य

ते तदप्यदैवं कर्त्तव्यमयुग्मान् भोजयेद्द्विजान् कामाय विहितं काम्यमभिप्रेतार्थ
सिद्धये वृद्धौ यत्क्रियते श्राद्धं तद्वृद्धिश्राद्धं तदुच्यते गंधोदकतिलैर्युक्तं कुर्यात्पात्रचतुष्टयं
अर्घार्थं पितृपात्रेषु प्रेतपात्रं प्रसेचयेत् ये समाना इति द्वाभ्यामेतद् ज्ञेयं सपिंडनं नित्येन
तुल्यं शेषं स्यादेकोद्दिष्टं स्त्रियामपि एतदुभयमेव स्त्रियाः तेन स्त्रीकर्तृकं स्त्रीसंप्रदानं चे
त्युभयनियम इति कल्पतरुः अमावास्यायां क्रियते तत्पार्वणमिति स्मृतं क्रियते चापार्वणि
यत्तत्पार्वणमिति स्थितिः अत्र पर्व चतुर्दश्यष्टमी चैव अमावास्या च पौर्णमा पर्वाण्ये
तानि राजेंद्र रविसंक्रमणं तथेति विष्णुपुराणोक्तं संक्रांत्यादि गोष्ठ्यां यत्क्रियते श्राद्धं गो
ष्ठीश्राद्धं तदुच्यते बहूनां विदुषां संपत्सुखार्थं पितृतृप्तये क्रियते शुद्धये यत्तु ब्राह्मणानां
तु भोजनं शुद्ध्यर्थमिति तत्प्रोक्तं वैनतेय मनीषिभिः निषेककाले सोमे च सीमंतोन्नयने त
था ज्ञेयं पुंसवने चैव श्राद्धं कर्मांगमेव च देवानुद्दिश्य यच्छ्राद्धं तत्तु दैविकमुच्यते गच्छन्देशां
तरं यस्तु श्राद्धं कुर्यात्तु सर्पिषा यात्रार्थमिति प्रोक्तं प्रवेशे च न संशयः शरीरोपचये श्राद्ध
मर्थोपचये एव च पुष्ट्यर्थमेतद्विज्ञेयमौपचारिकमुच्यते गोष्ठ्यां श्राद्धकर्तृसमुदाये
संभूय सामग्रीसंपादनेन यद्गयातीर्थादिप्राप्तौ विदुषां श्राद्धं संपत्सुखार्थं भिन्नपाका
नां वा कुर्युः पितृकं श्राद्धमेकः कुर्यादिति कल्पतरुः शंखधराः अङ्गिराः श्राद्धं प्रायश्चित्तानामिति
मैथिलाः अत्र पार्वणैकोद्दिष्टवृद्धिसापिंडीकरणात्मकं चतुर्विधमेव मुख्यं तस्यैवाप

प्रपंचः अथ श्राद्धदेशः मनुः शुचिदेशं विविक्तं च गोमयेनोपलेपयेत् दक्षिणाप्रव
णं चैव प्रयत्नेनोपपादयेत् पृथ्वीचंद्रोदये विष्णुधर्मे दक्षिणाप्रवणे देशे तीर्थादौ चग
हे पितॄणां संस्कारादिसंयुक्तो श्राद्धं कुर्यात् प्रयत्नतः तत्रैव प्रभासखंडे तीर्थादृष्टमु
क्तं पुण्यं स्वर्ग्यं हे दत्तः शुभे भारते तस्य देशाः कुरुक्षेत्रं या गंगा सरस्वती प्रभासं पुष्क
रं चेति तेषु श्राद्धं महाफलं स्कंदे तुलसीकाननछाया यत्र यत्र भवेद्द्विज तत्र श्राद्धं प्र
दातव्यं पितॄणां तृप्तिहेतवे माधवीये श्राद्धोपक्रमे व्यासः महोदधौ प्रयागे च कार
ण्यां च कुरुजांगले शंखः गंगायमुनयोस्तीरे पयोष्ण्यमरकंटके नर्मदाबाहुदाती
रे भृगुलिंगे हिमालये गंगाद्वारे प्रयागे च नैमिषे पुष्करे तथा सन्निहत्यां गयायां
च दत्तमक्षयतां व्रजेत् अपि जायेत सोऽस्माकं कुले कश्चिन्नरोत्तमः गयाशीर्षे वटे श्रा
द्धं यो नो दद्यात्समाहितः एष्टव्या बहवः पुत्रा यद्येकोपि गयां व्रजेत् यजेत वाश्वमेधे
न नीलं वा वृषमुत्सृजेत् आदिपुराणे पंचक्रोशं गयाक्षेत्रं क्रोशमेकं गयाशिरः
[illegible] महानद्याः पश्चिमेन यावद्धूम्रेरो गिरिः उत्तरे ब्रह्मयूपस्य यावद्दक्षिणमा
नसे एतद्गयाशिरो नाम विष्णुलोकेषु विश्रुतं इति शूलपाणौ बृहस्पतिः
गयायां धर्मपृष्ठे च सरसि ब्रह्मणस्तथा गयाशीर्षेऽक्षयवटे पितॄणां दत्तमक्षयं
धर्मारण्ये धर्मपृष्ठे धेनुकारण्यमेव च दृष्ट्वैतानि पितॄंश्चार्च्य वंशान्विंशतिमु

नि. सिं.
२३३

233

द्धरेत् त्रिस्थलीसेतौ वायवीये सामीपत्र प्रमाणेन पिंडं दद्यात् यः शिरे उद्धरेत्स सगो
त्राणि कुलमेकोत्तरं शतं सगोत्राणि तु पितामाताच भार्याच भगिनी दुहिता तथा ।
पितृमातृस्वसा चैव सप्तगोत्राणि वै विदुरिति एषां गोत्राणां मेकोत्तरं शतं कुलं उ
द्धरत्यर्थः नाचेत्काम्यत्वेन तत्त्वानिर्विंशतिन्यायादादशपर्वाद्यंशापरः एवम
न्यत्रापि प्रयोगपारिजाते पाद्मे शालग्राममयी मुद्रा सा स्थिता यत्र कुत्रचित् वाराण ।
स्याय वाधिकं समंताद्योजनत्रयं तत्राप्यत्किंचित् पितृकं कुर्यात्सा पिंडं चान
दंति के विप्म लोकं सगर्दे लभते शाश्वतं पदं तत्रैव वाराहे चक्रांकः ।
स्थलसान्निध्यपत्कर्म त्रियते नरैः स्नानं दानं तपः श्राद्धं सर्वमक्षयतां व्रजेत् प्रत्य
नि षिद्धदेशाः पद्मे चंद्राय स्कांदे त्रिशंकोर्वर्जयेद्देशं सर्वं द्वादशयोजनं उत्तरेण
महानद्या दक्षिणेन तु कीकटान् देशस्त्रैशंकवो नाम श्राद्धकर्मणि वर्जितः प्रनष्टा
श्रमधर्माश्च देशा वर्ज्याः पृथक्ततः यमः कृष्णस्य कृमि हतो क्षितं संकीर्णा निष्टगंधिकं
देशं त्वानिष्ट शब्दं च वर्जयेच्छ्राद्धकर्मणि तत्रैव शंखः गोगजाश्वानु पृष्ठ त्रिमा
सांतः यान भवि नक्रयां श्राद्धमेते भूपारक्या स्तुच भूमिषु यमः परकीयप्रदेशेषु
पितृणां निर्वपेत्तु यः तद्भूमिपितृभिः तत्र श्राद्धकर्म विहन्यते आह भारतयोरपि

द

233-A

परकीयगृहे यस्तु स्वाम्यनुज्ञं समर्पयेद्यदि तद्भूमिस्वामिनस्तस्य हरंति पि-तरो बलात्
अग्रभागं ततस्तेभ्यो दद्यान्मूल्यं च जीवितं श्राद्धार्हाणामग्रभागं श्राद्धं तदनर्हाणां
अर्हाणां तु मूल्यमिति केचित् षोडशी पिंडेज्यां धवानामपि पिंडोन्नेर्ये वांधवाऽ
बांधकावेत्यादितर्पणाभावापत्तेश्च नागोत्र एवं श्राद्धनिषेधो नान्यत्रेति गौडाः वि
प्रास्तु तस्य मूढपुत्र श्राद्धनिषेधो नान्यत्र अग्रदानं चान्नत्यागात्पूर्वं कार्यमिति मैथि
लाः तन्न अग्रभागस्य श्राद्धपरत्वे मानाभावात् अन्नदाने च निषेधाभावात् त्यागात्पू
र्वं करणे ऽनंगेन व्यवधानपत्तेरंगत्वे च मानाभावात् इदं च स्वाम्यनुज्ञाभावे तज्ज्ञाते चै
व ज्ञाते स्वनुलिप्तेषु गेहेषु स्वेषु तत्र ज्ञापितेषु च श्राद्धमेतेषु दातव्यं वर्ज्यमेतेषु नोच्य
ते किरातेषु कलिंगेषु कोंकणेषु खसेष्वपि सिंधोरुत्तरकूलेषु नर्मदायाश्च दक्षिणे
पूर्वेण करतोयायाः न देयं श्राद्धमुच्यते इदं काम्यविषयं अन्यथा तत्रत्यानां सर्वश्राद्धाक
करणापत्तेः नर्मदादक्षिणे पवादः स्कांदे सत्यस्य चोड्रवोपत्र यत्र गोदावरी नदी पृथिव्या
मपि कृत्स्नायां सप्रदेशो ऽतिपावनः परिकीर्तितापवाद आदित्यपुराणे अटवी पर्वताः पु
ण्या नदीतीराणि यानि च सर्वाण्यस्वामिकान्याहुर्नाहि तेषु परिग्रहः वनानि गिरयो
नद्यस्तीर्थान्यायतनानि च खर्वीर्न अग्रगर्ताश्च न स्वाम्यं तेषु विद्यते स्मृतिसारे नैकवास
न च द्वीपे नांतरिक्षे कदाचन श्रुतिस्मृत्योदितं कर्म न कुर्यादशुचिः क्वचित् दिवोदासी

नि॰ सिं॰
२३४

234

ये म्लेच्छदेशे तथा रात्रौ संध्यायां विप्रवर्जिते न श्राद्धमाचरेद्विद्वान्नवं रोकयंचन अथ श्रा
द्धकालाः ते च संक्रांतियुगादिमन्वादयः प्रायेण पूर्वपरिच्छेद एवोक्ता एव केचित्
तूच्यंते यत्तु चंद्रोदये हेमाद्रौ पराशरः श्राद्धं तद्भावचंद्रोभछायाग्रहणे संक्रमे न वोदकेन वा
नैव नवधान्ने तथा गृहे न चैव भवेषु चेहत्ते पितरो ह्रिमघास्वपि पितरः स्वधं हव्यं त्वन्नमक्षय्या
स्तु मघासु चेति शातातपपाठः न चोदकेन वरूपवाप्यादाविति केचित् वर्षे पक्ष
मे श्राद्धं प्रवेशे इति गौडाः नवान्नश्राद्धे विशेषो ज्योतिषे आश्लेषार्धगे सूर्ये मृगाने
ज्ञानि समाप्तके नवान्नभोजनं श्राद्धं जन्मचेद्गतियो न च आश्लेषाकृत्तिकाज्येष्ठामूलाज
पदके वच मंगभौमदिने रिक्तातिथौ नाशान्नवेदनं तत्रैव हारीके मृकृष्णपक्षे तु नवा
न्नं शास्यते बुधैः अन्तः कृष्णपक्षे नेति गौडाः मैथिलास्तु अपकृतानग्रयणं चैव धार
स्यन्नानं नरो नैति वाराहोक्तेः प्रतिबाम्बं श्राद्धमाहुः तत्र जातपदस्य श्राद्धयोग्यस
मकृत्परत्वात् हेमाद्रौ जाबालः करूपः सं खं प्राकुरमा वास्यां क्षीणचंद्रो द्विजोत्तमाः ।
अष्टकासु भवेत्पंचतत्र दत्तमिहाक्षयं तथैव वंशावः यदा विष्टिर्व्यतीपातो भानुवार
स्तथैव च यमकं नाम तत्प्रोक्तं मपनाव्यय तद्गुणं याज्ञवल्क्यः अमावास्याष्ट
काहद्धिः कृष्णपक्षेयनद्वयं द्रव्यं ब्राह्मणसंपत्तिर्विषुवत्सूर्यसंक्रमः व्यतीपातो
गजछायाग्रहणं चंद्रसूर्ययोः श्राद्धं प्रतिरुचिश्चैव श्राद्धकालाः प्रकीर्तिं

राम
२३४

234-A

ताः कृष्णपक्षः सर्वोपि शाकेनाप्यपरपक्षं नातिक्रमेन्मासि मासि वोऽशनमि
ति श्रुतेः ऊर्ध्वं वा चतुर्थ्या यदहः संपद्यते क्षते चतुर्दशीमिति कात्यायनोक्तेः मा
सि मासि कार्यमपरपक्षस्यापराह्णः श्रेयानित्यापस्तंबोक्तेश्च ॥ अत्र प्रथमे दर्शे च
म्यादि यदहः संपत्तिरिति त्रयः पक्षाः यद्येकदिने श्राद्धं तदा दर्श एव याज्ञ
वल्क्येनामावास्यायाः प्रयाद्धिं दैशनात् एतेन कृष्णपक्षे यदहः संपद्यतेऽमावास्या
यां तु विशेष इति निगमोक्तेर्गौणोऽपरपक्षश्राद्धस्यामावास्येति स्मृत्यर्थगत
मतमपास्तं ॥ अत्र शौनकोदाहृतेनापि मासि श्राद्धसिद्धिरिति नारायणवृत्तिः निरग्नेर्नै
कस्मिंश्चिद्दिने आहिताग्नेस्तु दर्शे एव न दर्शेन विना श्राद्धमाहिताग्नेर्द्विजन्मन
इति मनूक्तेः कृष्णपक्षे चापि महालयस्य मेषवत्वेन चोक्तेः प्राक् व्यतीपाते विशे
षमाह हेमाद्रौ शंखः फलं लक्षगुणं त्यक्तौ भ्रमणे कोटिरुच्यते पतने शतकोटिश्च
स्तकायने वेदजमक्षयं ज्योतिःशास्त्रे द्वाविंशति स्त्यागेऽन्त्ये भ्रमणे वैकविंशतिः प
तने दशनाड्यस्तु पतिते सप्तनाडिकाः हेमाद्रौ मार्कंडेयः यदा च श्रोत्रियोऽभ्येति
गृहं वेदविदग्निचित् तेनैकेनापि कर्तव्यं श्राद्धं च विषुवत्समं इदं वाऽपिंडका
र्यमिति हेमाद्रिः एतज्जीवत्पितृकोऽपि कुर्यात् उद्वाहे पुत्रजनने पित्र्येष्ट्यां सो
मिके मखे तीर्थे ब्राह्मण आयाते षडेते जीवतः पितुरिति मैत्रायणीयपरिशिष्टे ।

=चातुर्मासि
कयज्ञे=२

क्तेः तिथिविशेषे फलविशेषः याज्ञवल्क्येनोक्तः कन्यां कन्यां वेदिनश्च पशून्वै
सत्सुतानपि द्यूतं कृषिं च वाणिज्यं द्विशफैकशफांस्तथा ब्रह्मवर्चस्विनः पुत्रान्स्वर्ण
रौप्ये सकुप्यके ज्ञातिश्रैष्ठ्यं सर्वकामानाप्नोति श्राद्धदः सदा प्रतिपत्प्रभृतिष्वेकां व
र्जयित्वा चतुर्दशीं एताः कृष्णपक्षस्या एव महालयेन फलभूते ति पृथ्वीचंद्रः पौर्णि
मास्यां हेमाद्रौ पितामहः अमावास्याष्टका अतीपातपौर्णमास्यष्टकास्तु च विद्वान् श्राद्धम
कुर्वाणो नरकं प्रतिपद्यते एतन्माघ्यादिपरं व्रीहिपाके च कर्तव्यं यवपाके च पार्थि
व पौर्णमासीन्तथा माघी श्रावणी च नरोत्तम प्रोष्ठपद्यामतीतायां तथा कृष्णात्र
योदशी एतांस्तु श्राद्धकालान्वै नित्यानाह प्रजापतिरिति विष्णुधर्मोक्तेः विष्णुः।
माघी प्रोष्ठपद्यूर्ध्वं कृष्णात्रयोदशीति अत्र माघी पौर्णिमेति कल्पतरुः श्रावण्यूर्ध्व
मपि मघायोगसंभवात्त्रयोदशी विशेषणमिति गौडाः नक्षत्रेष्वपि याज्ञवल्क्यः
स्वर्गं ह्यपत्यमोजश्च शौर्यं क्षेत्रं बलं तथा पुत्रान् श्रैष्ठ्यं च सौभाग्यं समृद्धिं मुख्यतां
शुभं प्रवृत्तचक्रतां चापि वाणिज्यप्रभृतीनपि अरोगित्वं यशो वीतशोकतां परमां गतिं ध
नं वेदान्भिषक्सिद्धिं कुप्यं गा अप्यजाविकं अश्वानायुश्च विधिवद्यः श्राद्धं संप्रयच्छ
ति कृत्तिकादिभरण्यंतं स कामानाप्नुयादिमान् फलांतराण्यपि भारते कौर्मे देवे
यानि माधवीये मरीचिः कृत्तिकादिषु ऋक्षेषु श्राद्धे यत्फलमीरितं विष्कंभादिषु यो

235-A

गेष्टुतदेवफलमिष्यते बृहस्पतिः आरोग्यंचैवसौभाग्यंशत्रूणांचपराजयं सर्वा
न्कामान्स्त्रियोविद्यांधनमायुर्यथाक्रमं सूर्यादिदिवसेष्वेतच्छ्राद्धकृल्लभतेफलं वधादि
करणेष्वेतच्छ्राद्धकृल्लभतेफलं अन्यानिषण्णवतिश्राद्धादीनिप्रागुक्तानि मार्कंडेयपु
राणे श्राद्धार्हद्रव्यसंपत्तौतथादुःस्वप्नदर्शने जन्मर्क्षेग्रहपीडासुश्राद्धंकुर्वीतचेच्छया अ
थश्राद्धाधिकारिणः चंद्रिकायांसुमंतुः मातुःपितुःप्रकुर्वीतसंस्थितस्यौरसः सुतःपैतृ
मेधिकसंस्कारंमंत्रपूर्वकमाहृतः तत्रैवहेमाद्रौचशंखः पितुःपुत्रेणकर्त्तव्यापिंडदानो
दकक्रिया पुत्राभावेतुपत्नीस्यात्तदभावेतुसोदरः अत्रपुत्रपदंक्षेत्रजादिद्वा
दशविधपुत्रपरंतेचद्वादशपुत्रा याज्ञवल्क्येनोक्ताः औरसोधर्मपत्नीजास्तत्समःपुत्रिका
सुतः क्षेत्रजःक्षेत्रजातस्तुसगोत्रेणेतरेणवा गृहेप्रच्छन्नउत्पन्नोगूढजस्तुसुतः स्मृतः
कानीनःकन्यकाजातोमातामहसुतःस्मृतः अक्षतायांक्षतायांवाजातःपौनर्भवस्तु
यंदद्यान्मातापितावायंसपुत्रोदत्तकोभवेत् क्रीतश्चताभ्यांविक्रीतःकृत्रिमःस्यात्स्वयं
कृतः दत्तात्मातुस्वयंदत्तोगर्भेविन्नःसहोढजः उत्सृष्टोगृह्यतेयस्तुसोपविद्धोभवेत्सु
तः पिंडदोंशहरश्चैषांपूर्वाभावेपरःपरः इति तथापिदत्तौरसेतरेषांतुपुत्रत्वेनपरिग्रहः इतिहे
माद्रावादिपुराणेकलावितरेषांपुत्रत्वनिषेधाद्दौरसदत्तकपरमेव यद्यपिपिंडदोंशहर
श्चैषांपूर्वाभावेपरःपर इति याज्ञवल्क्योक्तेरौरसाभावेदत्तकश्चेमिस्तथाप्यौरे

रा

त्राभावे पौत्रस्तदभावे प्रपौत्रस्तदभावे दत्तकादय इति तेन पुत्रेण लोकांजयति पौत्रेणा
नंत्यमश्नुते अथ पुत्रस्य पौत्रेण विप्रः प्राप्नोति विष्टपमिति जीमूतवाहनधृतवसिष्ठ
हारीतशंखलिखितोक्तेः लोकानंत्यादिप्राप्तिः पुत्रपौत्रप्रपौत्रैरिति याज्ञवल्क्योक्तेश्च पुत्रः
पौत्रश्च तत्सुतः पुत्रिकापुत्र एव च पत्नी भ्राता च तज्जश्च पिता माता स्नुषा तथा
भगिनी भागिनेयश्च सपिंडः सोदकस्तथा असन्निधाने पूर्वेषामुत्तरे पिंडदाः स्मृता
इति स्मृतिसंग्रहे प्रपौत्रानंतरं पुत्रिकापुत्रोक्तेस्तत्समत्वाच्च दत्तकस्य यद्यपि तद्वत्स्यादिति ना
पौत्रश्च पुत्रिकापुत्रः स्वर्गप्राप्तिकरावुभौ रिक्थे च पिंडदाने च समौ तौ परिकीर्तितावि
ति पौत्रसाम्यमुक्तं याज्ञवल्क्येन च औरसो धर्मपत्नीजस्तत्समः पुत्रिकासुतः इत्यौरस
साम्यं तथापि लोके राजसमो मंत्रीत्यादौ किंचिन्न्यूनसमशब्दप्रयोगात् गौण
मुख्ययोः साम्यायोगाच्च स्यात्तदर्थं तत्र न तु समविकल्प इति भ्रमितव्यं पुत्राः पौत्रो
प्रपौत्रो वा भ्राता वा भ्रातृसंततिः सपिंडसंततिर्वापि क्रियार्हा नृप जायते तेषामभा
वे सर्वेषां समानोदकसंततिः मातृपक्षसपिंडेन संबद्धो यो जलेन वा कुलद्वयेपि
चोच्छिन्ने स्त्रीभिः कार्याः क्रिया नृप तत्संघातगतैर्वापि तत्र द्विकस्यात्कारयेन्नृप इति वि
ष्णुपुराणाच्च प्रपौत्रानंतरं दत्तकादय इति पृथ्वीचंद्रमदनरत्नकालादर्शादयः मदनपारि
जातेप्येवं वोपदेवतद्धधरादयस्तु पुत्रेष्वविद्यमानेषु नान्यं वै कारयेत्स्वधामि

236-A ता

तिसुमंतुः क्षौ पितामहः पितुः पश्चात्स्वयं चेत्त्वेयदि गच्छति पौत्रेणैकादशाहादिकं तत्र
श्राद्धं षोडशं नेतत्पौत्रेणैकत्र संपुत्रं वान्ना पितामह इति छंदोगपरिशिष्टे च पुत्राभावे
स्य दाहदशा विधस्तत्स्य रत्वात्सर्वाभावे परः परस्त्य स्यानन्यपरत्वाच्छ्राद्धकाद्यभावे पौत्रा
दीनामधिकारः औरसश्चानुपनीतोपि कुर्यादित्याह पृथ्वीचंद्रोदये सुमंतुः श्राद्धं कुर्याद
वश्यं तु प्रमीतपितृको द्विजः व्रतस्थो वाव्रतस्थो वा एक एव भवेद्यति वृद्धमनुः कुर्याद
नुपनीतोपि श्राद्धमेको हि यः सुतः पितृयज्ञाहुती पाणौ जुहुयाद्ब्राह्मणस्य सः मनुः नह्य
स्मिन्युज्यते कर्म किंचिदामौंजीबंधनात् नाभिव्याहारयेद्ब्रह्म स्वधानिनयनादृते
ब्रह्म वेदः सुमंतुरपि नाभिव्याहारयेद्ब्रह्म यावन्मौंजी निबध्यते मंत्रानन्नुपनीतोपि प
ठेदेवैक औरसः अयं मंत्रपाठस्त्रिवर्षेकृतचूडस्यैव अनुपेतोपि कुर्वीत मंत्रवत्पैतृमे
धिकं यद्यसौ कृतचूडः स्याद्यदि स्याच्च त्रिवत्सर इति सुमंतूक्तेः पल्लुव्याघ्रः कृ
तचूडस्तु कुर्वीत उदकं पिंडमेव च स्वधाकारं प्रयुंजीत वेदोच्चारं न कारयेदि
ति यच्च स्मृतिसंग्रहे कृतचूडोनुपेतश्च पित्रोः श्राद्धं समाचरेत् उदाहरेत्स्वधाकारं
न तु वेदाक्षराण्यसाविति तत्त्र्यब्दमवर्षचूडाविषयमिति माधवच मदनरत्नपृथ्वीचं
द्राः त्रिवर्षोर्ध्वं मंत्रवत्त्वस्य विकल्प इति चंद्रिकावोपदेवश्च मदनरत्ने स्कांदे पद्मे

शुभमेतत्सर्वकर्मपत्नी कुर्याद्यथान्वयं तथैवोर्ध्वदैहिकं कर्म कुर्यात्साधर्मसंस्कृता अग्नी
नौ तु कात्यायनः असंस्कृते पत्न्या चाग्निदानं समंत्रकं कर्तव्यमितरत्सर्वं कारयेदन्य
मेव हि पुत्रश्च न जन्मतोधिकारी किंतु चौलोत्तरमित्याह कालादर्शः चौलादर्वाग्यादिका
दर्वाग्भूनकुर्यात्पैतृमेधिकं मदनरत्ने सुमंतुरपि पुत्रश्चोत्पत्तिमात्रेण संस्कुर्याद्गुरुण
मेव नान्यत्पितरं नाद्विकाच्चौलात्पैतृमेधेन कर्मणा एतच्चौरस्यैव दत्तकादीनां तूपनी
तानामेवाधिकार इति कालादर्शः पृथ्वीचंद्रोदयेपि स्कांदे पित्रोरनुपनीतोपि विदध्या
दौरसः सुतः और्ध्वदैहिकदादिकमन्ये तु संस्कृताः श्राद्धकारिण इति अन्यत्रापि दर्शमहा
लयादावनुपनीतस्याधिकारोस्माभिः पूर्वमुक्तः प्रपौत्राभावे दत्तकादय एकादश पुत्राः
तदभावे भर्तुः पत्नी तस्या अस्याः अपुत्रा शयनं भर्तुः पालयंती व्रते स्थिता पत्न्येव दद्यात्त
त्पिंडं कृत्स्नमंशं लभेतेति वृद्धमनूक्तेः भार्यापिंडं पतिर्दद्याद्भर्तुर्भार्या तथैव च श्व
श्र्वादेश्च स्नुषा चैव तदभावे सपिंडका इति पुत्राभावे तु पत्नी स्यात्पत्न्यभावे तु सोदर इति च हेमा
द्रौ शंखोक्तेः पृथ्वीचंद्रे स्तु कानीन गूढसहज पुनर्भूतनयाश्चापि पत्न्यभावेधिकृताः स्मृते अ
प्रशस्ता सगोत्रादिति इति स्मृतिसंग्रहात्पत्न्यभावे कानीनादय इत्याह पत्युरपि सपत्नी
ज क्षेत्रजाद्यास्तथाहृता तेषामभावे तु पतिस्तदभावे सपिंडका इति मदनरत्ने कात्याय
नोक्तेश्च अपरार्केप्येवं तेन पत्युरुद्ववविवेके उक्तः सत्यपि सपत्नीपुत्रे पत्युरधिकार

237-A

इति तन्निरस्तं यच्चतत्रैव कात्यायनः नभार्यायाः पतिर्दद्यादपुत्रायाअपिक्वचित् यच्च
विष्णुपुराणे कुलद्वयेपिचोत्सन्नेस्त्रीभिः कार्याक्रियानृपेति यच्चमार्कंडेयपुराणे
सर्वाभावेस्त्रियःकुर्युःस्वभर्तॄणाममंत्रकमिति तदासुरादिविवाहोढाविषयं धर्म्ये।
विवाहेत्वूढायाःसापत्नीपरिकीर्तिता क्रयक्रीतातुयानारीनसापत्न्यभिधीयते नसा
दैवेनवापित्र्ये दासीतांकवयोविदुरितिमाधवीये शातातपोक्तेः यत्तुस्मृतिरत्नाकरः मूल।
दाहीनेपुत्रस्यचयापुत्रीसापिपिंडप्रदाभवेत् तस्यपिंडान्दशैकंवाएकाहेनैवनिक्षिपेदि
तिजाबालोक्तेः भर्तुर्धनहरापत्नीतांविनादुहितास्मृता अंगादंगात्संभवतिपुत्रवत्तुदुहिता
नृणामिति बृहस्पतिः नातुदुहितुर्धनहारित्वोक्तेःअपुत्राभावेकन्यातदभावेसपत्नीपुत्रइत्या।
हतः तन्नर्वविरोधात् मातृदुहितरःशेषमृणात्ताभ्यऋतेन्वयइतिदुहितुर्मातृधनमात्राहित्वे
नपुत्रस्यतच्छ्राद्धानधिकारापत्तेश्चापेक्षंवचनंतुभ्रातृपुत्राद्यभावविषयं पत्न्यभावेअवि
भक्तस्यसोदरः पूर्वोक्तशंखवचनात् विभक्तस्यतुदुहिता धनहारित्वात्पूर्वोक्तजाबालि
वचनाच्च तत्राप्यूढानूढसमयेऊढैव दुहितापुत्रवत्कार्यान्मातापित्रोस्तुसंस्कृता अशौ
चमुदकंपिंडमेकोद्दिष्टंसदातयोरितिभरद्वाजोक्तेः तदभावेदौहित्रः धनहारित्वात्।
मातापित्रोरुपाध्यायाचार्ययोरौर्ध्वदेहिकं कुर्वन्मातामहस्यापि व्रतीनभ्रश्यते
व्रतादितिचंद्रिकायांवृद्धमनूक्तेः यथाव्रतस्थोपिसुतःपितुःकुर्यात्क्रियांनृप उदक्य।

घांमरणाभावे दौहित्रोपितथार्हतीत्यपरार्के भविष्योक्तेश्च एतच्च धनहारिण एवावश्यकं
नान्यस्येत्याह तत्रैव स्कांदे श्राद्धं मातामहानां तु अवश्यं धनहारिणा दौहित्रेणार्थनिःस्वे
नैकर्तव्यं सर्वमुत्तरमिति तेन दौहित्रो त्रपुत्रीकृत इति देवयाज्ञिकोक्तिः परास्ता अत्र
पत्नीदौहित्रसमवाये शास्त्रत्वात्पत्न्येव कुर्यात् दौहित्रभ्रातृपुत्रसत्त्वे विभक्तस्य दौहित्रोऽ
विभागे भ्रातृपुत्रः भ्रातृतत्पुत्रसत्त्वे कनिष्ठश्चेद्भ्राता ज्येष्ठश्चेत्तत्पुत्रः कुर्यादिति दाक्षि
णात्यग्रंथाः हारलतादौ तु भ्रातृभ्रातुरस्य पंचकैस्तद्भार्या चेन्न विद्यते तस्य भ्रातृसुतश्चैके
यस्य नास्ति सहोदर इति व्यासोक्तेः पत्नी कुर्यात्तदभावे पत्न्यभावे सहोदर इति कौर्मा(
च्च ज्येष्ठभ्रातैव कुर्यान्न तत्पुत्रः यत्तु नानुजस्य तथाग्रज इति तत्कनिष्ठभ्रातृसत्त्ववि
षयं यत्तु मनुः सर्वेषामेकजातानामेकश्चेत्पुत्रवान्भवेत् सर्वांस्तांस्तेन पुत्रेण पु
त्रिणो मनुरब्रवीदिति तत्सोदराभावविषयमित्युक्तं मदनरत्ने स्मृतिसंग्रहे पुत्रः कु
र्यात्पितुः श्राद्धं पत्नी चान सन्निधौ धनहार्यथ दौहित्रस्ततो भ्राता च तत्सुतः भर्तुः स
होदरो भ्राता कुर्याद्वा हारादितत्सुतः ततश्च सोदरो भ्राता तदभावे च तत्सुत इति भ्रातृपुत्रा
देव क्रमेण पितृमातृस्नुषास्वसृतत्पुत्रादयः धनहारित्वात् भगिनीतत्सुतयोर्विशेष
माह मदनरत्ने कात्यायनः अनुजाग्रजा वापि भ्रातुः कुर्वीत संस्क्रियां ततश्च सोद
रात्तद्वत्क्रमेण तनयस्तयोः अपरार्के कार्ष्णाजिनिः पुत्रः शिष्योथवा पत्नी पि

238-A

ताम्रातास्तथागुरुः स्त्रीहारीधनहारीच कुर्यात्पिंडोदकक्रियां मार्कंडेयपुराणे १
पुत्रोभ्राताचतत्पुत्रः पत्नीमातातथापिता पितामहश्चपिशिष्यश्च कुर्वीत्यथौर्ध्वदैहि
कं तेन धनहारी एतद्भिन्न इति कालादर्शः अत्र पाठक्रमो न विवक्षितः पूर्ववाक्येस्व
रसः शाखादिभिर्श्रेतक्रमोक्तेः अपजिह्वाया अयवक्षसइतिवत् पृथ्वीचंद्रोदयेस्कंद
मनुः सुवास्वस्रीयतत्पुत्रजातिसंबंधिबांधवाः पुत्राभावेतु कुर्वीरन्सपिंडांतंय
थाविधि। मार्कंडेयपुराणे पुत्राद्यसत्त्वेथोश्च सखापिश्वशुरस्यच जामाता
स्नेहवत्कुर्यादविलंबयेत्समेधिकं चंडिकायां वृद्धशातातपः मातुलो भागिने
यस्य स्वस्रीयो मातुलस्यच श्वशुरस्य गुरोश्चैव सख्युर्मातामहस्यच एतेषांचैव
भार्याणां स्वसुर्मातुः पितुस्तथा श्राद्धमेषां तु कर्तव्यमिति वेदविदो विदुः पृथ्वी
वेकेप्यपृथ्वीचंद्रोदयेचब्राह्मे दत्तानांचाप्यदत्तानां कुरुतेपिता चतुर्थे हविनास्ते
स षां कुर्वीरन्स्वमाहिताः दत्ताश्चाग्दत्ताः मातामहानां दौहित्राः कुर्वंत्यहनि चापरे
तेषांतेषां प्रकुर्वंति द्वितीयेहनि सर्वदा जामातुःश्वशुराश्चक्रमेणोवांतेपि च संयताः
मित्राणां तदपत्यानां श्रोत्रियाणां गुरुस्तथा भागिनेयस्तु तानां च सर्वेषांत्वपरे
हनि रात्रौ सति सपिंडेतु निरपत्ये गुरोरादितः मंत्रीनात्रदशेणां वंतुरावीर्त्वा करोति सः
अत्र द्वितीयाहदेश्राद्धविधानमस्थिसंचयपरं कालादर्शे दाहादिमंत्रवाप्यत्रो

विदध्यादौरसः सुतः तदभावे तु पौत्रश्च प्रपौत्रः पुत्रिकासुतः दौहित्रो धनहारी च भ्राता
तत्पुत्र एव च पिता माता स्नुषा चैव सच सातत्पुत्र एव च सपिंडः सोदको मातुः सपिंड
श्च सोदकः स्त्री च शिष्यर्त्विगाचार्या माता च सर्वापि च उत्पन्नसंबंधो रिक्थेन कार
दवनीपतिः गौतमः पुत्राभावे सपिंडा मातृसपिंडाः शिष्यश्च दद्युस्तदभावे ऋ
त्विगाचार्यौ पत्र चंद्रिकायां सद्वृत्तानां प्रीत्या श्राद्धं प्रकर्तव्यं सर्वेषां वर्णलिंगिनां
मिति तत्सवर्णो विषयं ब्राह्मणस्त्वन्यवर्णानां न कुर्यात्कर्म किंचन कामाल्लोभाद्भयान्मो
हात्कृत्वा न ज्ञातितां व्रजेदिति ब्राह्मोक्तेः न ब्राह्मणेन कर्तव्यं शूद्रस्याप्यौर्ध्वदेहिकं
शूद्रेणावाब्राह्मणस्याविनापारसवात्क्वचिदिति पारस्करोक्तेश्च पारसच जडश्च द्रादपु
त्रः अत्रेदं तत्वं सर्वत्र पुत्रादेः पूर्वस्याभावे पत्न्यादेरधिकार उक्तः तत्राभावोऽस
न्निधिर्नाशश्चोच्यते अत एव पूर्वत्रः असन्निधाने पूर्वेषामित्युक्तं तत्रासन्निधौ प
त्न्यादेः सर्वत्राधिकारे प्राप्ते प्रोषिता वसिते पुत्रः कालादति चिरादपि एकादशाद्याः
क्रमशो ज्येष्ठस्य वि क्रियाः ज्येष्ठेनैव तु यत्कृतं तमित्याद्येर्देशांतरे पश्चादागत्य पुत्र
नाश एव पत्न्यादेः सपिंडनादावधिकारः असन्निधौ तु तत्सर्वमेव नोर्ध्वं अतो नधि
कारिणा भ्रात्रादिना कृतमप्यकृतमेवेति पुनरावर्तनीयं मासिकाकर्षोऽप्यावर्त
नीयः एकादशाहमासिकानि नावर्तेते तदप्यपसापिकर्तव्यं सपिंडीकरणं पुनरिति

नदात्तत्तिविधानाभावादितिकेचित् तन्न अस्यनिर्मूलत्वात् अतस्तदपिकनिष्ठक
तमावर्त्तते वृद्धिश्रौतपिंडपितृयज्ञार्थेतुकृतेनावर्त्तते नासपिंड्याग्निमान्पुत्रः पितृ
यज्ञंसमाचरेत् नपार्वणंनाभ्युदयंकुर्वन्न लभतेफलमिति वृध्युत्तरनिषेधादितिभ्राता
भ्रातृपुत्रोवेत्यादिप्राजापत्यादिवचोभ्यः कनिष्ठादेरप्यधिकारात् यथात्रज्येष्ठकर्तृ
कत्वबाधस्तथापुत्रकर्तृकत्वस्यापिबाधः सपिंडनेत्ववृद्धवत्कर्त्तव्यंनत्रिणीयेवक्ष्या
मः अधिकारिविशेषेणक्रियाव्यवस्थोक्ताविष्णुपुराणे पूर्वाः क्रियामध्यमाश्चत
थाचैवोत्तराः क्रियाः त्रिप्रकाराः क्रियाह्येतास्तासांभेदानशृणुष्वमे आदाहाद्वादशा
हाच्चमध्येयाः स्युः क्रियास्त्वपताः पूर्वामध्यमासिसाम्येकोद्दिष्टसंज्ञिताः प्रेतेपितृ
त्वमापन्नेसपिंडीकरणादनुक्रियन्तेयाः क्रियापुत्रप्रोच्यन्तेतास्तथोत्तराः पितृमातृस
पिंडैश्चसमानसलिलैस्तथा तत्संघातगतैश्चैववराज्ञावाधनहारिणा पूर्वामध्याश्च
कर्तव्याः पुत्राद्यैरेवचोत्तराः दौहित्रैर्वानरश्रेष्ठकार्यास्तत्तनयैस्तथा मृताहनितु(
कर्तव्याः स्त्रीणामप्युत्तराः क्रियाः दौहित्रतत्पुत्रयोर्धनहारिणोरिदं एवमन्यस्यधन
हर्तुः पश्चार्धहरः सपिंडपित्र्यायत्तंवोक्तेः प्रेतस्यप्रेतकार्याणि अकृत्वाधनहारकः व(
र्णानायद्वधे प्रोक्तंनद्रष्टंप्रयतश्चरेदिति पृथ्वीचंद्रोदयेमापादोक्तेः मदनरत्नेस्कां
देपिमलमेतन्मनुष्याणांद्रविणंयत्प्रकीर्तितमित्युक्त्वाअरयिभिःस्तस्यनिर्दिष्टानि

नि॰सिं॰
२४०

240

स्मृतिः पावनी परा आदेहपतनात्तस्य कुर्यात्पिंडोदकक्रियां इत्युक्तं क्रियानिबंधे
कात्यायनः नच माता न च पिता कुर्यात्पुत्रस्य पैतृकं नाग्रजश्च तथा भ्राता भ्रातॄणां
तु कनीयसां पृथ्वीचंद्रोदये बौधायनः पित्रा श्राद्धं न कर्त्तव्यं पुत्राणां तु कथंचन भ्रात्रा
चैव न कर्त्तव्यं भ्रातॄणां च कनीयसां यदि स्नेहेन कुर्यात्तु उत्सन्नबांधवं प्रेतं पिता भ्राताथ
वाग्रतः जननी वापि संस्कुर्यान्न सदेनोन्यथा भवेदिति सुमंतूक्तेः ब्रह्मचारिणां तु शुद्धि
विवेके पृथ्वीचंद्रोदये च ब्राह्मे असमाप्तव्रतस्यापि कर्त्तव्यं ब्रह्मचारिणः श्राद्धं तु मातापितृ
मिर्न तु तेषां करोति सः श्राद्धं मासिकाब्दिकादि सर्वं कार्यमित्यर्थः नात्विति निषेधोन्यस
त्वेय तु छंदोगपरिशिष्टे न त्यजेत्सूतके कर्म ब्रह्मचारी स्वकं क्वचित् न दीक्षणात्परं य
ज्ञे न कृच्छ्रादितपश्चरन् पितर्यपि मृते नैषां दोषो भवति कर्हिचित् आशौचं कर्मणोंते
स्यात् त्र्यहं वा ब्रह्मचारिणां याज्ञवल्क्यः न ब्रह्मचारिणः कुर्युरुदकं पतितास्तथे
ति न दद्यन्यसत्त्वे अन्याभावे तु ब्रह्मचारिणापि कार्यं पूर्वोक्तवृद्धमनुवचनात्
आचार्यपित्रुपाध्यायान्निर्हृत्यापि व्रती व्रती सकटान्नं च नाश्नीयान्न च तैः सह संवसे
दिति तेनैवोक्तेः ब्रह्मचारिणः शावकर्मणो व्रतान्निवृत्तिरन्यत्र मातापित्रोरिति वसि
ष्ठोक्तेः अत्र शौचमेकाहं वक्ष्यामः प्रागुपनयनात् मृतस्य पंचवर्षात्परं सपिंडीकरणव
र्ज्जं षोडशश्राद्धादि सर्वं कार्यमित्युक्तं देवजानीये असंस्कृतानां भूमौ पिंडं दद्यात्संस्कृता

राम
२४०

240-A

नांकुरोस्त्विति प्रचेतोवचनाद्भागेन दद्यामः अविभक्तानां विशेषमाह पृथ्वीचंद्रोदये
मरीचिः बहवः स्युर्यदा पुत्राः पितुरेकत्रवासिनः सर्वेषां तु मतं कृत्वा ज्येष्ठेनैव तु य
त्कृतं द्रव्येण चाविभक्तेन सर्वैरेव कृतं भवेत् ज्येष्ठस्य कर्तृत्वेपि सर्वे फलभागिन
इत्यर्थः तेन येब्रह्मचर्यपरान्नववादयः पतिसंस्कारास्ते सर्वेषां भवंतीति सिद्धं संस
ष्टिनामप्येव तुल्यत्वात् विभक्तानां विशेषमाहोशनाः नवश्राद्धं सपिंडत्वं श्राद्धान
पि च षोडशः एकेनैव तु कार्याणि संविभक्तधनेष्वपि लघुहारीतः सपिंडीकरणां
तानि यानि श्राद्धानि षोडश पृथक् नैव सुताः कुर्युः पृथग्द्रव्या अपि क्वचित् ऊर्ध्वं स
पिंडीकरणात्सर्वे कुर्युः पृथक् पृथक् मदनरत्ने विभक्तास्तु पृथक् कुर्युः प्रति
संवत्सरादिकं एकेनैवाविभक्तेषु कृतं तैः सर्वैस्तु तत्कृतं एतेनाब्दिकादिष्वविभक्तानां
मनियमइति वदन्त्यस्मत् लपाणिः परास्ताः दत्तकस्तु जनकस्य पुत्राद्यभावे दद्यान्न तस्मा
त्वे गोत्ररिक्थे जनयितुर्न भजेद्दत्रिमः सुतः गोत्ररिक्थानुगः पिंडो व्येति ददतः स्व
धेति मनूक्तेः इदं जनकस्य पुत्रसत्त्वविषये एतच्च प्रवरमंजर्यां कात्यायनलौगा
क्षिभ्यां स्पष्टमुक्तं अथ ये दत्तक्रीतकृत्रिमपुत्रिकापुत्राः परपरिग्रहेणानार्षेया जा
तास्ते द्व्यामुष्यायणा भवंति यथा शौंगशैशिरीणां यानि चान्यान्येवं समुत्पत्तीनि कुला
नि भवंतीत्यादिना द्वयोः पित्रोः प्रवरान्स्वोक्तं अथ यद्येषां स्वात्स्वभार्यास्वपत्यं न स्या

रिक्थं हरेयुः पिंडं चैभ्यस्त्रिपुरुषं दद्युर्यद्युभयोर्न स्यादुभाभ्यामेव दद्युरेकस्मिन् श्रा
द्धे पृथगुद्दिश्यैकपिंडे द्वावनुकीर्त्तयेत्परिग्रहीतारं चोत्पादयितारं वा तृतीयात्पुरुषा
दिति हेमाद्रौ कार्ष्णाजिनिः यावंतः पितृवर्ग्याः स्युस्तावद्भिर्दत्तकादयः चतुर्थपुरु
षं छंदतस्मादेषा त्रिपूरुषी साधारणेषु कालेषु विशेषो नास्ति निर्णयो अस्यार्थमा
ह हेमाद्रिः दत्तकादयः जनकपालकयोः कुलेष्वेतानां स्ववर्गीयैः सपिंडनं कुर्युः।
दत्तकानां पुत्रास्तु पितुर्दत्तकस्य पितृभ्यां जनकपालकाभ्यां स्वपितामहाभ्यां सपिंड
नं कुर्युः तेषां प्रपौत्रस्तु दत्तकस्य प्रपितामहस्य पालककुलस्थं चतुर्थं योजयेन्नवा छंद
द्वादशीमहालयादौ तु द्वयोः पित्रोः पितामहयोः प्रपितामहयोर्वा श्राद्धं देयं तत्र द्वयोः।
पित्राद्योः पृथक् पिंडदानं द्वयोरुद्देशेनैको वेति अत्र केचित् आवयोरयमिति परिभाष्य
यो दत्तस्तस्येदं द्वयोः पित्रोः श्राद्धं यत्तु परिभाष्य दत्तः स गृहीतुरेव स पालकायैव दद्यादि
त्याहुः अत्र मूलं तत एव प्रष्टव्याः वस्तुतस्तु जनकस्य पुत्रपत्न्याद्यभावे दत्तको द्वयोर्दद्या
दन्यथा पालकायैव प्रागुक्तकात्यायनवचनात् मानवीयमप्येतद्विषयमेव गोत्रं तु श्रा
द्धे पालकस्यैव विवाहे तूभयोरित्यादि महार्णवप्रवरदर्पणोक्तेश्च यस्तु मूल्यक्रीतायां
पर भार्यायां दास्यां वोत्पन्नः स बीजिन एव दद्यात् मूल्यं विना स्वयमुपनतायां तु क्षे
त्रिण एव न तु तं पृथ्वीचंद्रोदये कौर्मे अनियोगात्सुतो यस्तूत्पन्नो जायते चि

241-A

हि प्रदद्याद्बीजिने पिंडं क्षेत्रेण तु ततोन्यथेति क्षेत्रजादे विशेषस्तु कलौ तदभा
वान्नोच्यत इति दिक् जारजातं विशेषमाहापरार्के नारदः जायते त्वनियुक्ताया
मेकेन बहुभिस्तथा अरिक्थभाजस्ते सर्वे बीजिनामेव ते सुताः दद्युस्ते बीजिने पिंडं
माता चेच्छुल्कतो हृता अशुल्कोपहृतायां तु पिंडदा वोढुरेव ते धर्मार्थे श्राद्धकरणे फ
फलमाह चंद्रिकायां शातातपः प्रीत्या श्राद्धं तु कर्तव्यं सर्वेषां वर्णलिंगिनां एवं कुर्व
न्नरः सम्यक् महतीं श्रियमाप्नुयात् गयायामपि तत्रैव ब्रह्मवैवर्ते आत्मजो वा पिवा
न्योपि गयाशीर्षे यदा तदा यन्नाम्ना पातयेत्पिंडं तं नयेद्ब्रह्म शाश्वतं एतच्च यदा फलभमा
ष्यिन द्विशिर्वा क्रियते तदा प्रेतशिलाश्राद्धवर्जं कुर्यात् तस्य प्रेतत्वविमोक्षार्थत्वात् तस्य
च जातत्वादिति चेत् वस्तुतस्तु सन्यासिश्राद्धवदत्रापि सर्वकार्ये सांगाधिकारा
दिति युक्तं प्रतीमः सन्यस्तपित्रादिस्तु पितुः पित्रादिभ्यः सर्वश्राद्धं कुर्यादित्युक्तं
प्राक् वक्ष्यते च जीवपितृश्राद्धे अथ स्त्रीशूद्राणां श्राद्धं मंत्रवर्जं तूष्णीं भवति स्त्रीणा
ममंत्रकं श्राद्धं तथा शूद्रस्तु तस्य च प्राग्द्विजाश्रयतादेशात्तेच कुर्युस्तथैव तदिति
हेमाद्रौ मरीचिवचनात् अयमेव विधिः प्रोक्तः शूद्राणां मंत्रवर्जितः अमंत्रस्य
तु शूद्रस्य विप्रो मंत्रेण गृह्यते इति ब्राह्मोक्तेश्च गृह्यते संबध्यते अस्य श्राद्ध
करणं पाठेपि परिभाषात्वान्न प्रकरणेन संकोचो युक्तः तेन शूद्रस्य र

नि॰ सिं॰
२४२

242

स्नानादावपि विप्रेण मंत्रपाठः कार्यः प्रमेयस्येति विशेषणात्स्त्रिया अपीति स्व
रूपारिणः यत्तु तेनोक्तं मंत्रजन्यनियमादृष्टसिद्धिस्तु नमस्कारेणानुमतोस्य
नमस्कारो मंत्रः इति गौतमोक्तेरिति तन्न दृष्टद्वारैव तत्प्राप्तिर्न स्वातंत्र्येणान्यथा ते
वारष्टतेप्यवघाते जन्यादृष्टार्थं सोपि क्रियेतेति यत्किंचिदेतत् तेन पितृणां नाम गो
त्र इत्यादौ पत्र द्विजानामपि नाममंत्र उक्तस्तत्र प्रतिप्रसवमात्रार्थमुक्तं न तिलावपाना
दावपि अत्र केचित् वैदिकमंत्रो विप्रस्य पौराणस्तु शूद्रैः पठनीयः न हि वेदस्याधि
कारः कश्चिच्छूद्रस्य विद्यते पुराणेष्वधिकारो मे दर्शितो ब्राह्मणैरिहेति तगेवं पाद्मो
क्तेरित्याहुः गौडास्त्वेवं तन्न नाध्येतव्यमिदं शास्त्रं वृषलस्य तु सन्निधाविति कौर्मे
पुराणनिषेधेन वेदस्य दूरापास्तत्वात् अध्येतव्यं ब्राह्मणेन वैश्येन क्षत्रियेन च श्रोत
व्यमेव शूद्रेण नाध्येतव्यं कदाचन श्रौतं स्मार्तं च वै धर्मं प्रोक्तमस्मिन्नृपोत्तम तस्मा
च्छूद्रैर्विना विप्रं न श्रोतव्यं कदाचनेति तत्रैव पुराणाधिकारे भविष्योक्तेश्च एतेन
नाध्येतव्यमिति निषेधो मंत्रेतरपुराणपर इति श्रीदत्तादिमतमपास्तं तेन पौराणमं
त्रामेव विप्रेण पाठो न वैदिकानामिति सिद्धं द्विजास्त्रियस्तु संकल्पमात्रं स्वयं कृ
त्वा वैदिकमंत्रयुक्तं सर्वं ब्राह्मणद्वारा कारयेयुरिति प्रयोगपारिजातः अत एव स्त्री
णामित्युक्त्वा विवाहस्त्री परमिति हेमाद्रिमाह अनुपनीतस्तु वैदिकमंत्रयुक्तं स

242-A

वैश्वदेवमेवकुर्यादित्युक्तंप्राक् यत्तुप्राग्दिजास्य त्वतादेशादितितद्दशान्तविषयम् ।
चूडविषयंचेतिदिक् शूद्रस्यतुसदामश्राद्धमेव सदाचैवतुशूद्राणामामश्राद्धंविधी
यतइतिहेमाद्र्युक्तेः पृथ्वीचंद्रोदयेमात्स्येपि एवंशूद्रोपिसामान्यंवृद्धिश्राद्धंचसर्वदा ।
नमस्कारेणमंत्रेणकुर्यादामान्नवत्सदा तत्रैववृद्धपराशरः आमान्येनतुशूद्रस्यतद्धर्मी ।
तुद्विजपूजनं कृत्वाश्राद्धंतुनिर्वाप्यसजातीन्नाशयेदथ सएव आमान्नंशूद्रस्यपक्वा
न्नेपक्वमुच्छिष्टमुच्यते हेमाद्रौभविष्ये धर्मेण वस्तुधर्मज्ञायदिशूद्राः प्रकुर्वते ।
अग्नौकरणमंत्रश्चनमस्कारोविधीयते आवाहनादिकर्तव्यंयथाशूद्रेणतच्छृणुदे
वानांदेवनाम्नातुपितॄणांनामगोत्रतः पिंडदोनिर्वपेद्धीरनामतोगोत्रतस्तथा ।
शूद्राणांगोत्राभावेपिकाश्यपंगोत्रंज्ञेयं तस्मादाहुः सर्वाः प्रजाः काश्यप्य इतिश्रुतेः
गोत्रनाशेतुकाश्यपइतिव्याघ्रपादोक्तेश्चेतिहेमाद्रिः एवमन्यत्रगोत्राज्ञाने एवंतर्प
णादिषुज्ञेयं तत्रैवभविष्ये शूद्रस्तुगृहपाकेनतत्पिंडान्निर्वपेत्तथा सक्तुमूलफलं
तस्यपायसंवाभवेत्स्मृतं गौतमः अनुमतोस्यनमस्कारोमंत्रइति देवताभ्यश्चेत्य
यंनमस्कारमंत्रइतिकेचित् विज्ञानेश्वरोप्येवमाह हेमाद्रिस्तुशूद्रोप्यमंत्रवत् कुर्या
दनेनविधिनाबुधइतिमात्स्येमंत्रनिषेधान्नाममंत्रेणेत्याह पृथ्वीचंद्रोदयेस्कांदे रा
जकार्येनियुक्तस्यबंधनिग्रहवर्तिनः व्यसनेषुचसर्वेषुश्राद्धंविप्रेणकारयेत् यत्तु

भारते राजधर्मेषु यवनाः किराताः गांधाराश्चीनाः शबरबर्बराः शकास्तुषाराः कंका
श्च पह्लवाश्चांध्रमद्रकाः इत्युक्त्वा ब्रह्मक्षत्रप्रसूताश्च वैश्याः शूद्राश्च मानवाः कथं धर्माश्च
रिष्यंति सर्वे विषयवासिन इति चोक्त्वा वेदधर्मक्रियाश्चैव तेषां धर्मो विधीयते पितृ
यज्ञास्तथा कूपाः प्रपाश्च शयनानि च दानानि च यथाकालं द्विजेभ्यो विसृजेत्सदा तथा ।
दक्षिणाः सर्वयज्ञानां दातव्या भूतिमिच्छता पाकयज्ञा महार्हाश्च कर्तव्याः सर्वदस्युभि
रिति म्लेच्छादीनां श्राद्धविधानं तदपि सजातीयभोजनद्रव्यदानादिपरं न तु श्राद्धपरमिति
इति श्रीमज्जगद्गुरुनारायणभट्टसूनुरामकृष्णभट्टात्मजकमलाकरभट्टकृते निर्णय
सिंधौ अधिकारिनिर्णयः अथ पितरः हेमाद्रौ मात्स्ये देवलौ नामगोत्रं पितृणां तु प्रा
पकं हव्यकव्ययोः अग्निष्वात्तादयस्तेषामाधिपत्ये व्यवस्थिताः नाममंत्रास्तथा देशाम
वांतरगतानपि प्राणिनः प्रीणयंत्येव तदाहारत्वमागतान् देवो यदि पिता जातः शुभक
र्मानुयोगतः तस्यान्नममृतं भूत्वा देवत्वेप्यनुगच्छति गांधर्वे भोगरूपेण पशुत्वे च तृ।
णं भवेत् श्राद्धान्नं वायुरूपेण नागत्वेप्युपतिष्ठति पानं भवति यक्षत्वे राक्षसत्वे तथामि
षं तदनुजत्वे तथा मद्यं प्रेतत्वे रुधिरोदकं मनुष्यत्वेन्नपानादि नानाभोगकरं भवेत् अ
त्र पित्राद्यैर्जनकादीनामेव पितृत्वमुच्यते न वस्वादीनां असाचेतनत्व इति यजमानस्य
पित्रो इति शातातपस्मृतेः यस्य पिता प्रेतः स्यात् स पित्रे पिंडं निधायेति विष्ण्वादिस्मृतेः ।

243-17

अ यत्तु मनुदेवलैः वसवः पितरोज्ञेयारुद्राज्ञेयाः पितामहाः प्रपितामहास्तथा॥
दित्याः श्रुतिरेषासनातनी यच्च याज्ञवल्क्यः वसुरुद्रादितिसुताः पितरः श्राद्धदेव
ताइति तदभेदध्यानार्थं यत्तु हेमाद्रौ नंदिपुराणे विष्णुः पितास्यजगतो दिव्यो
यज्ञः सएवच ब्रह्मापितामहोज्ञेयोरुद्रश्चसंच प्रपितामहाइति यच्च भविष्ये अ
निरुद्धः स्वयंज्ञेयः प्रद्युम्नश्चपितास्मृतः संकर्षणस्तत्र ज्ञानकोवासुदेवस्तत्प्र
पिता स्वयंकर्त्तायत्तत्रैव प्रथमोवरुणोज्ञेयः प्राजापत्यस्तथापरः तृतीयेग्निः
स्मृतः पिंडेह्येषपिंडविधिः स्मृतः यच्चादित्यपुराणे मासाश्चपितरोज्ञेयाऋत
वस्यपितामहाः संवत्सरः प्रजानांच सुमेधः पितामहः यच्चनंदिपुराणे अग्निष्वा
त्ताब्राह्मणानांपितरः परिकीर्तिताः राज्ञांवर्हिषदोनामविशांकाव्यांश्चकीर्तिताः सु
कालिनस्तुशूद्राणांव्यामाम्लेछांत्यजातिषुइति अत्राहृतादिषुपित्रादयः समुच्च
येनविकल्पेनवाययाचारंतत्तद्देवतारूपेणध्येयाइति हेमाद्र्यादयः हेमाद्रौ ब्राह्मे
पार्वणंकुरुतेयस्तुकेवलंपितृहेतुकं मातामहंनकुरुतेपितृहासप्रजायते॥
सौम्याः पितरोयत्रपूज्यंतेतत्रमातामहाध्रुवं अविशेषेणकर्तव्यंविशेषान्न
रकंव्रजेत् अस्यापवादमाहकात्यायनः कर्षूसमन्वितंमुक्त्वातथाद्यंश्राद्धषो
डशं प्रत्याब्दिकंचशेषेषुपिंडाःस्युःषडितिस्थितिः दर्शादौसपत्नीकानामेवदेव॥

नात्वं स्वेन भर्त्रा समं श्राद्धं माता भुंक्ते स्वधासमं पितामही च स्वेनैव तथैव तथैव प्रपि
तामहीति तद्गेवोक्तेः चंद्रिकायां चतुर्विंशतिमते स्वपाहं वर्जयित्वैकं स्त्रीणां ना
स्ति पृथक् क्रिया केचिदिच्छंति नारीणां पृथक् श्राद्धं महर्षयः अन्वष्टकासु वृद्धौ च
गयायां च क्षयेहनि अत्र मातुः पृथक् श्राद्धमन्यत्र पतिना सहेति कात्यायनोक्तेः
श्च अस्य निर्मूलतां वदंतो गौडास्तु तत्राप्येव अत्र भोग इत्यध्याहारः अन्यथा सपत्नि
कार्ये मात्रे इति प्रयोगापत्तेः अत्र मातृशब्दो जनन्यामेव मुख्यः तेन सपत्नमातृ
भ्यो न दद्यात् एवं पितामह्यादिशब्दे पितृजनन्यादय एवोच्यंते इति तत्सपत्नीभ्यो
न देयमिति हेमाद्रिः करुणेपन तु महालयादौ देयमिति स एव अथ विश्वेदेवाः हेमा
द्रौ शंखबृहस्पती इष्टिश्राद्धे क्रतुदक्षौ सत्यौ नांदीमुखे च वसू नैमित्तिके कामकालौ
काम्ये च धुरिलोचनौ पुरूरवार्द्रवश्चैव पार्वणे समुदाहृतौ तत्रैव उत्पत्तिनाम
चैतेषां न विदुर्ये द्विजातयः अयमुच्चारणीयस्तैः श्लोकः श्राद्धासमन्वितैः आगाछं
तु महाभागा विश्वेदेवा महाबलाः ये यत्र विहिताः श्राद्धे सावधाना भवंतु ते इति
इष्टिश्राद्धं प्रतिरुचिरित्युन्नामिति कल्पतरुः आधानादिकर्मांगमित्यन्ये नैमित्ति
कमेकोद्दिष्टं एकोद्दिष्टं तु यच्छ्राद्धं तन्नैमित्तिकमुच्यते इति भविष्योक्तेः यद्यपि ए
कोद्दिष्टं दैवहीनमिति तत्र विश्वेदेवनिषेधः तथापि नवश्राद्धे द्वादशमासिके च

244-A

कामकालौ ज्ञेयौ नवश्राद्धे दशाहानि नवमिश्रधूरूरवत् अतःपरं पुराणं चेति त्रि
विधं श्राद्धमुच्यते यस्मिन्नेव पुराणे वा विश्वेदेवान्लेभिरे च श्राद्धं तद्वेव्या
ख्यं तत्र बलेमंत्रवर्ज्जमिति बहूचपरिशिष्टात् एतच्च बहूचानामेव तेषामेवोक्तेः
अन्येषां तु नात्र विश्वेदेवा इति कात्यायनोक्तेस्तन्निषेधश्चेति पृथ्वीचंद्रोदयः
अन्ये तु नैमित्तिकं सपिंडीकरणमाहुः भविष्ये यश्चैकोद्दिष्टं तद्वदेनोक्तं
तथापि तद्दैवं कर्तव्यमयुग्मान् भोजयेद्द्विजानिति तत्रैव विश्वेदेवनिषेधात् य
द्यपि सपिंडीकरणं शातातपैकोद्दिष्टत्वं तथापि सपिंडीकरणं श्राद्धं दैवपूर्वं नियोजयेदिति
वचनात्तत्परत्वं हेमाद्रावादित्यपुराणे विश्वेदेवौ क्रतुर्दक्षः सर्वास्विष्टिषु कीर्तितौ नित्यं
नांदीमुखे श्राद्धे वसुसत्यौ च पैतृके नवान्नं लभते देवौ कालकामौ सदैव हि अपि क
न्यागते सूर्ये काम्ये च धुरिलोचनौ पुरूरवार्द्रवौ चैव विश्वेदेवौ तु पार्वणे क्वचित्
विश्वेदेवापवादमाह हेमाद्रौ शातातपः नित्यश्राद्धमदैवं स्यादेकोद्दिष्टं तथैव च ।
मातृश्राद्धं च युग्मैः स्याददैवं प्राङ्मुखैः पृथक् योजयेद्दैवपूर्वाणि श्राद्धान्यन्यानि
यत्नतः नांदीश्राद्धे भिन्नप्रयोगपक्षे मातृश्राद्धमदैवमिति हेमाद्रिः अथ विप्राः
ते चोत्तममध्यमाधमभेदेन त्रिविधाः तत्राद्याः अत्रमदीयाः श्लोकाः त्रिणाचिकेतस्
त्रिमधुश्च बह्वृचोऽध्यायवर्णो याजवसामगोच षडंगविच्च त्रिसुपर्णवेदः ताप्यपथवेरी

ह्मोध्यापनेरतस्त्र शतायुर्वेदार्थविदोप्रवक्तास्याद्ब्रह्मचारी च तथाग्निचि[illegible]सी
दद्वृत्तिः सत्यवाक्परुषैः स्वैर्मातापित्रोः पंचभिः ख्यातवंशः पत्नीयुक्तोज्येष्ठसामा
पुराणवेत्ता पुत्री चेति हारीतोष्टभिन्नः योगी भिक्षुः सामगो ब्रह्मतेजाः पंचाग्निश्च श्रोत्रिय
स्तत्सुतो वा शंभुध्यायी स्त्रीशायादा ब्रूसेवीर्यापक्षेनेतूत्तमाः संप्रदिष्टाः भिक्षुर्योगी
पांथयतेनत्वलभ्याभाग्याल्लभ्यास्ते तदा भोजनीयाः श्राद्धे विप्रस्वरूपविष्टे पश्चात्संप्रा
प्ताश्चेद्विप्रयत्नेनानुभोज्याः श्रवन्मरले हेमाद्रौ तेपि तत्रैव नारदः यो वै यतीननाहृत्यभो
जयेदितरान्द्विजान्विजानन्वसतोग्रामेकव्यंतद्याति राक्षसान् दीपकलिका १
यां दक्षः विनामांसेन मधुना दक्षिणया विना परिपूर्णो भवेच्छ्राद्धं पतिस्त्रद्रुमोति
स्तु एतच्चत्वारि विषयं त्रिणाचिकेतस्त्रिसुपर्णो यजुर्वेदैकदेशौ तद्व्रतेन तदध्यायिनो १
यस्य सप्तपूर्वै सामगाः सात्रिसुपर्णो इति वोपदेवः त्रिमधुः ऋग्वेदैकदेशः तदध्या
यी कठ चित्त्राचिकेतव्रतं त्रिः कृतवानित्यर्थमाऊस्तद्धेमाद्रिविरुद्धं हेमाद्रौ गौतमः
पुत्रभ्योदानं प्रथमं पित्रवय इत्यके मात्स्यमात्र पत्न्याश्माकुरुवाचं पश्चमीमांसते
ध्वरं साम स्वरविधिज्ञश्च पंक्तिक्रियावनपावनाः कौर्मे असमानप्रवरको ह्यसगो
त्रस्तथैव च असंबंधी च विज्ञेया ब्राह्मणाः श्राद्धसिद्धये गारुडे श्राद्धेष्वविनियोज्या १
स्ते ब्राह्मणा ब्रह्मवित्तमाः ये योनिगोत्रमंत्रांतेवासिसंबंधवर्जिताः मनुः न

मित्रं भोजयेच्छ्राद्धे धनैः कार्योस्य संग्रहः नारिं नामित्रं यं विद्यात्तं तु श्राद्धे निमंत्रयेत् द्वयोः
श्रोत्रियोः श्राद्धभोजननिषिद्धं पितृपुत्रौ भ्रातरौ द्वौ निरग्निगुर्विणीपतिः सगोत्रप्र
वरं चैव श्राद्धेषु परिवर्जयेदिति श्राद्धदीपकलिकायां जातूकर्ण्योक्तेः अथ मध्यमाः
हेमाद्रौ कौर्मे गार्ग्यो नैकगोत्रे ह्यविंदद्यात्तयथा कन्या तथा हविः अभावे ह्यस्वगोत्रा सामे
कगोत्रांस्तु भोजयेत् अत्र केचित्स्वशाखीयानन्यशाखान्याहुः पठंति वा निमंत्रयीत पूर्वेद्युः स्व
शाखीयान् द्विजोत्तमान् स्वशाखीयद्विजाभावे द्विजानन्यान्निमंत्रयेदिति इदं तु निर्मूल
त्वाद्धेमाद्रिणा दूषितत्वाच्चोपेक्ष्यं अत्र मामकश्लोकः मातामहो मातुलभागिनेयदौहित्र
मातृगुरुश्वशिष्याः ऋत्विक् च याज्यश्वशुरौ स्वबंधुः पालागुणाद्यास्त्वनुकल्पभक्ताः
बंधवो मातृष्वसृपितृष्वसृमातुलपुत्रा इति वोपदेवः अत्र मूलं हेमाद्रौ ज्ञेयं स्वगुणा
स्वस्त्रीया द्यतिक्रमे दोष एव सन्नवांस्तपरानुरूपानात्मनासह अतिक्रमंद्विजानेता
न्नरके पातयेत् वसी संबंधिनस्तथा सर्वान्दौहित्रं विट्पतिं तथा भागिनेयं विशेषेण
तथा बंधुखगाधिपेति मदनरत्ने भविष्योक्तेः अपरार्के अत्रिः षड्यस्तु पुरुषेभ्यो वै
गं श्राद्धे यास्तु गोत्रिणः षड्भ्यस्तु परतो भोज्याः श्राद्धेष्वगोत्रजा अपि एतच्च ब्राह्मण
लाभे अपि राक्षात् असंभवे हेमाद्रौ गौतमः शिष्यांश्चैके सगोत्रांश्च भोजयेदूर्ध्वं त्रिभ्यो
गुणवतः आपस्तंबः ब्राह्मणान् भोजयेद्योनिगोत्रमंत्रांतेवास्यसंबंधान् गुणहान्या

२४६

तु परेषां समुदितः सोदर्यो पि भोजयितव्या एते नांतेवासिनो व्याख्याताः इति अत्र वि
शेषमाहात्रिः पिता पितामहो भ्राता पुत्रो वाथ सपिंडकः न परस्परमर्घ्याः स्युर्नश्राद्धे ऋ
ऋत्विजस्तथा ऋत्विक्पुत्रादयो ह्येते सकुल्या ब्राह्मणाः स्मृताः वैश्वदेवे नियोक्तमो
यद्येते गुणवत्तराः सगोत्रान नियोक्तव्याः स्त्रियश्चैव विशेषतः अथ वर्ज्याः अत्र ब्रामकाः
वर्ज्यान् प्रवक्ष्ये च परो रोगिवैरिहीनाधिकांगान् कितवान् कृतघ्नान् नक्षत्रशास्त्रेण च जीव
मानान् भैषज्यहत्या पि च राजभृत्यान् संगीतकाव्यस्य कुसीदहत्या वेदक्रयेणापि कवि
त्ववृत्त्या देवार्चनेनापि च जीवमानान् स्वाध्यायदाराग्निसुतोरुकाणान् दुर्वालखल्वा
ट कुनख्य धर्मिनटांश्च योनेर्भवक्षमदंतान् आगारदाही गरदः समुद्रयायी च कुं
डाश्यश्च कूटकारी वालांश्चयोध्यायपतेस्य पुत्रान् दयामविधस्तेयकुंडगोलो अग्नेर्दि
धिषुः पतिरन्वकन्नासोमक्रयी तैलिकचेककराक्षौ पुत्राचार्यः पक्षिणां पोषकश्च
स्त्रीतोमे ग्रामक्षसंस्तेपकश्च ग्रामेषाणां वा महिषाणां च पुष्ट्या स्वीय स्त्रीषु प्रसिते पिश्रु
जारैः जीवत्यग्रेर्मुच्छदन्तानुयोगाद्वस्मप्राप्तवेदश्च द्वारपंतः ग्रामयाजि पश्चकेशवि
आयिस्तेनशिल्पिपितृ वाद कारकान् अर्थकामरतस्सद्याजकरमश्रु हीनजटिल
मुंडनिर्हणा यस्य चैव गृहिणी रजस्वला स्याध्यायाकरतशाय दायकान् लीबकुघाति
विशोहितेक्षणान् कुब्जवामनमत्ताभिशापिनः पुत्रहीनम कूटसाक्षिणं प्रातिहा

246-A

त्रादिकमयाज्यपाजकं स्त्रातमदात्परिवेत्तयाजकस्ते नहिंसकमुखान्विवर्जयेत् अ १

ग्रामसत्वं हेमाद्रो पृथ्वी[illegible]द्रोदेवेचज्ञेयं भारते दानधर्मेषुश्राद्धे वर्ज्यविप्राधिकारे किं त

वोभ्रूणहा यपत्नी[illegible]पालोनिराकृतिः ग्रामप्रेष्योवार्धुषिकोगायनः सर्वविक्रया सम

द्धिकोराजभृत्[illegible]कः कूटकारकः पित्राविवदमानश्चयस्यचोपपतिर्गृहे अभ्य

भिशस्त[illegible]त पास्तेनः शिल्पंयश्चोपजीवति पर्वकारश्चसूचीचमित्रध्रुक् परदारिकः

अव्रतानामुपाध्यायः कांडस्पृष्टस्तथान्यत्कायपरशास्त्रपाउपनीतः तदध्यायीयश्चप्

त्यदेवदश्च[illegible]भिशस्त्रयः परिक्रामेयः श्वनाद्दष्टएवच परिवित्तिस्तथास्ते नोडुश्चर्मा २

गुरुतल्पगः कुशीलवोदेवकोनक्षत्रैर्यश्चजीवति इहशास्त्राण्यपांक्तेयाः अपांक्ते या

युधिष्ठिर तथाश्राद्धकर्ताचयेराजन् यश्चवार्धुषिकोनरः अन्येपिहेमाद्रौमात्स्ये

त्रिशंकुन्बर्बरानंध्रान्चीनद्रविडकोंकणान् कर्णाटकांस्तथाभीरान्कालिं

गांश्चविवर्जयेत् तत्रैवसौरपुराणे अंगवंगकलिंगाश्चसौराष्ट्रान्गुर्जरांस्तथा १

आभीरान्कोंकणांश्चैवद्राविडान्दक्षिणापथान् आवंत्यान्मागधांश्चैवब्राह्मणान्स्तु

विवर्जयेत् चंडिकायांयमः काणाः कुब्जाश्चषंढाश्चकृतघ्नागुरुतल्पगाः मानकूट

स्तालाकूटाः शिल्पिनोग्रामयाजका राजभृत्यांधवधिरमूककरवल्लाटपंगवः

वणिजो मधुहर्त्ता रोगी गरदा वनदाहकाः समयानां च भेत्तारः प्रदाने ये निवारकाः पत्न्याप
निहन्ताश्च हयाप्रहर्तिताश्चये यश्च प्रव्रजितां जातः प्रव्रज्यावसितश्च यः अवकीर्णी च वी
रघ्नो गुरुघ्नः पितृदूषकः श्राद्धकाशिकायां कात्यायनः द्विनग्नः कीलकश्च मौञ्जीतिक
पिलस्तथा छिन्नांशश्छिन्नलिंगश्च नैव केतनमर्हति द्विनग्नः पित्रोर्यस्य त्रिपुरुषं विधि
त्रदेवाग्नि हेमाद्रौ मरीचिः अविद्धकर्णः कुष्ठश्च लंबकर्णस्तथैव च वर्जनीयाः प्रयत्ने
न ब्राह्मणाः श्राद्धकर्मणि ब्राह्मे मूकश्च पतिनासश्च छिन्नांगश्चाधिकांगुलिः गलरोगी च
गद्गुमान् स्फुटितांगश्च सज्वराः खंडखर्वमंदाश्च श्राद्धे षेतान्विवर्जयेत् लंबकर्णीचा
ह तत्रैव गोभिलः हनुमूलदधः कर्णौ लंबौ तु परिकीर्तितौ द्यंगुलोऽप्यंगुलो शाला
वितिशातानयोब्रवीत् चंद्रिकायां यमः द्यंगुलातीतकर्णस्य भुंजते पितरो न तु १
खंडश्चात्र चंद्रिकोक्तः सप्तविधो ग्राह्यः यथा खंढको वातजः षंढ पंडुः क्लीवो नपुंसकश्चेति स
सैवं क्लीवभेदाः प्रकीर्तिताः पराशरमाधवीये तु चतुर्दशविध उक्तः तेषां स्वरूपाणि तत्रैव ज्ञेया
नि चंद्रिकायां शातातपः अग्निष्टोमादिभिर्यज्ञैर्यैर्यजेत्यल्पदक्षिणैः तेषामन्नं न भोक्तव्य
मयं तास्ते प्रकीर्तिताः एतच्च शक्तौ सत्यां अपरार्के भारते अव्रती कितवः स्तेनः प्राणिवि
क्रयकोपि वा पश्चाच्चैत्यीनवान्सोमं सोपि केतनमर्हति श्राद्धदीपकलिकायां यमः अ
पत्नीकश्च वर्ज्यः स्यात्सपत्नीकोप्यनग्निकः तत्रैवाश्वलायनः प्रतिमाविक्रयं १

श्र॰३

योवैकरोतिपतितस्तुसः जीवनार्थंपरास्थीनि त्वातातीर्थंप्रयातियः मातापित्रोर्विना
सोपिपतितःपरिकीर्तितः तत्रैवजातूकर्ण्यः यत्रमातुलजोद्वाहःयत्रवावृषलीपति १
श्राद्धंनगच्छेत्तद्विप्राः कृतंपक्वंनिरामिषं पितृपुत्रौभ्रातरौद्वौनिरग्निर्गुर्विणीपतिंसगोत्रप्र
वरंचैव श्राद्धेषुपरिवर्जयेत् बृहन्नारदीये शंखचक्रंमृदायस्तुकुर्यात्तप्तायसेनवा सम्म
दूरबहिःकार्यःसर्वस्माद्द्विजकर्मणः शंखचक्राद्यंकनंचगीतनृत्यादिकंतथा एकजातेर
यंधर्मोनजातुस्याद्द्विजन्मनः तेनयेतप्तमुद्रादिविधयस्तेशूद्रविषयाइतिपृथ्वीचंद्रोदयः १
शिवकेशवयोरंकान् शूलचक्रादिकान्द्विजः नधारयेतमतिमान् वैदिकेवर्त्मनिस्थितः
इत्याश्वलायनोक्तेश्च नतंचचोदराद्यंकनिषिद्धमितिश्रीधरस्वामी अन्येपिनिषिद्धानिबं १
धेषुज्ञेयाइतिदिक् अत्रविप्राणांग्राह्यत्वोक्तेरेवतद्ज्ञानांनिषेधोसिद्धेपुनर्वर्ज्यपरिगण
नंनिषिद्धवर्जनिर्गुणप्राप्त्यर्थमितिविज्ञानेश्वरः कृष्णिकाणादेरपवादोहेमाद्रौवसिष्ठः
अपिचेन्मंत्रविच्छुक्तःशारीरैःपंक्तिदूषणैः अदूष्यंतंयमः प्राहपंक्तिपावनएवसः १
क्वचिद्विप्राणांजातिमात्रेणग्राह्यत्वमुक्तंचंद्रिकायांमत्स्ये यदिपुत्रोगयांगच्छेत्कदा
चित्कालपर्ययात् तानेवभोजयेद्विप्रान्ब्रह्मणायेप्रकल्पिताः ब्रह्मणाकृतसंस्था १
नाविप्राब्रह्मसमाःस्मृताः अमानुषागयाविप्राब्रह्मणायेप्रकल्पिताः तेषुतुष्टेषु
संतुष्टाःदेवाःसपितृगुह्यकाः गयायांनिर्गुणाअपितएवभोज्याइतिहेमाद्रिः १
४१ पितृभिःसहदेवताः तत्रैवानविचार्यंकुलंशीलंविद्याचतपएवच पूजितैस्तैस्तुसंतुष्टा ४१

अक्षयवटश्राद्धे एव तन्नियमो नान्यत्रेति त्रिस्थलीसेतौ पितामहचरणाः पृथ्वीचंद्रो
दये पिपासे तीर्थेषु ब्राह्मणं नैव परीक्षेत कदाचन अन्नार्थिनमनुप्राप्तं भोज्यं तं म
नुरब्रवीत् स्कांदेपि ब्राह्मणान्न परीक्षेत तीर्थक्षेत्रनिवासिनः मनुः न ब्राह्मणं प
रीक्षेत दैवे कर्मणि धर्मवित् पित्र्ये कर्मणि तु प्राप्ते परीक्षेत प्रयत्नतः असंभवे परमे
तदिति मेधातिथिः हेमाद्रौ व्यासः गायत्रीसारमात्रोपि वरं विप्रः सुयंत्रितः नायंत्रि
तश्चतुर्वेदी सर्वाशी सर्वविक्रयी काणाः कूटाश्च कुब्जाश्च दरिद्रा व्याधितास्तथा स
र्वे श्राद्धे नियोक्तव्या मिश्रिता वेदपारगैः अथ विप्रनिमंत्रणं चंद्रिकायां वाराहे
वस्त्रशौचादि कर्तव्यं श्वः कर्तास्मीति जानता स्थानोपलेपनं कृत्वा ततो विप्रान्निमंत्रये
त् दंतकाष्ठं च विसृज्य ब्रह्मचारी शुचिर्भवेत् तत्रैव प्रचेताः दक्षिणं चरणं विप्रः सव्यं
वै क्षत्रियस्तथा पादावादाय वैश्यो द्वौ शूद्रः प्रणतिपूर्वकं बृहस्पतिः उपवीती ततो
भूत्वा देवार्थे तु द्विजोत्तमान् अपसव्येन पित्र्ये च स्वयं शिष्योथवा सुतः प्रचेताः
सवर्णं प्रेषयेदाप्तं द्विजानां तु निमंत्रणे पृथ्वीचंद्रोदये स्कांदे राजकार्ये नियुक्त
स्य बंधनिगडवर्तिनः व्यसनेषु च सर्वेषु श्राद्धं विप्रेण कारयेत् चंद्रिकायां यमः
अभोज्यं ब्राह्मणस्यान्नं वृषलेन निमंत्रितं तत्रैव पैठीनसिः सप्त पंच द्वौ वा श्रोत्रियान् नि
मंत्रयेत् आश्वलायनसूत्रे एकैकमेकैकस्य द्वौ द्वौ त्रींस्त्रीन्वा वृद्धौ फलभूयस्त्वं

द्वावित्तिवृद्धिश्राद्धे गौतमः नवावरान् भोजयेत् अयुजो वा यथोत्साहं याज्ञव
ल्क्यः द्वौ दैवे प्राक् त्रयः पित्र्ये उदक् एकैकमेव च मातामहानामप्येवं तंत्रं वा वै
श्वदेविकं दीपकलिकायां पराशरः संपन्नावर्ध्ययाजाणामेकैकस्य त्रयस्त्रयः
पित्रादेर्ब्राह्मणाः प्रोक्ताश्चत्वारो वैश्वदेवके याज्ञवल्क्यः दशैकं पंच वा विप्रा
न पार्वणे नियोजयेत् अत्र वैश्वदेवे द्वौ चतुरो वोपवेशय पित्रादीनामेकैक
स्यस्थाने एकं त्रीन् पंच सप्त नव वोपवेशयेदिति निष्कर्षार्थः मनुः द्वौ दैवे पितृ
कृत्ये त्रीनेकैकमुभयत्र वा भोजयेत्सुसमृद्धोपि न प्रसज्जेत विस्तरे सत्क्रियां दे
शकालौ च शौचं च ब्राह्मणसंपदः पंचैतान्विस्तरो हंति तस्मान्नेहेत विस्तरं ए।
पीचं द्रौ दद्ये शातातपः द्वौ दैवेऽथर्वणौ विप्रौ प्राङ्मुखावुपवेशयेत् पित्र्ये तूदङ्मुखांस्त्री
श्च बह्वृचाध्वर्युसामगान् अत्यशान्नौ हेमाद्रौ बलः एकेनापि हि विप्रेण षट्पिंडं
श्राद्धमाचरेत् षडर्घ्यान्दापयेत्तत्र षड्भ्यो दद्यात्तथा हविः गोभिलः यद्येकं भो
जयेच्छ्राद्धे छंदोगं तत्र भोजयेत् ऋचो यजूंषि सामानि त्रितयं तत्र विद्यते अत्र
वैश्वदेवे विशेषमाह तत्र वसिष्ठः यद्येकं भोजयेच्छ्राद्धे दैवं तत्र कथं भवेत् अ
न्नं पात्रे समुद्धृत्य सर्वस्य प्रकृतस्य च देवतायतने कृत्वा ततः श्राद्धं समाचरेत्
प्रास्येदग्नौ तदन्नं तु दद्याद्वा ब्रह्मचारिणे एतच्च सपिंडीकरणवर्जं ज्ञेयं न त्वेवै

कं सर्वेषां काममनाद्ये इत्याश्वलायनोक्तेः अस्यार्थस्तु नारायणवृत्तौ आद्यं सपिं
डीकरणं तद्वर्जेषु सर्वश्राद्धेषु कामं त्रयाणामेकं भोजयेत् सपिंडीकरणे तु निय
तं त्रिभिर्भवितव्यमिति अनाद्ये पार्वणवर्जिते वा अभोजने आमहेमश्राद्धे वा
अन्नाभावे वेति व्याख्यानांतरं तत्रैव वृत्ते एवं कारिकापि दैवेपि त्र्ये पैत्र्ये वैकैकं सपिंडीकर
णं विनेति अत्रैकविप्रे साग्नेर्विशेषमाह पृथ्वीचंद्रोदये प्रचेताः एकस्मिन् ब्रा
ह्मणे दैवे राग्निर्भवेत् सदा अनग्नेः कुशान्तु विस्याच्छ्राद्धकर्मणि सर्वतः सर्वथा वि
प्रालाभे तत्रैव हेमाद्रौ च सत्यव्रतः निधाय दर्भान्विधिवदासनेषु समाहितः प्रैषा
न्प्रैषसंयुक्तं सर्वश्राद्धं प्रकल्पयेत् अत्रानन्यभावात् सत्रे रवस्त्विक्कार्ये यज
मानेविधोन दक्षिणेति केचित् अदृष्टार्थायाः प्राप्तेः सर्वत्र त्रिजटेन तु भंयपञ्चश्राद्धम
दक्षिणामिति पार्थात् विदध्याद्धौत्रमन्यश्चेद्दक्षिणार्द्धहरो भवेत् स्वयंचेदुभयं ।
कुर्यादन्यस्मै प्रतिपादयेदिति छंदोगपरिशिष्टाच्च एवं पतिश्राद्धेपि कात्याय
नः पत्नवत्स निपुत्रौ च संभेदर्भवटोत याज्ञे संख्यानविहिताविघरास्तरणे ।
ष्वच मातृश्राद्धेतु विप्राणामलाभे पूजयेदपि पतिपुत्रान्वितान्भव्यापो ।
विताष्टौ कुलोजवा इति अष्टाविति वृद्धिश्राद्धं विषयं पाद्मेउत्तरखंडे
सकृद्दभ्यर्चितं लिंगं शालग्रामशिलार्चये यः पाठे संख्यापयित्वा तु श्राद्धे

शीर्के स्वद्ध विसिद्धः ३४

अन्न मातृश्राद्धेतु विप्राणामभे सुवा[illegible]न्यापि भोजनीय इत्यारह

२५१-A

चंद्रिकायां मात्स्ये ।

च कुरुते नरः पितरस्तस्य तिष्ठंति कल्पकोटिशतं दिवि
पठं निमंत्र्य नियमान् श्रावयेत्पैतृकान् बुधः अक्रोधनैः शौचपरैः सततं
ब्रह्मचारिभिः भवितव्यं भवद्भिश्च मया च श्राद्धकारिणा । यत्र मनुः सर्वायास
विनिर्मुक्तैः कामक्रोधविवर्जितैः भवितव्यं भवद्भिर्नः श्वोभूते श्राद्धकर्म
णीति स दैवं पुर्निमंत्रणाय रं न तदहः तत्रैव देवलः अप्रसंभवे परेद्युर्वा ब्राह्म
णां स्तान्निमंत्रयेत् अज्ञानीन् समानार्थानव्यंगयानात्मशक्तितः कात्या
यनः अनिधेनामंत्रितो नापक्रामेत्केतनेन गृहस्थसक्तः अथ श्राद्धकार्ये
भोक्तृनियमाः तत्र निमंत्रितो विप्रत्यागे पराकं यमः केतनं कारयित्वा तु
योऽतिपातियति हिंतं ब्रह्महत्यामवाप्नोति शूद्रयोनौ च जायते आमंत्र्य ब्रा
ह्मणं यस्तु यथान्यायं न पूजयेत् अतिकृच्छ्रासु घोरासु तिर्यग्योनिषु जा
यते प्रमादत्यागेन हारीतः प्रमादाद्विस्मृतं ज्ञात्वा प्रसाद्यैनं प्रयत्नतः तर्प
यित्वा यथान्यायं सर्वं तत्फलमश्नुते प्रमादाभावे तु नारायणः एतस्मिन्केत
सि प्राप्ते ब्राह्मणो नियतः शुचिः पतितं चान्द्रायणं कृत्वा तस्मात्पापात्प्रमुच्यते
यमः आमंत्रितस्तु यो विप्रो भोक्तुमन्यत्र गच्छति नरकाणां शतं गत्वा चंडा

× यथानंयाति ईर्षितः भवति ४×

ऽत्रेष्वभिजायते तत्रैव देवलः पूर्वं निमंत्रितोऽन्येन कुर्यादन्यप्रतिग्रहं भुक्त्वा सु
हारोपयथा भुंक्ते सुकृतं तस्य नश्यति यदि विप्रो लंघते तदोक्तमादित्यपुराणे आमं
त्रितान्तरं नैव कुर्याद्विप्रः कदाचन देवानां नां पितॄणां च दातुरन्नस्य चैव हि चि
रकारी भवेद्द्रोही पच्यते नरकाग्निना पृथ्वीचंद्रोदये यमः निमंत्रितस्तु यो विप्रो
कुर्वीत कलहं द्विज भवंति पितरस्तस्य तं मासं पंकभोजनाः निमंत्रितस्तु यो विप्रकु
र्वीत कलहं द्विज भवंति पितरस्तस्य तं मासं मलभोजनाः आमंत्रितस्तु यो विप्र
भारमुद्वहते द्विजः पितरस्तस्य तं मासं भवंति स्वेदभोजनाः आमंत्रितस्तु यो विप्र
हिंसां वै कुरुते द्विजः तं मासं पितरस्तस्य भवंति रुधिराशनाः रौरवः निमंत्रितस्तु
यः श्राद्धे मैथुनं सेवते द्विजः श्राद्धं दत्त्वा च भुक्त्वा च युक्तः स्यान्मैथुनेन सो मैथुनं
चरत्यृतुकालं नियुक्तो वा नैव गच्छेत्स्त्रियं क्वचित् तत्र गच्छन्नवाप्नोति ह्यनिष्टानि
फलानि वै तत्रैव माधवीये तद्भमनूक्तेः श्राद्धं करिष्यन्कृत्वा वा भुक्त्वा वा
पि निमंत्रितः उपोष्य च तथा भुक्त्वा नोपेयाच्च ऋतावपि भोक्ष्यन्करिष्यन्श्वः
श्राद्धं पूर्वरात्रौ शयनतः अवाय्यं भोजनं वापि ऋतावपि विवर्जयेदिति तत्रैवाश्वला
यनोक्तेश्च विज्ञानेश्वरेणात श्राद्धे ऋतौ गच्छतोऽपि न दोष इत्युक्तं तत्त्वगतिकात्वे

250-A

ज्ञेयं बृहस्पतिः द्विनिशं ब्रह्मचारी स्याच्छ्राद्धकृद्ब्राह्मणैः सह अन्यथा वर्तमानौ तु
स्यातां निरयगामिनौ पुनर्भोजनमध्वानं भारमायासमैथुनं श्राद्धकृच्छ्राद्धभुक्चैव
सर्वमेतद्विवर्जयेत् स्वाध्यायं कलहं चैव दिवास्वप्नं तथैव च यत्तु श्राद्धकाशिकायां
यां पुराणसमुच्चये कृत्वा तु रुधिरस्रवणं विद्वान् श्राद्धमाचरेत् एकं द्वे त्रीणि वा विद्वा
न् द्विजातिर्यत्र विवर्जयेदिति तन्निर्मूलं पृथ्वीचंद्रोदये यमः पुनर्भोजनमध्वानं भारा
ध्ययनमैथुनं संध्यां प्रतिग्रहं होमं श्राद्धभोक्ताष्ट वर्जयेत् संध्यानिषेधः प्रायश्चि
त्तसंवितेयः यथाहि उशनाः दशकृत्वः पिबेदापो गायत्र्या श्राद्धभुग्द्विजः ततः संध्या
मुपासीत जपेच्च जुहुयादपि गोडास्तु सायंसंध्यापरान्नं च छेदनं च वनस्पतेः आमा
वास्यां न कुर्वीत रात्रिभोजनमेव च द्यूतं च कलहं चैव सायंसंध्या दिवाशयं श्राद्ध
कर्ता च भोक्ता च पुनर्भुक्तिं च वर्जयेदिति कामधेनौ वाराहाद्युक्तेः कर्तुरपि सायंसंध्यानि
षेधमाहुः शिष्टास्तु निर्मूलत्वमाहुः होमनिषेधस्तु स्वविषयः सूतके च प्रवासे चाश
शक्तौ श्राद्धभोजने एवमादिनिमित्तेषु हावयेन्न तु हापयेदिति छंदोगपरिशिष्टात् ।
तत्रैवादिपुराणे निमंत्रितस्तु न श्राद्धे कुर्याद्भार्यादिताडनं चंद्रिकायां प्रचेताः श्राद्ध
भुक् प्रातरुत्थाय प्रकुर्यात् दंतधावनं श्राद्धकर्ता न कुर्वीत दंतानां धावनं बुधः हेमाद्रौ
जावालः दंतधावनतांबूलं तैलाभ्यंगमभोजनं रत्यौषधपरान्नं च श्राद्धकृत्सप्त व

र्जयेत् विष्णुरहस्ये श्राद्धोपवासदिवसे खादित्वा दंतधावनं गायत्र्याशतसंपूतमंबु
प्राश्य विशुध्यति पुनर्भोजनमध्वानं यानमायासमैथुनं दानं प्रतिग्रहो होमः श्राद्धभु
क्त्वष्ट वर्जयेत् सोमोत्पत्तौ वनस्पतिगते सोमे यस्तु हिंस्याद्वनस्पतिं घोरायां भ्रूणह
त्यायां युज्यते नात्र संशयः एतद्विहितेध्मादिव्यतिरेकेण वनस्पतिगते सोमेन दुही
त यस्तु वाहयेत् नाश्नंति पितरस्तस्य दशवर्षाणि पंच च वन० पंथानं यस्तु कारयेत् गाव
स्तस्य प्रनश्यंति चिरकालमुपस्थिताः वनस्पतिगत स्वरूपमाह पृथ्वीचंद्रोदये व्या
सः त्रिमुहूर्तं वसेदर्के त्रिमुहूर्तं जले वसेत् त्रिमुहूर्तं वसेद्गोष्ठे त्रिमुहूर्तं वनस्पतौ
कालिकापुराणे तु [?] निमंत्र्य विप्रांस्तदहर्वर्जयेन्मैथुनं क्षुरं प्रमत्ततां च स्वाध्यायं
क्रोधशोकौ च तत्पान्नतं केचित्तु निमंत्रणात्पूर्वमेव ध्यर्थे पर्वविद्धि क्षौरं कुर्वंति तत्र(
मूलं मृग्यं मरीचिः वपनं सायंतनं पश्चात् होरिकाम [illegible] पिष्टपि याते श्राद्धेऽन्ना दे
च क्षौरं वर्जयानि शास्त्रं तु च यदा कर्तुरशक्यान तु त्रिशिष्यादिः श्राद्धं करोतीति तदा कर्ताप्र
तिनिधिनां च प्रागुक्ता नियमाः कार्याः न शक्नोति स्वयं कर्तुं यदा त्वनवकाशतः श्राद्धं(
शिष्येण पुत्रेण तदान्येनापि कारयेत् नियमानाचरेत्सापि नियतो भ्रवसंधये यजमा(
नो पितृसर्वानाचरेत्स तु सम्यग्दिनद्वय इति हेमाद्रौ वारसेनः स्त्रियाः तथा येमुक्तक श्राद्धे(
या नारी मुक्तकेशान्तथैव च हसते वदते चैव निराशाः पितरो गताः आश्वलायनः श्रा

251-A

देहि मौ जपे द्वात्रीनवालान पियन्नतः प्राक् पिंडदानाद्धं धार्येलं कुर्यात्स्वाविग्रहं वात्ता
गृहे श्रुयश्राद्धवत्तनि तत्रादौ कुशाः पृथ्वीचंद्रोदये दक्षः समित्कुशयवकुशादीनां द्वितीयः प
रिकीर्तितः श्रुद्धधामते दिने द्वितीयो भागश्स्यार्थः तत्रैव यमः समूलस्तु भवेद्दर्भः पि
तॄणां श्राद्धकर्मणि मूलेन लोकान्जयति शक्रस्य सुमहात्मनः व्यासः तर्पणादीनि
कार्याणि पितॄणां यानि कानि च दर्भैः पितृक्रिया सपिंडीकरणादूर्ध्वं द्विगुणैर्विधिवद्भवेत
रोस्यः अत्रनं नगर्भिणं साग्रं कौशं द्विदलमेवच प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कु
त्रचित्त हारीतः पवित्रं ब्राह्मणस्यैव च चतुर्भिर्दर्भपिंजुलैः एकैकन्यूनमुद्दिष्टं वर्णे वर्णे
यथाक्रमं स्मृत्यर्थसारे सर्वेषां वा भवेद्द्वाभ्यां पवित्रं ग्रथितं न च रत्नवलयं द्वयोस्तु
पर्वणोर्मध्ये पवित्रं धारयेद्बुधः हेमाद्रौ स्कान्दे अनामिकाधृता दर्भा ह्येकानामिकया पि
वा द्वाभ्यामनामिकाभ्यां तद्ध्यार्यै दर्भपवित्रके पवित्राभावे तत्रैव सुमंतुः समूलाग्रा विगर्भा
तु कुशा द्वौ दक्षिणे करे सव्ये चैव तथा त्रीन्वै बिभृयात्सर्वकर्मसु बौधायनः हस्तयोरु
भयोर्द्वौ द्वा वासने पितृत्यैवच दर्भग्रहणे मंत्रमाह शंखः विरिंचिना सहोत्पन्न परमेष्ठि मे
निसर्गज नुद सर्वाणि पापानि दर्भ स्वस्तिकरो भव स्मृत्यर्थसारे ॐ फट्कारेण सह
छित्वा समुद्धरेत् भरद्वाजः प्रेतक्रियार्थं पित्र्यर्थमभिचारार्थमेवच दक्षिणाभिमुख
श्छिंद्यात्प्राचीनावीतिको द्विजः कुशाभावे परार्के सुमंतुः कुशाः काशाः शरोगुंद्रो

यवाद्दूर्वाश्चवल्वजाः गोकेशा मुंजकं दाभ्र्य दर्भाभावे परःपरः कारादौ विशेष
माह शंखः काशहस्तस्तु नाचामेत्कदाचिद्विधिशंकया प्रायश्चित्तेन युज्येत दूर्वा
हस्तस्तथैव च पृथ्वीचंद्रोदये यमः मासिमास्युद्धृता दर्भा मासिमास्येव चोदिताः
अहूतिशस्यन्ते मासेन स्यादमावास्या दर्भग्राह्यो नवः स्मृतः गृह्यपरिशिष्टे ये च
पिंडास्तृता दर्भा यैः कृतं पितृतर्पणं अमेध्याशुचिलिप्ता ये तेषां त्यागो विधीयते
[illegible] हारीतः पथिदर्भाश्चितौ दर्भा ये दर्भा यज्ञभूमिषु स्तरणासनपिंडेषु कुशान्
परिवर्जयेत् ब्रह्मयज्ञे च ये दर्भा ये दर्भाः पितृतर्पणे हता मूत्रपुरीषाभ्यां तेषां त्या
गो विधीयते हेमाद्रौ अन्यानि च पवित्राणि कुशदूर्वात्मकानि च हेमात्मकपवित्र
स्य द्येकानाहेति वैकल्यं अपरार्के हेमाद्रौ प्रचेताः कृष्णमाषास्तिलाश्चैव श्रेष्ठा
स्युर्यवशालयः यवाव्रीहियवास्तथैव च मधूलिकाः कृष्णाः श्वेताश्च लोहाश्च ग्रा
ह्याः स्युः श्राद्धकर्मणि मधूलिकाः यावनालः इति हेमाद्रिः कल्पतरुश्च भारते वर्ध
मानतिलं श्राद्धमक्षय्यं मनुरब्रवीत् सर्वकामैः स यजते यस्तिलैर्यजेत् पितॄन् चंद्रि
कायां देवलः [illegible] स्नातो हेच दर्शहव्यकव्यकासु च पात्रेभ्यस्त्वेषु कालेषु दे
यं नैव कुभोजनं [illegible] अगोघृतं च यच्चान्नं माषमुद्गविवर्जितं तैलपक्वेन
रहितं कृतमप्यकृतं भवेत् हेमाद्रौ वृत्तिः अगोघृतं च यच्चान्नं कृतमप्यकृतं भ

259-17

वेत् तत्रैव श्राद्धे यवैर्व्रीहितिलैर्माषैर्गोधूमैश्चणकैस्तथा संतर्पयेत्पितॄन्मुद्गैः
श्यामाकैः सर्षपद्रवैः नीवारैर्हरिश्यामाकैः प्रियंगुभिरथार्चयेत् हेमाद्रौ कार्ष्णा(
जिनिः यदिदं जीवनं श्रासीनं हृद्यान्नस्यपन्नतः सत्प्रोडुत्तरं मार्गे ततोपि न संश
यः कालिकायामाश्वलायनः कदल्यादिफलैः शस्तैर्मूलैरार्द्रादिकैरपि गोरसैर्मधुना
दध्याज्यैः संतर्पयेत्पितॄन् तत्र कदल्याम्रफलादीनि श्राद्धे संपादयेत्सुधीः हेमाद्रौ पद्मोत्ते
ह्रदयेच मार्कंडेयः गोधूमैरिक्षुभिर्मुद्गैः सतीनैश्चणकैरपि श्राद्धेषु दत्तैः प्रीयंते मा
समेकं पितामहाः विदार्याच भस्तंडैश्च तिलैः शृंगाटकैस्तथा केचुकैश्च तथा कंदैः क
र्कंधुवदरैरपि पालेवतैरारुकैश्चाप्यक्षोटैः पानसैस्तथा काकोल्याक्षीरकाकोल्या (
तथा पिंडालकैः शुभैः लाजाभिश्च सधानाभिस्त्रपुसैर्वारुचिर्भटैः सर्षपाराजशाकाभ्यां
सिंद्देराजाजंबुभिः प्रियालामलकैर्मुख्यैः फल्गुभिश्च तिलकटैः वेत्रांकुरैस्तालकं
दैश्चक्रिकाक्षीरिकावचैः लोचैः समोचैर्लकुचैर्वेल्लावैर्वीजपूरकैः मुंजातकैः पद्मफ
लैर्भव्यभोज्यैश्च संस्कृतैः नागरवाडवचोथ्यैश्च त्रिजातकसमन्वितैः एतैस्तु मासं प्री
यंते श्राद्धेषु पितरो नृणां राज्ञां कोशः हेमाद्र्यादिव्याख्यावैधनसारेण मध्यदेश
भाषयानामान्युच्यते सतीनैः कलायैः कलायस्तु सतीनकः इत्यमरः वटरी इति
प्रसिद्धैः विदार्यानत्कंदेन भरुंडजवजमरव्यारणाः इति श्राद्धमंजर्यां भरुकूष्मांड मि

त्वन्ये शृंगाटकं सिंघाडा केवुकः कांचनारः कंदः स्वरणः अशेषिघ्नः स्वरणः कंद इत्य
मरः कार्कंधुर्वन्यंसः मसवदरंपालेवतं कोशातकी आरुकं आरुदुं अक्षोटं अखरोट
काकोली क्षीरकाकोल्यौ गौडेषु प्रसिद्धे पिंडालुकं स्वथनी महाशाका लंमोदला कंद
इति प्रसिद्धः अपुसादयस्त्रपुसा कर्कटी भेदाः चिर्भटं खर्बुजं सर्षपेति दीर्घमुकुंदसः प्रि
यालं चिरोंजी फल्गु उदुंबरं तिलेटकं पटोलं तलकंदविशेषः चक्रिकातितिंडीचिं
वीवाक्षीरिका खिरणी मोचं कदलीफलं लकुचं बडहरं मंजातं गौडदेशे पद्मफ
लं गंदा शासखाडवः पानविशेषः त्रिजातं लवंगैलापत्रकाणि मदनरत्ने कौर्मे का
लशाकं च वल्लकं मूलकं कृष्णनालिका प्रशस्तानीति शेषः हेमाद्रौ पृथ्वीचंद्रोद
ये च वायुपुराणे कालशाकं महाशाकं द्रोणशाकं तथार्द्रकं विल्वामलकं मृद्वी
कापनसाम्रातदाडिमं च व्यं पालेवतान्क्षोटखर्जूरं च कसेरुकं कोविदारश्च कंदश्च
पटोलं बृहतीफलं पिप्पलीमरिचं चैव एलाशुंठी च सैंधवं शर्करागुडकर्पूरख
दिरीद्रोणपत्रकं तथा मधूकं रामठं चैव कर्पूरं गुडमेव च श्राद्धकर्मणि शस्तानि
सैंधवं त्रपुसं तथा रामठहिंगु कसेरुः कोविदारश्च तालकंदस्तथा विसं तर
मालं शतकंदश्च तथा वैशीतकं दकं कालेयकालशाकं च मुनिपर्णं सुवर्चलं
मांसशाकं दधिक्षीरं चोचं वैशांकुरस्तथा कट्फलं कौकणी द्राक्षा लकुचं मो

253-A

चमेव अलाबु ग्रीवकं चारं कर्कंधु मधुसाह्वयं वैकंकतं नारिकेलं शृंगाटकपरूष
कं पिप्पली मरिचं चैव पटोलं बृहतीफलं एवमादीनि चान्यानि स्वादूनि मधुराणि च १
नागरं चार्द्रकं देयं दीर्घमूलकमेव चेति द्रोणशाकाग्रमाम्लचिंकाद्राक्षा आम्रातआव
गव्यक्षीरस्तत्फलं चतंजंवीरं कसेरुः जलजः कंदः कोविदारः कंचनारसदृशः तालकंदः
तालमूली विसं भसीडे शतकंदः शतावरी शीतकंदः शालूकं मेरुः की[illegible]ति प्रसिद्ध काले
यंकरालसंज्ञशाकः दारुहरिद्रा वेति षष्ठीचंद्रः सुनिषण्णं कर्कोटीसदृशास्तु वर्चलंशाक
विशेषः कटूफलं श्रीपर्णी वृक्षफलं कोकाणि सूरसाद्राक्षा तिंदुकं डिंडिसमिति केदेवः
तिंदुफलं वा ग्रीवकं फलविशेषः चारश्च तु ताले मधुसाह्वयं मधूकपुष्पं फलं वा परूषकं
फरूसमिति प्रसिद्धं नागरं शुंठी षष्ठीचंद्रोदये ब्राह्मे आम्रमाम्रातकं बिल्वं दाडिमं वीजपू
रकं प्राचीनामलकं क्षारं नारिकेलं परूषकं नारंगकं च खर्जूरं द्राक्षा नीलकपित्थकं १
एतानि फलजातानि श्राद्धे देयानि यत्नतः अन्नं तु सदधिक्षीरं गोघृतं शर्करान्वितं मासं
प्रीणाति सर्वान्वै पितॄन्नित्याह केशवः याज्ञवल्क्यः हविष्यान्नेन वै मासं पायसेन तु वत्स
रं मात्स्यहारिणकौरभ्रशाकुनछागपार्षतैः ऐणरौरववाराहशाशैर्मांसैर्यथाक्रमं १
मासवृद्ध्याभितृप्यंति दत्तैरिह पितामहाः खड्गामिषं महाशल्कं मधुमुन्यन्नमेव च लो
हामिषं कालशाकं मांसं वाध्रीणसस्य च श्राद्धे दत्तस्य मांसस्याभक्ष्यणे दोषमाह मनुः
नियुक्तस्तु यथान्यायं यो मांसं नात्ति मानवः स प्रेत्य पशुतां याति संभवानेकविंशति

नि॰सिं॰
२५४

254

अत्र वृद्धवचनेषु श्राद्धे मांसमधुनोः प्राशस्त्योक्तेः विना मांसेन यच्छ्राद्धं कृतमप्य
कृतं भवेदिति हेमाद्रौ देवलोक्तेः यच्छ्राद्धं मधुना हीनं तद्रसैः सकलैरपि मिष्टान्नै
रपि संयुक्तं पितॄणां नैव तृप्तये अणुमात्रमपि श्राद्धे यदि न स्याच्च माक्षिकं नामा(
पिवकीर्त्तनीये स्यात्पितॄणां प्रीतये ततः इति हेमाद्रौ ब्रह्मोक्तेश्च मांसमधुनोः श्राद्धे नि
यतत्वं गम्यते गौडास्तु निषेधे मत्स्यसूक्ते मध्वभावे गुडं देयः क्षीरस्य च तथा दधि नल
भ्यं ते धृतं यत्र कुर्यात् घृतवर्जितं त्रिपिबमिन्द्रियक्षीणं श्वेतं वृद्धमजापतिं व्याघ्री
णसं तु तं प्राहुर्याज्ञिकाः श्राद्धकर्मणि श्राद्धकलिकायां नागरखंडे कथंचिद्यदि वि
प्रेभ्यो न दत्तं भोजने मधुः पिंडास्तु नैव दातव्याः कदाचिन्मधुना विना बृहत्पराशरस्तु
मांसं निषेधयति यस्तु प्राणिवधं कृत्वा मांसेस्तर्पयते पितॄन् स विद्वांश्चंदनं द(
ग्ध्वा कुर्यादंगारविक्रयं क्षिप्त्वा कूपे यथा किंचिद्बालस्त्वादातुमिच्छति पतत्यज्ञानतः
सोपि मांसेन श्राद्धकृत् तथा स एव सर्वथा त्रं यदा न स्यात्तदेवामिषमाश्रयेत् ब्राह्मे
ण श्रुत्वयं नाद्यात्तच्छ्राद्धे हुतं यदि भागवतेपि न दद्यादामिषं श्राद्धे न चाद्याद्धर्म
तत्ववित् मुन्यन्नैः स्यात्परा प्रीतिर्यथा न पशुहिंसया तथेति शेषः अत्र केचित् म
त्यन्नं र्तूस्न एास्यो तथा अवस्थामाह यथौचं द्वोदयस्तु अक्षता गोपशुश्चैव श्राद्धे
मांसं तथा मधु देवराच्च सुतोत्पत्तिः कलौ पंच विवर्जयेदिति निगमोक्तेः वरा

तम
२५४

तिथि पितृभ्यस्तु पश्वपाकरणक्रियेति कलिवर्ज्येषु हेमाद्रावादिपुराणात् मां
सदानं तथा श्राद्धे वानप्रस्थाश्रमस्तथेत्युक्त्वा एतान् धर्मान् कलियुगे वर्ज्यानाहु
र्मनीषिण इति बृहन्नारदीयेऽभिधानाच्च मांसविधिः कलिव्यतिरिक्तविषयः कौ
लौ मांसनिषेधो नाचारदेशाचारात् व्यवस्था तथा च बृहन्नारदीये श्राद्धप्रकरणे य
थाचारं प्रदेयं तु मधु मांसादिकं तथा देशाचाराः परिग्राह्यास्तत्तद्देशीयजैर्नरैः अ
न्यथा पतितो ज्ञेयः सर्वधर्मबहिष्कृत इति यस्मिन्देशे पुरे ग्रामे त्रैविद्ये नगरेऽपि वा
यो यत्र विहितो धर्मस्तं धर्मं न विचारयेदिति भट्टास्त्वाहुः तन्न होलाकाधिक
रणन्यायेन देशविशेषव्यवस्था एकपदकल्पनायोगात् निरूपितं चैतत्पितामह
चरणैर्मीमांसायामिति दिक् मनुः संवत्सरं तु गव्येन पयसा पायसेन वार्ध्रीण
स्य मांसेन तृप्तिर्द्वादशवार्षिकी त्रिपिबं त्विन्द्रियक्षीणं श्वेतं वृद्धमजापतिं वार्ध्री
णसं तु तं प्राहुर्याज्ञिकाः श्राद्धकर्मणि क्षीरादौ विशेषमाह हेमाद्रौ सुमंतुः पयो
दधि घृतं चैव गवां श्राद्धेषु पावनं माहिषीणां घृतं प्राहुः शेषं नतु पयः क्वचित्
याज्ञवल्क्यः संधिन्यनिर्दशावत्सा गोपयः परिवर्जयेत् औष्ट्रमेकशफं स्त्रै
णमारण्यकमथाविकं हेमाद्रौ हारीतः नवसूतायाः सप्तरात्रादित्येके दशरा
दित्यपरे मासेनेत्येके पेयं भवतीति धर्मविदः एतद्द्रोणभवपरं देवलः अजाविम

हिषीणां तु पयः श्राद्धेषु वर्जयेत् विकारान् पयसश्चैव माहिषं तु घृतादिकं
तत्रैव ब्राह्मे माहिषं चामरं मार्गं आविकैकशफोद्भवं स्त्रैणमौष्ट्रं यानि चैतं च दधि
क्षीरं त्यजेद्घृतं सगुडं मरिचाक्तं तु तथा पर्युषितं दधि दीर्घीणं तक्रमपेयं च नष्टास्वादं
च फेनवत् माहिषं पर्वीदोषदं शाकं ब्राह्मे आरण्यमाहिषीक्षीरं शर्करामधुसंयुतं
माध्वक्तं हि हितं चैव दद्यात् दधि त्यजेत्ततः यद्यपि याज्ञवल्क्येन अन्नं पर्युषितं भोज्यं स्ने
हाक्तं चिरसंस्थितं अस्नेहा अपि गोधूमयवगोरसविक्रिया इति पर्युषितं दध्यादिभो
ज्यमुक्तं तथापि गुडमरिचाक्तस्य पर्युषितदोषो नोच्यते इति हेमाद्रिः तत्रैव ब्राह्मे को
लाहशाकं तंडुलीयं वास्तूकं मूलकं तथा शाकमारण्यकं चैव दद्याच्छ्राद्धे नित्यशः।
तंडुलीयं सूक्ष्मपत्रमिति हेमाद्रिः महाराष्ट्राणां मांठ इति प्रसिद्धं आरण्यकं फाजीत्यंबा
दि तत्रैव दाडिमं मागधीं चैव नागरार्द्रीकर्तिनिली आम्रातकं जीरकं च कुंवरं चैव भोज
येत् मागधी पिप्पली नागरं शुंठी कुंवरं कुस्तुंबवरं धात्रिगियां इति प्रसिद्धं वायवीये।
अगस्त्यस्य शिखाग्राह्याः कषायाः सर्व एव च शिखाः नव पल्लवाः प्रभासखंडे आ।
[illegible] रामस्य तु सीमंताः कलापाः सर्व एव च सीमंताः न।
व पल्लवाः कौर्मे तमालं शाकं दं च मध्यालं शीतकं दलीमध्यालः मोहलकंदः शीतकं
दलीराजालू इति प्रसिद्धं अथ वर्ज्यं मार्कंडेयपुराणे यथोक्तो चादिनाप्राप्तं यतितास्य

255-A

दुपार्जितं अन्यायकन्याशुल्कार्थद्रव्यं चात्र विगर्हितं पितृअर्थमेव च पर्युषितं च स्वेच्छायपर्यु
षाहृतं चंडोदयेशरव: अस्फरणं सरसांशि गुप्तालंकयाम्लचुकं तथा कूष्मांडलाबुवार्ता
कर्कोविदारांश्च वर्जयेत पिप्पली मरिचं चैव तथा वै पिंडमूलकं कृतं च लवणं सर्वं वं
शाग्रं च विवर्जयेत राजमाषान्मसूरांश्च कोद्रवान्कोरदूषकान् लोहिताम्वृक्षनिर्यासा
न् श्राद्धकर्मणि वर्जयेत अस्फरणं काश्मीरदेशप्रसिद्धं सुरसा भिंगुडीति माधवः तल
सीति पृथ्वीचंद्रः पालंकी पालक इति प्रसिद्धा अम्लचुकं जलजः शाकः सम्लकामिति पाठे
खदिरशाक इति हेमाद्रिः मरिचान्याद्रीणीति हेमाद्रिः राजमाषाः रसरा इति प्रसिद्धाः
कोरदूषकः वनकोद्रवः चंद्रिकायां रवः पिंगलकं च तंडीरं करमर्दं च नालिकं कूष्मां
डं वट्ट वीजानि श्राद्धे दत्वा व्रजन्त्यधः पिंडालकं महाराष्ट्रे अपेडरमिति प्रसिद्धं तंडीरं
विंवीफलमिति केदेवः करमर्दं करवंदमिति प्रसिद्धं तत्रैव पिंडालेच्छिष्टमाषान्
श्राद्धे यत्नेन वर्जयेत कूष्मांडं माहिषीक्षीरं मांठकं यो राजसर्षपाः चणका राजमाषाश्च
घ्नंति श्राद्धं न संशयः तद्भपराशरः करीरफलपुष्पाणि विडंगं मरिचानि च जंभारि
का सजंबीरा स्वपक्व वीजपूरकं जंघलाव पिप्पल्याः पटोलं पिंडमूलकं मसूरं राज
न पुष्पं च श्राद्धे दत्वा पतन्त्यधः जंबुस्तकं माधवीये चत्वारि शातिम ते पावनालान्
कुष्मांडश्च वर्जयेति विपश्चित: पावनालाजोरलाः अत्र यानि चणकानि विहितं

निषिद्धानि तेषां विकल्पः अन्यथा श्यामाकैस्तृणकैः शाकैर्नीवारैश्च प्रियंगुभिः
गोधूमैश्च तिलैर्मुद्गैः मासं प्रीणयते पितॄनिति गोधूमैरिक्षुभिर्मुद्गैः सतीनैश्चणका
केरपीति च हेमाद्रौ कौर्मे विहमधमादि विरोधः स्यात् पिप्पलीमरिचादेस्तु प्रत्यक्षो
स्य निषेधो न त्वद्रव्यमिश्रस्य सौवीरतिक्तैलवणादिभिस्तत्पाकसिद्धिर्महती हृषेस्तु न
न द्विजपरान्नादियोगात्सिद्धं प्रदेयं न तु दुष्यतीहेति पृथ्वीचंद्रोदये हद्यपराशरोक्तेः तत्रै
व दातुश्च यस्मिन्मनसोभिलाषः श्रद्धा भवेत् यत्र च दीपमाने श्राद्धेषु देयं विधिवत्तदेव
तदन्नमक्षय्यमिति ब्रुवंति एतन्निषिद्धेतरविषयं चंद्रिकायां कृष्णधान्यानि सर्वाणि
वर्जयेच्छ्राद्धकर्मणि न वर्जयेत्तिलांश्चैव मुद्गान्माषांस्तथैव च मात्स्ये मसूरशणनिष्पा
वराजमाषकसुंभिकाः पद्मा बिल्वार्कधत्तूरपारिभद्राटरूषकाः न देयाः पितृकार्ये
षु पयश्चाजाविकं तथा कोद्रवोदारककपित्थमधुकातसी एतान्यपि न देयानि
पितृभ्यः श्राद्धमिच्छता निष्पावाः वल्ला बिल्वं च रक्तं निषिद्धं जंबीरं रक्तबिल्वं च शा
लस्यापि फलं त्यजेदिति ब्राह्मोक्तेः पारिभद्रो निंबतरुरित्यमरः रक्तमंदार इति हेमा
द्रिः आटरूषो वासा सा तु प्रसिद्धा उदारः मधूकं ज्येष्ठीमाधवीति चंद्रिका चरकावनमुक्ता
हेमाद्रौ ब्राह्मे आसनारूढपादमवाघ्रातं पादोपहतमेव च अमेध्यैर्जंगमैः स्पृष्टं शु
ष्कं पर्युषितं च यत् द्विःस्विन्नं परिदग्धं च तथैवाग्रावलेहितं शर्कराकीटपाषाणैः

केशैर्यद्वाप्युपद्रुयतं पिण्याकं मथितं चैव तथातिलवणं च यत् सिद्धाः कृताश्च ये
भक्ष्याः प्रत्यक्षलवणीकृताः वाससा चावधूतानि वर्ज्यानि श्रद्धाः कर्मणि हिंस्विन्नं
यत्सकृशाकेन भक्ष्यमपि हिंजीरकादिसंस्कारर्थं पुनः पच्यते तेन द्वर्ज्यं पक्वतिकृशा
कान्नविकादिभिः पाकेननेनवभक्षणार्हं तेन निषिद्धं श्यामावलेहितमासादिना
एवं पर्युषितस्य सदा निषेधे पि पुनर्वचनं अपूपाश्च करंभाश्च धनाचटकसक्त
वः शाकंमांसमपूपंचखृसरंकृसरमेवच यवागूः पायसं चैव यच्चान्यस्नेहसंयुतं
सर्वं पर्युषितं भक्ष्यं शुष्कं चेत्यारिवर्जयेदिति माधवीये यमोक्त वटकादेरपिपर्यु
षितस्य निषेधार्थं चंद्रिकायाम् देवयः वर्ज्याश्च विप्रा मित्रः कपित्थं कुरुकं चैव नालि
केरं च पैतिकं जंबूफलादिपक्वं च पिण्याकं तडुलायकं हेमाद्रौ बृहन्नारदीये
वर्ज्या मर्कटकाः आदेराजमाषास्तथैव च कर्मदाः लंकाः पैठीनसिः हेतालकनलिकायो
वर्ज्या मर्कटकाः आदिराजमाषास्तथैवच ... इति यो तं योऽइति प्रसिद्धं कुसुंभं करडइति महा
तकुसुंभामण्डंतकानि शाकानामभक्ष्याइतियोतंयोऽइतिप्रसिद्धं ... जंबीरकं फ
रघुप्रसिद्धं मार्कंडेये वर्ज्याश्चाभिषवानित्यं शतपुष्पागवेधुकाः जंबीरकंफ
लं वर्ज्यं कोविदारश्च नित्यशः अभिषवः सुरा मितिं चंद्रिकाः सेधामकमि
तिपद्धीचंद्रः शतपुष्पा सोमइतिप्रसिद्धं शाट्यायनः मारिषं नालिकाचैव रक्ता
माच कलंविका असुराननमिदं सर्वं पितृणां नोपतिष्ठते मारिषं मध्यदेशे मरुसा

नि॰ सिं॰
२५७

257

इति माहाराष्ट्रेषु राजगिराइति प्रसिद्धः कलंबिका वेलवाकृतिपत्रा तत्रैव गंधारिकापि
टोलानिम्बाद्धकर्माणि वर्जयेत् गंधारिका तंडुलायति चंद्रिका जवासारव्या दुर्लभे
तिकैदेवः भारते हिंगुद्रव्येषु शाकेषु श्वेलाबुं लसनं तथा ककुंडका लूलिलाबूनि हा
सं लवणमेवच पुनरालाबुग्रहणामभयालाबुनिषेधार्थमिति पृथ्वीचंद्रः कंकुड
कंबकुलघत्राकं तत्रैव कुस्तुंस्तकेलिंगोत्थं वर्जयेदन्नचेतसे हेमाद्रौ ब्राह्मे वृंताकं
पंचशिवं चलोपशानि फलानि च कालिंगं रक्तचवीरणाकं धत्तवारकं कपालंकाचमा
रीचे कारंजं पिंडमूलकं गंजनं कुब्जिकांचैव गाजरं जीवकं तथा हंताकं श्वेतं कंडूशाखे
न हंताकं कुंभांडं चापि वर्जयेत् इति देवलोक्तेः तेन कूष्मांडस्यानिषेध इति चंद्रिकामा
धवौ वस्तुतस्तु सदाक्षेत्र निषेधात्पुनः श्राद्धे निषेधो व्यर्थः तेन भक्ष्यस्य कूष्मांड
कस्यापि निषिधार्थमिति वयं कंडूः राकपिकच्छूः कुंभांडं श्वेतालाबुः पंचशिवं वल्लभम
सूरराजमाषमठः कुलत्थाः लोमशानि कपित्थ निरक्तचारलोहितचारफलं वीरणा
कं दीर्घकृष्णमर्कटी घत्तेचारकं चिरास्थितचारफलं वारोलीतिप्रसिद्धं कपालं नारि
केलेकाचं कच्छुरकफलं मारीचं श्यामरिचाणि गृंजनं पलांडुभेदः पश्चिमदिशि
प्रसिद्धः नतुगाजरं तस्य पृथगुक्तेः हेमाद्रिणात गृंजनं गाजरमेवोक्तं तच्चिंर

त्यं चूर्णिकाचिरकालस्थमुक्तं पानकं चंद्रिकायां हारीतः नवटप्लक्षोदुंबरपीलुदाधित्थ
नीयमातुलिंगानि भक्षयेत् पीलुः श्लेष्मातकः भोकरसंज्ञः दधित्थं कापित्थं स्मृति
सारे क्षीरे तु लवणं दत्वा उच्छिष्टोपि च पयस्तु तं स्नानं रजकतीर्थेषु ताम्रे गव्यं सुरासमं गौड
निबंधे स्मृतिसागरे स्मृतिनारिकेलोदकं कांस्ये ताम्रपात्रे स्थितं मधु गव्यं च ताम्रपा
त्रस्थं मधु तु लवणं घृतं विना ताम्रपात्रे कृतं मांसं पच्च गव्यं घृतेन रतं आमिषं तु गवां मांसं
दधि मद्यं पयो रजः दृष्ट्वांतरप्रेत मांसं पयप्य सासंप्रुतं दधि पयोनुद्धृतसारं च ताम्रपात्रेण दु
ष्यति अपजलं याज्ञवल्क्यः शुचिगोतृप्तिकृत्तोयं प्रकृतिस्थं महीगतं वर्ज्यं जल
मुक्तं हेमाद्रौ ब्राह्मे तोडे दुर्गंधिफेनिलं क्षारं पंकिलं पल्वलोदकं न भवेद्यत्र गोतृप्तिर्नक्तं
यच्चाप्युपाहृतं यत्र सर्वार्थमसृष्टं पश्चाभोज्यनिपानजं तद्वर्ज्यं सलिलं तात सदैव स्ना(
नकर्मणि निपानो जलाशयः शुद्धितत्वे शंखः स्नानमाचमनं दानं देवतापितृतर्पणं (
शूद्रोद्दिष्टेनैकुर्वीत न तथा मेघाद्विनिःसृतैः हेमाद्रावादित्यपुराणे चिरपर्युषितं वापि स्व
दुस्पृष्टमथापि वा जाह्नव्याः स्नानदानादौ पुनात्येव सदा पयः कात्यायनः आपो निशि
न गृह्णीयात् पिबेच्च कदाचन उद्धृत्याग्निसमर्पणे धाम्नोधाम्नस्तीरयेत् रजोदोषात्तु
प्रागुक्तं नारदीये त्यजेत्पर्युषितं पुष्पं त्यजेत्पर्युषितं जलं न त्यजेज्जाह्नवीतोयं तुलसी
पद्मबिल्वकं अन्यान्यपि पृथ्वीचंद्रोदये मात्स्ये मध्याह्नः खड्गपात्रं च तथा नेपालकं

वलः रौप्यं दर्भास्तिला गावो दौहित्रश्चाष्टमः स्मृतः पापं कुत्सितमित्याहुस्तस्य संता
पकारिणः अष्टावेते यतस्तस्मात्कुतपा इति विश्रुताः ब्राह्मे यतिस्त्विदं दुःकरणाद्रा
जतं पात्रमेव च दौहित्रे कुतपः कालश्छागः कृष्णाजिनं तथा शस्तानीति शेषः दौहित्रं
खड्गपात्रमिति कल्पतरुः अपरार्के स्मृत्यन्तरम् अपत्यं दुहितुश्चैव खड्गपात्रं तथैव च घृ
तं च कपिलाया गोर्दौहित्रमिति कीर्तितं ब्रह्मांडे अमावास्यागते सोमे यात्र खादति गोसु
तं तस्या गोर्यद्भवेत्क्षीरं तद्दौहित्रमुदाहृतं स्मृतिसंग्रहे उच्छिष्टं शिवनिर्माल्यं वांतं च मृ
तकर्पटं श्राद्धे सप्त पवित्राणि दौहित्रकुतपास्तिलाः उच्छिष्टं वत्सस्य दुग्धमित्यर्थः शि
वनिर्माल्यं गंगोदकं वांतं मधु मृतकर्पटं तसरीपट्टं तिलेषु आपस्तंबः अटव्यां ये समुत्प
न्ना अकृष्टफलितास्तथा तेवै श्राद्धे पवित्राः स्युस्तिलास्ते च तिलास्तिलाः अभावे ग्रा
म्याः गौराः कृष्णास्तथारण्यास्तथैव त्रिविधास्तिला इति ब्राह्मोक्तेः अथ वर्ज्यानि चंद्रिका
यां यमः कुक्कुटो विड्वराहश्च काकश्चाथ बिडालकः वृषलीपतिश्च वृषलः षंढो वीरा रज
स्वला एतेन श्राद्धकाले वै वर्जनीयाः प्रयत्नतः खंजः काणः कुणिः श्वित्री दातुः
प्रेष्यकारुस्तथान्यस्यां गोत्रातिरिक्तांगः स्यमप्यपनयेत्ततः वायवीये अन्न
प एष पुरे तेन यदि वै हन्मकक्षयोः उत्सृष्टं प्रधानार्थं संस्कारस्त्वायदि स्मृतः
संमतः चंडालादिवीक्षितमन्नमभोज्यमन्यत्र स्मृङ्कस्मा हिरण्योदकस्पर्शात् १

तत्रैव जमदग्निः श्राद्धवत्योपयुक्तं ब्राह्मणः पावमान्यस्तरत्समाः सूक्तेनवा
रिण्यद भैरवैन्द्रेदोषम पान्नुदन् चंद्रोदये पादुकोपानहौ छत्रंचित्ररक्तांबरं तथा ।
रक्तपुष्पं च माजारं श्राद्धे भस्मानि विवर्जयेत् निर्णयदीपे घंटानिनादो हय सन्नि ।
धानं शंखकरंरवो कदली दलंच उन्मत्तजात्यर्क हयारिजानि श्राद्धस्यैवेग्गुणपला
शएमस्तनि ह्यारिजानि त्रिसीपीराद्धि स्मृत्यर्थसारे दिनत्रयं चेद्रोदये उशनाः गोमयो
दकैर्भूमि भाजनैशौचिं कुर्यात् पराशरः कांजिकं दधितक्रं च घृतं तैलाम्लत मेव च
एवं मेवन दातव्यमेको दिष्टे यथाविधि हेमाद्रौ पराशरः गृहग्निशिष्टदेवा नांब्र
ह्मचारितपस्विना तावन्नदीयते किंचि द्यावत्पिंडान्न निर्वपेत् कौर्मोति लानववि कि
रेन्नत्र सर्वतो वंधयेदजान् तत्रैव देवलः तथैव यंजितो दाता प्रातः स्नात्वा सहांबरः
आरभेत नवैःपात्रैरन्नारंभं च बांधवैः आत्मनेपदान्स्वयमेव पाकः कार्यः अश
क्तौ पत्न्या तदभावे तत्तस्मानि यथाचारउस्नाना जनक नंदिनीति पाद्म लिंगादिति ।
हेमाद्रिः श्राद्धदीपकालिकायां स्थलापनः समानप्रवरैर्भिन्नैः सापिंडैश्च गुणा ।
न्वितैः कल्पयकारिभिश्चैव पाकः कार्यः प्रशस्यते व्यासः गृहिणी चैव सुस्नाना पा
कं कुर्यात्प्रयत्नतः निष्पन्ने च पाके तु पुनः स्नानं समाचरेत् पृथ्वीचंद्रोदये श्रा

त्ते रजस्वलां च पाखंडां पुंश्चलीं पतितां तथा व्यङ्गे च्छूद्रां तथा वंध्यां विधवां चा
न्यगोत्रजां अंगाकर्णी च तद्र्धाहः स्नातामपि रजस्वलां वर्जयेच्छ्राद्धपाकार्थं ममा
तृपितृवंशजां मातृपितृवंशजभिन्नां त्यजेदित्यर्थः स्मृतिसारे नपाकं का
रयेत्पुत्रीमन्यां चाप्यन्यगोत्रजां मृतवंध्यां च गर्भघ्नीं गर्भिणीं चैव दुर्मुखीं पा
कभांडानि तु हेमाद्रौ नागरखंडे सौवर्णान्याथरौप्याणि कांस्यताम्रोद्भवानि च
मार्त्तिकान्यपि भव्यानि नूतनानि दृढानि च तत्रैवादित्यपुराणे पचेदन्नानि सु
स्नातः पात्रेषु चिष्ट्वयं स्वर्णादिधातुजातेषु मृन्मयेष्वपि वा द्विजः अच्छिद्रेष्वपि
लिप्तेषु तथा नूपहतेषु च नायसेषु न भिन्नेषु दूषितेष्वपि वा क्वचित् एवं कृतोप
योगेषु मृन्मयेषु न तु क्वचित् वायुपुराणे न कदाचित्पचेदन्नमयस्थालीषु पै
तृकं अयसो दर्शनादेव पितरो विद्रवंति हि कालायसं विशेषेण निंदंति पि
तृकर्मणि फलानां चैव शाकानां छेदनार्थानि यानि तु महानसे पि शस्त्राणि
तेषामेव हि संनिधिः ईप्सितो नेतरस्यायं न दर्शनं तत्रैव पचमानस्तु भांडेषु भ
ग्नयातायमयेषु च सम्भरति वै घोरां त्यिदन्दुः खमहार्णवात् तैजसानामभा
वे तु पिठरे मृन्मये पि नवे स्यैचौ प्रकुर्वीत पाकं पितृणां प्रमादरात् तत्रैवादित्यपुराणे

959-A

पक्वान्नस्याग्रमनार्पैतुशास्यंते दारुजान्यपि दर्व्यादीन्यपि कार्याणि यज्ञियै रपिदा
रुभिः यमः विवाहे चैव कार्ये च मातापित्रोः क्षयेहनि नवभांडानि कुर्वीत यज्ञका
ले विशेषतः अथ पाकाग्निः हेमाद्रौ प्रजापतिः औपासनेनान्नसिद्धिर्गृह्याग्नौ करणाने
व च पत्नी च ज्ञोदयेगिरा शालाग्नौ तु पचेदन्नं लौकिके वापि नित्यशः यस्मिन्नग्नौ
पचेदन्नं तस्मिन्होमो विधीयते मनुः वैवाहिकेग्नौ कुर्वीत गृह्यं कर्म यथाविधि प
चयज्ञविधानं च पक्तिं चान्वाहिकीं द्विजः श्राद्धस्य गृह्यत्वं चोक्तमपरार्केण अत्र वि
शेषः कर्मप्रदीपे प्रातर्होमं तु निर्वर्त्य समुद्धृत्य हुताशनात् शेषं महानसे कृत्वा तत्र
पाकं समाचरेत् पाकान्तेग्निं तमाहृत्य गृह्याग्नौ तु पुनः क्षिपेत् ततोस्मिन्वाश्वदावा
दि कर्म कुर्यादतंद्रितः तदभावे लौकिके ततः पचेयुरन्नानि निर्वापानंतरं शनैः वै
वाहिकेग्नावन्यत्र लौकिके चापि संयत इति कालिकायां संग्रहोक्तेः पित्राद्यर्थे निर्वापं
हुत्वेत्यर्थः अत एव हेमाद्रौ वायुपुराणे पित्रर्थं निर्वपेद्भूमौ कूर्चे वा दर्भसंस्कृते इ
ति तत्रैव पाद्मे समात्स्ययोः अग्निमान्निर्वपेत्पित्र्यं चरुं चासमपुष्टिभिः पितृभ्यो नि
र्वपामीति सर्वं दक्षिणतो न्यसेत् चरुग्रहणान्नशाकादावितिहेमाद्रिः पिंडपितृ
यज्ञार्थपाकविशयोयं निर्वाप इति तत्तु युक्तं अथ पंचेतरे वामाग्निः आश्वलायनं तु
गुरुणाभिमता अन्यतो वाप क्षीयमाणा अमावास्यायां शांतिकर्म कुर्वीरन्नि

त्यादिसूत्रेण पचनाग्नेस्त्यागमुक्त्वा इहैवायमितरो जातवेदा इत्यर्धर्चेन शामीमयी
भ्यामरणीभ्याममग्निं मंथेत्स पचनाग्निर्भवतीति सूत्रे ह्यतो चोक्तेः पचनाग्नावेव पाकः
बौधायनेनाप्युक्तं अग्न्याहितपचनाग्निमौपासनं वाभिप्रव्रजंतीति स्मार्त्ताग्नेः पाकस्त्व
न्यशास्त्राविषयः इति केचित् वस्तुतस्तु पूर्वोक्तस्य सर्वाधानविषयत्वमुक्तं शिष्टा
चारोपि न पचनोद्भवपक्षे अंशविलायामपि सर्वाधानपक्षे वैश्वदेवं श्राद्धं च पचने कु
र्यादन्यथौपासने इत्युक्तं अग्नौकरणं तु प्रयोगपारिजाताभिराह्निकादिसर्वश्राद्धे
ष्वपि पिंडपितृयज्ञवत्तिवंगोमे लौकिके पचने वा पाके कृतेपि गृह्याग्नौ पक्वं च स्यादे
व कार्यं इति प्रतिभाति मदनरत्नेप्येवं विधुरोच्छिन्नाग्न्यादेस्तु पश्चोदिविधानेना
ग्निसंपादनमित्युक्तं हरिहरभाष्ये इति पाकाग्निः चंद्रिकायां मार्कंडेयः अक्रुद्धः
स्नातस्तु हृष्टमुखः गतोपपन्नान् द्विजान् प्रत्येकं प्रेषयेत्तेषां प्रदद्यामलोदकं देवलः
ततोऽग्निहोत्रे मध्याह्ने कृतनेरोमनखान् द्विजान् अभिगम्य यथान्यायं प्रयच्छेद्दंत
धावनं तैलमभ्यंजनं स्नानं स्नानीयं च पृथग्विधं पात्रैरौदुंबरैर्दद्याद्वैश्वदेविक
पूर्वकं औदुंबरैः ताम्रमयैः अत्र क्षौरामलकस्नानादिनिषिद्धतिथ्यादिमति
रिक्तविषयमिति हेमाद्रिमाधवौ यत्तु चंद्रिकायां प्रचेताः तैलमुद्वर्तनं स्नानं द
न्त्यधावनमेव च श्राद्धभुग्भ्यो नखरमश्रुच्छेदनं तु न कारयेदिति तन्निषिद्ध

260-A

वस्त्र एव च नग्नः काषायवासाः स्यान्नग्नश्चार्द्रपटः स्मृतः नग्नोऽद्विगुणए ६×

तिथ्यादिविशेषं निषिद्धानिथ्यादि तत्प्रागुक्तं अभ्यंगस्तु कलिकायां कात्यायनः
तैलमुद्वर्त्तनं देयं ब्राह्मणेभ्यः प्रयत्नतः तैरभ्यंगश्च कर्त्तव्यो वर्ज्यकालं न चिंतयेत्
अपरार्के प्रचेताः स्नातोऽधिकारी भवति दैवे पित्र्ये च कर्मणि श्राद्धकृच्छुक्लवासाः स्या
न्मौनी चापि जितेंद्रियः हेमाद्रौ जाबालिः तांबूलं दंतकाष्ठं च स्नेहस्नानमभोजनं ।
रत्यौषधपरान्नानि श्राद्धकर्त्ता विवर्जयेत् वर्षे विशेषमाह तत्रैव भृगुः नग्नः स्या
न्मलवद्वासा नग्नः कौपीनकेवलः द्विकच्छोऽनुत्तरीयश्च अकच्छोऽवस्त्रः स्यान्नग्नो
रक्तपटः स्मृतः नग्नस्त्रि[illegible]वसः स्यान्नग्नः स्यूतपटस्तथा ततः कर्त्ता ऊर्ध्वपुंड्रं ।
कुर्वीत जपहोमेज्यादाने स्वाध्याये पितृकर्मणि तत्सर्वं नश्यति क्षिप्रमूर्ध्वपुं
ड्रं विना कृतमिति हेमाद्रावुक्तेः यज्ञो दानं जपो होमः स्वाध्यायः पितृकर्म च ।
वृथा भवति विप्रेंद्र ऊर्ध्वपुंड्रं विना कृतमिति बृहन्नारदीयात् ऊर्ध्वं च तिलकं
कुर्याद्दैवे पित्र्ये च कर्मणि पराशरोक्तेश्च अन्ये तु ऊर्ध्वपुंड्रं द्विजातीनामग्निहोत्र
समो विधिः श्राद्धकाले तु संप्राप्ते कर्त्ता भोक्ता च तत्त्यजेत् वामहस्ते च दर्भांस्तु गृहे रंग
वलिं तथा ललाटे तिलकं दृष्ट्वा निराशाः पितरो गता इति संग्रहोक्तेः ऊर्ध्वपुंड्रं ।
त्रिपुंड्रं वा चंद्राकारमथापि वा श्राद्धकर्त्ता न कुर्वीत यावत्पिंडान्न निर्वपेदिति वि
ष्णुप्रकारे वचनाद्यन्न कार्यमित्याहुः अत्राचाराद्व्यवस्था स्मृतरा च बृहन्नारदीये ।

ऊर्ध्वपुंड्रं च तुलसीं श्राद्धे नेच्छंति केचिन्नेति ऊर्ध्वपुंड्रविधिविप्रविषयः निषेधः(
कर्तृपर इति पृथ्वीचंद्रः यत्तु हेमाद्रौ देवलः ललाटे पुंड्रकं दृष्ट्वा स्कंधे मालां तथैव
च निराशाः पितरो यांति दृष्ट्वा च वृषलीपतिं तऊंधेन त्रिपुंड्रविषयं प्राक् पिंडदान
दूर्ध्वं नोलं कुर्यात्स्वविग्रहमित्याश्वलायनोक्तेः पुंड्रं वर्तुलमित्यपरार्केति मदनरत्ने
च पृथ्वीचंद्र रक्तपुंड्रं त्रिपुंड्रं ऊर्ध्वं च तिलकं कुर्यान्न कुर्याद्वै त्रिपुंड्रकं निराशाः पितरो
यांति दृष्ट्वा चैव त्रिपुंड्रकमिति वृद्धपराशरोक्तेः भोक्तुरस्ति यंगलयो भवन्त्येव वर्जयेत्तिल
कं भाले श्राद्धकाले च सर्वदा तिर्यगप्यूर्ध्वपुंड्रं वा धारयेन्न प्रयत्नत इति व्याक्रेरि(
त्याह पृथ्वीचंद्रोदये ब्राह्मे सदर्भेणानुहस्तेन यः कुर्यात्तिलकं कः आचम्य सवि(
शुध्येत दर्भत्यागेन चैव हि श्राद्धारंभकालमाह पराके गौतमः आरंभकुतपे श्रा
द्धं कुर्याद्रौहिणं बुधः विधिज्ञो विधिमास्थाय रौहिणं तु न लंघयेत् एतदेकोद्दिष्ट
पार्वणे तु मात्स्ये ऊर्ध्वं मुहूर्तात्कुतपाद्यन्मुहूर्तचतुष्टयं मुहूर्तपंचके ह्येतत्स्व
धाभवनमिष्यते तथा मध्याह्ने सर्वदा यस्मान्मंदी भवति भास्करः तस्मादनंत(
फलदस्तत्रारंभो विशिष्यते अथ श्राद्धपरिभाषा चंद्रिकायां कात्यायनः दक्षिणं पा
तयेज्जानु देवान्परिचरन्सदा पातयेदितरं जानु दर्भाः पितॄणां द्विगुणास्तु पा(
पृथ्वीचंद्रोदये शंखः आवाहनार्घ्यसंकल्पे पिंडदानान्नदानयोः पिंडाभ्यंजने

261-A

कालेतुतथैवांजनकर्मणि अक्षय्यासनयोःपाद्येगोत्रंनामप्रकाशयेत् तत्रैवपरिशि
ष्टे क्षणेचपिंडदानेचगंधधूपाक्षयेतथा संकल्पेवासनेदीपे अंजनाभ्यंजनेतथा।
अन्नार्घ्यदानार्घ्यंतेषु गोत्रंनामचकीर्त्तयेत् कालिकायांसंग्रहे आसनावाहनेपाद्ये
अन्नदानेतथैवच अक्षय्येपिंडदानेचषट् नामानिकीर्त्तयेत्समस्त्वः संबंधप्रथमंब्रू
याद्गोत्रंनामतथैवच पश्चाद्रूपंविजानीयात्क्रमएवसनातनः तत्रैवसकारेणतुव
क्तव्यंगोत्रंसर्वत्रधीमता सकारःकृतपोज्ञेयस्तस्माद्यत्नेनतंवदेत् यथाकाश्यपसगो
त्रेतिपराशरसगोत्रस्यवृद्धस्यतुमहात्मनः भिक्षोःपंचशिखस्याहंशिष्यःपरमधा
र्मिकइतिमोक्षधर्मेषुप्रयोगाच्च तेनगोत्रसगोत्रयोःपर्यायत्वाच्छाखाभेदाद्व्यवस्थे
ति शूलपाणिः एतद्दोषाभावान्नातंतेषामेव हेमाद्रेस्तुतत्रचेताः गोत्रेस्वरांतंसर्व
त्रगोत्रस्याक्षयकर्मणि गोत्रस्तुतर्पणेप्रोक्तः एवंदानानमुद्यति सर्वत्रैवपितः
प्रोक्तः पितातर्पणकर्मणि पितुरक्षय्यकालेतु पित्रेसंकल्पनेतथा शर्मन्नर्घ्यादि
केकार्ये शर्मातर्पणकर्मणि शर्मणोक्षय्यकालेतु पितॄणांदत्तमक्षयं स्वरांतं
संबुध्यंतमितिहेमाद्रिः तत्रैवचंद्रिकायांचस्मृत्यंतरे गोत्रस्यत्वपरिज्ञानेका।
श्यपंगोत्रमुच्यते यस्मादाहश्रुतिःसर्वाःप्रजाःकाश्यपसंभवाः यत्तुसत्याषाढ ।
अप्रधानाज्ञानवंधोःपुरोहितगोत्रेणाचार्यगोत्रंचेति तद्विवाहपरं नामोच्चारणे

विशेषमाह हेमाद्रौ बौधायनः शर्मांतं ब्राह्मणस्योक्तं वर्मांतं क्षत्रियस्य तु गुप्तां
तं चैव वैश्यस्य दासांतं शूद्रजन्मनः पित्रादिनामाज्ञाने तत्रैव पृथिवी त्वत्पिता
वायुस्त्वत्पितामहोन्तरिक्षसत् अभिधानापरिज्ञाने दिविषत्प्रपितामहः पित्रादीनां
नाम यदा पुत्रैर्न ज्ञायते तदा आपस्तंबसूत्रेप्येवं एतदन्यशाखापरं आश्वलायना
नां तु तत्सूत्रे यदि नामान्न विद्यात् तत पितामहप्रपितामहेति ब्रूयात् तत्कारिकाया
पि नामानि चेन्न जानीयात् ततेत्यादि वदेत्क्रमात् ततेति संबंधमात्रपरं न पितृव्यादाव
पितृयेति गौडाः स्त्रीणां दांतं नाम ज्ञेयं दांतनाम स्त्रीणामिति पृथ्वीचंद्रोदये भिल्लोक्तेः
केचित् देवीशब्दांतमाहुः अन्ये तु देवि दा इति द्वयोः समुच्चयमाहुः हेमाद्रौ नारायणः
विप्र क्षिमिस्कृ यत्किंचिद्दीयते पितृदैवते तत्सर्वं सफलं ज्ञेयं विपरीतं निरर्थकं चेदि
कास्मरत्वर्थसारयो नारदीये च अक्षय्यासनयोः षष्ठी द्वितीयावाहने तथा अन्नदाने
चतुर्थी स्यात् शेषाः संबुद्धयः स्मृताः पत्नव्यासः चतुर्थीवासने नित्यं संकल्पे चाविधी
यते प्रथमा तर्पणे लोपे ज्ञा संबुद्धिमपरे जगुरिति अत्र शाखाभेदाद्व्यवस्थेति
हेमाद्रिः हेमाद्रौ भरद्वाजः अर्घ्यावनेजने पिंडमंत्रप्रत्यवने संबुद्धिं तत्र बुद्धिं तत्र कु
र्वीत शेषे षष्ठी विधीयते तत्रैवामातृविशेषो नागरखंडे मातामहे तथा मातु

२६२-A

रासनेकस्यनेक्षये गोत्रे गोत्राः पृथगाद्या विभक्तयः हेमाद्रौ प्रभासखंडे यज्ञोप
वीतिना कार्यं दैवं कर्मप्रदक्षिणं प्राचीनावीतिना कार्यं पितृकर्माप्रदक्षिणं अनुपनीत
स्त्रीशूद्रादेस्तु उत्तरीयेणैव सव्यापसव्ये हेये तस्योपवीतस्थानीयत्वात् अथ सर्वकर्मा
द्यंतं कृत्वा कश्चित्सगोत्रजइति ब्राह्मणा स्वस्तिवाचस्पतिः यत्तु केचित् सदोपवी
तिनाभाव्यमितस्यपुरुषार्थत्वात्प्राचीनकाले प्युपवीतांतरेणान्यत्कार्यमेवेति तन्ना
विशेषेण बाधात् जमदग्निः स्वस्तोत्रजयं त्यक्त्वा पिंडाधुर्एंवदक्षिणां आक्रांते
स्थागते चार्घ्ये विनाचपरिवेषणं विसर्जने सौमनस्यमासिषां प्रार्थने तथा विप्रदक्षि
णां चैव स्वस्तिवाचनकं विना पितृनुद्दिश्य कर्तव्यं प्राचीनावीनासदा हेमाद्रौ संग्रहे आ
दौ विप्रांघ्रिशौचातैभ्यर्चने विकिरे हुते पिंडान्न्यस्यार्चयित्वा च विसर्ज्य ब्राह्मणां
स्तथा आचामे श्राद्धकर्ता च स्यानेष्वेतेषु सप्तसु आद्यंतयोर्द्विराचामे द्वेषेषु तु सकृ
त्सकृत् तत्रैव श्राद्धारंभेवसाने च पादशौचार्चनांतयोः विकरे पिंडदाने च षट्स्वा
चमानमिष्यते आश्वलायनः दानाध्ययनदेवार्चाजपहोमव्रतादिकान् न कु
र्यात् श्राद्धदिवसे प्राग्विप्राणां विसर्जनात् एतन्नित्यवर्जमिति बोपदेवः इदं विष्णुभि
न्नदेवपरं विष्णोर्निवेदितान्नेन यष्टव्यं देवतांतरं पितृभ्यश्चापि तद्देयं तद्दानंत्याप
कल्पते पितृशेषं तु यो दद्याद्धरये परमात्मने रेतोधाः पितरस्तस्य भवंति क्लेशभा

ग्निरिति स्कांदात् पितरः सर्वमनुष्याविष्णुनाशितमश्नंतीति स्कांदे: यः श्राद्धकाले हरिभु
क्तशेषं ददाति भक्त्या पितृदेवतानां तेनैव पिंडांस्तुलसीविमिश्रानाकल्पकोटिं पितरस्तु
प्ता इति ब्राह्मोक्तेश्चेति श्रीधरस्वामिनृसिंहपरिचर्यादयः एतत्सर्वं निबंधविरोधा
न्निर्मूलं अत्र विशेषो हेमाद्रौ विष्णुधर्मे श्राद्धांते तु समभ्यर्च्य तं वराहं जनार्दनं शिव
पुराणे प्रजयित्वा शिवं भक्त्या पितृश्राद्धं प्रकल्पयेत् पूर्वं निषेधस्तु विहितभिन्नपरः।
तथा हेमाद्रौ देवर्षौ दक्षिणांगादिः पादजान्वंसमूर्धसु शिरोंसजानुपादेषु चावामांगादि
वपेत्रवेः कालिकायां स्मृत्यंतरे श्राद्धारंभे न्यसेद्दर्भान् पादशौचे विवर्जयेत् अ
र्चनादौ न्यसेद्दर्भानुच्छिष्टस्थाने विसर्जयेत् मार्जनादौ न्यसेद्दर्भाः पिंडस्थाने विसर्ज
येत् उत्तानादौ न्यसेद्दर्भान् दक्षिणांते विसर्जयेत् प्रार्थनादौ न्यसेद्दर्भान् नमस्कारे विसर्जये
त् अत्र हेमाद्रौ विष्णुः मातामहानामप्येवं श्राद्धं कुर्याद्विचक्षणः मंत्रोहेन यथान्यायं शेषा
णां मंत्रवर्जितं यथान्यायमिति यत्र बहुवचनं ताः पितृशब्दस्तत्र सर्वपितृवाचित्वा
न्नोहः तत्रापि शुंधंतां पितर इत्यत्रोह एव सर्वपितृवाचित्वे उत्तरमंत्रद्वयवैयर्थ्यात्
बहुवचनं तु नोद्देश्यगतं प्रकृतावसमर्पयित्वात्पाशानितिवत् अरगाते च नोहः तस्माद्द्वे
नोहेदिति निषेधात् एकोद्दिष्टेप्येवं प्रेतैकोद्दिष्टे त्वेकवचनं मंत्रान्नूहेनैकादिष्टे इति वि
ष्णूक्तेरूहः अत्र बहुवचनस्याप्यूहो वचनात् वृष्यादौ तु विशेषं वक्ष्यामः शेषाणां

263-A

॥मिति पितृव्याद्येकोद्दिष्टे आवाहनादिमंत्रवर्जं कार्यमिति कल्पतरुः ऊहयोग्यपितृप॥
दवान्मंत्र एव तत्र न प्रयोज्यः नतूहः नापि पितृपदरहितः प्रयोज्य इति शूलपाणिः अर्थात
रं चोक्तं प्राक् वट्टच कारिकापि अर्घ्यप्रदानमंत्रेतु मात्रादिपदमाचयेत् संधत्तामिति पि
त्रादौ मात्रादिपदमाचयेत् मातृश्राद्धपिंडदाने येचत्वामात्रान्वित्यत्र नोह इति हानि कात
तथा मातुःश्राद्धे यन्न हेन कुर्यात्पिंडानुमंत्रणं दशादानमुपस्थानं तद्धवत्कार्यमि॥
ति स्थितिः प्रवाहणमनूहेन तत्र व्याख्यानमिष्यते तथा आयेन्तु नंत्ति लोसीति उशंतस्त्वे
ति यानि तु अनूह्यः पितृशब्दो जपितृसामान्यवाचकः अप्रपत्तं वानांतु च यते हेमा
द्रौ मार्कंडेयः स्नातः स्नानात्समाहृतान्स्वागतेनार्चयेत्स्वयं कालिकायां नारदीये
प्रायश्चित्तविशुद्धात्मा तेभ्योनुज्ञां प्रगृह्य च दद्याद्वै ब्रह्मदंडार्थं हिरण्यं कुशमेव च॥
तत्रैव संग्रहे तिथिवारादिकं ज्ञात्वा संकल्प्य च यथाविधि प्राचीनावीतिना कार्यं स
र्वं संकल्पनादिकं संबंधप्रथमं ब्रूयान्नाम गोत्रे तथैव च वस्त्रादि रूपतां चापि स्वधि
ष्णामनुक्रमात् चंद्रोदये नारदीये श्राद्धार्थं समनुप्राप्तान् विप्रान्स्वयोनि मंत्रयेत्॥
आपस्तंबसूत्रे पूर्वेद्युर्निमंत्रणं परेद्युर्द्वितीयं तृतीयमामंत्रणमित्याह एवं मया नि
मंत्रणीया इति निवेदनरूपमाद्यं तद्विधिमाह शौनकः गृहीत्वा मुकसंज्ञस्यामुकगो
त्रस्य चामुके श्राद्धे तु वैश्वदेवार्थं करणीयः क्षणस्त्वया इत्येवं श्राद्धकृद्ब्रूयाद्दीनतये

वदेत्तु सः श्राद्धस्य कर्त्ता स ब्रूयात्तं प्राप्नोतु भवानिति स वदेत् प्राप्नवानीति इतरस्तं प्रति द्वि
जः देवौ पार्वणे पूरूरवार्द्रवौ वाच्यौ पित्रादेरप्यनेनैव तु गणेन विधिना द्विजान् ततः श्रा
द्धकर्त्ता वह्वृचो नाहिताग्निः पिंडपितृयज्ञं परिस्तरणादि आधानांतं कुर्यात् गृह्याधानि
नोप्येवमिति प्रयोगपारिजाते परिशिष्टे च भाष्यकारमते आद्विकोप्येव वृत्तिकार
मतेनेदं हेमाद्रौ शंभुः संमार्जितोपलिप्ते तु द्वारि कुर्वीत मंडले उदक्प्लवमसंदीव्यं स्या
द्दक्षिणं दक्षिणाप्लवं व्याघ्रः उत्तरे क्षतसंयुक्तान् पूर्वाग्रान् विन्यसेत्कुशान् दक्षिणे दक्षि
णाग्रांस्तु सतिलान्विन्यसेत्कुशान् तत्रैव बौधायनः चतुरस्रं त्रिकोणं च वर्तुलं चार्धचं
द्रकं कर्तव्यमानुपूर्व्येण ब्राह्मणादिषु मंडलं तत्रैव लौगाक्षिः हस्तद्वयमितं कार्यं
वैश्वदेविक मंडलं तद्दक्षिणे चतुर्हस्तं पितॄणां तमंघ्रिशोधने कालिकायां संग्रहे तु
प्रादेशमात्रं देवानां चतुरस्रं तु मंडलं त्यक्त्वा षडंगुलं तस्मा दक्षिणे वर्तुले तथेत्युक्तं
यत्तु स्मृत्यंतरे स्मृत्यंतरे गतैः पांचांगुलो वित्रे जानुमात्रो मही भुजि प्रादेशमात्रो वैश्
ये च साधकः सत्कृद्वेति [illegible] प्रमाणेन व्याख्यातो देवपित्र्ययोः चतुरस्रं व
र्तुलं च कपितं गर्तलक्षणं पादप्रक्षालने प्रोक्तमुपवेश्यासने द्विजान् तिर्यक्स्रेत्र सा
लानं कुर्यान्निराशाः पितरो गता इति तत्समूलत्वे मंडलाग्रे पुपकृत्रेयं तत्र गोमये
हेमाद्रौ भट्टः अस्त्यंत जीर्णे देहाया वेध्या पापस्य विशेषतः आर्द्रो यानवस्तु ताया

264-A

नगोत्रैर्नाममयमाहरेत् मात्स्ये अक्षताभिः सपुष्पाभिस्तदभ्यर्च्यापसव्यवत् वि
प्राणां क्षालयेत्पादानभिवंद्य पुनः पुनः प्रत्यङ्मुखः स्थितः कुर्याद्विप्रपादाभिषेच
नं तत्रैव भविष्ये प्रक्षालयेद्द्विप्रपादान् शन्नोदेवीरिति त्रचा पृथ्वीचेद्रोदये हृद्ध
वशिष्ठः नक्तं गंधपिहस्तः पाद्यं दद्याद्विचक्षणः कलिकायां संग्रहे ततः प्रक्ष
लयेत्पादौ भार्यास्त्रावितिवारिणा तथा श्राद्धकालेयदापत्नीवामेनीरप्रदाभवेत्
आसुरं तद्भवेच्छ्राद्धं पितॄणां नोपतिष्ठते तत्रैव नाधः प्रक्षालयेत्पादौ कर्ता पित्रादि
कर्मस्तुपाद्यानंतरमपि दद्यादिति हेमाद्रिः तत्रैव लौगाक्षिः मंडलादुत्तरे देशे दद्या
दावमनीयकं तत्रैव विधाय क्षालनं तेषां द्विराचमनमिष्यते स्वयं चापि द्विराचा
मेद्द्विविज्ञः श्रद्धयान्वितः हेमाद्रौ नारदीये यत्राचमनवारीणि पादप्रक्षालनोद
कैः संगच्छंते बुधाः श्राद्धमासुरं तत्प्रचक्षते हेमाद्रौ व्यासः सव्येनैवासनं धृत्वा
दक्षिणे दक्षिणं करं आहृतीभिः समस्ताभिरासनेषूपवेशयेत् समाध्वमिति वै
वोक्त्वा दक्षिणं जानु संस्पृशन् आस्यतामिति तान्ब्रूयादासनं संस्पृशन्नपि हेमा
द्रौ शातातपः द्वौ दैवे पूर्वदिग्गौ वै त्रीन्प्राङ्मुखानुपवेशयेत् पित्र्ये तु दङ्मुखान्सोमव
हृचाधर्युसामगान् याज्ञवल्क्यः द्वौ दैवे प्राक्त्रयः पित्र्ये उदगेकैकमेव वा पत्
हेमाद्रौ हारीतः दक्षिणाग्रदर्भेषु प्राङ्मुखान्भोजयेदुदङ्मुखान्नित्येके इति त्र

नि॰ सिं॰
२६५

९६५

मैत्रायणी यविषयं प्राङ्मुखान्भोजयेदुदङ्मुखानित्येक इति तत्परिशिष्टा
त् । विकल्प इति हेमाद्रिः माधवीये यमः भिक्षुको ब्रह्मचारी वा भोजनार्थमुपस्थि
तः उपविष्टेष्वनुप्राप्तः कामं तमपि भोजयेत् कौर्मे अतिथिर्यस्य नाश्नाति न तच्छ्राद्धं
प्रचक्षते विप्रनियमा माधवीये याज्ञवल्क्यः सर्वे ते च मौनव्रतान्विताः उच्छिष्टोच्छि
ष्टसंस्पर्शं वर्जयन्तः परस्परं तत्रासनानि पृथ्वी चैव ह्रीदपेयमः आसनं कुतपं दद्यादितर
द्वा यविस्तरं हेमाद्रौ चमत्कारखंडे पितामहं घटितं हैमं राजतं वापि चासनं येन ताम्र
मयं दत्तमासनं पितृकर्मणि स वैदिव्यासनारूढो नहि प्रच्यवते दिवः हेमाद्रौ नाग
रखंडे अयसा कुमयं पीठं प्रदेयं नोपवेशने कालिकायां संग्रहे क्षौमं दुकूलमेपा
लमाविकं दारुजं तथा तार्णं पार्णं बृसीं चैव विष्टरादि च विन्यसेत् अग्निदग्धान्यो
पसानि भग्नानि च विवर्जयेत् हेमाद्रौ छागलेयः पश्चाद्भागादुपक्रम्य प्राच्यां यद्दर्भ
या भवेत् दक्षिणासंस्थिता ह्येषा पितॄणां श्राद्धकर्मणि पुलस्त्यः श्रीपर्णी वारुणी
क्षीरी जंबुकाम्रकदंबकं सप्त मं वा कुलं पीठं पितॄणां दत्तमक्षयं संग्रहे शमी च काश्म
रीशेलुः कदंबो वरणस्तथा पंचासनानि शस्तानि श्राद्धे देवार्चने तथा कारिका
ह्यां देवे प्राङ्मुखौ वापि त्रीन्विप्रानुदगाननान् पैठीनसिः कुतुपः श्राद्धवेलायां श्रोत्रि
यो यदि दृश्यते आश्वलायनः नीवीवासो दशान्तेन स्वरक्षार्थं प्रबंधयेत् तद्वपा

राम
२६५

ज्ञव त्वक्त्रस्कं दक्षिणे कटिदेशे तु तिलैः सह कुशत्रयं यत्तु कात्तीये नीवीकार्या
दक्षिणा तु भ्रिवामकुक्षौ कुशैः सहेति तद्वृद्धिश्राद्धे पितॄणां दक्षिणे पार्श्वे विपरीतान्तु
दैविक इति स्मृत्यंतरात् वामे दक्षिणे चेत्याचारात् व्यवस्थेति मदनपारिजाते आ
चार्यः प्राणायामत्रयं कृत्वा गायत्रीं स्मरणं तथा श्राद्धं कर्त्तास्मीति वदेत् विप्रै
र्वाच्यं कुरुष्वच ब्राह्मे तन्नतिलान्गृह्य तस्मिन् विकिरेच्चाप्रदक्षिणं श्राद्धपा
परयात्पुनः जपेदपहता इति स्मृत्यर्थसारे अपहता इति तिलान्विकीर्य उदीर
तामित्यृचाभिमंत्र्य पराशरः तद्विष्णोरिति मंत्रेण गायत्र्या च प्रयत्नतः प्रोक्षयेद
न्नजातं तु स्मृत्वा इत्यादि मुद्रये हेमाद्रौ ब्रह्मखंडे श्राद्धभूमौ गयां ध्यात्वा जपेत् देव
ताभ्यः पितृभ्यश्च महायोगिभ्य एव च नमः स्वाहायै स्वधायै नित्यमेव नमो नमः
आदिमध्यावसानेषु त्रिरावृत्तं जपेद्बुधः पितरः क्षिप्रमायांति राक्षसाः प्रद्रवंति च
तत्रैव स्कान्दे तिला रक्षंत्वसुरान् दर्भा रक्षंति राक्षसान् पङ्क्तिं वै श्रोत्रियो रक्षेद् तिथिः
सर्वरक्षकः वसिष्ठः ऋद्धवतीभिः कुष्माण्डीभिः पावमानीभिश्च पाकादि प्रोक्षेत् अ
थ देवार्चा तत्र प्रत्युपचारमाद्यंतयोरपो दद्यादित्युक्तं वृत्तौ स्मृत्यर्थसारे च हेमाद्रौ
ब्राह्मे आसने त्वासनं दद्याद्वामे वा दक्षिणेऽपि वा पितृकर्मणि वामे च देवे दद्यात्तु दक्षि
णे प्रचेताः आसने त्वासनं दद्यान्न तु पाणौ कदाचन धर्मोऽस्मीत्यप मंत्रेण गृह्णीयु

त्तेन नान्तु शान् धर्मोस्मिन्विशिराजा प्रतिष्ठित इति मंत्रः गालवः दर्भानादा
यस्तु सभ्यां गृहीत्वा दक्षिणे करे देवेक्षणः क्रियातां तु निरंगुष्ठं करं ततः ॐ तथे
ति द्विजान्ब्रूयुस्ते प्राप्नोतु भवति कर्त्ता ब्रूयात् ततो विप्रः प्राप्नवानीति वै वदेत् पृ
थ्वीचंद्रोदये ब्रह्मनारदीये यवैर्दर्भैश्च विश्वेषां देवानामिदमासनं दत्वेति भ्यो द
द्यात् दैवे क्षणाइति क्षणः तत्र च वाचनमर्घ्यावाकार्यमिति स एव ततो र्घ्यं कल्पयेदि
ति मन्वर्थः शौनकजयंताभ्यामर्घ्यरहितस्य देवार्चनस्योक्तेः रात्रूल्लापनानां दैवे र्घ्यदाने
नेति वोपदेवः तन्न परिशिष्टप्रयोगपारिजातविरोधात् वृद्धिश्राद्धे तु दैवे र्घ्यं दद्यात् ॥
देवेभ्योपि पृथुक् दद्यादित्यर्घ्यस्मृतिचोदनादिति शौनकोक्तेः अर्घ्यपात्रे पृ
थ्वीचंद्रोदये मात्स्यपाद्ययोः पात्रं वनस्पतिमयं तथा पर्णमयं पुनः जलजं वापि कु
र्वीत तथा सागरसंभव ब्राह्मे सौवर्णं ताम्ररौप्याश्मस्फटिकं शंखशुक्तयः भिन्ना
न्यपि हि योज्यानि पात्राणि पितृकर्मणि हेमाद्रौ प्रजापतिः सौवर्णं राजतं ताम्रं खड्ग
मणिमयं तथा यज्ञियं चमसं वापि अर्घ्यार्थं परिकल्पयेद्बुधः अत्र विप्रैकत्वे द्वित्वे चतुष्ट्वादौ वार्घ्य
र्घ्यपात्रे [illegible] एव मानवसूत्रे तु दैवे द्वे दैविके अपि पित्र्ये त्र्येकैकमुभयत्र
चेत्युक्तं तदेकविप्रपरं पात्रालाभपरं चेति हेमाद्रिः मदनरत्ने तु दैवे एकपात्रमेवेत्याह
बह्वृचानां तु दैवे विप्रद्वित्वेप्येवमर्घ्यपात्रमर्घ्यं शेषं दद्यादित्युक्तं पारिशिष्टप्रयोगपारिजा
ते च कलिकायां हारीतः दत्तमक्षय्यतां याति खड्गेनार्घ्येन यत्सतां वृद्धमनुः स्तनमर्पदा

रजतं पात्रमयं पात्रं च यद्भवेत् राजतं दैवकार्ये शिलपात्रं च वर्जयेत् पुराणसमुच्चये
मृण्मयं भवेत्पात्रं पितॄणां राजतं शुभं दर्शागडलं नु देवानां सौवर्णं शक्तितः कृतं स्थापयेद
र्घ्यपात्रेण पवित्रे छेदयेत्तु ये ओषधीमंतरे कृत्वा अंगुष्ठांगुलिपर्वणोः स्येन काष्ठे
न लोहेन नखेन कृत्वोपरि पत्रिके हेमनु ब्रूते तत्र कुशाग्रपरिच्छेदे पवित्रे विधिवत्पात्रयोः प्र
परिक्षिपेत् यत्पार्श्वः पवित्रे स्थ इति मंत्रेण पवित्रे छेदयेत्तु ते ओषधीमंतरे कृत्वा अं
गुष्ठांगुलिपर्वणोः स्येन काष्ठेन लोहेन नखेन नयन स्वादिभिः वसिष्ठः तूष्णीं प्रोक्षा
भसा पात्रे कुर्याद्दूर्ध्वं विलेत ततः स्थापयेत्पात्रयुग्मं तु कृत्वोपरि पवित्रके वृद्धपाराशरः
पात्रद्वयमयाघार्थे तैजसं चैकवस्तु ततः प्राङ्मुखे वामरतीर्थेन शन्नो देव्योदकं क्षि
पेत् यवोसीति यवांस्तत्र तूष्णीं पुष्पाणि चंदनं मानवस्तु जे सुमनसः प्रक्षिप्य।
स्तूय यवान् प्रक्षिप्येति यवोसीति मंत्र पाद्मे: यवोसि धान्यराजो सि वारुणो म
धुमिश्रतः निर्णोदः सर्वपापानां पवित्रमृषिभिः स्मृतं राजो वा वारुणो मधुसंयु
त इति परिशिष्टे पाठः गोभिलेन तु यवोसि सोमदेवत्य इति तिलमंत्रोक्तं स्याहाय
नौ उक्तः हेमाद्रौ यमः यव हस्तानो देवान्विज्ञाप्यावाहनं प्रति आवाहयेदनुज्ञातो
विश्वेदेवास इत्यृच वृद्धपराशरः ततः सव्यकरं न्यस्य विप्रदक्षिजानुनि देवाना
वाहयिष्ये इति वाचमुदीरयेत् आवाहयेत्यनुज्ञातो विश्वेदेवास आगन्त विश्वे

नि॰सिं॰
२६९

267

देवाः शृणुतेममिति मंत्रद्वयं पठेत् श्राद्धविशेषविश्वेदेवा नामान्याह हेमाद्रौ बृ
हस्पतिः उत्पत्तिं नाम चैतेषां न विदुर्ये द्विजातयः अयमुच्चारणीयस्तेषां मंत्रः श्रद्धास
मन्वितैः आगच्छंतु महाभागा विश्वेदेवा महाबलाः ये यत्र विहिताः श्राद्धे सावधाना
भवंतु ते इदं चावाहनमर्घ्यपात्रासादनात् प्राक् हेमाद्रिणोक्तं तत्र कात्तीयैः प्राक्कार्यं
तथैव तत्सूत्रात् अन्येस्तूत्तरं पृथ्वीचंद्रोदये शंखः सयवं पुष्पमादाय चरणादि शि
रोंतकं अर्चनेत्यर्चनं कुर्यादंतरे चोदकं तथा पित्र्ये तु मस्तकादि पादांतं पादप्रभृति मस्त
कांतं दैविके पूजनं भवेत् शिरःप्रभृति पादांतं नमो वः इति पैतृके इति मदनरत्ने प्रचेतो
क्तेः कालिकायां संग्रहे तिष्ठन् कृतांजलिर्भूत्वा पठेन्मंत्रोऽसमाहितः विश्वेदेवाः शृ
णुतेत्यागच्छत्त्वपरं ततः हेमाद्रौ जातूकर्ण्यः ततोऽर्घ्यपात्रसंपत्तिं वाचयित्वा द्विजो
त्तमान् तदग्रे चार्घ्यपात्रे तु स्वाहार्घ्या इति विन्यसेत् गार्ग्यः दत्त्वा हस्ते पवित्रं च कृत्वा
पूजां च पादतः या दिव्या इति मंत्रेण हस्ते त्वर्घ्यं विनिक्षिपेत् संग्रहे विश्वेदेवा इदं वोऽ
र्घ्यमिति दानं समादिशेत् तदंते स्वाहा नमः इति वाच्यं या दिव्या इति मंत्रेण स्वाहा
कारनमोंतकमिति हेमाद्रौ नागरखंडात् अथ वर्णस्तोत्तु पाद्यमर्घ्यमाचमनी
यमिति द्विजकरे नित्यं दैत्यस्यैव त्रयमुक्तं गभस्तिः अर्घ्यं पिंडप्रदानं च स्वस्वस्य क्ष
य्ये तथैव च गंधपुष्पादिकं सर्वं हस्ते नैव च तु दापयेत् प्रतिविप्रं या दिव्येत्याहुत्तिः १

267-A

वद्धचानांत्वनेनदत्तार्घ्यानमंत्रणं ततःपात्रंदक्षिणेदेवेभ्यस्थानमसीतिप्रु
त्रमुत्तानंवाकार्यमितिगारुडेउक्तं एतदायस्तंवानांनियतमन्येषांन हेमाद्रौ
विष्णुधर्मे गंधैःपुष्पैस्तथाधूपैस्तथवस्त्रैस्तथाप्यपभूषणैः अर्चयेद्ब्राह्मणान् शक्त्या
श्रद्दधानःसमाहितः पृथ्वीचंद्रोदयेमार्कंडेयः चंदनागुरुकर्पूरकुंकुमानि
प्रदापयेत् विष्णुः चंदनकुंकुमकर्पूरागुरुपद्मकान्येनुलेपनार्थेतिव्यासः अप
वित्रकरोगंधैर्गंधद्वारेतिपूजयेत् कालिकापांस्मृतिः गंधद्वारेतिवैगंधमाम
नेतेचपुष्पकं धूरसीत्यमृताधूपंउदीप्यस्वतिदीपकं युवंवस्त्राणिमंत्रेणवस्त्रं
दद्यात्प्रयत्नतःआसनेस्वासनंब्रूयादर्घ्यास्त्वर्घ्यंद्विजोत्तमः सुगंधश्चसुपुष्पाणिसु
माल्यानिसुधूपकःसुज्योतिश्चैवदीपेनस्याच्छादनमितिक्रमः विप्राणांगंधेनव
र्तुलंत्रिपुंड्रंवानकार्यं हेमाद्रौदेवलः ललाटेपुंड्रंवर्तुलमित्यपरार्केमदनरत्नेर
च पुंड्रंत्रिपुंड्रंवर्तुलमर्धचंद्रंच ऊर्ध्वंचतिलकंकुर्यान्नकुर्याद्वैत्रिपुंड्रकं ऊर्ध्वंच
तिलकंकुर्यान्नकुर्याद्वैत्रिपुंड्रकं ऊर्ध्वंचतिलकंकुर्याद्दैवेपित्र्येचकर्मणि नि
राशाःपितरोयांतिदृष्ट्वाचैवत्रिपुंड्रकमिति वृद्धपराशरोक्तेः वर्जयेत्तिलकंभा
लेश्राद्धकालेचसर्वदातिर्यगूर्ध्वंपुंड्रंवाधारयेत्प्रयत्नतःइतिव्यासोक्तेरिति
४५ पुंड्रकंदृष्ट्वास्कंधेमालान्तपेवच निराशाःपितरोयांतिदृष्ट्वाचवृषलीपतिं प०

यत्तु बृहन्नारदीये ऊर्ध्वपुंड्रं च तुलसीं श्राद्धे नेच्छंति केचनेति तत्कर्तृपरं हेमाद्रौ
ब्राह्मे पूतिकं मृगनाभिं चनारं रक्तचंदनं कालेयकं तृणं गंधं तुरुष्कं चापि व
र्जयेत् कस्तूर्यां विकल्प इति हेमाद्रिः वृद्धशातातपः पवित्रं तु करे कृत्वा यः समा
लभेद्द्विजान् राक्षसानां भवेच्छ्राद्धं निराशैः पितृभिर्गतैः पुष्पं तु ब्राह्मे जातीं चंप
कं लोध्रं च मल्लिका बाणबर्बरी वृत्ताशोकाटरूषं च तुलसी शतपत्रकं कुब्जकं
तगरं चैव भृंगं मारण्यकेतकी यूथिका मतिमुक्तं च श्राद्धयोग्यानि भो द्विजाः
कमलं कुमुदं पद्मं पुंडरीकं च यत्नतः इंदीवरं कोकनदं कल्हारं च निवेदयेत् हेमा
द्रौ वायुभविष्ययोः कुमारैः किसलयैश्चैव दूर्वांकुरैरपि संप्रजनीयाः पितरः श्रे
यः कामेन सर्वदा स्कांदे जातिश्च सर्वादातव्या मल्लिका श्वेतयूथिका जलोद्भ
वानि सर्वाणि कुसुमानि च चंपकं तत्रैव तद्दमनः न नियुक्तः शिखावर्जं माल्यं
शिरसि धारयेत् वर्ज्यानि पद्मे चेड्ढादये भविष्ये केतकीं तुलसीपत्रं बिल्वप
त्रं च वर्जयेत् द्रोणं च करवीरं च धत्तूरं किंशुकं तथा माधवीये स्मृत्यर्थसारे च
तुलसी निषिद्धा तुलसी निषेधः निर्मूल इति हेमाद्रिः पिंडपरः तुलसीगंधमा
घ्राय पितरस्तुष्टमानसाः प्रयांति गरुडारूढास्तत्पदं चक्रपाणिन इति प्रयोगपा
रिजाते पाद्मोक्तेर्निवापदेवः वृद्धपराशरः न जातीकुसुमैर्विद्वान् बिल्वपत्रे

श्चनार्चयेत् जपादिकुसुमं झिंटीरूपिकास कुरंटिका पुष्पाणि वर्जनीयानि श्रा
द्धकर्मणि नित्यशः हेमाद्रौ शंखः उग्रगंधीन्यगंधीनि चैत्यवृक्षोद्भवानि च पुष्पा
णि वर्जनीयानि रक्तवर्णानि यानि च जलोद्भवानि देयानि रक्तान्यपि विशेषतः भृंग
गिराः न जातीकुसुमानि दद्यात् न कदलीपत्रमिति जात्यां विकल्प इति हेमाद्रिनि षि
धः पिंडविषयः कुंदं शंभौ च नो दद्यान्नोन्मत्तं गरुडध्वजे पिंडे जातीं च नो दद्यात् न दद्याद्देवीम
र्केणा नार्चयेदिति वृद्धयाज्ञवल्क्योक्तेरिति वोपदेवः स्मृतिसारे अगस्त्यं भृंगराजं
च तुलसीं शतपत्रिकां चंपकं तिलपुष्पं च षडेते पितृवल्लभाः केतकीं करवीरं च व
कुलं कुंदकं तथा पाटलां चैव जातीं च श्राद्धे यत्नेन वर्जयेत् केचित्पिंडेपि तुलसीमा
हुः पितृपिंडार्चनं श्राद्धे यैः कृतं तुलसीदलैः प्रीणिताः पितरस्तेन यावच्चंद्रार्कमे
दिनीति मार्कंडेयोक्तेः धूपस्तत्रैव विष्णुः धूपार्थे गुग्गुलं दद्यात् तथा चंदनसारु
जः अगरुस्सकर्पूरस्तुरुष्कश्चक्रतथैव च विष्णुः घृतमधुयुक्तं गुग्गुलुं श्रीखंडं
देवदारुं सरलादि दद्यादिति तत्रैव देवलः ये हि प्राण्यंगजा धूपाः हस्तवाताहता अहता
श्च ये न ते श्राद्धे नियोक्तव्याः येच केचोग्रगंधयः घृतेन केवलं दद्यात् दुष्टं वा तृणगुग्गु
लुं दीपमाह विष्णुः घृतेन दीपो दातव्यः तिलतैलेन वा पुनः वसामेदोद्भवं दीपं प्रयत्ने
न विवर्जयेत् वस्त्रमाह लेकौशेयं क्षौमं कार्पासं दुकूलमहतं तथा श्राद्धेष्वेतानि यो दद्यात्

नि॰सिं॰
२६५

269

त्क्वा मानाप्रोति चोत्तमान् हेमाद्रौ ब्रह्मवैवर्ते यज्ञोपवीतं दातव्यं वस्त्राभावे विजानता
पितृभ्यो वस्त्रदानस्य फलं तेनाश्नुते खिलं तत्रैव पाद्मे निष्क्रयो वा यथाशक्ति वस्त्रा
भावे प्रदीयते अन्यान्यपि देयानि तत्रैव कालिकापुराणे धात्वादिनिर्मितान्रम्यान्दीपि
काः श्राद्धकर्मणि पितॄनुद्दिश्य यो दद्यात्स भवेद्भ्राजितं श्रियः यो धूपदानपात्रं तु पात्रमारा
त्रिकस्य च दद्यात्पितृभ्यः प्रयतस्तस्य स्वर्गेक्षया गतिः विष्णुधर्मेषु कंचुकं तथो
ष्णीषं पितृभ्यः प्रतिपादयेत् ज्वरोद्भवादीनि दुःखानि स कदाचिन्न पश्यति स्त्रीणां श्रा
द्धे तु सिंदूरं दद्युरञ्जनकानि च निमंत्रिताभ्यः स्त्रीभ्यो येन ते स्युः सौभाग्यसंयुताः हेमाद्रौ
आदित्यपुराणे न कृष्णमवर्णं दातव्यं नापि कार्पाससंभवं पितृभ्यो नापि मलिनं नो
पभुक्तं कदाचन । न छिद्रितं नापदशं न धौतं कारुणापि च कार्पासनिषेधोऽन्यसंभ
वे तत्रैव पितॄन्सत्कृत्य वासोभिर्दद्याद्यज्ञोपवीतकं यज्ञोपवीतदानेन विना श्राद्धं
तु निःफलं [illegible] स्त्रीशूद्रश्राद्धेष्वपि देयमिति हेमाद्रिः तत्रैव नृसिंहपुराणे
कमंडलुं ताम्रमयं श्राद्धेषु प्रददाति यः काष्ठेन निर्मितं वापि नारिकेलमयं त्वथो
पि वा दद्यात्कमंडलुं श्राद्धेषु स स्त्रीमानभिजायते यो मृत्तिकाविरचितान् श्रा
द्धेषु च घटान् शुभान् प्रदद्यात्करकांश्चापि सोऽक्षयं विंदते सुखं तत्रैव उपानत्
छत्रवस्त्राणि भक्तिपात्रं कमंडलुं शयनासनयानानि दर्पणं व्यंजनानि च श्रा

राम
२६५

269-A

वंसुसंस्कृतंगंधाढ्यंतांबूलंदीपमाचामरे पितृभ्योयःप्रयच्छेत्सविष्णुलोकं
सगच्छति सौरपुराणे चामरंतालवृंतंमध्यंचश्वेतच्छत्रंचदर्पणं दत्त्वापितृगणेभ्यो
नानिभूमिपालोभवेदिह तत्रैवचनंदिपुराणे अलंकाराःप्रदातव्यायथाश
क्ति हिरण्मयाः केयूरहारकटकमुद्रिकाकुंडलादयः स्त्रीश्राद्धेषुप्रदेयास्तुअलं
कारास्तुयोषितां मंजीरमेखलादामकर्णिकाकंकणादयः तथा आदर्शोव्यज
नछत्रशयनासनपादुकाः मनोज्ञाःपटवासाश्चस्रग्गंधाश्चूर्णमुख्ययः अंगारधा
निकाःशीतियोगहास्यपट्टयः कटिसूत्राणिरौप्याणिमेखलाश्चैवकंकलाःक
र्पूरादेश्चभांडानितांबूलापतनंतथा भोजनाधारपात्राणिपतद्ग्रहास्तथैवच
तथांजनशालीकाश्चकेशानांचप्रसाधनं एतान्दद्यात्तुयःसम्यक्सोश्वमेध
फलंलभेत् स्कांदे सौवर्णंराजतंवापिकांस्येनाप्यनिर्मितं दत्त्वाभोजनपात्रंतु
सम्राड्भवतिभूतले वामनपुराणे वंदीकृतास्तुयेकेचित्स्वयंवायदिवापरैः
येनकेनाप्युपायेनयस्तान्मोचयतेनरः पितरस्तस्यगच्छंतिशाश्वतंपदमव्य
यं पराशरः वाचयेत्परिपूर्णान्वैवासोदत्त्वाविधानतः नारदीये देवश्चसमन्त
न्तानेयजेत्पितृगणांस्तथा तत्रपित्र्येआसनाद्यशेषमर्चनकांडवैश्वदेविकंतो
यं विशेषस्तूच्यते तत्रासनेद्विगुणास्तुभग्नाःकुशाः अत्रावाहनमासनान्त

वैवार्घ्यं पूरणीं तरं चेति स्मृतिषु पक्षाउक्ताः एषां शाखाभेदेन व्यवस्था द्वितीय
पक्षएव बहुसंमतः तत्रार्घ्ये माहाश्वलायनः तैजसाश्ममयमृन्मयेषु त्रिषु पा
त्रेष्वेकद्रव्येषु वा दर्भान्तर्हितेष्वपः प्रसिच्य शन्नोदेवीरित्यनुमंत्र्य तिलानावपति ति
लोसि सोमदेवत्यो गोसवो देवनिर्मितः प्रत्नवद्भिः प्रत्तः स्वधया पितॄनिमान् लोकान्
प्रीणयाहि नः स्वधा नम इति अश्ममयं स्फाटिकादि मृन्मयं हस्तकृतमेव कुलाल
चक्रनिष्पन्नमासुरं दैविकं नतत् तद्देवहस्तघटितं दैविकं केवलं तयेति छंदोग
परिशिष्टात् अन्यान्यपि पात्राणि पूर्वमुक्तानि मनुः अन्नाभावे द्विजाभावे पद्ये
कोपासितेषु भवेत् पात्राण्यासादयेत् त्रीणि तत्र ब्राह्मणसंख्यया दत्तकादेः कर्त्रोर्द्वि
पितृत्वादावपि वचनात् त्रीणीति हरिहरः माधवीये वैजवापः अर्घ्ये पितृणां त्री
ण्येव कुर्यात् मंत्राणां धर्मवित् एकस्मिन्वाप्यनेकेषु वा ब्राह्मणेषु यथाविधि द्रुमा
द्वावप्येवं अत्रानुमंत्रणं सकृत् तिलोसीत्यस्य प्रतिपात्रमावृत्तिः पितृशब्दस्या
नूहस्तस्येति वृत्तिकारात् दर्भैस्त्रिगुणं पवित्रमत्र तिस्रस्तिस्रः शलाकाः कार्याः पितृपा
त्रेषु पार्वणे एकोद्दिष्टे शलाकैकां निधायोदकमाहरेदिति हेमाद्रौ चतुर्विंशत्य
तिमतात् तत्रैव विशेषः दक्षिणाग्रदर्भेषु दक्षिणापवर्गं चमसेषु पवित्रांतर्हिते
ष्वपः आसिंचेत् शंन्नोदेवीरिति मंत्रेण जलासेचनं बह्वृचभिन्नविषयं अस्मिन्
पक्षे प्रतिपात्रं मंत्रावृत्तिः कारिकायां गंधपुष्पाणि चैतेषु पात्रेषु प्रक्षिपेद्

270-17

प त्रास्ते जलं क्षीरं दधि घृतं तिलतंडुलसर्षपान् कुशाग्रमधुपुष्पाणि दत्वा
वामे ततः स्वयं जानू कएपिः ततोर्घपात्रसंपत्तिं वाचयित्वा द्विजोत्तमान् तदग्रे।
चार्घपात्राणि स्वधार्घ्या इति विन्यसेत् ततस्तिलहस्तो विप्रं सव्यजानोर्दक्षिणक
रं न्यस्यावाहनं पृच्छेत् अत्र गोत्रसंबंधनामानि द्वितीयांतत्वेच प्रागुक्तं वै जवाप।
गृह्ये तिष्ठ पितॄन्नावाहयिष्यामीत्यामंत्र्य कौर्मे अपसव्यं ततः कृत्वा पितॄणां
दक्षिणामुखः आवाहनं ततः कुर्यादुशंतस्त्वेत्यृचा बुधः आवाह्य तदनुज्ञातो जपे
दायंतु नस्ततः अत्र सव्यस्यापि प्रागुक्तो विकल्पः अत्राद्यमंत्रावृत्त्या अस्मत्पितरममु
कशर्माणममुकगोत्रं वसुरूपमावाहयामीत्याद्युक्त्वा मरुद्रादिपादांतेति त्रान्विकी
र्यायंतु न इति सर्वांते सकृत् जपेदिति निबंधाः अत्रापवेशनं शंवेशनपाद्यार्घ्याच।
मनीयान्यपि हेमाद्रिनोक्तानि नान्यैर्वैदिकानां नियतानि नान्येषां तेषां च प्रपिता
महादि पित्रंतं प्रातिलोम्येन सर्वः प्रयोगः वाराहे गंधपुष्पार्चनं कृत्वा दद्याद्धस्ते ति
लोदकं गार्ग्यः शिरस्तः पादतो वापि सम्यगभ्यर्चयेत्ततः ततः स्वधार्घ्या इति पितृपि
तामहादिविप्राग्रे प्रत्येकं निवेदयेदिति कारिकायां हस्ते तोच आश्वलायनः प्रसव्ये
नेतरपाणियंगुष्ठेन रणोपवीतित्वाद्दक्षिणेन वासव्योपगृह्णीते नापितरिदं ते अर्घ्यं।
प्रपितामहेदं ते अर्घ्यं प्रपितामहेदं ते अर्घ्यं मित्येवं ते तः प्रतिग्राहयिष्यन्सकृत्सके

नि॰ सिं॰
२७१

271

स्वधार्घ्या इति पृच्छति स्वनुष्ठा स्वनुमंत्रयीत यादिव्या आपः पयसा संबभूवुर्या
अन्तरिक्ष्या उत पार्थिवीर्याः हिरण्यवर्णा यज्ञियास्ता न आपः शं स्योना भवन्त्विति अ
र्घादि प्राग्गंधादिभ्योपवीतमेव अर्घ्यदानात्प्रागन्यो अपोदद्यात् यद्यप्यत्र सव्ये
न दक्षिणेन वार्घ्यं दद्यादित्युक्तं तथापि दक्षिणेनेत्यभिमतोऽर्थः कारिकायां हस्तेनैवे
वं पितृने दद्यात् त्रिभिः पात्रैर्दद्यात् पितुः स्थाने विप्रत्रयं चेदेकार्घ्यं विभज्य दद्यात् त्रया
णां स्वधार्घ्या इति सकृन्मन्त्रः एवं पितामहादावपि अन्यजलदानमर्घ्यमंत्राम्ना
प्रतिविप्रमावर्तनेत्थं गंधादेश्च प्रतिविप्रं पदार्थानुसमयः कांडानुसमयो वा पित्रा
दित्रयाणामेकविप्रपक्षे त्रिभिः पात्रैरेकस्यैवार्घ्यं दद्यादिति वृत्तिः कारिकापि २
स्वधार्घ्या इत्यर्घ्यास्ता उपवीती निवेदयेत् निवेदनात्प्राक् प्राचीनावीतमेवे
त्यर्थः अर्घ्यसशेषमादाय दक्षिणेन तु पाणिना सव्यहस्तं गृहीतेन निनयेत्पि
तृतीर्थेन पश्चाद्दत्वा निनीतास्ता यादिव्या इत्यनुमंत्रयेत् यत्त यादिव्या इति मंत्रेण
हस्ते स्वर्घ्यं विनिक्षिपेदिति पञ्चबाराहे तिलांबुना चापसव्यं दद्यादर्घ्यादिकं द्वि
ज इति यच्च व्यासः गोत्रसंबंधनामानि पितॄणामनुकीर्तयन् एकैकस्य तु विप्र।
स्य अर्घ्यपात्रं विनिक्षिपेदिति तद्बह्वृचातिरिक्तविषयं ततः आचामेत् एवं मा
तामहेष्वपि आश्वलायनैः संस्रवान्समवनीय ताभिरद्भिः पुत्रकामो मुखम

राम
२७१

नन्विह संस्रवः शेषसंस्रवो हि परिशिष्टो भवतीति शातपथश्रुतेः केचित्तु हस्तगलि
तांबुवदंति समवनीयांत्ये द्वे पात्रे पितृपात्रे आसिंचेति हलितः प्रथमे पात्रे संस्रवान्स
मवनीयेति कातीयसूत्राच्च आसेत्तुप्रतिबिंबावलोकनमुक्तं स्कांदे त्वायुः कामस्य
नेत्रासेचनमुक्तं पित्र्यविप्रे प्राङ्मुखस्य कर्तुरभिः षेकः कार्य इति केचित् [illegible]लाय
नः नोद्धरेत्प्रथमं पात्रं पितॄणामर्घ्यपातितं आवृतास्तत्र तिष्ठंति पितरः शौनको
ब्रवीत् यावद्विप्रविसर्जनमिति तु यो पादेयमीयः पाठः अत्र हार्निः पितृपात्रं समव
नयनदेशान्न चालयेदाश्राद्धसमाप्तेः यस्मान्न तत्तृतीयपात्रेण वृता इति यद्वा प्रथम
पात्रमेव न्युब्जं कुर्यादिति कामाभावेपीदमेव शेषप्रतिपादनं हेमाद्रौ कौर्मे सं
स्रवांश्च ततः सर्वान्पात्रे कुर्यात्समाहितः पितृभ्यः स्थानमसीति न्युब्जं पात्रं निधा
पयेत् शूलपाणौ यमस्तु पात्रे कुर्वीत समाहितः पैतृकं प्रथमं पात्रं तस्मिन्पैतामहं न्य
सेत् प्रपितामहं ततो न्यस्य नोद्धरेन्न च चालयेदित्याह अथ संस्रवानानीय तृतीये
नार्घ्यार्घ्यन्युब्जीकुर्यादिति सर्वैकवाक्यतापार्थ इति केचित् अत्रिगंधादिभिस्तद
भ्यर्च्य तृतीयेनापिधापयेत् पितृभ्यः स्थानमसीति मंत्रो देशोर्चितेर्चयेत् अर्चनं न्यु
ब्जीकृते पितृत्वं न्युब्जमुत्तरतो न्यसेदिति प्रचेतसोक्तेः सर्वविप्रोत्तरतो न्यसेदिति
हेमाद्रिकल्पतरू विप्रवामे इति हलायुधः कर्तुर्वामे इति शूलपाणिः उत्तानं वि
वृतं वापि पितृपात्रं न तद्भवेदित्युशनसोक्तेः न्युब्जनमेव साधुः मातामहादिसंस्रवान

पिपितृपात्रेणवगृहीत्वाप्रयाजवत्तेणान्नुत्रीकुर्यादितिस्मृत्यर्थसाराः एको
द्दिष्टेऽत्र हेनम्रुत्वेतेनिपितृभक्षोऽप्युदितः यमोपि स्वच्छमत्तानमन्यज्ञनीतमुद्धा
दितेनतथा पात्रंहव्याब्रजंन्यास्तुपितरस्तंशामयंतिच वैश्वदेवे उन्नानमितिमद
नपारिजातः वैजवापः तस्योपरिकुशान्दत्वाप्रदद्याद्देवपूर्वकं गंधपुष्पाणि
धूपंचदीपंवस्त्रोपवीतके अत्रगंधादेर्देवेपित्र्येच पदार्थानुसमयस्यपात्रवर
ल्वेपात्रकांडानुसमयेनविकल्पोज्ञेयः वह्वृचानांतुस्तत्रेदेवानुतैःकांडानुसम
एव अत्रप्राचीनावीतीनामगोत्रसंबुध्यायुक्तंप्राक् अन्यदेववत् तदनेन्नाचर
मनंच हेमाद्रौ कालिकापुराणे निवर्त्यब्राह्मणादेशात्क्रियामेवंयथाविधि भो
जनानिततोदद्याद्भस्तरैरात्वंपुनः क्रमात् आदेशात्पात्राणिदद्यादित्यन्वयः ते
नतत्रापिपूर्वशान्तुत्रेये तत्रैवब्राह्मे मंडलानिचकार्याणिनैवारैस्मृणिकैम्युभैः गो
रम्रृत्तिकयावापिभस्मनागोमयेनवा भृगुः भस्मनावारिणावापिकारयेत्
मंडलंततः चतुःकोणंद्विजाग्र्यस्यत्रिकोणंक्षत्रियस्यतु मंडलाकृततुवैश्यस्य
शूद्रस्याभ्युक्षणंस्मृतं वह्वृचपरिशिष्टेतुदेवेचतुरस्रंपित्र्ये वर्तुलंमंडलंकृत्वा
क्रमेणसयवान्सतिलांश्चदर्भान्दद्यादित्युक्तं मार्कंडेयः यातुधानाःपिशा
चाश्चक्रूराश्चैवराक्षसाः हरंतिरसमन्नस्यमंडलेनविवर्जितं हेमाद्रौ हारीतः
भस्मावेवनिदध्यान्नोपरिपात्राणीति ततित्तु हेमाद्रावत्रिराह भोजने हेमरौ

272-A

प्याणि दैवे पित्र्ये यथाक्रमं हारीतः राजतपात्राणि ताम्रकांस्यपात्राणि भोजने इ
ति तत्रैव वाराहे सौवर्णानि तथा पात्राणि कांस्यानि तदसंभवे अन्यान्यपि हि कार्या
णि दारुजान्यपि जानता नाप्यसान्यपि कार्याणि पैत्तलानि न तु क्वचित् न च सीसम
यानी हस्तास्यं तत्र पूजान्यपि अत्रिः पंचाशत्पलिकं कांस्यं अधिकं भोजनाय वै गृहस्थै
स्तु सदा कार्यं मबैभावे हेमारौप्ययोः पालाशेभ्यो विना नस्युः पर्णपात्राणि भोजने
पृथ्वीचंद्रस्तु कांस्यपात्रे हविर्दद्यान्निरशेषाः पितरो गताः इति व्यासोक्तेः कांस्यपात्र
निषेधमाह वोपदेवस्तु स्मृतिसंग्रहमुदाजहार श्राद्धे पलाशपत्राणि मधूकोदुंब
राणि च पारिकाकुटकप्लक्षकचानि क्रमात् जगुः कदलीचूतपनसजंबुपुन्नागचं
पकाः अलाभे मुख्यपत्राणां ग्राह्यास्तु पितृकर्मणीति हेमाद्रौ तु कदलीपत्रनिषे
धमाह गिराः न जातीकुसुमानि दद्यान्न कदलीपत्रमिति क्रतुः असुराणां कुलेजा
रंभा पूर्वं परिग्रहे तस्याः दर्शनमात्रेण निराशाः पितरो गताः एवं पात्राण्यासाद्य भस्म
मर्यादां कृत्वा विप्रहस्तशोधनं कुर्यात् तत्र पिशंगं रक्षाणां इति मंत्रद्वयं केचित्पठं
ति मात्स्ये अकृत्वा भस्ममर्यादां यः कुर्यात् पाणिशोधनं आसुरं तद्भवेच्छ्राद्धं पि
तृणां नोपतिष्ठति तत्रैव ब्रह्मांडे प्रक्षाल्य हस्तपात्रादि पश्चादद्भिर्विधानवत् प्र
क्षालनजलं दर्भैस्तैर्भूमिं प्रक्षिपेच्छुचौ मंत्रेणोपरीति हेमाद्रिः प्रयोगे त्वाकार

णं हेमाद्रौ मार्कंडेयः आहिताग्निस्तु जुहुयाद्दक्षिणाग्नौ समाहितः अनाहिता
ग्निस्त्वौपदेशेऽग्न्यभावे द्विजेऽप्सु वा वायवीये आहृत्य दक्षिणाग्निं तु होमार्थं वै
प्रयत्नतः अग्न्यर्थं लौकिकं वापि जुहुयात्कर्मसिद्धये आहिताग्निः सर्वाधानी।
ग अर्धाधानी तु गृह्य एवेति चंद्रिकापरार्कमिताक्षरामाधवादयः तस्यापि दक्षिणा।
ग्नौ लौकिको गृह्य इति हेमाद्रिः कल्पतरुश्च आद्यपक्ष एव तु युक्तः बहुसंमतश्च।
यद्यपि स्मार्त्तमग्नौ करणं श्रौते दक्षिणाग्नौ नेत्युक्तं तथापि वचनाद्भवतीति हेमाद्रिचं
द्रिकादयः स्कंददर्शश्राद्धे तु आह्निकादिषु तु सर्वाधानी पाणौ अर्धाधानी गृह्ये कुर्या
दिति हेमाद्रिमाधवश्च पक्षांतं कर्म निर्वर्त्य वैश्वदेवं च साग्निकः पिंडयज्ञं ततः कुर्या
त्ततोऽन्वाहार्यकं बुध इति लौगाक्ष्यादिभिः क्रमोक्तेः विद्धृतदक्षिणाग्निसत्त्वात् अ
तएव वाचवचने साग्निकः आहिताग्निरुक्तो हेमाद्रिणा एतदापस्तंबादीनामेव।
आश्वलायनस्य त्वाहिताग्नेः पाणावेवेति वृत्तिः अर्धाधानिनः गृह्य एवाग्निसंयोग इ
ति प्रयोगपारिजाते परिशिष्टे च बोपदेवस्त्वाह होमः शाब्दः पिंडपितृयज्ञपरः पि।
तृयज्ञे तं तु कुर्याद्दक्षिणाग्नौ समाहितः श्राद्धे त्वौपासनाग्नौ तु निरग्निर्लौकिके।
नले अनग्निर्दूरभार्यश्च पार्वणे समुपस्थिते संधायाग्निं ततः कुर्याद्धोमं समाग्निं
समुत्सृजेत् इति कांडमंडनोक्तेः श्राद्धे गृह्याग्नावेवेति लौकिकाग्न्यादि विधा

नं व तैत्तिरीयादिविषयं बह्वृचस्य त्वनग्नेरपि पाणिहोम एव अग्निपाणी विनास्त
त्रेविधांतरानुक्तेः अग्न्यभावे तु विप्रस्य पाणावेवोपपादयेदिति मन्त्रोक्तेश्च तन्नावप्ये
वं केचित्साग्नेरपि पाणिहोम उक्तो गृह्यपरिशिष्टे आन्वष्टक्यं च पूर्वेद्युर्मासि मासि
पपर्वणि काम्यमभ्युदयेष्टम्यामेकोद्दिष्टमथाष्टमं चतुर्थ्याद्येषु साग्नेर्नावश्यं हो
मो विधीयते पित्र्यब्राह्मणहस्ते स्यादुत्तरेषु चतुर्ष्वपीति एकोद्दिष्टसपिंडीकरणे
श्रद्धे तन्निषेधात् बह्वृचभाष्यकारास्तु सर्वैकोद्दिष्टेषु पाणिहोममाहुः इदं बह्वृ
चानामेव अत्रेदं तत्त्वं स्थालीपाकेन सह पिंडार्थमुद्धृत्येति सूत्रे नात्रापूर्वः स्था
लीपाकश्चोद्यते सर्वश्राद्धेष्वप्रसंगात्तेनानुवादोयमित्यावृत्तिकारोक्तेः पार्वणेतरश्रा
र्धिकस्यानंगस्य व्यतिषंगस्य वार्षिकादिषु नातिदेशात् दर्शाधानिमित्तो पिपाणि
होम एवेति तत्त्वतिस्थरसः एवं मासिकादावपि षोडशमासिके श्राद्धे सपिंडीकरणे
तथा पाणावेव तद्धोतव्यमन्यत्राग्नौ तु हूयते इति वोपदेवोदाहृतवचनाच्च भाष्य
कारमते तु सूत्रे स्थालीपाकेनेति करणत्वानित्यवद्ध्रुवणाच्च पार्वणेऽसंगो ऽतः
काम्यादिषु तदभावे कार्यस्य पिंडदानस्याप्यभावः एतदेवानुसृत्य विकृतावपि
वार्षिकादौ व्यतिषंग उक्तः प्रयोगपारिजाते परिशिष्टे च तेनैतन्मते धाना
नोग्नावेव वस्तुतस्तु स्थालीपाके सहशब्दप्रयोगात्तरं प्रस्तरणीतिवत् सहभाव

मार्जस्कृतेः पात्नीचतेत्वष्टुरूपलक्षणमिचनांगत्वं तत्त्वेवानांगानुरोधेनप्र
धानस्यतत्पिंडदानस्याग्नौप्रयुक्तः तेन ऋत्विग्गणाभावेप्यग्नौहोमोभवतीति
वोपदेवः अनाहिताग्नेर्गृह्याग्निमतस्तुसर्वमतेग्नावेव वार्षिकादौहोमस्त्रिम
तेऋत्विग्गोन अन्यमतेत्वस्ति अत्रयथाचारमनुष्ठेयं आश्वलायनः उद्धृत्य
घृताक्तमन्नमनुज्ञापयत्यग्नौकरिष्येकरवैकरवाणीतिवाप्रत्यनुज्ञाक्रियतां
कुरुष्वकुर्वित्यथाग्नौजुहोतियथोक्तंपुरस्तादिति ऋत्विग्गणपक्षेइदमितिवृत्तिः
करवैकरवाणीत्यत्राग्नर्वित्यनुषंगः पुरस्तात्पिंडपितृयज्ञे तत्रैवं मेक्षणे
नावदायावदानसंपदाजुहुयात्सोमायपितृमतेस्वधानमोग्नयेकव्यवाहनाय
स्वधानमइतिस्वाहाकारेणवाग्निंप्रथमंयज्ञोपवीतीमेक्षणमनुप्रहृत्येति अवदान
संपदाउपस्तरणाभिघारणयोः ऋत्विग्गणपक्षेतिप्राणीतेयंहोमोन्यथामुख्ये अतिप्र
णीतेप्याविर्ध्यमुपसमाधायेतिवत्तृचपरिशिष्टात् केचित्तस्यरक्षोनिवर्हणार्थे
त्वाम्नुरम्भंवदंति तदेतद्विरोधाच्चिंत्यं प्रयोगपारिजातेप्येवं शौनकः स्वाहाकारेण
होमेनभवेद्यज्ञोपवीतवान् तत्रप्रागग्रयेकृत्वापश्चात्सोमायहूयते अग्नेयज्ञो
पवीत्येवप्रक्षिपेन्मेक्षणंततः छंदोगपरिशिष्टे अग्नौकरणहोमश्चकर्तव्यउप
वीतेना अपसव्येनवाकार्योदक्षिणाभिमुखेनच कात्यायनानांतु अपसव्येन

274-A

व पिंडपितृयज्ञवद्धुत्वेति सर्वातिदेशात् सव्यंतु छंदोगपरं गोभिलेनैतदुक्तर।
मेवापसव्योक्तेः छंदोगानुकृत्य सव्येनापसव्येन यज्ञवा इति हेमाद्रिः याज्ञवल्क्येनोक्त्र
अग्न्यपाणिहोमः आश्वलायनः अभ्यनुज्ञायां पाणिष्वेवेति पिंडपितृयज्ञकल्पा
भावेनाग्न्यभावे काम्यादिष्विन्यर्थः पाणिष्विति बहुवचनात् सर्वविप्रपाणिषु होम
इति हेमाद्रिः एवं मातामहेष्वपि ऐषा नकोपि सर्वेषामुपविष्टानां विप्राणाममग्नपाणिषु।
विभज्य जुहुयात्सर्वे सोमायेत्यादिमंत्रान्ः यत्तु हेमाद्रौ कात्यायनः पित्र्ये यः पंक्तिमू
र्धन्यस्तस्य पाणावनग्निकः हुत्वा मंत्रवदन्येषां तूष्णीं पात्रेषु निक्षिपेत् इति तत्तद्बह्व
चातिरिक्तानां यत्तु तत्रैव मात्स्ये अग्न्यभावे तु विप्रस्य पाणौ वाथ जलेपि वा अजक।
र्णेश्वकर्णे वा गोष्ठे वाथ शिवांतिके इति तत्तीर्थश्राद्धविषयं तद्देशस्यां समीपे स्यात्
श्राद्धं तत्रैषो विधिस्तदेति तत्रैव कात्यायनोक्तेः निर्जले जरकादौ यत्तु चंद्रोदये यमः दे
वविप्रकरेनाग्निः कार्योग्नौ करणं द्विजः इति तद भार्यापरं अपत्नीको यदा विप्रः श्राद्धं कुर्वी
त पार्वणं पितृविप्रैरनुज्ञातो विश्वेदेवेषु हूयते इति तत्रैव कात्यायनोक्तेः हूयते इति।
छंदसो व्यत्ययः हेमाद्रौ वायवे विष्णुरोदैवके कुर्यात्क्वेति पित्र्ये निवेदयेत् दैवविप्रा
ने कत्वे तत्रैव वैश्वदेवपदे कस्मिन् भवेयुर्द्व्यादयो द्विजाः तदेकपाणौ होतव्यं स्या
द्विधिर्विहितस्तदा सोप्याद्यः प्रथमं वात्र नियम्येतेति न्यायात् तेन मृतभार्यस्य
पत्नीकैतेनके दैवे होमः अनुपनीतब्रह्मचर्यादेस्तु पित्र्ये अग्न्यभावः स्मृतिस्ताव

धावद्भार्यानविंदतिइतिहेमाद्रौजातूकर्ण्योक्तेः सभार्यानग्नेरपिपित्र्यकरेइति
पृथ्वीचंद्रः उपवीतत्वेदैवेहोमः प्राचीनावीतेनपित्र्ये यद्वासर्वत्रदेवपित्र्यविप्रभेद
स्तदाभेदेनपाणिहोमइत्यपरार्कचंद्रिकादयः यदातुदैवंतंत्रेणतदातंत्रेणसकृद्देवपा
णिहोमइतिकेचित् हेमाद्रिस्तुमातामहस्यभेदेपिकुर्यात्तंत्रेचसाग्निकइतिकात्ती
यस्तत्रेभेदमाह एवंपित्र्येपि माधवीयेप्येवं एवंसाग्नेरपिविदेशादौपाणिहोमोत्रे
यः यत्तुकर्केणाग्निंविनाश्राद्धमेवनास्तीत्युक्तं तत्सपिंडीकरणवार्षिकाद्यकरणा
पत्तेर्यत्किंचिदेव यत्तुबृहन्नारदीये अनग्निर्दूरभार्यश्चात्यार्तोवासमुपस्थिते भ्रातृभिः
कारयेच्छ्राद्धंसाग्निकैर्विधिवद्द्विजाः क्षयाहदिवसेप्राप्तेयस्याग्निर्दूरगोयदि तथैव
भ्रातरस्तुश्रेष्ठोकिकामनाविति स्थितिः औपासनाग्नेर्दूरस्थेसमीपेभ्रातरिस्थिते
यद्यग्नेनापुरुषाद्यपिपाणौवासहियातकीः औपासनाग्नेर्दूरस्थेकेचिदिच्छंतिसत्तमाः १
पाणावेवतुहोतव्यमितितन्नेतत्समंजसं नचदृष्टानादरादुपेक्षे हेमाद्रौयमः अग्नौकरण
वत्तत्रहोमोविप्रकरेभवेत् यद्युक्तस्यदर्भानास्तीर्यपतोप्यपतोग्निसमोद्विजः मेक्ष
णेनकरेणवाहोमः मेक्षणप्रस्तरेणेनेतिवृत्तिः स्मृतिरत्नावल्यां ननुपाणिहोमे
स्यानत्तः यद्दृत्तेनोक्षणेनाग्नेनमयादितिचनस्यात्तामि ममेक्षणे कर्काचार्योप्येव
माह माधवीयेचंद्रिकायांचानुज्ञादिसर्वंभवतीत्युक्तं पाणिहोमेप्रश्नाद्याहापरार्के शौ
नकः अनग्निश्चेदाज्यंगृहीत्वाभवत्सेवाग्नौकरणमिति एवंवतयास्थिति आश्वलायनः

275-A

यादपाणिष्वाचांतेष्वन्यदन्नमनुदिशन्नमन्ने स्वष्टं दत्तमछुकमिति पाणौहुतं पात्रे ।
निधाय विप्रैराचमय्य हुतशेषं प्रदद्यादित्यर्थः स्वष्टं प्रभृतं नैमित्तकं चेदमाचमनं तु
हुतभक्षणनिमित्तं अन्नं पाणितले दत्तं पूर्वमश्नंत्यवुद्धयः पितरस्तेन तृप्यंति शेषान्नं
न लभंतीति पश्चपाणितले दत्तं पश्चात्यदुपकल्पितं एकीभावेन भोक्तव्यं पृथग्भा
वो न विद्यते इति वह्वृचपरिशिष्टात् हेमाद्रावप्याचमने कृत्वर्थवाद उक्तः पाण्या ।
स्यो हि द्विजः स्मृत इति भाष्ये त्वाचांतेषु भक्षतेषु चमसभक्षणे भक्षणोत्तरं च नाचमनं
अग्निसाम्यात् पूर्वनिषेधस्तु सपिंडीकरणेन्येषः ददातिचोदितत्वात् न त्वत्र जुहो
ति चोदितत्वादित्युक्तं न त्वेतद्वह्वृसंमतं यत्नबोधायनेन तस्मिंस्तु प्राशितेदद्याद
दन्नं प्राकृतं भवेदिति भक्षणमुक्तं तत्तु छारखीयानामेवेति हेमाद्रिः तत्रैवयमः ।
पित्र्यपाणिहुतात् शेषं पि?त्र्यपात्रेषु निक्षिपेत् अग्नौकरणशेषं तु न दद्याद्वैश्व
देविके एतदग्निहोमे पि समं कर्कस्तु सूत्रे हुतशेषं दद्यादित्यविशेषात्सर्वविप्रेषु
दद्यादित्याह तत्रैव वत्स?विशिष्टः पित्र्यविप्रकरे हुत्वा शेषं पात्रेषु निक्षिपेत् पि
?भ्यः शेषयेत्किंचिन्न दद्याद्वैश्वदेविके अपापस्तंवानां तु त्रेऊध्रियतामग्नौ च ।
क्रियतामित्यामंत्रयते काममुद्धियतां काममग्नौ च क्रियतामित्यनेन स्विउद्धरे ।
त्तु हूयाच्च नष्टाग्निविधुरादेविशेषो हस्त्नार्दीपे नष्टाग्निईरभार्यस्त्रपा वीणे

समुपस्थिते संधायाग्निं ततो होमं कृत्वा तं विसृजेत्पुनः अथाश्वेतितत्कालेऽग्निं सं
धाय हुत्वा त्यजेदित्यर्थः एतदापस्तंबानामेव पाणिहोमस्तु छंदोगादीनां विश्वप्र
काशेपि साग्निरौपासनेन निरग्निः कुर्वीत लौकिके पाणौ होमं प्रशंसन्ति तत्वाप
त्नंदशाखिनां स्नातका विधुरा वा स्युर्यदि वा ब्रह्मचारिणः अग्नौकरणहोमं तु कु
र्युस्ते लौकिकेनले अथाश्वायनेमन्तेज्योतिरुद्धुध्य व्याहृतीर्जुहेत् ततोनुज्ञातो गंनीध
नाद्यात्यभागांते यन्मे माता इत्याद्यैर्जुहुयात् तत्रासमाप्नात्वाहुतयः षडाज्यस्येति त्रयोद
व्यत्ययो वा यथा यन्मे माता प्रलुलोभ चरत्यनेन तेनः पिता वृङ्क्ता ~~अंतर्दधेति तत्राम्नाय~~ पिता
यास्त्रिष्टं तीति होमः अंगमुखे स्वाहेत्तु पितर्य्न्नाम्नात्वो होमो यन्मे पितामही प्रलुलोभ चरन्मे
पितामहो वृङ्क्तामंतर्दधे इति तत्राम्नाय पितामहाय द्वौ यन्मे प्रपितामही तन्मे रेतः प्र
पितामहो वृङ्क्ताम् अंतर्दधत्तु मिरिति तत्राम्नाय प्रपितामहाय द्वौ मातामहे पूर्ववत् ऊहः ।
यन्मे मातामही तन्मे मातामहो वृङ्क्ता अन्यं मातामहस्य वृद्धिमित्याद्यौ यन्मे मातुः पितामही म
प्रलुलोभ रेतो मातुः प्रपितामहो वृङ्क्ता अन्यं मातुः प्रपितामहाद्वौ सर्वत्रामुष्मा इत्य
त्रेऽ तत्तन्नामयोज्यं नऊहः संग्रहे योज्यः पित्रादिशब्दानां स्थाने मातामहादिकः अ
त्र होमे तथास्पर्शे जलपिंडादिदानके यन्मे माता मही त्यादि तत्रोदाहरणं भवेत् ततो
मेधा हव्येकान्वाहुतिः ततः स्वाहा पितृभ्य इत्याद्यैराज्यं हुत्वा स्विष्टकृतं हुत्वा सर्वभूते
किंचिद्दाद्यादथ गृहं भस्मायोपत्तत्र तद्भ्यां स्वाहाकारेण जुहोति परिषिंचतांत।

276-A

स्थालीपाकवत् अयमग्नौकरणहोमो मासिश्राद्धे एव तच्च स्मार्ताग्न्यभावेन कार्यमि
ति केचित् कार्यं भावेति बहवः अत एव सर्वाधाने नो होमवर्जं मासिश्राद्धमुक्तं सु
दर्शनभाष्ये महालये तद्धदित्येके प्रकरणांतरत्वात् कर्मांतरत्वेन स्मार्ते पार्वणेव
त्कार्यमिति त्वस्मद्गुरवः आह्निकादिस्तु तस्मात्पार्वणविधिरेव एवं मातृवार्षि
कादिष्वमासिश्राद्धविकृतावष्टकायां मातृश्राद्धे वैकृतहोमेन प्राकृतहोमबाधः
अन्वष्टकासु मातृश्राद्धे नेति भाष्ये तत्रापि श्राद्धांतरवत्क्रियमाणे तु पत्नी मातेत्या
दौ गुणत्वेपि मातुः प्राधान्यं विवक्षितं मासिश्राद्धेन कल्प्याख्यातत्वात् इति सूत्रात् आ
ग्नेयश्च मनोता कार्येति वचनादग्निशब्दस्येव वैकृतदेवताभिधायित्वं तेनामुष्मा
इत्यत्रामुकशर्मभ्यां पितृभ्यामित्याद्यूहः कार्यः तच्च मासिश्राद्धं जीवत्पित्रादिना इ
त्युक्तं मृतपित्रादिना च कार्यमित्युक्तं सुदर्शनभाष्ये तत्प्रकारस्तु वक्ष्यते मातापि
त्रोर्द्वित्वादौ तु नोहः तस्मा इदं न देहीति निषेधात् प्रकृतावूहाभावाच्च पत्नीं संनह्येति
वत् उपदेशिमतेनोहः यथा यन्मे मातरौ प्रलुलभतुश्चरत्याववननुव्रते इत्याद्यस्मात्
पितृकृतमासिश्राद्धनिर्णये ज्ञेयमिति दिक् अन्यत्प्राग्वत् अथ वैश्वदेवबलं तच्चो
पवीत्येवाज्येन देवपूर्वं आमात्तु पक्वमिति पात्राण्युपस्तीर्य कुर्यादिति हेमाद्रिः त
त्रैव शौनकः विधिना देवपूर्वं तु परिवेषणमाचरे तत्रैव धर्मः फलस्यानंतताप्र

नि॰सिं॰
२७७

277

क्तास्वयंचपरिवेषणे तत्रैव वायुभविष्ययोः भार्ययाश्राद्धकालेतुप्रशस्तंपरिवे
षणं ब्रह्मांडे नापवित्रेणनैकेनहस्तेननविनाकुशं नायसेनायसेनैवश्राद्धेतुप
रिवेषयेत् वशिष्ठः आयसेनतुपात्रेणयदन्नंसंप्रदीयतेभोक्ताविष्ठासमंभुंक्तेदा
ताचनरकंव्रजेत् पैठीनसिः सीसकायसरीतिपात्राण्यपज्ञियानि तत्रैवस्मृ
तौ तः सौवर्णराजताभ्यांचखड्गेनौदुंबरेणच दत्तमक्षय्यतांयातिफल्गुपात्रे
णवापुनः कार्ष्णाजिनिः दर्भादेयंघृतंचान्नंसमस्तंव्यंजनानिच उदकंचैवप
क्वान्नंनोदद्यात्तुकदाचन यमः पर्णाविषमदास्तुभुनिःकृतिःनैवविद्यते प
क्षीचंद्रोदयेपराशरः सर्वदाचतिलाग्राह्याःपितृकृत्येविशेषतः भोज्यपात्रेतिला
न् दृष्ट्वानिराशाःपितरोगताः चंद्रिकायांवृद्धशातातपः हस्तदत्तास्तुयेस्नेहालव
णव्यंजनादयःपितॄणांनोपतिष्ठंतिभोक्ताभुंजीतकिल्बिषं घृतपात्रेविशेषोग्रं
थांतरे ओदनेपरमान्नेचपात्रमासाद्यमुग्धधीः घृतेनपूरयेत्पात्रंतत्तुघृतंतुरुधिरं
भवेत् घृतादिपात्राणिभूमौस्थापयेन्नभोजनपात्रे इतिमदनरत्नेसंग्रहे हस्तदत्तं
तुनाश्नीयाल्लवणव्यंजनादिकं अपक्वंतैलपक्वंचहस्तेनैवप्रदीयते पात्रालंभनमनु
क्तचतुर्विंशतिमते उत्तानंदक्षिणंसव्यंनीचंपात्राण्युपस्पृशेत् याज्ञवल्क्यः दत्वा
न्नंपृथिवीपात्रमितिपात्राभिमंत्रणं कृत्वेदंविष्णुरित्यन्नेद्विजांगुष्ठंनिवेशयेत् बौ
धायनः विप्रांगुष्ठेनानखेनानुदिशतिपृथिवीतेपात्रंद्यौरपिधानंब्राह्मणस्य

राम
२७७

मुखेमर्त्तेमर्त्तं जुहोमि ब्राह्मणानां त्वा विद्यावतां प्राणापानयोर्जुहोम्यक्षितम।
सि मामेपितॄणां क्षेष्ठा अमुत्रामुष्मिन् लोके इति अथाजुहोम्यग्ने स्वाहाशब्दः का
त्यायनसूत्रे उक्तः मैत्रैः स्वधाशब्दः अंगुष्ठे विशेषमाह हेमाद्रौ धौम्यः परिहृत्य नखं चांगु
ष्ठं द्विजस्यान्ने निवेशयेत् तथा उत्तानेन तु हस्तेन द्विजांगुष्ठनिवेशनं यः करोति द्विजो।
मोहात्तद्वैरक्षांसि भुंजते तत्रैव यमः विष्णो हव्यं च कव्यं च ब्रूयात् रक्षस्व च क्रमात् दे

त्रि: वे पित्र्ये त्वर्थः तत्रैव वृद्धिः संबंधनामगोत्राणि इदमन्नं ततः स्वधा पितृक्रमादुदीर्ये   म५

ति स्वसन्नाविनिवर्त्तयेत् हस्तेनामुकमन्त्राद्यमिदमन्नमुदीरयन् अत्रान्नदानेन
चतुर्थी स्यादित्यादि विशेषाः पूर्वमुक्ताः अत्र पूर्वोक्तांते ऽत्र पुरूरवामाद्रवचसंज्ञ
का विश्वेदेवा देवता इदमन्नं सपरिकरं हविरयं ब्राह्मणस्त्वाहवनीयार्थे दत्तं दस्यमानं
चातृप्तेः गयेयं भूः गदाधरोयं भोक्ता इदमन्नं ब्रह्म सौवर्णपात्रस्थमन्नमक्षयवटछाया
स्थममुकेभ्यो विश्वेभ्यो देवेभ्यः इदमासनं तद्रूपं परिविष्टं परिवेक्ष्यमाणं चातृप्तेः स्वाहा
नमो न मम इति वह्वृचपरिशिष्टे हेमाद्रौ अनुमतः प्रयोगः एवं पित्रे अमुकगोत्र वसुरूपादे
तन्नन्नाम ते ये ततो ये देवासः इति देवे ये वेह पितर इति पित्र्ये के चिज्जपंति ततोऽपि द्विर्द्वा
चयेत् तत्रैव प्रचेताः अयोशानकरे विप्रे संकल्पाद्विद्धभावणात् निराशाः पितरो यां
ति दैवैः सह न संशयः पारस्करः संकल्प्य पितृदेवेभ्यः सावित्रीमधुमज्जपः स्रा

नि॰सिं॰
२७८

278

द्यं निवेद्यापोशानयुक्तं वैश्वदेवाद्यभोजनं निवेदयेति ब्राह्मणार्पणं कृत्वेत्यर्थः अतएवतत्स्मार
दीपे नत्यागमुक्त्वोक्तं दत्तं हविश्च तत्कर्म विघ्नमेवे समर्पयेदिति प्रयुक्तरत्ने का
र्ष्णाजिनिः अयमस्त्वेन कर्तव्यं पित्र्यं कृत्यमशेषतः अन्नदानादृते सर्वमेवं मातामह
हेष्वपीति तदप्येतत्परं तच्च ब्राह्मणार्पणं हरिदीनाचतुर्भिश्चेति केचित्पठंति धर्मप्र
दीपे ततोन्नं पितृदेवेभ्यः संकल्प्य च यथाविधिः दत्तं यद्दास्यमानं च आत्मने नम
मेति च तथा श्राद्धान्नस्य तु संकल्पो भूमावेव प्रदीयते हस्ते तु दीयमानं तु पितॄणां
नोपतिष्ठते वैश्वदेवस्य वामे तु पितृपात्रस्य दक्षिणे संकल्पोदकदानं स्यान्नित्यश्रा
द्धे यथारुचि प्रचेताः अपोशानं प्रदायाथ सावित्रीं जपेदथ मधुवाता इति ऋचं माध्वि
त्येतत्त्रिकं तथा याज्ञवल्क्यः सव्याहृतिकां गायत्रीं मधुवाता इति ऋचं जप्त्वा यथासुखं
वक्यं भुंजीरंस्ते पि वाग्यताः यथासुखं जुषध्वमिति वाच्ये अत्रिः असंकल्पितमन्ना
द्यं पाणिभ्यां यदुपस्पृशेत् अभोज्यं तद्भवेत् अन्नं पितॄणां नोपतिष्ठते अन्नं दत्तं नगर्ही
याद्याचतोयेन संपिवेत् अपोशाने विशेषः स्मृतिसमुच्चये अपोशानं वामभागे सुरापा
नसमं भवेत् दक्षभागे तु यः कुर्यात्सोमपानफलं लभेत् तथा पुनरापूर्वापोशानं सुरा
पानसमं भवेत् हेमाद्रावत्रिः दत्तेवाप्युपवादत्ते भस्मीयो निक्षिपेद्बलिं तदन्नं निःफलं याति
निराशैः पितृभिर्गतैः केचिदाज्येन कुर्वंति तन्न पायसेन तथाज्येन माषान्नेन तथैव च र
न कुर्याद्बलिदानं तु ओदनेन प्रकल्पयेदिति स्मृतिसारे निषेधात् एवं श्राद्धे निय

राम
२७८

278-A

क्तान्नं ज्ञानाज्ञानप्रच्छन्नं वाप्यादिषु उच्छिष्टाः पितरो यांति पश्यतो नात्र संशयः कात्या
यनः अश्नंस्तु जपेत्सव्याहृतिकां गायत्रीं सकृत् त्रिर्वा रक्षोघ्नीः पौरुषं सूक्तमप्रतिर
थमिति हेमाद्रौ सौरपुराणे ऐंद्रं च पौरुषं सूक्तं श्रावयेद्ब्राह्मणांस्ततः मात्स्यपाद्मयोः
ब्रह्मविष्ण्वर्करुद्राणां स्तोत्राणि विविधानि च इंद्रेशसोमसूक्तानि पावमानीश्च शक्ति
तः मंडलब्राह्मणं तद्वत्प्रीतिकारि च यत्पुनः अभावे सर्वविद्यानां गायत्रीं जपमा
चरेत् पृथ्वीचंद्रोदये ब्राह्मे वीणां वंशध्वनिं चास्य विप्रेभ्यः सन्निवेदयेत् जपेच्च पौरु
षं सूक्तं नाचिकेतत्रयं तथा त्रिमधु त्रिसुपर्णं च पावमानीर्यजूंषि च हेमाद्रौ अत्रिः
हुंकारेणापि यो ब्रूयाद्धस्तेनापि वदेद्गुणान् भूतलात्तोद्धरेत्पात्रं मंचेद्धस्तेन वापि
वेत् प्रौढपादो बहिः कक्षो बहिर्जानुकरोऽपि वा अंगुष्ठेन विनाश्नाति मुखशब्देन वा पु
नः पीतावशिष्टं तोयानि पुनरुद्धृत्य वा पिबेत् खादित्वार्धं पुनः खादेन्मोदकानि
फलानि च मुखेन वा धमेदन्नं निष्ठीवेद्भाजने पि वा इत्थमश्नन् द्विजः श्राद्धं हत्वा याध
त्यधोगतिं जाबालिः दृष्टमुष्णं हविष्यं च दद्यादन्नं शनैः शनैः वृद्धशातातपः अ
पेक्षितं याचितं वा श्राद्धार्थमुपकल्पितं तथा च नेद्विजो मूढः स भवेत् पितृघातकः
पन्नयमः श्राद्धे द्विजो नैव दद्यान्न याचेन्न च दापयेदिति तदसंपादितवस्तुविषयमि
ति हेमाद्रिः हारीतः ऊर्ध्वपाणिश्च विहसन्सक्रोधो विस्मयान्वितः भग्नपृष्ठश्च यद्भु

क्तेन तत्स्पृशेत्पाणिना वै पितृ[illegible]न प्रचेताः न स्पृशेद्वामहस्तेन भुंजानोऽन्नं कदाचन न पादौ
न शिरो वस्तिं न पदा भाजनं स्पृशेत् रौरवः अशुद्धं पन्नं चान्नं भुंजानो ब्राह्मणोत्तम स्त्रगणांस्पृ
शेत् नदन्नमन्त्यजन्न भुक्त्वा गायत्र्यष्टशतं जपेत् उशनाः भोजनं तु न निःशेषं कुर्यात्प्रा
ज्ञः कथंचन अन्यत्र दध्नः क्षीराद्वा क्षौद्रात्सक्तुभ्य एव च ब्राह्मे न चाम्यापानीयं जातु न
शुष्कां गिरिमीरयेत् न चोच्छिष्टं क्षेत भुंजानान्न च कुर्वीत मत्सरं यमः स्वाध्यायं श्रावयेत्स
र्वधर्मशास्त्राणि चैव हि प्रचेताः भुंजानेषु तु विप्रेषु जपेदृग्यजुः सामलक्षणं।
जयेदभिमृश्य वा भुक्त्वापि श्रद्धैव विशेषतः पञ्चर्षि चैव तिदं[illegible] राक्षोघ्नीश्चरणं वे
च राक्षोघ्नी कृणुष्व पाजः कौष्माण्डमित्यादयः तत्रैव निगमः भुंजत्सु जपेत्पावमानी रुद्री
र्ताम ध्वन्नवीतीश्च[illegible]न वन्त्यः पितृन् स्तोषामिति पृथ्वीचंद्रोदये भरद्वाजः भुंजा
नेषु तु विप्रेषु प्रमादात्प्रवतेत् यदं पादकृच्छ्रं ततः कृत्वा अन्यं विप्रं नियोजयेत्
स्नानपानाद्यादि दत्वेत्यर्थः विप्रवमने तत्रैव दक्षः निमंत्रितस्तु यः श्राद्धे भोजने मुखव
निस्रते तदैव होमं कुर्वीत स्वाग्नौ विप्रः समाहितः प्राणादिपंचभिर्मंत्रैः षोडश द्वात्रिं
शे सरस्वपाः ब्राह्मणस्तु ततः कृत्वा घृतप्राशनमाचरेत् अरविंदविधानेन ईशाय
सामस्तेनेन प्राड्विप्रो यदा भवेत् अग्न्यादिभिर्भोजनेन श्राद्धं संपूर्णमेव हि त्व
त्तं अग्न्यादिभिरिति लौकिकाग्निस्थापनचरुनिर्वापाद्याज्यभागांतेनामगोत्र

279-A

एवं मध्येनोपितृनावाह्यसंपन्नान्नत्यागं कृत्वापृथ्व्यादिभि द्वात्रिंशदाहुतीर्हुते
दित्यर्थः भोजनेनपुनः श्राद्धेन तेन होमः पुनः श्राद्धं चेतिपक्षद्वयमुक्तं स्तत्र जज
पक्षभयानुगतः स्मृतिसंग्रहे प्राधान्यं पिंडदानस्य भोजनस्य तदंगता अतो मुक्ति
क्रियाहानौ श्राद्धावृत्तिर्न मन्यते पिंडदानोत्तरं वांतो होम एव नावृत्तिः पिंडदाना
त्प्राग्वांतो तद्दिने उपवासं कृत्वापरेद्युः पुनः श्राद्धं कार्यमित्यर्थः तत्रैव श्राद्धपर
कौतु भुंजानो ब्राह्मणो वमते यदि लौकिकाग्निं प्रतिष्ठाप्य श्राद्धशेषं हुताशने
तथा एकादशे वा यदा विप्रो भोजने छर्दितो यदि तु देवाग्निं समाधाय होमं कुर्याद्यथा
विधि द्वितीयपक्षो ऽपरविधाने स्मृतिसंग्रहे अकृते पिंडदाने तु पिता यदि वमेत
दा पुनः पाकं प्रकुर्वीत श्राद्धं कुर्याद्यथाविधीति तत्रैवोक्तेः तथा पितृश्राद्धांगत्र
याणं हि पिता वमते यदि तद्दिने चोपवासः स्यात्पुनः श्राद्धं परेहनि तथा वामने
चाविरेके वा तद्दिने परिवर्जयेत् इदं मासिकाद्विकाविषयं दर्शादौ तु वांतावा
मेन तदेव कार्यं श्राद्धविघ्ने द्विजातीनामामश्राद्धं प्रकीर्तितं अमावास्यानियतंमा
ससंवत्सराहते इति मरीचिस्मृतेः श्राद्धे पिंडदानमेव प्रधानमिति कर्काचार्याः
तन्मते दक्षोक्तो होम एव नावृत्तिः विप्रभोजनमिति मेधातिथिः भोजन पिंडदा
नाग्नौ करणानीति कल्पतरुद्धर्त्तिस्वामि हेमाद्र्यादयः तन्मते पूर्वोक्तो निर्णयः

नि.सिं.
२८०

280

अन्नत्यागमात्रं प्राधान्यं भोजनं तु प्रतिपत्तिरूपमंगं अतो वांतौ तद्दानेपि नावृ-
त्तिरिति मेधातिथ्यादयः श्राद्धस्य यागदानोभयरूपत्वात्संपूर्णदानाभावात् भो-
जनस्यांगत्वेपि सोमवमने इव पुनर्नैमित्तिकविधानमिति युक्तं प्रतीमः अत्रेदं तत्त्वं
वैश्वदेविकस्य वमने होम एव नाहुतिः अंगत्वात् तच्च रक्षार्थमित्यादि द्विस्त्रैद्धहुते
रक्षा वित्यादि स्मृतेश्च तत्र जपान् जुहुयादितिवत् पितामहादेरपि तथा पितृत्व-
हैरिति केचित् तस्यापि प्रधानत्वापत्तेर्वदितिन्न युक्तं सपिंडीकरणादौ वार्षिक-
वत् सपिंडीकरणादीनि यानि श्राद्धानि षोडश तत्र पिंडप्रधानत्वं प्रेतत्वविनिवर्ति-
कमिति स्मृतेः महैकोद्दिष्टादौ तु भयप्राधान्यात्तदावृत्तिरेव एकादशाहे भोज्यः
पिंडोप्येको विधीयत इति स्मृतेः वृद्धिसंकल्पनित्यश्राद्धादौ तु भोजनप्राधान्याद्वां-
तौ आवृत्तिरेव वृद्धिश्राद्धे विकल्पेन पिंडदानं बुधैः स्मृतं नित्यश्राद्धमदैवं स्यात्
पिंडदानविवर्जितं इति स्मृतेः भुक्तिक्रियायाः प्राधान्यं श्राद्धे संकल्पसंज्ञके तत्रैव
पित्र्य विप्रस्य तत्प्रधानं पुनः क्रियेति संग्रहोक्तेश्च माघादावप्येवं तीर्थमहालयादौ
दर्शवदित्यादि त्यागार्का समालोचनेन प्रतीमः आश्वलायनः तृप्तान् ज्ञात्वा मधुम-
तीः श्रावयेदक्षत्यमीमदंतेति च संपन्नं दायप्रदन्नमपभुक्तं ततः स्थालीपाके-
न सह पिंडार्थमुद्धृत्य शेषं निवेदयेदभिमतमनुमते चेति अत्र गायत्रीमाधित्ति-

राम
२८०

280-A

त्रिकं जपेज्ज्ञेयः तच्छ्रान्नं बुध्वा पुनरादाय सतिलं पूर्ववज्जपेदिति प्रचेतसोक्तेः व्यासः
तृप्ताः स्थेति तु पृच्छेत्ते ब्रूयुस्तृप्ताः स्म इत्यर्थः अभिमते विप्रैः स्वीकर्तुं मिष्टे सौ
नकोपि अन्नशेषैश्च किं कार्यमिति पृच्छेत्तांस्ततः तैरुक्तेः सह भोक्तव्यमिति प्रत्यु
त्तरमेवं प्रष्टुः सकलं तस्मै स्वीकुर्युर्वा पयारुचिश्राद्ध विशेषे प्रश्नभेदमाह हेमा
द्रौ विष्णुः पित्र्ये स्वदितमिति गोष्ठे सुसृतं संपन्नमित्यभ्युदये दैवे रोचत इत्या
युष्यमिति शैवे रिषु रैवेरमि छाश्राद्धे याज्ञवल्क्यः अन्नमादाय तृप्ताः स्थ शेषं चैवा
नुमान्य च तदन्नं प्रकिरेद्भूमौ दद्याच्चापः सकृत्सकृत् इदं चात्र विकिरदानमन्यशा
खिनं आश्वलायनानां तु पिंडांत एव सूत्रकृतोक्तेः कात्यायनस्तु विकिरोत्तरं गाय
त्र्यादि जपं कृत्वा मधुप्रश्नं वा आह हेमाद्रौ देवलः ततः सर्वाशनं पात्रे गृहीत्वा विविधं बुधः
तेषामुच्छिष्टस्थाने विकिरं भुवि निक्षिपेत् माधवीये प्रचेताः सर्ववर्णिकमाद्य
पये अवनीति भुवि क्षिपेत् स च कुशे कार्यः दर्भेषु विकिरश्च यस्तूक्तेः मंत्रः काती
यः अग्निदग्धाश्च ये जीवा येप्यदग्धाः कुले मम भूमौ दत्तेन तृप्यंतु तृप्ता यांतु प
रां गतिमिति अन्येत्तु असोमपाश्च ये देवा यज्ञभाग विवर्जिताः तेषामन्नं प्रदास्या
मि विकिरं वैश्वदेविकं इति हेमाद्रौ गोभिलोक्तेः न दैवे असंस्कृतप्रमीता ये त्यागि
नो याः कुलस्त्रियः दास्यामि तेभ्यो विकिरमन्नं तोयमप्रस्थितं केमित्यग्निपुराणोक्ते नर
पित्र्ये त्वं विकीर्येपि अग्निदग्धा इत्युच्छिष्टपिंडं कुशोपरि प्रदद्यादित्युक्तेः पृथ्वी

नि॰ सिं॰
२८१

281

चंद्रोदयेप्येवंव्याख्याते ततः प्रक्षाल्य हस्तौ च द्विराचम्य हरिं स्मरेत् माधवीये गौतमः वि
करमुच्छिष्टे प्रतिपादयेत् हेमाद्रौ व्यासः उच्छिष्टैरेव विकिरं सदैव प्रतिपादयेत् भृगुः
पिंडवत्प्रतिपत्तिः स्याद्विकिरस्येति तौ त्वलिः श्राद्धकाशिकायां यजमानस्य दासादीनु
द्दिश्यं द्विजसत्तम तस्माद्दन्ते त्वजन्तेडुसौवाम भागेषु पैत्रके मनुः उच्छेषणं भूमिगत
मजिह्मस्याशठस्य च दासवर्गस्य तत्पित्र्ये भागधेयं प्रचक्षते विष्णुः उदङ्मुख एवाचम
नमादौ दद्यात्ततः प्राङ्मुख एव अपि भेदे दैवे त्वित्यर्थः शातातपः विश्वेदेवनिविष्टानां वरं म
हस्तधावने हेमाद्रौ वाराहे हस्तप्रक्षाल्य[illegible]म आपः विवेक्तस्याद्द्विजः सदा तदन्नमसु
रैर्भुक्तं निराशाः पितरो गताः मरीचिः हस्तप्रक्षाल्य गंडूषं वपः पिवेद्विचक्षणाः
असुरं तद्भवेच्छ्राद्धं पितॄणां नोपतिष्ठति तत्रैव संग्रहे पवित्रं ग्रंथमुत्सृज्य मंड
ले भुवि निक्षिपेत् हस्तादीन् क्षालयेद्विद्वान् शरावादौ तु कुत्रचित् व्यासः तांबूला
हिरण्यं चैव गंडूषो क्षिरण्णं तथा कांस्यपात्रेण पानाम्येन कुर्वीत कदाचन उद्यमाद
के धान्यचूर्णैः करौ रमम्रुणि शोधयेत् अथ पिंडदाने तत्रार्चनोत्तरमग्नौकरणो
त्तरं विकिरोत्तरं स्वधावाचनोत्तरं विप्रविसर्जनोत्तरं वेति हेमाद्रौ स्मृतिषु पक्षा उ
क्ताः तेषां शाखाभेदेन व्यवस्था प्रेतश्राद्धेषु पूर्वमन्येषु भोजनोत्तरमिति चंद्रि
कामाधवौ सर्वत्र भोजनोत्तरमिति वाह्वृचः आश्वलायनः भुक्तवत्स्वनाचां

281-A

तेषु पिंडान्निदध्यादाचांते स्वके भक्तवत् स्वेति पूर्वं निषेधात्। साग्निरतिप्रणीत
समीपे नाग्निर्द्विजसमीपे हेमाद्रौ जातूकर्ण्यः व्याममात्रं समुत्सृज्य पिंडांस्तत्र प्रद
पयेत् प्रसारितभुजांतरं व्यासः संकटे तु व्यासः अरत्निमात्रमुत्सृज्येति यत्तु तत्रैव
सिकताभिरुदावापि वेदी दक्षिणाग्निसमुद्गतेति तदन्यशाखिपरं देवलः ततस्तैरभ्यनुज्ञातो द
क्षिणां दिशमेत्य च चंद्रिकायां पिंडनिर्वपणं कार्यं कुशाभावे विचक्षणैः काशेषु राजदूर्वासु
पवित्रेषु परमेष्विति आश्वलायनः स्फेन लेखामुल्लिखेदपहता असुरा रक्षांसि वेदिषद इति नाम
मुक्त्वा सकृदाच्छिन्नैरवस्तीर्य प्राचीनावीती लेखां त्रिरुदकेनोपनयेत् शुंधंतां पितरः शुंधं
तां पितामहाः इति तस्यां पिंडान्निपृणीयात् पराचीनेन पाणिना पित्रे पितामहाय प्रपिता
महायेति तन्त्रे सौये वत्सा मध्वानमिति हेमाद्रौ पारस्करः करांभ्यामुल्लिखेत् स्फेन कुशैर्वा
पि मंत्रौ द्विज वह्नृचानां कर्णेन वा लेखां चाग्नेय्यभिमुखे वाग्निहतिः दक्षिणाप्राचीवेदसु
ऊ इत्यायस्त्वान्के देवलः आवाह्य पितृनादौ भोगैस्तेषां स्थानानि कल्पयेत् ते प्रा
सीनेषु पात्रेषु प्रयच्छेत् सतिलोदकं पराचीनेन मृषितर्पणेन वायवीये मधुसर्पिर्भ्यां स्ति
लमुक्तं स्त्रीत्पिंडान्निर्वपेद्बुधः त्रिस्थलीसेतौ तिलमंत्रेच पानीयं धूपं दीपं पयः समाप्य
मधुसर्पिः खंडयुक्तं पिंडमष्टांगमुच्यते याज्ञवल्क्यः सर्वमन्नमुपादाय सतिलं द
क्षिणाभिमुखः उच्छिष्टसन्निधौ पिंडान् दद्याद्वै पितृयज्ञवत् केचित्तु पिंडेषु मायान्

वर्जयेति माषाः श्राद्धेषु वैराग्याद्यावर्ज्याश्चैवाग्निपिंडयोः त्वाम्नायेपयामसंतनयामा
योग्निपिंडयोः इति स्मृतिसारात् माषान्सर्वत्रैव दद्यात्पिंडे ग्नौ च विवर्जयेत् इति
स्मृतेश्च अथ मलंलेचितं हेमाद्रौ वापि पार्वणशब्दस्य प्रकृत्यार्थत्वात्सर्वान्नग्रहणेषु कर्म
अत्र शेषमन्नमनुज्ञाप्य सर्वमन्नमेकत्रोद्धृत्योच्छिष्टसमीपे दर्भेषु त्रीस्त्रीन्पिंडान् द
द्यादिति गोभिलसूत्रे सर्वस्मात्प्रकृतादन्नात्पिंडान्मधुतिलान्वितानिति च शाखानिय
मात्तदभावे पिंडनिवृत्तिरिति मैथिलवाचस्पतिः तन्न तुषोपवापवत् परयुक्तद्र
व्यस्येष्यर्थकर्मत्वाद्गुणानुरोधेन प्रधानत्यागाच्च शेषलोपे विद्यमानद्रव्यांतरेण कार्यसि
द्धेतानेयप्रतिपत्तिः किंतु प्रधानमित्युक्तं प्राक् अन्यथा सपिंडीकरणादौ संयो
जनादेः प्रधानस्य लोपापत्तेरिति दिक् अथ पिंडप्रमाणं हेमाद्रौ वंगिराः कपि
त्थबिल्वमात्रान्वा पिंडान्दद्याद्विधानतः कुक्कुटांडप्रमाणान्वामलकैर्बद
रैः समानिति तत्रैव धर्मः कपित्थस्य प्रमाणेन पिंडान्दद्यात्समाहितः तन्त्र
मविकरं दद्यात्पिंडं तेषु षडंगुले अंत्येष्टिपद्धतौ भट्टास्तु एकोद्दिष्टे सपिंडे च
कापित्थं तु विधीयते नालिकेरप्रमाणं तु प्रत्यब्दे मासिके तथा तीर्थे दर्शे च संप्रा
प्ते कुक्कुटांडप्रमाणतः महालये गयाश्राद्धे कुर्यादामलकोपमम् इत्याहुः क
लिकायामाचार्यः यत्रस्युर्बहवः पिंडास्तत्र बिल्वफलोपमाः यत्र चैको भवे

282-A

त्पिंडस्तत्र खर्जूरसन्निभः प्रेतपिंडस्तु दैर्घ्येण द्वादशांगुल उच्यते इति वायवीये प
त्नी पिंडास्तु मध्यमीया त्रिवर्गस्य सहायिनी हेमाद्रौ लौगाक्षिः महालये गयायां च प्रेत
श्राद्धे दशाहिके पिंडशब्दप्रयोगः स्यादत्र मन्यत्र कीर्तयेत् शाट्यायनिः असावेत
त्ते इत्युक्त्वा तदंते च स्वधा नमः असावित्यत्र संबंधरूपगोत्रादिविशिष्टं पित्रादि
नाम संबुध्यंतमुक्त्वा पुनश्चतुर्थ्यंतं तदंते वं पिंडइदं मंत्रं वा स्वधा नमेति वदेदिति
हेमाद्रिः पित्रादिनामान्युक्त्वा पस्तंबः यदि नाम न विद्यात् स्वधा पितृभ्यः पृथि
विषद्भ्य इति प्रथमं पिंडं दद्यात् स्वधा पितृभ्योंतरिक्षसद्भ्य इति द्वितीयं स्वधा पि
तृभ्यो दिविषद्भ्य इति तृतीयं एवं मातामहेभ्यश्च मातृभ्यश्च वह्वृचानां तु प्राक् क
लिकायां स्मृतिः यावद्वेदोच्चरेन्मंत्रं तावत्प्राणान्निरोधयेत् येषां तु गर्भे दर्शे मा
तृश्राद्धं पृथगुक्तं तेषां पितृभ्यः पश्चिमे मातृभ्यः तत्पश्चिमे मातामहेभ्यः पिंडादि
देयमिति शांखायनः अस्मिन्पक्षे तत्पश्चिमे मातामहीभ्योपि दद्यादिति हेमाद्रिः
पूर्वेषु पितृभ्यो दद्यादपरासु स्त्रीभ्य इति सूत्राच्च एवं यत्र तीर्थमहालयादौ केचि
दिच्छंति नारीणां पृथक् श्राद्धममर्षयन्त इति चतुर्विंशतिमतात् पित्रादिनवदैवत्यं
तथा द्वादशदैवतमिति विष्णुपुराणाच्च मातॄणां पृथगुक्तं पत्नी वा आचार्यगु
रु शिष्येभ्यः सखिज्ञातिभ्य राधवां तत्पत्नीभ्यश्च सर्वेभ्यस्तथैव च जलांज

नि॰ सिं॰
२८३

283

त्रीन् पिंडांस्तेभ्यः सदा दद्यात्पृथक् तान् पदे नरः तीर्थेषु चैव सर्वेषु माघमासे
मघासु चेति चतुर्विंशतिमते दौहित्रपुत्रराशश्च येकनिष्ठाः सहोदराः निःसंतानाना
म तान् येच तेभ्योप्यत्र प्रदीयते इति भविष्ये चैकोद्दिष्टान्युक्तानि तत्रापि तत्पत्नि
मे पिंडदानं त्रेयं तेषां न पृथक् ते सपत्नीकाः पित्रादयो वाच्याः अन्वष्टकागयामा
तृश्राद्धं चैवमतेस्म नि एकोद्दिष्टं तथा मुक्तास्त्रीषु नान्यत पृथग्भावो दत्ति शारवा
क्रेष्व मनुः तेषु दर्भेषु तं हस्तं निमृज्याल्लेपभागिनां हस्तलेपाभावे पि हस्तं निमृ
ज्यादेवेति मेधातिथिः विष्णुः अत्र पितरो मादयध्वमिति दर्भमूले कराव घर्ष
णं कालिकायां तु मतः एकोद्दिष्टे कुर्वीत तु दर्भे लेपान विद्यते सपिंडीकरणा
दौ तु लेपः सर्वत्र शस्यते मनुः आचम्योदक् परावृत्य त्रिरायम्य शनैरसून् षडृ
तूंश्च नमस्कुर्यात् पितॄनेव च मंत्रवत् उदकं निनयेच्छेषं शनैः पिंडांतिके पुनः त्रिः प्रा
णायामं कृत्वेति मेधातिथिः अमंत्रं प्राणं निरुध्येति काकीयाः मंत्रवत् वसंताय
नमः नमो वः पितर इत्याद्यैः शेषं पूर्वावनयन शेषं आश्वलायनः निमितानन्नु मं
त्रयेतान् पितरो मादयध्वं यथाभागमावृषायध्वमिति सव्यावृदुदगावृत्य यथा
शक्त्यप्राणान् आसित्वा मियमीमहत्या मीमदंत पितरो यथाभागमावृषायीषत पितरो
प्राणभक्ष्यं भक्षयन्त्वित्यं निनयनिमिति नित्यग्रहणं शेषाभावे पि कुर्यादित्य

एकम
२८३

र्थः शौनकः अप्येवामत्र पितर इत्याधेनानुमंत्रणं अमीमदंतेत्याद्येन मंत्रेणाप्य
नुमन्त्र्य तान् पिंडशिष्टाच्चैरारात्रं किंचिदाघ्राय तत्यजेत् प्रक्षाल्याचम्य संध्यं नामि
मार्घेरेव पूर्ववत् कृत्वावनेजनं कुर्यात्पिंडपात्रमधोमुखं एतत्कात्यायनीयानां १
आचार्यः ततः सव्यांगुष्ठाचम्यनीवीं विस्रस्य वाग्यतः आश्वलायनः असावभ्य
ङ्क्ष्वासावंक्ष्वेति पिंडेष्वभ्यंजनांजने वासो दद्याद्दशामूर्णास्तुकां वा चाशद्वर्षेत्तायां
ऊर्ध्वं खं लोम तद्वः पितरो वासो मा नोतोन्यत्पितरो युङ्ध्वमिति स्मार्तं चिंतामणौ ब्रा
ह्मे एतद्वः पितरो वास इति जल्पन् पृथक्पृथक् अमुकामुकगोत्रैतत्तुभ्यं वासः पठेत्
बुधः छंदोगानां एतद्व इति सूत्रात् लिंगातिपिंडमिति तत्सूत्रात् हेमाद्रौ ब्राह्मे अभ्य
मरकुक्षेक कुर्यादंजनं नित्यमेवाहि तैलं क्षप्ततिलेभ्यस्तु दद्याद्भ्यंजनं हितत् त्रैक
कुदं इति प्रसिद्धं अंजनं प्राप्यमध्यमायस्तं वादिविषयं तत्रैव व्याघ्रः गंधपुष्पाणि
धूपं च दीपं च विनिवेदयेत् देवलः दक्षिणां सर्वभोगांश्च प्रतिपिंडं प्रदापयेत् म
स्याण्यपरजानिक्षंस्त्रं अंजनात्यशनानानि च तत्रैव शंखः यत्किंचित्पच्यते गेहे
भक्ष्यं भोज्यमगर्हितं अनिवेद्य न भोक्तव्यं पिंडमूले कथंचन एतत्सव्येनेति
केचित् युक्तं चापसव्येन मनुः अवजिघ्रेच्च तान् पिंडान् यथान्युप्तान् समाहि
तः ततो नमो वः पितर इषे इत्यादिनोपस्थानं मात्स्ये अथाचांतेषु वाचम्य वा

रिदद्यात्ततः कृत्वा सकृत्तिलपुष्पाक्षतान्यस्मादक्षय्योदकमेव च अत्र दैवे सव्यं पि
त्र्ये त्वपसव्यमिति कर्कः परिभाषोक्तवचनात् सव्यमिति युक्तं अत्र शिवा आ
पः शांत सौमनस्यमस्त्वित्यादिप्रयोगो ज्ञेयः मात्स्ये दत्वाशीः प्रतिगृह्णीयाद्द्विजेभ्यः
प्राङ्मुखो बुधः अघोराः पितरः संतु संत्वित्युक्तः पुनर्द्विजैः गोत्रं तथा वर्धतां नस्तथेत्युक्तः
स तैः पुनः दातारो नोभिवर्धंतामन्नं चैवेत्यादि कार्यं हेमाद्रौ बृहस्पतिः भाजने
षु च तिष्ठत्सु स्वस्ति कुर्वंति ये द्विजाः तदन्नमसुरैर्भुक्तं निराशैः पितृभिर्गतैः जा
तूकर्ण्यः पात्राणि चालयेच्छ्राद्धे स्वयं शिष्योथवा सुतः न स्त्रीभिर्न च बालेन नासज
जात्या कथंचन याज्ञवल्क्यः स्वस्तिवाच्यं ततः कुर्यादक्षय्योदकमेव च तत्रैव
वृद्धशातातपः पितृणां नामगोत्रेण करे देयं तिलोदकं प्रत्येकं पितृतीर्थेन अक्ष
य्यमिति मास्त्विति अत्र षष्ठी प्रागुक्ता तत्रैव नागरखंडे उत्तानमर्घ्यपात्रं तु कृत्वा दद्या
द्दक्षिणां हिरण्यं देवतानां च पितृणां रजतं तथा बृहस्पतिः तस्माद्यल्लंकाकि
नीवाफलं पुष्पमथापि वा प्रदद्याद्दक्षिणां यत्नात्तया स सफलो भवेत् अन्ने पित्रुद्देशे
न दक्षिणादानेऽपसव्यं विप्रोद्देशेन तु सव्यमिति माधवः कालिकायामाचार्यः द
द्यात्तु यज्ञोपवीत्येव तांबूलं दक्षिणां तथा अत्रिः वदेच्चतांस्ततो विप्रान्पित्रादिभ्यः
स्वधोच्यतां गोभिलः अघोराः पितरः संत्वित्युक्ते स्वधां वाचयिष्य इति पृच्छ(

ति पितृभ्यः स्वधोच्यतामित्युक्ते स्तु स्वधेत्युच्यमाने धारां दद्यादूर्जं वहन्तीरिति आप
स्तंबेन तु पुत्रान्पौत्रानभितर्पयन्तीरित्यपि परिषेचने मंत्र उक्तः आश्वलायनः अ
थैतानुद्वासयेत्परेतना पितरः सोम्यासो गंभीरेभिः पथिभिः पूर्विणेभिः दत्वायास्म(
भ्यं द्रविणेह भद्रं रयिं च नः सर्ववीरं नियच्छतेति मात्स्ये वाजे वाजे इति जपन्कुशा
ग्रेण विसर्जयेत् प्रचेताः स्वस्तिवाच्यं ततः कृत्वा पितॄन्पूर्वं विसर्जयेत् आश्व
लायनः अन्नं प्रकीर्य प्रवीय स्वधेति सृजेद स्तु स्वधेति वा ब्रह्मवैवर्ते आमा वा
जेति मंत्रमनुपठित्वा च प्रदक्षिणं द्वारोपान्ते ततः कृत्वा संयतः प्रविशेद्गृहं प्रांजलिस्त्व
ततः प्राह तान्विप्रान्सत्यवादिनः दातारो नोऽभिवर्धन्तामन्नं चेत्येवं हि एवम
स्त्विति तेऽवं कथयन्ति समाहिताः एतन्मंडलदेशे कार्यमिति हेमाद्रिः मनुः दातारो
नोऽभिवर्धन्तां वेदाः संततिरेव च श्रद्धा च नो माव्यगमद्बहुदेयं च नोऽस्त्विति बौधाय
नः अन्नं च नो बहु भवेदतिथींश्च लभेमहि याचितारश्च नः संतु मा च याचिष्म कंच
नेति अत्र दातारो नोऽभिवर्धन्तामन्नमर्घ्यं याचिष्टमित्याद्यूहेन पठित्वा विप्रैः प्रतिव
चनं कार्यमिति सुदर्शनभाष्ये खाण्डवसदः इति अन्नं प्रकीर्य ब्राह्मणास्तः पित
र इति मंत्रद्वयं च पठन्ति शौनकः ब्राह्मणाननयायातान्परीत्य त्रिः प्रदक्षिणं सस्त्री(
कः स्वजनैः सार्द्धं प्रणमेद्रचितांजलिः केनिष्ठप्रथमाज्येष्ठचरमाः स्युः प्रदक्षिणे
हेमाद्रौ बृहस्पतिः अर्घमेसकफलं जन्म भवत्यादाद्ब्रवेदनात् अर्घमेवंराजाः(

नि॰सिं॰
२८५

285

सर्वपात्ताचोन्नयनाद्धि वै यत्रशाकादिकानेनक्लेशितास्यमीदृशाः तत्क्लेशजातं
विप्रानुविसृज्यपक्षंतमर्हस्य प्रचेताः विसृजेद्ब्राह्मणांस्तत्र सामान्तेचाप्यनुव्रजेत्॥
अथपिंडप्रतिपत्तिः हेमाद्रौब्रह्मांडे पिंडमग्नौसदादद्याद्भोगार्थीप्रथमंनरः पत्न्यैप्र
जार्थीदद्याद्वैमध्यमंमंत्रपूर्वकं उत्तमांगतिमन्विच्छन्गोषुनित्यंप्रयच्छति आ
ज्ञांप्रज्ञांयशः कीर्तिमप्सुपिंडंप्रवेशयेत् प्रार्थयन्दीर्घमायुश्चवायसेभ्यःप्रयच्छ
ति आर्केशंगमयेदप्सुस्थितोवादक्षिणामुखः आश्वलायनः वीरंमेदत्तपितर
इतिपिंडानांमध्यमंपत्नींप्राशयेदाधत्तपितरोगर्भंकुमारंपुष्करस्रजं यथायमर
पाअसदिति भर्त्रादिनास्यआधेनादायच्छितेनप्राशनं अपस्तंबः दानेमंत्रमा
दस्याञ्चावधीनांरसंप्राशयामिभूतकृतंगर्भंधत्तचेतिमध्यमंपत्न्यैप्रयच्छती
तिप्राशनेपिपयेत्पुत्रंभवत्वेषअसदितितदीयःपाठः अन्येषांतत्त्वघ्राणंवायाज्ञिय:
तत्रैवशंखः पत्नीवामध्यमंपिंडंमश्नीयादात्तंवाप्यविता कलिकायांछागलेयः
प्राचीनावीतमाप्य मंत्रअपत्नीपिंडोचिभज्यते प्रतिपत्तस्यमंत्रस्यकर्तव्याद्वृत्ति
रत्रतु माधवीयेविष्णुधर्मे तर्पयेत्श्राद्धेसदापिंडान्क्षिपेत्तीर्थेसमाहितः याज्ञव
ल्क्यः पिंडस्तुगोजविप्रेभ्योदद्यादग्नौजलेपिवा बृहस्पतिः अन्यदेशगतायाप॥
तीरोगिण्यागर्भिण्यातथा तदातंजीर्णंहायभस्याभोवाभोक्तुमर्हति अथपिंडे।

राम
२८५

285-A

पघाते हेमाद्रौ प्रायश्चित्तकांडे देवलः श्वसृगालखरैः पिंडः स्पृष्टो भिन्नः प्रमादतः ।
कर्तुरायुर्धननाशः स्यात्पितृंस्तेनोपसर्पति जातूकर्ण्यः पूर्वश्लोकांते तद्दोषपरि
हारार्थं प्राजापत्यं कल्पयेत् पुनः स्नात्वा तदा कर्त्ता पिंडं कुर्याद्यथाविधि काकस्पर्शे
तुनदोषः पिंडोपयातं प्रक्रम्य धनस्य च विनाशः स्यात्काकस्पर्शादिकं विनेति तत्रै
व श्लोके गौतमोक्तेः स्मृतिर्दर्पणोक्तेः मार्जारमूषकस्पर्शे पिंडे च विदलीकृते पुनः
पिंडप्रदानं व्याप्तं तेन पाकेनात्तत्क्षणात् बोधायनः श्वचंडालादिभिः स्पर्शः पिंडो यद्य
पहन्यते प्राजापत्यं चरित्वाथ पुनः पिंडं समाचरेत् बोपदेवोप्येवमाह दिनांतरेतु
प्राजापत्यमात्रं शेषप्रतिपत्तिः तेन पिंडाहं नैमित्तिकानाभावादिति मैथिलाः तन्न सपिं
डीकरणादौ शेषमासे तोसंजनादिलोपापत्तेः तेन वचनाद्दमने इवात्रापि तन्मा
त्रपिंडदानावृत्तिः अत एव न च नक्तं श्राद्धं कुर्वीत आरब्धे चा भोजनसमापनादि
त्यापस्तंबसूत्रे रात्रौ भोजनमात्रं पूर्वेद्युः कार्यं श्राद्धसमाप्तिस्तु परदिन एव
समाप्यिष्यते तं कर्तुं रूपवासश्चेति हरदत्तेन व्याख्यातं तस्मात्पाकांतरेण
पिंडदानमात्रं कार्यं अथापिंडनिषिद्धकालः स च प्रयोगे मदालयादिनिर्णये
एवमुक्तः हेमाद्रौ बृहस्पतिपराशरः युगादिषु मघायां च विषुवत्ययनेत्यया ।
मरणे भृगुव कुर्वीत पिंडनिर्वपणं नहि स्मृतिरत्नावल्यां पुत्रजाते व्यतीपाते

ग्रहणे चंद्रसूर्ययोः श्राद्धं कुर्यात्प्रयत्नेन पिंडनिर्वपणादृते तत्रैव कात्यायनः व
र्द्धेरनंतरं चैव यावन्मासः समाप्यते तावत्पिंडं नैव दद्यान्न कुर्यात्तिलतर्पणं बौ
धायनः संस्कारेषु तथान्येषु मासं मासार्धमेव च तथा भानौ भौमे त्रयोदश्यां
नंदाभरणीमघासु च पिंडदानं मृदा स्नानं कुर्यान्न तिलतर्पणं त्रिस्थलीसेतौ का
र्ष्णाजिनिः विवाहव्रतचूडासु वर्षमर्धं तदर्धकं उत्तरार्धे प्राग्वत् वृद्धिमात्रे(
तथान्यत्र पिंडदानानि राक्रियाः कृत्वा गर्भादिभिः संस्कारैः मासमेकं तु कर्मिणां हे
माद्रौ ज्योतिःपराशरः विवाहे विहिते मासास्त्यजेषु द्वादशैव हि सपिंडनिर्वापमौ
जीवं षंडे वधि न त्रैव महालये गयाश्राद्धे मातापित्रोः क्षये हनि यस्य कस्यापि
मर्त्यस्य सपिंडीकरणे तथा कृतोद्वाहोपि कुर्वीत पिंडनिर्वपणं सदेति मातापि
त्रोरिति क्षयाहविशेषणं हविलंभ यत्र च दा विवक्षितं तेन भ्रातृपितृव्यादिवार्षि
केपि पिंडदानं कार्यमिति केचित् सपिंडीकरणं नवश्राद्धं षोडशश्राद्धोपलक्ष
णार्थमिति निर्णयामृते उक्तं क्षयाहे विशेषः संग्रहे मातापित्रोराब्दिके तु विवा
हादिषु सर्वदा तिलैश्च पिंडं प्रदातव्यं अन्यश्राद्धे विवर्जयेत् अत्र मूलं चिंत्यं रा
मकौतुके नंदासु कामः [illegible] ख्यारंभगवाक्ति पितृकालभे गंडे वैधृतिपाते च पिं
डसत्याज्याः सुतैस्तुभिः विश्वरूपनिबंधे तिथिवारप्रयुक्तो यो दोषो वै सम्

दाहृताः सश्राद्धे नत्रिमिते स्यात्तन्नान्यश्राद्धे कदाचन अन्यन्नक्तं प्राक् उच्छिष्टोद्वास
नमाह हेमाद्रौ वशिष्ठः श्राद्धे नोद्वासनीयानि उच्छिष्टान्यादिनक्षयात् श्चोतंते वै सु
धाधारास्ताः पिबंत्यकृतोदकाः व्यासः उच्छिष्टं न प्रमृज्यात्तु यावन्नास्तमिते रवि इ
दं गृहांतरसत्वे एकगृहे तु मनुः उच्छेषणं तु तत्तिष्ठेद्यावद्विप्रा विसर्जिताः ततो गृ
हवलिं कुर्यादिति धर्मो व्यवस्थितः वलिं वैश्वदेवादि नित्यकर्मेति मेधातिथिः व्रस्तां
३ अग्राय च व्रतपेताय श्राद्धोच्छिष्टं न दापयेत् तथा कामं दद्याच्च सर्वं तु शिष्याय च सुता
यच भोक्तुरिति शेषः जातूकर्ण्यः द्विजभुक्तावशिष्टं तु तच्चैव भूमौ निखानयेत् अप्य
वैश्वदेवादिः अत्र मासकः श्लोकः श्राद्धे नाग्निककार्यं कोऽपि करणान्यश्राद्धे तु हेति वि
लिस्वं चेत्स्याद्यवा भवेद्धि करतः पश्चात्प्रयत्नेऽपि चैः श्राद्धांते च पवामहालय वि
भावूर्ध्वं भुंजे स्यात्तत्क्षयेऽत्वं ते मासश्च मध्यतः अभविधावादौ तथा साग्निके अस्या
थेः साग्नेय पचक पाके सर्वत्रादौ वैश्वदेवः पक्षांते कर्मनिर्वर्त्य वैश्वदेवं च साग्निकः
पिंडयज्ञं ततः कुर्यात्ततो न्वाहार्यकं बुधः पित्र्यर्थे निर्वपेत्पाकं वैश्वदेवार्थमेव च वैश्व
देवेन पित्र्यर्थं न दार्शे वैश्वदेविकं मिति लौगाक्षिस्मृतेः अत्र साग्निक आहिताग्निरि
ति हेमाद्रिः श्राद्धात्प्रागेव कुर्वीत वैश्वदेवं तु साग्निकः एकादशाहिकं मुक्त्वा तत्र ह्यंते
विधीयते इति हेमाद्रौ शालंकायनोक्तेः अत्र तत्रैव परिशिष्टे संप्राप्ते पार्वणश्राद्धे एकोद्दि
ष्टे तथैव च अग्रतो वैश्वदेवः स्यात्पश्चादेकादशेहनि स्मार्ताग्निमतां तद्राहितानां वाग्ने

नि.सिं.
२८५

987

कारणान्तरं विकरोनंतरं वा होममात्रं पृथक्पाकेन स्मृत्यर्थसारादिनुश्राद्धान्नेनैवं अत्र
मूलं हेमाद्रिचंद्रिकादौ स्पष्टं सर्वेषां श्राद्धान्नेनैवान्यपाकेन वैश्वदेव नित्यश्राद्धादी
नि तृतीयः श्राद्धं निर्वर्त्य विधिवद्वैश्वदेवादिकं ततः कुर्याद्भिक्षां ततो दद्याद्धंतकारा
दिकं तथेति पैठीनसिस्मृतेः ततः श्राद्धशेषात् श्राद्धादि श्राद्धशेषेणैव वैश्वदेवं समाचरे
दिति चतुर्विंशतिमतात् स्वस्यैवं वैश्वदेव कालत्रयस्य आश्वलायन कैशांस्त्वायन परिशिष्टमुद
हृत्यैवं व्यवस्थोक्ता आदौ मध्ये क्षये चांते दर्शे मध्ये महालये एकोद्दिष्टे निवृत्ते तु वैश्व
देवो विधीयते इति बह्वृचस्त्वत्र ज्ञात्वा सर्वेषां श्राद्धान्ते एवेति मेधातिथ्यं तिरण्डावल्या
दयो बह्वृचः वोपदेवस्तु द्विजैः कोरणविसर्जनांते श्राद्धमुक्त्वा उच्छिष्टेतिवितिपूर्वोक्त
मतवाक्योदाहरणेन बह्वृचानां श्राद्धान्त एव मध्यपक्षस्त्वन्यशाखापर इत्याह हेमाद्रि
स्तु बह्वृचपक्षे एव वैश्वदेवमाह कातीयानां तु स्मार्त्ताग्नौ सागिन्मतामादावेवांने
व पाकेनेति कर्कः अन्येषामंते तैत्तिरीयाणां तु सामगानां सर्वत्रादौ वैश्वदेवः पंच
यज्ञाश्रमे चेति सुदर्शनभाष्ये उक्तं अस्य पक्षद्वयस्य पूर्वैव व्यवस्था हेमाद्रौ मा
र्कंडेयः ततो नित्यक्रियां कुर्याद्भोजयेच्च ततोतिथीन् ततस्तदन्नं भुंजीत सह भृत्या
दिभिर्नरः ततः श्राद्धशेषान्नित्यक्रियां नित्यश्राद्धं तत्र पृथक्पाकेन नैत्यकमिति
तेन नैत्यकमिति नैवोक्तैः पाकै वा विकल्पः अथ नित्यश्राद्धं हेमाद्रौ व्यासः एक
मप्याशयेद्विप्रं षण्णामप्यन्वहं गृही अपीत्यनुकल्पः प्रचेताः नावाहनं न होमं

राम
२८७

287-17

चनावाहनं न विसर्जनं न पिंडदानं विकिरं न दद्याद्दत्र दक्षिणां अत्र निर्द्दिरप भोजनपि
त्वात्। किंचिद्दत्वा तु विसर्जयेदिति तेनैवोक्तेः दक्षिणा विकल्पः मदनरत्ने नित्य-
श्राद्धं दैवहीनं नियमादिविवर्जितं दक्षिणारहितं चैव दातृभोक्तृव्रतोहितं नमि-
ति काशीखंडे नत्विरभावपरमिति पृथ्वीचंद्रोदये विष्णुः आवाहनस्वधाकारपिंडाग्नौ-
करणादिकं ब्रह्मचर्यादिनियमा विश्वेदेवान्नैव वा हि एतद्दिनासंभवे रात्रावपि
कार्यं दिवोदितानि कर्माणि प्रमादादकृतानि वै यामिन्याः प्रहरं यावत्तावत्क-
र्माणि कारयेदिति बृहन्नारदीये रात्रौ प्रहरपर्यंते दिवाकृत्यानि कारयेत् ब्र-
ह्मयज्ञं च सौरं च वर्जयित्वा विशेषतः इति पृथ्वीचंद्रधृतसंग्रहोक्तेः अन्नदाशि-
काद्विकाद्यपि रात्रौ स्यादिति वाच्यं दूषणापत्तेः तथा च माधवेनयत्प्रकरणे-
स्य स्पष्टमुक्तं वयं चाग्रे वक्ष्यामः अस्य दिने करणे लोपएव रात्रौ श्राद्धं न कुर्वी-
तेति निषेधादिति पृथ्वीचंद्रः पात्राभावे कोमे उद्धृत्य वा यथाशक्ति किंचिदन्नं
प्रकल्पयेत् तस्य प्रतिपत्तिमाह विष्णुः भिक्षुभावेन्नं गोभ्यो दद्याद्दानोचाप्सु क्षिपेदि-
ति हेमाद्रौ नागरखंडे नित्यश्राद्धं न कुर्वीत प्रसंगाद्यत्र सिध्यतीति श्राद्धांतरे कृते
ऽत्र नित्यत्वात्तत्र साधयेत् षड्दैवदपक्षेत्यर्थः मात्स्ये ततस्तु वैश्वदेवांते
सभृत्यसुतबांधवः भुंजीतातिथिसंयुक्तः सर्वं पितृनिषेवितं सर्वपर्वसि

षिध मांस माषाद्यपीत्यर्थः मात्स्ये ततस्तु एवं कृष्णैकादश्यादौ ग्रहणे तेनापि
भोजनं अस्यवैधत्वेन निषेधाप्रवृत्तेः एवं ग्रहणे वैधे पिपत्तत्वाच्चाद्दिनाग्रे
रमाषमसमांसं वर्जयेदित्युक्तं तद्वैधमेवाश्रौतत्वेन तस्य बलवत्वात् देवलः श्रा
द्धं कृत्वा तु यो मर्त्यो न भुंक्ते स कदाचन दिवा हव्यं न गृह्णंति कव्यानि पितरस्तथा
शिवरात्र्येकादश्यादौ त्वव घ्राणमेव तत्तु कंपाकु पत्ररूपवा सोनावश्यकस्तत्रैक
भक्तमयाचितं वा कार्यमिति हेमाद्रिः जातूकर्ण्यः अहन्यवन्तु भोक्तव्यं कृतेश्रा
द्धे द्विजन्मभिः अन्यथा मासुरं श्राद्धं परपा केचसेविते श्राद्ध शेष भोजनस्य
क्वचिन्निषेधमाह हेमाद्रौ प्रायश्चित्तकांडे मार्कंडेयः पित्रादीनामप्यान्येषां श्रा
द्धशेषान्नभोजने व्रतिनां विधवानां च जतीनां च विगर्हितं अन्ने भिन्नगोत्राः व्र
तिनो ब्रह्मचारिणः श्राद्धावशिष्टभोक्तारस्ते वै निरयगामिनः सगोत्राणां सकु
ल्यानां ज्ञातीनां च न दोषकृदिति तत्रैवोक्तेः तत्रैव जावालिः विप्रस्त्वन्यगृहे श्रा
द्धशिष्टान्नभोजनं चरेत् प्राजापत्यं विशुद्धिः स्यात् जातिगोत्रेन दोषकृत् यतीनां
चयनं लक्षणं वर्जयश्चेति तत्रैवोक्तं अस्यापवादमाह स एव श्वशुरस्य गुरोर्वा
पि मातुलस्य महात्मनः ज्येष्ठ भ्रातुश्च पुत्रस्य ब्रह्मनिष्ठस्य योगिनः एतेषां श्राद्ध
शिष्टान्नं भुक्त्वा दोषो न विद्यते इति केचित्प्रशंसंति मुनयस्तदसांप्रतं विरोधा

न

288-17

तरं तत्रैव ज्ञेयं हेमाद्रौ जाबालः ताम्बूलं दंतकाष्ठं च स्नेहस्नानमभोजनं रत्यौ
षधपरान्नानि श्राद्धकर्त्ता विवर्जयेत् पृथ्वीचंद्रोदये आचार्यः नश्राद्धं भोजयेन्न
स्मिन्गृहे पात्रेन तद्दिने श्राद्धशेषं न शूद्रेभ्यः प्रदद्यादखिलेष्वपि इति जगद्गुरु
नारायणात्मजरुद्रदिनकरभट्टात्मजकमलाकरभट्टकृते निर्णयसिंधौ पार्वण
श्राद्धः ॥ ॥ अथामकल्पः तत्र विप्रालाभे भोजयेदप्यवाप्यैकं ब्राह्मणं पंक्ति
पावनं देवहत्यात्तु नैवेद्यं पश्चात्तस्य तु निर्वपेदिति शंखवाक्येरेको विप्रः पूर्वमुक्तः
विप्राभावे दर्भवटुः निधाय वा दर्भवटून् आसनेषु समाहितः प्रैषानुप्रैषसंयुक्तं
विधानं प्रतिपादयेदिति देवलोक्तेः अशक्तावामश्राद्धं आपद्यनग्नौ तीर्थे
च प्रवासे पुत्रजन्मनि आमश्राद्धं प्रकुर्वीत भार्यारजसि संक्रमे इति कात्यायनोक्तेः
पृथ्वीचंद्रोदये जमदग्निः पावस्यानाग्निसंयुक्त उत्सन्नाग्निरथापि वा आमश्राद्धं
तदा कुर्याद्धेम्ना करणं भवेत् कौर्मे अनग्निरधनो वापि तथैव व्यसनान्वि
त आमश्राद्धं द्विजः कुर्याद्विलासः सदैव [illegible] हि आहिताग्नेः प्रवासस्थेन तन्त्र
स्त्रीगृहे दार्शमृत्विगादिना कारयेत् अमावास्यादिनियतं प्रोषिते धर्मचारि
णि पत्न्योतत्कारयेन्नित्यमन्येनाप्यृत्विगादिनेति लघुहारीतोक्तेरिति पृथ्वी
चंद्रोदयः आदिपदमासिकादि सर्वपार्वणापरमिति शूल[illegible]पाणिः

प

सुमंतुः पाकाभावेधिकारः स्याद्द्विजादीनां नराधिप अग्नौ नाम महाबाहो वि
देशगमनादिभिः सदा चैव तु सूत्राणामामश्राद्धं विदुर्बुधाः प्रचेताः स्त्रीशू
द्रः श्वपचश्चैव जातकर्मणि चाप्यथ आमश्राद्धं सदा कुर्याद्विधिना पार्वणेन
तु स्वयं पचतीति श्वपच विप्रःशनैः सौ आत्मनो देशकालाभ्यां विप्लवे समुप
स्थिते आपद्यनग्नौ तीर्थे च प्रवासे पत्न्यसंभवे चंद्रसूर्यग्रहे चैव दद्यादामं वि
शेषतः न पक्वं भोजयेद्विद्वान् सधृड्रोपि कदाचन भोजयेत्सत्यवाप्नोति स्यान्न च तत्
स्य फलं लभेत् अत्र प्रवासतीर्थग्रहणादावामहेमश्राद्धमेव पाकश्राद्धं तु न भवे
त्येवेति हेमाद्रिरत्नावल्यादयः अपरार्के विज्ञानेश्वरादयस्तु पाकाभावे द्विजातीनामा
मश्राद्धं विधीयते इति सुमंतूक्तेः साग्निके निरग्निके च प्रवासादौ सर्वत्र पाकाभा
वे आमादिकार्यं पाकसंभवे त्वन्नेनैवेत्याहुः अत एव पाकश्राद्धमुक्त्वा एतच्चानुप
नीतेनापि कुर्यात्तैश्चपर्वसु भार्याविरहितोप्येतत्प्रवासस्थोपि नित्यशः इति मात्स्ये
निरग्नेरपि पाकेनान्नमिति शूलपाणिकल्पतरू एतच्छूद्रः श्राद्धमात्रपरं त्वन्ये
एकोद्दिष्टं तु कर्तव्यं पाकेनैव सदा स्वयमिति लघुहारीतीयमपि साग्नेरेव निरग्नेर्म
हैकोद्दिष्टमप्यामेन शूद्रस्य तु दशाहेपि आमेनेति हलायुधः उत्सन्नाग्नीनां त्वा
मश्राद्धमेवापरार्के जमदग्निवाक्यात् मरीचिः श्राद्धं विघ्ने द्विजातीनामामश्राद्धं प्र

289-A

कीर्त्तितं अमावास्यादिनियतं माससंवत्सराद्दते स्मृतिदर्पणे मृताहं च सपिंडं च
मघाश्राद्धं महालयं आपन्नोपि न कुर्वीत श्राद्धमामेन कर्हिचित् हेमाद्रौ व्यासः आ
मं दद्यात्कौन्तेय दद्यादामं चतुर्गुणं द्विगुणं त्रिगुणं वापि नत्वेकगुणमर्पयेत् सिद्धा
न्नेनुविधिर्यः स्यादामश्राद्धेप्यसौ विधिः आवाहनादि सर्वं स्यात्पिंडदानं च भारत दद्या
द्वद्विजातिभ्यः शृतं वाशृतमेव वा तेनाग्नौकरणं कुर्यात्पिंडांस्तेनैव निर्वपेत् ।
सत्यव्रत आमं ददद्द्विजो तेयत्नहानेर्द्विगुणं चरेत् त्रिगुणं च चतुर्गुणं वापि नत्वेकगु
णमर्पयेत् स्मृत्यर्थसारे समयुक्तोपवेत्रिंशन्मते आमश्राद्धं यदा कुर्यात्पिंडदानं क
थं भवेत् गृहपकात्समुद्धृत्य सक्तुभिः पायसेन वा पिंडान्दद्याद्यथालाभं तिलैः
सह विमत्सरः पृथ्वीचंद्रोदये व्यासः आमश्राद्धं यदा कुर्याद्विधिज्ञः श्राद्धदः सदा ह
स्तेग्नौकरणं कुर्याद्ब्राह्मणस्य विधानतः रत्नसागरे निरग्नेः सदानस्यचान्नयत्नः
आमेन पिंडं दद्याच्च द्विजान्पक्वेन भोजयेत् पक्वेन कुरुते पिंडमामान्नेयः प्रयच्छति ता
वुभौ मन्दजप्रोक्तौ नरकार्हौ न संशय इति तद्दर्शनादिपरं देशाचारादामव्यवस्थेति युक्तं
मरीचिः आवाहने स्वधाकारे मंत्रा जप्या विसर्जने अन्यकर्मण्यमन्त्राः स्युराम
श्राद्धविधिः स्मृतः आवाहने हविर्विषे ऽन्नवस्त्यजस्वीकर्त्ते चेत्समुद्दः स्वधाका

रेनमो वः पितर इषे इत्यत्र इषेपदस्थाने आमद्रव्यायेत्यूहः । विसर्जने वाजेवाजे
इत्यत्र तृप्ता इतिस्थाने तर्प्यत तर्प्येतेति चोहः यद्यपि तस्माद्धंवनो हेदिति ऊरच्यस्य
हानि बलत्यापि वचनाद्भवति तथापि प्रश्नो वगाहःस्यात् उष्मश्चोपप्यासमेव आ।
मश्राद्धे भवेन्नैतदपोराणेनेच पंचमं अर्थेचानुवादः खलेवाल्यांछेदनादीनामि
वार्थाभावात्तोपसिद्धेः धर्मप्रदीपे तु आमंचतुर्गुणं दद्यादथवा द्विगुणं तथा
हेम वा त्रिगुणं तद्वदामे हेमे यसो विधिः आमे हेमे तथा नित्ये नांदीश्राद्धे तथै
व च व्यतीपातादिके श्राद्धे नियमान्परिवर्जयेत् गृह्यपाकात्समुद्धृत्य समु
तिः पायसेन वा पिंडदानं प्रकुर्वीत आमे हेमे कृते सति आमश्राद्धे च हेमे च
प्रेतश्राद्धे तथैव च विकिरं नैव कुर्वीत मुनिः कात्यायनोब्रवीत् आमश्राद्धमनंगु
ष्टमग्नौकरणवर्जितं त्वग्निप्रश्नविसर्जनं तत्कार्यं मानवैर्ध्रुवं आवाहनादनौक
रणं विकिरं पात्रपूरणं त्वन्यप्रश्नं न कुर्वीत आमहेमे कदाचनेत्युक्तं एतच्च आवाह
नं भवेत्कार्यमर्घ्यदानं तथैव चेति हेमाद्रौ भविष्यादिविरोधाच्चिंत्यं शाखांतरवि
षयं वास्तु विकिरोप्यामे नेति हेमाद्रिः गृह्यपरिशिष्टेप्युक्तं अग्नौकरणमंत्रस्थाने न
मस्कारो विधीयते अग्नये कव्यवाहनाय नमः सोमाय पितृमते नमः इत्यस्य प्रयोगः
मात्स्ये मंत्रवर्जोहि शूद्रस्य सर्वमेव विधीयते एवं शूद्रोपि सामान्यं वृद्धिश्राद्धे

290-A

च सर्वदा नमस्कारेण मंत्रेण कुर्यादामान्नवद्बुधः तच्च सर्वाह्णे कार्यं आमश्राद्धं
तवाह्ने एकोद्दिष्टं च मध्यतः पार्वणं चापराह्णे तु प्रातर्वृद्धिनिमित्तकमिति हारीतो
क्तेः एते द्विजविषयं शूद्रकर्तृकं त्वपराह्ण एव मध्याह्नात्परतो यस्तु कुतपः समुदा
हृतः आमश्राद्धं तत्तत्रैव पितॄणामक्षय्यमक्षय्यमिति सुमंतूक्तेरिति अपरार्के हेमाद्रौ चोक्तं
तदभावे हेमश्राद्धमाह हेमाद्रौ मरीचिः आमान्नस्याप्यभावे तु श्राद्धं कुर्वीत बुद्धिमा
न् धान्याच्चतुर्गुणेनैव हिरण्येन स्मृतो विद्याधर्मे आमं तु द्विगुणं प्रोक्तं हेम तत्र चतुर्गु
णं स्मृत्यर्थसारे हिरण्यमष्टगुणं चतुर्गुणं समं वा दद्यात् हेमाद्रौ भविष्ये अन्नाभा
वे द्विजाभावे प्रवासे पुत्रजन्मनि हेमश्राद्धं संग्रहे च तथा स्त्रीशूद्रयोरपि षट्त्रिंशन्मते
नयथादेववर्जित्यित्वाक्षपे पत्नीति पाठः यस्य भार्या रजस्वलेति व्यासपाठः पुत्रोत्प
त्तौ हेमनियममाह संवर्तः पुत्रजन्मनि कुर्वीत श्राद्धं हेम्नैव बुद्धिमान् न पक्वेन नवामे
न कल्याणान्यतिकामयन् भविष्ये गृहपाकात्समुद्धृत्य सक्तुभिः पायसेन वा १
पिंडदानं प्रकुर्वीत हेमश्राद्धे कृते सति शूद्रस्य गृहपाकेन तत्पिंडान्निर्वपेत्तथा सक्तु
मूलं फलं तस्य पापसंवा भवेत्स्मृतं हेमश्राद्धे पिंडदानेनेति दिवोदासः स्मृत्यर्थ
सारे तु विकल्प उक्तः तदाशयेन विप्रः षट्त्रिंशन्मते नामं त्रयाणां वर्णानामेकरणं विक
रोचनहीयते तत्रि -- श्राद्धपिंडेनैवात्र कर्तव्यः केनचिद्भवेत् अत्र मरीचिना आमाभा
वे हेमविधानेन स्यान्नापत्या धर्मप्राप्तेः एवं चान्येप्रोहः सर्वाह्नकालता चक्रे येति

दिक् पूर्वोक्तधर्मप्रदीपेप्युक्तेश्च व्यासः हिरण्यमामं श्राद्धं यं लब्धं पतत्पत्रियादिनः
यथेष्टं विनियोज्यं स्याद्दृजीयाद्ब्राह्मणास्त्वयं विप्रालब्धं भुंजीयान्न सत्रादिलब्धेन्तु य(
थेष्टं विनियोगः तेनापि श्राद्धं वैश्वदेवादिनकार्यं देवोद्देशेन त्यक्तस्य देवतांतराय
त्यागायोगादिदेवयाज्ञिकः शूद्रलब्धेनतु कृतं नैव षट्त्रिंशन्मते श्रामं शूद्रस्य य
त्किंचिच्छ्राद्धिकं प्रतिगृह्यते तत्सर्वं भोजनपात्रं नित्यनैमित्तिकेन चेति शूद्र
तत्त्वे गिरा शूद्रवेश्मनि विप्रेण क्षीरं वा यदि वा दधि निवृत्तेन न भोक्तव्यं शूद्रान्नं त
दपि स्मृतं शूद्राद्द्विजगृहे अन्नं प्रविष्टं तु सदा शुचि पराशरः तावद्भवति शूद्रान्नं
यावन्न स्पृशति द्विजः द्विजातिकरसंस्पृष्टं सर्वं तन्न विरुध्यते विष्णुपुराणे सं
प्रोक्षयित्वा गृहीया शूद्रान्नं गृहमागत अंगिराः पात्रांतरगतं ग्राह्यं दुग्धं च गृह
मागतं तत्पिंडी श्राद्धाशक्ता वाह हेमाद्रौ संवर्तः समग्रं यस्तु यान्नोति कर्तुं नैवेह पार्व
णं अपि संकल्पविधिना काले तस्य विधीयते पात्रे भोज्यस्य चान्नस्य त्यागः संक(
ल्प उच्यते व्यासः सांकल्पं तु यदा कुर्यान्न कुर्यात्पात्रपूरणं नावाहनाग्नौकरणे पिं
डांश्चैव न दापयेत् पात्रमध्यस्य समंत्रस्य कावाहनस्य निषेधः तु धर्मी भवेत्ते।
वेति हेमाद्रिः स्मृत्यंतरे विकरं तु न दातव्यमिति तृतीयपादे पादे पाठः स्मृत्यंतरे
त्यजेदावाहनं चार्घ्यमग्नौकरणमेव च पिंडांश्च विकारा — प्येश्राद्धे सांकल्प्य

991-A

संग्रहके हेमाद्रौ वृद्धशातातपस्तु पिंडनिर्वापरहितं यत्तु श्राद्धं विधीयते स्वधा॥
वाचनं लोपोऽत्र विकारस्तन्न लुप्यते इत्याह पृथ्वीचंद्रोदये वशिष्ठः आवाहनं
स्वधाशब्दं पिंडाग्नौकरणं तथा विकिरं पिंडदानं च सांकल्पे षड्विवर्जयेत्
विकरे विकल्पः स्मृत्यंतरे अंगानि पितृयज्ञस्य यदा कर्तुं न कुर्यात् स तदा वा
चयेद्विप्रान् संकल्पात्सिद्धिदात्विति छागलेयः पिंडा यत्र निवर्त्तंते तथा दिक्षु कथं च
न सांकल्प्यं तत्तदा कार्यं नियमाद्दुस्तवादिभिः कार्ष्णाजिनं मौंजीबंधात्स
रार्द्धवत्सरं पाणिपीडिनात् पिंडान्नो पिंडानोदकः प्रेतपिंडं विनाग्रजः अयस्याप
वादपित्रोराब्दिकादौ एवं मतः त्वग्नाग्नेरपि सांकल्प मतं यद्गुत्रिंशन्मते॥
अनग्निको यदा विप्रःउत्सन्नाग्निस्तथैव च तथाहाद्विष सर्वास्तु संकल्पश्राद्धमा
चरेत् अशक्तौ तु पृथ्वीचंद्रोदये बृहन्नारदीये द्रव्याभावे द्विजाभावे अन्नमात्रं
तु पाचयेत् पैतृकेण तु सूक्तेन होमं कुर्याद्विचक्षणः देवलः पिंडमात्रं प्रदातव्यम
भावे द्रव्यविप्रयोः श्राद्धीयाहनि संप्राप्ते भवेन्निरशनो पि वा बृहद्वशिष्ठः किंचि
द्दद्याद शक्तस्तु उदकुंभादिकं द्विजे तृणानि वा गवे दद्यात् पिंडान्वाप्यप्सु निर्वपे
त् तिलदर्भैः पितृंस्त्वापि तर्पयेत्स्नानमेव वा हेमाद्रौ भविष्ये अग्निना वा दहेत्
कक्षं श्राद्धकाले समागते तस्मिन्वाप्यवदेसे द्विजपेद् श्राद्धसंहितं श्राद्धसंहिता

व

समन्नश्राद्धकल्पः विष्णुवाराहपुराणयोः असमर्थोन्नदानस्य धान्यं मांसं स्व
शक्तितः प्रदद्यात्तिलान्वापि स्वल्पां वापि दक्षिणां सर्वाभावे वनं गत्वा क
क्षामूलप्रदर्शकः सूर्यादिलोकपालानामिदमुच्चैः पठिष्यति न मेऽस्ति वित्तं न ध
नं न चान्यच्छ्राद्धोपयोग्यं स्वपितॄन्नतोऽस्मि तृप्यंतु भक्त्या पितरो मयैतौ भुजौ ततौ व
र्त्मनि मारुतस्य इत्येतत्पितृभिर्गीतं भावाभावप्रयोजनं यः करोति कृतं तेन श्रा
द्धं भवति भारत प्रभासखंडे गत्वारण्यममानुष्यमूर्ध्वबाहुर्विरौ सदः निरन्नो
निर्धनो देवाः पितरो मान्यलोकपाः न मेऽस्ति वित्तं न धनं न भार्या श्राद्धकर्यं च
पितरः करोमि वने प्रविश्य हन्त तन्मयो ह्येवं जौ कृतौ वर्त्मनि मारुतस्य श्रा
द्धं वर्णमतद्भवतां प्रदत्तं मह्यं दयध्वं पितृदेवताद्याः आस्वाप्य वोक्षिष्य भुजौ ततो
वै दिवा च रात्रिं समुपोष्य तिष्ठेत् भवेत्स चैतेन तेषाम् ऋणेन मुक्तः पितृदेवता
नांऽत्यनुकल्पः अथ श्राद्धभोजने प्रायश्चित्तं दार्शवद्ध प्राणायामः हद्धौ त्रयः
संस्कारेषु तु जातकर्मादिचूडांतेषु सांतपनं श्राद्धं चांद्रं वा अन्यसंस्कारेषू
पवासः सीमंते चांद्रमिति विज्ञानेश्वरः आपदि नवश्राद्धैकादशाहेषु भो
जने कार्यः षड्दशाहे ऊनमासे च पादोनः द्विमासे त्रिपक्षे तु षष्ठ तथोनाब्द यो
आर्धकृच्छ्रः त्रिमासषाण्मासिकोनेषु सपिंडने च पादकृच्छ्रः उपवासो वा गुरु कृष्णा

जौ ४

292-17

र्थं भोजनेर्धं जपशीलेतदर्धं अनापदितु अन्नमासांतेषु चांद्रं कार्यं चांद्रिमासादौ
पादोने त्रिमासादावर्धं कार्यः आब्दिके पादोनं कार्यः पुनराब्दिके एकाहं दोत्रि
पादि श्राद्धेषु द्वित्रिचतुर्गुणानि ज्ञेयानि चेजलसर्प आदिहतपतित क्लीबादिन
वश्राद्धे चांद्रं आद्यमासिकांते चांद्रं पक्षकृच्छ्र द्वादशाहो पराकः द्विमासादाव
तिकृच्छ्रः त्रिमासादौ कार्यः आब्दिके पादः अभ्यासे सर्वं द्विगुणं आमहेमसंक
श्राद्धेषु तत्तदर्धानि यतिब्रह्मचारी चोक्तप्रायश्चित्तं कृत्वा त्रीनुपवासान् प्राणायामा
न्घृतप्राशनं चाधिकं कृत्वा व्रतशेषं समापयेत् अनापदि द्विगुणं दशाहे दश गायत्री
मंत्रिता अपः पिबेत् षड्प्राणायामा वा संस्कारेषु चौले कृच्छ्रः सीमंते चांद्रं अन्ये
षूपवास इति दिवः अत्र माधवमिताक्षरादौ कश्चिद्विरोधो विषयभेदान्न परिहार्यः
एकादशाहे चांद्रं पुनः संस्कारश्चेति हेमाद्रिः पतितानां दशाहकृत्वः पिबेदापो मा
पा आद्या आह भृगुः जङ्गिडनिनद्युत्कप्रायश्चित्तमाद्यपरमिति ज्ञानेश्वरः अथ क्षया
ह श्राद्धं तत्स्वरूपमाह हेमाद्रौ व्यासः मासपक्षतिथिस्पृष्टे यो यस्मिन् म्रियतेह
नि प्रत्यब्दं तु तत्प्रोक्तं तत्क्षयाहं तस्य तं विदुः नारदीये पारणे मरणे नृणां तिथि
स्तात्कालिकी स्मृताः अत्र चांद्रं मानं ज्ञेयं आब्दिके पितृकार्ये च चांद्रो मासः प्रश
स्यते इति गार्ग्योक्तेः मलमासमृतस्य तु सौरं मालमासमृतानां तु सौरं मानं स

मास्रुये दिनेहि माडावुक्तेः एतन्मृतिमासस्यैवाधिक्ये चेत्तेयं त्रैरे प्रतिसंवत्सरं
कार्यं मातापित्रोर्मृतेहनि पितृव्याप्यपुत्रस्य भ्रातुर्ज्येष्ठस्य चैवहि अपुत्रस्य
ति भ्रात्राप्यन्वयः ज्येष्ठस्येति कनिष्ठस्यानावश्यकत्वार्थं मदनरत्ने भविष्ये
सर्वेषामिव श्राद्धानां श्रेष्ठं सांवत्सरं मतं तथा भोजकोयस्तु वै श्राद्धं न करोति
खगाधिप मातापितृभ्यां सततं वर्षे वर्षे मृतेहनि सयाति नरकं घोरं तामिस्रं
नाम नामतः तच्च नानास्मृतिष्वेकोद्दिष्टं पार्वणं चोक्तं आद्यमाह यमः सपिंडी
करणादूर्ध्वं प्रतिसंवत्सरं सुतैः मातापित्रोः पृथक्कार्यमेकोद्दिष्टं मृतेहनि व्यासः
एकोद्दिष्टं तु कर्तव्यं पित्रोश्चैव मृतेहनि एकोद्दिष्टं परित्यज्य पार्वणं कुरुते नरः अकृतं
तद्विजानीयाद्भवेच्च पितृघातकः अंत्यमाह शातातपः सपिंडीकरणं कृत्वा
कुर्यात्पार्वणवत्सदा प्रतिसंवत्सरं श्राद्धं छागलेयोदितो विधिः यः सपिंडीकृतं
पृथक्पिंडे नियोजयेत् विधिघ्नस्तेन भवति पितृहा चोपजायते अत्रौरसक्षेत्र
जयोः पार्वणं दत्तकादीनामेकोद्दिष्टमित्येकः पक्षः साग्नेः पार्वणं निरग्नेरेको
द्दिष्टमित्यपरः तद्दूषणं मिताक्षरादौ ज्ञेयं कल्पतरुस्तु साग्न्योरौरसक्षेत्रजयोः
पार्वणं निरग्निकयोस्त्वेकोद्दिष्टमित्याह अपरार्केप्येवं दत्तकादयो दशपुत्रा
स्तु साग्नयो निरग्नयश्चैकोद्दिष्टमेव कुर्युः प्रत्यब्दं पार्वणेनैव विधिना क्षेत्रजौ

ते

293-A

रसौ कुर्यातामितरे कुर्युरेकोदिष्टयोर्विकल्पः वस्तुतः सर्वेषां पार्वणमेकोदिष्ट
योर्व्रीहियववद्विकल्पः स च देशाचाराद्व्यवस्थित इति सर्वनिबंधसिद्धांतः अत
एव पृथ्वीचंद्रोदये वृद्धपराशरः मातापित्रोः पृथक् कार्यमेकोद्दिष्टं मृते हनीत्यु
क्त्वाह देशधर्मसमाश्रयत्वं वंशधर्मं तथापरे स्मरयः श्राद्धमिच्छंति पार्वणं च क्षयाप्ती
ति तच्च केवलपितृणां न सपत्नीकानामिति हेमाद्रिः अत्र माता महानेकार्याः क
र्षसमन्वितमुक्तान्त्याघ्रश्राद्धषोडशं प्रत्यब्दं च शेषेषु पिंडास्युः षडिति स्थिति
रिकात्यायनोक्तेः कर्षसमन्वितं पिंडने परे कोदिष्टं क्रियते तेषामपि कचित्पा
र्वणमेव अमावास्यां क्षयो यस्य पितृयज्ञेपवापुनः पार्वणं तस्य कर्तव्यं नैकोद्दि
ष्टं कदाचनेति शंखोक्तेः एवं संन्यासिनोपि एकोद्दिष्टं पतेनास्ति त्रिदंडग्रहणादि
ह सपिंडीकरणाभावात्पार्वणं तस्य सर्वदेति प्रचेतसोक्तेः वायवीये संन्यासिनो
प्याब्दिकादि पुत्रः कुर्याद्यथाविधि महालये तु यच्छ्राद्धं द्वादश्यां पार्वणं हि तत्तु प
थ्वीचंद्रोदये वृद्धपराशरः संग्रामे संस्थितानां च प्रेतपक्षे शशिक्षये तेषां पार्वणमे
वोक्तं सपाहे पिच सत्तमैः चंद्रक्षयानाशकसंयुगे ष्वपः प्रेतपक्षे मृतत्वात्स पिंडं सपिं
डानाम पि वार्षिकानि भवंति तेषां मिह पार्वणानि तथा भ्रातुर्ज्येष्ठस्य कर्वीत ज्ये
ष्ठोभ्रातानुजस्य च देवहीनं तु तन्नत्यादिति धर्मविद प्रवीत देवहीनमेकोद्दिष्टं

नि. सिं.
२५४

294

ज्येष्ठो भ्राता ऽन्याद्यागर्भजः तथा च तत्रैव शातातपः अन्याद्यगर्भज्येष्ठोपि भ्राता स
द्भिर्निगद्यते अतस्तत्सपिंडनात्तस्य नैव पार्वणमाचरेत् आद्यगर्भे तु पार्वणमेको
द्दिष्टवत्परः मातुस्तु हेमाद्रौ कात्यायनः प्रत्यब्दं यो यथा कुर्यात्पुत्रः पित्रे सदाद्वि
जः तथैव मातुः कर्तव्यं पार्वणं वाप्यदैवं वा यत्तन्नैवोक्तं सपिंडीकरणादूर्ध्वं पित्रो
को रेव हि पार्वणं पितृव्यभ्रातृमातृणामेकोद्दिष्टं सदैवा त्विति तत्सपत्नमातृपरं यत्तु
वृद्धपराशरः अपुत्रस्य पितृव्यस्य तत्पुत्रो भ्रातृजो भवेत् स एव तस्य कुर्वीत पिं
डदानादिकाः क्रियाः पार्वणं तेन कार्यं स्यात्पुत्रवद्भ्रातृजेन तु पितृस्थाने तु तं कृत्वा शे
षं पूर्ववदुच्चरेदिति तच्च पितृव्यदेशाचाराद्यवस्थितं ज्ञेयमिति एवं पृथ्वीचंद्रः
श्राद्धदीपकलिकायां चतुर्विंशतिमतेन पितृव्यभ्रातृमातॄणां ज्येष्ठानां पार्वणं
भवेत् एकोद्दिष्टं कनिष्ठानां दंपत्योः पार्वणं मिथः अत्र पुत्रस्य पितृव्यस्य भ्रातुश्चै
वाग्रजन्मनः मातामहस्य तत्पत्न्याः श्राद्धं पार्वणवद्भवेदित्युक्तं पत्न्याः कर्तृकत्वे
पि पार्वणमेव सर्वाभावे स्वयं पत्न्यः स्वभर्तॄणाममंत्रकं सपिंडीकरणं कुर्युस्ततः
पार्वणमेव चेति लौगाक्षिस्मृतेः तत्र पत्न्यापि कुर्वीत सापिंड्यं पार्वणं त्वयेति स्तु
मंतूक्तेश्चेति निर्णयामृते उक्तं अन्ये त्वेतत्सात्त्विकपार्वणपरमाहुः अत एव भ
र्तुः श्राद्धं तु या नारी मोहात्पार्वणमाचरेत् न तेन तृप्यते भर्ता हत्वा तु नरकं व्रजेदि
ति वचनं स्वयाम्हपाक्षिके कोद्दिष्टप्रशंसार्थेन पार्वणनिषेधार्थमित्युक्तं त्रिस्थ

राम
२५४

२९५-A

लीसेतो भर्तृचरणैः स्वभर्तृप्रभृतित्रिभ्यः इत्यनेन विरोधाच्च अपुत्राणां त्वा
हेमाद्रौ आपस्तंब अपुत्राये मृताः केचित्स्त्रियो वा पुरुषाश्च ये तेषामपि च देयं
स्यादेकोद्दिष्टं न पार्वणं मित्रबंधुसपिंडेभ्यः स्त्रीकुमारीभ्य एव च यथा हे
मासिके श्राद्धं सांवत्सरमतोन्यथा पारिजाते तु अन्यथा पार्वणमित्युक्त्वा ।
सर्वत्र पार्वणमुक्तं एकोद्दिष्टवाक्यानि तु तीर्थमहालयपराणीत्युक्तं पृथ्वी
चंद्रोदये तु गार्ग्यः मातुः सहोदरायाश्च पितुः सहभवाश्च या तयोश्चैव कु
र्वीत पार्वणं पितृभ्राहते प्रचेताः सपिंडीकरणादूर्ध्वमेकोद्दिष्टं विधीयते अ
पुत्राणां च सर्वेषामपत्नीनां तथैव च सपत्नीनां ब्रह्मचार्यादीनां मार्कंडेय
पुराणे प्रतिसंवत्सरं कार्यमेकोद्दिष्टं नरैः स्त्रियाः मृताहनि यथान्यायं ।
न त्वेकं यथाहादि होदितं नृणामिति दृष्टं तादृशो विप्रस्तत्पार्श्वग्रादीनां सपिं
डनाभावेपि सांवत्सरमेकोद्दिष्टं कार्यमेवेति शूलपाणिः अत्रिहारीतवशिष्ठौ
सपिंडीकरणादूर्ध्वं यत्र प्रदीयते भ्रात्रे भगिन्ये पुत्राय स्वामिने मातुलाय च
पितृव्यगुरवे श्राद्धमेकोद्दिष्टं न पार्वणं यत्तु यात्स्कार्ष्णिः पितृव्यभ्रातृ
मातृणामपुत्राणां तथैव च मातामहस्याप्यतस्य श्राद्धादि पितृवद्भवेदि
ति तदावश्यकत्वार्थं न तु पार्वणार्थमिति हेमाद्रिः युक्तं चैवं मातुः पितरमा

भ्यत्रयोमातामहास्मृताः तेषांतुपितृवच्छ्राद्धं कुर्युर्दुहितृसूनवइतिपुलस्त्योक्ते
र्मातामहस्यपार्वणमेव नसाहचर्यात्पितृव्यादौतथा पितृव्यभ्रातृमातृणामेकोदि
ष्टंचपार्वणंवाक्षयाहेपक्षेमेधापुलस्त्योक्तेश्चविकल्पः केचित्त्वापस्तंबादिवाक्यैर्नि
त्युक्तेर्मातामहीनांनैवकार्यासापिंड्यंतेनास्यपितृव्यादिपरत्वादकृतसपिंडन
पितृव्यादिपराण्येवाहुः मातासपत्नमातृणामेकोदिष्टंत्वकनिष्टपरमिति पृथ्वी
चंद्रोदयेप्येवंविशेषस्त्वधिकारिनिर्णयेप्रागुक्तः केचित्तुपुत्रांतराभावेपितामा
हवार्षिकमप्यावश्यकं पुत्राभावेचतेनपुत्रपत्नीमातातथापितामित्राभावेपिस
पिंड्यः कुर्युस्तस्यौर्ध्वदेहिकमितिमार्कंडेयपुराणादित्याहुः तत्रपौत्रेणैको
दशाहादिकर्तव्यंश्राद्धषोडशमितिकात्यायनविशेषोक्तेः अथक्षयाहश्राद्धेनिर्णयः
तत्रैकोदिष्टंमध्याह्नेकार्यं मध्याह्नस्तुपंचधाभक्तेदिनेतृतीयभागः इतिमाध
वः आमश्राद्धंतुपूर्वाह्णेएकोदिष्टंतुमध्यतः पार्वणंचापराह्णेतुप्रातर्वृ
द्धिनिमित्तकमितिहारीतोक्तेःप्रातःशब्दसाहचर्यात् तत्राप्यकुतपादिमुहूर्तेद्व
येवेयं प्रारभ्यकुतपेश्राद्धंकुर्यादारौहिणंबुधः विधिज्ञोविधिमास्थायरौहिणं।
तुनलंघयेदितिश्लोकगौतमोक्तेरेतत्परत्वात् रौहिणोनवमोमुहूर्तः मैथि
लाःश्राद्धकौमुदीचैवं गत्यपाऊर्ध्वंमुहूर्तोचतुष्टयंमुहूर्तपंचकंह्येतत्स्वधा
वनमिष्यतेइत्यादिविरोधात् दीपिकापिएकोदिष्टमुपक्रमेत आवर्तनसमी

295-B

पेवात्तत्रैवतैर्निमिष्यत इत्यादिविरोधात् दीपिकापि स्तोकादिवृक्षमुपक्रमेत कृतयेइति
माधवीयेव्यासोपिकृतपप्रथमेर्भोगेणकोहिद्वषमुपक्रमेत आवर्तनसमीपेवा
तत्रैवनियतात्मवान् तेन कुतपादिरोहिणांतो मुख्यः कालः पश्चाच्च द्वादये एव
वं दिनद्वयेनव्याप्तौ अंशेनसमव्याप्तौ च पूर्वाविषमप्राप्तावाधिक्येन निर्णयः आव्याप्तौ
पूर्वैव परविद्धायानिषेधात् सचवक्ष्यते पूर्वदिने गजहरिणे रोहिणालं घ्रनापत्तेः परैव
तिगौडाः अन्ने कृष्णमवरात्तवर्वंदर्शापूर्वोऽमावास्यायन्ये तन्न परविधनिषेधप्राबल्या
त् अत्रमुख्यं कालमाधवीयेयं पार्वणंतु पराह्णेकार्यं पूर्वोक्तवचनात् मध्याह्नव्या
पिनीयास्यात्सैकोदिष्टेतिथिर्भवेत् अपराह्णव्यापिनी या पार्वणे सा तिथिर्भवेत्
इति पश्चाच्चंद्रोदये हृदु गौतमोक्तेः पूर्वेद्युरेवपरेद्युरेववा पराह्णव्याप्तौ सैवग्राह्या
दिनद्वये तद्व्याप्तौ तदस्पर्शे शातः समव्याप्तौ वा पूर्वैव विषमव्याप्तौ चाधिकाग्राह्या
पराह्णव्यापिनीस्यात् हिकस्यपदातिथिः महतीयं व्रतद्विज्ञा प्रशंसेति महर्षय इति मरी
चिस्मृतेः दर्शेच पूर्णमासे च पितुः संवत्सरे दिने पूर्वविद्धामकुर्वाणो नरकेप्रतिप
द्यते इत्यपरार्केनारदोक्तेः अहर्व्यापिनी चेत्स्यात् मृताहस्य यदि तिथिः पूर्ववि
द्धाप्रकर्तव्या त्रिमुहूर्ता भवेद्यदि इति सुमंतूक्तेः पूर्वस्यान्निर्वपेत्पिंडानित्यादि

ति

रसंभावितमिदि माड्क्रेयपाठः तत्रैव तत्र्ह्यमनुः न चाहव्यापिनी चेत्स्यात् मृता

हूस्य च या तिथिः पूर्वविद्धैव कर्तव्या त्रिमुहूर्ता च या भवेत् मदनरत्नेप्येवं यत्तु का
र्ष्णाजिनिर्व्यासो अस्तोत्तमये वेलायां कलामात्रा यदा तिथिः सैव प्रत्याब्दिके ज्ञेया
नापराह्णव्यापिनीति तत्त्रिमुहूर्तत्वस्तुतिः पूर्वेद्युः सायं त्रिमुहूर्ताभावे तु परैव त्रि
मुहूर्ता न चेद्ग्राह्या परवत्तु न येहि सेति कालादर्शो गोभिलोक्तेश्च कालादर्शेपि प्र
त्याब्दिकेप्येवमेव तिथिर्ग्राह्यापराह्णिकी उभयत्र तथात्वे तु महत्त्वेन विनिर्णयः अ
स्तत्रापि साम्ये तन्यपरत्र चेन्न तिथिः सैवाब्दिके मासिके ग्राह्या सा सा ह्यपराह्
योर्यदि तदा यत्राधिका सा मता तुल्या चेदुभयापराह्णसमये पूर्वा न च तद्द्वये पूर्वैव
त्रिमुहूर्ता तत्समये नो चेत्परैवोचिताः माधवपृथ्वीचंद्रौ तु दिनद्वये पराह्णव्याप्त्यभावे
ऽतः समव्याप्तौ च क्षये च पूर्वा वृद्धौ परा खर्वदर्पयोरप्युक्तेः अपराह्णद्वय
व्यापिन्यतीतस्य च या तिथिः क्षये पूर्वा च कर्तव्या वृद्धौ कार्या तथोत्तरेति बौधाय
नोक्तेः क्षयाहस्य तिथिर्यात् अपराह्णद्वये यदि पूर्वा क्षये तु कर्तव्या वृद्धौ कार्या त
थोत्तरेति बृहन्नारदीयाच्चेत्याह मनुः तद्धि क्षयो चात्र परतिथेन तु ग्राह्यतिथेः तत
स्याक्षये पराह्णद्वयव्याप्तेरसंभवात् तदा माधवः न ग्राह्या तिथिर्हीना तद्धि क्षयावृद्धे
तिथेस्तुतौ इति यत्तु पृथ्वीचंद्रः पूर्वोक्तवचने उपक्रमायाद्वात्तमयपयोगिनीति
थिरुक्तात्रापराह्णव्यापिनी ज्ञेया सा या द्वित्रिमुहूर्तैः स्यात्तत्र श्राद्धं न कारयेदिति

296-A

तत्स्यादोसायमतिषेधात् यच्च शिष्टहेमाद्रिग्रहणं तच्छ्राद्धाहोपरागकृत्यम

मुख्यपरमित्याह तद्धेमाद्रिमदनरत्नकालादर्शादिग्रंथाविरोधाल्लक्षणाय

तेश्चचिंत्य तस्मात् पूर्वोक्तमेवसाधु यदाविवसादिने सांवत्सरं श्राद्धं नस्या

त्तदाराज्ञा वपिकार्यं मृताहसमतिक्रम्य चंडालेश्वाभिजायते इतिमरीचिना

मृताहातिक्रमेदोषोक्तेः नचनक्तं श्राद्धकर्तीनारेष्ववाभोजनसमानमित्यायत्व

वेनगौणकालतोक्तेश्चेतिमाधवः आरब्धे श्राद्धे विघ्नवशाद्रात्रिपाते भोजनस

मा[illegible]प्यंतराज्ञोकार्यं शेषसमाप्तिःपरदिनेएवेति हरदत्तः त्रयोदशेस्चानीतश्

त्यर्थः तेनयत्र द्वादशमासिकं शुद्धमासे भवति तत्र त्रयोदशोधिके एव श्राद्धादिकं

कार्यं यत्राधिकमध्ये द्वादशं मासिकं तत्र तस्यावृत्तिराहत्ति कृत्वा चतुर्दशेशुद्धे

एवप्रथमाब्दिकमिति त्रिस्थलीसेतुः ग्रहणादिने चाब्दिकप्राप्तौ न द्विनएवान्नेनामे

न हेम्ना वा कुर्यात् नेतरदिने इत्युक्तं प्राग्ग्रहणनिर्णये तच्च प्रथमाब्दिकं त्रयोदशे

मलमासे कार्यमन्यथान प्रत्यब्दं द्वादशे मासि कार्या पिंडक्रियास्तु तैः क्वचित्त्र

योदशोपिस्यादाद्यंमुक्त्वा तु वत्सरमिति लघुहारीतोक्तेः इदं मृत्याधिमासपरं द्वा

दशोमाधवीयेहेमाद्रौ चैवं द्वितीयादिकं तु शुद्धमासएवनाधिकेनाप्युभ

योः मलमासमृतानां तुयादात एवाधिकः स्यात्तदा तत्रैव कार्यमन्यदा शु

द्धे एवेति प्राग्उक्तं दर्शे वार्षिके चेत्तदा पूर्वं वार्षिकं कृत्वा ततः पिंडपितृयज्ञो दर्शश्रा॰
द्धं चेति निर्णयदीपे कृष्णभट्टोक्तं स्मृतिसारेऽपि दर्शक्षयाहसंप्राप्ते कथं कुर्वंति याज्ञि
काः श्राद्धं क्षयाहं निर्वर्त्य पश्चाद्दर्शं विधीयते इति पृक्तं त्वेवं तद्वचने मूलाभावात्
पिंडयज्ञं ततः कुर्यात्ततो न्वाहार्यकं बुधः इति दर्शश्राद्धे पिंडपितृयज्ञानंतर्यात्त॰
स्याद्धिके स्यपि देशात्प्राप्तेः पितृयज्ञानंतरं वार्षिकं ततो दर्शश्राद्धमिति व्यति
षंगस्तु न भवति तस्यार्थिकत्वात् कालदर्शेऽपि निमित्तानियतिश्राद्धस्य पूर्वा
नुष्ठानकारणमिति सर्वान्वत्येककृत्याभावात्क्षयाहनिन्नस्यानियतत्वं देवजा
नीयेप्येवं एवं मासिकादिष्वपि ज्ञेयं प्रत्यब्दं यो यथा कुर्यात्तथा कुर्यात् सूतकेऽपी
ति सर्वातिदेशात् मृताहे वृषोत्सर्गश्चोक्तो हेमाद्रौ विष्णुधर्मे अयनद्वितये चैव मृ
ताहे बांधवस्य च उत्सृजेन्नीलवृषभं कौमुद्याः समुपागमे कौमुदी कार्तिकी
आयस्तु द्विश्राद्धं दिवोदासीये सपिंडीकरणादूर्ध्वं यावदब्दत्रयं भवेत् तावदेव
न भोक्तव्यं क्षयेऽहनि कदाचन वर्षांते तु सपिंडत्वे पितृतुल्यं मृताहनि तु संप्राप्ते याव
दब्दचतुष्टयं वाहः श्राद्धं प्रकुर्वीत न कुर्यात्कृतभोजनं प्रथमेऽस्थीनि मज्जा च द्विती
ये मांसभक्षणं तृतीये रुधिरं प्रोक्तं श्राद्धं शुद्धं चतुर्थकमिति श्राद्धकाशिकोक्तेः ॥
शुद्धं किंचिदिति ज्ञेयं स्मृत्यंतरे सप्तविंशाच्च यो मासान् श्राद्धं भुंक्ते न मोहतः सय

297-A

त्रिः दूषितः पापः प्रेताशी च भवेत्तु सः तत्र प्रथमे ऽब्दे वर्षांतः सपिंडनपक्षे मृताहात्स्ववैद्धिं
सपिंडनमब्दपूर्तिश्राद्धं च कृत्वा परेद्युर्वार्षिकं कुर्यादिति स्मृत्यर्थसारे उक्तं हेमाद्रिस्तु
मृताहे सपिंडीकरणे ऽनेन वार्षिकसिद्धिः मासि संवत्सरे पिंडषोडशः परिकीर्तितः
तेनैव च सपिंडत्वं तेनैवाब्दिकमिष्यते इति वचनादित्याह इदमेव च युक्तं अयपक्षपा
हाज्ञाने मरीचिः श्राद्धविघ्ने समुत्पन्ने अविज्ञाते मृते ऽहनि एकादश्यां तु कर्तव्यं कृष्ण
पक्षे विशेषतः विशेषत इत्युक्तेः शुक्लैकादश्यामपि बृहस्पतिः न ज्ञायते मृताहश्चे
त्प्रमीते प्रोषिते सति मासश्चेत्प्रतिविज्ञातस्तद्दर्शे स्यादथाब्दिकं दिनमासौ च वि
ज्ञातौ मरणस्य यदा पुनः प्रस्थानमादिसवसौ ग्राह्यौ पूर्वोक्तया दिशा मदनरत्ने भवि
ष्ये मृताहं यो न जानाति मानवो विनितात्मज तेन कार्यममावास्यां श्राद्धं सांवत्सरं
सदा दिनमेव तु जानाति मासं नैव तु यो नरः मार्गशीर्षे ऽथवा भाद्रे माघे वा तद्दिनं भ
वेत् निर्णयामृते तु यदा मासो न विज्ञातो दिनमेव तु तदा चाषाढके मासि माघे वा त
द्दिनं भवेदिति स्मृतेराषाढो ऽप्युक्तः कालादर्शे ऽपि मासाज्ञाने दिनज्ञाने कार्यमाषाढ
माघयोरित्युक्तं हेमाद्रौ प्रभासखंडे मृताहं यो न जानाति मासं वापि कथंचन ते
न कार्यममायां स्याच्छ्राद्धं माघे ऽथ मार्गके भविष्ये मृतवार्ताश्रुते ग्राह्यौ तौ पूर्वो
क्तक्रमेण तु पूर्वोक्तेति प्रस्थानदिनाज्ञाने मासज्ञाने च तद्दर्शे मासाज्ञाने दिन र

मि-सिं.
२६८

298

ज्ञानेच मार्गशादावितिवत् श्रवणादिनेपितत्रेयमित्यर्थः श्रवणादिनमासात्ताने माघमा-
र्गदशौ कार्यं पूर्वोक्तप्रभासखंडात् अप्रेतात्र लोप इति मूलपाठः पुस्तकं हेयं तिथितत्त्वेयमः
गतस्य न भवेद्धान्नीयावद्द्वादशवार्षिकी प्रेतावधारणं तस्य कर्तव्यस्तत्ववोध्वैः यन्मा-
सि यदि हर्षीनस्तन्मासि तदहः क्रियादिना ज्ञाने कुहूस्तस्य आषाढस्यामावाकुहूः
अथ श्राद्धविघ्ननिर्णयः तत्र विप्रस्य निमंत्रणोत्तरं सूतकमृतकेवाशौचाभावः नि-
मंत्रितेषु विप्रेषु प्रारब्धे श्राद्धकर्मणि निमंत्रणाद्धि विप्रस्य स्वाध्यायादिस्तस्य च देहे
पितृष्वतिष्ठत्सु नाशौचं विद्यते क्वचिदिति व्रास्मोक्तेः कर्तुस्तु विप्रस्य स्वाध्यायादिस्त-
स्य च दिहे पितृष्वतिष्ठत्सु नाशौचं विघ्षरास्त्रतयज्ञविवाहेषु श्राद्धे होमेर्चने जपे आ-
रब्धे सूतकं स्यादनारब्धे तु सूतकं श्राद्धे प्रारंभस्तेनैवोक्तः प्रारंभो वरणं यज्ञे संकल्पो
व्रतसत्रयोः नांदीमुखं विवाहादौ श्राद्धे पाकपरिक्रियेति माधवीये व्रास्मेपि श्राद्धा-
दौ पितृयज्ञे च कन्यादाने च नो भवेत् मिताक्षरायां स्मृत्यंतरे सद्यः शौचप्रवृत्याप्र-
वृत्ते संभृतसंभारे विवाहे श्राद्धकर्मणीति तिथितत्त्वादिगौडग्रंथास्तु निमंत्रणोत्तरं
कर्तुर्भोक्तुश्च नाशौचं निमंत्रणोत्तरं श्राद्धं प्रारंभः स्यादिस्मृतिरिति विष्णूक्तेः यत्तु श्राद्धे
पाकपरिक्रियेति तद्दर्शश्राद्धविषयमित्याहुः दातृगृहे मरणादौ व्रास्मेउक्तं भोजना-
र्थे तु संभुक्ते विप्रे दीक्षु विपद्यते गृहे इति शेषः यदा कश्चित्तदोच्छिष्टशौचं त्यक्त्वा समाहि-

राम
२६८

२१८-A

ताः आचम्यपरकायेनतलेनशुचयोद्विजाइति अस्यश्राद्धविषयत्वंहेमाद्रिणोक्तं
प्रदर्शितंहृदयेप्येवंममतुप्रतिभाति इदंविवाहादिविषयंनतुश्राद्धविषयं तत्प्रस
भावात् विवाहोत्सवयज्ञेष्वित्युपक्रम्यभुंजानेषुतुविप्रेषुत्वंतरामृतसूतकेः अ
न्यगेहोदकाचांताःसर्वेतेशुचयःस्मृताः इतिवह्निरान्मतैकवाक्यात् निमंत्रितेषु
विप्रेषुप्रारब्धेश्राद्धकर्मणीतिपूर्वोक्तविरोधाच्च श्राद्धेतुप्ययपिविष्ठुतापाको
त्तरमाशौचाभावउक्तःस्तस्तत्पापिकर्तुरेवसः भोक्तुस्तुदोषोस्त्येवअपिदात्तग्र
हीत्रोश्च सूतकेमृतके तथा अविज्ञातेनदोषः स्यात् श्राद्धादिषुकथंचन विज्ञाते
भोक्तुरेवस्यात्प्रायश्चित्तादिकंक्रमादिति माधवीये ब्राह्मोक्तेः श्रादिशब्देनाशौच
मुच्यते तथाहविष्णुः ब्राह्मणादीनामाशौचेयसकृदेवान्नमश्नातितस्यतावं
दाशौचंयावत्तेषामाशौचव्यपगमेप्रायश्चित्तंकुर्यादिति यत्तुदेहेपितृषुतिष्ठत्सुना
शौचंविद्यतेक्वचिदिति तत्संतमश्राद्धकालीनस्यानिषेधकंनतुइतरकालीनस्य शुद्धि
दायस्तु निमंत्रितेष्वित्यामश्राद्धपरं भोजनार्थेचित्यादित्वन्नश्राद्धपरमित्याह प्रायश्चि
त्तंत्वाहमार्कंडेयः भुक्त्वातुब्राह्मणाशौचेचरेत्सांतपनंद्विजः पतत्काममतः अभ्यासे
शौरवः ब्राह्मणस्यतथाभुक्त्वाक्षत्रमेकंव्रतीभवेदिति अज्ञानात्तुच्छागलेयः एकाहंच
त्र्यहंपंचसप्तदात्रमभोजनं ततः शुचिर्भवेद्विप्रःपंचगव्यंपिबन्नरइति वर्णक्रमेणो

दं अभ्यासेन तु हेमगुप्त्यर्थमित्यादि मिताक्षरामाधवादौ तु श्राद्धे कर्तुर्भोक्तुश्च सर्व
थादोषाभाव उक्तः आशौचमध्ये श्राद्धदिनप्राप्तौ तु माधवीये कालादर्शे च ऋष्य
शृंगः देये पितृणां श्राद्धे तु आशौचं जायते यदा आशौचे तु व्यतिक्रान्ते तेभ्यः श्राद्धं
विधीयते श्राद्धचिंतामणौ ज्योतिषे प्रतिसंवत्सरश्राद्धमाशौचाद्यनिमित्तेन चयत्र
मलमासेपि तत्कार्यमिति भागुरिभाषितं आशौचांत्यदिनत्वेन निमित्तत्वाद्वितीय
र्थः एतन्मासिकाब्दिकपरं न दार्शिकादौ अत एव तद्दर्शनभाव्येऽपरपक्षेपीत्या
एवीति नियमात्कृष्णपक्षश्राद्धलोपे प्रायश्चित्तमेव न तु गौणकाले करणं तच्चोप
वासः वेदोदितानां नित्यानां कर्मणां समतिक्रमे स्नातकव्रतलोपे च प्रायश्चित्तं
मभोजनमिति मनूक्तेरित्युक्तं आशौचे तु प्रायश्चित्तमपि न मुख्यकालेनाधिकारा
त् आशौचांतेऽसंभवे तु व्यासः श्राद्धविघ्ने समुत्पन्ने अविज्ञाते मृतसूतके अमावा
स्यां प्रकुर्वीत हेमाद्रौ चैके मनीषिणः हेमाद्रौ षट्त्रिंशन्मतेति मासिके चाब्दिके वापि
संप्राप्ते मृतसूतके वदंत्यशुद्धेतत्कार्यं दर्शे वापि विचक्षणाः गोभिलः दैवं प्रत्या
ब्दिके श्राद्धे अंतरा मृतसूतके आशौचानंतरं कुर्यात्तन्मासेऽक्षयेपि वा मरीचिः
श्राद्धविघ्ने समुत्पन्ने त्वविज्ञाते मृते हनि एकादश्यां तु कर्तव्यं कृष्णपक्षे विशेषतः
विशेषत इत्युक्तेः शुक्लायामपि आशौचेनरविघ्ने एतदिति माधवः षष्ठीचंद्रो

दर्येत्यत्रिः तदहश्चेन्न दुष्येत केनचित्सूतकादिना सूतकान्तेऽनन्तरं कुर्यात्पुनस्त
द्दर्श एव चेति तत्पूर्वकालाभावे ज्ञेयं एतच्चैकश्राद्धपरं यच्च देवलः एकोद्दिष्टे तु
संप्राप्ते यदि विघ्नः प्रजायते मासेऽन्यस्मिंस्तिथौ तस्मिन् श्राद्धं कुर्यात्प्रयत्नतः इति तद
पि मासिकपरमिति मदनरत्ने हेमाद्रौ च इदमपि पूर्वकालासंभवे माधवाचार्ये विस्म
रणे चैवं ज्ञेयं अपभार्यारजोदर्शने तत्र मासिकमामेन कार्यं श्राद्धविघ्ने द्विजातीनां
मामश्राद्धं प्रकीर्तितं अमावास्यादिनियतं माससंवत्सरादृते इति हेमाद्रौ हारीतो
क्तेः माधवीयेऽपि श्राद्धविघ्ने देशकालानां विप्लवे समुपस्थिते आमश्राद्धं द्विजैः
कार्यं शूद्रः कुर्यात्सदैव हि दीपिकापि दर्शेतुभार्यर्त्तावेषामर्थद्रविविप्रवासवि
धुराद्याश्चाचरेयुर्द्विजाः वस्तुतस्तु पाकाभावे द्विजातीनामामश्राद्धं विधीय
ते इति स्मृत्यन्तरोक्तेः पाककर्तुरसत्त्वेन नान्यथा मेनेति युक्तं मासिकानि स
पिण्डानि आमेनावा स्यात्तथाब्दिकं अन्नेनैव तु कर्तव्यं यस्य भार्या रजस्वलेति का
लिकायां वचनाच्च कालादर्शे तु स्त्रिया रजोदर्शने पितादिने एव कार्यं पुष्प
वत्स्वपि दारेषु विदेशस्थोऽप्यनाग्निकः अन्नेनैवाब्दिकं कुर्याद्धेम्ना वामेन न क
चिदिति माधवीये लौगाक्षिस्मृतेः मरीचिरपि अनग्निश्च प्रवासी च यस्य भा

नि.सिं.
३००

300

र्यो रजस्वला आमश्राद्धं प्रकुर्वीत न तत्कुर्यात्सुते इति कार्ष्णाजिनिः आपन्नो
प्याब्दिकं नैव कुर्य्याद्दामेन कुत्रचित् अन्नेनदमायांत क्षयेवा हरिवासरे प्रयो
गपारजाते रजस्वलायां भार्यायां सत्याहं यः परित्यजेत् स वै नरकमाप्नोति या
वदाहूतसंप्लवं मासिकानि सपिंडे च अमावास्या तथाब्दिकं अन्नेनैव तु का
र्तव्यं यस्य रजस्वला देवयाज्ञिकनिबंधेपि भर्तुः श्राद्धे पंचमेह्नि कुर्याद्भार्या
रजस्वला पुत्रः पित्रोः प्रकुर्वीत स्नाताह्निशुचिर्यतः कालादर्शेपि रजस्वलां
गतोनग्निर्विदेशस्थोप्याब्दिके दर्शादाविव नामेन वान्नेन श्राद्धमाचरेत् अ
न्यत्रापि विदेशगो वापि गतोऽग्निको वा रजस्वलायामपि धर्मपत्न्यां श्राद्धं स्व
ताहे विदधीत पाके नामेन हेम्नान्नतः पंचमेह्नि एवं मासिकेपि पद्ममरीचिः
आब्दिके समनुप्राप्ते यस्य भार्या रजस्वला पंचमेह्नि तच्छ्राद्धं न तत्कुर्यात्सुते
इति माधवीये श्राद्धं तद्दानकर्तव्यं कर्तव्यं पंचमेह्नीत्युत्तरार्धं तद्पुत्रस्त्री
कर्तृकश्राद्धविषयं अपुत्रा तु यदा भार्या संप्राप्ते भर्तुराब्दिके रजस्वला भवे
त्सा तु कुर्यात्तत्पंचमेह्नीति श्लोके गौतमोक्तेः दैवे कर्मणि पित्र्ये च पंचमेह
नि शुध्यतीति प्रभासखंडाच्च न चसूतिचदेवात्र पंचमेहन्यर्थात् श्राद्धं

राम
३००

300 - A

प्राप्तमितिवचनं त्वस्य मेवं गर्भिण्यां सूतकादिस्थ कुमारी वा परोगिणी
यदा शुद्धा तदान्येन कारयेदनुपनीतास्वयमिति हेमाद्रौ भाविष्योक्तेः अनुपनी
ता स्त्रीशूद्राश्च श्राद्धमात्रे जाकारयेयुः स्वयं वा अमंत्रकं कुर्युरिति स्मृत्यर्थसारा
च्चान्यद्वारा करणनिवृत्त्यर्थं चान्नस्यात्वदुक्तेदि शाप्राशौचानंतर श्राद्धकर्तृ मतावे
दकवाक्यवैयर्थ्याच्च अतः पत्नी पंचमेहनीति युक्तं यत्तु सप्ताहात्यितृदेवानां भ
वेद्योग्या व्रतावते इति तद्दृष्टोनिवृत्त्यपरं इति हेमाद्रिभिन्नसर्वनिबंधासिद्धांतः हेमा
द्रिस्तु श्राद्धादौ स्त्रियास्सहैवाधिकारात्तन्नसंचार जोडुष्टायां न त्रिहत्ते रेकभार्येणापंचमेह
नि कार्यं प्रागुक्तमरीच्युक्तेः भार्यांतरसत्वे पुष्यवत्स्वपीति वचनात्तद्दिने मृतेत्वा
हभार्ये नासति पंचमेचदिवसे स्याद्वार्षिकं मासिकं पक्षात्वेवं बहुभार्या कस्त्वधि का
रेयत्न्यंतरे तिष्ठति कुर्यात्ताद्धितयं स्वमस्यादिवसे इति तच्चिंत्यं सहाधिकारः स
हचमकृत्या वा एककफलभक्ते न वा पाककर्तृत्वेन वा नाद्यः तदभावात् पाणि
ग्रहणाद्धि सहत्वे कर्मस्थित्यस्याग्निसाध्यकर्मविषयत्वात् श्राद्धिकस्य च तन्नि
रग्नेरपि पाकेनैवोक्तेः स्मार्त्ताग्निसाध्यत्वानियमात् तामृपरुध्येति तत्रैवोक्त
वचनसत्वाच्च कथं च भार्यांतरसत्वेऽधिकारः ज्येष्ठपातावित्वेनतरेति निय
मात् ज्येष्ठापरत्वे च नैव सिद्धे वचनवैयर्थ्यात् न द्वितीयः अविभक्तभ्रातृष्वेक

नि. सिं.
३०२

301

स्याशुचित्वेप्यस्यानसिकारायत्तेः नतृतीयः प्रवासनिर्दशास्मृतिकौरोगिणपादिश्व
य्यकर्तृणापतेः आरभेननवैपात्रैरन्नारंभंचबाधवैरितिदेवलोक्तावात्मनेपदात्
स्वस्यबाधवानांचपाककर्तृत्वेऽप्यविरोधाच्च अथततस्तानियथाचाशुसौतार
न्ननकर्तृंदनीतिपाशादिलिंगात्स्त्राशस्सभार्यायाकस्यचेत्तनन्तात्कस्याप्यनिषेधते
नैतद्वचनयुक्ताद्यभावात् पूर्वोक्तवचोविरोधाच्च यत्किंचिदेव पदपि श्राद्धीयाह
न्तः निसंप्राप्तेयस्यभार्यारजस्वला श्राद्धंतत्रैकर्तव्यंकर्तव्यंपंचमेह्ननीति श्लोकगौतम
पाठोन्यपरदर्शितः माधवीयेचतद्वशान्यसांतरयुक्तं तेनापिनाभिप्रेतार्थसिद्धः
यस्यपत्नीत्यस्येत्यर्थात् तेनात्रहेमाद्रिर्विभ्रामेतिवक्तवक्तव्येऽपिनोच्यते अथान्वारोह ह
निर्णयः लौगाक्षिः मृतानाहृतिसमासेनपिंडनिर्वपणंपृथक् नवश्राद्धंचदंपत्योर
न्वारोहणएवतु समासेनेपिंडत्रेणादिपलकश्राद्धवद्वयोरेकः पिंडोविप्र
अपिंडशब्दः श्राद्धपरः नवश्राद्धंपृथ्वीचंद्रे अन्वमृतानान्येकचादिनभेदेदिनेक्यवा
मृतनिश्चेरेकत्वेकालेक्यकर्तृक्यंच एकचित्याधिरोहेतुतिथ्यैरैकैवजायते एकपा
केनपिंडैक्यद्वयोगृहीतनाममनीतिस्मृत्यंतरस्य अन्येत्विषयद्वितोम हेरस्युदाहृतं
अन्वारोहेनारीणांपत्युश्चैवोदकक्रियापिंडदानानक्रियानद्वश्राद्धंप्रत्याब्दिकं
तथा नवश्राद्धानिसर्वाणि सपिंडीकरणंपृथक् एकएवहयोत्सर्गोगोरेकात्त

राम
३०२

301-A तोऽत इति तिथिभेदेन वार्षिके पृथगेव १+

~~तत्रदीपे पृथक्कृते मासेन नवश्राद्धमेव पृथगिति~~ तथा वार्षिके समासविधानाद
न्यत्र सर्वत्र पृथक्त्वे मासेन नवश्राद्धमेव पृथगिति परिसंख्ययान्यत्र पृथक्त्वेऽपि का
र्षिकषोडशश्राद्धतीर्थसपिंडनात्वष्टकादिषु समास एवेति मदनपारजातनिर्ण
यामृतादयः अतः समासविधिबलाज्ज्येष्ठपुत्रस्य कर्तृत्वे सपत्न्या मातुश्चारोहणे दे
तत्पुत्रे सत्यपि तद्वार्षिकादिकमविभक्तः सापत्न्यपुत्र एव ज्येष्ठः कुर्यात् औरसः
वक्ष्यमाणपृथ्वीचंद्रादिमतेन औरस एव मातुः पृथक् कुर्यात् वह्नीष्वपि सर्वत्र
२७ मेयं तत्स्थलीसेतौ पितामहचरणैरप्युक्तं यत्तु गार्ग्यः एकचित्यां समारूढौ
दंपती निधनं गतौ पृथक् श्राद्धं तयोः कुर्यादोदनं च पृथक्पृथक् ओदनं पिंडः तत्र
वश्राद्धविषयं यत्तु भृगुः मासमारोहणं कुर्याद्भर्तुश्चित्यां पतिव्रता तां मृताहनि
संप्राप्ते पृथक् पिंडे नियोजयेत् प्रत्यब्दं च नवश्राद्धं ज्येयत्तु समापयेत् तद्धेयं वार्षिकार
भेकोद्दिष्टमुक्तं तद्विषयं प्रत्यब्दमृताहनीत्यन्वयः नवश्राद्धं युगपदि तिदर्शोवगोह्य
वदेकतंत्रेण पृथगित्यर्थमाह हेमाद्रिः एतन्मृततिथिभेदविषयमिति पृथ्वीचंद्रनिर्ण
यामृताद्याः देवयाज्ञिकोप्येवं पाराशरमाधवस्तु गार्ग्यभृग्वादिवचनात् लौगाक्षिवाक्ये
समासेन पाकादितंत्रैक्येन दर्शवद्वत् पृथक् श्राद्धं कुर्यात् नवश्राद्धं च तथेत्याह पृ
थ्वीचंद्रचंद्रिकादयस्तु द्वयोरेकपिंडदाने लौगाक्षिवचनं चायद्विषयं पृथक् पिंडदाने

नि॰सिं॰
३०२

302

तन्मुख्यः कल्पः तदाह स्कंदे पाराशरः आरुह्य भर्तृश्चितिमंगना या पापाश्रमेतिमस्त्वं रक्त
सत्वयुक्ता एकादशाहे तु तयोर्विधेयं श्राद्धं पृथक् स्वर्गमपेक्ष्य सद्भिः एकत्वमिष्टं
ति प्रतिगृहीता एकादशाहादिषु येन त्वा पृथक् तेस्वर्गमार्गं विनिहत्य कुर्युः सा सत्व
माता त्वरकाधिवासं भर्त्रा सह स्वर्गं तया पत्या नाक लोकसमीप्सती सार्द्धं श्राद्धं पृथक् पिं
गश्चैकत्वे तस्मात्तयोः पृथग्गोवाहिकं तथ्यं श्राद्धमेकादशाहिकं यानि श्राद्धानि
सर्वाणि ताभ्यां कुर्यान्ति पृथक् पृथगिति । विश्वादर्शेपि मातुर्गयायां काहस्थितान्मृता
श्च महालये श्राद्धं कुर्यात्पृथक् दैवं तत्रैवानुगतावपि एकचित्यां समारूढयोस्तयोरे
कवर्हिषि पितरो पिंडान् पृथग्दद्यादिदं त्वापस्तंबमतेन इत्याग्निस्त्रत्नेरित्याद्युः प
त्युर्वह्निः प्रान्मृते एकत्वे सा गता भर्तुः पिंडे गोत्रे च सूतके न पृथक् पिंडदानं तु तस्मा
त्पत्न्याश्च विद्यते इत्युक्त हर्षादिपरं चंद्रप्रकाशेपि एकचित्यां समारूढौ दंपती प्रम
तौ यदि पृथक् श्राद्धं प्रकुर्वीत पत्युरेव क्षये हनि ~~[illegible]~~ सृतानाम
पि स्त्रीणां भार्याणां पतिना सह तत्रैकाग्न्यमणं ज्ञात्वा श्राद्धं स्वामिक्षये हनि ऽ सर्व
कस्य स तस्याद्वितीयस्य ततः पुनः तृतीय स्यात्ततः कुर्यात्सन्निपाते त्वयं क्रमः इति
सहगमने सर्वत्र श्राद्धमेकपाकं स्यादाह मदनरत्ने प्रचेताः एकचित्यां समारूढौ
म्रियेते दंपती यदि तत्रैकाग्न्यमणं कुर्यात् पृथक् पिंडं समाचरेत् पत्नीचंद्रोदयेपि

302-A

वे अत्र भर्तृरशौचमध्ये न्यदिने स्त्रीमरणे पतिमरणादिनमारभ्याशौचं पिंडदानै
कादशादि कार्यं नात्र पाक्षिणीवद्धिः स्मृतेः पतिमनुव्रज्य पत्नी वेदनं गतं नत
त्र पक्षिणी कार्या पैतृकादेवमुद्ध्यति पुत्रोन्यो वाग्निदः तस्याः स्नानादेवास्तु विस्त
यः नवश्राद्धं सपिंडं च कृत्यापन्नं समापयेत् इति षडशीतिमतात् यदा नारी विशेद
ग्निं प्रियस्य प्रियवाञ्छया तदाशौचं विधातव्यं भर्तृशौचक्रमेण हि इति लघुहारीतोक्तेश्च भर्तृ
शौचोत्तरमन्वारोहणे तु अहमाशौचं ऋग्वेदवादात् साध्वी स्त्री न वेदात्मघातिनी त्र्याह
शौचे तत् निर्वृत्ते श्राद्धं प्राप्नोति शास्त्रतः इति ब्राह्मोक्तेरिति पृथ्वीचंद्रापराकौ एतदन्वारो।
हणे एव न त्वेकचितौ ऋग्वेदवादा इत्यनारोहविषयेत्यादिरिति एतदसवर्णापराभित्यन्येस्मा
त्तोमोडास्तदेशांतरस्मृते पत्यौ साध्वी तत्पादुकाहृदयमित्युपक्रम्य ब्रह्मे अहःशौचे तु निहते
इत्युक्तेर्भर्त्रशौचोत्तरमन्वारोहणे त्र्यहः सहगमने तु पूर्णं दशाहादि पिंडास्तु दशापि सद्ये
व तथा वज्रिकानस्मृत्पाणि शुद्धिर्न तत्र ध्यन्तव्या मृतः संस्थितं पतिमालिंग्य प्रविशेद्या हुताश
नं तस्याः पिंडादिकं देयं क्रमशः पतिपिंडवत् अन्वितं वा पिंडदानं तु पत्याभर्तृदिने दिने तदर्धा
रोहिणीयस्यान्नस्मात् स्नानात्मघातिनी इति विच्छन्नोक्तेश्च पृथक्चितौ तु भर्त्राशौचमध्येन्तु
र्वितीयोऽप्यारोहणादशपिंडाः अन्वितयाः प्रदातव्या दशपिंडास्स्वारोहणेन तु स्वाम्यशौचे व्यती
तेन तु तस्याः श्राद्धं प्रदीयते इति तत्रैव पैठीनसिस्मृतेः भर्त्रशौचोत्तरमृते तु चतुर्थे द्विश्रा
द्धं स्वलिपाणिनात्विदमग्निपुराणीयत्वेनोक्तः पृथक्चितस्य सद्यः शौचे त्वारोहणे त्रिरात्रं ।

प्राक्चितौ न संस्थितस्य पतिमिति प्रागुक्तव्यासोक्तेः सद्यः शौचमित्याहुः अन्यसपिंडशौचमध्ये
त्वाशौ[illegible]मरणे त्वनाशौचमेव च स्मृतिचिंतामणौ गार्ग्यात् अन्ये तु रजोवत्याः स्नानकाया अगम-
ननिषेधादनंतराशौचस्यानिषेधमाहुः तन्मूलवचनं विनाचिंत्यमेव स्मृत्यर्थसारे सह-
गमने सर्वत्र श्राद्धपिंडदानादिकं कालैक्यं कर्तैक्यं चोक्तं या तु पतिमृतिदिने यान्यकालेन्यति
थावन्वारूढा तस्याः श्राद्धं तत्क्षयतिथौ कार्यं न भर्तृतिथौ पारणे मरणे नृणां तिथिस्तात्का-
लिकी स्मृतेति स्कांदे तिथिरेके च जायते इत्यादिवचनाच्चेति मदनपारिजातपृथ्वीचंद्रो-
दयः अन्ये तु तस्याः पतिमरणेन मृतप्रायत्वात् सहगतः पृथक्तो वा तत्र मृता म्रियते यदि त-
स्याः श्राद्धं प्रदातव्यं पृथक् पत्युः क्षयेहनि इति स्मृत्यंतरात् अगतः पृथक्तो वापि तत्र स्त्री
म्रियते यदि तस्याः श्राद्धं [illegible]सुते कार्यं पत्युरेव क्षयेहनीति पुराणसमुच्चयाच्च भर्तृतिथा-
पावेवेत्याहुः तन्मूलं चिंत्यं अत्र विशेषो हेमाद्रौ स्मृत्यंतरे माता मंगलसूत्रेण म्रियेत
यद्दिनेह्नि उद्दिश्य विप्रं तेनैतां भोजयेच्च सुवासिनीं अथ श्राद्धसंपत्तिनिर्णयः तत्र पित्रो-
र्ष तत्तिथौ काले मरणं क्रमेण दर्शवर्गद्वयवंत्रेण श्राद्धं कुर्यात्तत्रायं पो ज्ञानेन तु पितुः पूर्वं
[illegible]कुर्यादिति हेमाद्रिः माधवादयस्तु पित्रोः श्राद्धे समं प्राप्ते नवे पक्षे चिते पि वा पितुः पूर्वं
सुतः कुर्यादन्यत्रासति योगतः इति कार्ष्णाजिनिः स्मृतेः सर्वत्र पितुः पूर्वं भिन्नप्रयोग-
माहुः पार्वणैकोद्दिष्टसंपाते माधवीये जाबालिः यद्येकत्र भवेयातामेकोद्दिष्टं च पा-
र्वणे पार्वणं त्वभिनिर्वर्त्य परा एकोद्दिष्टं समाचरेत् गृहदाहादिना युगपन्मरणे तु भृगुः

त्रि

एककालेगतानां सूतानां वा बहूनामथवा द्वयोः तंत्रेण श्रपणं कृत्वा कुर्याच्छ्राद्धं पृथक् पृथक् ।
पूर्वं कस्य मृतस्यादौ द्वितीयस्य ततः पुनः तृतीयस्य ततः कुर्यात् संनिपाते त्वयं क्रमः अथ्य
ग्रे गामगाः भवेद्यदि पिंडानां उपगायत्तारणं तदा संबंधासत्तिमामालोच्य तत्क्रमात् श्राद्धमाच
रेत् गृहे एकेनैव तु पाकेन श्राद्धानि कुरुते न हि विकरं त्वेकतः कुर्यात् पिंडान् दद्यात् पृ
थक् पृथक् अत्रानुगमने बह्वाह्नसपिंडनादौ विशेषं वक्ष्यामः अत्रिः बहूनामथवा द्व्या
र्वा श्राद्धं देयात् मृयते इति तंत्रेण श्रपणं कृत्वा श्राद्धं कुर्यात् पृथक् पृथक् इदं च पृथक्
पाकेन भिन्नश्राद्धाशक्तौ पृथक् पाकेन संबंधासत्त्या श्राद्धभेद इत्युक्तमपरः पक्षः एकत्रैव
दिने श्राद्धद्वयं प्राप्तं यदा तदा वरे देवपुरा वर्षात् पितुर्मातुश्च ततः तु ततः एकस्मिन् यः करोत्या
द्धि द्वयोः श्राद्धं यदा द्विजः तदा पूर्वं मृतस्यादौ कृत्वा स्नात्वा यथाविधिः पश्चात्पश्चात् ।
मृतस्यैव पृथक् पाके समाचरेत् नैकस्मिन् दिवसे श्राद्धत्रयाणां कुत्रचिद्द्विजः एकः
कुर्यात्तयाप्राप्ते अन्योभ्राता समाचरेत् भ्रातर्यविद्यमाने तु तत्परेह्नि समाचरेत् अन्य
श्राद्धाद्वहंतास्यात्श्राद्धसंकरहृद्भवेत् इत्याश्वलायनोक्तेरिति पृथ्वीचंद्रः कृत्वाय
नः द्वे बहूनि निमित्तानि जायेरन्नेकवासरे नैमित्तिकानि कार्याणि निमित्तोत्पत्तु
नुक्रमात् जावालिः श्राद्धं कृत्वा तस्यैव पुनः श्राद्धं न तद्दिने नैमित्तिकं तु कर्त
व्यं निमित्तानुक्रमोदये कालादर्शे नित्यदार्शिकयोः श्राद्धं कुंभमासिकयोरपि स

शिकस्य युगादेश्च दार्शिकालभ्ययोगयोः दार्शिकस्य च मन्वादेः संपाते श्राद्धकर्मणः
प्रसंगादि तिरस्यापि सिद्धेरतन्त्रमाचरेत् अत्र स्याद्देवताभेदे वादमाहृस एव नित्यस्य चो
दकुंभस्य नित्यमासिकयोरपि दर्शस्य चोदकुंभस्य दार्शिमासिकयोरपि नित्यस्य चा
ब्दिकस्य वाब्दिकस्यापि दार्शिकाब्दिकयोरपि युगाद्याब्दिकयोरपि युगाद्याब्दिकयो
स्तथा प्रत्याब्दिकस्य वा लभ्ययोगेष्वविहितस्य च संपाते देवताभेदाच्छ्राद्धस युग्मं समा
चरेत् निमित्तानि गतिश्चात्र पूर्वा[illegible]नुष्ठानकारणं पित्रोस्तु पित्र्यपूर्वत्वं सर्वत्र श्राद्ध
कर्मणि माधवीये स्मृतिसंग्रहे काम्यतन्त्रेण नित्यस्य तन्त्रं श्राद्धस्य सिद्ध्यति अथ यमश्रा
द्धांगतर्पणं पारिजाते पृथ्वीचंद्रोदये गर्गः पूर्वे तिलोदकं दत्वा आमश्राद्धं तु कारयेत् पु
त्यब्दे न भयेत्स्वं परेहनि तिलोदकं पक्षश्राद्धे हिरण्ये च अप्यश्चयुते तिलोदकं न च नित्यत
र्पणस्यैवापपरेद्युत्कर्षः न तु श्राद्धांगतर्पणमस्तीति वाच्यं यस्तर्पयति तानि विप्रः श्राद्धं
कृत्वा परेहनि पितरस्तेन तृप्यंति न चेत्कुर्यंति वै भृशमित्यादि गर्गेण फलनिंदार्थवादाभ्या
गतोक्तेः श्राद्धं प्रक्रमाद्वार्षिकं तद्दर त्रारदीपे प्याब्दिकं प्रक्रम्यापरे द्युः श्राद्धकृत्नस्नैयो
न तर्पयेत् पितॄन् तस्य ते पितरः क्रुद्धाः शापं दत्वा व्रजंतीति पितृशब्दश्च श्राद्धेज्यवर्गपरः
तेन तर्पणस्य यत्र पुरोडाशयागवत्प्रस्तरप्रहरणवच्चेष्टदेवतासंस्कारकत्वं तेनाब्दि
कादिने नित्यस्व पित्रादितर्पणं कार्यमेव श्राद्धांगत्वं तस्यैव परेद्युरुक्तेः तदुक्तं पृथ्वी
द्धांगं तिलं दद्यान्निषिद्धेपि परेहनि वर्गैकस्य वचो येषामन्येषां तु विवर्जयेत् क्वचि

द्विशेषमाह गार्ग्यः कृष्णे भाद्रपदे मासि श्राद्धं प्रतिदिनं भवेत् पितॄणां प्रत्यहं कार्यं निषि
द्धाहे पितृतर्पणं तिलतर्पणं निषिद्धाहेपीत्युक्तेः सकृन्महालये श्रास्यादस्त्रकार्यं तत्ता एव
हि अत्र सप्तमीनिर्देशादंगितास्फुटैव तत्र जायते तु कुर्यात् मद्धं प्रातःसवने इत्यादिव
त् अस्यापवादो बृहन्नारदीये वृद्धिश्राद्धे सपिंडे च प्रेतश्राद्धेनुमासिके संवत्सरवि
मोके च न कुर्यात्तिलतर्पणं तदयमर्थः दर्शादिषु निमंत्रणोत्तरं पाकारंभोत्तरं वा।
श्राद्धप्रयोगस्यारब्धत्वात् ब्रह्मयज्ञोत्तरं नित्यतर्पणे नैव श्राद्धांगतर्पणस्य तंत्रेण प्रसं
गेन वा सिद्धिः ततः पूर्वं वैश्वदेवानंतरं वा ब्रह्मयज्ञकरणे श्राद्धांगतर्पणं पृथक् कार्यं।
पित्रोर्वार्षिके तु नित्यतर्पणं तिलवर्जं तिलकार्यं नैव श्राद्धदिने कुर्यात् तिलैस्तु पितृत
र्पणं श्राद्धे कृत्वा परेह्नि च तर्पणं तु तिलैः सहेति वचनात् सप्तम्यां भानुवारे च मातापित्रो
र्मृतेहनि तिलैर्यस्तर्पणं कुर्यात्स भवेत् पितृघातक इति स्मृतिरत्नावल्यां वृद्धिमनु
नोक्त्या अत्र नित्यतर्पणे तिलमात्रनिषेधः न तु तर्पणस्य तिलैस्तर्पणमाचरेदिति तत्परे
द्युः श्राद्धांगतर्पणविषयमिति केचित् श्राद्धाशक्तस्य तत्स्थाने पूर्वोक्ततर्पणं विषयमि।
त्युक्तं सकृन्महालये परेद्युस्तर्पणं अष्टकासु तु सप्तम्यष्टमीश्राद्धयोरंते न देवर्गो
द्यपस्य आशिष्टवैयस्तु मातृवर्गस्यापि पितृतीर्थे श्राद्धे दर्शवत्तामापार्वणादिष्वक्रा
वदंते अनेकश्राद्धसंपातस्य तंत्रेण यदि तत्प्रसंगसिद्धिस्तदा तदायमेव तर्पणं तत्रा।
त्वेन तु श्राद्धसमसंख्यत्वे आदावंते या विषमसंख्यायां बहुन्देशे चेति तस्माद्धा

नि॰ सिं॰
३०५

305

ङ्गंगतंतर्पणंसिद्धं तिद्विधिः संग्रहेस्नात्वातीरंसमागत्यउपविश्यकुशासने संतर्पये
त्पितॄन्सर्वान्स्नात्वावस्त्रंचधारयेत् तर्पणोत्तरंनित्यस्नानंकुर्यादित्यर्थः अपसव्यंततः
कृत्वासव्यंजान्वाच्यच ततोनामगोत्रस्वधाकारैर्द्वितीयांतेनतर्पयेत् अत्रवस्वादि
रूपेणोक्तास्मृत्यर्थसारे वसुरुद्रादितिसुतान्श्राद्धार्थंतर्पयेत्पितॄन् तत्रबह्वृचानां
दक्षिणेनैवअन्नादेशाद्दक्षिणाप्रतीचीपादितिसूत्रात् अत्रप्रत्यंजलिमंत्रावृत्तिः [illegible]
निर्वापवत्संध्यार्घ्यदानवच्चद्रव्यभेदात् अवघातेवेदिप्रोक्षणादौतुद्रव्येकृत्वातुमंत्रावृ
त्तिः केचित्तुपरिधानमंत्रवाक्रियमाणानुवादित्वेनकरणत्वाभावात्सकृदिच्छंति त
न्नतत्रस्पद्रव्येकात्यरिवीरसीतिकरणीभूतमंत्रांतरसत्त्वादन्वानरेणाव्यवधाना
पपत्त्याभयोःकरत्वायोगात्कन्नभेदेनविकल्पायोगाच्चक्रियमाणानुवादित्वे न
त्वत्रतर्पयेत्तिबौधायनादिवचनात्करत्वमेव तेनावृत्तिरेवयुक्ता एवंनित्येपियन्तुसंग्र
हनाम्नापठंति पित्रोःक्षयाहेसंप्राप्तेयःकुर्यान्नित्यतर्पणं आसुरंतद्भवेत्कुर्याद्धतत्तोयं
रुधिरंभवेत् सर्वदातर्पणंकुर्यात्ब्रह्मयज्ञपुरःसरं मृताहेनैवकर्तव्यंकृतेचेन्निष्फ
लंभवेदितितत्स्मृत्यंतरेसतितद्विषयं पद्मपठंतिकपिलः मन्वादिषुयुगाद्यासुद
र्शसंक्रमणेचपौर्णमास्यांव्यतीपातेदध्यात्स्वैर्तिलोदकं अर्धोदयेगजच्छायेषष्ठ्यां
चमहालये भरण्यांचमघास्वाद्धतद्दत्तेतर्पणंविदुः शौनकः मातापित्रोर्मृताहे

राम
३०५

305-A

तत्परेहनि तिलोदकं कारुण्यपक्षाद्विषये सघात्रिलोदकं एतन्निर्मूलं अथ तिलतर्प
णनिषेधः गार्ग्यः भानौ भौमे त्रयोदश्यां नंदाभृगुमघासु च पिंडदाने मृदा स्नानं न कुर्यात्ति
लतर्पणं स्मृत्यर्थसारे विवाहव्रतचूडासु वर्षमर्धं तदर्धकं अर्धं तदेव वस्त्रैौ सत्यां च
तन्मासि नेत्याहुः तिलतर्पणं हेमाद्रौ मरीचिः सप्तम्यां रविवारे च गृहे जन्मदिने तथा ।
निशासंध्यासु पुत्रार्थी न कुर्यात्तिलतर्पणं गृहे नंदायां भार्गवदिने कृत्तिकासु मघासु च
भरण्यां भानुवारे च गजच्छायाह्वये तथा अनयद्वितीये चैव मन्वादिषु युगादिषु पिंडदाने
मृदा स्नानं न कुर्यात्तिलतर्पणमिति तच्चिंत्यं मानीयमप्यत्र तिलैर्विमिश्रं दद्यात्पितृभ्यः
प्रयतो मनुष्य इत्यादि विरोधात् अत्र अपवादः पृथ्वीचंद्रोदये तीर्थे तिथिविशेषेषु गंगा
यां प्रेतपक्षके निषिद्धेपि दिने कुर्यात्तर्पणं तिलमिश्रितं स्मृत्यर्थसारेपि तिथितीर्थविशे।
षेषु कार्यं प्रेतपक्षके । निषिद्धेपि दिने कुर्यात्तर्पणं तिलमिश्रितं स्मृत्यर्थसारेपि तिथितीर्थ
विशेषेषु कार्यं प्रेते च सर्वदेति गोभिलः तिलाभावे निषिद्धाहे सुवर्णरजतान्वितं तदभा
वे निषिंचेत्तु दर्भैर्मंत्रेण वा पुनः पतितस्य तिलोदकं वक्ष्यामः अथ वृद्धिश्राद्धं तन्निमित्तं
पृथ्वीचंद्रोदये ब्राह्मे जन्मन्यथापनयने विवाहे पुत्रकस्य पितॄन्नांदीमुखान्नाम तर्पयेद्विधि
पूर्वकं वेदव्रतेषु चाधानाय पुंसवनेषु च नवान्नभोजने स्नाने ऊढाप्रथमार्तवे देवारा
मतडागादिप्रतिष्ठासूत्सवेषु च राजाभिषेके बालान्नभोजने वृद्धिसंज्ञकान् वनस्थाश्र।
मं गच्छन् एवं धुः सघाएवं च पितॄन्सर्वोक्तविधिना तर्पयेत्कर्मसिद्धये विष्णुपुराणे यतो

दाहप्रतिष्ठासुमेखलबंधमोक्षयोः पुत्रजन्मवृषोत्सर्गे वृद्धिश्राद्धं समाचरेत् तत्रैव नामकर्मणि
बालानां चूडाकर्मादि तथैव तु केचिन्निष्क्रमान्नप्राशनयोर्न श्राद्धमिति मैथिलाः तन्न सर्वोक्तवि
रोधात् नान्देति निषेधात्तु तेषामनेनैव तत्याज्यश्राद्धमन्नप्राशने केतिराजमार्तंडाच्च यत्तु छंदोग
परिशिष्टं स्वयंहोमः कर्महीनं यत्तु तयोः श्राद्धं न विद्यत इति तत्तु ग्रामेवेति कल्पतरुचन्द्रच
कारिकायां स्याभ्युदयिकं श्राद्धं प्रकुर्वीत द्विजो वृद्धिनिमित्तकं अन्येः षोडशसंस्कारस्था
वसाने द्विजपीष्यते वाप्याद्युद्यापनादौ तु कुर्युः सर्वनिमित्तकं वोपदेवकालादर्शौ सी
मंतव्रतचौलनामकरणान्नप्राशनोपायनस्नानाधानविवाहयज्ञतनयोत्पत्तिप्रतिष्ठासुर
च पुंसूत्यावसथप्रवेशनसुतामुखालोकाश्रमस्वीकाराख्ये तिप्रभिषेक दयिताघ
नो वनादी मुखं यत्तु कामधेनौ जलाशयप्रतिष्ठायां वृषोत्सर्गादिकर्मसु वत्सराभ्यं
तरे पित्रोर्वृषस्योत्सर्गकर्मणि वृद्धिश्राद्धं न कुर्वीत तदन्यत्र समाचरेदिति तत्र जलाशये
वृद्धिश्राद्धस्य निषेधो न तु कर्मांगस्येति केचित् अन्ये त्वस्य निर्मूलतामाहुः श्राद्धकौमुद्यां
निर्णयामृते च मात्स्ये अन्नप्राशे च सीमंते पुत्रोत्पत्तिनिमित्तके पुंसवने निषेके च नव
वेश्मप्रवेशने देववृक्षजलादीनां प्रतिष्ठासु विशेषतः तीर्थयात्रावृषोत्सर्गे वृद्धिश्राद्धं
प्रकीर्तितं इदं चावश्यकं तत्रैव न तर्पिता ये वै पितरो यैर्गृहस्थिभिः तद्दत्तमफलं तेषु
मासुरो विधिरेव स इति शातातपोक्तेः अत्र श्राद्धत्रयं प्रपंस एवाह मातृश्राद्धं तु सर्वेषां
पितॄणां तदनंतरं ततो मातामहानां च वृद्धौ श्राद्धत्रयं स्मृतं तत्कालमाह षष्ठीचंद्रो

306-A

दयेगार्ग्यः मातृश्राद्धं तु पूर्वेद्युः कर्माहनि तु पैतृकं स्मृतं ततो मातामहानां च वृद्धौ श्रा
द्धत्रयं स्मृतं अशक्तौ वृद्धशातातपः पूर्वाह्णे मातृकं श्राद्धं मध्याह्ने पैतृकं स्मृतं ततो
मातामहानां च वृद्धौ श्राद्धत्रयं स्मृतं अत्राप्यशक्तौ स एव पृथक् दिनेष्वशक्तश्चे
देकस्मिन्नेव वासरे श्राद्धत्रयं प्रकुर्वीत वैश्वदेवं तु तांत्रिकमिति वृद्धमनुरपि अला
भे भिन्नकालानां नांदीश्राद्धत्रयं बुधः पूर्वेद्युर्वै प्रकुर्वीत पूर्वाह्णे मातृपूर्वकं अत्र म
हत्सु पूर्वेद्युस्तदहरस्येच्छितिमहत्परिशिष्टाद्यावस्या ज्ञेयाः तच्च प्रातरेव पार्वणं चा
पराह्णे तु प्रातर्वृद्धिनिमित्तकमिति शातातपोक्तेः अत्र प्रातःशब्दः सार्धप्रहरपरः प्रहरा
ष्वर्धसंयुक्ते प्रातरित्यभिधीयते इति गर्ग्योक्तेरिति पृथ्वीचंद्रः इदं च पुत्रजन्मातिरिक्तवि
षयं तदाहात्रिः पूर्वाह्णे वै भवेद्वृद्धिर्विना जन्मनिमित्तकं पुत्रजन्मनि प्रकुर्वीत श्रा
द्धं तत्कालिकं बुध इति एतदनियतनिमित्तपरं नियतेषु निमित्तेषु प्रातर्वृद्धिनिमित्त
कं तेषां नियतत्वेन तदानंतर्यमिष्यते इति लौगाक्षिस्मृतेः आधानांगं नांदीश्राद्ध
ते पराह्ण एव आमश्राद्धं तु पूर्वाह्णे सिद्धान्नेन तु मध्यतः पार्वणं चापराह्णे तु वृद्धिश्राद्ध
तथाग्निकमिति निर्णयामृते गालवोक्तेः नांदीमुखाह्वयं प्रातराग्निकं त्वपराह्णतः
इति विष्णूक्तेश्च इदं मातृपितृमातृमातामहादिक्रमेणानवदैवकार्यं तत्र मातामह
सा[struck] सपत्नीकाः वृद्धिप्रमातामहानां सपत्नीकोमिति पृथ्वीचंद्रोदये गार्ग्य
[struck] गाधरूपेण पाठात् हेमाद्रौ शंखः नांदीमुखेभ्यो देवेभ्यः प्रदक्षिणं कुशासर

ते पितृभ्यस्तन्मुखेभ्यश्च प्रदक्षिणमिति स्मृतिः यत्तु वृद्धौ वसिष्ठः नांदीमुखेषु विवाहे
च प्रपितामहपूर्वकं नाम संकीर्तयेद्धि द्विजाननन्यत्र पितृपूर्वकं यच्च स्मृत्यर्थसारे वृ
द्धौ मुखव्यास्तु पितरो वृद्धिश्राद्धेषु भुंजते इति यच्च गारुडे वृद्धौ तत्क्रमप्रतिपादनं तद्वारं वा
न्तरविषयं पितृभ्यः पितामहेभ्यः प्रपितामहेभ्य इति बह्वृचपरिशिष्टे कात्यायने
चानुलोम्याम्नानात् पृथ्वीचंद्रोदये प्येवं यत्तु केचिद् वृद्धपदं पित्रादिषु प्राङ्मुंजते त
त्र अन्यस्माद् वृद्धसाद्बानामरूपाणामगोत्रिणां अनाम्नामति लाघेश्च नांदीश्राद्धं तस
मवृदिति पृथ्वीचंद्रोदये संग्रहोक्तेः नच निषेधादेव विधिः कल्प्यत इति वाच्यं प्रोष्ठपदी
श्राद्धे प्रपितामहात्परेषां वृद्धपित्रादीनां देवतात्वान्नांदीश्राद्धत्वसाम्येनेहापि तत्प्राप्तौ नि
षेधात् गोत्रनामादिनिषेधस्तु भार्या प्रथमं तेन वृद्धो संकल्पमाचरेदिति उपक्रम्य त
न्नस्य वृद्धिरवदाता मिल्युक्तेः संकल्पश्राद्धपरः सपिंडके तु सर्वं भवतीति प्रयोगपारिजातः
गोत्रनामभिरामंत्र्य पितृभ्योऽर्घ्यं प्रदापयेदिति छंदोगपरिशिष्टे तद्विधानात् यत्तु ब्रा
ह्मे पिता पितामहश्चैव तथैव प्रपितामहः त्रयो ह्यश्रुमुखा ह्येते पितरः परिकीर्तिताः ते
भ्यः पूर्वतरा ये च प्रजावंतः सुखैधिताः ते तु नांदीमुखा नांदीसमृद्धिरिति कथ्यते इति
यच्च मार्कंडेयपुराणे येस्युः पितामहादूर्ध्वं ते तु नांदीमुखाः स्मृता इति तज्जीवत्पित्रादि
त्रिककर्तृकवृद्धिविषयं तेन तस्येदं मावश्यकं यत्तु विष्णुः पितरि पितामहे प्रपिता
महे च जीवति नैव कुर्यादिति तदुर्गादिविषयमिति कल्पतरुः मदनपारिजाते प्येवं हे

307 - A

मातृहीनानां नांदीमुखानां श्राद्धं तु कन्याराशिगते रवौ पौर्णमास्यां तु कर्तव्यं च राहुवचनं
यथेति प्रोष्ठपदीश्राद्धे कथं वा कर्त्तव्यं तत्रैव पर्वैव वा देवतात्वमित्याह यत्तु शातातपः ।
मातृश्राद्धं तु युग्मैः स्याद्दैवं प्राङ्मुखैः पृथगिति तद्भिन्नप्रयोगमातृश्राद्धद्वये दैवाविवेके
त्याज्ये प्रयोगैक्ये तु देवनियम इति हेमाद्रिः एतच्च मातृपूजापूर्वकं कार्यं अकार्ये
कृत्वा मातृयागं तु यः श्राद्धं परिवेषयेत् तस्य क्रोधसमाविष्टा हिंसामिच्छंति मातरः
इति शातातपोक्तेः कौर्मे पितृश्राद्धे यः सनैवेद्यैः स्रग्भूषणैरपि पूजयित्वा मातृगणं
कुर्याच्छ्राद्धत्रयं बुधः छंदोगपरिशिष्टे कर्मादिषु तु सर्वेषु मातरः सगणाधिपाः पूज-
नीयाः प्रयत्नेन पूजिताः पूजयंति ताः प्रतिमासु च शुभ्रासु लिखिता वा पटादिषु अपि
वाक्षतपुंजेषु नैवेद्यैश्च पृथग्विधैः कुड्यलग्नां वसोर्धारां सप्तधारां घृतेन तु कारयेत्पंच
धारां वा नातिनीचां न चोच्छ्रितां आयुष्याणि च शांत्यर्थं जप्त्वा तत्र समाहितः षड्भ्यः
पितृभ्यस्तदनु श्राद्धदानमुपक्रमेत् अत्र सर्वेष्विति ग्रहणात्क्षयपक्षत्तद्धिकारेष्वपि ।
नित्यश्राद्धं नानिकान्तु पितृनुश्राद्धे कर्म किंचित्समाचरेदिति शातातपोक्तेः द्वयं च व
सोर्धारात्राष्टारवीयानां नियता अन्येषां त्वनियता वत्सल्य वारवगृह्योक्तमित्युक्तेः
करणे त्वभ्युदयः यन्नाम्नैतं स्वशाखायामित्युक्तेः आयुष्याणि आनो भद्रा इत्या-
दीनि षडध्याय इति मात्रादि त्रिकोपन्नलक्षणमिति पृथ्वीचंद्रः छंदोगानां षड्दैवत्यमन्ये-
षां न च दैवत्यमित्यार्काः मम तु मतं कौकिलमतानुसारिणं मातृमातामहपृ

मातामहा इति मात्रा सहैव मातामहश्राद्धकरणान्वृद्धिश्राद्धमिदं षड्दैवत्यमिति मातर
स्तत्रैवोक्ताः गौरी पद्मा शची मेधा सावित्री विजया जया देवसेना स्वधा स्वाहा मातरो
लोकमातरः धृतिः पुष्टिस्तथा तुष्टिरात्मदेवतया सह गणेशेनाधिका ह्येता वृद्धौ पूज्या
श्चतुर्दश मातरो लोकमातर इति सर्वविशेषणं तेन चतुर्दशत्वं यदा षोडशेति पाठस्तदा
देवतांतरं चेद्रकार्यं चतुर्विंशतिमते त्वन्या उक्ताः तिस्रः पूज्याः पितुः पक्षे तिस्रो मातामह
हे तथा इत्येता मातरः प्रोक्ताः पितुर्मातृस्वसाष्टमी आसां जीवने प्रत्यक्षं पूजनं मृतानां
प्रतिमां कृत्वा पूजेति हेमाद्रिः ब्रह्माण्याद्यास्तथा सप्त दुर्गाक्षेत्रगणाधिपान् वृद्धा।
दौ पूजयित्वा तु पश्चान्नांदीमुखान्पितॄन् मातृपूर्वान्पितॄन्मातामहानपि मातमहीं
स्ततः केचिद्युग्मा भोज्या द्विजातय इति अत्र छंदोगादेवतास्वदेशाचारतो व्यवस्था ब्रह्मा
ण्याद्याः ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा वाराही च तथेंद्राणी चामुंडा सप्तमा
तरः इत्यपरार्के उक्ताः अत्र चौलादीनां यौगपद्ये तंत्रेणोक्तं छंदोगपरिशिष्टे गणेशः क्रिय
माणानां तस्मात्भ्यः पूजनं सकृत् सकृदेव भवेच्छ्राद्धमादौ न पृथगादिषु मातृभ्य इति वृत्त
यैचतुर्थी गणेशः एकानेकपुत्राणां संस्कारेष्वेकदिने एकदेशकालकर्त्रैक्यादितंत्रपर्थः त
थाश्वलायनानि कर्माणि क्रियेरन् कर्मकारिभिः प्रतिप्रयोगं नैव स्युर्मातरः सगणाधिपाः
कर्मण्यत्राव्यपि कुत्र श्राद्धं कार्यं कृत्रनेत्रनेतत्कृतं तत्रैव आधाने होमयोश्चैव वैश्वदेवे
तथैव च बलिकर्मणि दर्शे च पूर्णमासे तथैव च नवयज्ञेव यज्ञ ता वदंत्येवं मनीषिणः

308-A

एकमेव भवेच्छ्राद्धमेतेष्वनपकृष्य कृ एवं प्रतिप्रयोगं नावर्त्तते किं चादौ एतद्दिन्नेसोमया
गादौ तु प्रतिप्रतिप्रयोगमावर्त्तत एव श्राद्धमित्यर्थः क्वचिदादावपि निषेधमाह स एवानाएको
स्तु भवेच्छ्राद्धे श्राद्धमिष्यते न सोऽतीतानागतकर्मशेषितानागतकर्मस्तु विवाहादिः कर्मणामाद्य उक्तो
गर्भाधानमुखस्तेषां स्यवाते विवाहादावेकमेवात्र कुर्याच्छ्राद्धं नादौ कर्मणः स्यात् सोष्यंतीसम्भु
क्ते तु तत्कर्म कात्यायनोक्तस्य श्राद्धस्य पाकप्राधान्यात्तस्य च जातश्राद्धे तदद्यात्तुपकान्नं ब्राह्म
णेष्विति निषेधात्र जातकर्मणि नांदीश्राद्धं आमान्नेन वा कार्यमित्याशार्कः गौडास्तु जातकर्म
ण्येव निषेधः पुत्रजन्मनिमित्तं तु कार्यमेव जन्मन्यथोपनयने स्तु क्तेः नैमित्तिकमथो वक्ष्ये
श्राद्धमभ्युदयात्मकं पुत्रजन्म[illegible]नितत्कार्यं जातकर्मसमं नरैरिति मार्कंडे
यपुराणाच्चेत्याहुः हारलतायां श्राद्धविवेके चैवं एतेन जातकर्मणि काम्यांतरं श्राद्ध
निषेधो न जन्मदिन इति वाचस्पतिमतेपरास्तं अत्र निषेककाले इतिवचनात् गर्भाधा
ने न निषेधो प्राप्तिरिति प्रोष्येत गृहान्नुपतिष्ठे भे पुत्रं दृष्ट्वा जपतीति विहितं कर्मणि
वाहादिगर्भाधानांतो योगः स पूर्व शेषे इति होम चतुर्थी कर्मादिः कर्मसमूह उक्तः स्तत्र
कार्येणतत्राणि प्रति कर्मनेत्यर्थः अन्येपि हलाभियोगादयोऽप्यावादविषयास्तत्रैव
ज्ञेयाः अप्रचारान्नोच्यंते अथात्राधिकारिणः विष्णुपुराणे जातस्य जातकर्मादिक्रिया
कांडमशेषतः पिता पुत्रस्य कुर्वीत श्राद्धं चाभ्युदयात्मकं अत्र केचित् जीवत्पितुः सागौ
रेव वृद्धिश्राद्धेऽधिकारः न तु निरग्नेः न न जीवत्पितृक कुर्याच्छ्राद्धमग्निमृते द्विजः येन

भ्य एव पितादिभ्योन्येभ्यः कुर्वीत साग्निकः पितामहेभ्यो वा कुर्याज्जीवति साग्निकः साग्निको
पि कुर्वीत जीवति प्रपितामहे इति चंद्रिकायां तु मंत्रत्रमेरित्याहुः प्रयोगपारिजातेप्यनाहिता
ग्निर्न कुर्यादित्तीर व्याख्याते तत्र अनाग्निकोपि कुर्वीत जन्मादौ वृद्धिकर्मणि प्रथमं भ्य एव पिता
दद्यात्तानेवोद्दिश्य तर्पयेदिति हारीतोक्तेः सोमंतवं तु हद्दृ श्राद्धभिन्नश्राद्धपरमित्युक्तम्
दनराते पिंडपितृयज्ञपरमिति पृथ्वीचंद्रः निर्णयामृते तु हारीतीये नाग्निकोनाहिताग्नि
रभिप्रेतः पूर्ववचने तु साग्निः श्रौताग्निस्मार्ताग्निश्चोच्यते तेनोभयाग्निहीनस्यनेत्युक्तं
तत्र पूर्वोक्तदिशा गतिसंभवे नाग्निपदस्य स्मार्ताग्निश्रौतपरत्वे मानाभावात् वक्ष्यमा
णनित्यसंयोगविरोधात् पितरो जनकस्येत्यादावुत्तमनाहितं समाहितः अतः पश्चा
त्वानपत्नेन पितामहादीनिति पृथ्वीचंद्रोदये पूर्वमवचो विरोधाच्च अपरार्केपि समावर्तने तु ब्र
ह्मचारी स्वयमेव नांदीश्राद्धं कुर्यादित्याह अतः पूर्वमेव साधु वोपदेवोप्येवमाह यत्तु मते
जीवत्पितुः पुत्रनामकर्मादौ न वृद्धिश्राद्धं हारीतीये जन्मादौ इत्यादिशब्देन तन्मात्रावपि
उद्वाहे पुत्रजनने पित्र्येष्ट्यां सौमिके मखे तीर्थे ब्राह्मण आयाते षडेते जीवितः पितुरि
ति मेधातिथिवचने उद्वाहे एवतस्योपसंहारात् एवं यत्र सुतसंस्कारादिपदं तदप्युद्वाहा
दिपरमेवेति तन्न उद्वाहपदस्य स्वविवाहपरत्वस्यापि संभवात्पुत्रविवाहपरत्वे मानाभा
वात् अतो जन्मादावित्ति सर्वसंस्कारसंग्रहः तथा कात्यायनः स्वपितृभ्यः पितादद्यात्
सुतसंस्कारकर्मसु पिंडानोद्वहनात्तेषां तस्याभावे तु तत्क्रमात् सुतानां चौलादिसंस्का

309-A

रेषु पिता पितृभ्यः पिंडान् श्राद्धं पिंडदो शाद्ध्रस्त्रे बामिति दर्शनात् औद्ध्दृनाद्विवाहपर्यंतं
दद्यात् विवाहस्त्रप्रथमः नांदीश्राद्धं पिता कुर्यादाद्ये पाणिग्रहे बुधः अत ऊर्ध्वं प्रकुर्वी
तत्वयमेव तु नांदिकामिति स्मृतिः तस्य पितुरभावे तत्क्रमात् असंस्कृता स्तु संस्कार्या
भ्रातृभिः पूर्वसंस्कृतैरिति यः कर्तृक्रमः तेन क्रमेण ज्येष्ठभ्रात्रादिर्दद्यात् इति चंद्रिकाद
यः हेमाद्रिस्तु तस्य पितुरभावे यः पितृव्यमातुलादिः संस्कुर्यात् तत्क्रमात् संस्कार्यपि
तृक्रमाद्यान्न तस्य पितृभ्य इति व्याचख्यौ समावर्तनस्यापि विवाहप्राचीनस्तु तत्संस्का
रत्वात् पितैव नांदीश्राद्धं कुर्यात् तदभावे ज्येष्ठभ्रात्रादिः तदभावे स्वयमेव कुर्यात् उपन
यनेन कर्माधिकारस्य जातत्वात् एवमाद्यविवाहेपीति पृथ्वीचंद्रचंद्रिकादयः यदा तु पि
तरि संन्यस्ते प्रोषिते पतिते वा धर्मार्थं तत्पुत्रमन्यः संस्कुर्यात् तदा संस्कार्यपितुः पित्रादिभ्यो
दद्यात् पितरो जनकस्येज्याया वद्धृतमनाहितं समाहितं समाहितव्रतः पश्चात्स्वान् यजे
त पितामहानिति पृथ्वीचंद्रोदयेयमोक्तेः जीवत्पितृकस्याविशेषमाह कात्यायनः हर
कौ तौ र्थे च संन्यस्ते ताते च पतिते सति येभ्य एव पिता दद्यात्तेभ्यो दद्यात्स्वयं सुतः यत्तु ब
ह्वृचपरिशिष्टे जीवत्पिता सुत संस्कारे मातृ मातामह यो कुर्यात् तस्यां जीवत्यां मातृ
महस्यैवेति तन्नछारवीयानामेवेति द्विकस्पतितत्वादि गौडग्रंथेषु जीवन्मातृकः पि
तामहाद्यादिभ्यो दद्यात् जीवं तमतिदद्याद्धा प्रेताय पन्नोदके द्विज इति कात्यायनोक्तेः श्रेत्यु
क्तं तस्मिन् भर्तरि दाक्षिण्यात्यास्तु पर्वौर्कस्य सपिंडीकरणादि विषयत्वात् जीवेत्तु यदि

वर्गाद्यस्तं वर्गांतु परित्यज्येदिति वचनं तद्वर्गस्य लोप एवेत्याहुः यत्तु चंद्रिकायां पारस्क
रः निषेककाले सोमे च सीमंतोन्नयने तथा ज्ञेयं पुंसवने श्राद्धं कर्मांगं वृद्धिवच्चतदिति तत्र
गर्भाधानादौ कर्मांगं जातकर्मादिवत्कृतं न तु वृद्धिश्राद्धं पृथगेव वृद्धिवदित्युक्तेः गौडनिबंधे
मात्स्ये अन्नप्राशे च सीमंते च पुत्रोत्पत्तिनिमित्तके पुंसवे च निषेके च नववेश्मप्रवेशने
देववृक्षजलादीनां प्रतिष्ठायां तथैव च तीर्थयात्रावृषोत्सर्गे वृद्धिश्राद्धं प्रकीर्तितं अत्र
भूत्तनिमित्तानां वृद्धित्वं भाविनिमित्तानां मंगलत्वं वृद्धिशब्दस्तद्धर्मातिदेशार्थ इति गौडाः
अन्ये तु निषेकादौ कर्मांग वृद्धिश्राद्धयोः समुच्चयमाहुः नांदीश्राद्धसंतानभयान्नुगता अ
ति
थैकतंत्रतापृथ्वीचंद्रोदये वृद्धपराशरः मालत्या शतपत्र्या वा मल्लिकाकुब्जयोरपि
केतक्या पाटलाया वा देया माला न लोहिताः श्राद्धे माला निषेधस्यायमपवादः तथा
स्तवेषु भूषणैस्तत्र सालंकारैस्तथा नरैः कुंकुमाद्यनुलिप्तांगैः भाव्यं तुष्टमनोभिः स
द स्त्रियोपि सुतथा भक्तागीतनृत्यादिहर्षिताः हेमाद्रौ ब्राह्मे कुशस्थाने च दूर्वा
स्यु मंगलस्याभिवृद्धये कुशापि वक्ष्यते छंदोगपरिशिष्टे प्रातरामंत्रितान् विप्रा
न्युग्मानुभयतस्तथा उभयतः पित्र्ये दैवे च वैश्वदेवो द्वौ विप्रौ पित्रादीनामेकैकस्य
द्वौ द्वाविति विज्ञानेशः त्रिके वा द्वावित्यर्थो विप्रा अत्र विप्रालाभे स्त्रियोपि भोज्या इत्याह
सार्धं वृद्धवसिष्ठः मातृश्राद्धे तु विप्राणामलाभे पूजयेदपि पतिपुत्रान्विताभर्त्या
योषितोष्टौ कुलोद्भवाः मातृत्रिके च तिस्रो मातामहीत्रिके चेति चेत्यष्टाविति हेमाद्रिः

310-17

घं

अत्रपित्र्ये प्राङ्मुखा विप्राः सर्वदैव ये चतुरस्रं डलमिति जपेत्ततः हेमाद्रौ ब्रह्मणोपि विप्रा
न्प्रदक्षिणावर्त्तं प्राङ्मुखानुपवेशयेत् छंदोगपरिशिष्टे गोत्रनामभिरामंत्र्य पितृ
भ्यो प्रदापयेत् नात्रापसव्यकरणं न पितृभ्यो प्रदापयेत् नात्रापसव्यकरणं न मित्र्यं ती
र्थमिष्यते ज्येष्ठोत्तरकरान् युग्मान् करांगाग्रपवित्रकान् कृत्वार्घ्यं संप्रदातव्यं नैकैक
स्यान्न दीयते पित्रादौ द्वौ द्वौ विप्रौ तयोर्दक्षिणहस्तौ संयोज्य प्रथमोपवेशितविप्रकरोपरितै
त्रेण हस्तयोरर्घ्यं दद्यादित्यर्थः बह्वृचकारिकायां तु दत्तार्घादिकदेशः स्यादर्घ्यदानं प्रतिद्विजं मा
त्रितयमंत्रस्य प्रति ब्राह्मणमिष्यते प्रतिद्विजं प्रत्यङ्कुर्यात् त्रित्यर्घ्यानुमंत्रणमित्युक्तं मधु
मध्विति यस्तत्र त्रिर्जपो रितुमिच्छतां गायत्र्यनंतरं सोऽत्र मधुमंत्रविवर्जितः नवाप्यत्र तु ज
पेदत्र कदाचिदपि त्वक्तं तथा संपन्नमिति तत्र प्राःस्य प्रश्नस्थाने विधीयते सुसंपन्नमिति
प्रोक्ते शेषमन्नं निवेदयेत् अक्षय्योदकदानं च अर्घ्यदानवदिष्यते षष्ठ्येव नियतं कुर्या
न्न च तूष्णीं कदाचनः चंद्रोदये शात्ते पठेच्च कुनिसूक्तं तु स्वस्तिसूक्तं शुभं तथा नांदीमु
खान्पितृन्भक्त्या सांजलिश्च समाह्वयेत् तथा शाल्यन्नं दधिमध्वक्तं बदराणि यवांस्तथा
मिश्रीकृत्वा च चतुरः पिंडान् श्रीफलसंनिभान् दद्यान्नांदीमुखेभ्यश्च पितृभ्यो विधिपूर्व
कं द्राक्षामलकमूलानि यवांश्च विनियोजयेत् तान्येव दक्षिणार्थं तु दद्याद्विप्रेषु सर्व
दा तत्रैव वचनं विंशतिमते द्वौ द्वौ वाभ्युदये पिंडावेकैकस्मै विनिक्षिपेत् एकं नाम्नाप
रेत्तस्मै दद्यात् पिंडान् पृथक् पृथक् वसिष्ठः प्राङ्मुखो देवतीर्थेन प्राक्कालेष्वक्तु

नि॰सिं॰
३११

311

शेषश्च दत्वा पिंडान्न कुर्वीत पिंडमात्रमधोमुखं नांदीमुखेभ्यः पितृभ्यः स्वधेति वा पिंड
दानमंत्र इति वृत्तिः अत्र पिंडाः कृता कृता इत्युक्तं तत्रैव भविष्ये पिंडनिर्वपणं कुर्यान्न वा कु
र्याद्वृद्धिचक्षणः वृद्धिश्राद्धे महावादो कुलधर्मानवेक्ष्य तु छागलेयः अग्नौकरणम
र्घ्यं चावाहनं चावनेजनं पिंडश्राद्धे प्रकुर्वीत पिंडहीने निवर्तते तेनात्र भोजनस्यैव प्रा
धान्यात्तद्यदि विप्रस्य वमनं तदा तस्यैव पार्वणस्य पुनरावृत्तिरिति सिद्धं अत्र संकल्पे वि
शेषः प्रयोगपारिजाते संग्रहे अभार्यः प्रथमो ज्येष्ठो सांकल्पमाचरेत् नवश्चार्यापदि
वा कुर्यान्महालये क्षयेऽभिजायते नामगोत्रादिनिषेधोप्यत्रैव न तु सपिंडकश्राद्धे इति स
एव अत्रायं क्रमः नांदीश्राद्धे देवेक्षणः क्रियतामिति द्वौ युग्मान्विप्रान्मंत्र्य ॐ तथेति विप्रा
मांपुगपद्युक्तं आमुतां भवंतो प्रभवानेति वैश्वदेववत्पित्र्यैर्वृद्धिवचनात्तेन विप्रद्वयेप्र
योगं कुर्यात् आह्निताग्नेस्तु हेमाद्रौ ब्राह्मे योऽग्नौ तु विद्यमाने पितृश्राद्धे पिंडान्न निर्वपेत्
पतंति पितरस्तस्य नरके स च पच्यते बह्वृचपरिशिष्टे द्वौ दर्भौ पवित्रे पवित्रे पवित्राणि च
त्वारि त्यनुमंत्रितास्तु यवान् वपति यवोऽसि सोमदेवत्यो गोसवो देवनिर्मितः प्रयत्नमर्द्भिः
प्रक्तः पुष्ट्या नांदीमुखान्पितॄनिमान् प्रीणयाहि नः स्वाहेति स्वाहार्घ्या इति प्रयच्छति विश्वेदेवा
इदं वो र्घ्यं नांदीमुखाः पितर इति यथालिंगमर्घ्यदानं गंधादिदानं द्विर्द्विः पाणौ होमो गन्
ये कव्यवाहनाय स्वाहा सोमाय पितृमते स्वाहेत्यंतो देवा [illegible] आयंतु न इत्यं गुष्ठ
ग्रहणं पावमानीः शंवतीः शैरिर प्रतिरथं च श्रावयेन्मधुवाता ऋचश्च स्थाने उपास्मै गा

311-A

यतोनिपंचमधुमांतीः श्रवयेद्दक्षन्नमीमदंतेति च षष्ठीभुक्तशेषे लोकैकस्य द्वौ द्वौ पिंडौ
दद्यादिति चंद्रिकायां लघुवशिष्ठः त्रिषु प्रश्नेषु संपन्नं देवेरुचितमितिपिंडेपितृकर्मधु
मिश्राश्च पिंडाकार्यायथाक्रमं कात्यायनः उपास्तब्ब्वाजनामिति विप्रांश्च विसर्जये
त् नांदीमुखाः पितरः प्रीयंतामिति अक्षय्यस्थाने स्वधां वाचयिष्य इत्यस्थाने नांदीमुखा
न् पितॄन् वाचयिष्य इति न स्वधां प्रयुंजीतेति अत्र साग्निरनग्निर्वा दैवे वैश्वदेवं कुर्या
त् श्राद्धादौ क्षेपे चांते मध्ये श्राद्धेतु पार्वणैकोद्दिष्टेषु हुतेतु वैश्वदेवो विधीयते
इत्याश्वलायनपरिशिष्टात् हेमाद्रौ तु शेषमन्नमनुज्ञाप्य वैश्वदेव क्रियां ततः श्रा
द्धादि श्राद्धशेषेण वैश्वदेवं समाचरेत् इति चतुर्विंशतिमतान्नांदीश्राद्धेप्यवैश्वदेव उ
क्तः बह्वृचानामपिवृत्त्यालोचनात्तथैव पूर्वोक्तं तत्परिशिष्टं तादृशवचमन्यविष
यं वा ज्ञेयं अत्र श्राद्धांगतर्पणं नेत्युक्तं प्राक् ।। ।। इति श्री जगद्गुरुनारायणभट्टात्म
जरामकृष्णभट्टसूनुकमलाकरभट्टकृते निर्णयसिंधौ वृद्धिश्राद्धं ।। ।। अथ पजी
वत्पितृकश्राद्धं तत्रानेके पक्षाः एवं पिते जीवंतं पितरं भोजयित्वा परयोः श्राद्धं कुर्या
दित्येकः होमांतमेव कुर्यादित्यन्यः होमांतः पितृयज्ञः स्यात् जीवे पितरि जानन्
तः पितरं भोजयित्वा वा पिंडौ वा द्वयोः परयो इति यज्ञपार्श्वोक्तेः यदि जीवे पिता न दद्या
द्धोमान्तं कृत्वा विरमेदित्यापस्तंबोक्तेश्च जीवतां पिंडदानं नेत्युक्त्वा परेभ्यो दे

यमित्यपरः जीवतामजीवतां वा दद्यमेवेति हि राणपक्षेनुरीतिनिगमात् न
स्याज्जीवत्पिता कुर्यात्ताभ्यामेव तु संशय इति भविष्योक्तेस्ताभ्यामेवेत्यन्यः एते
पक्षाः कलौ निषिद्धाः प्रत्यक्षमर्चनं श्राद्धे निषिद्धं मनुरब्रवीत् पिंडनिर्वपणं वापि
महापातकसंमितमिति पृथ्वीचंद्रोदये भविष्योक्तेः चंद्रिकाप्येवं तस्मात्पितरि जी
वति श्राद्धानारंभ एवेत्येकः पक्षः सपिंडपितृकृत्येषु अधिकारो न विद्यते इति का
त्यायनोक्तेः जीवे पितरि वै पुत्रः श्राद्धकालं विवर्जयेदिति हारीतोक्तेश्च अयं बहुसं
मतः पक्षः अन्ये शाखाभेदेन ज्ञेयाः एवं जीवन्मातामहेनाप्यूहेन कार्यं माताम
हानामप्येवं श्राद्धं कुर्याद्विचक्षणः मंत्रोहेन यथान्यायं शेषाणां मंत्रवर्जितमिति वि
ष्णूक्तेः एवं मात्रादिकस्यापि तथा मातामहादिके इति पृथ्वीचंद्रोदये ग्निपुराणाच्च
पितरि जीवति तु स्वमातरि मृतायामपि पितुरेव मातृमातामहयोः कुर्यात् येभ्य एव
पिता दद्यादिति वक्ष्यमाणवचनादिति पितामहचरणाः मदनरत्ने तु जीवत्पिता स्व
मातृमातामहयोर्दद्यादित्युक्तं कालादर्शेप्येवं मृते तु पितृवर्गे मातृकः पितामहा
दिभ्यो वृद्धौ दद्यादिति स्मृतितत्त्वादि गौडग्रंथाः दाक्षिणात्यास्तु पितृवर्गे मातृवर्गे त
था मातामहस्य च जीवेत्तु यदि वर्गाद्यस्तद्वर्गं परित्यजेदिति वचनात् दर्शे त्याग
एवेत्याहुः एवं पतितसंन्यस्तपितृकादेरपि ज्ञेयं वृद्धौ तीर्थे संन्यस्ते ताते च पतिते सति

ति येभ्य एव पिता दद्यात्तेभ्यो दद्यात्स्वयं सुत इति षट्त्रिंशन्मतात् संन्यस्ते जीवतीत्यर्थः स
ते तु संन्यस्ते तदा देयं मृतेऽपि परेभ्य एवेति गौडाः कात्यायनेऽपि ब्राह्मणादिहते ता
ते पतिते संगवर्जिते व्युत्क्रमे च मृते देयं येभ्य एव ददात्यसौ अयं च संन्यस्ते पित्रादेर
विशेषात्सर्वश्राद्धेऽधिकारः एतच्च त्रिदंडपरं एकादशाहपार्वणवार्षिकाद्यपि तस्यैव
अहन्येकादशे प्राप्ते पार्वणं तु विधीयते इत्युक्तौ त्रिदंडग्रहणादेव प्रेतत्वं नैव जायते
इत्युशनसा विशेषोक्तेः ब्राह्मणादिहते इत्यादिनिषेधस्त्वेकदंडादिपरः अतः परमहंसा
नां वार्षिकादिकमपि न कार्यमिति स्थलीपाकश्राद्धतत्त्वादयो गौडग्रंथाः इदमेव युक्तं
[illegible] हेमाद्रौ कौडिन्यः दर्शश्राद्धं गयाश्राद्धं श्राद्धं चापरपाक्षिकं न जीवत्पितृकः कुर्या
त्तिलैस्तर्पणमेव चेति न तत्संन्यस्तपित्राद्यतिरिक्तविषयं मैत्रायणीयपरिशिष्टे उद्वाहे
पुत्रजनने पित्र्येष्ट्यां सौमिके मखे तीर्थे ब्राह्मण आयाते षडेते जीवतः पितुः तत्रैव म
हानदीषु सर्वासु तीर्थेषु च गयायां मृते जीवत्पितापि कुर्वीत श्राद्धं पार्वणधर्मवत् गयायां मृ
ते इति मात्रव्यतिरिक्तविषयं आवश्यकं गयाप्राप्तौ सत्यां पक्षमृतेऽहनि मातुः श्राद्धं सु
तः कुर्यात्पितर्यपि च जीवतीति तत्रैवोक्तेः गयाप्राप्तौ प्रासंगिकं गयाप्रसंगतो
गत्वा मातुः श्राद्धं समाचरेदिति वचनात् तेन मृतमातृको गयायां तत्पार्वणमात्रं कुर्या
त् तज्जीवत्पितृतीर्थश्राद्धमपि नेति कालादर्शस्मृतिदर्पणादयः अन्ये तु गत्वा श्राद्धं नेति
निषेधार्थः सामान्यतः प्राप्ततीर्थश्राद्धं भवत्येव गयायामित्याहुः यः दात्रा पितुः प्रति

निषिद्धत्वेन गयायां पाति तदा यजमानस्य पितृपितामहप्रपितामहाः इत्येवं श्राद्धं तत्र स्वमातुः
पितृपत्नीत्वेन एकोद्दिष्टं स्वत्वामातृत्वेन पुनः पार्वणं कुर्यादिति त्रिस्थलीसेतौ ।
तस्य फलस्य विघ्नरूपमदास्य च देष्टेवेति केचित् अर्घ्यान्त एवेत्यन्ये मध्यमान्त इत्य
परे तत्त्वं कोविदेहत्वभावात् तत्र त्वस्य सर्वश्राद्धानि मातुः कार्याणीति युक्तं प्रतिभाति यत्तु
मदनपारिजाते न जीवत्पितृकः कुर्याच्छ्राद्धमग्निमतो द्विजः येभ्य एव पिता दद्या
त्तेभ्यः कुर्वीत साग्निक इति स्मृत्यन्तरोक्तेः साग्नेरेव जीवत्पितृकस्य तीर्थादिश्राद्ध
मुक्तं साग्नेरपि मैत्रायणीयशाखायस्यैव नान्येषां षंडेते जीवतः पितुरिति नि
त्यादिशिष्ट एवोक्तेरिति रत्नावलीदिवोदासाद्याः तदयुक्तं सौमंतवेपिंडपितृय
तविषयं सन्न्यस्तपित्राद्यतिरिक्तविषयं वेति पृथ्वीचंद्रोदयोक्तेः तद्दौनीयं चे
त्यादेः साधारण्येनास्थापितत्वाच्च तत्यानिरग्नेरपि नांदीश्राद्धमुक्तं प्राक् एवं
पितामहजीवनेपि ज्ञेयं विशेषः पितृकृतजीवत्पितृकनिर्णये ज्ञेयः अथ पितामहे
जीवति मृते च पितरि प्रपितामहे वा तत् श्राद्धं जीते त्वब्रवीत् मनुरिति मद
नरत्ने जीवतः पितामहस्य भोजनमुक्तं तच्चाप्रत्यक्षार्चनस्य पूर्वोक्तनिषेधात् पि
तामहं वा वे हायपितृप्रपितामहाद्धि प्रपितामहेभ्यो देयं पिता यस्य तु वृत्तः स्यात्
जीवेच्चापि पितामहः पितुः स नाम संकीर्त्य कीर्तयेत् प्रपितामहमिति मन्त्रोक्तेः अ
यमेव सर्वसंमतः पक्षः यत्तु छंदोगपरिशिष्टे पितामहो ध्रियमाणो पितुः प्रेतस्य

313-17

निर्वपेत् पितुस्तस्य च हतस्य जीवेच्चापि पितामहः इत्येकपुरुषं द्विपुरुषं वा
वापार्वणमाह तत्तीर्थे पितृयज्ञपरं वचो पूर्वोक्तमेव एवं पूर्वयोर्मृतयोः प्रपिता
महे जीवति पितृमात्रे मृते परयोः जीवतोश्च द्वाभ्यां प्रपितामहेभ्यो नेयं जीवन्तमति
दद्याद्वा प्रेतायान्नोदकेऽहज इति कात्यायनोक्तेश्च एतत् सर्वमनभिप्रेत्याह हेमा
द्रौ विष्णुः पितरि जीवति यः श्राद्धं कुर्याद्येषां पिता कुर्यात्तेषां कुर्यात् पितरि पिता
महे च जीवति येषां पितामहः पितरि पितामहे प्रपितामहे च जीवति नैव कुर्यात् य
स्य पिता प्रेतः स्यात्स पित्रे पिंडं निधाय पितामहात्पराभ्यां द्वाभ्यां दद्यात् यस्य पिता
पितामहश्च प्रेतौ स्यातां स ताभ्यां पिंडौ दत्वा पितामहप्रपितामहाय दद्यात् यस्य पिता
महः प्रेतः स्यात्स तस्मै पिंडं निधाय प्रपितामहात्परं द्वाभ्यां दद्यात् मातामहानामप्ये
वं श्राद्धं कुर्याद्विचक्षणः मंत्रोहेन यथान्यायं शेषाणां मंत्रवर्जितमिति अत्र पितृ
वत् मातामहे जीवति यत्पित्रादिभ्यः यथा तत्रापि तेषु जीवत्सु नैव कुर्यात् यथाग्रपी
त्यादि सर्वमर्जिदेश्यं एवं मातृजीवनेपीति स्मृत्यर्थसारादर्शेतत्तेभ्यः
एवेत्यादौ षष्ठ्यादेर्व्यक्तिविशेषवाचित्वेन तदप्रसंगादिति दिक् उत्तरार्धं व्याख्याति
प्राक् यत्त्वत्र विज्ञानेश्वरेणोक्तं पित्रे पिंडं निधायेति पितुरेकोद्दिष्टविधिना श्राद्धं कृ
त्वा प्रपितामहादिभ्यः पार्वणं कुर्यात् यद्युक्तमस्मत्सपिंडीकरणाभावपक्षे सपिंडीक
रणस्यानापन्नत्वेऽयमुक्तमात्रप्रमीतानां मानैव कार्या सपिंडतेति वचनात् दर्शादौ

इत्याहुः एवं विधिर्निषेधरूपः जीवज्जीवस्तु विष्णुराह जीवज्जीवस्तु नैव कुर्यादिति एतद्दर्शादिवि

षयं ५४

तु पितुरेकोद्दिष्टमेव कार्यं न जीवं तमतिददातीति श्रुतेः जीवेत्पितामहो यस्य पिता वा
नर्हितो भवेत् पितुरेकस्य दातव्यमेवमाहुर्मनीषिणः इति पद्मपाद्मोक्तेः पितामहे जीव
ति वै पितुर्जैव समाचरेदिति हारीतोक्तेश्च शिष्टास्तु एकमात्रप्रमातामहानां नैव कार्यासपिं
डता यदि स्यात्ताम्यादि पितामहं तानैव विधिः स्मृत इति माधवीये स्कान्दोक्तेः एकमन्त्रसपिंडी
करणाभावः पित्रादिविषयं नान्दीश्राद्धं तु परेभ्यस्त्रिभ्यो भवत्येवेति कल्पतरुः पृथ्वीचं
द्रोदये तु दद्यात्त्रिभ्यः परेभ्यस्तु जीवेच्चेत्पितयं यदीति मन्त्रोक्तेः सर्वत्र विकल्पः स च देशाचा
राद्व्यवतिष्ठत इत्याहुः सुदर्शनस्तु आद्ये तु मासि श्राद्धं जीवत्पित्रादिनाप्येकमन्त्रपित्रा
दिनाम्ना च कार्यमेवेत्युक्तं मदनरत्ने तु अष्टकादिषु संक्रान्तौ मन्वादिषु युगादिषु चंद्र
सूर्यग्रहे पाते स्वेच्छयाप्यज्ययोगतः जीवत्पिता नैव कुर्याच्छ्राद्धं काम्यं तथाखिलं अन्ये
विशेषाः श्रीपितृकृतजीवत्पितृकनिर्णये मद्कृतत्रिस्थलीसेतौ च ज्ञेयाः ॥ ॥
इति श्रीभट्टकमलाकरकृते निर्णयसिंधौ जीवत्पित्रादिश्राद्धं ॥ ॥ अथ अविभ
क्ताविभक्तनिर्णयः पृथ्वीचंद्रोदये मरीचिः बहवः स्युर्यदा पुत्राः पितुरेकत्र वासिनः
सर्वेषां तु मतं कृत्वा ज्येष्ठेनैव तु यत्कृतं द्रव्येण वाविभक्तेन सर्वैरेव कृतं भवेत् ज्ये
ष्ठस्य कर्तृत्वेपि सर्वे फलभागिन इत्यर्थः तेनैव ब्रह्मचर्यादि नियमास्तेषां कालिकसंस्कार
त्वात्सर्वैः कार्याः एवं सपिंडनामापि तुल्यत्वात् मिताक्षरायां तु नारदः भ्रातृणामविभ
क्तानामेको धर्मः प्रवर्तते विभागे सति धर्मोपि भवेत्तेषां पृथक् पृथक् बृहस्पतिरपि ।

314-17

एकपाकेनवसतांपितृदेवद्विजार्चनं एकंभवेद्विभक्तानांतद्देवस्याद्गृहेगृहे अत्रपृथ
ग्विशेषश्रवणात् ब्रह्मयज्ञसंध्यादिष्वपिविभक्तानांपृथक्त्वनिषेधःप्राप्नोतितस्या
पिद्रव्यसाध्यश्राद्धवैश्वदेवादिष्वेवसः द्रव्यस्यानेकस्वामिकत्वेनैकस्यव्ययेनाधिका
रात् यानितुद्रव्यासाध्यानिमंत्रजपोपवाससंध्याब्रह्मयज्ञपारायणादीनिनित्यनैमि
त्तिककाम्यानितेषुपृथगेवाधिकारः द्रव्यव्ययाभावेऽनुमत्यनपेक्षणात् द्रव्येणैवा
विभक्तेनैतस्याविषयत्वात् पृथगप्येकपाकानांब्रह्मयज्ञोद्विजातिनां अग्निहोत्रंसु
रार्चाचसंध्यानित्यंभवेत्पृथगिति प्रयोगपारिजाते आश्वलायनस्मृतेश्च अग्निहोत्रप
दोग्निसाध्यत्वेनातस्मार्तनित्यकर्मपरः तेष्वप्यथानुमत्यैवाधिकारेणन्यायसाम्यात्
पितृश्राद्धादिष्वल्पफलेष्वनित्येष्वनुमतिविनाप्येकस्याधिकारः एकोपिस्था
वरेकुर्याद्दानंधमनविक्रयं आपत्कालेकुटुंबार्थेधर्मार्थेचविशेषतः इतिवचनात्
धर्मार्थेअवश्यकर्त्तव्येपितृश्राद्धादावितिज्ञानेश्वरः केचित्त्वविभक्तानामपिपृथ
क्पाकत्वेदेशांतरेचदार्शिकादिकयोःपृथक्त्वमाह भ्रातृणामविभक्तानांपृथक्
पाकोभवेद्यदि वैश्वदेवादिकंश्राद्धंकुर्युस्तेवैपृथक्पृथगितिहारीतोक्तेः अवि
भक्तेनपुत्रेणपितृमेधोमृतेऽहनि देशांतरेपृथक्कार्योदर्शश्राद्धंतथैवचेति यमो
क्तेश्चेति अत्रमूलंचिंत्यं तदप्यर्थः पंचमहायज्ञमध्येदेवभूतपितृमनुष्य
यज्ञानन्यानुमत्याज्येष्ठएवकुर्यात् होमाग्निदानरहितंभोक्तव्यंकदाचन आविभ

त्तेषु संसृष्टेष्वेकेनापि कृते कृतमिति व्यासोक्तेश्चापस्य तु ज्येष्ठेनाकृते वैश्वदेवे त्वं
सिध्येत्तेनतन्दृष्टौ मार्गे नो किंचिच्छिष्टाभोक्तृत्वं यस्य तेषामग्रतो न सिध्येत्तानि पुत्रक
मनौ कृत्वा मंत्रात्सलग्णा यदत्वा भुंजीतेत्य विभक्ताधिकारेण पृथ्वीचंद्रोदये गोभिलोक्तेः
श्वाश्वलायनस्तु पाकयार्थेनैव एकं तदेकत्वेन पृथक्कर्मादह वसतामेकपाकेन वि
भक्तानामपि प्रभुः एकस्तु चुरोयतान् भोजमान् प्राक्रादिनेदिने यति कुर्यादाग्यन्त पूर्वं
कान् अविभक्ता विभक्ता वा पृथक् पाकाहिताग्नयः कुर्युः पृथक् पृथक् यत्तान् भोज
नात् प्राकू दिने दिने इति वृत्तस्य यत्तासंध्यास्नानतर्पणादिलक्षणे हेतोः पृथगेव देवपूजा
तु तु वचनद्वयादेक एव पृथग्वा दर्शग्रहणश्राद्धादि चेकस्यैव तीर्थश्राद्धादि पितृयुग
पत्तु सर्वेषाम विभक्तानां प्राप्तावेकस्यैव भेदेन प्राप्तो भिन्नं गयाश्राद्धे प्येवं पृष्ट्व्या बाहु
वः पुत्राः शीलवंतो गुणान्विताः तेषां तु समवेतानां यद्येकोपि गयां व्रजेत् तारिताः सो
वयं तेन स याति परमां गतिमिति हेमाद्रौ कौर्मोक्तेः काम्येपि दानहोमादावेत्यानुमत्ये
वाधिकारः दूर्व्यासाध्यजपादौ ताविनापि अपरार्के पिठीनसिः विभक्तैस्तु पृथक्कार्यं
प्रतिसंवत्सरादिकं एकेनैव विभक्तेषु कृते सर्वैस्तु तत्कृतं सांवत्सरात्पूर्वाणि मासि
कान्येकत्रैव नदाह लघुहारीतः सपिंडीकरणांतानि यानि श्राद्धानि षोडश पृथक् नैव स
ताकुर्युः पृथक् द्रव्या अपि क्वचित् सपिंडनं मासिकोपलक्षणं अर्वाक् संवत्सराज्येष्ठः
श्राद्धं कुर्यात्समेत्य च ऊर्ध्वं सपिंडीकरणात्सर्वे कुर्युः पृथक् पृथक् इति व्यासोक्तेः

315-प्र

उशनाः नवश्राद्धं सपिंडत्वं श्राद्धान्यपि च षोडश । एकेनैव तु कार्याणि संविभक्तधनेष्व-
पि मघात्रयोदशीश्राद्धं त्वविभक्तानामपि पृथगिति त्रिकृते प्राचः यत्तु वृद्धवसिष्ठः
मासिकं च तथाब्दांतं सपिंडीकरणं तथा ज्येष्ठेनैव प्रकर्तव्यं श्राद्धं प्रथमं तच्चेति
तन्निर्मूलं वृद्धपरिशिष्टे नवश्राद्धं सह दद्युः अथ तीर्थश्राद्धं तत्र यच्च षष्ठ्यस्मात्पितामह-
कृतात् त्रिस्थलीसेतौ रेव ज्ञातान्ति तथापि किंचिदुच्यते तत्र यात्रायां सहागन्तैर्वा सपत्नीको
गच्छेत्तीर्थानि संयतः प्रायश्चित्ती व्रजेत्तीर्थं पत्नीविरहितोपि वा यत्नेष्वनधिकारी वाप्यश्र-
वा मंत्रसाधक इति कौर्मादिवचनात्सागेन्नः सपत्नीकस्यैवाधिकारः भारते ब्राह्मणाः
क्षत्रिया वैश्याः शूद्रा वा राजसत्तम न वियोनिं व्रजंत्येते स्नाता स्तीर्थे महात्मनः स्कांदे विधिवा-
धर्मेषु स्नानं दानं तीर्थयात्रां विष्णोर्नामग्रहं मुहुः एतत्सुत्राधनतमस्मैवस धचायायपत्यास-
देवेति प्रथमुक्तं काशीखंडे मातुः पितुः क्षेमनसास्तस्यास्थिसुतस्तु कुर्यात्तत्वलु तीर्थयात्रा
तद्विधिः स्कांदे तीर्थयात्रां चिकीर्षुः प्राग्विधाय स्वगृहे गणेशं च पितॄन् विप्रान् सा-
धून् शक्त्या प्रपूज्य च कृतपारणको हृष्टो गच्छेन्नियमधृक् पुनः आगत्याभ्यर्च्य च पितॄ-
न् यथोक्तफलभाग्भवेत् उपवासात्प्रागहुनं च कार्यं प्रयोगे तीर्थयात्रायां पितृमातृवि-
योगतः कचानां वपनं कुर्यात् वृथा न विकचो भवेत् इति विष्णूक्तेः प्राप्तितीर्थयात्रायां
गयायां चैतद्विदित्येके केचित्तु हेमाद्रौ महाभारते केशश्मश्रुनखादीनां वपनं न च शस्यते ।
स्मृतेर्न कार्यं वपनं गयाश्राद्धार्थिना सदा ये भारते स्मिन् पितृकर्म तत्परा संधार्य केशान्

ति भक्तिभाविताः क्षयार्थं पितृतीर्थमागतास्तेषां मरणं संशयमेष्यति ध्रुवमिति नि
षेधात् गयायात्रांगवपनं न कार्यमित्याहुः वस्तुतस्तु गयाधिकरणकस्यैवायं निषे
धः न तु यात्रांगस्य श्राद्धादिनैतदुक्तेः विशालं विरजं गयामित्यनेनैकवाक्यत्वाच्च श्राद्धं
च घृतेनैव द्वादशदैवतं वा घृतेन कार्यं गच्छेद्देशांतरं यस्तु श्राद्धं कुर्यात्स सर्पिषेति विष्णुपु
राणात् यात्रांगवृद्धिश्राद्धोक्तेश्च श्राद्धं च पारणदिन एव उपोष्य रजनीमेकां प्रातः श्राद्धं
विधाय च गणेशं ब्राह्मणान्नत्वा भुक्त्वा प्रास्थितवान्सुधीरिति स्कांदलिंगात् गौडनिबं
धे गौतमः तीर्थयात्रासमारंभे तीर्थान्प्राप्यागमेपि च वृद्धिश्राद्धं प्रकुर्वीत बहुसर्पि
समन्वितं वृद्धिपदं तद्धर्मार्थं श्राद्धोत्तरं यात्रासंकल्प इति भट्टाः वायवीये उद्यतस्तु गयां
गंतुं श्राद्धं कृत्वा विधानतः विधाय कार्पटीवेषं ग्रामं कृत्वा प्रदक्षिणं ततो ग्रामांतरं गत्वा
श्राद्धशेषस्य भोजनं तत्र क्रोशमध्ये श्राद्धोत्तरं क्रोशगमननिषेधात् ततः प्रतिदिनं
गच्छेत्प्रतिग्रहविवर्जितः गयायामेवैतन्नान्यत्रेति केचित् हेमाद्रिस्तु गयायां श्रा
द्धदिन एव प्रस्थानं तीर्थांतरे तु श्राद्धोत्तरदिने इत्याह प्रभाकरस्तु पश्चात्कारयेच्छ्रया
तीर्थयात्रां नरेश्वरः स्वकीयद्रव्ययानाभ्यां तस्य पुण्यं चतुर्गुणं यात्रामध्ये आशौचे रजसि
वा शुद्धिपर्यंतं स्थित्वा तदंते गच्छेत् मार्गवैषम्ये त्वदोषः यात्रामध्ये तीर्थांतरप्राप्तौ श्राद्धा
दि कार्यमेव वाणिज्यार्थं गतेन तु मुंडनोपवासादि न कार्यमिति प्रयागसेतौ भट्टाः व
स्तुतस्तु तत्रापि मुंडनोपवासश्राद्धादि कार्यं अर्धं तीर्थफलं तस्य यः प्रसंगेन गच्छतीति

316-A

व्यासोक्तेः स्कांदे द्विमौंजनेन तु तीर्थांशं हरेत् तीर्थफलस्य च वाणिज्यं त्रीस्तथा भागान् हंति
सर्वं प्रतिग्रहः यानमर्धं चतुर्थांशं छत्रोपानहमेव चेत्युत्तरार्धे पाठांतरं अत्र नदीषु वि
शेषः मार्गांतराननदीप्राप्तौ स्नानादि परपारतः अर्वागेव सरस्वत्याः एष मार्गगतो विधिः
पक्षे पितॄन् तर्पयित्वा तु नदीं स्तरति यो नरः तस्यास्य कामकामास्ते भवंति भृशदुःखिताः इति
तत्सारस्वतीपरं शंखः तीर्थं प्राप्यानुषंगात्तु स्नानं तीर्थे समाचरेत् स्नानजं फलमाप्नोति ती
र्थयात्राकृतं न तु स एव नसुवतीमतिक्रामेदनवशिष्य तीर्थप्राप्तौ तु प्रभासखंडे याना
न्निरूपरीत्यज्यभाव्ययाद्वच्चैरेनेरैः लुरित्वा लोष्टनीतं च कृत्वा कार्पटिकाकृतिं कृत्वेति गृ
हान्निर्गमसमये ऽकरोत्ऽदं प्रथमं स्वालये तीर्थप्रणवेन तत्र लंस्तुचि अवगाह्य ततः स्नायात्
घ्यायन्मंत्रयोगतः मंत्रश्च प्रभासखंडे नमो देवदेवाय शितिकंठाय दंडिने रुद्राय
वामहस्ताय चक्रिणे वेधसे नमः सरस्वती च सावित्री वेदमाता गिरीयसी सन्निधात्री भ
वत्वत्र तीर्थे पापप्रणाशनीति मंत्रवत्स्नानं च पनोत्तरं कार्यं पूर्वेद्युः सवाहने तीर्थी मुंडनं
तदनंतरं ततः स्नानादिकं कुर्यात् यथोक्तं समाचरेत् इत्युक्तेः यत्र गत्वा स्नानं प्रकुर्वीत
वपनं तदनंतरमिति तत्कुशलस्नानादिपरं काशीखंडे तीर्थोपवासः कर्तव्यः शिरसो
मुंडनं तथा उपवासं तत्रैवोक्तं यदह्नि तीर्थप्राप्तिः स्यात्तदहः पूर्ववासरे उपवासः प्र
कर्तव्यः प्राप्तेऽह्नि श्राद्धदो भवेत् अत्र उपवासं ततः कुर्यात्तस्मिन्नहनि सुव्रत इति प्राप्ति
दिने वा उपवासोक्तेर्विकल्पः मुंडनेन तु स्कांद देवलौ मुंडनं चोपवासश्च सर्वतीर्थेष्व

स्नानम कृत्वा दु

स्थ

यं विधिः वर्ज्जयित्वा कुरुक्षेत्रं विशालं विरजं गयां विरजं लोणारं प्रसिद्धं महातीर्थं परः
सर्वतीर्थेषु शक्तः अत्र विशेषः स्मृत्यंतरे ऊर्ध्वं मब्दात् द्विमासेनानानु नस्तीर्थं व्रजेद्यति । प
मुंडनं चोपवासं च ततो यत्नेन कारयेत् तदात हायुतं शस्तं प्रोक्षितं स्मृते द्विजेति वाप
ः प्रयागे प्रतियात्रं तु यो गन्तव्य पश्यते क्षौरं कृत्वा तु विधिवत्ततः स्नायात्सितासिते
अपरार्के स्कांदे उदङ्मुखः प्राङ्मुखो वा वपनं कारयेत्सुधीः केशश्मश्रुलोमनखान्यु
दकुंभस्यानि वापयेत् इदं प्रयागे सधवानामपि समं फलं भवति इति भट्टाः पुंसां तु स
र्वान्केशान्समुद्धृत्य छेदयेदंगुलद्वयं एवमेव हि नारीणां शस्यते वपनक्रियेति त
त्र कृतचूडानां न कार्यमिति केचित् तत्त्वं तु नैमित्तिकत्वाच्चैत्रादिस्मृतिवत्कार्यमे
वेति तदपि प्रयागे निषिद्धं नामत्र तत्त्वयाति निमित्ते तीर्थे पितृमृतसंधिष्वेव कार्यं नान्यदा
कक्षोपस्थशिखावर्जं मृतसंधिषु वापयेदिति स्मृतेः इदं जीवत्पितृकेणापि तीर्थे
कार्यं न च मुंडनं पिंडदानं चेति दक्षवचनेन निषेधः । विना तीर्थं विनायज्ञं मातापित्रो
र्मृतिं विना यो वापयति लोमानि स पुत्रः पितृघातक इति स्मृत्यात्तत्संकोचात् त
दपि प्रयागे प्रतिपात्र मत्र तीर्थे ग्रामयात्रायामेवेति शिष्टाः ततः स्नाने पराशरेतु मा
र्कंडेयपुराणे मातरं पितरं जायां भ्रातरं सुहृदं गुरुं यमुद्दिश्य निमज्जेत अष्टमांसं लभे
त सः पैठीनसिः प्रतिकृतिं कुशमयीं तीर्थवारिणि मज्जयेत् मज्जयेत्तु अष्टमादि र

रपसोष्टभागंफलंलभेत् ततस्तर्पणंश्राद्धंपष्ठीचंद्रोदये ब्रह्मदेवीपुराणेकाशीखं
डादिषु अकालेप्यथवाकालेतीर्थेश्राद्धंचतर्पणं अविलंबेनकर्तव्यंनैवविघ्नंसमा
चरेत् मत्स्ये पितॄणांचैवतर्पणमभिमितितुयेपादः तत्रदेवताः महालयनिर्णयेप्रागुक्ताः
शंखदेवलौ तीर्थेद्रव्योपपत्तौचनकालमवधारयेत् पात्रंचब्राह्मणंप्राप्यसद्यःश्राद्धं
समाचरेत् हारीतः दिवावायदिवारात्रौभुंक्तेवायोषितोपिवा नकालनियमस्तत्रगं
गांप्राप्यसरिद्वरां भारते भुक्तोवाप्यथवाभुक्तोरात्रौवायदिवादिवा पर्वकालेथवाका
लेशुचिर्वाप्यथवाशुचिः यदैवदृश्यतेतत्रनदीचित्राययाप्रिय प्रमाणंदर्शनंतस्या
नकालस्तत्रकारणं आशौचेपिकार्याविवाहदुर्गपक्षेषुयात्रायांतीर्थकर्मणि नतत्र
सूतकंतद्वत्कर्मयज्ञादिकारयेदितिपैठीनसिस्मृतेः तदानीमकरणेत्वाशौचांतएव
कुर्यात् प्रभासखंडे नवारंनचनक्षत्रंनकालस्तत्रकारणं यदैवदृश्यतेतीर्थंतदापु
र्वसहस्रकं मलमासेपिकार्यं नित्यनैमित्तिकेकुर्यात्प्रयतःसन्मलिम्लुचे तीर्थश्राद्धं
गजच्छायां प्रेतश्राद्धंतथैवचेतिबृहस्पतिस्मृतेः एतच्चाशौचेकृतभोजनस्यरात्रौवास्ना
नश्राद्धादिकमाकस्मिकतीर्थप्राप्तौवाहेमश्राद्धादिविषयंगंगाहणादिवत् नतुवृद्धिपूर्वमा
शौचादौतीर्थप्राप्तिःकार्या मलमासेतुमासद्वयेतीर्थश्राद्धंकार्यमितिचंद्रिकायां देवी
पुराणे श्राद्धंचतत्रकर्तव्यमर्घ्यावाहनवर्जितं [illegible] आवाहनंविसर्जं [illegible]
हेमाद्रौ अर्घ्यमावाहनं [illegible] जंगमकृतनिरीक्षणं तत्पिंडप्रश्नंचाविकरं तो

नि॰सिं॰
३१८

318

र्थश्राद्धे विवर्जयेत् भविष्ये आवाहनं विसृष्टिश्च न तत्र नैवान विद्यते आवाहनं न तीर्थस्या
न्नार्घदानं तथा भवेत् आहूता पितरस्तीर्थं कृतार्था संति वै यतः अग्नौकरणं च नेति रत्ना
वल्यां अत्र षड्दैवते श्राद्धे पि मातामहीनां पिंडमात्रं देयं हविःशेषं ततोऽस्थि मासार्थे केक
मात्तः क्रमशः पितृपत्नीनां पिंडनिर्वपणं चरेदिति तीर्थोपक्रमे देवलोक्तेरिति पृथ्वी
चंद्रः ततः सामान्यपिंडं दद्यात् ततः पिंडमुपादाय ब्राह्मणः संस्कृतस्य च ज्ञातिवर्गस्य स
र्वस्य सामान्यं पिंडमुत्सृजेदिति तेनैवोक्तेः पाद्मे तीर्थश्राद्धं प्रकुर्वीत पक्वान्नेन विशेषतः।
आमान्नेन हिरण्येन कंदमूलफलैरपि पिंडद्रव्याणि देवीपुराणे हेमाद्रौ काले च शक्तुभिः
पिंडदानं च संयावेपायसेन वा कर्तव्यमृषिभिः प्रोक्तं पिण्याकेन गुडेन वा पिंडानां ती
र्थेषु क्षेपणमेव नान्या प्रीतिपूर्तिरित्युक्तं प्राक् एतच्च विधवया पुत्रया कार्यं न सपुत्रयेत्यु
क्तं प्राक् सपुत्रया न कर्तव्यं भर्तुः श्राद्धं कदाचनेति स्मृतेश्च अनुपनीतेनापि का
र्यं एतच्चानुपनीतोपि कुर्यात्सर्वेषु पर्वस्विति पाद्मे तीर्थश्राद्धमुपक्रम्योक्तेः एतज्जीवत्पि
तृकेणापि कार्यमित्युक्तं प्राक् पतितेनापि नाकार्यं न कुर्यात्स्तनकंभिस्तु श्राद्धपिंडोद
कक्रियां इत्युक्तं संन्यासयोगेन गृहस्थधर्मादिकं त्यजेत गोत्रादिवरणं सर्वं पितृमातृकु
लं धनमिति स्मृतेः गयायां तूक्तं वायवीपि दंडं प्रदर्शयेद्भिक्षुर्गयां गत्वा न पिंडदः दंड
स्पृष्ट्वा विष्णुपदे पितृभिः सह मुच्यते गयायां मुंडपृष्ठे च कूपे पप्रयेवटे तथा दंडं प्रद
र्शयन् भिक्षुः पितृभिः सह मुच्यते [illegible] कृत्यरत्ने प्रभासरैवततीर्थे चेत्त्र

राम
३१८

निमग्नस्तात्रिज्ञसलोत्वतिदुर्बलः दशांशमर्पितं दद्यादेवं कुर्वन्न हीयते इति वि
शेषांतराणि भट्टकृतत्रिस्थलीसेतौ ज्ञेयानीति दिक्। इति श्रीकमलाकरभट्टकृ
ते निर्णयसिंधौ तृतीयश्राद्धविधिः ॥ ॥ अथाशौचं नारायणात्मजश्रीमद्राम
कृष्णस्य सूनुना कमलाकरसंज्ञेनाशौचं निर्णीयतेधुना मरीचिः आचु
तुर्थाद्भवेत्स्रावः पातः पंचमषष्ठयोः अत ऊर्ध्वं प्रसूतिः स्याद्दशाहं सूतकं भ
वेत् स्रावे गर्भमासतुल्यरात्रं स्यात्सपिंडाशौचवर्जनं पाते मातुर्यथामासं सपि
डानां दिनत्रयं अत्र सर्वत्र स्नानं मिताक्षरायां ज्ञेयं आद्यमासत्रये त्रिरात्रं स्यादनु
वादः रजस्वलात्वेनैव तत्सिद्धेः यद्यप्येनेन चतुर्थमासेपि त्रिरात्रं प्राप्नोति तथा
पि षण्मासाभ्यंतर पात ऊर्ध्वं स्रावो भवेद्यदि तदा माससमैस्तासां दिवसैः शु
द्धिरिष्यते इत्यादिपुराणात् रात्रिभिर्मासतुल्याभिर्गर्भस्रावे विशुध्यतीति मनू
क्तेः गर्भस्रावे यथामासमचिरे तूत्तमे त्र्यहं इति मरीच्युक्तेश्च चतूरात्रं ज्ञेयं अचिरे
त्रिमासमध्ये उत्तमे बहुले अत्र सपिंडानां स्नानं सद्यः शौचं सपिंडानां गर्भस्य प
तने सतीति तत्रैवोक्तेः यत्तु तदा चतुर्थमासात् पातेऽपि दिनत्रयोक्तेः सद्यः पदं स्नान
परं एवमेतेपि गर्भस्रावे स्नानमात्रं पुरुषस्येति वृद्धविशिष्टोक्तेः पुरुषस्येति पिं
डोपलक्षणं सर्वावचनात् आतुर्यमासं सपिंडानां न स्नानं किंतु पुंस एव मातेत्रि

नि. सिं.
३१९

319

दिने निर्गुणत्वरं गुणवत्स अजातदंतेन तन्ये शिशौ गर्भस्रुतेन तथा सपिंडानां तु सर्वे
षामेकरात्रमशौचं कश्मिति यथोक्तेरेकाहः इति मदनपारिजातः सप्तममासादि दशाहं ।।
तत्सर्ववर्णविषयं तु स्वत्वयसि सर्वेषामिति कौमेनेत्यैव चेति व्याघ्रोक्तेः पराशरः जाते
विप्रो दशाहेन द्वादशाहेन भूमिपः वैश्यः पंचदशाहेन शूद्रो मासेन शुध्यति संवर्त्तः जाते तु
त्रे पितुः स्नानं सचैलं तु विधीयते माता शुध्येद्दशाहेन स्नानात्तु स्पर्शनं पितुः पुत्रपदात्कन्या
याः त्वन्नेन पितुः स्नानमिति हारलतायां तत्र पुत्रपदस्य पौत्री मातामहस्येनेति कन्याया
अपि प्रयोगात् यच्च तत्रैवोक्तं सूतके तु मुखं दृष्ट्वा जातस्य जनकस्ततः कृत्वा सचैलं ।
स्नानं तु शुद्धो भवति लक्षणादित्यादिपुराणात् मुखदर्शनोत्तरमेव पितुः स्नानमिति त
त्र मूलेकेनत्ताच मात्रपरत्वात् इदं सर्ववर्णसमं सूतिका सर्ववर्णेषु दशरात्रेण शुध्यति
ऋतौ च न पृथक् शौचं सर्ववर्णेष्वयं विधिरिति हारलतायां प्रचेतसोक्तेः यत्तु ब्राह्मे ब्राह्म
णी क्षत्रिया वैश्या प्रसूता दशभिर्दिनैः शूद्रा च संस्पृश्या त्रयोदशभिरेव चेति प्रयो
गपारिजाते पारस्करः द्विजातेः सूतिकां स्यात्सा दशाहेन शुध्यति त्रिपादशे [illegible] संप्राप्ते मृ
ता शुध्यत्यसंशयमिति तदस्पष्टत्वपरं अंगिराः सूतिके सूतिकावर्जं संस्पर्शो न निषिध्य
ते संस्पर्शे सूतिकायास्तु स्नानमेव विधीयते नाशौचं सूतिके पुंसः संसर्गं चेन्न गच्छति
रजस्तत्राशुचि ज्ञेयं तच्च पुंसि न विद्यते संसर्गो मैथुनं स्पर्श इत्यत्र मातरेव सूतकं ता
स्पर्शात् नेति हारलतायां तु मंत्रनोक्तेरिति तत्र संस्पर्शे सूतिमास्तु स्नानमेव विधीयते

राम
३१९

ते इतिस्नानमात्रोक्तेः सोमंतवश्यस्नानपर्यंतमस्पृश्यत्वमात्रबोधकत्वात् एवंका
रोबालस्यत्वार्थः माधवस्तु पक्षैः सहसपिंडोपिप्रकुर्याच्छयनासनं बांधवोवापरो
वापिसहस्राहेनभुञ्जतिरितिहारीतस्मृतेः शयनासनादिरूपंसंसर्गमाह पाराशरः
यदिपत्न्यांप्रसूतायांद्विजः संपर्कमर्छतिसूतकंतुभवेत्तस्ययदिविप्रःषडंगवित् पि
तृवत्साप्नवमानुःप्राक्स्नानादस्पृश्यत्वंसूतिकास्पर्शेतुयावदाशौचं अन्याम्रमातर
स्तद्वहूहंनब्रजेतिचेदिति व्यासोक्तेरिति तन्न तद्गेहंगत्वासूतिकांयदिनस्पृशेत्तत्
दास्पृश्याः अन्यथानेतितस्यार्थः कर्मानधिकारमाह पैठीनसिः सूतिकांपुत्रवतीं
विंशतिरात्रेणकर्माणिकारयेत्मासेस्त्रीजननीइदमाशौचोत्तरं अन्यथास्मृत्याः सपिंडा
नांमासाशौचेतदभावःस्यात् विध्यनुवादविरोधश्च एतच्चसोमयागादिश्रौतभि
न्नपरं प्रजा[illegible]तायाश्चदशरात्राद्ध्वंस्नानादीतिकात्यायनोक्तेः व्यासः प्रथमेदिव
सेषष्ठेदशमेचैवसर्वदा त्रिष्वेतेषुनकुर्वीतसूतकंपुत्रजन्मनि पुत्रशब्दोऽपत्यमात्र
परः ब्राह्मे देवाश्चपितरश्चैवपुत्रेजातेद्विजन्मनां आयांतितस्मात्तदहःपुण्यंच
कंचसर्वदाजननेविशेषः प्रागुक्तः अत्रप्रयोगपारिजातः पुंप्रसवेदशाहः अप
त्येतुत्र्यहः पुंजन्मनिसपिंडानांदशाहाच्चूडंध्यारिष्यते असोदकोदकानांच ए
काहःसूतकेक्वचित् स्त्रीजन्मनिसपिंडानांसोदकानांअहःशुचिः स्त्रीपुंसि पु

रुषं ज्ञेयं सपिंडत्वं द्विजोत्तमा इत्यादिस्मृतेरित्याह मेधातिथिरपि अप्रत्तानां
तु स्त्रीणां त्रिपुरुषी विज्ञायते इति विशिष्टमुक्त्वा शौचे एवैतद्धि वाक्ये तु विधि
दर्शित एवेत्याह अन्ये तु त्रिपुरुषसापिंड्यस्य कानीनकन्यापरत्वमाहुः अप्रत्तानां
तथा स्त्रीणां सापिंड्यं साप्तपौरुषं प्रत्तानां भर्तृसापिंड्यं प्राह देवः प्रजापतिरिति कौ
र्मविरोधात् न च अन्ने दत्ता वै पंचमात्सप्तमाद्धीनां यः कन्यामुद्वहेद्द्विजः गुरुपत्नीस विज्ञे
य इत्यादिविरोधात् त्रिपुरुषप्रकरणान्मरणशौचपरं वसिष्ठेन दशाहोदकदानो
क्तेः तेन कन्याप्रसवेपि साप्तपौरुषं दशरात्रमेव न च कन्यापुत्रप्रसवे बलाबलं क्वाप्युक्तं
श्रौतिस्मृतिस्त्वनुकल्पो विगीता चेति सिद्धांतः अन्यथा त्रिपुरुषं सपिंडानां अष्टमादि
सोदकानां च अहस्सान्वयोगात् चतुर्थादिसप्तमांतानां च किमपि न स्यात् किंच ।
स्त्रीजन्मोद्देशेन त्रिपुरुषं सापिंड्यं तेषां च त्रिरात्रमित्यनेकार्थविधिः कथं स्यात् ।
वाक्यभेदापत्तेः न च चतुर्थादीनां सोदकत्वं क्वापि सिद्धं तेन त्रिपुरुषं चतुर्थादीनां च स्त्री
जन्मनि सोदकत्वं विधाय पुनस्तेषां त्रिरात्राशौचविधौ विध्यनुवादविरोधे वाक्यभेदश्च
यं चेत्यसंबद्धार्थाभिस्मृतिर्हि या अथ मृतजाताशौचं हारीतः जातमृते मृतजाते वा सपिंडा ग
नां दशाहमिति दशाहमिति त्वाशौचपरं जातमृते नालच्छेदोर्ध्वं यावन्न छिद्यते नालं ता
वन्नाप्नोति सूतकं छिन्ने नाले ततः पश्चात्सूतकं तु विधीयते इति जैमिन्युक्तेः नालां
छिन्नाया मासशौचमिति हारीतोक्तेश्च नाडीछेदात् प्राक्पातः स्पर्शेपि न दोषः इति

320-A

शुद्धितत्वोक्तिः परास्नानामिछादास्य ऊर्ध्वं तेनाह मनुः जीवन्जातो यदि ततो मृतः सूत
क एव तु सूतकं सकलं मातुः पित्रादीनां त्रिरात्रकं इदं च प्रसवाशौचमेव शावनिमित्तं
स्नानमात्रं पूर्णमकरणात्सद्यः शौचमिति शंखोक्तेः अत्र कश्चिदाह नामकरणमाशौचां
तकालोपलक्षणं आशौचव्यपगमे नामधेयमिति विष्णूक्तेः आशौचे च व्यतिक्रांते ना
मधेयं विधीयते इति मनूक्तेश्च नाम्नो नियतकालत्वात् न च नामधेयं दशम्यां द्वादश्यां
वापि कारयेत् पुण्ये तिथौ मुहूर्ते वा नक्षत्रे वा गुणान्विते इति मनूक्तेरनियतकालत्वं द
शम्यामतीतायां विप्रः द्वादश्यामतीतायां क्षत्रियः वैश्यः षोडशे शूद्रः एकत्रिंशे इत्यपि तेषां
पुण्य इत्याद्यनुकल्पः तेन नाम्नः कालोपलक्षणं एवं दंतजनने पि दंतजन्मसप्तमे मासीत्य
पनिषदि नियतकालत्वात् चौलं तु न कालोपलक्षणं प्रथमे वर्षे तृतीये वा कर्तव्यं श्रुति
चोदनादिति मनूक्तेः ततः संवत्सरे पूर्णे चूडाकर्म विधीयते द्वितीये वा तृतीये वा कर्तव्यं
श्रुतिदर्शनादिति यमोक्तेश्च तस्मान्नियतकालत्वादिति तन्मंदं चौलवन्नामदंत
जननयोरपि स्वरूपेणानियतत्वोपपत्तेस्तद्विशिष्टकालानुवादे वाक्यभेदात् सप्त
ममासाद्वाक् [illegible] नेतदभावप्रसंगाच्च यस्तूपनिषद्दर्शनेन नियमं कु
र्यात्तन्न तं शातातपः पुरुष इति श्रुतेश्चर्वाक् पितृमरणे न दंतकर्मापि न प्रजेत् ननु
कालानुपलक्षणे नामोत्तरकं तदभावे वा स्नानमात्राच्छुद्धिः स्यात् ततः किं मृ
तस्य त्वयैवोक्तं आदंतजन्मनः सद्य इति सा च विष्णुवचनात्तु वास्नाभावविष

येतिवक्ष्यामः त्रिवर्षादावपि स्यादिति चेन्न दाहदंतादिनिमित्तैर्विशेषाशौचैः पूर्वापवा
धात् तदुक्तं पूर्वाबाधेनोत्पत्तिरुत्तरस्य हि सिध्यतीति जननाद्दशरात्रे व्युष्टे शतरात्रे संव
त्सरे चेति परिशिष्टे द्वादश्यामपरात्रे मासे पूर्णे तथापरे अष्टादशेऽहनि तथा वदंत्यन्ये म
नीषिण इति भविष्ये च नाम्नः कालानियमाच्चैनं च प्राप्नुयाद्दशरात्रे त्वतीते इति मुख्यः का
लः अन्यस्त्वनुकल्प इति वाच्यं चौलेऽपि तथापत्तेः न च दंतजननकानुपलक्षणे सदंतजा
तमृतस्य दाहैकाहप्रसंगः दशाहेन बाधात् नामकरणोत्तरमेव बहाहप्रवृत्तेः दशाभ्यंतरे बा
लेऽप्रमीते तस्य बांधवैः शावाशौचं न कर्तव्यं सूत्याशौचं विधीयते इति बृहन्मनूक्तेश्च अशौ
चे दाहोपलक्षणं स्नानकवदिति पारस्करोक्तेः यत्तु विष्णूक्तेः अनिहृतिः दशाहे तु पंचत्वं य
दि गच्छति सद्य एव विशुद्धिः स्यान्न प्रेतेनोदकक्रियेति तदपि प्रेताशौचानिषेधार्थं न तु स
द्यस्त्वपरं वाक्यभेदात् किंच नामकालात् किंच नामकालात् प्राक् मृतस्य स्नानं तदुत्त
रं त्वेकाहादि नामकाले त्वेकादशाहे मृतस्य न किमपि स्यात् अथ शंखवचने त्वबलो
पेयंचमी तदा प्रशस्तिति नोपपद्येत नाग्निवापि कृते सतीति मन्वादिविरोधात् कृतनामड़
तिमाधवमिताक्षरादिविरोधात् न च कालोपलक्षणं कार्यमिति दिक् नामोत्तरं दंतोत्प
त्तेः प्राक् दाहे सत्यहः अदंतजाते तनये शिरोगर्भच्युते तथा सपिंडानां तु सर्वेषामहोरात्रम
शौचकं इति यमोक्तेः दाहाभावे तु स्नानमात्रं अदंतजाते प्रेते सद्य एव नास्याग्निसंस्का
र इति विघ्नतादाहाभावे तदुक्तेः आदंतजन्मनः सद्य इति याज्ञवल्क्यीयाच्च तदाह विकल्प

321-A

वाह लौगाक्षिः तूष्णीमेवोदकं कुर्यात्तूष्णीं संस्कारमेव च सर्वेषां कृतचूडानामर्थयमि
ति मेधातिथिहरदत्तौ मनुरपि नात्रिवर्षस्य कर्तव्या बांधवैरुदकक्रिया जातदंतस्य वा
कुर्युः नाम्नि वापि कृते सतीति उदकं दाहोपलक्षणं दंतोत्पत्त्यनंतरं प्राक्त्रिचर्यात्तान्मृतेऽहः
दंतजातेप्यकृतचूडे त्वहोरात्रेण शुद्धिरिति विष्णूक्तेः त्रिवर्षाधो कृतचूडेऽकृतचूडे वा
प्रागुपनयनात्त्र्यहः यद्यप्यकृतचूडो वै जातदंतस्तु संस्थितः तथापि दाहयित्वैनमाशौ
चं त्र्यहमाचरेदित्यंगिरसोक्तेः अत्र जातदंतत्वमुद्देश्यविशेषणत्वादविवक्षितं दाहयि
त्वेत्यस्यानुवादः उभयविधौ वाक्यभेदात् त्रिवर्षात्प्राक् चूडाभावेऽग्निदाने त्र्यहस्त्व।
दभावे विहस्तके रेकाहः इति माधवः अथ त्रिवर्षादौ कृतचूडस्य सदा त्र्यहः। नोहें त्रिचू
डकानां तु त्रिरात्राच्छुद्धिरिष्यते इति मनूक्तेश्च शुद्धितत्वादयो गौडास्तु अजातदंतम
रणेष्विति शिशोरेकाहमिष्यते दंतजाते त्रिरात्रं स्याद्यदि स्यातां तु निर्गुणौ इति कौमा
त्काश्यपं अष्टद्वयरं अपत्यानां तु कन्यानां तथाष्टजन्मामिति आहान्तहोतो रांखोत्रैः
त्रिरात्रं तु भवच्छुद्धेर्बाल्ये मासे पिपिरोमृते इति मत्स्यसूक्ता दंतजातेऽष्टद्वे तु पंचाहः यथा
हांगिराः अष्टे त्रिवर्षान्मृते नेन मृते शुद्धिस्त्र पंचभिः अत ऊर्ध्वं मृतेऽष्टद्वे द्वादशाहो विधी
यत्ते षड्वर्षान्मतौ तायः अष्टद्धः संम्रियते यदि मासिकं तु भवेच्छौचमित्यंगिरसभाषि
तंड्ति यत्र अनष्टभार्यः अष्टद्वस्त्वनितां रेवाकं मासासारौचं नतरगउला अष्टद्वयं निर्गुणो
त्वनष्टभार्ये अष्टे त्रिवर्षोर्ध्वं द्वादशाहः षडब्दोर्ध्वं मासः षडब्दात्प्रागपि सतो हादे।

मासइत्याहुः। तन्न लंघयत्यसिसंवैद्यामिति विरोधाच्छिद्यवर्गातान्नादर्तेत्रमिति विज्ञा
नेश्वरादयः। दाक्षिणात्यानां तत्पैवच अन्यदेशेनागुरुक्तमिति गौडाः। एवं कन्यास्वपि
नास्वप्यजातदंतासु पित्रोरेकरात्रमिति माधवः। यत्तु विज्ञानेश्वरे लौगाक्षिः ऊनद्विवर्षे
उभयोःसूतकं मातुरेव हीति यात्तव ल्लभः गर्भस्य प्रेतमातुर्दशाहं जातउभयोः तेना
त्रिसोदराणां चेति पैठीनस्युक्तेः पित्रोः सोदराणां च दशाहमस्य शास्त्रं च नितन्नेदानीं प्रचर
ति अनतएव समत्यर्थसारे तन्नाहतं कन्यासु चौलात्प्राक् मरणे स्नानं अवचूडायां तु।
कन्यायां सद्यःशौचं विधीयते इत्यापस्तंबोक्तेः इदं त्रिपुरुषमध्ये अप्रत्तानां तु स्त्रीणां या
त्रिपुरुषी विज्ञायते इत्वाशिष्टोक्तेः इदं वाग्दानोत्तरमिति गौडाः। अप्रत्तानामहस्तु पूर्णं त्रिपि
डं सा प्रेतपुरुषमिति वचनात् अन्यो लोत्तरं वाग्दानात् च तासां च काहः। अविशेषेणोक्त्वा
नाम वाक्यसंस्कारकर्मणः त्रिरात्रात्तु भवेच्छुद्धिः कन्यासु ह्याविधीयते इत्यंगिरसा त्रिरा
त्रिविषयेत्वाविधानात् अतः मृदुस्योपनयनस्थानीयविवाहात्पूर्वं त्रिरात्रं विवाहात्के
चित्तु षोडशाब्दमध्ये त्रिरात्रमेवेत्यपरार्काद्याः मृद... निर्दिष्टो न्यब्दोर्ध्वं विवाहः षडब्दोर्ध्वं वि
वाहाभावे द्वादशाहइति गौडाः सगुणानां षोडशाब्दोर्ध्वं तु विवाहाभावेपि पक्षिण्याशौचं वक्ष्यते।
तदुत्तरं प्राग्विवाहाद्भर्तृकुले पितृकुलेच सप्तपुरुषावधि त्रिरात्रं अगारे स्वे पुनातु या
नैवप्रतियादि असंस्कृतास्त्रैयात्रिरात्रमुभयोः स्मृतमिति मरीच्युक्तेः रत्नाकरे शुद्धितत्त्वे
चशंखः पितृवेश्मनियानारी रजःपश्यत्यसंस्कृता तस्यां मृतायां नाशौचं कदाचदपि शाम्य
ति यावज्जीवमशौचमिति मिश्राः। अथानुपनीते किंचिदुच्यते नाम्नः पूर्वं खननमेवत

322-17

ऊर्ध्वं वर्षत्रयात्सर्वेषां तदभावे तूदकदानविकल्पः नाद्विवर्षस्य कर्त्तव्या बांधवैरुदकक्रिया
जातदंतस्य वा कुर्युर्नाम्नि वापि कृते सतीति मनूक्तेः उदकक्रिया साहचर्याद्दाहोपलक्षणं च
ननेतु नान्यदेशेऽर्ध्वं देहिकं ऊनद्विवार्षिकं प्रेतं यत्ताङ्क्ते निखनेद्भुवि विषमगाथा गायमानो यमसू
क्तमनुस्मरन् माधवीये ब्राह्मेऽपि स्त्रीणां तु पतितो गर्भः सद्योजातो मृतोऽथवा अजातदंतो
मासैर्वा मृतः षड्भिर्गतैर्बहिः वस्त्राद्यैर्भूषितं कृत्वा निक्षिपेत्तं तु काष्ठवत् खनित्वा शनकै
र्भूमौ सद्यः शौचं विधीयते अलंकरणमपि वक्ष्यते कृतचूडस्य तु त्रिवर्षात्प्रागूर्ध्वं उपन
यनात्सर्वेषां च तूष्णीमुदकदानं तूष्णीमेवोदकं कुर्यात् तूष्णीं संस्कारमेव चेति पूर्वोक्तेः लौ
गाक्षिस्मृतेः पिंडदानमपि कार्यं असंस्कृतानां भूमौ पिंडं दद्यात्संस्कृतानां कुशेष्विति पृथ्वीचन्द्रो
क्तेः उदकदानं सपिंडः कृतचूडस्येति गौतमोक्तेः उदकग्रहणमौर्ध्वदेहिकपरमिति हरदत्तः
द्वादशाहं तु स्याद्वा कुर्यात् पौगंडमरणे सति सपिंडीकरणं न स्यादेकोद्दिष्टानि कारयेदिति हरद
त्तधृतदेवलोक्तेश्च मरीचिरपि प्रेतपिंडं बहिर्दद्याद्दर्भमंत्रविवर्जितमिति एतदनुपनीत
परमिति विज्ञानेश्वरः अत्र चूडे चरमो वा वधिः पूर्वे वा केषुचन ग्रहणात् उदकहरणस्योपलक्षण
त्वाद्दाहः पूर्वो वधिरिति केचित् द्वादशाहं तु स्यादित्वनुपनीतद्विजान् दाशरेद्विषयं अनुहाशौ
चे पिंडदानविधिमाह पारस्कारः प्रथमे दिवसे देयास्त्रयः पिंडाः समाहितैः द्वितीये चतुरो दद्या
दस्थिसंचयनं तथा त्रीस्तु दद्यात्तृतीये तु वस्त्रादिक्षालयेत्ततः इति अत्रदेव यान्तिकानि वधे वि
शेषः शिशुरादंतजननाद्बालः स्याद्यावदाशिखः कथ्यते सर्वशास्त्रेषु कुमारो मौंजिबंधनात् आ
पंचवर्षात्कौमारं पौगंडं नवहायनः तथा गर्भे नष्टेऽत्रिः पातनास्ति गर्भे दैवविशेषोऽस्तीति पंच

लि० सि०
३२३

323

पायसं क्षीरं दद्याद्बालविपन्नितः एकादशाद्वादशाहवृषोत्सर्गविधिविना तथा यत्र प्रमीय
ते बालस्तत्र प्रायः किंचित्समानवयसां सहकृत्यान्नं यथाविधि भक्ष्यं भोज्यं च दातव्यं त
था च सुखभक्षिकाः तद्वस्त्राणि प्रदेयानि सोपानत्कानि तत्समे कुमाराणां च बालानां
भोजनं वस्त्रवेष्टनं यच्चोपजीवते बालस्तत्तद्धि प्रायदीयते तथा भूमिनिक्षेपणं बाले
प्राग्वर्षद्वयमासिखं ततः परं खगस्येष्टदेहदाहो यथाविधि अप्रचूडस्य ऊर्ध्वं खननं निहतस्य र
र्धमावर्षद्वयमिति प्रागयिकृतचूडस्य ननिहतस्य र्धमाशिखमिति तथा चूडाकर्मणि सं
जाते विपत्तिस्तु यदा भवेत् स्तनकांते प्रकर्तव्यं वृषोत्सर्जनं तदा तत्र दाहः प्रकर्तव्य उ
दकं तत्र निश्चितं श्राद्धानि षोडशापि स्युः सपिंडीकरणं विना इदं पंचवर्षांतरे जन्मतः पंच
वर्षाणि भुक्तेदत्तमसंस्कृतं पंचवर्षाधिके बाले विपन्ने यदि जायते वृषोत्सर्गादिकं कर्म
कर्तव्यमुदकं ततः अहन्यहनि संप्राप्ते कुर्याच्च श्राद्धानि षोडश पायसेन गुडेनैव पिंडं दद्या
द्यथाक्रमं उदकं भप्रदानं च पददानानि यानि च दीपदानादि यत्किंचित्पंचवर्षाधिके स
दा कर्तव्यं स्वगास्येष्टस्तत्कालं तावाकृपेन तत्पूर्ये स्वाहाकारेणैव कार्याण्येकोद्दिष्टानि षोड
श अस्तु दर्भैस्तिलैः सव्यैः प्राचीनावीतिनानयेति तत्रैवोक्तेः अत्र मूलं चिंत्यं वार्षिका
दि तु न भवत्येव सपिंडनाभावे पितृत्वायोगात् वचनाभावाच्च दिवोदासीये अकृते
निधने प्राप्ते विप्रादेर्मृतस्य याति वत्क्रियाः सर्वाः समुद्दिष्टाः सपिंडीकरणं विना उदकं पिं
डदानं च कृतचूडे विधीयते इति स्त्रीणां तु द्वाहात्प्रागुदकपिंडदानविकल्पः स्त्रीणां चैके

323 A

भ्रातामिति गौतमोक्तेः स्त्री मृद्दुक्ष्मसधर्माणः इति वचनात्तत्पुत्रेष्वेवं एतत्स्वयोनिमित्ताशौ
चं सर्ववर्णसमं तु स्वयंवयसि सर्वेषामतिक्रांते तत्पैव चेति प्राघ्नपादोक्तेः यानि तु स्मि
त्यन्तरोक्ते विप्रे त्रिरात्रात् शुद्धिस्तु पंचभिः अत ऊर्ध्वं स्वतेष्वेद्वं द्वादशाहो विधीयते ष
ड्वर्षांतमतीते तु मृते मासमशौचकमित्यंगिरसादीनि तानि शिष्टविगीतान्नादर्त
व्यानीति विज्ञानेश्वरमदनपारिजातादयः तेनैतत्स्वशाचधृ[illegible]वस्याप्रागुक्तमहेष्येव तु
ल्यंवयसि सर्वेषामिति दाक्षिणात्यपरं अन्ये देशकालमात्ताव्यवस्थेति शुद्धितत्वे अथ जनना
शौचं तत्र द्विजपुंसामुपनयनोर्ध्वं प्रवर्त्तते त्रिरात्रमाव्रतादेशाद्दशरात्रमतः परं सेत्रस्य
द्वादशाहानि विंशः पंचदशो वनः त्रिंशद्दिनानि शूद्रस्य तदर्धं न्यायवर्तिन इति याज्ञवल्क्यो
क्तेः यत्तु सद्य एव त्रिरात्रं दशरात्रं वा शावमाशौचमिष्यते इत्याह तत्र दन्ताहेः त्रिरात्रमसस्य
शात्वं एकदिनोत्यन्वेष्वाशौचं वत्स्ये दशाहमस्पृश्यत्वं मरणं यदि तु लंघ्य स्यात्तन्मरणेन वा
प्रचन अस्पृश्यं तु भवेद्धात्रे सर्वमेव सबांधवमित्यंगिरसोक्तेः दशाहाशौच परत्वे दशरा
त्रमतः परमित्यनेन पौन[illegible] आपन्नेरिति शुद्धिविवेकादयः तत्र स्मृतिभेदात् त्रिरात्रे द
शरात्रे चेति किं कल्पायोगाच्च यस्तु पुत्राणां वेदानध्याप्य वृत्तिं विदधाति तत्राह आ
श्वलायनः द्वादशरात्रं महागुरुषु दानाध्ययने वर्जयेरन्निति अत्र यावदुक्तनिषेधो वा
अस्पृश्यत्वमात्रं वा न तु कर्मानाधिकारः एकादशाहे श्राद्धं तेनैव[illegible]देवोक्तेः एकादशाहे
मुख्यान्नत्र[illegible]तेनैव विधीयते इति शुद्धितत्वे तु त्रयः पुरुषस्यातिगुरवो भवंति माता

नि॰सिं॰
३२५

324

पित्राचार्येष्विति विष्णूक्तेः पित्रादयो महागुरवः भर्त्राप्युक्तो रामायणे पतिर्बंधुर्गति
र्भर्त्ता दैवतं गुरुरेव च शातातपः पतिरेको गुरुः स्त्रीणां सर्वस्याभ्यागतो गुरुः एकपद
मूढानां पितृमातृनिषेधार्थं सोदकानां त्रिरात्रमपहाय कदाचिन्नेति मदनरत्नोक्तेः अग्निपु
राणे सपिंडता तु पुरुषे सप्तमे विनिवर्त्तते समानोदकभावस्तु निवर्त्तेत चतुर्दशे जन्म
नामस्मृतेर्वैकेतत्परं गोत्रमुच्यते बृहस्पतिः दशाहेन सपिंडास्तु शुध्यंति प्रेतसूतके
त्रिरात्रेण सकुल्यास्तु स्नात्वा शुध्यंति गोत्रजाः स्त्रीशूद्रयोस्तु विवाहोर्ध्वं जातस्याशौचे
वैवाहिको विधिः स्त्रीणामौपनायनिकः स्मृत इत्युक्तेः दत्तानां भर्तुरेव हि एवं जात्युक्तमाशौ
चं स्यात्सूतके जातके तथेति माधवीये ब्राह्मे च शूद्रस्य विवाहाभावेपि षोडशवर्षोर्ध्वं मा
सः अनूढभार्यः शूद्रस्तु षोडशाद्वत्सरात्परं मृत्युं समधिगच्छेच्चेन्मासात्तस्यापि बांधवाः
शुद्धिं समधिगच्छंति नात्र कार्या विचारणेति अपरार्के शंखोक्तेः निर्णयामृतमदनपारिजा
तादौ त्वन्यथोक्तेः हारीतः आमौंजीबंधनाद्विप्रः क्षत्रियश्च धनुर्ग्रहात् आप्रतोदग्रहाद्वैश्यः
शूद्रो वस्त्रद्वयग्रहात् धनुःप्रतोदावष्टमे वै द्वादशे वस्त्रद्वयमिति तिथिस्तु रात्रमाचरनादि
शादिस्तु धृतेकालोपलक्षणार्थं स च कालः स्वस्वीयः सर्वेषां चाष्टमवर्षरूपः तेन चतुर्णा
मपि वर्णानामुपनयनाभावेप्यष्टमादूर्ध्वं पूर्णमेवाशौचं तत्रापि प्रागष्टमाच्छिशवः प्रो
क्ता इति स्मृत्यंतरात् ऊर्ध्वं संपूर्णमर्वाक् त्रिरात्रं पैठीनसिः षोडशाद्वेद्वालइत्यादु तेषामप्यष्ट
मादूर्ध्वं शूद्रे मास एव जन्ममष्टम्याद्वर्षेभ्यः शुद्धिः शूद्रस्य मासकीर्तितवचनादित्या

राम
३२५

324-A

द्वहारलतायांशुद्धितत्वादिगौडग्रंथेप्युक्तं अनुपनीतो विप्रस्तु स्त्रिकाः म्रियते यत्र तत्र स्यादाशौ
चंत्र्यहमेवहि द्विजन्मनामयंकालस्त्रयाणांतुषडब्दिकइत्यादिपुराणोक्तो ह्युपनयने का
लोपलक्षणं षडब्दपदमासत्रयाधिकपरं गर्भाष्टमेष्टमे वाब्दइत्युक्तेः यत्तु जाबालः
व्रतचूडाद्विजानांचप्रतीतिपुरुषाकुमारादशाहंस्यहाराकाहैः शुध्यंत्यपिहिनिर्गुणा
इति द्विजादयाः इदंप्रतीत्युक्तः पंचाब्दोपनीतपरमिति तदेतन्त्राद्वियंते वृद्धाः योनि
त्तु पराशरः एकाहाच्छुद्ध्यते विप्रो योग्निवेदसमन्वितः त्र्यहात्केवलवेदस्तु द्वि
हीनो दशभिर्दिनैः केवलश्रौताग्नरप्युपलक्षणं अयंसंकोचो होमाध्यायनपराणावन
न्तसंध्यादाविति हारलतायां अंगिराः सर्वेषामेव वर्णानां सूतके मृतके तथा दशाहाच्छु
द्धिरेतेषामिति शातातपोब्रवीत देवलः मासमेकं दशरात्रं तु सर्वेषामपरे विदुः निधनेप्र
सवे चैव परंयतः कर्मणः क्षयं अत्यंतोत्कृष्टस्य कर्महानौ पीडावतो विप्रपरिचर्यापरं श्र
द्धदशरात्रमिति हारलतायां दक्षः सद्यः शौचं तथैकाहस्त्र्यहश्चतुरहस्तथा षड्दशद्वादशाहस्तु
पक्षो मासस्तथैव च मरणांतं तथा चान्यद्दशपक्षास्तु सूतके मिताक्षरायां स्मृत्यंतरं चतु
र्थेदशरात्रं स्यात्षण्णिशाः पुंसि पंचमे षष्ठे चतूरात्र शुद्धिः सप्तमेत्वहरेव तु इत्यादीनि नान्यप
दनाचक्रणवद्ध्रुणवर्द्धियाणिदेशाचारभेदाद्दानेयानि सद्यः शौचादिषड्हांताः पक्षाद्या
यावरादिपराः अत्रमरणांतं जननादिनिमित्तादिन्ने शिष्टविमानात्वादत्रव्यानीतिविज्ञा
नेश्वरः अस्नात्वाचाप्यहुत्वाच अदत्वाश्नंस्तथा द्विजः एवंविधस्य विप्रस्य सर्वदा सूतकं

नि॰ सिं॰
३२५

325

भवेदिति दक्षोक्तथा अन्यदर्वीयस्य गेहे भार्यास्यात्तस्य नित्यशः आशौचं सर्वकार्येषु देहे भ
वति सर्वदेति व्याघ्रपादिवचनाच्च व्यवस्थेयमपरार्कमदनपारिजातादयः माधवस्तु दत्तस्वाध्याय
सापेक्ष्यमष्टसंकोचनं तत्थेति कालेव जैक्तेः दशाहमेव विप्रस्य सपिंडमरणे सति कल्प्यांतरागि
कृताग्निः कृतैो भवति किंत्विषीति हारीतोक्तेरन्यत्र नाशौचपक्षापुगांतरविरोधः मरणांतो
दिपक्षास्तु निंदार्थवादं अन्यथा नामधारके विप्रस्तु दशाहस्तत्तकी भवेदिति विरोधः स्यादित्याह
यत्तु देवलः दशाहादि त्रिभागेन कृते संचयने क्रमात् अंगस्पर्शनमिच्छंति वर्णानां तत्त्वदर्शिनः इ
ति पूर्णाशौचस्य स्पर्शत्वमाह यच्चानुपनीतानि क्रांताशौचे त्रिरात्रादौ तेनैवोक्तं स्वाशौचकालाद्वि
ज्ञेयं स्पर्शनं तु त्रिभागत इति तदपि युगांतरेषु अस्थिसंचयनादूर्ध्वमंगस्पर्शनमेव चेति
माधवीये कलौ तन्निषेधात् यत्तु हारलतायां चतुर्थेहनि कर्तव्यः संस्पर्शो ब्राह्मणस्य तु वि
तिप्रचेतसोक्तेरस्मद्देकाशौचेपि चतुर्थाहरणं गस्पर्श इति तन्न देवलादिविरोधात्स्वदशा
हगोचरत्वात् येतु वर्णानां करंजा मध्वीचसिक्ताघ्रास्तेषामाशौचे विशेषः कलौ नोपयुक्त इ
ति नोच्यते प्रतिलोमजानां शौचं मलापकर्षणार्थं स्नानमात्रमिति विज्ञानेश्वरः माधवस्तु
शौचाशौचे प्रकुर्वीरन् शूद्रवर्णसंकरा इति ब्राह्मोक्तेः शूद्रवदाह हारलतायामेवं दत्तक्रीत
कृत्रिमादिपुत्रेषु अहीनवर्णगास्तु स्त्रीषु च पिंडत्वेपि पूर्वमरणे च पूर्वापरपित्रोर्भर्तुश्च
त्रिरात्रमेव न दशाहादि अनौरसेषु पुत्रेषु जातेषु च मृतेषु च परपूर्वासु भार्यासु प्रसूता
सु मृतासु चेति त्रिरात्रान्नु नत्तौ विघ्नरक्तेः सपिंडानां त्वेकाहः परपूर्वासु भार्यासु पुत्रेषु कृत
तकेषु च भर्तृपित्रोस्त्रिरात्रं स्यादेकाहस्तु सपिंडत इति माधवीये हारीतोक्तेश्च स्तनके।

राम
३२५

मृतकेषु पुत्रेषु भार्यास्वन्यगतासु च परपूर्वासु च स्त्रीषु त्रिरात्राच्चैव त्रिरात्रं पूर्वपरपूर्वयोः
एकाहस्तु सपिंडानां त्रिरात्रं यत्र वै पितुरिति मरीच्युक्तेश्च शंखः अनौरसेषु पुत्रेषु भार्या
स्वन्यगतासु च स्त्रीषु त्रिरात्राच्छुद्धिरिष्यते परपूर्वा पुनर्भूः इदं सवर्णासु हीनवर्णासु तु शं॰
खलिखितौ परपूर्वासु भार्यासु पुत्रेषु कृतकेषु च नानध्यायो भवेत्तस्य नाशौचं नोदकक्रि
या तत्रापि आशौचं तु त्रिरात्रं स्यात्समवर्णेषु निश्चितं यत्तु षडशीतौ अन्यपूर्वावरुद्धास्तु त्रि
दिनाच्छुद्धिरिष्यते नास्वेवानन्यपूर्वासु पंचाहोभिर्विशुध्यतीति तत्रियं चाह स्मृत्यंतरं
यत्तु याज्ञवल्क्यः अनौरसेषु पुत्रेषु भार्यास्वन्यगतासु चेत्येकाहमाह तदसत्सिद्धौ ज्ञेयं यदपि तु
एकाहस्तदा सपिंडानां स्नानं अन्याश्रितेषु दारेषु परपत्नीसुतेषु गोत्रिणः स्नानशुद्धाः स्युस्त्रि
रात्रेणैव तत्पितेति प्रजापत्युक्तेः पितेति वोढुरुपलक्षणं तयोपक्रमात् यत्तु दत्तके पालकश्च
तियोगिकपुत्रत्वात्पूर्वपितुर्न त्रिरात्रं पूर्वसंबंधानिवृत्तेश्च न दशाहानि कश्चित् तत्राह तेन
यिवैजिकादपि संबंधादनुरुध्याद्यस्याहमिति वाचनिकाशौचस्यानिवार्यत्वात् पितृमरणे
यिदत्तकादीनां त्रिरात्रमशुद्धिः तत्त्वे ब्राह्मे दत्तकश्च स्वयंदत्तः कृत्रिमः क्रीत एव चेत्युपक्रम्य सू
तके मृतके चैव महाशौचस्य भागिन इत्युक्तेः दत्तौरसयोर्भागोऽस्त्येतत्पुत्रपौत्रश्च स्मृ॰ तिको मुख्या
हतलतायां चैव दत्तकस्य पुत्रपौत्राणां जनने मरणे वा सपिंडानामेकाहः वीजिनः श्राद्धेति गोत्र
मेन साम्ययोरुभयसापिंड्योक्तेः सपिंडानां चैकाहः स्यात् कृत्वा सापिंड्ये तु पुत्री कृतेन दशाह एव तत्रा
कांस्यामावात्सापिंड्ये न दशाह प्राव ल्पश्च पूर्वापर भर्तृरुत्पन्नयोः पुत्रयोस्त्वाह माधवीये

मरीचिः मातुरैकपाद्विपितृकौ भ्रातरावन्यगोत्रजौ एकाहं सूतके तत्र त्रिरात्रं मृतके तयो
रिति दिक् ऊढकन्यानां तु विष्णुः गृहे संस्कृतास्तु स्त्रीषु नाशौचं पितृपक्षे तत्प्रसवमरणे चे
त् पितृगृहे स्यातां तदेकरात्रं त्रिरात्रं चेति प्रसवे एकरात्रं मरणे त्रिरात्रमिति विज्ञानेश्वरा
परार्कौ माधवस्तु प्रसवे पि त्रिरात्रं पित्रोः एकरात्रं भ्रात्रादिबंधुवर्गे दत्ता नारी पितृगेहे सू
येताथ म्रियेत वा तद्बंधुवर्गस्त्वेकेन शुचिस्तज्जनकस्त्रिभिरिति ब्राह्मोक्तेरित्याह यत्तु क
श्चिदाह पक्षिण्यहं न भ्रातरो गृहस्थे ते वाक्यांतरेण भगिनीमृतौ त्रिरात्रोक्तेरिति तच्चिंत्यं तद्रा
वादेतद्विरोधाच्च भ्रातुः प्रसवे एकाहः मृतौ त्रिरात्रमिति केचित् पुत्रा तु पक्षिणी भर्तृपि
त्राणामेकाहः वर्गोक्तेः इतरेषां यथाविधीति वक्ष्यमाणवचनाच्च यत्तु प्रधानगृहे मृतौ
पित्रोः पक्षिणी भ्रातुस्त्वहरिति कश्चित्तन्न मूलाभावात् नाशौचं पितृपक्षे त्वेतद्विरोधाच्च भ्रातृद
त्ता नारी पितृगेहे प्रधाने सूयते यदा म्रियते वा तदा तस्याः पिता शुध्येत् त्रिभिर्दिनैरिति कल्प
तरौ शुद्धितत्त्वे च पतिगृहे प्रसवे तु पित्रादीनामाशौचं नास्ति मृतौ पित्रोस्त्रिरात्रमस्त्येव प्र
त्तापुत्रस्तु योषित्सु संस्कृतासु च माता पित्रोः त्रिरात्रं स्यादितरेषां यथाविधि अजातदंता
सु पित्रोरेकरात्रमिति माधवीये शंखकार्ष्णाजिनस्मृतेः चैत्रिकादर्शसंबंधादित्युक्तेः प्रस्त
त्वर्थसारे त्वेवं माधवस्तु इदं त्रिरात्रं जातदंतपरं दंतोत्पत्तेः प्रागेकरात्रं पित्रोः सद्य स्त्वप्रौढक
न्यायां प्रौढायां वसराद्भुचिः प्रदत्तायां त्रिरात्रेण दत्तायां पक्षिणी भवेदिति पुलस्त्योक्तेरन्यत्र
कन्यामृतौ पित्रोः पक्षिणीत्याह षष्ठी तावधि पितृगेहादत्तोत्पन्नपदि पुत्राप्रमीयते

3926-॥ ६३

पक्षिणी तत्र पित्रोः स्यान्नान्येषामिति निश्चय इति ग्रामांतरे त्र्यहमिति स्मृत्यर्थसारे भ्रातृसुते
पक्षिणी श्वशुरयोर्भगिन्यां च मातुलान्यां च मातुले पित्रोः स्वसरि तद्वच्च पक्षिणीं क्षपयेन्नि
शामिति वृद्धवसिष्ठस्मृतेः शुद्धितत्त्वे दौर्गे प्रदत्तासोदरे सद्यमाचूडादेकरात्रकं अप्रदाना
त्रिरात्रं स्याद्दशरात्रमतः परं पित्रोर्मृतौ स्त्रीणां त्रिरात्रं पित्रोरुपरमे स्त्रीणामूढानां तु कथं
भवेत् त्रिरात्रेणैव शुद्धिः स्यादित्याह भगवान्यम इति माधवीये शुद्धिमन्त्रके: इदं दशा
हातः ऊर्ध्वं तु पक्षिणी भ्रातृभगिनीगृहे न स्याद्वा तद्गृहे मृतौ त्रिरात्रमन्यत्र तु पक्षिणीति
वदशीनावुक्ते ग्रामेऽपि परस्परं मृतौ भ्रातृभगिन्योः पक्षिणी भवेत् मातुलाशौचवत्तु मा
पितृव्याशौचमिष्यत इति शिष्टाचारस्य निर्मूलत्वात्पितृव्ये स्नानमात्रमाहुः त्रिंशन्मे
कंपा प्रेतस्यावर्षमातामहदुहितृसुतश्रोत्रियपत्नीकुस्थपञ्चस्वस्त्रीयेषु त्रिरात्रं त्रिदिव
समभ्युचिः सोदकस्य भयत्र पक्षिण्याशौचमत्पितृदुहितृसुतमदाध्याप्यपि वंधुत्रयांते वा
तिस्रस्रसुस्रभुभगिनीकाभागिनेयपुत्रयाणोमातामह्योश्च पित्रोः स्वसरि चविरते मालेमा
तुलान्यां वाचार्ये सद्योतिरेव स्वविषयनृपतेष्वाममनाप्येच नष्टे शिष्योपाध्यायवंधुत्रयगु
सुततनया वाचार्यासगोत्रान्स्वानश्रोत्रियेषु स्वगृहस्थपरस्मृतौ मातुले चैकरात्रं रात्रिं सब्रह्मचा
लिएयथलकाव्यमपि स्वल्पसंबंधयुक्ते स्नानं वाशौचयुक्तं स्यादिदमपि सकलं सर्ववर्णेषु
तुल्यमिति सूत्रमूलं मिताक्षरादौ स्पष्टं दौहित्रे भागिनेययोः संस्कृतयोस्त्रिरात्रं अनु
पनीतयोः पक्षिणी संस्थिते पक्षिणीं रात्रिं दौहित्रे भगिनीसुते संस्कृते तु त्रिरात्रं स्या

दिति धर्मो व्यवस्थित इति हेमाद्रिः। संस्थिते दाहे न तेन दाहे त्रिरात्रं नान्यथेति गौडाः
तन्न विशेषवैयर्थ्यात् मातुलादौ सन्निधिविदेशाभ्यां पक्षिण्येकाहयोर्व्यवस्था मनुः
त्रिरात्रमाहुराशौचमाचार्ये संस्थिते सति तस्य पुत्रे च पत्न्यां च दिवारात्रमिति स्थितिः।
श्रोत्रिये स्वगृहे त्रिरात्रं श्रोत्रिये तूपसंपन्ने त्रिरात्रमशुचिर्भवेदिति स्मृतेरिति माधवः
ग्रामान्तरे त्वेकाहः अस्त्विदं बहुस्य कालश्रौतस्मार्तयाजनपरे त्रिरात्रं त्रेयेष्वपि क
मेकुर्वत एव वाचकः शब्दो भवतीति शबराचार्यैः कर्ममध्ये अस्त्विदमुक्तं तथापि क
मेण्याशौचनिषेधात् दूरमेव नतं चैयगोऽस्तु समानोदकानां अहो गोत्रजानामहः
स्मृतं मातृवंधोर्गुरोर्मित्रे मंडलाधिपतौ तथेति जाबालोक्तेः मातृवंधुष्वेकाहमाहुः शि
ष्ये सोपनीते अहः शिष्यसतीर्थ्यसब्रह्मचारिषु क्रमेण त्रिरात्रमहोरात्रमेकाहमिति माध
वीये बौधायनोक्तेः अन्यत्र तु मनुः मातुलेय पक्षिणीं रात्रिं शिष्यर्त्विग्बांधवेषु चेति बंधु
त्रयं आत्मपितृष्वसृमातृष्वसृमातुलपुत्रा इति विज्ञानेश्वरः अत्र पक्षिणी पितृष्वस्रादि
कन्यानामदत्तानां त्वेकाहः तद्वंधुवर्गे त्वेकेनेति पूर्वोक्तवचनात् यत्तु षडशीत्यां एवं
पित्रोर्भगिन्योर्येऽपि पितामहयोस्तथा ये मातामहयोश्चैव भगिन्योस्तत्प्रजाश्च याः मातुर
ल्लाः स्वसा पित्रोश्च पत्न्यश्चैव प्रजाश्च याः या मातुरश्चेति सर्वेषु पाक्षिणी स्वगृहे अ
हं एवं श्वशुरयामातृदौहित्रविषयदिस्मृतं यच्च यमः यामातरि मृते तच्छुद्धिः त्रिरात्रेण मातामह
योः स्मृता पक्षिणी शालकानां स्यादिति शातातपोऽब्रवीदिति तन्निर्मूलत्वान्मिताक्ष

त्रैकरा ५

शादिविशेषोपि परस्यं मदनपारिजाते विष्णुः असपिंडे स्ववेश्मनि मृते एकरात्रं त्र
यहरदन्नोतः शवे चैत्याय संवसत्रैंऽतः शवे ग्रामे धनुःशतादर्वागन्नमभोज्यं दीपमु
दकुंभं चावनिधाय तलमंजीत यदि समावर्त्तनं गृहमेव सूतिकामित्याह प्रधान
गृहमृतेनोन्न गृहे यस्य मृतः कश्चिदसपिंडः कथंचन तस्याप्यशौचं विज्ञेयं त्रिरात्रं
नात्र संशय इत्यंगिरसोक्तमिति माधवः एतेन त्रिरात्रमसपिंडेषु स्वगृहे संस्थिते
षु चेति कौर्मव्याख्यानं प्रत्युक्तं तत्त्वविद्वन्मनुः अस्पृश्यपतितास्तासां मृतास्याद्द्विजमं
दिरे शौचं तत्र प्रवक्ष्यामि मनुना भाषितं यथा दशरात्रात् शुनि मृते मासात् शूद्रे भ
वेच्छुचिः द्वाभ्यां तु पतिते गेहमन्त्ये मासचतुष्टयात् अत्यंते वर्ज्ययेद्गेहमित्येवं मनुर
ब्रवीत् अंत्यो म्लेच्छः अंत्यजः श्वपाक इति वाचस्पतिः यमः द्विजस्य मरणे वेश्म विशु
ध्यति दिनत्रयात् संवर्तः गृहशुद्धिं प्रवक्ष्यामि अंतःस्थशवदूषिते प्रोत्सृज्य मृन्मयं भां
डं सिद्धमन्नं तथैव च गोमयेनोपलिप्ताथ छागेनाघ्रापयेत्पुनः ब्राह्मणैर्मंत्रपूतैश्च
हिरण्यकुशवारिभिः सर्वमभ्युक्षयेद्वेश्म ततः शुध्यत्यसंशयं वृद्धवसिष्ठः ग्राममगतो या
वच्छवस्तिष्ठति कस्यचित् ग्रामस्य तावदाशौचं निर्गते शुचितामियात् गृहे यस्मादे
मृतेष्वेवं यत्तु माधवीये प्रचेतसा मातृष्वस्रादिषु त्रिरात्रमुक्तं मातुल श्वसृ मातुलयोः
श्वश्रूश्वशुरयोर्गुरोः मृते चर्त्विजि याज्ये च त्रिरात्रेण विशुध्यति इति गुरुराचार्यः श्व

त्रिकुलागतः तत्स्वगृहमृतौ ज्ञेयं श्वशुरयोरन्यत्र मृतावपि सान्निध्ये त्रिरात्रं असान्नि
ध्ये पक्षिणी देशांतरे एकरात्रं वक्ष्यमाणविष्णूक्तेरिति माधवगौडादयः श्वश्रूश्वशुरमातु
लस्वस्रादिषु पित्रोः स्वसरि तद्वच्च पक्षिणीं क्षपयेन्निशामिति वृद्धमनूक्तेः तद्वद्व
मनुः भगिन्यां संस्कृतायां तु भ्रातर्यपि च संस्कृते मित्रे जामातरि प्रेते दौहित्रे भगिनी
सुते शालके तत्सुते चैव सद्यः स्नानेन शुध्यतीति तद्भ्रातृदौहित्रादौ देशांतरे शालक
सुते जामात्रोः स्वदेशे ज्ञेयं शालके तु स्वदेशे एकाहः आचार्यपत्नीपुत्रोपाध्यायमा
तुलश्वशुरश्वश्रूश्वशुर्यसहाध्यायिशिष्येष्वेकरात्रमिति माधवीये विष्णूक्तेः हरद
त्तीदशश्लोकामध्येप्येवं श्वश्रुर्यः शालकः देशांतरे स्नाने श्वशुरयोर्देशांतरे एका
हः जाबालः एकोदकानां तु त्र्यहो गोत्रजानामहः स्मृतं सर्वत्र मृत्यभावे पि क्रिया
कर्तुर्दशाहः गुरोः प्रेतस्य शिष्यस्तु पितृमेधं समाचरन् प्रेताहारैः समं तत्र दशरात्रेण
शुध्यतीति मनूक्तेः शिष्य इत्युपलक्षणं निरन्वये सपिंडे तु मृते सति दयान्वितः त
दशौचं पुराचीर्त्वा कुर्यात्तु पितृवत्क्रियामिति माधवीये ब्राह्मोक्तेः दिवोदासीये सगो
त्रो वासगोत्रो वा योग्निं दद्यात्सखे नरः सोपि कुर्यान्नवश्राद्धं शुध्येच्च दशमे हनि यत्रै
कविषये पाक्षिण्येकाहादि पक्षद्वयमुक्तं तत्र सन्निधिविदेशमेव्यादिकृता व्यव
स्था त्रिंशच्छ्लोक्यां वानप्रस्थे मृते चापरमतिकुलजे पंडके वाप्लवः स्याद्योषिद्गो

विप्रगुर्व्यर्थेमृतनवतितद्दिनंयुद्धविद्धेचसद्यः अगमलाभाकरेस्यंद्वं युद्धमरूढा
मृतस्यस्नानंनयतेराहवेरास्वैक्षत्रधर्मेहतस्यच सद्यःसंतिष्ठतेयज्ञस्तथाशौचमि
तिस्थितिरितिमनूक्तेः यशोत्वमेसर्वतदेवेत्यर्थः यत्तुभारतेराजधर्मेषु अशौचोर
हितःशूरःस्वर्गलोकेमहीयते नयस्यान्नमुदकंनस्यनस्नानंनाप्यशौचकमितिमित्रा
द्धादिनिषेधः सपुत्राद्यभावपरः अनएवतत्रकर्मिदीनांश्राद्धमुक्तं अन्येनतुदशापिंड
निषेधमाहुर्यतिवत् यत्तुपराशरः आहवेषुहतानांचएकरात्रमशौचकमितितत्यु
द्धस्तेनकालांतरमतेज्ञेयं असान्निध्येस्नानमितिमाधवः पुष्ठितत्वे त्रिपुराणे दं
ष्ट्रिभिःशृंगिभिर्वापिहतानांश्चैश्चतस्करैः येस्वाम्यर्थेहतायांतिराजन्स्वर्गेनसंशयः
सर्वेषामेववर्णानांक्षगवस्याविशेषतः यत्तुबृहस्पतिः हिंसावाहवेविद्युताचराता
गोविप्रपालनेसद्यःशौचंमृतस्याहस्तंपचान्यमहर्षयः तत्कुसंविनापरामुखहत
तेचत्रिरात्रंराजावध्यहतेसद्यःशौचमन्यत्रत्रिरात्रं तत्रैवव्याघ्रः क्षतेषियंतेयस्तु
तस्याशौचंभवेद्विधा आसन्नात्रिरात्रंस्याद्दशरात्रमतःपरं शस्त्राघातेअह्नाद्धे
यदिकश्चित्प्रमीयते अशौचंप्राकृतंतत्रसर्ववर्णेष्वनित्यशः शस्त्राघातेक्षतंविना श
वस्यदीनहारीतः शावस्यशौचमाशामेनवविशेषुदानक्षत्रदर्शनाद्वात्रौचेदादित्यस्य यत्तु
मनुः अह्नाचैकेनरात्र्याचत्रिरात्रैरेवचत्रिभिः शावस्पर्शोविशुध्यंति त्र्यहादुदकदाः
यिनइति अह्नात्रराज्याचेत्यहोरात्रमुक्तं त्रिभिस्त्रिरात्रैरितिनवरात्रमेवंदशरात्र

नि.सिं.
३२९

329

मित्यर्थः तत्र दत्ताशने तद्गृहवासे नैर्यदि वर्जितं अन्नदन्नाममेवनचेत्तेषां गृहे वसेदि
ति तन्नैवोक्तेः अंगिराः आशौचं यस्य संसर्गादापतेद्गृहमेधिनः क्रियास्तस्य न लुप्यं
ते गृह्याणां च न तद्भवेत् अथ निर्हरणाशौचं ब्रह्मेत सवर्णनिर्हरेत तदन्नाशनेन तद्गृहवासे
च दशाहः तदन्नाशनेन तद्गृहवासे त्र्यहः गृहावासे त्वन्नभक्षणे चैकाहः मनुः गृहेणानिर्हा
रे दाहे च तज्जात्याशौचं यदि निर्हरति प्रेतं प्रलोभाक्रांतमानसः दशाहेन द्विजः शुध्ये
द्द्वादशाहेन भूमिपः मासार्धेन तु वैश्यस्तु शूद्रो मासेन शुध्यतीति कौर्मोक्तेः विजा
तीयनिर्हारे तु शवजातीयमाशौचं अत्र अमतिपूर्वं द्विगुणं अवरश्चेद्वरं वर्णमवरो वा
प्यवरं यदि वहेच्छवं तदाशौचं दृष्ट्वार्थे द्विगुणं भवेदिति व्याघ्रोक्तेः कौर्मे तदिति मो
ज्ञादेश्यैवं यतु ग्राहे पंचवर्णानुस्मृत्येन नीत्वा चैव दहेन्नरः आशौचं तु भवेत्तस्य प्रे
तजातिसमं तथा पोदकानिर्हारे तु दशाहः इति माधवः अलंकरणे तु रोरवः कूर्मपादोस
पिंडस्य प्रेतालंकरणे कृते अशौचानानाड्पयासः स्यादशक्तौ स्नानमिष्यते धर्मार्थमना
थ सवर्णं हरेल्लोक्रियाकरणे च द्विज स्थानेन तत्फलं स्नानं प्राणायामोऽग्निस्पर्शो
ति माधवीये अग्निदेश्यैवं प्रेतसंस्पर्शसंस्कारे ब्राह्मणो नैव दुष्यति वोदुश्चैवाग्निदातु
च सद्यः स्नात्वा विशुध्यतीति पराशरोक्तेः रात्रौ मिततिथौ निसिस्तुनेः
गौतम मिताक्षरायां हद्गावृत्तिः स्तनकाद्विगुणं एवं वा द्विगुणमात्रेवं आर्तद्विगु
णस्मृतिस्तनोपि रावसाहरकः अत्रपूर्वेणमेतरनिहृतिरित्यर्थः विष्णुः मृतं द्विजं
न शूद्रेण हारयेन्न शूद्रं द्विजेन देवलः ब्रह्मचारी न कुर्वीत शवदाहादिकाः क्रियाः १

राम
३२९

यदि कुर्याच्चरेत्कृच्छ्रं पुनः संस्कारमेव च ॥ याज्ञवल्क्यः आचार्यपितृपाध्यायान्निर्हृत्यापि
व्रती व्रती अनुगमने तु सपिंडेन दोषः । विहिते हि सपिंडानंतरेण निर्हरणादिके तेषां क
रोति यः कश्चित्तस्याधिकं च न विद्यते इति देवलोक्तेः दोषः स्यात्तु सपिंडस्य तत्रानाथ
क्रियाविनेति हारीतोक्तेः अस्य समोत्कृष्टवर्णेन तु माधवीये कार्य एव अनुगम्य शवं कु
ध्या स्नात्वा स्पृष्ट्वा हुताशनं सर्पिः प्राश्य पुनः स्नात्वा प्राणायामैर्विशुध्यति हीनव
र्णे क्षत्रिये द्व्यहः वैश्ये पक्षिणी शूद्रे त्रिरात्रं क्षत्रियस्य वैश्ये द्व्यहः शूद्रे पक्षिणी वैश्यस्य शूद्रे द्व्यह
रिति विज्ञानेश्वरः माधवस्तु विप्रस्य वैश्ये द्व्यहः क्षत्रियस्य शूद्रेप्येवं अन्यत्रागवत्
स्नानाग्निस्पर्शघृतप्राशनानि सर्वत्रेत्याह हीनवर्णस्य दाहोर्ध्वदैहिककरणेन तु ब्राह्म
ब्राह्मणो हीनवर्णस्य न कुर्यादौर्ध्वदैहिकं कामाल्लोभाद्भयान्मोहात्कृत्वा तज्जातितां
व्रजेत् मनुः व्रात्यानां याजनं कृत्वा परेषामंत्यकर्म च अभिचारमहीनं च त्रिभिः कृ
कृच्छ्रैर्व्यपोहति परेषां सर्ववर्णानां हीनेषु तद्दैगुण्यं त्रैगुण्यं चाल्पगुणत्वाद्यन्यत् अपरो
दने समोत्तमवर्णयोः संचयनात्प्राक् सचेलस्नानमूर्ध्वमाचमनं हीनवर्णे तु संच
यनात्प्राक् सचेलमूर्ध्वं स्नानमात्रं विप्रस्य क्षत्रवैश्यविषयविषये तु प्राक् अस्थिसं
चयने विप्रो रौति चेत्क्षत्रवैश्ययोः तदा स्नानः सचैलस्तु द्वितीयेऽह्नि शुध्यति हाते
तु संचये विप्रः स्नानेनैव शुचिर्भवेत् क्षत्रस्य वैश्ययोरप्येवं शूद्रे तु संचयात्प्राक् विप्रस्य
त्रिरात्रं क्षत्र[illegible]वैश्ययोर्द्विरात्रं ऊर्ध्वं तु द्विजानामेकाहः शूद्रस्य शूद्रस्यैव विनासं

चयात्पूर्वमेकाहः ऊर्ध्वं सज्योतिरिति माधवीये ज्ञेयं शुद्धितत्त्वे पारस्करेण अस्थिसंचय
नादूर्ध्वं मासं यावद्धि जातदंतः दिवसेनैव शुध्यंति वा ससंख्या हानेन च सज्योतिर्दिवसे
नैव अप्रत्ताक्षत्रियवैश्ययोरित्युक्तं सपिंडानां रोदननिषेधाव दोष इत्युक्तं प्राक् विज्ञानेश्व
रस्तु मृतस्य बांधवैः सार्धं कृत्वा तु परिदेवनं वर्जयेत्तदहोरात्रं दानश्राद्धादिकर्म चे
ति पारस्करोक्तेः सर्वेषामेकरात्रमाह अथाशौचे अन्नभक्षणे विष्णुः ज्ञानेन दोषेन माशौच
शौचेषु सकृदेवान्नमश्नाति तस्य तावदाशौचं यावत्तेषामाशौचं व्यपगमे प्रायश्चित्तमि
ति अज्ञानेनाह अंगिराः अंतर्दशाहे भुक्त्वान्नं सूतके मृतकेपि वा अस्याशौचं भवेत्तावद्या
वद्दाता शुद्धेषु प्रायश्चित्तं तु मत्या विप्रस्य वर्णक्रमेणैकाहं अहःपंचहः सप्ताहोपवा
सः दशाविंशतिः षष्टिः शतं च प्राणायामाः पंचगव्याशनं च अभ्यासे द्विगुणं आप
दितः प्राणायामः शतं पंचशतमष्टसहस्रं गायत्रीजपश्च मत्या यदि तु सवर्णाशौचे वि
प्रस्य भक्षणं गायत्र्यष्टसहस्रं च क्षत्रियाशौचे त्र्यहमुपवासः वैश्याशौचे त्रिरात्रोपवास
श्च शूद्राशौचे कृच्छ्रः क्षत्रवैश्ययोः पंचशतमष्टशतं गायत्रीजप उक्तमेषु शूद्रस्य सर्व
त्र स्नानं मत्या न तु यदि विप्रस्य वर्णेषु सांतपनकृच्छ्रमहासांतपनचांद्रायणानि अभ्यासे तु
मासिकं द्वैमासिकं त्रैमासिकं षाण्मासिकानीत्यादि माधवीयादौ ज्ञेयं अथ दासस्य
स्वदासस्तु स्वजनस्य सपिंडमृतौ स्नानमात्रेण स्वामिकार्ये स्वस्य त्वं भक्तदासस्याशुद्धौ ध्वंस
वः स्वस्वामिगर्भदासो भक्तदासस्त्र्यहाच्छुचिरिति स्मृत्यंतरोक्तेः मूल्यकर्मकाराः शूद्रा

330-A

दासीदासास्तथैव वा स्नाने शरीरसंस्कारे गृहकर्मण्य दूषिता इति शातातपोक्तेश्च एतच्चान
न्यसाध्यतत्कार्यमात्रे अन्यं त्रमासाद्याशौचम तत्रैव एवं दासस्यामपि सूतिकायास्तस्यास्त्र
स्य स्यत्वमपि मासमात्रे दासीदासस्य सर्वे वै यस्य वर्णस्य भर्ता वैत तद्वर्णस्य भवेद्वा चेद्दासस्य
मासस्तस्तत्तकमित्यभिरसोक्तेः षडशीतावपि स्वामिशौचेन दासाद्याः स्वस्वमासान्तक
मेस्तु योग्याः स्युर्मासत्तो दासीसूती चेत्स्व सूतकाभिपात दत्तदासीदीनां स्वसपिंडमरणादौ स्वाम्या
शौचसमसंख्य दिनार्धं सत्य पि मासाद्याशौचे स्वामिकार्ये स्वस्वनैमित्तिकदत्तः दासांते वासि
भृतकाः शिष्याश्चैकत्र वासिनः स्वामितुल्येन शौचेन शुध्यंति मृतसूतके इति बृहस्पति
स्मृतेः दासस्त्रगृहजातस्तथा क्रीतो लब्धो दायादुपागतः अन्नाकाललब्धस्तत्र आहितः स्वा
मिना च मोक्षितो महतश्चर्णाद्युद्धप्राप्तः पणे जितः तवाहमित्युपगतः प्रव्रज्यावसितः कृतः भक्त
दासश्च विज्ञेयस्तथैव वडवाहृतः विक्रेता चात्मनः शास्त्रे दासाः पंचदश स्मृताः इति नारदोक्तेषु
गर्भभक्तदासौ विज्ञेयः वडवा दासी तया हृतः ताउद्वाह्य दासो जातः इत्यर्थः अंतेवास्यपि
तेनैवोक्तः स्व शिल्पमिच्छन्नाहर्तुं बांधवानामनुज्ञया आचार्यस्य वसेदंतेवासी कालं सुनिश्चि
तं आचार्यः शिक्षयेदेनं स्वगृहे दत्तभोजनमिति शिष्यस्तत्तुल्यो विद्यार्थी दासादेः स्वामितः स
पिंडमरणे तु विष्णुः पत्नीनां दासानामानुलोम्येन स्वामितुल्यमाशौचं मृते स्वामिन्यात्मीयैमि
ति प्रतिलोमदासानामाशौचाभावः वर्णानामानुलोम्येन दासस्य तु प्रतिलोमजा जाव
ल्कोक्तेः अथ पराशौच जनने मरणे वा त्रिरात्र भार्गवं कृत्वा प्रभागद्वये चैतन्यैव दिने अन्ते तत्र इति
मिताक्षरायां यत्तु आगर्भराज्ञा आवास यैर्दद्यात् पूर्वेद्युर्दिनमित्युक्तेन देशाचारतो

राम

व्यवस्था सर्वेषामशौचमाहिताग्नेर्दाहतः तद्भिन्नस्य मरणमारभ्येत्येवं अनग्निमंतउत्क्रांते
नाशौचाद्धि द्विजातिषु दाहादग्निमतो विप्रादिरास्य मरणेसतीति पैठीनसिस्मृतेः साग्निराहि
ताग्निः आहिताग्निश्चेत्प्रवसन्म्रियेत पुनः संस्कारं कृत्वा शववदशौचमिति वाशिष्ठे
विशेषोक्तेः दाहादेव तत्कर्तृत्वेऽप्यस्य वैतानिको विधिरिति प्राप्तश्च [illegible] स्वामिनारामा
ज्ञे श्रुणेवोक्तेः आहिताग्नेरपि मरणादेव दशरात्रमाशौचं दशाहं शावमाशौचमिति मरण
निमित्तत्वात्तस्य यत्तु दाहादेव तस्याशौचमुक्तं तत्संस्कारनिमित्ताशौचं पक्षिणी वेति नव्याग्नेः
संस्कारांगं त्रिरात्रं वा तावता तस्य दशरात्रं मरणनिमित्ते तु भयोर्दशाहं दाहात्त्र्यहं पक्षिणीति न तद्वच
नविरोधात्स्यवे स्यैवा कर्षान्न [illegible] मनालाघवमविंत्यं अथाग्निकं जननाशौचं तत्राशौचमध्ये
जननादौ ज्ञाते तच्छेषेणशुद्धिः विगते तु विदेशस्थं शृणुयाद्यो ह्यनिर्दशं यच्छेषं दशरात्रस्य ताव
देवाशुचिर्भवेदिति मनूक्तेः अत्र केचिद्देशान्तरातिरिक्तविषयं तेषां चाशौचमध्ये श्रवणे पि
तदापिवद्दशाहादि पितरौ चेन्मृतौ स्यातां दूरस्थोऽपि हि पुत्रकः श्रुत्वा तद्दिनमारभ्य दशाहं सूत
की भवेदित्यस्य सर्वापवादत्वादित्याहुः तन्न ज्ञानमरणस्यानिमित्तत्वात् अनग्निमतउत्क्रांते
रित्यादिविरोधश्चास्मत्पक्षे सारे पि जनने मरणे वा प्रथमादिनाद्यूर्ध्वं ज्ञाते पुत्रादीनामशेषेणैव
शुद्धिरिति षडशीतावपरार्के चैवं दशाहादूर्ध्वं ज्ञाते तु त्र्यहं वसिष्ठः आसंवत्सरात्रिरात्रं स्यात्तथा
मासे पक्षिणी तथा [illegible] ऊर्ध्वं स्नानेन तु सिद्ध्यति जनने तु अतिक्रान्ते नाशौचं नास्त्ये
वेनाशुद्धिः सूतकाशौचे व्यतीते तु शुद्धिः सपिण्डीति देवलोक्तेः पितुः स्नानेन तत्रापि भवत्येव निर्द
शे ज्ञाति मरणे श्रुत्वा पुत्रस्य जन्म च सवासा जलमाप्लुत्य शुद्धो भवति मानवः इति मनूक्तेः

त्रि

तस्यातिक्रांताशौचं दशाहादिजात्याशौचविषयं नत्वनुपनीतादिनिमित्तैराशौचादौ उपनी
तेनाविषयं तस्मिन्नेवातिकालजमिति व्याघ्रोक्तेः निर्दशं ज्ञातिमरणं श्रुत्वातिक्रांते दशाहे
वितिमदनेके स्म माधवीये देवलस्तु आत्रिपक्षात्त्रिरात्रं स्यात् षण्मासात्पक्षिणी ततः प
रमेकाहमावर्षादूर्ध्वं स्नानेन विशुध्यतीत्याह तत्रापदनापद्विषयत्वेन व्यवस्था इदं चै
कदेशे देशांतरे तु स्नानमात्रं देशांतरमृते स्त्वाह कौर्मे वैखानसमेयतो मृते स्नानेन शुध्य
ति गर्भस्रावे च मासत्रिरात्रमिति पराशरोक्तेरिति विज्ञानेश्वरः स्नानं वत्सरांते अर्वाक् त्रिपक्षा
त्रिनिशा षण्मासाच्च दिवानिशं अहः संवत्सरादर्वाग्देशांतरमृतेष्वपीति विश्वरूपोक्तेरि
ति माधवः इदं सपिंडानां देशांतरे स्नानं सोदकानामित्युक्तं तल्लक्षणं त्वाह बृहस्पतिः
महानद्यंतरं यत्र गिरिर्वा व्यवधायकः वाचो यत्र विभिद्यंते तद्देशांतरमुच्यते देशांतरं
वदंत्येके षष्टियोजनमायतं चत्वारिंशद्वदंत्यन्ये त्रिंशदन्ये तथैव चेति एतत्सर्वं माता
पितृभिन्नविषयं तयोस्तु पितरौ चेदिति पैठीनसिवाक्यात्तदापरो मे [illegible] च दशा
हादि स्मृत्यर्थसारेऽपि मातापितृमरणे दूरदेशेऽपि संवत्सरादूर्ध्वमपि पुत्रो दशाहादिकं प
णीमाशौचं कुर्यात् स्त्रीपुंसयोः परस्परं सपत्नीपुत्रेष्वेवमिति शुद्धितत्त्वादयो गौडास्तु उ
र्ध्वं संवत्सराद्बंधुश्रवणे यतिमृतेः भवेदेकाहमेवात्र तच्च संन्यासिनां न त्विति देवलो
नौः पित्रोरब्दमध्ये त्रिरात्रमूर्ध्वमेकाहः बंधुमातापितामहाचार्येष्वक्तदशाहस्तु कालि
णादिदेशपरत्वमाहुः तेन बंधुपदस्य पित्रादिपरत्वे मातामहादिपरत्वं वा उपस्याः सपत्नमातुस्तु दक्षः

पितृपत्न्यामपेतायां मातृवर्ज्जं द्विजोत्तमः संवत्सरे व्यतीतेपि त्रिरात्रिमशुचिर्भवेत् हीन
वर्णमातृष्वसपत्नीषु चैवमिति स्मृत्यर्थसारे केचित्पितुःपत्न्यांप्रमीतायामौरसे सति न चेत
चेति व्याख्यानं नैरौरसेपीदमाहुः षडशीतावप्येवं द्युतत्सर्ववर्णेतुल्यं तत्तुल्यं वयसि सर्वेषा
मतिक्रान्ते तथैव चेति माधवोक्तेः अथाशौचसंपाते उच्यते तत्र शावे शावं सूतके सूतकं शा
वे सूतकं सूतके शावं वा तत्राप्युत्तरं कालतः पूर्वेण समं न्यूनमधिकं चेति द्वादश भेदाः
पूर्वैकदिने समं न्यूनमधिकं वाशौचद्वयं तत्र तंत्रेणान्यसिद्धिः द्वयोरेककालत्वात् प
दातु द्वितीयादिनेष्वन्तरं सजातीये शावे जनने वा समकालं न्यूनकालं वापरस्य तदा षडशी
त्युक्तेषु पूर्वशेषेण शुद्धिः अंतरा जन्ममरणे शेषाहोभिर्विशुध्यतीति याज्ञवल्क्योक्तेः अं
तरा द्वौ तिरस्यार्थः ज्ञानस्यैव जननादेर्निमित्तत्वात् पूर्वाशौचांतरुत्पन्नं मासाने लघुत्वानि
मित्तं तत्कालादुपरिष्ठान्तस्याशौचहेतुरेव अज्ञाते तु न अविज्ञाते न दोषः स्यात् श्राद्धादि
षु कथंचन तत्र स्यादशौचसंकार्ये विप्रहतेः तेनाज्ञानादृष्टोत्सर्गादौ कृते पश्चाज्ज्ञानेपि
नावृत्तिरिति माधवीये यमोपि जनने जनने चेत्स्यात् मरणे मरणं तथा पूर्वशेषेण
शुद्धिः स्यादुत्तराशौचवर्ज्जितं अत्र केचिदंतर्दशाहे स्यातां चेत्पुनर्मरणजन्मनी तावत्स्या
दशुचिर्विप्रो यावत्तत्स्यादनिर्दशमिति मनुपराशराभ्यां दशाहग्रहणात्सपिंडाशौचे चरम प
र्वे शेषशुद्धिः आहाद्यल्पाशौचसंपाते तु न शेषेण शुद्धिरित्याहुः हरदत्तोप्येवमाह गौडास्त्व
मेव तन्न याज्ञवल्क्यादिवचनेन दशेन दशाहस्य तुल्यकालाशौचोपलक्षणत्वात् समा

नाशौचं संपाते प्रथमेन सशपथेन अस्नानं द्वितीयेन धर्मराजवचो यथेति माधवी
ये शंखवाक्ये: अपरार्कमिताक्षरादिविरोधाच्च यदा तु सूतके शावे समन्यूनमधिकं वा
तदा न पूर्वशेषाच्छुद्धिः तदाहोशनाः सूतके मृतकं चेत्स्यान्मृतके त्वथ सूतकं ।
तत्राधिकृत्य मृतकं शौचं कुर्यान्न सूतकं षट्त्रिंशन्मते शावाशौचे समुत्पन्ने सूत
के तु यदा भवेत् शावेन शुध्यते सूतिर्न सूतिः शावशोधिनी चतुर्विंशतिमतेपि मृतेन
शुध्यते जातं न मृतं जातकेन तु अतो यदा दशाहजननमध्ये तद्दिने वा त्र्यहादिशौचं तदा
पूर्वेणाशुद्धावपि तन्निमित्तस्यास्पृश्यत्वं भवत्येव मरणोत्पत्तियोगेन तु गरीयो मरणं भव
तीति कौर्मात् गौतमव्याख्यायां हरदत्तोपि सूतकाद्द्विगुणं शावं शावाद्द्विगुणमार्त्त
वं आर्त्तवाद्द्विगुणा सूतिस्ततोपि शवदाहकः अत्र पूर्वेणनोत्तरोत्तरानिवृत्तिरस्पृश्यत्वा
धिक्यादित्यर्थः षडशीतावपि स्वभाववक्तृसूतिस्तुल्यन्यूनशावविशोधिनीति रात्रिशेषादौ
वर्धितेति हि त्रिदिनैराशौचैः सूतवद्वचनं स्वभावेन अन्तस्तु तन्न्यूनेन शावस्यापि न पूर्वेणा
शुद्धिरिति वक्तुः स्वभावेन तु क्रमेणापि नागतत्वैरघाहोभिराशौचमपनयते नेन च पातत्वि
पतेन शावस्यान्यस्य शोधनमिति एवं न वपक्षाः यदा तु महाद्यन्ताशौचमस्य मध्ये सजा ग्रा।४
तीयं वा दीर्घकालमुत्तरं तदा पूर्वतरं पूर्णकार्येण पूर्वेण शुद्धिः स्वल्याशौचस्य मध्ये तु दीर्घा
शौचं भवेद्यदि न पूर्वेण विशुद्धिः स्यात्स्वकालेनैव शुध्यतीति उशनसोक्तेः तेन त्र्यहादि
शावमध्ये दशाहादिसूतकेपि न पूर्वेण शुद्धिरित्यपरार्कः शावनिमित्तमस्पृश्यत्वं च भवत्ये
व शुद्धिविवेके तु शावेन शुध्यते सूतिरिति प्राग्वत्तत्राप्युत्तराशौचानिवृत्तिरुक्ता ।

333

तत्र उत्तरस्य कालाधिक्ये नवलवत्वात् माधवीये पूर्वमोपि संधिवृद्धिपदाशौचं पश्चिमेन समा
पयेत् यथा त्रिरात्रे प्रक्रान्ते दशाहं पूर्वविरोधादि अशौचं पुनरागच्छेत् तत्समाप्त्या विशुध्यतीति हा
रीतोक्ति गुरुणा लघु न शुद्ध्येत् लघुना तु च द्गुर्विति गुरुत्वं लघुत्वं च कालकृतमेवा
पूर्वानुरोधात् शातातपहरिते न स्पष्टमुक्तं मिताक्षरायामेवं यत्तु आद्यानां योगपद्ये ज्ञेया
शुद्धिर्गरीयसा मरणोत्पत्तियोगे तु गरीयो मरणं भवेदिति हारीतोक्तौ मादितयास्य ।
एतत्त्वाभिप्रायं शावस्य गुरुत्वे हेयं क्वचिदल्पकालेनापि दीर्घकालाशौचनिवृत्तिमाह
देवलः परतः परतो शुद्धिरघवृद्धौ विधीयते स्याच्चेत्पंचमादहः पूर्वेणैवात्र शुध्यते
अस्यार्थः अघवृद्धौ दीर्घाशौचे परतोशुद्धिः परमाशौचं यदि पूर्वाशौचमन्तरस्य पंचम
दिनात्परतो न वर्तेत तदा पूर्वेणैव शुद्धिः एवं स्यान्तराशौचाद्यधिककालमापित्वे पूर्व
णैवाशुद्धिरित्यर्थः यथा षण्मासे गर्भपातनिमित्तषडहाशौचमध्ये दशाहपाते प
ञ्चमोत्तरनिवृत्तिः यथा वा [illegible] तावत्पाते निमित्ते च तु रहस्यं चाहयोरित्निकम्भि
न तत्र दशावधिपूर्वशेषमुक्तवाक्यविरोधात् षष्ठादिदिने पूर्वाशौचमं
त्यरात्रौ न ह्यहस्य नो विन्यायात् अग्रमहुरवत्पंचनमादह आगतेनान्तरेण अहादिचे
त्स्यादन्त्यानिशान्विषये पूर्वेणैवाशुद्धिः शिष्यते दशाहादि रात्रिशेषे अहादिपाते अहा ।
प्रत्यासौचानां परस्य रात्रिशेषे संपाते च न ह्यहादि शुद्धिरित्यर्थमाहुः कश्चित्सर्वशेषेण
शुद्धिरपवादमाह गौतमः रात्रिशेषे सति द्वाभ्यां प्रभाते तिसृभिरिति प्रभाते त्वपाते ।
रात्रिशेषे द्व्यहाच्छुद्धिर्यामशेषे शुचिस्त्र्यहादिति शातातपोक्तेः इदं शौचानन्तरकथनेस

राम
३३३

जातीयेवाऽलं अत्र केचित् रात्रिशब्दः अहोरात्रिपरः अहःशेषे द्वाभ्यां प्रभाते तिसृभिरि
त्यशंखलिखितोक्तेः अथ यदि दशरात्राः संनिपाते पुराद्यं दशरात्रमाशौचमानवमादिवसाद
त ऊर्ध्वं द्विरात्रेणाथवा त्रिरात्रेणेति बौधायनोक्तेः पुनःपाते दशाहात्प्राक् पूर्वेणासह
गद्धति दशमेऽह्नि पतेद्यस्याहर्द्वयात्तु विशुध्यति प्रभाते तु त्रिरात्रेण दशरात्रेष्वयं
विधिरिति देवलोक्तेः नवमदशमरात्र्यौ वा पतनात् अन्यदिनपरौ तेन कश्रीयादावपि त
थैत्याहुः माधवीयेऽप्येवं अन्ये त्वाहुः अंतर्दशाहे स्यातां चेत्पुनर्मरणजन्मनी ताव
स्यादशुचिर्विप्रो यावत्तत्स्यादनिर्दशमिति मनुपराशराद्यैर्दशमदिनेनोत्तरस्यकृदेरुक्ते
त्वाद्विरोधः स्पष्ट एव विरोधे च यद्वै किंचन मनुरवदत्तद्भेषजं कलौ पाराशरस्मृति(
रित्यनेन पूर्ववचसां बाधः अत एव वाचस्पतिनामेवामनाकरत्वमुक्तं साकरत्वेऽपि
त्ता तिमात्रविप्रादिविशयदेशांतरविषयं वास्तु तेन गौतमीये रात्रिशब्दो नाऽह
अपरः रात्रिमात्रावशिष्टे इति मितासरोक्ते अनेककविकनेरिवाप्यपव्याख्यायुक्ता ।
माधवस्तु अनिर्गतदशाहमिति पूर्ववचःस्वयं पविरोधादुपेक्ष्य इति अस्मत्पितृचर(
णास्तु बौधायनीये आनवमाद्दिवसादिति द्वितीयाशौचस्य नवमदिने प्रथमस्य दश
नमे चाह इत्यादिहेतुः पूर्वशेषापवादत्वात्तस्य च न्यायतो द्वितीयदिनादेव प्रवृत्तेः अ
त ऊर्ध्वमिति दशरात्रापरं शंखलिखितोक्तो देवलोक्तो वाहःशेषे दशमेऽह्नि वाऽतीतेरा
त्रीयते दित्यर्थः दशमं पितानाम कुर्यादितिवत् तेन न मन्वाद्यैर्विरोधो नापि मिता

न्तराद्ये रित्याह अपरार्के निर्णयामृते तु स्वरसोप्येवं यत्तु तत्रैव वर्द्धिते आद्यभागद्वयं या
वत्सूतकस्य तु सूतके द्वितीये पतिते चाद्यात्सूतकाच्छुद्धिरिष्यते अतऊर्ध्वं द्वितीयात्तु
सूतकांताच्छुचिस्मृतः एवमेव विचार्यं स्यान्मृतके मृतकांतरे मृतकस्यांतरे यत्र सू
तकं प्रतिपद्यते सूतकस्यांतरे वाथ मृतकं यत्र विद्यते मृतकांते भवेत्तत्र शुद्धिर्वर्णेषु
सर्वश इति अस्यार्थस्तत्रैवोक्तः पूर्वाशौचवर्णमाहोरात्रस्य दिनरूपे आद्यभागद्वयेनाशौच
पाते पूर्वेणैव शुद्धिः भागद्वयोर्ध्वं रात्रौ सूतकांतरे द्वितीयात्तु वैभिन्नात्सूतकांताद्व्यहादि
रूपाच्छुद्धिरिति अपरार्के चाशौचकालं त्रेधा विभज्य निर्गुणविषयत्वेनेदमुक्तं अस्य वचनस्य
निर्मूलत्वान्निरस्तोक्तिरेव अतः पूर्वाशौचांत्यरात्राववाशौचे होरात्रद्वयमधिके रात्रेरंत्ययामे
तु दिने त्रयमिति भट्टचरणोपदिष्टः पंथाः एतत्संपूर्णाशौचसंपाते एव रात्रिशेषे त्रिरात्रादि
संपाते तु पूर्वशेषेणैव शुद्धिः द्विरात्रादिहेतुः पूर्ववाक्ये देशात्तद्विषयत्वादपवादाभावे
शेषशुद्धेरेव सामान्यतः प्रवृत्तेः षडशीतौ तु दशाहांते त्र्यहपातेपि द्वित्रिदिनवृद्धिरुक्ता रा
त्रिशेषे पदाशौचं सर्वानधिकमापतेत् ऊर्ध्वं दिनद्वयं पूर्वाद्यामशेषे दिनत्रयमिति अनधि
कं समं न्यूनं वा तन्नुच्छं निर्मूलत्वात् दंतेप्यक्षिण्यादिपातेपि द्विरात्रादिहेत्वप्राप्तेश्च पूर्वा
शौचानवधितावृद्धि त्रिदिनमध्येधिकाशौचांतरपाते तु वर्धितस्याल्पत्वादधिकेनैव शु
द्धिः नयवर्धितस्य पूर्वशेषत्वं तेषां कनीयं रात्रिशेषे पूर्वशेषशुद्ध्यपवादे नैमित्तिकात्याति
न्यायेजीवनात् अपवादाभावे उत्सर्गस्य प्राप्तेः अपवादांतरमाह शंखः मातर्यग्रे

334-A

प्रतीतायामङ्गस्पर्शे पिता पितृशेषेणाशुद्धिः स्यान्मातुः कुर्यान्नु पक्षिणीं पादत्रयं स्व
र्षं त्वर्धं स्वल्पमर्धः पित्राशौचमध्ये मातृमृतौ पित्राशौचांते मातुः पक्षिणीमाधिकां कु
र्यादिति गुरुचरणैस्तु विज्ञानेश्वरात्महादे पितुराशौचाभावान्मातृमरणेन पक्षिणी किं तु (
पूर्णमेवाशौचं इयं च पक्षिणी न तृतीयादिदिनपरा न्यायादि न ह्ये प्रति निमित्तनैमित्तिकाव
त्तिन्यायापवादपूर्वेशेषापवादत्वादिति पितृचरणैः सपिंडाशौचे न मातापित्रोराशौचापग
मो नास्त्येव एवं भर्तुरपि इयं च पक्षिणी दशमादिनात्प्रागेव मातृमरणे ज्ञेया दशम्यां रात्रौ तत्र मातृ
वा मातृमरणे अहः सह समुच्चितापक्षिणीति कश्चित् तत्र संख्यानेरोपजननादवच्छन्नादि
श्रुति वाधापत्तेः अतएवैकदा ज्ञेया वहुदेया इत्यादौ श्रुतिसंख्यावाधापत्तेः समुच्चयो निरस्तो
ह्रासेर गुरुणि लघ्वीरंतर्गते गुरुणा लघुनश्चोदितस्तु केऽत्र मातुरुच्चारोहणेन पक्षिणी प
दानादिविशेषतिनिप्रियस्य प्रियवांधवा तदाशौचविधानंत्वं भर्तृशौचक्रमेणाहतीति पृथ्वीचं
द्रोदये लघुहारीतोक्तेः तत्रैव षडशीतिमतेपि मृतं पतिमनुव्रज्य पत्नी चेदनलं गता तत्र प
क्षिणीकार्येति तत्कालदेवष्ट्यति पुत्रोन्यो वाग्निदस्तस्या त्वावदेवाशुचिस्तयोः नवश्राद्धं
च पुनरयन्नु समापयेत् गृहीनाशौचानां पुत्राणां पितुः संस्कारे मातुः सपिंडस्य चामरणे ना
ये निर्णयः अतिक्रांतकालाच्छिद्यमाननिमित्तस्य वलवत्त्वात् द्वादशवर्षोत्तरं संस्कारा
शौचमध्ये सपिंडमरणे प्येवं यत्तु अपरार्के ब्राह्मे ऋग्वेदवादात्माप्त्वीसौन भवेदात्म
घातिनी अशौचेत्वनिहते श्राद्धं प्राप्नोति शास्तुवदितितद्वत्रौशौचानंतरमन्वारोहणे त्रि

रात्रौ शौचपरमिति षट्त्रिंशन्मतं ब्राह्मणादेः तत्र यावल्लुगमनेस्याशौचपरमित्यपरार्कः
शुद्धिनेत्याद्युयोगेोडः मन्तशौचांतरमन्वारोहणे त्रिरात्रं सहगमनेत्नुसंस्पर्शे शुद्धहत
स्य सद्यःशौचे त्वारोहणे प्रतिज्ञाते त्रिरात्रत्वाज्जनुरपि मरणे पिंडदाने एकचित्तानु सद्यःशौ
चमित्याहुः अन्यथा गुरुक्तं पर्वशौचे लाभुडेरपवादांतरमुक्तं षडशीत्यां पर्वाशौचेन याव
द्धिः स्तनके मृतके च सा स्तनकामोपि दहित्वा पुनस्य चस्तुनानापि नित्यामृतेस्मृतिसंग्र
हेपि इयं विशुद्धिरुदिता सूतिकामलिदं विना ऽदंतस्त्येन दाहकरणे मातुलादिसंबंधे
दाहमात्रकरणे त्रिरात्रमेवेत्युक्तं प्राक् वड्डातिः स्तनकाहिगुणांशावशावाहि
गुणमात्रेच आर्तवाहिगुणास्तत्तिस्तेनापि शवदाहकः तथाशौचसंपातेपि शवजननि
मित्तकार्यप्रतिबंधः आशौचे तु समुत्पन्ने पुत्रजन्म यदा भवेत् कर्तुस्तात्कालिकी शु
द्धिः पूर्वाशौचेन शुध्यतीति प्रजापतिस्मृतेः आशौचे द्विविधेपि शतातपः अंतर्दशा
हे जननात् पश्चात्स्यान्मरणं यदि प्रेतस्य द्विरपकर्तव्यं पिंडदानं तथाविधि प्ररध्ये प्रेत
पिंडे तन्मध्ये चेज्जननं भवेत् तथैवाशौचापिंडा न त्वशौ बान्धवा यथाविधि मातुः पक्षि
णीमध्ये पितुरेकादशाहं कुर्यात् आद्यंश्राद्धमप्युद्धोपि कुर्यादेकादशेऽहनीतिस्मृतेः के
पितु इदं क्षत्रियादिपरं विप्रादेस्त्वशौचांतरे एकादशाहश्राद्धं नेत्याहुः अन्ये तु एव विज्ञा
नेश्वरेणादशमे पिंडस्तत्रज्यया त्रिंशेऽवशुचिर्भवेदिति शुचित्वं महैकोद्दिष्टांगाविप्र
निमंत्रणपरमिति वदता नत्रश्राद्धे रंगत्वं दर्शितं एवं वृषोत्सर्गशय्यादानावपि देवया

335A

तिके नाशौचांतरेपि भवत्येवेत्युक्तं अथाशौचापवादः स पंचधा कर्तृतः कर्मतः
द्रव्यतः मंत्र दोषतः विधानाद्वा आद्यो ब्रह्मचारिपत्न्यादिषु नैष्ठिकानां वनस्थानां यती
नां ब्रह्मचारिणां नाशौचं कीर्तितं सद्भिः पतिते च तथा मृते इति कौर्मोक्तेः तुर्यपादे शावे
चापि तथैव चेति देवलपाठः आशौचं मंत्यकर्मोपलक्षणं ब्रह्मचारी न कुर्वीत शवव
दाहादिक क्रियाः यदि कुर्याच्चरेत्कृच्छ्रं पुनःसंस्कारमेव चेति देवलोक्तेः एतत्पित्राद्य
तिरिक्तविषयं आचार्यं स्वमुपाध्यायं मातरं पितरं गुरुं निर्हृत्य तु व्रती प्रेतं न व्रतेन
वियुज्यते इति मनूक्तेः निर्हरणमंत्यकर्मपरं एवं मातामहस्य यथा व्रतस्थोपि सु
तः पितुः कुर्यात्क्रियां तथा तथा मातामहस्यापि दौहित्रः कर्तुमर्हतीति अपरा
र्के भविष्योक्तेः मातापित्रोरुपाध्यायाचार्ययोरौर्ध्वदेहिकं कुर्वन्मातामहस्यापि व्रती
न भ्रश्यते व्रतादिति कल्पतरौ तत्रांतकर्मनिमित्तमस्पृश्यत्वं दशाहमस्त्येव सगोत्रो वा
सगोत्रो वा यो भिन्नस्यात्सखेन्नरः सोपि कुर्यान्न वश्यो हि उभये तु दशमे स्नातीति दिवोदासोक्त
वचनात् अत एव ब्रह्मचारिणः सर्वकर्मलोपो व्रतान्निवृत्तिरन्यत्र मातापित्रोर्गुरोश्च प्रेतगो
त्रमीये व्रतनिवृत्तेरेव पर्युदासो नाशौचस्य संध्यादिकर्मलोपस्तु नास्ति न त्यजेत्सूतके
कर्म ब्रह्मचारी स्वकं क्वचिदिति छंदोगपरिशिष्टात् पित्रोर्गुरोर्विपन्नेषु ब्रह्मचार्यपि
यः स्मृतः पुत्रत्वमापि कुर्वीत अग्निपिंडोदकक्रियां तेनाशौचेन कर्तव्यं संध्याचैव न
लुप्यते अग्निकार्यं च कर्तव्यं सायंप्रातश्च नित्यशः इति चंद्रिकायां संवर्तोक्तेश्च अथ कर्म

नधिकारस्तु परशौचनिषेध एव अपरार्कमाधवादयस्तु एकाहशौचमाहुः आचार्यवाप्यु
पाध्यायं गुरुं वापि नरं च वा मातरं वा स्वयं दग्ध्वा व्रतस्य तत्र भोजनं कृत्वा पतति नो तस्मा
त्रैतान्नं तत्र भक्षयेत् अन्यत्र भोजनं कुर्यान्न च तैः सह संवसेत् एकाहमशुचिर्भूत्वा द्वि
तीयेहनि शुध्यतीति ब्राह्मोक्तेः तदन्नभोजनेन तु प्रायश्चित्तं पुनरुपनयनं माशौचं वा दि
वोदासादयस्तु ब्राह्मोक्तेः प्रथमेह्नि संध्यादिलोपश्च ब्रह्मचारी यदा कुर्यात् पिंडं निर्वपणं पि
तुः तावत्कालमशौचं स्यात् पुनः स्नात्वा विशुध्यतीति प्रजापतिवचनाद्द्वितीयाहादौ
पिंडदानकाले एव स्पर्शत्वे मात्रं नान्यदेत्याहुः दशाहमस्पृश्यत्वेपि कर्मांगस्नानवि
धानार्थमेतदिति युक्तं अंत्यकर्माकरणे तु ब्रह्मचारिणः पित्रादिमरणेप्याशौचाभा
व एव सोपि ब्रह्मचर्यकाल एव समावर्तनोत्तरं तु सर्वमृतानां अहाशौचं भवत्येव आदि
ष्टी नोदकं कुर्यादाव्रतस्य समापनात् समाप्ते तूदकं दत्वा त्रिरात्रमशुचिर्भवेदिति मनू
क्तेः तत्रापि विकल्पः पितर्यपि मृते नैषां दोषो भवति कर्हिचित् आशौचं कर्मणो न स्यात्
ऋत्विजां ब्रह्मचारिणामिति छंदोगपरिशिष्टात् तथाकृतजीवच्छ्राद्धेन किमप्याशौचं
न कार्यमिति हेमाद्रिः युद्धे तन्वे कौर्मे सद्यः शौचं समाख्यातं दुर्भिक्षे चाप्युपद्रवे ।
डिंबाहवहतानां च विद्युता पार्थिवैर्द्विजैः उपद्रवे त्वंतमरके उपसर्गमृते चैव सद्यःशौ
चं विधीयते इति पराशरोक्तेः उपसर्गोत्यंतमरक इति शूलपाण्यनिरुद्धभट्टादयः या
ज्ञवल्क्योपि आपद्यपि च कष्टायां सद्यःशौचं विधीयते इति मरणसमयेपि नाशौचं त

336A

पाचण्डरत्नाकरे दक्षः स्वस्थकाले त्विदं सर्वं सूतकं परिकीर्तितं आपद्गतस्य सर्वस्य सू
तकेपि न सूतकं अतः सति वैराग्ये संन्यासो ह्यातुरस्य भवतीति केचित् अथ कर्मतः
त्विशेषो यथा तत्र तत्कार्येषु सत्रिव्रतिनृपनृपवद्दीक्षितर्त्विक् स्वदेशभ्रंशापत्त्व ख्यते
कक्षतिपञ्चनमिवघातःशिल्पानराणां संप्रारब्धेषु दानोपनयनजननश्राद्धयुद्धप्रतिष्ठा
चूडान्तीर्थार्थयाजजपपरिणयनाद्युत्सवेष्वेतदर्थे नाशौचमिति शेषः सत्री अन्नस
त्रवान् मुख्यस्य सत्रस्य दीक्षितयदाक्षिद्धेः व्रती अनेन व्रतादिनियमवान् न व्रतिनां व्र
ते रति विघ्नकृतेः प्रचेताः कारवः शिल्पिनो वैद्या दासीदासास्तथैव च राजानो राजभृत्यो
श्चसद्यः शौचाः प्रकीर्तिताः कारवः सूपकाराद्याः शिल्पिनश्चैलनिर्णेजकाद्याः आतुरस्य
आधिनाशार्थदानादौ तुलादानादेः प्रारंभो नांदीश्राद्धं संकल्पो वा यजनं तडागोत्सर्गे को
टिहोमादि लघुविघ्नं व्रतयज्ञविवाहेषु श्राद्धे होमेर्चने जपे आरब्धे सूतकं न स्यादना
रब्धे तु सूतकं प्रारंभो वरणं यज्ञे संकल्पो व्रतसत्रयोः नांदीश्राद्धं विवाहादौ श्राद्धे पाक
परिक्रियेति पाकस्य परिसमंततात्क्रियायाक प्रोक्षणमिति शुद्धिप्रदीपः तन्मंदं स्तदे
योगाहत्वत्वात् तीर्थेति आशौचे आकस्मिकतीर्थप्राप्तौ विवाहदुर्गयज्ञेषु यात्रायां
तीर्थयात्राभीप्सि न तत्र सूतकं न हि त्कर्मयज्ञादिकरणे दिति पैठीनसिस्मृतेः अत्र विशेषः
प्रायुक्तः जपः पुरश्चरणादिः स्तोत्रपाठः अविधिदेनसंकल्पितहरिवंशश्रवणादिस्त्र

अत एवोक्तं ब्राह्मे गृहीतनियमस्यापि न स्यादन्यस्य कस्यचिदिति एवं देवपूजादिम
दनपारजातियमोऽपि शिवविष्ण्वर्चनं दीक्षायस्य चाग्निपरिग्रहः श्रौतकर्मादि कुर्वीत
स्नानः शुद्धिमवाप्नुयात् गोऽडशुद्धि जलं मंत्रमुक्तावल्यां जपो देवार्चनविधिः कार्यो दी
क्षाचितैर्नरैः नास्ति पापं यतस्तेषां सूतकं चाप्यनात्मनं राघवभट्टीये नारदः अथ सू
तिकिनः पूजां वक्ष्याम्यागमचोदितां स्नात्वा नित्यं चानिर्वर्त्यमानस्याक्रिया यानुवे
वास्य पूजा पूजाक्रमेणैव ध्यानयोगेन पूजयेत् यदि कामी न चेत्कामी नित्यं सर्वं वद
वरेत् यन्नृसिंहकल्पे सदा मंत्रजपं कुर्याद् यदि स्यादशुचिर्नरः मनसा वह्नितस्तत्र
ध्यं स्तिष्ठन्स्वपन्नपि मंत्रैकस्मरणेन विद्वान् मनसैव सदाभ्यसेत् कालनियमाभावेनुक्ता
त्र हरिवंशादिहृदयमेव उत्सवो रथयात्रादिः एषु नाशौचं अथ चाशौचाभावोऽनन्यगतित्वे
आर्त्तौ च ज्ञेयः अत्र महलमाकरे स्यष्टं अत्र दीक्षितस्यावभृथात् पूर्वमेवाचशौचाभावः
तदादित्वाशौचमस्त्येव तेन वैतानोपासनाः कार्या इति वैतानत्वेप्यवभृथादि न भयस्ये
व अत एवोक्तं माधवीये ब्राह्मे तद्वत् गृहीतदीक्ष्यस्य जैविषस्य महामखे स्नानं त्ववभृथे
यावत्तावत्तस्य न सूतकमिति वैतानोपासना कार्या इति वैतानत्वेप्यवभृथादि न भव
स्येव अत एवोक्तं माधवीये ब्राह्मे तद्वत् गृहीतदीक्षस्य जैविषस्य महामखे स्नानं त्व

337A

वभृथे यावत्तावत्तस्य न स्मृतकर्मेति वैतानौपासना कार्या इत्यनेनैव सिद्धेन्तु सचित्तादी
क्षितानां चेति पुनर्दीक्षितग्रहणं यजमाने स्वयं कर्तृत्वार्थं स्नानप्राप्त्यर्थं दीक्षितग्रहणं
तेन ततः पूर्वं निषेध एव यज्ञप्रारंभो वरणं यज्ञे इति तद्दार्त्तिकृत् परं तथा च छंदोगपरिशिष्टे
न दीक्षिण्याः परयज्ञे न क्षुद्रादित पश्चरात्रिति शुद्धितत्त्वे ध्येवं ऋत्विजां च मधुपर्कोत्तरमा
शौचाभावः गृहीतमधुपर्कस्य यजमानान्न ऋत्विजः पश्चाद्दशौचे पतिते न भवेदिति नि
र्णय इति प्राप्तात् अत एव रामांडारः चतुर्णां वरणपक्षे न्येषामाशौचेत्य आगमयितव्याइ
त्याह एवं स्मार्त्तेपि तुलाकोटिहेमाद्रौ मधुपर्के सति दोषाभावो ज्ञेयः यज्ञप्रारंभो वरणं
यज्ञ इति तत्राधिमधुपर्कानं ज्ञेयं तेनाधाने हि पश्चुर्वंधादौ तदभावादन्ये भवंतीति सिद्धं अ
तएवाद्यंतरमाह याज्ञवल्क्यः वैतानौपासना कार्याः क्रियाश्च श्रुतिचोदनात् तत्र त्यागमा
त्रेण स्नानोत्तरं स्वयं कर्तव्यं श्रौते कर्मणि तत्कालं प्रातः शुद्धिमवाप्नुयात् इति स्मृतेः त्यागाति
रिक्तं तु श्रौते स्मार्त्ते चान्येषां च कर्तृत्वं सूतके मृतके चैव अशक्तौ श्राद्धभोजने प्रवासादि
निमित्तेषु दापयेत्तु न हापयेदिति हरदत्तसूत्रोक्तेः नित्यानि निवर्तेरन्वैतानवर्ज्जं शालाग्नौ चै
केन्य एतानि कुर्युरिति पैठीनसिस्मृतेः वैतविज्ञानेश्वरः एकग्रहणं पूजार्थं तेन स्मार्तं
कार्यमेवेति हारलतायां दाक्षिणात्यास्तु विकल्पमाहुः अपरार्कादि निबंधास्तु श्रौतं स
र्वै स्वयं कार्यं स्मार्त्ते नित्यागमात्रिति रिक्तान्यस्यैव कर्तृत्वं त्यागमात्रं तु स्वस्य कर्म वैतानिकं कार
र्यं स्नातोपस्पर्शनात् स्वयमेतिहारीतोक्तेः दर्शे च स्थालीपाके मासं च कर्म वैतानिकं च यत् स्मृ

तकेपित्यजन्मोहात्प्रायश्चित्तीयते द्विजा इतिमरीच्युक्तेः यत्नमहत्स्वोर्चितानस्यकर्मत्यागो
नविद्यते शालाग्नौ केवलोहोमः कार्यएवान्यथोत्र ज्ञैरितिजाबालोक्तेश्चेत्याहुः अपरार्के
प्येवं पातिकाश्चाप्येवं सूतकेतु समस्त्येत्रे स्मार्त्तं कर्म कथं भवेत् पिंडयज्ञे चरुं होममस
गोत्रेण कारयेदिति यात् कार्ष्णाजिनेश्च चरुः स्मार्त्तस्थालीपाकः श्रवणाकर्मादिस्त्रेति वि
ज्ञानेश्वरः प्रारब्धे तु सपिंडेनापि कार्यं न च तत्कर्म कुर्वाणः सनाभ्योप्यशुचिर्भवेदितिम
न्त्रोक्तेः छंदोगपरिशिष्टेपि होमः श्रौतेतु कर्त्तव्यः शुष्कान्नेन फलेन वा अकृतं हावयेत्स्मा
र्त्ते तदभावे कृताकृतं अकृतं व्रीह्यादि कृतं तंडुलादि स्मार्त्तहोमादौ तु विकल्पो ज्ञेयः शालाग्नौ
चैकोइति प्रागुक्तेः यदा करणं तदान्यद्वारा: अन्नेदं तत्वं येषांच हृच्चादीनां द्वादशरात्र
महोमेपि तत्राग्निविच्छेदः तैर्न कार्यं तैत्तरीयाद्यैः कार्यं गिराजमह्रूयमानोग्निर्लौकिकः
संपद्यत इति सुदर्शनभाष्यवचनात् समारूढत्वगैर्नेनापि न कार्यं किंतु पुनराधान
मेव समारोपप्रत्यवरोहयोराशौचापवादाभावादनन्यककर्त्तृकत्वाच्च अन्यथा पु
नराधानमपिस्यात् यत्त्वाश्वलायनः तौचापि सूतके शावे सायं च जुहुयाद्द्विजः श्रौ
ताग्निस्तत्र सकृद्धुत्वा मसाप्नेवास्वयं जुहोतीति तदपि समारूढपरं तदाह सएव स्मार्त्ताग्नि
रात्मनोन्येषामभावे सूतकादिषु समारोप्य तदन्तेलाभिहृत्य जुहुयात्स्वयमिति तथा मनुः
प्रत्यूहेनाग्निषु क्रिया इति वैश्वदेवस्य त्वविसाध्यत्वेपि वचनात्तन्निवृत्तिः विप्रो दशाह
मासीत वैश्वदेवविवर्जित इति संवर्त्तोक्तेः पूर्वोनिषेधोव्ध्यस्तथाप्यापस्तंबादीनां वै
× १ × यद्यपि वैश्वयज्ञविधानं तु न कुर्यात्सूतजन्मोरि तिनेने वोक्तेः ×

देवस्यपंचयज्ञभिन्नत्वात्पश्यद्विविधः इत्यदन्तत्वाशौचेपिवद्धवैश्वदेवकार्यः त
स्यद्वाविनष्यामीयदात्मामशुचिर्यदेशरतिब्रह्मयज्ञस्यैवाशौचेपिशिष्टनिषेधात् संध्यादी
नामप्यपवादमाहापरार्केपुलस्त्यः संध्यामिष्टिंचरुंहोमंयावज्जीवंसमाचरेत् नत्यजे
त्सूतकेचापित्यजन्गच्छदधोद्विजः सूतकेमृतकेचैवसंध्याकर्मसमाचरेत् मनसो
च्चारयेन्मंत्रान्प्राणायामैमृतेद्विजः यत्तुचंद्रिकायांजाबालिः संध्यांपंचमहायज्ञा
न्नैत्यकंस्मृतिकर्मच तन्मध्येहापयेत्तेषांदशाहांतेपुनःक्रियेति यच्चसंवर्तः सूत
केत्वकर्मणांत्यागः संध्यादीनांविधीयते यच्चविष्णुपुराणे सर्वकालमुपासीनुसं
ध्ययोः पार्थिवेष्यते अन्यत्रसूतकाशौचविभ्रमातुरभीतितः इतितत्सूतकेसंध्यापरं
अर्घ्यांतामानसीसंध्याकुशवारिविवर्जितेतिशुद्धिदीपेमवनोक्तेः पैठीनसिस्त्व
र्घ्यमंत्रोच्चारणमाह सूतकेसावित्र्यांजलिंप्रक्षिप्यसूर्यंध्यायन्नमस्कुर्यात् प्रयोग
पारिजातेभरद्वाजोपि सूतकेमृतकेकुर्यात्प्राणायाममममंत्रकं तथामार्जनमंत्रा
स्तु मनसोच्चार्यमार्जयेत् गायत्रींसम्यगुच्चार्यसूर्यायार्घ्यंनिवेदयेत् मार्जनंतुन
वाकार्यमुपस्थानंनचैवहि गृह्यहोमाहृदावप्याशौचापवादमाहव्याघ्रः स्मार्तं
कर्मपरित्यागोराहोरन्यत्रसूतके इतिलौगाक्षिपि सूतकेमृतकेचैवनदोषोराहुदर्शने
तावदेवनचेच्छुद्धिर्यावन्मुक्तिर्दृश्यते प्रयोगपारिजाते बृहस्पतिः कन्याविवा
हेसंक्रान्तौसूतकेनकदाचन वृद्धशातातपः यदाभोजनकालेतुअशुचिर्भवति

नि॰ सिं॰
३३९

३३९

द्विजः भूमौ निक्षिप्य तं ग्रासं स्नात्वा विप्रो विशुद्ध्यति भक्षयित्वा तु तं ग्रासमहोरात्रेण
शुध्यति अशित्वा सर्वमेवान्नं त्रिरात्रेण विशुध्यति इदमविशेषात्सूतकादिपरमपीति
शुद्धितत्त्वे शूलपाणिश्च अथ द्रव्यतः मरीचिः लवणे मधुमांसे च पुष्पमूलफले
षु च शाककाष्ठतृणेष्वप्सु दधिसर्पिःपयःसु च तिलौषधाजिने चैव पक्वापक्वे स्व
यं ग्रहः पण्येषु चैव सर्वेषु नाशौचं मृतसूतके स्वयमेव स्वाम्यनुज्ञया ग्राह्यं न तु
स्वामिदत्तमित्यर्थः अपेक्षितं तु दत्तमपि न दोषः पक्वं लड्डुकादि अपक्वं तंडुलादि एतदन्नसत्र
परं अन्नसत्रप्रवृत्तानामाममन्नमगर्हितं भुक्त्वा पक्वान्नमेतेषां त्रिरात्रं तु व्रती भवेदि
त्यंगिरसोक्तेः पक्वान्नमोदनादि न तु भक्ष्यं षडशीत्यां मते उभाभ्यामपरिज्ञाते सूतके नै
व दोषः स्मृतः एकेनापि परिज्ञाते भोक्तुर्दोषमुपावहेत् विवाहोत्सवयज्ञेषु त्वंतरा मृतसू
तके परैरन्नं प्रदातव्यं भोक्तव्यं च द्विजोत्तमैः भुंजानेषु तु विप्रेषु त्वंतरा मृतसूतके अ
न्यगेहोदकाचांताः सर्वे ते शुचयः स्मृताः बृहस्पतिः विवाहोत्सवेत्याद्युक्त्वा पूर्वं
संकल्पितान्नेषु न दोषः परिकीर्तितः षडशीतौ संसर्गो यस्य वाशौचं यस्यांतिको
न कालता नदीयस्य परार्थस्य नाशौचं विद्यते क्वचित् शुद्धितत्त्वे शुध्येदित्यनुवृत्तौ
विष्णुः प्रोक्षणेन पुस्तकमिति अथ मृतदोषे हेमाद्रौ षडशीत्यां मते कौर्मे च व्यापाद
येद्य आत्मानं स्वयमग्न्युदकादिभिः विहितं तस्य नाशौचं नापि कार्योदकक्रिया
वदर्शनं यावदाशौचं मरुत्त्वेवाह नानानपणो विप्रैरत्वंसे चात्मघातिना द्विजिया

राम
३३९

339A

एव त्वयोक्तेः शुद्धिस्ताध्वे कौर्मे सद्यः शौचं समाख्यातं शापादिमरणेन तथा आदिपदाद भि
चारहते भक्षिते स्वेच्छया मरणं विप्राद्यं शृंगिदंष्ट्रिसरीसृपैः अंत्यं त्यांत्यजाद्विषोद्बंधैः रात्मना
चैव ताडनैः पाखंडमाश्रिताश्चैव महापातकिनस्तथा स्त्रियश्च व्यभिचारिण्य आरूढपति
तास्तथा न तेषां स्नानसंस्कारो न श्राद्धं नापि पिंडदं गौतमः प्रायोनाशकशस्त्राग्निविषो
दकोद्बंधनप्रपतनैश्चेच्छतामिति नाशौचमिति शेषः अंगिराः चंडालादुदकात्सर्पाद्ब्राह्म
णाद्वैद्युतादपि दंष्ट्रिभ्यश्च पशुभ्यश्च मरणं पापकर्मणां उदकं पिंडदानं च प्रेतेभ्यो यच्च दीय
ते नोपतिष्ठति तत्सर्वमंतरिक्षे विनश्यति यमोऽप्यात्मनेत्यपेवं ब्राह्मेऽपि शृंगिदंष्ट्रिनखिव्या
लविषवह्निक्रियाजलैः व्यालोगतः समूहात्परित्यक्तव्याः कृतेन क्रीडामृतस्तथाः नागानां वि
प्रियं कुर्वन् दग्धाश्चाप्यथ विद्युता निगृहीताः स्वयं राज्ञा चौर्यदोषेण कुत्रचित् परदारान् रमं
तश्चैव द्वेषात्तत्पतिभिर्हताः असमानैश्च संकीर्णैश्चंडालाद्यैश्च विग्रहं कृत्वा तैर्निहतास्तद्वच्चंडा
लादीन्समाश्रिताः शस्त्राग्निगरदाश्चैव पाखंडाः क्रूरबुद्धयः क्रोधात्प्रायं विषं वह्निं शस्त्रमुद्बंध
नं जलं गिरिवृक्षप्रपातं च ये कुर्वंति नराधमाः कुशिल्पजीविनो ये च सूनालंकारधारिणः
मुखेभगास्तथा ये केचित् क्लीबप्राया नपुंसकाः ब्रह्मदंडहता ये च ये चापि ब्राह्मणैर्हताः महापा
तकिनो ये च पतितास्ते प्रकीर्तिताः पतितानां न दाहः स्यान्नांत्येष्टिर्नास्थिसंचयः न चाश्रुपातः
पिंडो वा कार्यं श्राद्धादिकं क्वचित् एतानि पतितानां तु यः करोति विमोहितः तप्तकृच्छ्र
द्वयेनैव तस्य शुद्धिर्नैवान्यथा एतद्बुद्धिपूर्वे सर्वेषां करणे तु माधवीये वसिष्ठः यश्चात्म

क्रोधमात्संचरवारिकाः हस्तैहतस्य हते दद्यात्सौवर्णं वृषसंयुतं शृंगिणा निहते दद्या १४

341

न्मृते दद्याद्वृषभं वस्त्रसंयुतं शूकरेण हते दद्याद्धंसोपक्वान्नसंयुतं भृगुपातमृते चैव
प्रदद्याद्धान्यपर्वतं अग्निना निहते कार्यमुदपानं स्वशक्तितः दारुणा निहते चै
व तिव्यासदने सभा शस्त्रेणाभिहते दद्यान्महिषीं दक्षिणान्वितां अश्मना निहते दद्या
त्सवत्सां गां पयस्विनीं विषेण च मृते दद्यान्मेदिनीं हेममंडितां उद्बंधनेन च मृते क
पिं कनकनिर्मितं मृते जलेन वरुणं हैमं दद्याद्द्वि निष्कजं चित्रसूचिकामृते स्वादुभोज
येच्छतं द्विजान् घृतधेनुः प्रदातव्या कदन्नकवले मृते कासरोगेण च मृते अष्ट
कृच्छ्रव्रतं चरेत् अतिसारमृते लक्षं गायत्र्याः प्रयतो जपेत् शाकिन्यादिग्रहग्रस्ते
जपेद्रुद्रं यथोदितं विद्युत्पातेन निहते विद्यादानं समाचरेत् अंतरिक्षमृते कार्यं वे
दपारायणं तथा सद्यास्त्रपुस्तकं दद्याद्दस्य श्वस्पर्शितो मृते पतिते च मृते कुर्यात्प्राजा
पत्यांस्तु षोडश मृते चापत्यरहिते कृच्छ्राणां नवतिं चरेत् एवं कृते विधाने तु विद
ध्यादौर्ध्वदेहिकं तथाविधमरणेपि न दोषः ततः नराहतस्तु मेनसद्ग गार्ग्यो सद्यः शौचं
स्यात्तैलं प्रत्याख्यातभिषक्क्रियः आत्मानं घातयेद्यस्तु भृग्वग्न्यनशनांबुभिः
तस्य त्रिरात्रमाशौचं द्वितीये त्वस्थिसंचयः तृतीये तूदकं कृत्वा चतुर्थे श्राद्धमाचरे
दिति हेमाद्रौ विष्णुधर्मेपि नरस्तु व्याधिरहितो नात्यजेदात्मनस्तनुं असूर्यानाम ते
लोका अंधेन तमसा वृताः ते प्रेत्याभिगच्छंति ये के चात्महनो जनाः अरिष्टैरात्मनो ज्ञा
त्वा मृत्युकालमुपस्थितं व्याधितो भिषजा त्यक्तः पर्णैर्वायुर्भिर्वात्मनः प्रयागानु

स्वदेहं संत्यजेदात्मनस्ततं तस्मिन्काले तत्त्यागाद्यथेष्टं फलमाप्नुयात् आयुषस्तु पु
रा हृष्टं मरणं ब्राह्मणस्य च नेति गौडानामयं पाठः उत्तरार्धे संगतेः तत्रायस्यानुसंगमेन
नैमत्तिरियो विचितः अपरार्के ब्रह्मगर्भः यो जीवितुं न शक्नोति महाव्याध्युपपीडितः सो
त्रि०८ ऽग्न्युदकं महापात्रं कुर्वन्नामुत्र दुष्यति अत्रोक्त वक्ष्यमाणवचोतिच यात्म्यागातिरिक्ते चि
कित्सस्यरोगाद्युपद्रुतानामधिकारः सोपि जीर्णो वानप्रस्थस्यैवेति विज्ञानेश्वर देव
यात्तिकादयः एते एव मिताक्षरादौ भृगुपातानशनादिकं वानप्रस्थस्यैवोक्तं मनुरपि
आसां महर्षिचर्याणां त्यक्त्वान्यतमेणं त्यक्त्वान्यतमेणतनुं वीतशोकभयो विप्रो ब्रह्मलोका
यकल्पत इति तेनान्यज्ञापितं द्विजपतनैव म्लेच्छवादिति केचित् तन्न वानप्रस्थम
रणे आशौचनिषेधात् तेन गृहस्थादिपरमेवेदं तेन यतेर्नाधिकारः काम्ये नाधिकाराच्च
नैमित्तिके त्वकरणे दोषो नित्यता च स्यात् प्रयागे रोगिणां च यत्तु स्त्र द्राक्षत्रियावैश्याअ
न्त्यजाश्च तथाधमाः एतेत्यजेयुः प्राणान्वै वर्जयित्वा द्विजन्मप पतितत्वात् ब्राह्मणस्तु गव
न्नरतावात्महा भवेदिति तन्निर्मूलमिति मदनरत्ने तु हेमाद्रौ व्रतकांडलिखनान्निर्मूलत्वं
चिंत्यमेव प्रक्रमात्तु मलित्त्वेति भट्टपादमाजपरं प्रयुक्तं ब्राह्मणस्याप्यनुज्ञातमिति व
क्ष्यमाणविरोधाच्च पद्मादित्यपुराणे आब्राह्मणो वा स्वर्गादिमहाफलजिगीषया
प्रविशेज्ज्वलजं तोयं करोत्यनशनं तपेति तत्त्यागातिरिक्तपरमिति केचित् हेमाद्रौ
चिंतने प्रयागवटशाखायाद्यादित्युक्ते ब्राह्मणस्य प्रयागेपि नेष्यतीयते माधवीये

परार्के चादित्यपुराणे दुश्चिकित्स्यैर्महारोगैः पीडितस्तु पुमान्यदि प्रविशेज्ज्वलनं दीप्तं करो
त्यनशनं तथा अगाधतोयराशिं च भृगोः पतनमेव च गच्छेन्महापथं वापि तुषारगि
रिमादरात् प्रयागवटशाखाग्राद्देहत्यागं करोति च स्वयं देहविनाशस्य काले प्राप्ते महा
मतिः उत्तमान्प्राप्नुयाल्लोकान्नात्मघाती भवेत्क्वचित् एतेषामधिकारस्तु सर्वेषां सर्वजंतु
षु नराणामथ नारीणां सर्ववर्णेषु सर्वदा ईदृशं मरणं येषां जीवतां तु क्वचिद्भवेत् आशौचं स्या
त्त्र्यहं तेषां वज्ञानलक्षणं तथा वाराणस्यां म्रियेयस्तु प्रत्याख्यातभिषक्क्रियः काष्ठपा
षाणमध्यस्थो जाह्नवीजलमध्यगः अविमुक्तोन्मुखस्तस्य कर्णमूलगतो हरः प्रणवं
तारकं दत्ते नान्यथा कुत्रचित्क्वचित् हेमाद्रौ चैवं अत्र प्राप्ते काले प्रत्युक्तेः प्राप्तमरणका।
लपाः स्त्रियाश्चान्वारोहणे संग्रहणमिव शौचं पृथ्वीचंद्रस्तु जाप्यस्य हि माह शुद्धिस्तत्वा।
दिगौडग्रन्थेष्वप्येवं तत्र च महाप्रस्थानादिमरणं कलौ निषिद्धं भृग्वग्निपतनैश्चैव वृद्धादि
मरणं तथेति माधवेन पृथ्वीचंद्रेण च कलिवर्ज्येषूक्तेः न चात्र यावदुक्तनिषेधः वि
शिष्टो ईशो वाक्यभेदात् न च कलौ वानप्रस्थाश्रमतिष्ठेधमदेवसिद्धेर्मरणनिषेध्ये।
त्यर्थ इति वाच्यं सर्ववर्णेष्वित्यादिभिस्तद्भिन्नस्यापि प्राप्ते काम्यं भवत्येव येचैतन्मे
विसर्जंतीतिश्रुतेः स्मृत्यासंकोचायोगात् न चेयं स्वाभाविकष्टत्वपरा घोर
पदोक्तेर्मात्स्यभारतादिषु न लोकवचनान्नानात न वेदवचनादपि मतिरुत्क्रमणे
पाते प्रयागमरणं प्रतिश्रुत्युक्तेः अत एव विष्णुधर्मेराज्ञादिमरणमुत्तमोक्तं यद्यपि तु

342A

नानुसरेण संत्यजेदात्मनस्तनुमिति कास्यामप्युक्तं मात्स्ये अग्निप्रवेशं ये कु
र्युरविमुक्ते विधानतः प्रविशंति मम लोकं ते मे निःसंदिग्धं वरानने हेमाद्रौ विष्णु
स्थान् सर्वेंद्रियविमुक्तस्य स्वस्थस्याचाराक्षमस्य च प्रायश्चित्यमनुज्ञातमग्नि।
पातो महापथः धर्मार्जिनासमर्थस्य कर्तुः पापांकिनस्य च ब्राह्मणस्यायमनु
ज्ञातं तीर्थे प्राणविमोक्षणं अपरार्के चैवं सहगमनं कलौ नान्यां गतिं स्त्रीणां
सहानुगमनादृते इति ब्रह्मवैवर्तात् तेन मरणांतिकप्रायश्चित्यं काशीखंड
दौ चानुवर्णितस्य तनुत्यागविधयस्तु युगांतरपरा यथेति युक्तं प्रयागेपि
त्रिस्थलीसेतौ स्कांदे यथा कश्चित्तीर्थेस्मिन् प्राणत्यागं करोति यः तं
स्मात्मघातदोषो न प्राप्नुयादीप्सितानपि पाद्मे विष्णुः देहत्यागं तथा वीराः कुर्वंति
मम सन्निधौ मत्तं ते प्रविशंत्येव न पुनर्जन्मिनो नराः कौर्मे व्याधितो यदि वा दीनः क्रु
द्धो वापि भवेन्नरः गंगायमुनमासाद्य यस्तु प्राणान् परित्यजेत् ईप्सितान् लभते का
मान् वदंति मुनिपुंगवाः तथा यावत्तिर्यग्गतस्यास्य सत्यस्य स्यमनीषिणः साग
ति स्वज्जतः प्राणान् गंगायमुनसंगमे वाराहे तत्र योमुंचति प्राणान् वरम्लेच्छ
सुंदरि सर्वलोकानतिक्रम्य मम लोकं प्रयस्तुनसंगमे वाराहे तत्र ये मुंचते त
पा अकामो वा सकामो वा वटम्लेच्छसुंदरी शीघ्रं प्राणान्मुंचयेत यदीच्छेत्स

प्र

रंगागतिं तथा पंचयोजनविस्तीर्णे प्रयागस्य तु मंडले अनीतानपुरुषान्सप्त नारवि
ध्वांक्षश्च तन्देशाः नरस्तारयते सर्वान् यस्तत्र प्राणान्परित्यजेत् ब्राह्मे ध्यात्वा वि
ष्णुपदांभोजे प्रयागे विष्णुतत्परः न तं स्पृशंति वैमाधेत स्यमुक्तिर्न संशयः दुःकृता
पि दुराचारो ब्रह्महत्यादिपातकी हरिं ध्यात्वा त्यजन्देहं प्रायशो मुक्तिमान्भवेत् ।
भविष्योत्तरे समासहस्राणि तु सप्त वै जलेदेशे कुमारेनायतने च षोडशापद्महवे
षष्टिरस्तीति गोग्रहे स्वनाशे केभावत चोक्षयांगतिरिति सामान्यतोपि फलं प्र
वमन्येपि विधयो ज्ञेयाः यत्तु गौडः प्रयागादिमरणं ब्राह्मणेभिन्नविषयमित्याहुः
तन्न दृश्यं पितामहचरणैः प्रयागविधौ कृतनमिति तिनाक्षोच्यते अत्र दशाहमाशौचं
त्रिरात्रस्य प्राप्तकालगोचरत्वात् इति भट्टाः पुत्रं तु त्रिरात्रं दिवोदासीये षष्ठेवं भु
क्तितत्वेपि काश्यपः अनशनमृतानाम राति हतानामग्निजलप्रविष्टानां भृगुसंग्रा
मदेशांतरमृतानां जातदंतानां च त्रिरात्रमिति एवं मरणांतप्रायश्चित्तेपि सर्वं कु
र्यात्मृतादेर्द्धिहारोचादिनिषेधस्तदानीमेव वत्सरांते तु सर्वमौर्ध्वदैहिकं कुर्या
त् गोब्राह्मणहतानां च पतितानां तथैव च ऊर्ध्वं संवत्सरात्कुर्यात्सर्वमेवौर्ध्वदैहि
कमिति हेमाद्रौ षट्त्रिंशन्मतात् एवं म्लेच्छीकृतानामपि गयाश्राद्धमपि कार्यं ब्र
ह्महा च कृतघ्नश्च गोघाती पंचपातकी सर्वे ते निःकृतिं यांति गयायां पिंडपातना
दित्यग्निपुराणात् ब्राह्मेपि क्रियाते पतितानां दिनात् गते संवत्सरे क्वचित् देश

धर्मप्रमाणत्वाच्छ्रयाकृयेस्त्ववंधुभिः मार्तंडपादमूलेवाश्राद्धंहरिहरोस्मरन् सूर्यपदेड
त्वर्थः तत्रवर्षमध्येकृत्यमुक्तंसधराकैवायुपुराणेशुक्लपक्षेतुद्वादश्यांकुर्याच्छ्राद्धंतुव
त्सरं द्वादशाहानिचाकुर्याच्छुक्लेचप्रथमेहनि घाणलः यः नारायणवलिः कार्योलोक
गर्हाभयान्नरैः तथातेषांभवेच्छौचंनान्यथेत्यब्रवीद्यमः व्यासः नारायणंसमुद्दिश्यशि
वकायप्रदीयते तस्यशुद्धिकरंकर्मतद्भवेन्नैनदन्यथेति स्वात्मघातादिप्रायश्चित्तं
कृत्वाकार्यः तदुक्तं हेमाद्रौषट्त्रिंशन्मते कृत्वाचांद्रायणंपूर्वं क्रियाकार्यायथाविधि
नारायणवलिकार्योलोकगर्हाभयान्नरैः पिंडोदकक्रियाःपश्चाद्वृषोत्सर्गादिकंचय
त् एकोदिष्टानिकुर्वीत सपिंडीकरणंतथा दिवोदासीये वृद्धशातातपस्तु पतितेच
मृतेमूढेप्राजापत्यांस्तुषोडश मृतेचापत्यरहिते हाधार्णांनवतिंचरेदित्याह ।
इदंप्रायश्चित्तंश्राद्धेपित्रादिविषयं इंद्रियैरपरित्यक्ताश्चैचमूढाविषादिनः चान्तर्यति
स्वमातृनेचंडालादिहताश्चये तेषांपुत्रास्त्वपौत्रावाश्राद्धयमासमभिष्टुताः यथाश्राद्धं
प्रेतत्वंज विष्णुनामप्रतिष्ठितं तथातेसंप्रवक्ष्यामिनमस्कृत्यस्वयंभुवे इतिहेमा
द्रौतैनैवोक्तेः तत्रैववोधायनोपि नारायणवलिंव्याख्यास्यामोभिशस्तपतितनष्ठ
रायात्मत्यागिनां ब्राह्मणहतानांचद्वादशवर्षाणिजीवांरंकुर्वीतेति गृह्यपरिशिष्टे
त्तु चंडालादित्यादिक्त्वादशाशरीरंप्रेतस्यसंस्काय्यास्थीनिपातनेतः प्रायश्चित्तंतुक

नैवं पुत्रे श्राद्धं प्रायश्चित्तत्रयमित्युक्तं मदनरत्ने ब्राह्मणहन्तॄणां च द्वादशवर्षाणि त्रीणि वा कु
र्वीतेति मदनरत्ने ब्राह्मे प्रमादाद्दापितेः शंकस्तत्र कस्माद्विधिचोदितः चंडालोद्बन्ध
नौश्चौरैर्निहितो यत्र कुत्रचित् तस्य दाहादिकं कार्यं यस्मान्न पतितस्तु सः चान्द्रायणं
तदा कुर्यात्तस्य विप्रस्य शुद्धये यद्वा कृच्छ्रं च दश कृत्वा तु विधिना दहेत् बुद्धिपूर्वमृ
तानां तु त्रिंशत्कृच्छ्रं समाचरेदित्युक्तं स्मृतिरत्नावल्यां तु हिरण्यगर्भप्रायश्चित्तं कृत्वा
श्रीगयायां तस्य सर्वं कार्यमित्युक्तं आत्मनो घातकस्यार्थं चरेच्चान्द्रायणद्वयं तप्तकृच्छ्रं च तत्
श्चैव त्रिंशत्कृच्छ्राणि वा पुनः अर्वाक्संवत्सरात्कुर्याद्दहनादि यथोदितं कृत्वा नारायण
बलिमनित्यत्वात्तद्दापयेदिति इदं चात्मवधनिमित्तेन जातिवधप्रायश्चित्तेन सम्बद्धं चित्ते
कार्यं अत एव बौधायनेनोक्तं द्वादशवर्षाणि त्रीणि वेति मदनपारिजाते स्मृत्यर्थसा
रे च ब्राह्मणहन्तॄणां तद्योग्यप्रायश्चित्तं कृत्वा नारायणबलिः कार्य इत्युक्तः एवमेव चौ
रहतानामपि यत्तु कश्चिदाह पुत्रकृतेन प्रायश्चित्तेनापितः पापनाशे मानाभावः आ
त्मघातेन तु वचनादस्य महापातकेन तु कथं स्यादिति तत्स्वयमेवात्मवधप्रायश्चित्तस्य
जातिवधनिमित्तेन समुच्चयं वदतः हृदयशून्यत्वाद् एव तर्हि जातिवधनिमित्तं पुत्रैः
कार्यमिति वचनमस्ति पुत्रकर्तृक सर्वप्रायश्चित्तादि विषमवापत्तेः प्रागुक्तबौधाय
न वचनाच्चेति दिक् इदं प्रायश्चित्तार्हाणामेव प्रायश्चित्तार्हाणामेव प्रायश्चित्तानर्हाणां
तु पतितोदकमात्रं कार्यमिति केचित् मदनपारिजातादिस्वरसोऽप्येवं वस्तुतः

तदर्शनद्वयोर्वचनेऽनुपादानादविशेषान्नदगापि नारायणबलिर्ग्याम्रा।
इंचेति युक्तं पतितोदकविधिस्तु पित्राद्यतिरिक्तविषय इत्यपरे स यथा हेमाद्रौ
ब्राह्मे पतितततनां तु कारुण्याद्घस्ततपि कर्तुमिच्छति सोहिदासीसमाहूय सर्वगां दत्तेचेत्त
नां अस्त्रुद्धघटहस्तां तां यथाहत्तं प्रवीत्यपि हे दासि गच्छ मूल्येन तिलान्नानघसत्व
रं तोयपूर्णे घटे चेमं सतिलं दक्षिणामुखी उपविष्टा तु वामेन चरणेन ततः क्षिपत्
कीर्त्तेयेः यात किंसंतां चपिवेति मङ्कुर्वदः निशम्य तस्य वाक्यं सा लब्ध्वा मूल्यात्करोति
तत एवं कृते धनेनत्रिः पतितानां मानचाम्रयेति इदं च मत्तादेकर्ये पतितस्य दासो मृत्ता
क्रियदा घटमपवर्जयेदेतावता यम उपचरितो भवतीति मदनरत्ने विष्णूक्तेः इदं चात्म
त्यागिविषयं आत्मत्यागिनः पतितास्तेनाशौचोदकभाजः स्युरित्युपक्रम्य विघ्नु
ना एतस्याभिधानादिति गौडाः यत्तु कश्चिदाह यः पतितो घटस्फोटेन वंधवैर्वहिः
कृतस्तद्विषयाणि क्रियानिषेधवाक्यानि जीवत्येव तस्मिंस्तत्कर्मणा कृतत्वात्तु
तः कारणाभावादिति स बंधुत्यागेन जातवैराग्यस्य प्रायश्चित्तस्याकरणापत्तेः।
र्मिताक्षरादिविरोधमपरस्य तत्सर्वं वस्तुपेक्षणीयैः न च कृतघटस्फोटस्य संग्रहवि
धिर्नेति वाच्यं मन्नु नाक्षतघटस्फोटस्य त्यागमुक्त्वा प्रायश्चित्तेन चरिते पूर्णे कुं
भमयं तत्वं तेनैव सार्द्धं प्रास्येयुः स्नात्वा पुण्ये जलाशये इत्युक्तेः अन्यथा प्रायश्चि
त्तमात्रेण तत्संसर्गात् अतो घटस्फोटेन वहिः कृतस्यापि पिण्डादेरकांते नारायण व

लिः निषेधास्तु पितृव्याक्षेपरा इति तत्त्वं केचित्तु नारायणबलौ कृतेप्यन्त्यकर्म सपिंड
नवर्ज्यं कार्यं गोब्राह्मणहतानां च पतितानां तथैव च मुक्तमात्रं प्रमीतानां नैव कार्या
सपिंडतेति वचनात् ब्राह्मणादिहते तानेध्याग्निर्मल्लत्वा श्राद्धप्रकाशस्य च हद्रिश्राद्ध
विषयत्वादुपेक्ष्याः नारायणबलिस्तु हेमाद्र्याद्यनुसारेणोच्यते तत्रादौ क्रियानिबंधे
गारुडे तर्पयमुक्तो कार्यः पुरुषसूक्तेन मंत्रैर्वा वैष्णवैरपि दक्षिणाभिमुखो भूत्वा प्रेतं वि
ष्णुस्मरन् अनादिनिधनो देवः शंखचक्रगदाधरः अव्ययः पुंडरीकाक्षः प्रेतमोक्षप्रदो
भवेति श्रुत्वैकादश्यां देशकालौ संकीर्त्य अमुकगोत्रस्यामुकस्य दुर्मरणात्मघातज
दोषनाशार्थं वेदोक्तकै संप्रदानयोग्यतासिध्यर्थं नारायणबलिं करिष्ये इति संकल्प
ब्रह्माणं विष्णुं शिवं यमं प्रेतं पंचसु कुंभेषु विष्णुः स्वर्णमयः कार्यो रुद्रस्ताम्रमयस्त
था ब्रह्मा रौप्यमयस्तत्र यमो लोहमयो भवेत् प्रेतो दर्भमयः कार्य इति गारुडोक्तास्तुस
र्वास्तु हैमीर्वा प्रतिमास्तु षोडशोपचारैः पुरुषसूक्तेनाभ्यर्च्याग्निं प्रतिष्ठाप्य चरुं पुरु
षसूक्तेन प्रत्यृचं नारायणायेदमिति हुत्वा देवानामग्रे दक्षिणाग्रदर्भेषु विष्णुरूपं
प्रेतं स्मरन् नामगोत्राभ्यां मधुघृततिलयुतान्दश पिंडानपसव्येनापवीत्येवं अमुकगोत्रा
मुकशर्मन् प्रेत विष्णुरूपायं ते पिंड उपतिष्ठतामिति दत्वा पुरुषसूक्तेनाभिमंत्र्यरा
रेवादके नाभिक्षिप्य अमुकशर्माणं ममुकगोत्रं विष्णुरूपं प्रेतं तर्पयामीति पुरु
षसूक्तेन प्रत्यृचं तर्पयित्वा एकैकमामान्नं ब्रह्मादिपंचभ्यो दद्यात् अत्र तु ब्रह्म

विष्णुमहादेवा यमश्चैव सकिंकरः चलिंगं गृहीत्वा कुर्वन्तु प्रेतस्यैवं शुभां गतिमिति मि
ताक्षरायां तु होमबल्यादिनोक्तं ततः प्रतिदैवतं चेविधिं फलं सर्करामधुगुडयुक्तान्नमिच
निवेद्य पिंडान्मध्यमेन धान्येन शाल्मि मारात्रौ नवपंचधा करिष्ये इत्युक्त्वा विष्णुयमप्रेतान्स्मर
न्विप्रानुपवेश्य प्रेतस्थाने चैकं विष्णुं स्मरन्पाद्यावाहनार्घ्यपुत्ते न्नम्नि प्रश्नान्ते कृत्वो
ल्लेखनादि कृत्वाऽन्ते ब्रह्मणे विष्णवे शिवाय यमाय सपरिवाराय चतुरः पिंडान्
दत्वा प्रेतनामगोत्रे स्मृत्वा विष्णुनाम्ना मं च मं दत्वाभ्यर्च्याचांतेभ्यो दक्षिणां दत्वैकं
द्विजं प्रेतरूपं स्मृत्वा विशेषतः संतोष्य विप्रैः प्रेताय दत्ततिलोदकमुपतिष्ठतामिति स
तिलमुदकं दापयित्वा स्नात्वा भुंजीतेति संक्षेपः अत्र विशेषांतरं भट्टकृतान्त्येष्टिपद्धतौ
ज्ञेयं सर्पहते वर्षपर्यंतं पूर्वे ह्येकभक्तं एवं शुक्लपंचम्यामुपवासं नागं कृत्वा पिष्ट
मयं नागमनंतवासुकिशंखपद्मकंबलककर्कोटकाश्वतरधृतराष्ट्रशंखपालका
लियतक्षककपिलेति नामभिः प्रतिमासं संपूज्य पायसेन विप्रान्संभोज्य वत्सरांते
हैमं नागं गां च दत्वा नारायणबलिं कुर्यात् मूलं तु हेमाद्रौ ज्ञेयं बोधायनसूत्रे सर्प
हतानां नमोस्तु सर्पेभ्य इति तिसृभ्य आहुती हुत्वोदके मृतानां समुद्रायेव युनायेति
हुत्वेति क्रियां कुर्यादिति शेषः व्यासः सौवर्णीं भारनिष्पन्नां तां गां कृत्वा तस्यैव गां
शास्यं दत्वा विधिवत्तिलनारायणमाप्नुयात् हेमाद्रौ भविष्ये पंचम्यां पन्नगं हैमं
स्वर्णेनैकेन कारयेत् क्षीराज्यपात्रमध्यस्थं संपूज्य विप्राय दापयेत् प्रायश्चित्तमि

दंप्रोक्तंनागदष्टस्यसंभवेति अपरार्केस्मृत्यंतरेणदेवमुध्यतिशेते नारायणबलौ
कृते योददातिक्रियापिंडं तस्मैप्रेतायवैसुतः तस्मैवाशौचमस्तु इति अहमेवनसंश
यः विष्णुश्राद्धसमाप्तौतु त्रयोदश्यांदिने त्रयं आशौचंपिंडदः कुर्यान्नतेनाहं घुगोत्रजाः
यस्यवैमृतस्तुकालेतु विच्छिन्नासंततिर्भवेत् सचसेन्नरकेनित्यंपंकमग्नः क्लीयथा
मृत्युपक्रम्यावलिनारायणं कुर्यात्तस्योद्देशेनभक्तिमानितिगारुडोक्तेरपुत्रस्यापि
पत्न्याद्यैः कार्यमित्युक्तं देवयाज्ञिकेन अस्यविधानादाशौचाभावः यस्यायतिपुत्रक्र
तादिषु त्रयाणामाश्रमाणांचकुर्याद्दाहादिकाः क्रियाः यतेः किंचिन्नकर्तव्यंनचा
न्येषांकरोतिस इतिब्राह्मात् उशना एकोद्दिष्टंनकुर्वीतयतीनांचैवसर्वदा अहन्ये
कादशेप्राप्तेपार्वणंतुविधीयते सपिंडीकरणंतेषांनकर्तव्यंसुतादिभिः त्रिदंडग्र
हणादेवप्रेतत्वंनैवजायते नेनतंस्कारंवक्ष्यामः दत्तात्रेयः एकोद्दिष्टंजलंपिंडमाशौ
चंप्रेतसत्क्रियां नकुर्याद्वार्षिकादन्यत् ब्रह्मभूतायभिक्षवे वार्षिकादीतिएवंभा
विमासिकादिनिषेधोनतुदर्शादेः सन्यासिनोप्याब्दिकादिपुत्रः कुर्याद्यथाविधी
ति वायवीयोक्तेः पृथ्वीचंद्रोदये प्रजापतिः अहन्येकादशेप्राप्तेपार्वणंतुविधीयते स
पिंडीकरणंतस्यनकर्तव्यंसुतादिभिः एवंसपिंडनादिनिषेधात्पार्वणेनतैः
नतस्यानापत्तेः पार्वणस्यगम्यते नाडीरागिरोमि भूयादेरंतत्वोक्तेः यमितिवत्त इदंवा
र्षिकादिविधानंच त्रिदंडिनामेव एकदंडिपरमहंसादीनां तु नकिमपिकार्यं

346A

पूर्वोक्तोशनो वाक्येत्रिदंडिग्रहणादिति स्मृत्या एषादयो भेदाः त्रिदंडिशब्देन मनोदं
डादिदंडत्रयोक्तेः यस्यैते नियता दंडाः स त्रिदंडीति चोच्यते इति स्मृतेः बौधायनः नाराय
णबलिः स्यात्तस्य कर्तव्यो द्वादशेऽहनि अस्य पार्वणेन समुच्चयो ज्ञेयः सं च सरावाह कृत्वा
विष्णोर्महत्पूजां पायसं विनिवेदयेत् अग्नौ नाहुत्वा तु षट्व्यादजीभिः समाहितः यतीं
गृहस्थान्साधून्वा निमंत्र्य द्वादशावरान् अभ्यर्च्य गंधपुष्पाद्यैर्मंत्रैर्द्वादशनामभिः स
भोज्य हव्येनान्नेन दक्षिणां च निवेदयेत् त्रयोदशं द्विजश्रेष्ठमात्मक्षेसंयतेंद्रियं विष्णु
यथा तथाभ्यर्च्य पाद्याद्यैश्च विधानतः दद्यात्पुरुषसूक्तेन गंधपुष्पाक्षतादिकं क्रमात् व
स्त्रालंकरणादीनि यथाशक्ति प्रदापयेत् उच्छिष्टसन्निधौ तस्य दर्भान्नास्तीर्य भूतले भू
र्भुवः स्वः स्वधा पुत्रैः तस्मै दद्याद्बलित्रयं अश्वमेधसहस्रस्य वाजपेयशतस्य च यत्फलं त
त्कर्मदेवं यः करोति पतितक्रियां शौनकः तत्र शौचं बोधं प्रवक्ष्यामि नारायणबलिं परं चां
डालादुदकात्सर्पाद्ब्राह्मणाद्वैद्युतादपि दंष्ट्रिभ्यश्च पशुभ्यश्च रज्जुशस्त्रविषाश्मभिः देशां
तरमृतानां च मृतानां चान्यसाधनैः जीवश्राद्धमृतानां च कनिष्ठानां तथैव च यतीनां
योगिनां पुंसामन्येषां मोक्षकांक्षिणां पुण्यापापक्षयार्थाय द्वादशेऽहनि कारयेत् इंदस्था
स्रवणे द्वादशेऽपि च मंत्रपार्वणेन स्तवेन्युक्त्वा पूर्वोक्तं सर्वविधिमुक्त्वा ततो देवेति पुरुषसू
क्तेन च प्रत्यृचं पायसं हुत्वा केशवादि द्वादशनामभिस्तद्विपरीतेऽपि वै द्वादश विप्रान्संभो
जनैरव द्वादशपिंडान्दद्यादित्यधिकमाह पुत्रमृतेन प्रागुक्ते कृतजीवश्राद्धे मृतेऽसपिं

दैराशौचादिकार्यं न वा तदुक्तं हेमाद्रौ लौगाक्षिः मृते कुर्यान्न कुर्याद्वा जीवन्मुक्तो यतः स्वयं
कालं गते द्विजे भूमौ खनेद्वापि दहेत्त वा पुत्रकृत्यमतः शेषं चकाराद्दोषो न विद्यते जीवन्मु
क्ति विशेषस्तत्रैवोक्तः नित्यं नैमित्तिकं यत्नात्कुर्याद्वा संत्यजेत्तु वा बाधवेपि मृते तस्य नै
वाशौचं विधीयते सूतकं च न संदेहः स्नानमात्रेण शुध्यति एतद्योगिविषयं योगमार्ग
रतोपि वेतितस्याप्युक्तेः तथाहिताग्नेर्गोप्रोषितमृते तदस्थिलाभे वा पुत्रादीनामाशौचं सं
ध्यादिकर्मलोपश्च नास्ति अनग्निमतस्तूक्तं ते राशौचादि द्विजातिषु दाहाद्दिने मृतो विप्रो
हि देशस्थो मृतेस्त्वतीति स्मृतेः आहिताग्नेस्तु देहनाशे प्राणापि दशाहः संस्कारांच भिन्नो दशाहइ
ति धर्मत्ते स्वामारोडारश्च तद्विंत्य मूलैक्वा हृत्योविरोधाच्च एतत्प्रागुक्तं अत्र देहस्यैव संभवे
दाहः आहिताग्नेर्विदेशस्थे मृते शांतिकलेवरं निधेयं नाग्निर्मिर्थावन्न दीपैरपि दह्यते ॥
इति ब्राह्मोक्तेः तदभावे पंचाशत्परिसिद्धे विदेश मरणे त्वस्थीनि प्राह्य त्याभ्यज्य सर्पिषा
दाहयेद्बर्हिषास्थाघपात्र मासादिपूर्ववत् अस्थ्यामलाभे पार्णानि शकलान्युक्तयावृताः रा
हयेदस्थिसंख्यानि ततः पूर्वमतिसूतकं हेमाद्रौ षट्त्रिंशन्मते कुर्याद्भस्मयंप्रेतं दर्भत्रिशत
वृष्टिभिः पालाशीभिः समिद्भिर्वा संख्याचैवं प्रकीर्तिता भविष्ये चत्वारिंशच्छिरस्याने ग्री॥
वायां च दशैव तु बाह्वोश्चैव शतं दद्याद्विंशतिं च तयोरसि उदरे विंशतिं दद्यात्त्रिंशतं कोटिदे
शयोः ह्रद्वोश्चैव शतं दद्यात्त्रिंशतं जंघयोः द्वयोः पादांगुलीषु दशैव मध्यावपेत्तु कल्पना मद
नरत्ने पत्रपार्श्वः शिरस्यशीतिमर्धं दद्याग्रीवायां तु दशैवतु बाह्वोश्चैव शतं दद्यादशचैवां
गुलीषु च उरसि त्रिंशतं दद्याद्विंशतिं जठरे दहेत् द्वादशार्धं तु वृषणयोरष्टार्धं शिश्नएवतु ॥

उ वैश्चैवक शतं दद्यात्रिंशतं जंघयोर्द्वयोः पादांगुलीषु द्वे दद्यादेतत्प्रेतस्य कल्पितं मस्तके ना
लिकेरं तु अलाबुं तालुके तथा पंचरत्नं मुखे वत्तस्य जिह्वायां कदलीफलं चक्षुषोस्तु कप
र्दौ द्वौ नासिकायां तु कालकं कर्णयोर्बाह्यपत्राणि केशे वटप्ररोहकाः नालकं कमला
नां तु अन्त्रस्थाने विनिक्षिपेत् मृत्तिका तु वसास्थाने हरितालकगंधकौ शुक्रे तु पादं दद्यात्
पुरीषे पित्तलं तथा संधिषु तिलपिष्टं तु मांसस्थाने यवपिष्टकं मधुस्याल्लोहितस्थाने त्वचः स्या
न्मृगात्वचा स्तनयोर्जंजेके दद्येनासायां शतपत्रकं कमलेनाभिदेशे स्याद्दृष्ट्वा त्वाके त्वषण्णा स्त्रिते
लिंगेचरक्तमलं तु परिधानं दुकूलकं गोमूत्र गोमयं गंधं सर्वौषध्यादि सर्वजं इति इदं निर
ग्निरपि तत्रैव स्कंदः मनुः प्रोषितस्य तथा कालो गतश्चेद्द्वादशाब्दिकः प्राप्ते त्रयोदशे वर्षे प्रेत
कार्याणि कारयेत् बृहस्पतिः यस्य न श्रूयते वार्त्ता यावद्द्वादशवत्सरान् कुशपुत्तलदाहेन तस्य
स्यादवधारणं भविष्योपि जरि प्रोषिते यस्य न वार्त्ता नैव वागमः ऊर्ध्वं पंचदशाद्वर्षात्कृत्वा चानप्र
तिरूपकं कुर्यात्तस्य तु संस्कारं यथोक्तविधिना ततः जटादीन्येव सर्वाणि प्रेतकर्माणि का
रयेत् द्वादशाब्द प्रतीक्षा पितृ न विषयेति मदनरत्ने उक्तं गृह्यकारिकायां तु तस्य पर्वं चय
स्कस्य विंशात्यब्दोर्ध्वतः क्रियाः ऊर्ध्वं पंचदशाब्दात्तु मध्यमे वयसि स्मृता द्वादशाब्दात्परा
दूर्ध्वं मृतेर्वयसि स्मृता चांद्रायणत्रयं कृत्वा त्रिंशत्कृच्छ्राणि दास्तु तैः कुशैः प्रतिकृतिं दग्ध्वा
कार्याशौचादिकाः क्रियाः इत्युक्तं पराशरः देशान्तरे देशांतरगतो नष्टोत्तिथिर्न ज्ञायते यदि
कृष्णाष्टमी ह्यमावास्या कृष्णा चैकादशीतिथा उदकं पिंडदानं च तत्र श्राद्धं च कारयेत् इदं बा
लस्तानं तत्राहिताग्नेः पर्णशरैः च अनाहिताग्नेस्तु त्रिरात्रं अनाहिताग्नेर्देहस्तु दास्वोगद्या

नि॰सिं॰
२४८

348

ष्टिनास्थयं तदलाभे पलाशानां वृन्तैः कार्यः पुमानपि वेष्टितव्यस्तथा मृगलाकृष्णसारस्य चर्मणा ऊर्णासूत्रेण बध्वा तु पूले प्रक्षोपयेत्तथा शुष्कपिष्टे जलसंमिश्रे दग्धव्यस्तथा ग्निना असौ स्वर्गाय लोकाय स्वाहेत्युक्त्वा सबांधवैः एवं पर्णशरं दग्ध्वा त्रिरात्रमशुचि र्भवेदिति ब्राह्मोक्तेः इदं त्रिरात्रं न दशाहमध्ये दाहे तत्र प्रोषिते कालशेषः स्यादित्युक्तेः किंतु तदूर्ध्वं तत्र पत्नीपुत्रयोः सर्वमग्रहीताशौचयोर्दशाहाद्येव गृहीताशौचयोस्तु त्रिरात्रं पात्नीमृतेतो महे श्रेवं सपत्न्यो श्रैवमितिनिस्तत्त्वं संसारे प्रत्यसपिंडानां तु सर्वत्र पर्णसारदाहे त्रि रात्रं तदाहांगिराः देशांतरमृतं श्रुत्वा शौचं चेत्कथंचन कालात्ययेपि कुर्वीत दाहकाले दिन त्रयमिति स्मृत्यर्थसारे तु गृहीताशौचानां स्नानमात्रमुक्तं बहूचपरिशिष्टेपि अथाहिताग्निसं स्कारः सर्वेदं तद्दर्शात् हस्यात्तत्रैव सर्वं समापयेदूर्ध्वमाहिताशौचयोः कर्मांगं त्रिसरात्रमिति षडशीतावप्येवं विस्वादर्शे तु प्रतिकृतिदहनेत्वग्निदेस्यास्त्रिरात्रमित्युक्तं द्वादशवर्षादि प्रतीक्षोत्तरं दाहे तु पुत्रादीनां सर्वेषां त्रिरात्रमिति कल्पतरुदिवोदासादयः अथ प्रेतसंस्का रे कालः हेमाद्रौ गार्ग्यः प्रत्यक्षशवसंस्कारे दिनं नैव विशोधयेत् आशौचमध्ये संस्कारे दिनं शोध्यं तु संभवे आशौचविनिवृत्तौ चेत्पुनः संस्क्रियते मृतः संशोध्यैव दिनं ग्राह्यम् ध्वं संवत्सराद्यदि प्रेतकार्याणि कुर्वीत श्रेष्ठं तत्रोत्तरायणं कृष्णपक्षस्तत्रापि वर्जयेत्तु दिनक्षयं वाराहे चतुर्थाष्टमगे चंद्रे द्वादशे च विवर्जयेत् प्रेतकृत्यं व्यतीपाते वैधृतौ पादौ घ्रेतथा कारणे विष्टिसंज्ञे च शनैश्चरदिने तथा त्रयोदश्यां विशेषेण जन्मतारात्र येतथा जन्मदशमैकोनविंशानि जन्मताराः भारते नक्षत्रे न कुर्वीत यस्मि

राम
३४८

दारुणे च सर्वेषु प्रेतं दैवविवर्जयेत् ॥
न जातो भवेन्नरः प्रोष्ठपदयो कार्यं तथाग्नेये च भारत ॥ ... धनिष्ठाद्यं चपंच
कास्यपः भरण्यार्द्रामघाश्लेषा मूलं द्विचरणानि च प्रेतकृत्ये तिनुष्ठानि धनिष्ठाद्यं चपंच ॥
कं फाल्गुनी द्वितीयं रोहिण्यनुराधा पुनर्वसौ आषाढे द्विशाखा च भानि द्विचरणानि च ॥
ज्योतिर्नारदः चतुर्दशीति कथं नंदा भद्रां शुक्रार वासरे सितेज्यया स्तत्मयं ऋषिभंवि
ष्ट्रमाघिभं शुक्लपक्षं च संत्यज्य पुनर्दहनमन्नं वस्त्रं राधेजः पंचनक्षत्रेषु त्रिजन्म ॥
षु माघिभं ... तत्रैव वैजवापः प्रेतस्या
स्तु पोषमवस्तक्षेपो ऽग्निवद्दहनात्कुलनाशनं अस्यापवादमाह ...
साध्यादग्धस्य पुत्रे चेकादशेऽहनि नक्षत्रतिथिवारादिशोधनीयं न किंचन युगमत्वादि
संक्रांति दर्शे प्रेतक्रियायां दैवाद्दापतिना तत्र नक्षत्रादिन सोधयेत् विस्तप्रकारेऽपि गु
रुभार्गवयोर्माघे पौषमासे मलिम्लुचे नातीतः पितृमेधः स्यात् कृष्णां गोदावरीं विना सन
प्रपि तत्रैवोक्तं भद्रायां भृभिदानं स्यात्रिपादक्षे हिरण्यदः वारेषु तत्र दर्णित्वा सादान
विधीयते धनिष्ठापंचके मृते पंचरत्नानि दापयेत् एकादशीतिलपलंकांस्यं तदर्धे वा तद
र्धकं तव वसु त्रिपलं चापि दद्याद्विप्राय शक्तितः अन्यत्र पुंसंगेन हेमद्रोणक्रमतः अमृते
सूतमाकर्ण्य कृत्वा यस्यौर्ध्वदेहिकं प्रायश्चित्तमसौ सम्यक् कृत्वाग्नीनादधीत च जीवन्
यदि समागच्छेत् घृतकुंभे निमज्ज्य तं उद्धृत्य स्नापयित्वास्य जातकर्मादि कारयेत् द्वाद
शाहं व्रतं वर्षास्त्रिरात्रमथवास्य तु स्नात्वोद्वहेत्तां भार्यामन्यां वा तदभावतः अग्नी
नाधाय विधिवद्व्रात्यस्तोमेन वा यजेत् अथैन्द्राग्नेन पशुनागिरिमित्वा च तत्र तु इष्टि ॥

मे सिनीवाल्यां पौर्णमास्यां पंचम्यां वापि कारयेत् ॥ कृतसर्पवधो विप्रः पूर्वजन्म
नि वा यदि वधं प्रख्याप्य येत्प्रायश्चित्तं चरेत्ततः ॥ कृच्छ्रत्रयं तदेशा विप्राय लोहदंडं च तन्मूल्यं वा
पि प्रदापयेत् ॥ सत्यमाह ॥ निष्कत्रयेण निष्कं वा निष्कार्धेकं कनायसं ॥ अनुमत्या दिक
नहृणां निष्कमर्धं तदर्धकं ॥ इदं स्वर्णमयं यथोः शक्त्यातेयं संस्कारमाह ॥ प्रियंगुर्व्रीहिगो
धूमतिलाः पिष्टेन वा पुनः ॥ कृत्वा सर्पाकृतिं स्थूलं निधायमर्चयेद्द्विजः ॥ एहि सर्प मतः स
र्प अग्निमिष्ट्वा समाविश ॥ संस्कारार्थमहं भक्त्या प्रार्थयामि समाहितः ॥ वस्त्रोपवी
तगंधाद्यैः संपूज्य च हरेद्द्विजैः ॥ कुर्यात्संस्कारसंकल्पं प्राणायामपुरःसरं ॥ यज्ञोप
वीतिना कार्यः सर्पसंस्कारकर्मणि ॥ लौकिकाग्निं प्रतिष्ठाप्य समिदाधानमाचरेत् ॥ ततो
र्नैरृत्यां दिशि मार्गे भूमिं संप्रोक्ष्य वारिभिः ॥ चितिं कृत्वाप संस्तीर्य कुशैरग्रेयकाग्रकैः
पं कुशासनं परिस्तीर्य परिषिच्य समर्चयेत् ॥ कृत्वा ध्यानमाधारं चाज्यभागौ च यथाविधि ॥ सर्प
स्य शिला यत्नेन चितिमारोपयेत्सुधीः ॥ स्रुवेण जुहुयादाज्यमग्नौ व्याहृतिभिस्त्रिभिः ॥ स
र्पायेति जुहुयादाज्यं व्याहृत्या च समग्रया ॥ आज्यशेषं स्रुवाग्रेण सर्पदेहे निषेचये
त् ॥ चमसस्थैर्जलैः सर्पं स्नाप्य ज्यामहृदयपाणिना ॥ अग्नेरक्षाणेत्यनेन यत्सर्पाया
ग्निं प्रदापयेत् ॥ उपतिष्ठेद्दह्यमानं नमोऽस्तु सर्पमंत्रतः ॥ स्नानं ततः स्नानतो वापि कृ
तः सर्पवधो मया ॥ पूर्वजन्मनि वा सर्पं न तत्सर्वं क्षंतुमर्हसि ॥ क्षीराज्येन ततस्त्वस्थीनि
प्रोक्ष्य व्याहृतिभिर्जलैः ॥ नास्थिसंचयनं कुर्यात्स्नात्वाचम्य गृहं व्रजेत् ॥ ब्रह्मचर्या

350A

दिकं कार्यं त्रिरात्राशौचमिष्यते सचैलं तु चतुर्थेऽह्नि स्नात्वा विप्रान्समर्चयेत् सर्पो
नंतस्तक्षकशेषः कपिलो नाग एव च कालिकः शंखपालश्च भद्रश्चेति. पद्मभिः
गंधपुष्पाक्षतैर्धूपदीपाद्यैरर्चयेद्द्विजान् घृतपायसभक्ष्यैश्च द्विजानष्टौ तु भोजयेत्
एवं घृतविधानेन सर्पसंस्कारकर्मणि सर्पहिंसाकृतात्पापाद्विमुच्यते सभक्ष्यैश्च द्विजान
ष्टौ तु भोजयेत्प्रमुच्यते नात्र संशय इति ॥ इति सर्पसंस्कारः ॥ क्वचित्तु जीवतोऽप्यंत्य
कर्माशौचं दानि प्रेतकर्माणि कुर्वीरन् देवशान्त्युदकं सर्वेषु उपपातकेषु इति घटस्फो
टोत्तरं ब्राह्मणांतिक प्रायश्चित्तेन मृतवच्छ्राद्धं न तत्र संग्रहविधि अतत्संसर्गेन विना विप्र
न कुंभं कुर्यादित्यर्थः उपपातकेष्वपि घटस्फोटे कृते एवं कार्यमित्यर्थः याज्ञवल्क्यः
चरितव्रत आयाते निनयेन्नवकं घटं जुगुप्सेरन्न चाप्येनं संवसेयुश्च सर्वशः कृतघटस्फो
टस्यैवायं परिग्रहविधिरिति मिताक्षरायामपरार्के च अन्यथा प्रायश्चित्तमात्रेणात
स्वसंगात् मनुरपि घटमुक्ताः निवर्तेरंस्तेन तस्मात्संभाषणसहासने मनुस्तु
प्रायश्चित्ते तु चरिते पूर्णं कुंभमपां नवं तेनैव सार्धं प्राश्येयुः स्नात्वा पुण्ये जलाशये उ
लितं कृत्वा प्राप्नुयुः अपरार्के वसिष्ठोऽपि पतितानां चरितव्रतानां प्रत्युद्धारोऽप्याप्लु
दाहयंति अग्नेर्मध्ये [illegible] गच्छेज्ज्ञोऽन्निवहसन्निव पश्चात्त्यान पतंगच्छे कांचनि
वत्तदन्निवे प्राचेर्यमात्रयित हंतारस्तत्सुसा दद्यगात्रपापाएवाते चांप्रत्यापत्तिः
स्त्रीं कृत्वा तत्र तानाद्वा कांचनं पात्रं माहेयं वाद्भिः परायित्वा यो हि स्थापामि रेन

351

मद्भिरभिषिंचेयुः सर्वे एवाभिषिंचेत्तस्य पुनरुद्धारः पुत्रजन्मना व्याख्यात इति ॥
पुनरुद्धारः परिग्रहः तत्रोद्धरतां हस्तस्त्रिवाग्रसरः स्यात् पात्रपतनं घटस्फोटं कु
र्वतां शोचन्निव यद्यस्मादुद्धेत मातापित्रादिहंतॄणां परिग्रहो न कार्य एतत्प्रसा
दे सति चीर्णव्रतानां कार्यः पुत्रहंत्रे निर्णयः पुत्रजन्मेतेत्यभिषेकोत्तरं जातकर्मादि
यः संस्काराः पुत्रः पुत्रजन्मवत्कार्य इत्यपरार्को व्याचख्यौ अनन्त एवमितिनाने [illegible]रोः
घटे पवर्जितो ज्ञातिमध्यस्थो यवसांगवा पूत्व्यास्य मंगोभिः सरस्तनस्य हि स
क्रियेत्यत्र गवामदृण्णाभावे पुनर्व्रतं चरेदित्येतन्मूलकमेतेनैव चरित्रव्रतविधौ विशे
षोपामिति वदन् घटस्फोटोत्तरपरिग्रह एवैतत्सर्वमित्याह तस्मात्कालेपि घटस्फो
टे प्रायश्चित्तं परिग्रहविधिपुनः संस्कारा भवंतीति सिद्धं तथा जीवच्छ्राद्धे कात्ते हेमा
द्रौ बौधायनः तत्राशौचं दशाहं स्यादित्यलं प्रसंगेन एवं सापवादे आशौचे उक्ते प्र
तिराक्तं [illegible] यत्य कर्मणि साधारणं किंचिदुच्यते तत्राधिकारिणः प्रागुक्ताः स
र्वाभावे धर्मपुत्रो वा कार्यः अपुत्रेण सुतः कार्यो यादृक्तादृक्प्रयत्नतः पिंडोदक
क्रियाहेतोर्नामसंकीर्तनाय चेति व्यासवचनात् गृहेपरि सिद्धेः असगोत्रसगोत्र वा
यदि स्त्री यदि वा पुमान् प्रथमेहनि यो दद्यात्स दशाहं समापयेत् ब्राह्मेपि प्रथमेहनि
यो दद्यात्प्रेताय पानीसमाहितः अन्नं न वस्त्रं चान्येषु स एव प्रददाति अपि केचित्तु तत्प्रति
दद्यादिति व्याचक्षते सगोत्रो वा सगोत्रो वा योग्निं दद्यात्स एव नरः सोपि कुर्यात्

351A

वस्त्राद्युत्कृष्टोत्तद्दशामे हन्तीति वचनाच्च तत्रैव दृष्ट्वा स्यात्तस्य मासन्नमेघोन्मीलि
तलोचनं भूमिस्थोपि तरंगुत्रोष्वहि दानं प्रदापयेत् नहि सिंहं गयाश्राद्धं दस्यमे
भूशानादपि तानियया मोक्षं देहि हृषीकेश मोक्षं देहि जनार्दन मोक्षधेनुप्रदा
नेन मत्कृतं दः प्रीयतां ममेति मोक्षधेनुमंत्रः एहि कामुक्ति किं पञ्चसप्तजन्मार्जि
तं ऋणं तत्सर्वं मृत्युमायातु गामेतां ददतो ममेति ऋणधेनोः आजन्मोपार्जि
तं पापं मनोवाक्कायकर्मभिः तत्सर्वं नाशमायातु गोप्रदानेन केशवेति पापधेनोः
भारते शुक्लपक्षे दिवा … मायां चोत्तरायणे धन्यास्तात मरिष्यन्ति हृदयस्थे ज
नार्दने हेमाद्रौ वाराहे … तापसंक्रान्तात्तथैव ग्रहणे रवेः पुण्यकालास्तदास
वैयदास्तु … स्थितः व्यासः आसत्यमस्तु नादेया गौः सवत्सा तु सर्ववत् तदभा
वेयन्नगौरेवनरको … तदायदिनराक्रोति दातुं वैतरणीं तु गां शक्त्यान्योरु
तेदात्वा … मदनरत्ने ज्ञाकर्णपः उत्क्रान्त्यादीनि दानानि दद्याद्द्या
नरः तस्यात्तु गोभूतिलहिरण्याज्यवासोधान्यगुडानि च रूप्यलवणमित्याह दशा
दिनान्यनुक्रमात् एतानि दशदानानि नराणामस्तु जन्मनोः कुर्यादभ्युदयायैव तु
प्रेतायापि हि परत्रैव … नाम्नपात्रेति लैः … पूस्य मात्रं हि जायते सहिरण्यं च यो
देयाः … सर्वपापविशुद्धात्मा लभते गतिमुत्तमां उत्क्रान्तिधेनर
त्यावा दशदानानि चेद्वहि प्रेताय … शा च धर्मेण दद्यात् तत्रैव पारिशि

द्वे म्रियमाणे स्वकर्णे तु पुंमंत्रान् जपेन्नतः क्रियानिबंधे गारुडे त्वष्टौ दानान्युक्तानि
तुलसी सन्निधौ कृत्वा शालग्रामशिलां तथा तिल लोहं हिरण्यं च कार्पासं लवणं त
था सप्तधान्यं क्षितिर्गावः एकैकं पावनं स्मृतमिति दशदानं वैतरणी धेनुः क्रांति धेनु
दानादि भट्टकृतांत्येष्टिपद्धतौ तेयं कर्तृत्वकर्माधिकारार्थं त्रीन्कृच्छ्रान् कुर्यादिति
तत्रैवोक्तं अथ गोदेवयाज्ञिकेन मुमूर्षोर्मधुपर्कदानमुक्तं वाराहे हृष्टास्तु विमलं देहं य
मार्गानुसारिणां प्रयाणकालेन नरो मंत्रेण विधिपूर्वकं मधुपर्कं त्वरन् गृह्ण
स्यन्मंत्रमुदाहरेत् ॐ गृह्णेमं मधुपर्कं माधवं संसारनाशनकरं त्वमृतेन तुल्यं ना
रायणेन रचितं भगवत्प्रयाणे दाहे च शांतिकारणं सुरलोकपूज्यं अनेनैव तु मं
त्रेण दद्याच्च मधुपर्ककं नरस्य मृत्युकालेन परलोकसुखावहं अथ शूद्रमरणे दिवो
दासीये चंडालादिस्पर्शने विप्रे चेन्नरे क्षमते पिपासाकृष्टः चौडे तु शुद्धिस्तत्र प्रकीर्तिता देव
जानीये जाबालिः स्पृष्टे च दग्धाये विप्रो न लभेत्वा स्वकां गतिं प्रायश्चित्तं प्रकुर्वन्ति
ब्राह्मणाः पापशुद्धये चान्द्रायणं पणकं च प्राजापत्यं विशोधनं गृह्य कांक्षा उदकया
सूतिका वापि यदि म्रियेत स्पृष्टे नेति हि तस्याथ विधि राद्विशेषं वा त्रयेनैव महात्मना एकः
स्मृतोक्तः मदनरत्ने स्मृत्यन्तरे जन्मोच्छिष्टाधरोच्छिष्टो भये तथैव च अस्पृश्यस्प
र्शने चैव रजश्चाधिकमरणे पि च स्नानं कृत्वा दशं स्पर्शं कृमिकीटादिवेष्वपि च एतद्दोषानु
सारेण प्रायश्चित्तं समाचरेत् कृच्छ्रं त्रिषड्पंचदशैःश्चांद्रात्रयमथापि वा शुध्येत्तदा

352A

नौसंपायपरावधर्मेणदाहयेत् गद्यकारिकायां स्वह्रस्यांमरणेचैवंजीस्त्रीकप्राम्
कल्पयेत् सपिंडायजैस्तुसंस्पृष्टेशमर्तोदेवात्कथंचन एकत्रिरा त्राकच्छ्रंस्तुशुद्धिस्त
कामतोविभिः कुणपेन्यर्धदग्धेन्तु चितास्वछंदाम्यपादिभिः ततस्यरीतेद्रवणा
तुत्रिभिः कृच्छ्रै[illegible]विभिः [illegible]ति धर्ममदीपेन्तुचंडालस्तति
कोदक्यास्व[illegible]पुत्रेनयेवच तस्यपापस्यशुध्यर्थंकृच्छ्रात्यंचदशाचरेदितु
क्तेमनुः शुस्वगर्भप्रादुर्निः सास्याच्छूद्रसंपर्केदूषिता शुद्रापितावधृतंप श्रस्म
रयस्पृशीतेचैवेन्तुक्तेः तत्रैवकर्मप्रदीपे रात्रौवारात्रिशेषेवाम्रियंतेचेद्द्विजो
त्तमः दाहंकचापयान्त्यापिंडोपिंडोनिर्वपेत्ततः रजस्वलागर्भिण्यादिमरणो
त्तवस्याम‍ः निर्णयामृतेमरनपारिजातेचयमः संध्यायांचतथारात्रौदाहः
पायेपकर्मेच नवश्राद्धंचनोकुर्यात्कृत्तेनिःफलतांव्रजेत् एतदिनमरणस्यरात्रि
निषेधार्थमायन्तु स्कांदेयदिरात्रौदहेत्तस्यसमाप्तिर्दहनस्यतु परेह्न्युदितेसूर्ये
कार्यस्योदकक्रियादग्धस्यत्तुनवैकार्याराजौजातूदकक्रियापतितन्निमित्तं रात्रि
मरतस्यत्तुनैवसंग्रहे रात्रौदग्धात्पिंडांतंकृत्वायवनवर्जितं पवनंतेध्यतेरात्रौ
स्वस्तनीवपनक्रियेति वपनंतथातः नचसर्वैःपुत्रैःकार्यं गंगायांभास्करक्षेत्रेमाता
पित्रोर्गुरोर्मृतौ आधानेसोमयागेचपवनंतुसप्तसुस्मृतमितिमिताक्षरायांस्मृतेःम
रणस्यानंतिज्वाच्चेभिक्षिकमिदंतद्देवसंग्रहवचनेनपरेद्युरुत्कघ्यतातीर्थवन

तेन कस्यचिद्दाहं गतत्वोक्तिश्चिंत्या मदनरत्ने गालवः प्रथमेह्नि कर्तव्यं वपनं चानु
भाविनां प्रेतस्य केशश्मश्र्वादि वापयित्वाथ दाहयेत् आशौचांते तु पुनः कार्यं विधिव
त्तात् मदनपारिजातेप्येवं तेन सर्वस्य निर्मूलत्वोक्तिरेव स्मृतिरत्नावल्यां शावंराज्ञ
ष्ठितं चेत्स्त्रीनखकेशांस्त्वाहरेत्ततः मदनरत्ने गिराः ऊर्ध्वोच्छिष्टाधरोच्छिष्टेंतरिक्ष
मृतेपि च कृच्छ्रत्रयं प्रकुर्वीत आशौचमरणेपि च अथ साग्नेर्विशेषः कारिकायां
कृष्णपक्षे प्रमीयेत यद्याह्नि प्रातराहुतीः शेषास्तत्र जुहुयाद्दर्शपर्यंताः पक्षहोमवत्
प्रतिपत्प्रातर्होमांतमित्यर्थः यद्याहिताग्निरपरपक्षे म्रियेत तदाहुतिभिरेनं पूर्वपक्षे हरे
पुरित्याश्वलायनोक्तेः तदानीमेव जुहुयात्सायंकालाहुतीरपि सायं म्रियेत चेत्
सायमाहुतीर्जुहुयाद्यस्य तदानीमेव जुहुयात्प्रातःकालाहुतीरपि सकृद्धोतमंत्रे
ण भिन्नतंत्रं च होमयोः दार्शीं चापि प्रकुर्वीत स्थालीपाकं न दैवतं छंदोगपरिशि
ष्टे हुतायां सायमाहुत्यां दुर्बलश्चेद्गृही भवेत् प्रातर्होमस्तदा दद्यात्प्रवीणैस्तद्देवस्या
ज्जीवेच्चेत्तस्य पुनर्नवा इदं शुक्लपक्षपरं दुर्बलो मुमूर्षुः त्रिकांडमंडनः दर्शेष्टिं च त
दा कुर्याद्यदि द्वितीयदिनं संभवेत् देवतानां प्रधानानामेकैकस्य हुतेन्यथ कृ पूर्वेण
वा कपायाजाभ्यां च तरात घृतनाहुती तथा अग्न्यावरण्योरारूढे प्रमीयेत पति यदि
प्रेतं स्पृष्ट्वा मथित्वाग्निं नत्वा चोपावरोहणं घृतं च हादशोषया तं तत्कर्मीकृत्वाश
व क्रिया विदितश्रौताग्नेर्मृतेत्रप्रेताधानं तत्रैवोक्तं प्रेतं वा स्वाम्यालये ति

353A

त्वामयितारम्यानलेरणिसंनिधाप्यारण्योर्मंथयेद्यस्येति ब्रूयात् ततः यस्याग्नयोऽनु
हृत्तो मांसकामाः संकल्पयंते यजमानं मांसं जायतइत्येहा विवेत्वादितापस्त्वगालो
मिश्रं प्रेतेन यत्वित मंत्रः पुनीयपावकं जुह्वीद्वादशोपात्रसर्पिषा तूष्णीं हुत्वा
ततः कुर्यान्नेनेमात्स्वाइतिक्रियां नष्टश्चाग्निप्रपारण्योर्नाशेस्वामीत्तियेत चेत
स्माहरेदरणीहृह मनोज्योतिर्स्सेवा ततः पुत्रपार्श्वैः यजमानेधिलान्दरेपात्राण्या
सेकृते सति: वर्षाघदि कृतेवह्नौ कथं कुर्वेतियाज्ञिकः जदर्हदग्धकाष्ठेनमप्य
नेतत्रकारयेत् नच्छेद्यालाभलोन्येन दग्धशेषेणवापुनः कृत्वास्मै लौकिकेव
मौदग्धशेषंदहेत्तुवा अत्राग्निप्रसक्तस्पर्णैःशरैः शरीरोत्पत्तिः शरीरेवासतिप्रेताधा
नेनागमुत्पत्तिः उभयाभावेतुप्रेताधानेनधिकाराद्दाहादिसंस्कारलोपः उदकाद
नमेवकार्यमितिकेशवीकारशत्रघ्नीप्रमुखाः तत्रनिषेधकः रमणानांतास्ते
श्रौवैमंत्रतः क्रियालोपगता येचेतिनिबध्यन्नदभावेपलाशानांहृतैः कार्यः पुमान्
स्पृष्टीतिभावेविधानस्य अन्यभावेऽपिसाम्याच्च तेनप्रेताग्न्यभावेपिस्त्रिषष्टकृदु
व्यांतरेणास्वदहार्यत्वात्प्रेताधानं दाहोपि भवत्येव पूर्तिकृतेरग्नीनांचाप्रेताध्मान
प्रयोजनकत्वाहुतेः यत्तस्मात्प्येवं दाहयित्वाग्निहोत्रेणाहितं येहनवतीपत्तिरिति
ह्माज्ञवल्कोक्तिः यत्तुद्वितीयांचेव योभार्यांदहेदैतानि कार्याग्निभिः जीवंत्यां प्रपच
मायश्चित्तसुरापानसमंस्मृतमिति तदाधानेसहानधिकृतात्विषयमितिविज्ञा

नेश्वरः मदनरत्ने वृद्धोऽपि आहिताग्न्योस्तु दंपत्योर्यस्त्वादौ म्रियते भुवि तस्य देहः
सपिंडैस्तु दग्धव्यस्त्रिभिरग्निभिः यस्त्वान्त्य तस्य देहस्तु दग्धव्यो लौकिकाग्निना ।
अनाहिताग्निदेहस्तु दग्धव्यो गृह्याग्निना द्विजैः त्रिकांडमंडनस्तु विकल्पमाह ॥ ज्येष्ठायां
विद्यमानायां द्वितीयायै स्वयोषिते ऽकाम्यं नित्याग्निहोत्रं वानकर्यं चित्रं पद्धति स्त्री
मात्रमविशेषेत्यादनध्यान्ये वैदिकादिभिः विवाह्यादधीत यद्वाधानमेवास्तिचेद्गृ
ह्यदिति अत्रेदं तत्त्वं साग्नेः पत्नीमृतौ द्वौ पक्षौ पुनर्विवाहे द्वितीयायां पूर्वाग्निमिंद
हेदित्येकः पक्षः भार्यायै पूर्वमारिण्यै दत्त्वाग्नीनंत्यकर्मणि पुनर्दारक्रियां कुर्या
त्पुनराधानमेव चेति मनूक्तेः दाहयित्वाग्निहोत्रेण स्त्रियं वृत्तवतीं पतिरिति या
ज्ञवल्क्योक्तेश्च पुनर्विवाहाशक्तो निर्मंथेन तां दह्याद् वैताग्निहोत्रेणाग्निहोत्रा
दिकार्यमित्यन्यः आहार्याग्निनाहिताग्निं पत्नीं चेत्याश्वलायनोक्तेः भरद्वाजो
पि निर्मंथेन पत्नीमिति एवं वाग्न्येकदेशेन दहेदिति यत्तु यास्त्वेदेव यान्ति काद्यः
पानि च तस्मादपत्नीकोऽप्यग्निहोत्रमाहरेदिति श्रुतिः विज्ञः छंदोगपरिशिष्टे च
मृतायामपि भार्यायां वैदिकाग्निं न हि त्यजेत् उपाधिनापि तत्कर्म यावज्जीव
जीवं समचरेत् उपाधिः हेमकुशपत्न्यादिः अन्ये कुशमयीं पत्नीं कृत्वा तु गृहमे
धिनः अग्निहोत्रमुपासंते यावज्जीवमनुव्रता इत्यपरार्के स्मृत्यंतरात् कात्या
यनोऽपि रामोऽपि कृत्वा सौवर्णीं सीतां पत्नीं यशस्विनीं ईजे यज्ञैर्बहुविधैः सह

354A

त्रातभिरत्नमित्यादीनि तानि पूर्वाग्निष्वाग्निहोत्रादिपराणि न त्वपत्नीक
स्याधानार्थानि कृत्वविधीनामाधानाप्रयोजनकत्वात् अपत्नीकस्याधाना
प्रवृत्तिरिति मानवरिशिष्टाच्च सोमोन भसेव अपत्नीकोप्यसोमप इति श्रुतेः यान्
भरद्वाजापस्तंबसूत्रे दारकर्मलिप्यघराक आत्मार्थमेवन्याधेयमिति अस्यार्थः
पुनर्विवाहाशक्तो यदन्याधेयं पूर्वं कृतमस्ति तदात्मार्थमेव न पत्न्यैदद्यादिति
त्रास्तरणभाष्यापरार्कसार्कसोमांडारादितत्त्वमप्येवं त्रिकांडमंडनस्तूपमप्य
माह अन्येप्यपत्नीकस्याधानमाहुस्तदसांपनविप्रः तद्यथा याज्ञवल्क्याः आहि
ताग्निर्धेयानायंदग्धव्यास्त्रिभिः अन्यहिताग्निरेके न लौकिकेनापरे जनाः कर्मत्रः
एवं वृत्तांसवर्णां स्त्री द्विजातिः पूर्वमारिणीं दाहयेदग्निहोत्रेण यज्ञपात्रैश्च
धर्मवित् धारिकायां पत्नीमपि दहेद्देवं भर्तुः पूर्वमृता यदि अनग्निको
दहेद्देवं कपालेन हविर्भुजा आश्रौतश्च प्रकारो रकन्तुः विधुरं विधवां चैव कमलस्या
ग्निनाप्नुहेत् ब्रह्मचारिणं पतिवेवदहेज्जपनाग्निना तथाग्निनाच दग्धव्यः क
न्यकाबालएवच अग्निर्वाणि कपालं तु कृत्वा तत्र विनिक्षिपेत् करीषादि ततो
वह्निर्ज्ञेयः सकपालजः अनुपनीय चापि जातारण्य अग्निकोक्षि दुक्तस्तथा
पि तस्य कलौ निषद्धत्वात् केरयमेव ज्ञेयः स्वत्वंतरे ह्रस्यो ब्रह्मचारी च विधुरो वि

धवाः स्त्रियः आश्वलायनश्रौतनयनसूत्रभाष्ये ऽग्निस्रुक्मालनः उन्नयनसूत्रे दर्भेणा
ग्निं तु पुनः ज्वाल्य पुनर्दर्भसूत्रे संपुटः पुनर्दर्भेण तत्तीयेऽग्निरेव उन्नयनः सूत्रतः प्रथमः
प्रस्थानपतिसूत्रे योगिं तृणकाष्ठहवींषि विप्रेतत्त्वेव सदा तस्य सवा धर्मेण स्त्रिय
ते देवलः चंडलाग्निरमेध्याग्निः सूतिकाग्निश्च कर्हिचित् पतिताग्निश्चिता
ग्निश्च न शिष्टग्रहणोचिताः मनुः दक्षिणेन मृतं शूद्रं पुरद्वारेण निर्हरेत् पश्चिमो
त्तरपूर्वैस्तु यथासंख्यं द्विजातयः अत्र प्रातिलोम्येन क्रमः पूर्वामुखस्तु ले
लव्यो ब्राह्मणो बांधवैर्मृतः उत्तराभिमुखो राजा वैश्यः पश्चान्मुखस्तथा द
क्षिणाभिमुखः शूद्रो निर्हर्तव्यः स्वबांधवैरित्यादिपुराणादित्यपरार्कः तेन
त्रिंशद्वा क्वचित्तोऽनुलोमक्रमो हेयः आश्वलायनः ज्येष्ठप्रथमाः कनिष्ठजघ
न्या गच्छेयुः अयाध्वनोत्तरं द्वितीयविवाहे कृते यजमानमरणे श्रौतस्मा
र्त्ताग्न्योः संसर्गः बौधायनसूत्रे अथ यद्याहिताग्निर्द्वे भार्ये विंदेत प्राक् ।
संयोगान्निर्मथ्य तेनोपासनं परिस्तीर्याज्यं विलाप्य चतुर्गृहीतं गृहीत्वा समिद्वा
न्गृह्णानोऽत्र होलिसमितिसंकल्पे घ्रपामितिमिहृदुतीमांहतीस्त्र कृत्वा पेतेन म
न्त्रेणायं ते योनिर्ऋत्विय इति समिधि समारोप्य गार्हपत्ये समिद्भ्यादधाति म
थितेनः समनसाविति गार्हपत्य आज्यं विलाप्य चतुर्गृहीतं गार्हपत्ये ज

355A

होग्नावग्निस्मरतिप्रविविच्छ इत्यपरं चतुर्गृहीत्वा वितिः स्रुगिति सगवहन्तु हो॥
त्यपग्नाहेयस्येस्रुवाहुतीर्जुहोति ब्राह्मणामुकहोतेतिदशाभिरथप्राचीनावी॥
त्यन्वाहार्यपचनेजुहोति प्रेतस्मानायेस्मानायेसजातानाऽति सोमप्रामयत
त्रैवस्रुवाहुतिंजुहोत्यग्नयेकव्यवाहनायस्विष्टकृते स्वधानमः स्वाहेत्यथय
ज्ञोपवीती द्वादशगृहीतेन स्रुवं पूरयित्वास्मिन्नाहवनीये जुहोत्यथस्रुवाहुती
र्जुहोत्यग्नये विविचये स्वाहाग्नये व्रतपतये पवमानायाग्नये पावकायाग्नये स्वा
हाग्नये पथिकृते स्वाहाग्नये पथिकृते स्वाहागनपतेनमतेग्नये वैश्वानरायेत्यथेव
तद्ध्हैतत्ततो नि मनोज्योतिरित्यत ऊर्ध्वं पैत्रकं कर्म प्रतिपद्यते अहिताग्नेर्विदे
शमृतस्य पथिकृती श्रिमरेताग्निहोत्रं तदाह पात्रयोजनं च कल्पसूत्रादिभ्योऽप
त्यिनामहकृतमयहत्तेऽग्नेयामितिवहुवेक्त व्येष्णु परम्पते आग्नेयितं मदनरत्ने धं
दोगपरिशिष्टे च दुर्वेलं स्नापयित्वात्मकृत्तेलामिसंवृतं दक्षिणाशिरसं न्यसेमो वर्हि॥
षा त्वं निविशायेत क्षिराण्य शाकल्यान्यस्य शिष्टाप्राधिकेषु सप्तस्मृ मुखं ब्रयापि धा
येनं निर्हरेयुस्सुतादयः आममपात्रेण्न मादाय प्रेममग्निपुरस्सरं शाकोनुगच्छेत्तस्या॥
र्धमर्धमप्सु तस्य जेकृवि ऊर्ध्वसादहनेकार्यमासीनो दक्षिणामुखः सव्यं जान्वा
च्य शातकैः सतिलं पिंडदानवत्स्वपुत्रादि शाकुपोहारु चयं महतु तत्रो ज्ञाते
निपात्यैमं दक्षिणेन शिरसं मुखे आज्यपूर्णां स्रुवं दद्यात् दक्षिणकान सिस्रुवं

पादयोरधरांशाश्चैव मरणीमुरसीतरौ पार्श्वयोः स्रुचं वामे सोमं च दक्षिणयोः क्रमा
त् स्वसमेतस्य शेलुवमंनस्य वीरुलूखलं चात्रोवोलीक्रमत्रैव अनंगं रथ्यया वि
धिः अपसव्येन कृत्वैन हाण्यतः पितृदिग्मुखः अथाग्निं सव्यमाहृकोद्घाट्दक्षि
णतः शनैः अस्मात्वमधिजातोसि त्वदयं जायतां पुनः असौ स्वर्गाय लोकाय स्वा
हेति परिकीर्तयन् तथा एवमेवाहिताग्नेरपात्रन्यासादिकं भवेत् कण्मार्जि
तादिकं चात्र विशेषोध्वर्युचोदितः नत्रैव अनंपैवाहूतानां नारी दग्धमवस्थिता
अग्निप्रदानमंत्रोस्य न प्रयोज्य इति स्थितिः ददंश्चदेवगानानामेवापात्रन्यासो ज्ञे
स्नानदेहव्यं सामिन्परं निरग्निकः [illegible] ब्रुमान घोमुखः स्त्रीणां नादात्या सगो
त्रजैः [illegible] हीत्वा तु चितामारोप्योत्ते यावः अधोमुखो दक्षिणादिक्चरणस्तु पु
मानिति उत्तानदेहा नारी तु सपिंडैरपि बंधुभिरित्यादिपुराणादि [illegible] त्वेस्त
रलतादयः उत्तरपिरं त्वं साममेतरपरं वा [illegible] दाने मंत्रः कृत्वा तु दुःकृ
तं कर्म जानता वाप्यजानता मृत्युकालवशं प्राप्य नरं पंचत्वमागतं धर्मसमायु
क्तं लोभमोहसमावृतं दहेयं सर्वगात्राणि दिव्यान् लोकान् स गच्छतु ज्वलमानं
महावह्निं शिरःस्थाने प्रदापयेत् चतुर्वर्णेषु संस्थानमेवं भवति पुत्रिके अग्निहो
त्रिनिबंधे मार्कंडेय षट् पिंडदानमुक्तं मृतस्योत्क्रांतिसमये षट् पिंडान् शक्तितो द
देत् मृतस्थाने तथा द्वारे चत्वरे [illegible] कारणात् विश्रामे काष्ठचयने।

तेषां संचयने च षट् आदौ देयास्तु षट् पिंडा दशाहिकाः स्थाने वार्द्धयथोक्तेति चिता
यां शवहस्तके श्मशानवासिभ्यस्तेभ्यः षष्ठं संचयने तथा ततः त्वं भूतनाथ जगद्यो
नेत्वं लोकपरिपालकः उक्तः संसारकस्तस्मादेनं स्वर्गं प्रापय इत्यग्निं दत्वा अस्मा
त्वमिति मंत्रेणोर्ध्वं उदेत्याज्याहुतिस्तु का आहिताग्नेः पराशरः एकस्यां शिक्ये विनिक्षि
प्य अरणीं मुष्कयोरपि जुहूं वा दक्षिणे हस्ते वामे स्रुपमर्त्ते न्यसेत् एवेन लूखलं दषा
न्पृष्ठे च कपालं न्यसेदुरसि क्षिप्य दृषदं तंडुलाज्यतिलान्मुखे श्रोत्रे च प्रोक्षणीं दद्यात् आ
ज्य स्थालीं वक्षस्थ्योः कर्णे नेत्रे मुखे च घ्राणे हिरण्यशकलं न्यसेत् अग्निहोत्रोपकर
णं मध्ये तत्र अभिक्षिपेत् प्रचेताः स्नानं प्रेतस्य पुत्राद्यैर्गंधैः पूजनं ततः नग्नदेहं द
हेन्नैव किंचिद्देयं परित्यजेत् यमः प्रेतदेहं शुभैर्गंधैः स्नापितं स्रग्विभूषितं आश्व
लायनसूत्रे संस्थिते प्रेतालंकारान्कुर्वन्ति केशश्मश्रुलोमनखवापि वापयंति
नलदेनानुलिंपंति नलदमालां प्रतिमुंचंतीति माधवीये ब्राह्मे दरिद्रोपि न दग्धव्यो
नग्नः कस्यांचिदापदि तथाग्निः शेषवस्त्रेण दग्धव्यः शेषं किंचित्त्यजेन्नरः दारुका
लाग्निनाशेन्त मदनरत्ने यज्ञपार्श्वः यजमाने मृते कापि चितादौ वा प्रवेशिते वा
र्यो घर्मिहने मनोकर्थं प्रेत विकल्पना शिवं दग्धाप्रदग्धेषु निमित्ये वनुकारये
प्रयपर्णशरादि दाहिनाग्निनारोपयेत् देहलोभे मदनरत्ने ब्राह्मे अपर्णेन रे

दग्धं कीकसानि तानि निर्मथ्य तं दहेत् यद्यर्धदग्धकाष्ठं तु तदीयं वै न लभ्येत तदा तद
स्थिखंडं तु निक्षेप्तव्यं महाजले इति दंपत्योरेकदा मृतौ विशेषमाह आपस्तंबः तयो
र्वपुषि सहैव पितृमेधो द्वयवचनलिंगान्मंत्रान्संराधयंति पितृमेधो दाहनकर्म दाह
नमेकतंत्रत्वमिति बौधायनोक्तेः अस्थिसंचयनमप्येकं उदकपिंडदानादि पृथगेव
सहगमनेप्येवं तदाह मदनरत्ने भीष्मार्य संग्रहकारः एककालमृतौ भर्त्रा च यदि चे
द्दंपती तत्रैकदहनं कुर्यात्पिंडश्राद्धं पृथक् पृथक् २ एककालमृतौ जायापती यदि तदा
पितुः विभज्याग्निं क्रियां कुर्यादिति यत्तु दंसांप्रजं दाहनमेकतंत्रत्वमिति याज्ञिक
संमतं मृतं पतिमनुव्रज्य या नारी ज्वलनं गता अस्थिसंचयनांतोस्याभर्तुः संस्का
रएव हि कीकसानां तु संस्कारान्याय सिद्धोपि नो मतः एककालमृतेप्येवं कीकसा
नां विधिः स्मृतः नवश्राद्धं सपिंडांतं भिन्नं कालमृतौ यथा कपर्दिकारिकायि मृते भ
र्तरि तदाहात्प्राक्पत्नी म्रियते यदि पत्न्यां वा प्राक् प्रमीतायां दाहादर्वाक् पतिर्मृतः त
त्रैतं त्रेणदाहः स्यान्मंत्रे द्वित्वमूह्यते कीकसानां तु संस्कारा पृथगेव नयोर्भवेत् ए
कदा मृतयोर्युगपन्नवश्राद्धादिकं तयोः मृतं पतिमनुव्रज्य पत्नी चेदनलं गता तत्रापि दा
हस्तंत्रेण पृथगस्थिक्रिया भवेत् अस्थिसंचयनपर्यंते विकल्पः सहगमने सर्वत्र या
केचमाह प्रचेताः एकचितां समारूढौ म्रियते दंपती यदि तंत्रेण श्रपणं कुर्यात्पृथ
क्पिंडं समाचरेत् अथोदकदानं विशिष्टः शरीरमग्नेना संयोज्यो नवेश्य मालोण अ

योऽभ्यवर्षतीति सव्येतराभ्यां पाणिभ्यामुदकक्रियां कुर्वीत्ययुग्मं आपस्तंबः मातुश्च
योनिसंबंधेभ्यः पितुश्चासप्तमात्पुरुषात् यावतां वा संबंधो ज्ञायते तेषां प्रेतेषूद
कक्रियेति याज्ञवल्क्यः सप्तमाद्दशमाद्वापि ज्ञातयोऽभ्युपयंत्यपः अपनः शोशुच
दघमनेन पितृदिङ्मुखाः सकृत्प्रसिंचेदुदकं नामगोत्रेण वाग्यताः सप्तमाद्दश
माद्वापि वसा दानदंतमिति विज्ञानेश्वरः कात्यायनः सप्तमाद्दशमाद्वा पुरुषादि
त्यर्थः सप्तमापुरुषाद्दशमाद्वा समानग्रामवासे यावत्संबंधमनुस्मरेयुरिति
पारस्करोक्तेः मंत्रः स्नानांगमेवेति हेमाद्रिः प्रचेताः प्रेतस्य बांधवा यथा हमुद
कमवतीर्य नोद्वर्तयेयुरुदकांते प्राग्निवेशुरयसमयज्ञोपवीतेन वा ससोदाक्षिणामु
खा ब्राह्मणस्योदङ्मुखाश्च राजन्यवैश्ययोः स एव नदीकूले ततो गत्वेतुत्वास
चेलस्नानं ततः स्नात्वाऽशुचिः प्रयतमानसे पाषाणं ततः आदाय विप्रे दद्याद्दशांजलीन्
द्वादश क्षत्रिये दद्यात् वैश्ये पंचदश स्मृताः त्रिंशच्छूद्राय दातव्याः ततः संप्रविशेद्गृहं त
तः स्नानं पुनः कार्यं गृहशौचं च कारयेत् प्रेतस्नाने विशेषः स्मृतितत्वे आदिपुराणे
आदौ वस्त्रं च प्रक्षाल्य तेनैवाभ्यादिनैः स्नातः कर्तव्यं सचैलं तु स्नानं सर्वमलापहं स्ववेष
रहितं वस्त्रं प्रक्षाल्य पुनः परिधाय स्नानादित्यर्थः अयनरति वा महत्स्नानामिकया
जनालोऽनः अवतरणेऽमपुरः सरत्वोक्तेः यद्यार्चलं पुरस्कृत्येति बोधायनीयं ज
न्याद्दृश्यानपरमिति हारलतादयः आश्वलायनः सव्याहतो व्रजंत्यनीक्षमाणा

यत्रोदकमवहद्भवति तत्राप्यसकृदसमुदकेनैकाञ्जलिमुत्सृज्य तस्य गोत्रं नाम गृही
त्वेति प्रचेतसाञ्चह प्रंजलित्रयमप्युक्तं त्रिः प्रसेकं कुर्युः प्रेतस्यैवेति तथा
दिनेदिनेञ्जलीन्दस्तोत्सुदद्यात्प्रेतकारणात् तावद्वृद्धिश्च कर्तव्या यावत्पिंडः
समाप्यते एकाहवृद्धिस्त्रिकस्य वृद्धिरित्यर्थः मदनरत्ने भारद्वाजगृह्ये त्वहिकस्य वृद्धि
रप्युक्ता आशौचांते प्रदद्यात्तु प्रेतपुत्रास्तिलांजलीन् प्रथमेह्नि सकृद्दद्यात् पिंड
पतनाहतादिवा त्रीन्प्रदद्याद् द्वितीयेह्नि तृतीये पंच एव च चतुर्थे सप्त संख्यास्तु
पंचमे नव चोत्सृजेत् षष्ठेह्नि चैकादशकाः सप्तमे तु त्रयोदशाः अष्टमे पंचदश
का नवमे दशसप्त च एकोनविंशतिश्चाग्रे शतांजलिमतः स्मृतं केचिद्दशांजली
न्प्रोचुः केचिदाहुः शतांजलीन् पंचाशतं च केचित्स्वशाखोक्तव्यवस्थया छंदोगप
रिशिष्टे: अयनवेक्ष मेत्यायः सर्वैश्चैव शाखास्थः गोत्रनामपदांते तु तर्पया
मीत्यनंतरं दक्षिणाग्रान्कुशान्कृत्वा सतिलं तु पृथक् पृथक् विष्णुपुराणे १
सपिंडीकरणं यावदृजुदर्भैः पितृक्रिया सपिंडीकरणादूर्ध्वं द्विगुणैर्विधिवद्भवेत् १
रामायणे इदं पुरुषशार्दूल विमलं दिव्यमक्षयं पितृलोकेषु पानीयं मदत्तमुप
तिष्ठतं दानवाक्ये विकल्पः याज्ञवल्क्यः कामोदकं सखिप्रत्तास्वस्रीयश्वशु
रर्त्विजां कामदुघा प्रेतत्वप्रीत्ययं देयमन्यया नेत्यर्थः शंखपारस्करौ आचा
र्यैश्चैव मातामहयोश्च स्त्रीणां वाग्दत्तानां कुर्वीरंस्त्वा मातुलैश्चैमिति द्विवचना

स्तानामप्यात्कृपि शंखलिखितौ उदकक्रियाकामं श्वश्रुरमातुलयोः शिष्यसहाध्या
यिनराजन्निचेति ब्रह्मम्नुः स्त्रीबाधानोदकं कुर्युः स्तेनाव्रात्याविधर्मिणः गर्भभ
र्तृद्रुहश्चैव सुराप्यश्चैव योषितः याज्ञवल्क्यः न ब्रह्मचारिणः कुर्युरुदकं पतिता
स्तथा व्रशीतो स्त्रीपापाचारादपि भ्रष्टाः पतितापेच दूषिताः न कुर्युरुदकं तेवै तेभ्योप्य
न्नेन चैवाह मदनरत्नहारीतः पतनामपविद्धानीवरतीवकामतः प्रन्नानांचैव क
लह न्यानां निवर्त्तोसलिलक्रिया अपरार्के शंखलिखितौ अपपात्रितस्य रिक्तपिंडो
दकानि व्यावर्तते अपपात्रितः कृतघटस्फोटः तस्यापि संग्रहावधौकृते आशौचोद
कादि कुर्यादेवेत्याशौचप्रकाराः अथाशौचे नियमाः याज्ञवल्क्यः इतिसंश्रुत्य गच्छे
युगृहं बालपुरःसराः विदश्यं निंबपत्राणि नियता द्वारि वेश्मनः आचम्याग्न्यादि स
लिलं गोमयं गौरसर्षपान् प्रविशेयुः समालभ्य कृत्वाश्मनि पदं शनैः प्रवेशनादिकं
कर्मप्रेतसंस्पर्शिनामपि क्रीतलब्धाशनाभूमौस्वपेयुस्तेपृथक्क्षितौ इदं चाद्येह्नि वारि
ष्ठः अघप्रस्तरे अहःसु मनश्नंत आसीरन् क्रीतोत्पन्नेन वा वर्त्तेरन् शुद्धितत्त्वे वैजवापः प्रा
मीमालभंते शमीपापं शमयत्विति अश्मानमश्मेव स्थिरो भूयासमिति अग्निमग्नि
नः शर्म यच्छत्विति ज्योतिष्टं तरागामजमुपस्पृशंतः क्रीत्वा लब्ध्वा वान्यगेहादेकाम
मलवणमेकरात्रं दिवा भुंजीरन् त्रिरात्रं च कर्मोपरमणं क्रीताद्यशनमुपवासाशक्त
स्य आश्वलायनस्मृतौ नैतस्यां रात्र्यामन्नं पचेरन् त्रिरात्रमक्षारलवणाशिनः स्युर्द्वा
दशरात्रं वेत्याह अशक्तौ रत्नाकरे आपस्तंबः भार्यापरमगुरुसंस्थायां चाकालभोज

नि॰सि॰
३५९

नातिकुर्वीरन् यदा मृतिः परदिने तावत्कालमित्यर्थः बृहस्पतिः अधःशय्याशना
दीना मलिना भोगवर्जिताः अक्षारलवणान्नाः स्युः सर्वे क्षीणाशनास्तथा भोगोऽभ्यं
गताम्बूलादिः क्षाराः परिभाषायामुक्ताः यत्तु मार्कंडेयपुराणे तैलाभ्यंगो बांधवा
नामंगसंवाहनं च यत् तेन चाप्याय्यते जंतुर्यश्चाश्नाति स्वबांधवाः प्रथमेऽह्नि तृतीये च
सप्तमे नवमे तथा वस्त्रत्यागं बहिः स्नानं कृत्वा दद्यात्तिलोदकमिति तदस्थिचयनपरं
आशौचांते तिलकल्कैः स्नानाद्गृहं प्रविशेदुरिति विष्णूक्तेः विष्णुपुराणे त्वस्थिसंच
योर्ध्वं भोगोऽप्युक्तः शय्यासनोपभोगस्तु सपिंडानामपीष्यते अस्थिसंचयनादूर्ध्वं सं
योगस्तु न योषितां भारते तिलान्ददत पानीयं दीपं ददत चाग्रज ज्ञातिभिः सह भोक्त
व्यमेतत्प्रेतेषु दुर्लभं मनुः आतताशनं च नाश्नीयुः शयीरंश्च पृथक् क्षितौ देवजानीय
कारिकायां लवणक्षीरमाषान्नासवमांसानि यावदासं वर्जयेदहजान्नेषु बालहर
दानैर्विना उपवासो गुरोः प्रेतपत्न्याः पुत्रस्य वा भवेत् मरीचिः प्रथमेऽह्नि तृतीये च
सप्तमे दशमे तथा ज्ञातिभिः सह भोक्तव्यमेतत्प्रेतेषु दुर्लभं भोजनं च दिवैव दिवा चैव
न भोक्तव्यमसंमंसं मनुजर्षभेति विष्णुपुराणात् क्रीत्वा वालभ्यादि वान्नमश्नीयुरि
ति पारस्कारोक्तेश्च मदनरत्ने हारीतः पात्रेषु मृन्मयेषु पर्णपुटकेषु वाश्नीरन् देव
जानीये प्राप्ते आशौचमध्ये पत्निं न भोजयेत् स्वगोत्रजान् प्रत्यदिनं तु मदनरत्ने प्र
त्ने यस्य यस्य वर्णस्य यद्यत्स्यात्पश्चिमं त्वहः स तत्र गृहशुद्धिं च वस्त्रशुद्धिं करोत्यपि
प्रत्यकर्मकालीन वस्त्रयोस्तु तत्रैवोक्तं ग्रामाद्बहिस्ततो गत्वा प्रेतस्पृष्टे तु वाससी

राम
३५९

ण्डेत्यानामाश्रितानांच त्यक्त्वा स्नानं करोत्यथेति शंखः दानं प्रतिग्रहो होमः स्वाध्या
यः पितृकर्म प्रेतपिंडक्रियावर्जमाशौचे विनिवर्तते काठकगृह्ये यत्र प्रमीयते तत्र
मं स्तत्रात्र्यहं महावलिं कुर्यादिति पारस्करः तदानीमेव वस्त्रं मंडलं दीपं कांस्य
भाजनं प्रेताय दद्यात् आशौचप्रकाशे भरद्वाजः वासोन्नं च जलं भ प्रदीपं कांस्य
भाजनं नग्नप्रच्छादनेष्वाद्ये ब्राह्मणाय निवेदयेत् भृगुः तिलोदकं तथा पिंडा
नग्नप्रच्छादनादिकं रात्रौ न कुर्यात्संध्यायां यदि कुर्यान्निरर्थकं अप्रेतपिंडाः य
द्यपि दशमाद्ये पारस्करेण ब्राह्मणो दश पिंडास्तु क्षत्रिये द्वादश स्मृताः वैश्ये पंचदश
प्रोक्ताः शूद्रे त्रिंशत्प्रकीर्तिता इत्युक्तं तथापि प्रेतेभ्यः सर्ववर्णेभ्यः पिंडदानं दद्या
द्दशैव त्विति तत्रैवोक्तेः सर्ववर्णेषु दशैव ज्ञेयाः मदनरत्ने प्येवं तथा च हेमाद्रौ ब्राह्म
पारस्करयोः जात्युक्ताशौचं तु स्यात्तु वर्णानां क्वचिदेव हि देशधर्मान्तरस्तु त्यप्रेत
पिंडान्वयेत्यत्रोक्त्वा विप्रादिषु दशमपिंडे कर्म उक्तः देयस्तु दशमः पिंडो राज्ञां वै द्वा
दशेऽहनि वैश्यानां वै पंचदशे देयस्तु दशमस्तथा शूद्रस्य दशमः पिंडो मासे पूर्णे प्र
दीयते इति पृथ्वीचन्द्रोदये सद्यः शौचे त्र्यहाशौचे च तत्रैवोक्तं सद्यः शौचे प्रदातव्याः सर्वे
पि युगपत्तथा त्र्यहाशौचे प्रदातव्याः प्रथमे प्येक एव हि द्वितीये ह्नि चत्वारस्तृती
ये पंच चैव हि अहः प्रकारांतरं प्राग्उक्तं शातातपः आशौचस्य च ह्रासे पिंडान्दद्यात्
दशैव तु तत्रैकपात्रे सकृत्त्यक्त्वा दशपिंडान्दद्यात् उत्तरीयशिलापत्रकर्तेष्वपि

पर्येषे० प० वेदत्रांजलीन्दद्यात्सर्वपिंडांस्तथैव चेति गृह्यकारिकापाठपर्या ।
जविपर्यये दोषोक्तेः शिलाविपर्यये घटस्फोटादेर्नोवृत्तिः अस्तान्भ्यंजनादिप
दकर्मणः शाकहायनीनयनवदप्रयोजकत्वात् नहच्चात्र लौकिकग्रहणं के
चित्तु नावान्यादायभांडानि आतकं च नयेतिप्रचेतिसोक्तेः पात्राने कृत्वा मातृः
क्रियाकर्तृनाशेऽन्येन शेषः समापनीयः एवं क्रियाप्रहृत्यनं यदि काश्चिद्विप्र
घेन तद्धं पुनाक्रियाकार्यास वैर्वा सहकारिभिरिति प्रसिद्धितचि त्रस्य तिस्मृतेः
पत्न्या कर्त्तव्ये रजोदर्शने चतदंते कुर्यात् शावाद्धिगुणमार्तेव मित्युक्तेः आशे
चांते आर्त्तवे कर्त्तुरस्यास्वेवा अन्येन क्रियासर्वावर्त्तनीया कर्तृविपर्ययात्का
लांतिक्रमयोगाच्च वाराहे स्वकृलेपेन भागं तु दद्यात्सर्वाह्नएवतु कृत्वैव पिंडस्
कृत्वं नामगोत्रेण सुंदरि मरीचिः प्रेतपिंडाविहिर्दद्यादर्भमंत्रविवर्जितं प्रागुदी
च्यां चरुं कृत्वा स्नातः प्रयतमानसः दर्भवर्जं नमंत्रुपनीत परः आसंस्कृतानां भूमौ
पिंडं दद्यात्संस्कृतानां कुशेष्विति प्रचेतसोक्तेः मिताक्षरायां स्मृत्यंतरे भूमौ मास्य
पिंडं पानीयमुपलेवा दद्युः अभः पुष्पः फलमूलैः प्रपयसाशाकेन च गुडेनवाति
लमिश्रं तु दर्भेषु पिंडं दक्षिणतो हरेत् तद्धं प्रसेकं पुष्पं च धूपंदीपं तथैव च पा
लिनाशक्तिभिर्वापिशाकैर्वाप्युपनिर्वपेत् प्रथमेऽहनि यद्दत्तं तद्देवस्याद्दशाहि
के मदनरत्ने मात्स्ये तैजसं मृन्मयं वा पपात्रं संशोध्य यत्नतः लौकिकाग्नावधि

360A

त्रिस्थपचेद्भन्नं घृतयप्लुतं स्नात्वा यतिलसंमिश्रं प्रदद्याद्दर्भसंस्तरे शुद्धितत्त्वे देवजा
नीयेच त्र्याहे प्रथमेह्नि तोयं दद्यात्सुतपात्रे समाहिता अन्नं नवसु चान्येषु सएव प्रक्षा
स्थपि मृन्मयं भांडमादाय नवं स्नातः सुसंयतः तंडुलप्रसृतिं तत्र त्रिः प्रक्षाल्य पचेत्स्व
यं सपवित्रैस्तिलैर्मिश्रं क्रमिकेणाविवर्जितं द्वारे पात्रे ततः क्षिप्रा शुद्धावागोरसप्तति
कां भूय एव संस्तरे दर्भान् याम्याग्रानदेशांसमस्तान् ततो वनेजनं दद्यात्संस्मरन्
गोत्रनामानी तिलसर्पिर्मधुक्षीरैः संसिक्तं तमसे वहिः दद्यात्प्रेताय पिंडं तु दक्षिणा
भिमुखः स्थितः अर्घ्यपुष्पैस्तथा धूपैर्दीपैस्तोयैश्च शीतलैः ऊर्णातन्तुमयैः शुद्धैः वा
सोभिः पिंडमर्चयेत् दिवसे दिवसे देयः पिंड एवं क्रमेण तु सद्यः शौचे प्रदातव्याः स
र्वे पिंडास्तथा अहःशौचे पिदातव्यास्त्रयः पिंडाः समाहितैः द्वितीये चतुर्थे दद्याद
स्थिसंचयनं तथा त्रीन्स्तदद्यात्तृतीये द्विवस्त्रादिक्षालयेत्ततः दशाहे पिंडदातव्यः
प्रथमे चैकएव हि एकस्तोयांजलिस्त्वेवं पात्रमेकं च दीयते द्वितीये द्वौ तृतीये त्री
नि साधुत्का एवं स्युः पंचपंचाशत्तोयस्यांजलयः क्रमात् तोयपात्राणि तावंति सं
युक्तानि तिलादिभिरिति पात्रं कुंभः अत्राह पदमहोरात्रपरं तेन रात्रावपि देयम् इ
ति गौडाः दिवसपदान्नोनेति मैथिलाः स एव तु क्तैः सपिंडेन दशपिंडप्रदानं तु पुत्रा
णमेपि सन्नद्यात् असगोत्रः सगोत्रो वेति प्रागुक्तैः दाहकर्त्रैव दशाहे कृत्यादि ति
मिताक्षरायां शुद्धितत्त्वे वायवीये पि असगोत्रः सगोत्रो वा यदि स्त्री यदि वा पुमान्

361

यस्मान्निदानात्प्रेतस्य पिंडं दद्यात्स एव हीति तत्रैव पूरकेण तु पिंडेन देहो निष्पद्यते (
यतः कृतस्य करणाद्योगात्पुनर्नावर्तयेत्क्रियां शुद्धिप्रकारो वा यद्वीयेपि निरवर्तय
ति यो मोहात्क्रियामन्यनिवर्तितां विधिघ्नात्तेन भवति पितृहा चोपजायते तस्मात्
प्रेतक्रियां येन केनापि च कृता यदि ततो निर्वर्तयेत्पुत्रः सतां धर्ममनुस्मरन्निति (
आदिपुराणे पितृशब्दं स्वधां चैव न प्रयुंजीत कर्हिचित् अनुशाकं तथा चाहृ प्रयाते
न विवर्जयेत् उपतिष्ठतामयं पिंडः प्रेताय प्रेतसन्निधौ रेत् क्रियानिबंधे व्यासः प्रेताय (
पिंडं दत्वा तु ततोऽश्मीयादिना त्वये भविष्ये ओदनामिश्रसक्तूनां शाकमूलफलादि कृ
पृथमे हनि यद्दद्यान्न दद्यादुत्तरेहनि उत्कद्वारे श्मशाने वा तीर्थे देवगृहे पि वा यत्राद्यो दी
यते पिंडस्तत्र सर्वं समापयेत् ब्राह्मे शिरस्त्वाद्येन पिंडेन प्रेतस्य क्रियते सदा द्विती (
येन तु कर्णाक्षिनासिकाश्च समासतः गलांसभुजवक्षांसि तृतीयेन यथाक्रमं चतु
र्थेन तु पिंडेन नाभिलिंगगुदानि च जानुजंघे तथा पादौ पंचमेन तु सर्वदा सर्वमर्मा
णि षष्ठेन सप्तमेन तु नाडयः दंतलोमान्यष्टमेन वीर्यं तु नवमेन च दशमेन तु
पूर्णत्वं तृप्तिता क्षुद्विपर्ययः इति याज्ञवल्क्येन तु पिंडयज्ञावृता देयं प्रेतायान्नं दि (
नत्रयमित्युक्तं अत्र फलतारतम्यं ज्ञेयमिति विज्ञानेश्वरः तेन सहाशौचपरत्वं देव
याज्ञिकोक्तं चिंत्यं आशौचस्य च ह्रासे तु पिंडान्प्राह देशीव विति वचनाच्च दिनत्रया (
वश्यकत्वाच्चेति हारलतादयः शातातपः जलमेकाहमाकाशे स्थाप्यं क्षीरं
च मृन्मये पारस्करे मृन्मये तां रात्रिं क्षीरोदके विहायसि निदध्युः प्रेतात्रस्नाहि

361A

त्युदकं पिंडं चेदमिति क्षीरं दंशात्रावे वेति गौडाः गारुडे तु अपक्वेनान्ने पात्रे
दुग्धं दद्यादिनत्रयमित्युक्तं हेमाद्रौ पद्मे तु दशाहमुक्तं तस्मात्त्रिधेयमाकाशेद
शरात्रं पयोजलं सर्वतापोपशान्त्यर्थं मध्यमत्र मविनाशानं देवज्ञानापेका रि
कायां तत्र प्रेताय कृतये दशरात्रमखंडितं कुर्यात्प्रदीपं तैलेन वारिपात्रं च मा
र्तिकं भोज्यान्नोजनकालेत्र भक्तमुष्टिं च निवेदयेत् नामगोत्रेण संबुध्याधरिज्या
पितृपन्नवत् शातातपः भूलोकात्प्रेतलोकं तु गंतुं श्राद्धं समाचरेत् तस्याप्येवं हि
भवति मृतस्य मनुजन्त अथ दशाहमध्ये दर्शपाते निर्णयः भविष्ये पूर्वतन्त्राशौ
चं तत्र तत्र यदि दर्शोपपद्यते समाप्य चोदकं पिंडान्स्नानमात्रं समाचरेत् अथ
मंत्रगः आशौचमध्ये तु दर्शो यदि स्यात्सर्ववर्णिनां समाप्य प्रेततंत्रस्य कुर्यादित्याह
गौतमः पैठीनसिः आद्यावेव प्रकर्तव्या प्रेतपिंडोदकक्रिया द्वितीयं दर्शेनकुर्वाणः(
पुनः पावं समस्नुते मातापित्रोः तु लोक गौतमः अंतर्दशाहदर्शेत्र तन्त्रसर्वं समाप
येत् पित्रोः तु यावदाशौचं दद्यात्पिंडाञ्जलांजलीन् इदमपि अहमध्ये दर्शपाते तदूर्ध्व
दर्शे तु पित्रोरपि तंत्रं समाप्यमेवा पित्रोराशौचमध्ये यदि दर्शः समापतेत् तावदे
वोत्तरं तंत्रं पर्यवस्येन्महालयशतमिति गालवोक्तेः अन्येषां तु अहमध्येपि समाप्ति
रिति पराशरमाधवीये निर्णयामृते चोक्तं कालादर्शेपि दर्शो दशाहमध्ये स्या
दूर्ध्वं तंत्रं समापयेत् त्रिंशाडनरं पित्रोर्मृतावपि विनिश्चयः मदनपारिजाते तु

गाः ॥ लवीयमापदनौरस्त्वादिविषयं अहोत्रयमपि पित्रोर्नेतं तत्र समाप्तिरित्युक्तं ॥
मदनरत्नेप्येवं समन्तदेशाचारात्मव्यवस्थेति प्रतिभाति अथास्थिसंचयः तत्राश्वलाय
नेन कृष्णपक्षे एकादशी त्रयोदशी दर्शेषु आषाढीफाल्गुनीप्रोष्ठपदाभिन्नर्क्षेषु उक्तं त
दाशौचमध्ये संभवेत् नवृद्ध्यं च प्रागब्दात्करणे तेयं आशौचमध्ये तु मदनरत्ने संविनि
वर्त्तः प्रथमेह्नि तृतीये वा सप्तमे नवमे तथा अस्थिसंचयनं कार्यं दिने तद्गोत्रजैः सह
छंदोगपरिशिष्टे तु अपरेद्युस्तृतीये वा अस्थिसंचयनं भवेदिति द्वितीयेह्न्युक्तं वि
ष्णुकात्यायनौ संचयनं चतुर्थ्यामिति माधवीये यमः भौमार्कमंदवारेषु तिथियुग्मे
ति वर्जयेत् वर्ज्ये येदेकपाद्दर्क्षे द्विपादर्क्षे संचयं प्रदात् जन्मनक्षत्रे त्रिपादर्क्षे विशेषतः
ब्राह्मे चतुर्थे ब्राह्मणानां तु पंचमेह्नि भूभृतां नवमे वैश्यजातीनां शूद्राणां दशमा
त्परं दशमेह्नीपाठः शौनकः पालाशे त्वस्थिदाहे च सद्यः संचयनं भवेत् काम्य
मरणे तु तस्य त्रिरात्रमाशौचं द्वितीये त्वस्थिसंचय इत्युक्तं अंगिराः प्रेतीभूतं
तं यो द्विजस्य सद्यः शुचिर्न करोति चेत् देवतानां तु यजनं तेशायं न्यस्य देवताः तद्वि
धिः स्वस्वसूत्रे भट्टकृतौ च तेयः हेमाद्रौ नागरखंडे अस्थीनां संचयनस्यार्थे
तानि वै प्रणसाप्रतं यत्र स्थाने भवेन्नर अस्तत्र श्राद्धं प्रकल्पयेत् एकोद्दिष्टं त
तो मार्गे विश्रामो यत्र कारितः ततः संचयनस्यार्थे तृतीयं श्राद्धमिष्यते अपरा
र्के मदनरत्ने च ब्राह्मे सद्यः शौचे तथैकाहे सद्यः संचयनं भवेत् त्र्यहाशौचे द्विती

362 A

यदि कर्तव्यस्त्वस्थिसंचयः तत्रैव श्मशाने देवतागं चतुर्थे दिवसे चरेत् मृन्मये
पूर्वभांडे श्वकुंभे वस्त्रवके वा त्वपक्वे भक्ष्यभोज्यैः प्रपायसैः पानकैस्तथा मूलैः
फलैर्वनोत्थैः पूज्याः क्रव्याददेवताः धूपो दीपस्तथा माल्यं गंधो दयं त्वरान्वितैः
तत्र पात्राणि पूर्णानि श्मशानाग्रे समंततः निवेदयद्द्विजः क्रव्यं तैः सर्वैस्तु ह्
तैः नमः क्रव्यादमुखेभ्यो देवेभ्य इति सर्वयेत् श्मशाने देवास्तु भगवंतः सनातनाः
तेऽस्मात्सकाशाद्गृह्णंतु बलिमस्मांगामक्षयं प्रेतस्यास्य शुभान् लोकान् प्रयच्छंतु च।
रक्षां तान् अस्माकमायुरारोग्यं सुखं च ददतु चाचिरं एवं कृत्वा बलिं सर्वान् क्षी
रेणाभ्युक्षयेत्ततः एवं दत्वा बलिं चैव दद्यात्पिंडत्रयं बुधः एकं श्मशानवासिभ्यः
प्रेताय चैव मध्यमं तृतीयं तु सखिभिश्च दक्षिणासंस्थमादरात् ततो यज्ञियवृक्षोत्
त्थां शाखामादाय वाग्यतः प्रेतस्यास्थीनि गृह्णाति प्रधानांगोद्भवानि च पलाशसोव
त्ससः पालेपाः पार्श्वाभ्यां चैव पादतः पंचगव्येन संस्नाप्य क्षौमवस्त्रेण वेष्टयेच्च शि
ष्यम त्रायेभांडे नवे साच्छादने शुभे अरण्ये वृक्षमूले वा ... संस्थापयेत्ततो ग
हीत्वास्थीनि तदुत्तरेणीत्वा तोये विनिक्षिपेत् ततः संमार्जनं भूमेः कर्तव्यं गोमयाद्
बुधिः पूजा च पुष्पधूपाद्यैर्बलिभिः सर्वं च क्रमात् इति अथ तीर्थेऽस्थिक्षेपविधिः।
तत्रैव तस्यास्थीनां छन्नकैर्नीत्वा कदाचित् गंगादिवीजले कश्चित् क्षिपति सत्पुत्रो
दौहित्रो वा सहोदरः मातृःकुलं पितृकुलं विनाये च वैनाये च नराधमाः अस्थी
न्यन्यकुलस्य समानीत्वा चांद्रायणं चरेत् तत्रैव ब्रह्मांडपुराणे अस्थीनि मा

तावित्सर्वं जानंतं नयंति गंगामयि ये कथंचित् स बांधवस्यापि दद्याभिन्न ।
तास्तेषां तु तीर्थानि फलप्रदानि स्नात्वा ततः पंचगव्येनासिक्ता हिरण्यम ।
ध्वाज्यतिलैश्च योज्यं ततस्तु मत्पिंडपुटे निधाय पश्यन् दिशं प्रेतगणोपगूढां
नमोस्तु धर्माय वदेत्प्रविश्य जलेस मे प्रीत इति क्षिपेच्च उत्थाय भास्वंतमवेक्ष्य
सम्यक् सदक्षिणां विप्रमुखाय दद्यात् एवं कृते प्रेतपुरस्थितस्य स्वर्गे गतिः स्यात्तु
महेंद्रतुल्या यमः गंगातोये तु यस्यास्थि क्षिप्यते शुभकर्मणः ततस्य पुनरावृ
त्तिर्ब्रह्मलोकात्सनातनात् तथा अर्कस्तंगते गुरौ शुक्रे तथा मासे मलिम्लुचे ।
गंगायामस्थिनिक्षेपं न कुर्यादिति गौतमः दशाहांतर्नरश्रेष्ठः दशाहाभ्यंतरे यस्य गं
गातोयेस्थि मज्जति गंगायां मरणं यादृक् तादृक् फलमवाप्नुयात् इति मदनरत्ने
वृद्धमनुः शौनकः शौनकोऽहं प्रवक्ष्यामि अस्थिक्षेपविधिः क्रमात् आदौ गंगामा
दृष्टि गत्वा स्नानं कुर्यात्सचैलकं प्रोक्षयेत्पंचगव्येन भुवं मंत्रैर्विचक्षणः गायत्र्याद्यैः
पंचगव्यैर्निखातास्थिभूमिं प्रोक्षेदितीर्यः उपसर्गादिभिर्मंत्रैः प्रार्थयेत् खननं त
था भरति कोद्धरवास्थ्नां ग्रहणं च यथाक्रमं स्नात्वास्थिशुद्धिं कुर्वीत [illegible]
द्भिः सत्कृतः स्वश्वास स्पृष्ट्वा पुनः स्नात्वा पंचगव्येन शुद्ध्यति दशस्नानानि कुर्वीत ।
तत्तन्मंत्रैर्विचक्षणः गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकं भस्म मृन्मधु
वारीणि मंत्रतः स्नानानि वै दशः कुशैः संमार्जयेदस्थीन्यापो देवीति मंत्रतः ए

तोन्विंदं कुर्वीतेति ततमर्हिः इतीतिच पावमानीः समाप्तेन च रुद्रसूक्तं यथाक्र
ममिति एतैः कुशैर्मार्जनं हेमस्नाद्ध ततः कुर्यात पितृनुद्दिश्य यत्नतः पिंडदा
नं प्रकुर्वीत ततस्तु तिलतर्पणं अस्थिक्षेपांगं चेदं अंजनं केवलादर्भामो केशा
ग्राणमेवच भूर्यपत्रं ताडपत्रं सप्तधा वेष्टनं स्मृतं हेमं च मौक्तिकं रूप्यं प्रवालं
नीलकं तथा निक्षिपेदस्थिमध्ये तु शुद्धिर्भवति नान्यथा ततो होमं प्रकुर्वीत ति
लाज्येन विचक्षणः उदीरतेति सूक्तेन हुते दद्यात्ततः शतं ततो गत्वा क्षिपेत्तीर्थे स्वशी
दोषोन विद्यते मस्तं पृष्ठे पावमनं कुर्वन्नास्थीनि धारयेत् अगदशादानवैतरणी
दानमोक्षकृत्वा पुण्य पायेनु तानमुक्तं दिवोदासीये काशीखंडे धनंजयो विधिमत्वा मा
तृभक्तिपरायणः आदाय मातुरस्थीनि यद्यो मातुर्गंगामार्गस्थितो भवेत् पंचगव्येन संस्ना
प्य तन्या पंचामृतेन वै यक्षकर्दमलेपेन लिःस्वा पुष्पैः प्रपूज्य च आवेष्ट्य नेत्रवसनेन
ततः पट्टांवरेण च ततः सुरसवस्त्रेण ततो मांजिष्ठवाससा नेपालकंबलेनाथ मृदा चा
थ विशुद्धया ताम्रसंपुटके कृत्वा मातरं गान्नयो वहन् त आसः पट्टवस्त्रं चे कौशेयं मं
जिष्ठं श्वेतवस्त्रकं कंबलं शाणपट्टं च अजिनं च ततोत्तरं एषां विकल्पः अन्यत्रा
त्र विशेषः अस्थि स्थलीमेतौ दिवोदासीये च त्रेधः संचयनोत्तरं श्राद्धं मेला स्थलापनः
श्राद्धं मस्यैदहुरीति स्मृत्यर्थसारे संचयने कृते मनुष्यलोकं गच्छतः पाथेय
श्राद्धमानेन कार्यमिति अनुपनीतस्य तु संचयनं अयनवश्राद्धं पश्चीवेद्रो
दये अंगिराः प्रथमेह्नि तृतीये च पंचमे सप्तमे तथा नवमैकादशे चैव तत्र नवश्राद्ध

मूलेतु शिवस्वामी नवश्राद्धानि पंचाहुराश्वलायनशाखिनः आपस्तंबाः ष
डित्याहुर्विभाषा त्वितरेषु हि पंचत्र्येकादशाहिकं विना मरणाद्विषमेषु दिनेष्वे
कं नवश्राद्धं वर्षादानवमाद्यदिनवमं विद्धि येत्तेकादशेनेकुर्यादिति मदनर
त्ने बोधायनोक्तेः भविष्ये नचसप्तविंशांशात्तानवश्राद्धमनुक्रमात् आद्यंत
योर्वर्णीयोक्तं षडित्याहुर्महर्षयः हेमाद्रौतुविशेषः आश्वलायननवश्राद्धं प्रे
तत्वान्नैव मुच्यते आर्वाक् द्वादशाहस्मलप्वानरति दुःकृतं अतःषडेवः एतान्ये
वविषमश्राद्धानीत्युच्यंते नागरखंडेतु पंचमे सप्तमे तद्वदष्टमे नवमे तथा ।
दशमैकादशेचैव नवश्राद्धानि तानि चेत्युक्तं कात्यायनस्तु चतुर्थे पंचमे चैव न
वमैकादशे तथा यदत्र दीयते जंतोस्तन्नवश्राद्धमुच्यते प्रथमे सप्तमे चैवेत्याद्यपा
दे व्यासपाठः बह्वृचानां तु नवश्राद्धं दशाहांतानि नवमिश्रं तु षडूनानीत्युक्तं नाराय
णभट्टीयदीपिकायां ग्रथतनुपादाद्येचतुर्थे दिने श्राद्धं पंच सप्त माष्टनवादि तु द्वे द्व
युग्मद्विजैः प्रथमे द्वितृतीये द्वि पंच सप्त च च स्यात्ये द्वौ द्वौ पिंडोप्रदानं योशे सेकं
तु विन्यसेत् एको विषमश्राद्धे वपवपिंडश्चैक इति तात्पर्यार्थः अत्र शाखाभेद
तु व्यवस्था अपरार्के भविष्ये नवश्राद्धं त्रिपक्षं च षण्मासे मासिकानि च न क
रोति सुतो यस्तु तस्याधः पितरो गताः वाराहे गतोसि दिव्यलोकं त्वं कृतांत वि
हितान्पथः मनसा वायुभूतेन विप्रे त्वाहं नियोजये पूजयिष्यामि भोगैस्त्वामे
वं विप्रं निमंत्रयेत् आवाहने पितृनैव इस्लोकं परित्यज्य गतोसि परमां गतिं

364A

मातृसावाप्युभृतेन विप्रेत्वाहं नियोजये इति न त्रैवपरिशिष्टे अनुदकमर्घ्यं
वर्गं धमा[illegible]स्य विवर्जितं नवश्राद्धममंत्रं च पिंडो पृथक विवर्जितं उदकम
र्घ्यः पिंडो दंभ्रधं तो पितरस्त्ववनेजनादिति एकोद्दिष्टेषु सर्वेषु न स्वधानामभि
रम्यतां स्वस्त्यस्तु विसर्जेदेवं सक्तरणं च वर्जितं एकोद्दिष्टे स्वपिंडेनु अनु
शब्देन विधीयते पितृशब्दं न कुर्वीत पितृत्वं चोपजायते सपिंडता प्राप्तिरिति हे
न माद्रिः तेषु स्वधां प्रयुंजीत प्रेतश्राद्धे दशाह्निके इति ऋष्यशृंगोक्तेः दशाह्निकोर
क्तेः एकादशाहे स्वधाप्रयोग एवेति हारलतापरास्तारत्नावल्यां आशौचे हि गु
णाद भोजयाशीस्वस्तिवाचनो पितृशब्दः स्वसंबंधः शर्मशब्दस्तथैव च पात्रालं
भो वगाहनमनलस्य कोल्केरवनादिकं तृप्तिप्रश्नश्च विकिरः शेषप्रश्नस्तथैव च ।
प्रदक्षिणं विसर्गश्च सीमांतगमनं तथा अष्टादश पदार्थांश्च प्रेतश्राद्धे विवर्ज
येत् अत्र स्वधा पितृनमः शब्दानां तिलोसीति मंत्रो प्रेतशब्देन ऊह्यं चाति ला व
पनं तत्सीमर्घ्यदानं अमुष्मै स्वाहेति प्रेतनाम्नायाग्नि होमः नाममेकः पिंडः पिंडः
मंत्रे ऊहः अनुमंत्रणादित्वमंत्रकं अभिरम्यतामिति विसर्जनं एवं नवश्राद्धव
र्जैकोद्दिष्टेषु नवश्राद्धे त्वमंत्रकं सर्वमिति नारायणवृत्तिः क्रियानिबंधे उक्ता
नं स्थापयेत्साद्य मेकोद्दिष्टे सदा बुधः जुह्वेनु पार्वणे लोकयो रूप्योपरि कुशान्न्य
सेत् नवश्राद्धं गृहे कार्यं भार्यायात्नयो पिता सपिंडीकरणं तानि प्रेतश्राद्धानि

वै तानिस्युर्लौकिकेवह्नावित्याहत्वाश्वलायनः इदंसंभवेन्नेनकार्यंनवश्राद्धे
पुत्रादिविषयंगृहस्थपरं षुवितेचयत दंपत्योर्भर्त्रा कार्येवंचनतदंजीतकर्हिचित् दित्यं पु
तीरोवचनलिंगात् द्वाभ्यांतदातदक्षाभ्यांशुद्धिःस्यात्तु विवेकिनामिति ब्राह्म
उक्तेः विधेनिर्णयामृतेकएव नवश्राद्धंमासिकंचयद्यदंतरितंभवेत् तत्तदुत्तर
साते श्राद्धेनदेयंपुच्चसत्ते हेमाद्रौगालवः शावेतुस्तनकंवेश्मन्निशायांचमृतौ
यथा नवश्राद्धानिदेयानियथाकालंयथाक्रमं निशायामाशौचांते चाहदहौस्रुना
रोहणेतुनवश्राद्धानिसपिंडीकरणंपृथक् एकएववृषोत्सर्गोगोरेका तत्रदीयते श्रा
शौचांतदिने कार्यं मुत्रं ब्राह्मेयस्यपस्यस्वर्णस्यमयतः पात्वश्रिमंत्वहः सतत्रव
स्त्र शुद्धिंकरोत्यपि समाप्यदशमंपिंडं पूतशाकेनवाससी [illegible]त्यानामाशितानांचतय
क्त्वास्नानंकरोतिच श्मश्रुलोमनखानांच पत्नासंपन्नज्ञात्यपि गौरसर्षपकल्के
नसंयुतेशिरःस्नानंततः कृत्वातोयेनाचम्यवाग्यतः वृषभंगांसुवर्णंच स्पृष्ट्वा
शुभवेन्नरः क्रियानिबंधेगरुडकारिकायां अत्रपिंडत्रयंदद्यात्सर्वेभ्यस्तथादिम
प्रेतायमध्यमंततृतीयंवयमाघवे तथा कर्नातृप्रार्थिताः संतोज्ञातिसंबंधि
बांधवाः दद्युरभ्यगतः पर्वतीर्थगीन धर्मोदकांजलीन् दर्वविन्नामगोत्राभ्यांनि
यमोनेहकश्चित मदनरत्नेविष्णुहारीतौ आशौचांतेकृत्वा श्मश्रुकर्मपुनः
तिलकल्कैः सर्षपकल्केर्वास्नाताः शुक्लवाससागृहं प्रविशेयुस्तत्रशांतिकं

कृत्वा ब्राह्मणपूजनं कुर्युरिति देवलः दशमेहनि संप्राप्ते स्नानं ग्रामाद्बहिर्भवेत् त
त्र त्यजेयुर्वासांसि केशश्मश्रुनखानि च अपरार्के बृहस्पतिः नवमे वाससां त्या
गो नखरोमांतकर्तनमिति तत्रैव व्यासः आशौचं यदि न स्यात् सौरं जनन्याश्च गुरोर्मृतौ ए
तत्रैतास्य वपनमित्याहापस्तंबः अनुभाविनि च परिवपनमिति अनुभाविनः
कनिष्ठा इति विज्ञानेश्वर रत्नाकरादयः आशौचमनुभवतां पुंसां सर्वाशौचे मु
ण्डनं आतत्यानरपतिर्द्विजन्मनां दारकर्मणि मत्स्यन्तकेषु च बंधमोक्षमखदीक्षासु
द्वेपि सौरमिष्टमखिलेषु वा द्रुहइति रत्नमालोक्तेर्जननाशौचेपीति शुद्धितत्वाद
यः अत्रदेशाचारतो व्यवस्था परिशिखावर्जं केशश्मश्रुलोमनखानि वापयी
त शिखावर्जमिति गोभिलोक्तेः यच्चापस्तंबः नैमावप्तावैपुरन्यत्र विहारादि
त्येके वित्तशेषादियागाः तेन विना समावर्तनाद्गृहस्थानवपेयुरित्यर्थः पक्षहस्या
छिन्नतियः केशांसमाकुर्वीत सपातितानामितिवत् केशश्मश्रुधारयतामरण्यान्तुवि
तिसंततिरिति दानधर्मार्थकाम्यपरं अनुभाविनः पुत्रादय एवेत्येके पुत्रः पत्नी च
वपनं कुर्याद्दंते यथा पिंडदानो वितोन्योपि कुर्यादिस्यं समाहितस्त्वपरार्के व्यासो
तेः यत्नमिताक्षरायां द्वितीयेहनि कर्तव्यं क्षुरकर्मप्रयत्नतः तृतीये पंचमे वा
पि दशमे वापि दानतः इति आप्रदानतः इति चतुर्थादीनि ततः प्रथमदिने संभवे
त्रेयं अलब्ध केशायः पूर्वं सोगकेशान् प्रवापयेत् द्वितीये द्वितृतीये पंचमे

सप्तमेथवा यावत् श्राद्धं प्रदीयते तावदित्यपरमाप्तमिति माधवीये मदनरत्ने च ब
बौधायनोक्तेः मदनपारिजाते तु समामेप्रथमे च समुच्चय उक्तः यत्तु दशमं पिंडं मु
त्सृज्य रात्रिशेषे शुचिर्भवेदिति तदेकादशाहश्राद्धांगविप्रनिमंत्रणार्थं ज्ञेयं अ
पि एकादशाहः मनुः विप्रः शुध्यत्यपः स्पृष्ट्वा क्षत्रियो वाहनायुधं वैश्यः प्रतोदं रश्मी
न्वा यष्टिं शूद्रः कृतक्रियः शुद्धितत्त्वे देवलः आद्यघातः सूतिहितेषु सुस्नातः स्नात
मंगलैः आशौचाद्विप्रमुच्यंते ब्राह्मणान् स्वस्ति वाच्य च याज्ञवल्क्यः आद्यमे
कादशेहनि क्षत्रियादेरशौचे प्येकादशेह्नि श्राद्धे कार्ये श्राद्धं श्राद्धसमशुद्धोपि
कुर्यादेकादशेहनि कर्तुस्तात्कालिकी शुद्धिरशुद्धः पुनरेव सः इति हेमाद्रौ शंखो
क्तेः पैठीनसिः एकादशेह्नि यच्छ्राद्धं तत्सामान्यमुदाहृतं चतुर्णामपि वर्णानां सूत
कं तु पृथक् पृथक् यत्तु मरीचिः आशौचांतेन ततः सम्यक् पिंडदानेन समाप्यते ततः
श्राद्धं प्रदातव्यं सर्ववर्णेष्वयं विधिरिति तत् सर्ववर्णानां दशाहाशौचपरं यत्तु विष्णुः
स्वाशौचापगमे इति पञ्चगौडग्रंथे हारीतः श्वोभूते एकोद्दिष्टं कुर्यात् यच्च वैज
वापः ऊर्ध्वं दशाभ्यामपरे ब्रुवते तद्धि प्रविषयं एतेन दशमपिंडोत्कर्षपक्षे वयव
पिंडासमाप्तौ कथमेकादशाहे श्राद्धमिति निरस्तैर्वोक्तिः परास्ता वचनादाशौच म
ध्य इव तत्राप्यविरोधात् भविष्ये एकादशाहे भ्यो विप्रेभ्यो दद्यादेकादशेहनि
भोजनं तत्र चैकस्मै ब्राह्मणाय महात्मने यत्तु मात्स्ये एकादशेहनि तथा विप्रा
नेकादशैव तु क्षत्रादिः सूतकांतेन भोजयेद्युग्मान् द्विजानिति तद्युग्मगण श्रा

366A

द्धपरमिति मदनपारिजाते: गौडास्तु स्मात्वचनात् क्षत्रियादीनामाशौचांतेष्वेव
न्याहुः यत्तु रामायणे समतीते दशाहे तु कृतशौचो यथाविधि चक्रे द्वादशिकं श्रा
द्धं त्रयोदशिकमेव च द्वादशिकं द्वादशाहे तु निवर्त्यं त्रयोदशाहश्राद्धं त्रियोदशिकं
चतुर्दशाहे विधेयं सपिंडनपर्यंतमादि क्षत्रियाणां द्वादशाहाशौचे त्रियोदशेमहे
कोद्दिष्टं चतुर्दशे सपिंडनं विविधवाक्यादेकादशाहाशौचांतपक्षे विकल्पइत्ये
के सद्यःशौचादौ पुत्रहननादेरेकादशाहः अन्ये त्वाशौचांतदिनेत्वयं कौर्मे ए
कादशेह्नि कुर्वीतप्रेतमुद्दिश्य भावतः द्वादशे वाह्नि कर्तव्यमनिंद्येप्यथवाह्नि निंद्येप्र
ताक्रियाकालेतूक्तं एकादशे तु तन्निषेधस्तूक्तं प्राक् बृहस्पतिः वस्त्रालंकारश
य्यादि पितुर्यद्वाहनादिकं गंधमाल्यैः समभ्यर्च्य श्राद्धभोक्तुस्तदर्पयेत् श्रोत्रियायो
जनीयास्तत नवसप्तत्रयोदशाः तानयो बांधवानिस्वात्तत्या वातिथयो परे देवयाज्ञि
कनिबंधे: एकादशाहे विप्रेषु प्रेतमावाह्य भोजयेत् तत्राप्यायश्चशय्यादि दद्यात्पात्रपि
तिसत्तरेत विशेषः एकवत्तमंत्रान् हैते कोद्दिष्टवत्कुर्वत्वचनांतानेकनेकवचनां
तान् चेदित्यर्थः एतद्वर्षांते त्व स्यविघ्ने गौणकालमाह हेमाद्रौ बौधायनः ए
कोद्दिष्टं [illegible] वस्याद्वादशेह्नि वा पुनः मृतऊर्ध्वं मपु नस्तु कुर्वीताहः सुगति
तः अर्धमासेप्यवामासि ऋतौ संवत्सरेपि चेति तत्रैव लघुहारीतः एकोद्दिष्ट
तु कुर्वीतपाकेनैव सदा स्वयं अभावे पाकपात्राणां तद्दहः सम्यगोबाणे गोभिलः

लभेत परमां गतिं वृषोत्सर्गः पुनात्येव दशातीतान् दशापरानिति देवीपुराणे भवि
ष्यादौ पञ्चत्सु त्रेषु अयं ह्यादशाहे प्युक्तो भविष्ये चैत्र्यां वा यदि वा तीयायां वैशा
ख्यां द्वादशाहेपि चेति विष्णुधर्मे तु मृताहे प्युक्तः विस्त्ववषितस्यैव मृताहे वा बां
धवस्य चेति अयं गृहेन कार्यः तथा गृहे न्योत्सर्गं वर्जितं कामं पुष्करं फलमि
ति कालकापुराणात् कामधेनौ वत्सराभ्यन्तरे पित्रोर्वर्षे वृषोत्सर्गकर्मणि
वृद्धिश्राद्धं न कुर्वीत तदन्यत्र समारभेत् तल्लक्षणं तु ब्राह्मे लोहितो यस्तु
वर्णेन मुखे पुच्छे च पाण्डुरः श्वेतः खुरविषाणाभ्यां स नीलो वृष उच्यते श्वेतवर्ण
स्य मुखादीनि श्यामानि यस्य वा श्वेतस्येनि यस्य सोपि नील उक्तो मात्स्यादौ
देवीपुराणे च नरस्त्रीवत्सिकामद्वाहे वा संभवोपि वा यत्र पठंति वृषोत्सर्ज
न वेलायां वृषाभावे कपंचनाम पिष्टेनापि दर्भैर्वा वृषं कृत्वा विमोचयेत्
न शक्यते वृषोत्सर्गो होमं वा तत्र कारयेदिति तन्निर्मूलं तद्विधिर्हेमाद्रौ भ
द्रतोत्रेय अत्र देवयाज्ञिकेन वृषोत्सर्गात्सर्वं पुरुषसूक्तेन विष्णुस्तु पि
प्रेतोद्देशे विष्णुतर्पणमुक्तं तत्र मूलं चिंत्यं पारस्करः सव्येन पाणिना पुच्छं स
मासव्य वृषस्य दक्षिणेनाप आदाय सतिलाः सकुशाः स्नातः प्रेतगोत्रं समुच्चा
र्य अमुकस्मै इति प्रवदेत् वृष एवमथ पादतः संतारयतु सर्वदा सहेम सलिलं
वृषाय विमुच्य विनिक्षिपेत् तथा विधारयेन्नं न कश्चित्त्र च कश्चन वाहयेत् न

368A

दोहयेस्वर्णाधेनुं नवकुम्भं न वेधयेत् स्त्रीशूद्रविशेषः संग्रहे पतिपुत्रवती नारी
भर्तुरग्रे मृता यदि वृषोत्सर्गं न कुर्वीत स्यात्सापि अपयशस्विनी पतिपुत्रयोः सा
हित्यं विवक्षितं अन्वारोहणेपि गोदानमेवेत्युक्तं प्राक् आशौचान्तरेपि वृषोत्सर्गाद्य
मासिकश्राद्धादि दद्यादेवेत्युक्तं किं निर्बंधे स्मृत्यन्तरे सूतके मृतके चैव विहितौ पं
स्तकं यदि पिंडदानं प्रकुर्वीत वृषोत्सर्गं तथैव च नहस्यान्मृतकं कर्म द्वादशैकाद
शाहिकं ब्रह्मीवाच दिवोमुखः कुर्यादेवाविचारयन्निति अत्र पददानमुक्तं वेवस्ता
नीये गारुडे मार्कंडेयः दशाहं प्रक्रम्य तदह्नि दीयते सर्वं द्वादशाहे विशेषतः पदानि सर्वव
स्तूनि वरिष्ठानि त्रयोदश यो ददाति मृतस्येह जीवतो वात्महेतवे स दुर्वीभूत्वा महा
मार्गे विनतेयस्तगच्छति तथा आसनोपानहौ छत्रं मुद्रिका च कमंडलुः भाजनं
भोजनाधारो वस्त्रा एष्टविधं पदं तथा भाजनासनदानेन मुद्रिका भाजनेन च
आज्यपत्रोपवीतेन पदं संपूर्णतां व्रजेत् महिषी दस्य गोदानात्सुखी भवति नि
श्रितं सर्वोपस्करयुक्तानि पदान्यत्र त्रयोदश यो ददाति मृतस्येह जीवन्न्वात्म ये
हेतवे समाजनिवरस्थानं महाकष्टविवर्जितं त्रयोदशपदानीत्यप्रेताकांक्षोऽह
नि दानमानिपयापशांति नेनासैशोभितानेभवोत् अमंचेतादकं चेवोपानहौ च
कमंडलुः छत्रं वस्त्रं तथा यष्टिः लोहदंडं तथैव च अग्निष्टिकां च दीपं च तिला
न् तांबूलमेव च चंदनं चोपदानं चोपदानानि च न्यं दशशो भैरयं गजं वापि व्रा

नि.सिं.
३६९

369

स्मरोऽप्रतियादयेत् स्वशक्त्यानुसारेण तेन सुखमवाप्नुयादिति ॥ अत्र मूलं च वि
स्यं भूषणाच्छादितं हेमाद्रौ भविष्ये तस्मा घण्टां समासाद्य सारदारुमयीं दृढां
दंतपत्रावितां रम्यां हेमपट्टैरलंकृतां हंसतूलीप्रतिच्छन्नां शुभगंडोपधानिकां
प्रच्छादनपटीयुक्तां गंधधूपाधिवासितां तस्यां संस्थापयेद्धैमं हरिं लक्ष्म्या स
मन्वितं अत्र हरिस्थाने प्रेतं उद्दिश्य केचन तत्र तं कलशं परिकल्पयेत् तांबूलं कुं
कुमक्षोदकर्पूरागरुचंदनं दीपिकोपानहच्छत्रचामरासनभाजनं पार्श्वेषु स्था
पयेद्भक्त्या सप्तधान्यानि चैव हि शयनस्थस्य भवति यदन्यदुपकारकं भृंगारक
रकाद्यं तु पंचवर्णं वितानकं मंत्र सन्म यानकं कुच्छसपदं तं मूल्यं सागरयानपा रा
ह्या सम्प्राप्य मूल्यात्तत् तथा जन्मनि जन्मनि यस्मादशून्यं शयनं केशवस्य शिवस्य
च अर्धं तदेव दत्त्वैवं तस्य सकलं प्रणीतं विसर्जयेत् एकादशाहे पितृणां विधिरेष प्र
कीर्तितः विशेषं चात्र राजेंद्र कथ्यमानं निशामय तेनोपभुक्तं यत्किंचिद्वस्त्रवा
हनभाजनं यद्यदिष्टं च तस्यासीत् तत्सर्वं परिकल्पयेत् तमेव पुरुषं हैमं तस्यां संस्थाप
येत्तदा पूजयित्वा प्रदातव्या मृतशय्या यथोदिता पाद्मे मृते काले द्वितीये द्विरशय्याद
धानं तत्र लक्षणं कांचनं पुरुषं तद्वत् फलवस्त्रसमन्वितं संपूज्य द्विजदांपत्यं नानाभरणभूषि
तं उपवेश्य तु शय्यायां मधुपर्कं ततो वदेत् रजतस्य तु पात्रेण दधिदुग्धसमन्वितं
अस्थि ललाटिकां गरुडस्य सत्कृत्वा शय्यायां भोजयेद्द्विजदांपत्यं विधिरेव सना

राम
३६९

ततः शय्याप्रदानविधिर्दृष्टः पार्वतीयैर्द्विजोत्तमैः एतत्प्रतिगृहे तत्रैवोक्तं गृहीता
यां तु तस्यां वै पुनः संस्कारमर्हति शय्यादानफलं भविष्ये स्वर्गे पुरंदरपुरे सूर्य
पुत्रालये तथा सुखं वसेत्य सोजंतुः शय्यादानप्रभावतः आभूतसंप्लवं
यावत्तिष्ठत्यातंकविवर्जितः इति अथोदकुंभः हेमाद्रौ स्मृतिसमुच्चये एका
कादशाहप्रभृति घटो सतोपान्नसंयुतः दिने दिने प्रदातव्यो यावत्संवत्सरो भवे
त्। लौगाक्षिः यस्य संवत्सरादर्वाक् सपिंडीकरणं भवेत् मासिकं चोदकुंभं
च देयं तस्यापि वत्सरं उत्तरार्द्धे तस्याप्यन्नं सोदकुंभं दद्यात्संवत्सरं द्विज इति या
ज्ञवल्क्यपाठः सपिंडनामकर्षं अस्यापकर्षप्राप्तेर्बाधकमिति शूलपाणिः तत्र
निर्विकाराभावेन नतदं तस्याप्यविषयत्वात्। मास्य यावदकं च योदद्यादुदकुंभवि
मत्सरः प्रेतायान्नसमायुक्तं सोश्वमेधफलं लभेत् केचित्तु षोडशाहमार
भ्याकृतसन्निमूलं अन्नदेवयाज्ञिकैः सपिंडनापकर्षे सांवत्सरं यावदुदकुंभमर्वा
गेवदद्यात्प्राद्धे प्रेतलोकंगतस्यान्नं सोदकुंभं प्रयच्छेत् इति गोविंदराजप्रच्छन्नवि
श्वरकः अन्नं चैव सचरान्नपात्रसंरक्ष्यां कृत्वादिकावधि दातव्यं ब्राह्मणेभ्यः केदे
पिटदेति कृपेन वा अपि श्राद्धशतैर्दत्तैरुदकुंभविनानरः दरिद्रः दुःखितो भ्रा
न् मतिच भवार्णवे तेनापूर्वद्रव्यदानरूपे तस्याप्युदकुंभकमिति गोभिलभा
ष्यसंकदाच सपिंडनात्प्रागेव तस्य विधानं धेति निषेधादित्याहु तत्र उदकुंभपा

देशेविधानानुपपत्तिरेवं व्याख्यायां मानाभावमिताक्षरादिविरोधाच्च वचनं
यदि समूलं तदा तद्भाव्यपकर्षं विधत्ते प्रेतश्राद्धानि सर्वाणि सपिंडीकरणं तथेति
हेमाद्रौ शंखआपस्तंबोक्तेः तस्याप्यन्नं सोदकुंभमधर्मिकं कुर्यात्प्रत्याब्दिकं श्राद्ध
तं कल्पविधिनान्वहं अधर्मिकं ब्रह्मचर्यादिनियमहीनं एतन्मासिकवदेको
द्दिष्टं पार्वणं वा कार्यं अपरार्केप्युक्तं सपिंडीकरणे वृत्ते प्रत्यब्दं कानोपपद्यते पक्षत्वेकु
हकृते पक्षान्तरतः कार्या सपिंडतेति लघुहारीतोक्तावपि तस्याप्यन्नं सोदकुंभं दद्या
त्संवत्सरं द्विजे इति याज्ञवल्कीये तस्येत्येकवचनोक्तेः सपिंडनोत्तरमप्येकोद्दिष्टमेवे
त्याहु अत्र पिंडदानं कृत्वा न तु ते अहरहरन्नमस्मै ब्राह्मणायोदकुंभं च दद्यात्पिंडं
मप्येके इति हारीतोक्तेरिति हेमाद्रौ पारस्करोक्तेः अन्नपानीयपिंडमात्रमिति पितृत्वव्यामो
हः तत्र अपिशब्दबाधापत्तेः हारीतः मृते पितरि वै पुत्रः पिंडमब्दं समाचरेत् अन्नं कुं
भं च विप्राय प्रेतनिर्देशधर्मतः प्रेतशब्दोच्चारणेनेति हलायुधः यद्वा प्रेतस्यानिर्देशो
यत्र तदेकोद्दिष्टं तद्धर्ममित्यर्थः अत्राशौचान्तदिनाद्यब्दांतं यावत्संवत्सरापत्तेः शौ
चेनाधिकारिविशेषणं तेन मृततिथिमारभ्यैतत्कार्यमिति केचित् तत्र हेमाद्रि
प्रवचोविरोधात् मध्ये आशौचादिनाबाधेन लोप एव दर्शवत् तथा यथा वृद्धौ
वत्दानमुक्तं देवजानीये गारुडे प्रत्यहं दीपको देयो मार्गे तु विषमे नरैः यावत्संवत्सरं
वापि प्रेतस्य सुखवलिप्सया प्राङ्मुखैर्वा दक्षदीपं देवागारे द्विजालये कुर्याद्याम्यमुखं च

370A

पित्र्ये श्राद्धैः संकल्पस्तु स्थितं अथ मासिकानि तानि च कृत्वैव सपिंडनं कार्यं तथा च
गोभिलो मासिः श्राद्धानि षोडशानदत्वा नैव कुर्यात्सपिंडनं श्राद्धानि षोडशापाद्य
विदधीत सपिंडनं तानि त्वाह जातूकर्ण्यः द्वादशप्रतिमास्यानि आद्यषाण्मासिके
तथा त्रैपक्षिकाब्दिके चेति श्राद्धान्येतानि षोडश आद्यषाण्मासिकाब्दिकशब्दाः
ऊनमासिकोनषष्ठोनाब्दिकपराः हेमाद्रौ तु सपिंडीकरणं चैव इत्येतच्छ्राद्धषोडशा
मित्युत्तरार्धपाठः तदा आद्यमूनमासिकं द्वादशाहे षाण्मासिके ऊनषष्ठोनाब्दिके
त्वर्थः कात्यायनस्त्वन्यथाह द्वादशप्रतिमास्यानि आद्यषाण्मासिके तथा सपिंडी
करणं चैव इत्येतच्छ्राद्धषोडशं एकाहेन तु षाण्मासा यदा स्युरपि वा त्रिभिः न्यूनाः
संवत्सरश्चैव स्यातां षाण्मासिके तदा द्विवचनादूनषष्ठोनाब्दिके त्वर्थमाह पृथ्वी
चंद्रः व्यासस्त्वन्यथाह द्वादशाहे त्रिपक्षे च षाण्मासे मासिकाब्दिके श्राद्धानि षोड
शैतानि संस्मृतानि मनीषिभिः द्वादशाहपदमूनमासिकपरं तस्य द्वादशाहेप्युक्ते
रिति कालादर्शः मातरत्वेवाले त्वन्यथोक्तं नवानं तमके देहेनां श्राद्धषोडश सर्वदा
चतुर्थे पंचमे चैव नवमैकादशे तथा ततो द्वादशभिर्मासैः श्राद्धा दश संख्ययेति चतु
र्थादीनि दिनानि भविष्ये त्वन्यथोक्तं अस्थिसंचयनं श्राद्धं त्रिपक्षे मासिकानि तु ।
रिक्तयोरूनमासातिथ्योः षोडशश्राद्धानि षोडशेति रिक्तयोस्तिथ्योरिति न्यूनषष्ठेनाब्दि
कपरमिति अत्र देशकुलसंप्रदायतो व्यवस्थेति सर्वे निबंधाः गालवः ऊनषाण्मासि

कं षष्ठे मासे वाऽष्टममासिकं त्रैपक्षिकं त्रिपक्षे स्यादूनाब्दं द्वादशे तथा ऊनमासि
के तु गोभिलः मरणाद्द्वादशाहे स्यान्मासान्नेवोनमासिकं मदनकालादर्शे च लौगाक्षि
गौतमः एकाहं द्वित्रिदिनैर्वा न्यूने त्रिभागेनोन एव वा श्राद्धमूनाब्दिकादीनि कुर्यादित्या
ह गौतमः क्रियानिबंधे अन्ये तु सार्धएकादशे मासे षष्ठे वै पंचमे तथा ऊनाब्दमूनष
ण्मासं भवेत्तत् श्राद्धकर्मणीत्युक्तं तत्र मूलं चिंत्यं अत्र पूर्वेद्युर्व्यासमरीचिः द्विपु
ष्करे च नंदासु सिनीवाल्यां भार्गवे दिने चतुर्दश्यां च नोनानि कुर्यात्कृत्तिकासु त्रिपुष्करे।
त्रयोतिथे त्रिपादर्क्षे तिथिर्भद्रा भौमेज्यरविभिः सह न सत्रिपुष्करो योगो द्वयोर्योगे
द्विपुष्करः गालवः त्रिभिर्वा दिवसैर्न्यूनेत्वेकेन द्वितयेन वा श्राद्धादिषु च मासेषु कर
मासूनाब्दिकादिकं एकनक्षत्रनपक्षे पंचम्यां मृतस्य तत्तीयापो त्रिभिर्न्यूनैः प्रतिपाद
यूनैर्द्वितीयोमिति केचित् माधवस्तूनमासिकादिके श्राद्धे स्यात्तत्पूर्वेद्युरेव तन्मासि
कार्यमित्यस्य तोयेन तु दिवसे द्वादशे वा विवेत्ति पैठीनसिवाक्य ऊनषाण्मासिकं मृता
हात्सर्वेद्युः कार्यमित्यर्थमाह पूर्वेद्युः मृताहादित्यर्थः मासिकानि स्वकेयेतु दिवसे
त्युक्तेः इदमेव तन्मतं मदनरत्ने च्यवयाज्ञवल्क्यः मृतेहनि तु कर्तव्यं प्रतिमासं तु
वत्सरं प्रतिसंवत्सरं चैवमाद्यमेकादशेहनि अत्राद्ये मासिकमाब्दिकं चैकादशेऽह
नीति निर्णयामृतादयः ब्राह्मणं भोजयेदाद्ये होतव्यमनलेऽथवा पुनश्च भोजये
द्विप्रान्द्विरावृत्तिर्भवेदितीति गोभिलीयं च तद्विषयमाहुः अन्ये तु मासपक्षोति

यि स्यष्टेरित्यादि विरोधादाब्दिक वर्ज्यं ते एव मासिके तु मासादौ द्विराहत्तस्तथा
कादशाहिकाद्यमासिकपरा देवयाज्ञिकोप्येवमाह लौगाक्षिरपि मासादौ मा
सिकं कार्यमाब्दिकं वत्सरे गते आद्यमेकादशे कार्यमधिके त्वधिकं भवेत् दीपि
कायां तु आद्यं तु द्व्यमिते र्कसंमितदिने वा स्यादित्युक्तं गोजस्तु मितं तिथ्यवधि
के मासं संवत्सरयदं गौणं पूर्णोब्दे इति ईषिदसमाप्तपरत्वमिति शूलपाणिः तेन
द्वितीयमासाद्यादावाद्यमासिकादीनि मोरव्यं कृतं अपराजेन तु हारीतिः मृतस्य प्रा
द्यं मासिका रिक्तपर्ययोः सावर्तं प्रति द्वादशाहेन वा मोज्याणि एकाहे द्वादशापि च २
यत्तं प्रतिदिवेद इत्यर्थः यदा पितुर्मरणमस्त्रयोविंशतितमे दिने शेषो वृद्धिर्वा स्यात्
द्वादशदिने षु द्वादशमासिकानि कार्याणीत्यर्थः त्रैपाक्षिकं तु त्रिपक्षेतीते मृताह
कार्यो त्रैपक्षिकं भवेदत्रो त्रिपक्षेत दनंतरमिति भविष्योक्तेरिति मदनरत्ने उक्ते
पृथ्वीचंद्रकालादर्शनिर्णयामृतादयस्तु ऊनान्यूने षु मासेषु विषमाहे स
मेपि वा त्रा त्रैपाक्षिकं त्रिपक्षे स्यात् मृताहे त्विति राणि त्विति कर्षादजिन
स्तनेः पूर्वंगहन्ते प्रहन्ते इत्यर्थमाहुः तेन दनंतरशाब्द विरोधात्रैपाक्षिक
द्वितीयमासिकयोः एकरा यत्रैरेवं व्याख्यायां मावाभावाद्यो पेक्ष्याः एवं
त्रिपक्ष सपिंडनेत्यैव शाब्दाभावादधिकरणत्वमेव त्रैपे यत्तु क्रियानिबं
धे गारुडेः त्रैपाक्षिकं त्रिपक्षेन प्रहन्ते विषमेदिने मासिकान्यपि चेत्तानि भ

द्वाविंशतिमेदिनेष्विति तन्निर्मूले स्मृतिरत्नावल्यां द्वादशाहे परात्कुर्यात्पितुः पुत्रः
सपिंडने एकादशेऽह्नि कुर्वीत प्रेतश्राद्धानि षोडश पैठीनसिः सपिंडीकरणादर्वाक् कुर्वी
त श्राद्धानि षोडश एकोद्दिष्टविधानेन कुर्यात्सर्वाणि तानि तु सपिंडीकरणादूर्
ध्वं यदा कुर्यात्तदा पुनः प्रत्यब्दं यो यथा कुर्यात्तथा कुर्यात्स तान्यपि मदनरत्ने कात्याय
नः श्राद्धमग्निमतः कार्यं दाहादेकादशेऽहनि ध्रुवाणि तु प्रकुर्वीत प्रमीताहनि सर्व
दा ध्रुवाणि त्रैपक्षिकाब्दिकानि क्रियानिबंधे गार्ग्योऽडे त्रिपक्षात्सर्वतः सामे भवेत्सं
स्कारवासरे ऊर्ध्वं प्रेतदिने न गतेः सर्वाण्येव व्रतान्ततः एतानि च यदा सपिंडनात्पूर्वे
मृतापत कुर्यात्तदा कालकर्त्रैक्यतंत्रत्वादेकः पाक इति केचित् पाकभेद इति भ
ष्वरणः अत्र केचिदाहुः देशकालादेवतैक्येन तंत्रत्वादेकः श्राद्धकाण्डानि क्रमा
पन्ने द्वादशाहे च सर्वाणि संक्षेपेण समापयेत् तान्येव तु पुनः कुर्यात्प्रेतशब्देन कार
पेदिति कात्यायनोक्तेः नैकः श्राद्धद्वयं कुर्यात्समानेऽहनि कुत्रचिदित्यस्य देवतैक्य
परत्वेऽप्यत्र तत्त्वात् श्राद्धं कृत्वा तु तस्यैव पुनः श्राद्धं न कारयेदिति पावालोक्तेः
षोडशसंख्या याज्ञवल्क्ये प्राजापत्ययागसप्तदशत्ववत्साम्नाय्ययागद्वित्ववच्च
मुगयदनुष्ठाने पुषपर्नेरथ मासिकाद्यनाह्निकांतेषु षोडशश्राद्धेषु लक्षणः क्रिय
तामित्येवं प्रयोगैक्ये को विप्रः पिंडोऽर्घ्यश्चेति विरुद्धविधिविध्वंसेप्येवं तन्त्रेदं द्वादशा
हेन वा भोज्याश्चत्वाहे द्वादशापि चेति हेमाद्रौ हारीतवचोविरोधात् तेन विप्रभेदात्
पिंडाद्यपि भिन्नमिति सिद्धं एतानि द्वादशाहादौ सपिंडनात्पूर्वं हृता तान्यपि हृद्धिं

विनायकर्षेपुनः स्वकाले कार्याणि यस्य संवत्सरादर्वाक् सपिंडीकरणं कृतं मासि
कं चोदकुंभं च देयं तस्यापि वत्सरमिति मदनरत्ने गोरसोक्तेः अचेदं मासिकानां मा
पकर्षे विधानं किंतु सपिंडनोर्ध्वं स्वकालेनुष्ठानमेनेति वाच्यं श्राद्धानि षोडशादत्वा
नतु कुर्यात्सपिंडनावमिति विरोधात् यस्य संवत्सरादर्वाग्विहितानु सपिंडता ।
विधिवत्तानि कुर्वीत पुनः श्राद्धानि षोडशेति माधवीये गोभिलोक्तेश्च अर्वाक् सं
वत्सराद्यस्य सपिंडीकरणं कृतं षोडशानां द्विरावृत्तिं कुर्यादित्याह गौतम इति तत्रै
व गालवोक्तेः षोडशात्वं चैकादशाहे सपिंडनपक्षे तत्राद्यमासिकस्य कालसत्वा
त् अन्यपक्षेषु यथासंभवं ज्ञेयं यत्तु दीपिकायां अनुमासिकानि तु चरेत् नान्यवसा
पिंडनतः पश्चाद्द्वादशेत्युक्तं नूनानां तु पुनः कृतिरित्युक्तं तदेतद्विरोधाच्चिंत्यं यत्तु
गौडाः सपिंडीकरणानंतरं तेषां प्रेतक्रियावधेरपि गतत्वात् येन्ये मासिकानां
प्रेतत्वविमोक्षार्थत्वात् सपिंडनापकर्षे तदं तस्यापेन तेषामपायकर्षो मासिकया
नां न पुनः कृतिः यत्तु मासिकं चोदकुंभं चेति लौगाक्ष्यादिवचनं तन्निर्मूलं
सन्मूलत्वेपि प्रतीयपरं चेत्याहुः तेउक्तवक्ष्यमाणवचो निबंधविरोधात् अस्त्रवो
द्रत्युपेक्ष्याः यत्तु मिताक्षरायां सपिंडनोर्ध्वं स्वकुले एव कार्याणि अपकर्षे
त्वनु कल्प इत्युक्तं तदपि पूर्वविरोधाच्चिंत्यं तेन वृद्धिविनायकर्षेपुनः कृ
तिः अर्वाक् संवत्सराद्यस्य सपिंडीकरणं भवेत् प्रेतत्वमिह तस्यापि ज्ञेयं
संवत्सरं नृपेति अग्निपुराणात् वृद्धिनिमित्तापकर्षे तस्यैव तन्निवृत्तिः

373

अन्यथावृद्धिसंभवादितिशूलपाणिः कार्ष्णाजिनिः सपिंडीकरणादर्वाक् अ
पकृष्य कृतान्यपि पुनरप्यपकृष्यंते वृद्ध्युत्तरनिषेधनात् निषेधं वाह कात्या
यनः निर्वर्त्य वृद्धितंत्रं तु मासिकानि तंत्रयेत् अपायमरणेन भवेत्पुनरस्याचिति
हिरनुष्ठानं चोत्तरेषामेव न पूर्वेषां स्वकालकृतानां तदाह माधवीये कार्ष्णाजि
निः अर्वागब्दाद्यत्र यत्र सपिंडीकरणं कृतं तदूर्ध्वं मासिकानां स्याद्यथाकाल
मनुष्ठितिः हेमाद्रौ शांखायनिः प्रेतश्राद्धानि शिष्टानि सपिंडीकरणे तथा अप
कृष्यापि कुर्वीत कर्तुं नांदीमुखं द्विजः वृद्धिं विनाप्ययं दोषमाहोशनाः वृद्धिश्रा
द्धानि यश्चरेत् सश्राद्धी नरके घोरे पितृभिः सह मज्जतीति आधानेप्येवमाह हेमा
द्रावुशनाः पितुः सपिंडीकरणं वार्षिके मृतिवासरे आधानाद्युपसंप्राप्तावेत
स्मात्पितृक्रमात् विशेषस्तूक्तो विवाहनिर्णये एवं नवश्राद्धं मासिकं च य
द्यंतरितं भवेत् तत्तदुत्तरसाते श्राद्धमनुष्ठेयं प्रवक्ष्यते गारुडेपि आपदा बहुकृतं तं
तु कर्मोर्ध्वं मृताहनि अथासपिंडीकरणं माधवीये हारीतः यस्तु पूर्वममावा
स्यां मृताहाद्दशमी भवेत् सपिंडीकरणं तस्यां कुर्यादेवसुतोग्निमान् मृताहादू
र्ध्वं दशमी एकादशीत्यर्थः सपिंडीकरणं कुर्यात्सर्ववृद्धाग्निमान्सुतः परतो द
शरात्रश्चेत् कृष्णदर्शोपरीतरः इति कार्ष्णाजिनिस्मृतेः आहिताग्नेस्तेन विनाप्येत
पिंडपितृयज्ञासिद्धेः तदाह गालवः सपिंडीकरणान्तेनैव पितृकं यद मास्यतेत
आहिताग्नेः सिनीवाल्यां पितृयज्ञः प्रवर्तते मदनरत्ने प्रजापतिः नासपिंड्या

373A

ग्निमान् पुत्रः पितृयज्ञं समाचरेत् अपरार्के कात्यायनः एकादशाहं निर्वर्त्य पूर्वेद्
युर्यथाविधि प्रकुर्वीताग्निमान्विप्रो मातापित्रोः सपिंडनं आशौचांतप्रथमदर्शयो
र्मध्ये कस्मिंश्चिद्दर्श इत्यर्थः पित्रादीनां सपत्नीकानां देवतात्वेन मातुरपि तत्रानुप्रवे
शात् मातुरपि प्राग्दर्शात् सपिंडनं युक्तमित्यपरार्कः एवं पितामहादेरपि सपिंडनं प्राग्
दर्शात्कार्यं तेन विना पार्वणायोगात् द्वादशाहे वा कार्यं साग्निकस्तु यदा कर्ता प्रेत
श्चानग्निमान् भवेत् द्वादशाहे भवेत्कार्यं सपिंडीकरणं सुतैरिति गोभिलोक्तेः साग्नेः
प्रेतस्य तु त्रिपक्षे प्रेतश्चेदाहिताग्निः स्यात् कर्ता नाग्निर्यदा भवेत् सपिंडीकरणं तस्य
कुर्यात् पक्षे तृतीयके इति सुमंतूक्तेः मदनरत्ने लघुहारीतोपि अनग्निस्तु यदा वीरो भ
वेत् कुर्यात्तदा गृहे प्रेतश्चेदग्निमांस्तु स्यात् त्रिपक्षे वै सपिंडनं द्वयोः साग्नित्वे द्वादशाह
एव साग्निकस्तु यदा कर्ता प्रेतो वाप्यग्निमान् भवेत् द्वादशाहे तदा कार्यं सपिंडीकरणं
पितुरिति तेनैवोक्तेः द्वयोरनग्नित्वे तु भविष्ये सपिंडीकरणं कुर्याद्यजमानस्त्वमग्नि
मान् अनाहिताग्नेः प्रेतस्य पूर्णेब्दे भरतर्षभ द्वादशाहे च षण्मासे त्रिपक्षे वा त्रिमासि
वा एकादशेपि वा मासि मंगलस्याप्युपस्थितौ कात्यायनगोभिलौ यदहर्वा वृद्धि
रापद्यते तदहर्वृद्धिनैवेति वाचस्पतिः तत्र प्राप्तवृद्धिनिमित्तकामिति नियमात् सपि
डनस्य चापराह्णकालीनत्वेन पूर्वेद्युर्वा धायते वृद्धिदिने तत्पूर्वदिने वेति श्रीद
त्तः स्मार्तगौडस्तु वृद्धेः पूर्वमेव वर्षांत्यक्षणः सपिंडनस्य प्रेतत्वनाशे सहकारीति।

नयेरन्नूर्ध्वंविप्रावृद्ध्यभावेपितत्कर्तव्यतानिरग्न्यपरसहितमेवकालांतरक्रियमाणंवृद्धि
पूर्वेद्युःसमहत्कृतंप्रेतत्वनाशकमित्याह तन्न अकालेकृतस्यफलाजनकत्वा
त् एतेननिमित्तनिरग्न्यपवनएवाधिकारावृद्ध्यभावेपिनसंततिरितिमिश्रोक्तिःपरा
स्ताः वृद्धिपूर्वेदिनस्यवर्षांतस्यचकालस्यांगत्वेन निमित्तत्वाभावात् तेनपुनःका
र्यमित्यन्ये मदनरत्नेपुलस्त्यः निरग्निकःसपिंडत्वंपितुर्मातुश्चधर्मतः पूर्णेसंव
त्सरेकुर्याद्वृद्धिर्वायदहर्भवेत् चतुर्विंशतिमते सपिंडीकरणंचाब्दे संपूर्णेभ्युद
येपिवा द्वादशाहेतुकेषांचित् मतंचैकादशेतथा पृथ्वीचंद्रोदयेबौधायनः अ
र्थसपिंडीकरणं त्रिपक्षेवातृतीयेवामासिषष्ठेचैकादशेद्वादशेवा द्वादशाहेचैका
दशाहेवेति एतन्मूलकमेविष्णुः मासिकार्थंद्वादशाहे श्राद्धंकृत्वात्रयोदशेह्निवाकुर्या
न्मंत्रवर्जंहिशूद्राणां द्वादशाहेसंवत्सराभ्यंतरे यद्यधिमासोभवेत्तदामासिकार्थंदिन
मेकंचविवर्धयेदिति श्राद्धेचोत्तरंद्वादशस्वहःसुमासिकानितेष्वेवाद्यषष्ठद्वादश
दिनेषूनमासिकादीनिकृत्वात्रयोदशेह्निसपिंडनंकुर्यात् अधिकमासेतुचतुर्दशे
ह्निकुर्यात् अत्रत्रयोदशोद्वादशोह्नीत्यस्यमासिकान्तदिनपरत्वादितिपृथ्वीचंद्रः
पैठीनसिः संवत्सरांतेसंसर्जनंनवमेमासीत्येके अत्रसाग्निरनग्निर्वाकालाभावे
त्रिपक्षादि संवत्सरांतानुकल्पान्नेयाः कल्पतरुस्तुप्रेतवृद्धिनिरग्न्यपरएवसर्वो।
पकर्षप्रकारइत्याह तन्न यदहर्वेति स्वातंत्र्यश्रुतेः यद्यपिवृद्धिनिमित्तोपकर्षो।

×८×नन्वत्रापकर्ष इति श्राद्धकौमुद्यादयः तन्न । अनुत्स्नातां तु यो भार्यामिति निषेधाच्च ८×

निरग्नेरेवोक्तत्वात् सागरापि तन्नेयः उक्तकालासंभवे वर्षांतादिगौणकाल
वत् वृद्धेरपि प्राप्तेः वक्ष्यमाणगोभिलवचनात् अयातयामं मरणं न भवेत्तु
नरस्यात्विति दोषश्रुत्यविरोधाच्च अपरार्के पत्नी चेद्रजस्वला सोष्यंती वा — — तत्र वृ
द्धिपदं चूडोपनयनविवाहमात्रपरं सीमंतादौ तु वृद्धिश्राद्धलोप एवेत्याचार्य
चूडामणिः पुंसवनाद्यन्नप्राशनांते ऽप्यावश्यके ऽप्यपकर्ष — — इति श्राद्धविवेकः
स्मृतिसागरे ऽपि बृहस्पतिः पुत्रवान्यो भवेद्यस्मिन्काले ऽन्हि वृद्धिकर्मणि तस्मि
न्नेतस्याप्यात्कृत्य पित्रोः कुर्यात्सपिंडनं गर्भाधानस्य तु ऋत्वपि संभवात् आम
श्राद्धपरान्नं च गंधमाल्यं च मैथुनमिति देवलेन पूर्वमाक्त मैथुननिषेधाच्च ।
ब्रह्मचर्यं च पर्वण्याद्याश्च अतस्तत्र वर्जयेदिति मैथुने दोषाभावाच्च । पितामहम
रणे पौत्रस्य वृद्धौ नापकर्षः तस्य महागुरुत्वाभावात् तत्र तदूर्ध्वेभ्यो वृद्धिमि ।
ति श्राद्धचंद्रिका तन्न भ्राता वेत्यादौ तदभावे ऽप्यपकर्षोक्तेः तेनानिर्दिष्टोप्युप
लक्षणं आपद्यः आनंत्यात्कुलधर्माणां पुंसां चैवायुषः क्षयात् अस्थितेस्त्वशु ।
रीरस्य द्वादशाहः प्रशस्यते एतदाशौचांते तृतीयदिनोपलक्षणं सर्वेषामेव
वर्णानामाशौचांते सपिंडनमिति निर्णयामृते कात्यायनोक्तेः सर्वेषामिति त्रै
वर्णिकपरं शूद्राणां त्वाशौचमध्ये मंत्रवर्ज्जं हि शूद्राणां द्वादशेऽहनि कीर्ति

नि॰सिं॰
३८५ 375

तामिति विघ्नरुक्तेः एतद्दर्शश्राद्धाधिकारिश्राद्धविषयमित्यपरार्के कल्पतरौ च वृद्धम
नुः द्वादशाहनि विप्राणामाशौचांते तु भूभुजां वैश्यानां तु त्रिपक्षाद्वा वृषवास्यात्
सपिंडनं निर्णयामृते गोभिलः द्वादशाहादिकालेषु प्रमादादननुष्ठितं सपिंडीकर
णं कुर्यात्कालेषूत्तरभाविषु अदंसाग्नेन तत्र कालासंभवे गौणकालविधार्थमिति
मदनपारिजातः मदनरत्नेप्येवं ऋष्यशृंगः सपिंडीकरणं श्राद्धमुक्तकाले न चे
त्कृतं रौद्रहस्ते च रोहिण्यां मैत्रभे वा समाचरेत् कालादर्शेपि एकादशे द्वाद
शेह्नि त्रिपक्षे वा त्रिमासि वा षष्ठे चैकादशे वाब्दे संपूर्णे वा शुभागमे सपिंडीकरणं
मुख्येषु अष्टौ कालाः प्रकीर्तिताः साग्नेः कर्तुरभावाद्यो प्रेते साग्नेस्तृतीयकः अनंतर
मेवेत्युक्तं द्वितीयाद्याः सप्तकालाः प्रकीर्तिताः रोहिण्यां रौद्रहस्ते सुमैत्रभे वापि तच्चरेत्
नारदसंहितायां तु सपिंडीकरणं कार्यं वत्सरे वार्धवत्सरे त्रिमासे वा त्रिपक्षे वा
मासि वा द्वादशेहनि अस्तु त्वत्सरेतीते ज्ञेयं ततः सपिंडीकरणं वत्सरात्परतः
स्थितमिति भविष्योक्तेः पितुः सपिंडीकरणं वत्सरादूर्ध्वतः स्थितमिति नारद
संग्रहोक्तेः पितुः सपिंडीकरणं वार्षिके मृतवासरे अनुशासने सोक्तेः पूर्णे संवत्स
रे पिंडः षोडशः परिकीर्तितः तेनैव च सपिंडत्वं तेनैवाब्दिकमिष्यते इति हेमाद्रौ
वचनाच्च मसानामकरोति सर्वेवाक्तिरेव यत्तु पूर्णे संवत्सरे कुर्यात्सपिंडीकरणं
सुतः एकोद्दिष्टं च तत्रैव मृताहनि समापयेदिति धवलनिबंधे जावालुक्तेः पु

राम
३८५

त्रः सपिंडनं कृत्वा कुर्यात्स्नानं सचैलकं एकोदिष्टं ततः कुर्यात्कृतं पंचाविवारषोडि
तिस्वल्पमात्स्योक्तेः षोडशान्तं च सपिंडनस्य षोडशश्राद्धान्तरभावपक्षे स्मृत्यर्थ
सारेण वर्षान्त्यदिने संवत्सरविमोक्षश्राद्धं सपिंडनं च कृत्वा परेद्युरित्याहेव वार्षिकं
कार्यमित्युक्तं गौडा अप्येवमाहुः तत्पूर्वविरोधाच्चिंत्यं तच्च पुत्रे सति नान्यः कुर्यात् श्राद्धानि
षोडशादत्वा न तु कुर्यात्सपिंडतां प्रोषितावसिते पुत्रः कालादतिचिरादपीति कपर्द्दीयोक्तेः
षोडशश्राद्धानां वर्षादूर्ध्वं कालाभावे पित्रान्यदत्वा न कुर्यात् किंतु दत्त्वैव तानि यदि कनि
ष्ठभ्रात्रादिना कृतानि तदा सपिंडनमेव कुर्यादित्यपरार्कः सपिंडने तु कनिष्ठानां नैवाधि
कार इत्यर्थः तत्रैव अपुत्ता नादप्यथ मोहान्न कृता चेत्सपिंडता तत्रापि विधिवत्कार्या का
लादतिचिरादपि तेषु पिज्येष्ठस्यैवाधिकारः ज्येन जातमात्रेण पुत्री भवति मानव
इति मनूक्तेः अपरार्के प्रचेतापि एकादशाद्याः क्रमशो ज्येष्ठस्तु विधिवत्क्रियाः
कुर्यान्नैकैकशः श्राद्धमाब्दिकं तु पृथक्पृथक् मरीचिः सर्वैर्वानुमतं कृत्वा ज्येष्ठे
नैव तु यत्कृतं द्रव्येणाविभक्तेन सर्वैरेव कृतं भवेत् यत्तु वाचस्पति शूलपाणिभ्या
मुक्तं द्रव्यदानानुमत्यभावे कनिष्ठैः पृथक्कार्यमिति तन्न एवकारस्य तदभावे पृ
थक्करणाभावार्थत्वात् अंधादेरिव ज्येष्ठे सति कनिष्ठानामनधिकाराच्च अ
तस्तेषां प्रत्यवायमात्रं आहिताग्निः कनिष्ठस्तु कुर्यादेव अन्यथा पितृयज्ञासिद्धेः
एवमावश्यकत्वादपि कनिष्ठोऽन्यः सपिंडो वा कुर्यात् भ्राता वा भ्रातृपुत्रो वा स

पिंडः शिष्य एव च सह पिंडक्रियां कृत्वा कुर्यादभ्युदयं ततस्तथैव काम्यं यत्कर्म संव
त्सरात्प्रथमादन्ते इति मदनरत्ने लघुहारीतवचनात् ह्यनंतरं प्रथमाब्देपि काम्यं म
ध्ये कुर्यात् वृद्ध्यभावे तु प्रथमाब्दादूर्ध्वमेवेत्यर्थः काम्योक्तेरनावश्यकेष्टापूर्त्ता
दौ नायं कर्षः एतच्चाग्रजभ्रातृपुत्रादिसंस्कारे प्राप्ताधिकारस्य नांदीश्राद्धाधिकारा
र्थं अभ्युदयमदं च नांदीश्राद्धनिमित्तकर्ममात्रपरमिति हेमाद्रिः तेन ज्येष्ठे प्रदेशां
तरस्थे कनिष्ठः सपिंडनं विनैव वृद्धिं कृत्वा पुत्रसंस्कारं कुर्यादिति श्रीदत्तोक्तिः प
रात्ता भ्रातृशिष्याद्युक्तेः नांदीश्राद्धे ज्यदेवतामात्रपरोयकर्ष इत्यापस्तंब अस्य कर्
ममात्रपरत्वाद्वृद्धिकर्त्तैव सपिंडनं कुर्यादिति न नियम इति गौडाः अत एव कन्याया
मातृमरणे भ्रात्रा सपिंडने कृते पित्रादीनामधिकारः शूलपाणिस्तु महागुरौ प्रेते भर्त्तेह
द्धिकर्म न कुर्यादिति निषेधात् मृतस्य भ्रात्रादिः सपिंडनं कृत्वा तत्सुतकन्यादेरभ्यु
दयं कुर्यात् तत्सपुत्रसंस्कार्यपितुः सपिंडनं विना वृद्धौ देवताभावादित्याह तन्न
देवताप्रयुक्ततया कर्मणो निरस्तत्वात् वृद्धिं विना कनिष्ठेन कृतेन विदेशस्थेन ज्ये
ष्ठेन पुनः कार्यं यवीयसा कृतं कर्म प्रेतशब्दं विहाय तु ज्ज्यायसापि कर्त्तव्यमसपिं
डीकरणं पुनरिति स्मृत्यर्थे नवा कनिष्ठेन सपिंडीकरणे कृते श्राद्धपादे मातापित्रोः
कनिष्ठेनेति पाठः देशांतरगतानां च पुत्राणां तु कथं भवेत् कृत्वा तु वपनं कार्यं
दशाहं तेति लौदके ततः सपिंडीकरणं कुर्यादेकादशेऽहनि द्वादशाहेन कर्त्तव्यमि

376A

तिशातातयोब्रवीदिति वचनाच्चेति भट्टाः । सिंगारभट्टीयेप्येवं पूर्ववचनेऽत्र
मूलं चिंत्यं स्वल्पपर्यसारे तु विभक्ताऽरुद्धिकामास्त्रेपुत्राः पृथक् सपिंडीकर
णं कुर्युरित्युक्तं अत्र दत्तकस्य तत्पुत्रादीनां च विशेषः प्रागुक्तः केचित्तु वृद्धिं
विनापि कनिष्ठस्य सपिंडनमाहुः मातापित्रोर्मृते कालेज्येष्ठे देशांतरस्थिते
कनिष्ठेन प्रकर्तव्यं सपिंडीकरणं तदेति कार्ष्णाजिनिस्मृतेः गतेवासे ध्रुवे
ज्येष्ठे पित्रा चाप्रोषिते सति षण्मासान्निवर्तेत तदा कार्यं कनीयसा संवत्सरे पुनः
सपिंडीकरणं श्राद्धं पार्वणं च चरेत् अर्घसंयोजनं नैव पिंडसंयोजनं न चेति नेत्र
चसुं निर्मूलत्वात् पिता वसिता पुत्रः इत्यादि विरोधाच्चोपेक्ष्याः अत्र मम तो
त हे स्मार्डे ब्राह्मे मृते पितरि यस्याथ विद्येत च पितामहः तेन देयास्त्रयः पिंडाः प्र
पितामहपूर्वकाः तेभ्यश्च पैतृकः पिंडो नियोक्तव्यस्तु पूर्ववत् मातर्यथ प्रम
तायां विद्येत च पितामही पूर्वोक्तं कार्यं तत्राप्ययं विधिः एवं प्रपितामह
ह चमेतत्र पित्रादिभिः ज्ञेयं तदा स्मृतं तः ज्यायां पितृपिंडानामेकेनापि
सपिंडने पितृत्वमस्नुते प्रेतराजधर्मो व्यवस्थितः यत्तूक्तं मातृ प्रमीतार
तावेव कार्या सपिंडीति तन्मातापितृभर्तृभिन्नविषयं युक्तमेतत्स ताना
म सपिंडीकृतत्वे रिष्यते यदि माता यदि पिता भर्ता नैष विधिः स्मृत इति मा

पृथ्वीये स्कांदोक्तेः मदनरत्नादौ चैवं अत्र प्रपितामहादिभिः पितुः सपिं
डने कृते पितामहे मृते तेन तस्य पिंडने सति पुनस्तेन सह पितुः सपिंडनं का
र्यमिति हेमाद्रिमतमाह अन्ये नैतन्मन्यंते न त्वेवं तु पितुः सपिंडनो पितृत्वमश्नुते मे न तद्
धर्मो व्यवस्थित इति विष्णुधर्मोक्तेः पितामहे प्रपितामहे वा पुत्रांतरै रसंस्कृते प्यसं
स्कृताभ्यामेव पितुः सापिंडनं कुर्यात् असंस्कृतेन संस्कार्यौ पूर्वौ पौत्रप्रपौत्रकैः पि
तरं तत्र संस्कार्यादिति कात्यायनोक्तेरिति छंदोगपरिशिष्टात् असंस्कृतेनाच दा
हाद्यैरिति केचित् असपिंडीकृताविति तत्वं अत्र गौणोक्तंतगेव पापिष्ठमपि शुद्
ध्देन शुद्धं पापकृतापि वा पितामहेन पितरं संस्कुर्यादिति निश्चयः पापिष्ठमकृतस
पिंडनं न तु पतितादि अभिशस्तपतितभ्रूणघ्नः स्त्रियश्चाप्तिचारिणीर्न संसृजेदिति बै
जपायोक्तेः पापकर्मिणो न संसृजेरन्निति गौतमोक्तेश्च तथुक्तं निर्णयामृते पूर्वयोः पु
त्राभावे तु पौत्रः कुर्यादेव पितामहः पितुः यस्मात्स्यचात्वं पदि गच्छति पौत्रेणैकादशाहा
दि कर्तव्यं श्राद्धं षोडशं तेन तत्पौत्रेण कर्तव्यं पुत्रेणाश्रुत पितामहः पितुः सपिंडनं कृ
त्वा कुर्यान्मासानुमासिकमिति कात्यायनोक्तेः अपरार्के त्वपार्वणेन चैवं तेन सपि
डन स्यानित्यत्वाद कृतसपिंडनयोरेव पार्वणान्तरप्राप्तेरिति मस्करोक्तेः परस्ताकृते
सापिंडीकरणे प्रेतः पार्वणभाग्भवेदिति हारीतविरोधाच्च केचित्तु अंतराभावे पितामह
हेवार्षिकमप्याहुः तत्र श्राद्धं षोडशमिति नियमात् [illegible] यामवत्त्येव पितामहस्य [illegible] घा

देकोद्दिष्टं न पार्वणमिति वाचस्पतिधनगेशोक्तेः अयाणां योगपद्ये तु प्राधान्यात्पि
तः सपिंडनं कृत्वा पूर्वयोः कुर्यात्पितामहे मृते दशाहांतः पितृमृते तामृतः संस्कार
कृत्वा पितामहस्य पुनः सर्वमावर्त्तयेत् अत्र दशाहेनैवं अप्रत्नया पित्रा न कृतानेन पौ
त्रेण पितामहश्राद्धं प्रमीते पितृमृते तेन दाशौचं वहन्नेव पौत्रः पितामहस्य कर्मकु
र्यात्स्वक्रीतत्वादिभि इति मदनपारिजातपृथ्वीचंद्रौ यत्तु उत्तराजितया रौद्ररोहिणी
याम्यसर्पपितृमेघ्रु चाग्निमे[illegible]मस्थुक मेसकल्प च वर्जयेत्पत्र तकार्यमिति बुद्धि
मान्नरः इति सपिंडनप्रकरणं यागान्मुहूर्तकाले निषिद्धं वैसपिंडनाकर्षः सर्वे
कालेऽपि तत्त्वेन कृतान्येव पूर्वोक्तवाक्यात्सोक्तानि षोडशश्राद्धानि कार्याणीति वाच
स्पतिमिश्राः तत्र अस्यपरिभाषात्वेन वाक्यात्सा च काशकर्मपरत्वात् अस्यैव
तमात्रे दैवत्यभावाच्च अप्यसौ वच्यते हेमाद्रौ हेमाद्रौ बृहस्पतिः भर्तृगोत्रेण
नाम्ना च मातुः कुर्यात्सपिंडनं मत्स्यभविष्ये पितृगोत्रं समुत्सृज्य न कुर्यादितरे
गोत्रत इति न दासुरादिविवाहेनापरं आसुरादिविवाहेषु पितृगोत्रेण धर्मवि
दिति हारीतशातातपोक्तेः तच्चानेकवचनेषु पितामह्या मातुः कुर्यात्सपिंडनं पु
मीनपितृकः पित्रा तत्र पित्रापुत्रकाद्यतः तत्पित्राद्या मातुः पित्रा लौगाक्षिः पितामह
घ्यादिभिः सार्द्धं मातरं न सपिंडयेत् पि[illegible]ध्रियमाणेन तेनैवापरते साते शांखः
मातुः सपिंडीकरणं कार्यं का[illegible]म वेतस्तुनः पितामह्यादिभिः सार्धं सपिंडीकर

नि॰ सिं॰
३६८

378

रणं स्मृतं येन केनापि मातुः सापिंड्ये पुत्रान्वष्टकादौ मातुः श्राद्धं पृथगुक्तं तत्र
पितामह्यासह कार्यं नांदीमुखेवष्टकाश्राद्धे गयायां च मृतेहनि पितामह्यादिः सार्धं
मातुः श्राद्धं समाचरेत् इति शातातपोक्तेः अपुत्रायां तु पैठीनसिः अपुत्रायां तु पतिः
कुर्यात्सपिंडनं स्वस्रादिभिः सहैवास्याः सपिंडीकरणं भवेत् यत्तु लघुहारीतः पुत्रेणै
वतु कर्तव्यं सपिंडीकरणं स्त्रियाः पुरुषस्य पुनस्तन्मैत्रोत् पुत्रादयोपिच यच्च मार्कंडेयपु
राणे सपिंडीकरणं स्त्रीणां पुत्राभावे न विद्यते तत्पुत्रपत्न्यभावे ज्ञेयं अत्र सपत्नीपुत्रो
पि ज्ञेयः बह्वीनामेकपत्नीनामेका चेत्पुत्रिणी भवेत् सर्वास्तास्तेन पुत्रेण प्राह पुत्रव
तीर्मनुः इति मनूक्तेरेतस्य परत्वात् यत्तु शातातपः मृते पितरि मातुस्तु नाकार्यास
हपिंडता पितुरेव सपिंडत्वेन तस्या अपि कृतं भवेत् इति तद्दशाकपरं केषांचिद्वा मतमिति
हेमाद्रिः अन्वारोहणे तु भर्त्रैव सापिंड्यं मृतायामनुगतानामपि सा तेन सहपिंडतां अर्हति
स्वर्गवासं च यावदाभूतसंप्लवामिति शातातपोक्तेः पत्या चैकेन कर्तव्यं सपिंडीकर
णं स्त्रियाः सा मृतापि हि तेनैक्यं गता मंत्राहुतिव्रतैरिति यमोक्तेश्च अत्रैकशब्दः पिता
मह्यादिपक्षनिवृत्त्यर्थः पतिपदं वर्गपरं सपिंडनस्याप विलोकोद्दिष्टरूपत्वादिति मा
धवः कल्पतरुमदनरत्नादयोपि अन्ये तु भर्त्रैव चैकेन वा पुत्रः स्वेन भर्त्रा सहैवास्याः सपिं
डीकरणं भवेदित्येवकारश्रवणात् पृथ्वीचंद्रोदयोपि विकल्प उक्तः इदं तु तत्त्वं प
दाहहेमाद्र्यादिमते द्वयोरेकः पिंडः तदा वर्गेण सह यदा ... माध

मृतायां ३

राम
३६८

वपत्नीचं द्वादिमते पृथक्पिंडस्तदेकेन पत्येवा वचनाद्वैकेनापि अतोमातृपिंडम
सपिंडीकृते तेनैव पति पिंडेन संयोज्यैकीकृतं पिंडद्वयं तत्पित्रादिभिः संयोजयेत्
न्नपृथक्पक्षे पुत्रः स्मृत्यर्थसारे अन्वारोहणे नैकदिनमृतेस्त्रियाः पृथक्सपिंडनंना
स्ति भर्तुः कृते स्त्रिया अपि कृतं भवतीत्युक्तं तन्मतांतरमस्तु इदं ब्राह्मादिविवाहेषु ज्ञेयं आ
सुरादिषु तु शातातपः तन्मा जाता पितामस्वानुम्बावासपिंडने आसुरादिविवाहेषु वि
त्रानां योविनां भवेत् मातामह्या मातुः पितामह्या तत्र पितामह्या चेत्यर्थः स्मृत्यंतरे पिता
पितामहे योज्यः पूर्णे संवत्सरे सुतैः मातामातामहे तद्वदित्याह भगवान् शिवः इदमासुरादि
परं पुत्रिकापुत्रपरं चोक्तं प्राक् हेमाद्रिस्तु ब्राह्मादिष्वपि सर्वत्र देशाम धाद्विकल्पमाह प्र
अन्न एवमन्यपरेषु कोकिलमतानुसारिणां मातृमातामहप्रमातामहा इति श्राद्धे योगः स
पिंडनं च दृश्यते हेमाद्रावायस्तवोपि कोकिलस्य यथा पुत्रा अन्यसंचयजीविनः पुत्रा
स्ते स्वकुले यान्ति एवं नारी मृता सती यद्यपि विज्ञाने अरोमातामहेन मातुः सापिंडे
पिंडे पितृश्राद्धवन्मातृश्राद्धं नित्यंपिआहयच्च हन्ताद्धे श्राद्धे छंदोगपरिशिष्टे वर्जं पि
तन्मयः स्तादन्नश्राद्धदानमुपक्रमेदिति तदेतद्विषयमेव मातुः पृथक्श्राद्धाभावात्
अन्न एव हेमाद्रौ भविष्ये मातुः सपिंडनं प्रक्रम्य उदिते अन्वादिते चैव तेनमभेदो यथा
भवेत् यथाकालक्रमापातमाचारं च वरेद्बुधः इत्युक्तं अस्य हेमाद्रावपवादमाह
तत्रैव व्याघ्रपात् कुर्यान्मातामहश्राद्धं सर्वदा मातृपूर्वकं विधिते विधि

नि॰सिं॰
३७९

379

मास्यापहद्वौमातामहादितत् केचिदेतत्तुत्रिकापुत्रपरमाहुः पत्युः सापिंड्यमाह
हेमाद्रिः सर्वाभावे स्वयंपत्न्यः स्वभर्तृणाममंत्रकं सपिंडीकरणंकुर्यात्ततः पार्वण
मेवचेति यत्तुवचनं अपुत्रस्यपरेतस्यनैवकुर्यात्सपिंडतामिति यच्चापस्तंबः अपु
त्राये मृताकेचित् पुरुषावास्त्रियोपिवा तेषांसपिंडनाभावादेकोद्दिष्टंनपार्वणमि
ति तत्तु ओत्पादनविधिप्रशंसार्थमितिमाधवः सपिंडीकरणादूर्ध्वमेकोद्दिष्टंविधी
यते अपुत्राणांचसर्वेषामपत्नीनांतथैवचेति हेमाद्रौप्रचेतसोक्तेश्च अन्येहिविध
वाक्यदर्शनाद्विकल्पमाहुः [illegible] त्यर्थसारे पितृब्रह्मचारिणामनपत्यानांचसपिंड
नेनास्ति तेषांसदैकोद्दिष्टमेव व्युत्क्रममृतानांसापिंड्यंकार्यंनच केचित्सर्वत्रसपिं
डनं [illegible] षु क्रममृते विशेषोरेणुकारिकायां भ्रातावाभ्रातृपुत्रोवा
सपिंड्यः शिष्य एववा सपिंडीकरणंकुर्यात्पुत्रहीने मृतेसति सर्ववंध्युविहीनस्य
पत्नी कुर्यात्सपिंडनं ऋत्विजंकारयेद्वापि पुरोहितमथापिवा वसुरुद्रादितिसु
नैकार्यंतेषां सपिंडनं व्युत्क्रमेणप्रमीतानां येनहिनाप्रेततापिध्रुवं पुनः सापिंडनं तेषांकु
र्यात्प्रेतेपितामहे इति अत्रमृतस्यमरणे यतीनां सापिंडनंनास्ति किंत्वेकादशेह्नि पार्वण
कार्यं तादपित्रिदंडिनः एकदंड्यादीनांतदपिनेत्युक्तं प्राक्दंडग्रहणात् एवंमृतेत्व
दाहादिसपिंडनांतं सर्वंकार्यमितिमदनचरणाः सपिंडनविधिमाह वैजवापः समाप्ते
संवत्सरेचत्वार्युदकपात्राणि पृथग्नयेदेकं प्रेताय त्रीणि पितृभ्यः प्रेतपात्रं पितृ

३४

राम
३७९

3791A

पात्रेष्वासिंचति ये समाना इति द्वाभ्यामेवं पिंडेयाभिमर्शनस्यैवं वानुगतः प्रेतः पितृरूपं
द्दातिवः शिवं भवन्तु शेषाणां जायतां विरजीचिरः समानीवः संगछध्वं संवदध्वमि
ति यद्यपि तत्रापि देवरहितमेकोद्दिष्टं कपवित्रकं नैवाग्नौ करणं तत्र तत्राप्यनवर्जि
तमिति मार्कंडेयेनोक्तं तथापि सपिंडीकरणश्राद्धं दैवपूर्वं नियोजयेदित्यादि विरो
धाद्विकल्पः प्रेतोद्देशात्तेयं अत्र कामकालो वैश्वदेवाविल्पुक्तं प्राक् मेत्रायणीपरि
शिष्टे पितृपात्रप्रक्षेपः साग्नेरपि भवेदिह यत्तु गोभिलः अनुक्तकालेषु पितृव्यक्ते
मेलाप्रदत्ता वीपि श्राद्धेन वापि सापिंड्ये हेम्नावापि प्रकल्पयेदिति तदा यदि माता पि
त्रभिन्नपरं आपन्नो नपि कुर्वीत श्राद्धमामेन कर्हिचिदिति तत्रैवोक्तेः स्मृतितत्वे ।
कामधेनौ सपिंडीकरणं यावत्प्रेतश्राद्धं तु षोडशं पृथक्पात्रे वृकर्तव्यं सामिषेणाद्वि
जातिभिः विप्रप्रकारोप्रेतः सपिंडनादूर्ध्वं पितृलोकं तु गच्छति कुर्यात्तस्य तु पाथेयं
द्वितीयेह्नि सपिंडनात् स्मृत्यर्थसारेप्येवं ततो ह्यह्नि श्राद्धं कुर्यात् एतन्मलमासेपि
कार्यं अधिमासेन कर्तव्यं श्राद्धमाभ्युदयं तथा तथैव काम्यं यत्कर्म वत्सरात्प्रथमा
हते ॥ ॥ इति श्रीकमलाकरभट्टकृते निर्णयसिंधौ सपिंडीकरणं तथा प्रथमा
ब्दे निषिद्धानि हेमाद्रौ स्नानं चैव महादानं स्वाध्यायं चाग्नितर्पणं प्रथमेब्दे न कु
कुर्वीत महागुरुनिपाते तेनेः अग्नितर्पणं लक्षहोमादि नत्वाधानं तत्तु प्रथमाब्दे
भवत्येवतस्वाह हेमाद्रौ स्कांदे पुराणे तुः पितुः सापिंडीकरणं वार्षिके मृतवासरे श्रा

नि.सिं.
३८०

380

भ्रातादयुपसंप्राप्ताश्चेत्स्नानमाचरेद्वत्सरादूर्ध्वं कर्मणामिति शुद्धितत्त्वे पाठः
आदिपदं वृद्धिनिमित्तानित्यकर्मपरं दिवोदासीये महातीर्थस्य गमनमुप
वासं व्रतानि च संवत्सरं न कुर्वीत महागुरुनिपतने इदं श्राद्धकौमुद्यां दे
वीपुराणस्थमुक्तं मात्स्ये गौडनिबंधे जाबालिः सपिंडीकरणादूर्ध्वं प्रेतः
पार्वणभुग्भवेत् वृद्धीष्टापूर्तयोग्यस्तु गृहस्थस्य सदा भवेत् वर्षांतस्यै
नाभावेनाधिकारीत्यर्थः गृहस्थः सपिंडोपीत्यर्थः अत एव प्रेतकर्माण्य
निवर्त्य चरेन्नाभ्युदयक्रियां आ चतुर्थं ततः पुंसि पंचमे शुभदं भवेदिति ज्योतिषे
उक्तं माधवीये देवलः प्रमीतौ पितरौ यस्य देहस्तस्याशुचिर्भवेत् न दैवं नापि
वा पित्र्यं यावत्पूर्णो न वत्सरः पित्र्यं सपिंडनं इदं वर्षांतसपिंडनपरं तथैव कार
ण्यं यत्कर्म वत्सरात्प्रथमादृते इति लघुहारीताद्येकवाक्यत्वात् वृद्धिनिमित्ता
पकर्षे तु कामचारो भवत्येवेति गौडाः अत एव लौगाक्षिः अपुन्येषां प्रेतका
र्याणि महागुरुनिपाते कुर्यात्संवत्सरादर्वाक् श्राद्धमेकं तु वर्जयेत् दा
हाद्यैकादशाहांतकार्यं तत्र आशौचांतरस्याप्रतिबंधकत्वात् आद्य
श्राद्धमशुद्धोपि कुर्यादेकादशेहनि स्मृतेश्च एवं सपिंडने पत्न्यादेरपवादमाह
ऋष्यशृंगः पत्न्याः पुत्रस्य तत्पुत्रभ्रात्रोस्तत्तनयस्य चास्नुषाश्वश्र्वोश्च पित्रोः स्वसे
यान्तमरणे यदि अर्वागब्दान्मृतानां पिंडवर्षं सपिंडमाचरेत् लौगाक्षिः पत्नीपुत्र

राम
३८०

स्तथापौत्रो भ्रातातत्सुतकाअपि पितरौ चयदैकस्मिन् म्रियेरन्वासरे तदा आद्य
मेकादशेकुर्याद्द्वितीयस्तेन तस्सपिंडनं धवलनिबंधे महागुरुनिपाते तु प्रेतकार्यं य
थाविधिः कुर्यात्संवत्सरादर्वागेकोद्दिष्टं न पार्वणं महागुरुः माता चैव तथा भ्राता भार्या
पुत्रस्तथा स्नुषा एषां मृतौ चरेच्छ्राद्धमन्यस्य न पतेः पितुः एतदपि सपिंडनपरं पितु
र्हिताकन्यस्य श्राद्धं गच्छेदित्यर्थः शुद्धितत्वे श्राद्धकौमुद्यां देवलः अन्यश्राद्धं परा
न्नं च गंधमाल्यं च मैथुनं वर्जयेद्गुरुपाते तु यावत्पूर्णो न वत्सरः पारस्करभाष्ये बृह
स्पतिः पितर्युपरते पुत्रो मातुः श्राद्धान्निवर्तते मातर्यपि च वृत्तायां पितुः श्राद्धादृते
समां समं पितरं विनान्यश्राद्धं नेत्यर्थः शुद्धितत्वे देवलः महागुरुनिपाते तु काम्यं
किंचिन्न चाचरेत् आर्त्विज्यं ब्रह्मचर्यं च श्राद्धं देवक्रियां तथा एतत्सपिंडनान्माग
ति केचित् तदुत्तरमपीत्यन्ये श्राद्धकौमुद्यां कालिकापुराणे पूर्वाङ्गे विशेषतः शिवा
पूजां प्रमीतपितृको नरः यावद्वत्सरपर्यंतं मनसापि न चाचरेत् केचित्तु पित्रोरब्दम
शौचं स्यात्त्वा एमासं मातुरेव च त्रैमासिकं तु भार्यायास्तदर्धं भ्रातृपुत्रयोरिति
स्मरंते सपत्नमातुरप्यर्धमाहुः श्राद्धकौमुदीकारस्तु द्वयोरेव महागुर्वोरब्दमे
कमशौचकं नान्येषामधिकाशौचं स्वजातिविहितात् कलौ त्रिसमूलजा
तत्कर्माविरोधान्निर्मूलमाह हेमाद्रौ भविष्ये गयाश्राद्धं मृतानां तु पूर्णेत्वब्दे प्रश
स्यते त्रिस्थलीसेतौ गारुडे तीर्थश्राद्धं गयाश्राद्धं श्राद्धमन्यच्च पैतृकं अब्दमध्ये

न कुर्वीत महागुरुविपत्तिषु इदं त्वर्थसपिंडनाभावे दृष्टो सपिंडनापकर्षे वृ
मध्येपि दर्शकार्यमेव पितुः सपिंडनं कृत्वा कुर्यान्मासानुमासिकमिति छंदो
गपरिशिष्टात् सपिंडीकरणादूर्ध्वं प्रेतः पार्वणभुग्भवेदिति मात्स्यात् ततः प्र
भृति वै प्रेतः पितृसामान्यमश्नुते विंदते पितृलोके च ततः श्राद्धं प्रवर्तते इति स्म
तीनाश्चेति शूलपाणिः यत्तु कात्यायनीयं सपिंडीकरणादूर्ध्वं न दद्यात् प्रतिमासिकं
एकोदिष्टविधानेन दद्यादित्याह शौनक तत्रैकोदिष्टविधिना न दद्यादित्यन्वयः तु
येपादेन पार्वणो विकल्प इत्यन्ये अत्रेदं तत्त्वं वृद्धिं विनार्वागपि सपिंडनापकर्षे पितृ
त्वप्राप्तिर्वर्षान्त एव कृते सपिंडीकरणे पितुः संवत्सरात्परं प्रेतदेहं परित्यज्य भोग
देहं प्रपद्यत इति विद्वद्धर्मोक्तेः अर्वाक् संवत्सराद्यस्य सपिंडीकरणं भवेत् प्रेतत्व
मपि तस्यापि ज्ञेयं संवत्सरं नृपेत्यग्निपुराणाच्च तेन तत्संवेपि वृद्धिदैवपित्र्येष्वन
धिकारः हाद्धि इति निमित्ते त्वनंतरमेव अर्वाक् संवत्सराद्वृद्धौ संपूर्णे संवत्
सरेपि वा ये सपिंडीकृताः प्रेता न तेषां तु पृथक्क्रियेति शातातपोक्तेः तथैव
काम्यमिति हेमाद्रिः धनदानादिवशाच्चैवेति तथा दर्शश्राद्धं गयाश्राद्धं श्राद्धं
वापरपक्षकं प्रथमेब्देपि कुर्वीत यदि स्याद्भक्तिमान्सुतः मासारब्धश्राद्धं तद्वा
निति मदनपारिजातादयः अन्ये यथा शूलमाद्युः तत्त्वं तु यदीदं समस्तं तदा वृद्धिं
विनापकर्षे वर्षेह अर्थे तु परमिति योज्यात् पतितानां गयायां विशेषो ग्रासे

क्रियते पतितानां च गते संवत्सरे क्वचित् देशधर्मप्रमाणत्वाद्गयाश्राद्धे स्वबंधु
भिः अथ विधानानि तत्र पंचकमृते मदनरत्ने गारुडे आदौ कृत्वा धनिष्ठार्धमेत
न्नक्षत्रपंचके रेवत्यंते सदाह्यमशुभे दाहकर्मणि शावस्य तु समीपेन क्षेप्तव्याः पुत्त
लास्तदा दर्भमयाश्चत्वारः ऋक्षमंत्राभिमंत्रिताः ततो दाहः प्रकर्तव्यस्तैश्च पु
त्तलकैः सह सूतकांते ततः पुत्रैः कार्यं शांतिकपौष्टिकं पंचकेषु मृतो यो वै न ग
तिं लभते नरः तिलांश्च हिरण्यं च तमुद्दिश्य घृतं ददेत् क्रियानिबंधे भाजनो
पानहौ छत्रं हेममुद्रां च वाससी दक्षिणा दीयते विप्रे सर्वपातकमोचनी मदन
रत्ने गार्ग्यः यदि भद्रातिथीनां स्याद्भानुभौमशनैश्चरैः त्रिपादर्क्षैश्च संयोगो द्व
यो र्योगो द्विपुष्करः द्वित्रिपुष्करयोगे तु मृतिर्दहनतरावहा दहने मरणे चैव वत्रि
गुणं स्यात्त्रिपुष्करे खनने व्यवमे वस्यादेतद्दोषोपशांतये तिलपिष्टैर्यवैर्वा
पि शरीरं कारयेत्ततः सूर्ये निधाय तत्कृत्य दाहयेपैत्रकोपरि तद्दाहे मंत्रमाह
बौधायनः अस्मात्त्वमिति मंत्रेण तिलपिष्टं प्रदाहयेत् द्वित्रिपुष्करयोर्दोष
क्षिमिकहेद्व्ययोहति वा सर्वे मरणे चेत्स्याद्धेवापि पुनर्मृतिः स्वर्णं दक्षिणां द
द्यात् कांस्यं वस्त्रमथापि वा वासं धनिष्ठाद्ये कुंभमीनास्थिते चंद्रे मरणं य
स्य जायते न तस्योर्ध्वगतिर्दृष्टा संततौ न शुभं भवेत् न तस्य दाहः कर्तव्यो वि
ना शांतेश्च पुत्रजं तथ अथवा तद्दिने कार्यो दाहस्तु विधिपूर्वकं धनिष्ठापंचके

नीवो मृतो यदि कथंचन त्रिपुष्करे याम्यभे वा कुलजान्मारयेद्ध्रुवं तत्रार
निष्टविनाशाय विधानं सम्यगीर्यते दर्भाणां प्रतिमां कार्याः पंचोर्णासूत्रवेष्टि
ताः यवपिष्टेनानुलिप्तास्ताभिः सह दाहयेत् प्रेतवाहः प्रेतसखः प्रेतपः प्रेतभू
मिपः प्रेतहर्ता पंच मंत्रनामान्येतानि चक्रमात् तत्र प्रतिमाः गंधपुष्पैः प्रपू
ज्यित्वा प्रथमां शिरसि द्वितीयां नेत्रयोः तृतीयां वामकुक्षौ चतुर्थीं नाभौ पंचमीं पा
दयोर्न्यस्य तदुपरि नाममंत्रैः घृतं हुत्वा यमाय सोमं संवत्सकमिति मंत्राभ्यां प्रत्येकं
नाम्नाज्यं हुनेदिति मदनः सूतकांते ततः पुत्रः कुर्याच्छांतिकपौष्टिकं कांस्यपा
त्रस्थितं तैलं वीक्ष्य दद्यात् द्विजन्मने ब्रह्मविष्णुमहेशानां द्रवकणप्रीतये ततः माष
मुद्गयवव्रीहितिलप्रियंगवादि प्रयच्छति सुवर्णदानं रुद्रजलक्षहोमो द्विजार्चनं गोभूदा
नं षडंगेन कुर्याद्दोषोपशांतये अपरार्के धनिष्ठापंचकमृते पंचरत्नानि तन्मु(?)
खे प्रास्याहुतित्रयं तयंतन्नारुते ह्वयामिति ततो निर्हरणं कुर्याद्दोषसागेनेर्वि
धिः सूतकः दुरंतं निखनने च जले वा प्रतिपादयेत् त्रिपादृक्षमृते तद्विहिरण्यप्र
काह्नमुखे तस्याधिकमयं कुर्यात्सकुंभप्रतिपाद्य वनिर्याजसाग्निकं कुर्या
द्ध्माग्नौ वाप्यमुत्सृजेत् तत्रैव कनकं हारकं नीलकं पद्मरागं च मौक्तिकं
पंचरत्नमिदं प्रोक्तं ऋषिभिः सूक्ष्मदर्शिभिः रत्नानां चाप्यभावेन सुवर्णं कर्षार्धमेव
वा सुवर्णस्याप्यभावेन आज्यं देयं विचक्षणैः मदनरत्नेप्येवं तथा एकादशे
राम
४४ कुर्यात्पुत्रस्तयं ततः होमं प्रतिमुखं कुर्यात्तयावह्वयामिति कांस्यपसंच कार्यो ३८२

382A

नफलं कांस्यतदर्धं वा तदर्धकं तत्र मूर्त्तिं त्रिपलं चापि दद्याद्विप्राय शक्तितः तथा
म्यत्र स्वगृह्योक्तविधानेन कृत्वाग्नेः स्थापनं ततः अन्वाधाने निर्दिशेत्स्यां देवता
नां तु याहुतिः यमाय धर्मराजाय मृत्यवे चांतकाय च वैवस्वताय कालाय सर्वभू
तक्षयाय च औदुंबराय दध्नाय नीलाय परमेष्ठिने वृकोदराय चित्राय चित्रगुप्ताय वै क्र
मात् विधिना श्रपणं कृत्वा एकैकामाहुतिं हुनेत् कृष्णां गां कृष्णवस्त्रं चैव हि निष्क
समन्वितं दद्याद्विप्राय शांताय प्रीतो भवतु मे यमः त्रिपादृक्षे यतदेव अपरार्के पुन
र्वसूत्तराषाढा कृत्तिकोत्तरफाल्गुनी पूर्वभाद्रा विशाखा च तेषु मेतत्त्रिपादा भमय
र चित्रे गार्ग्यः स्मृतः श्मशाने यो नीत उपजीवति मानवः गृहे यस्य प्रविष्टो सेपति
हेदयकदाचन अचिरात्स तु मायाति हतदारपरिग्रहः तत्र शांतिं प्रवक्ष्यामि धर्मरा
जमतं यथा सक्षीराणां घृतानां कानामग्रे कृत्वा मुखे बुधः औदुंबरीणां विधिवत्ततः
शांतिः कृता भवेत् सा विप्र बहुसहस्रेण क्षीर शांतिं च कारयेत् कपिलां तिलकां
स्यां च कृत्वां तेभ्यः रिदत्तं मोति अथ ब्रह्मचारिणस्तौ शौनकः ब्रह्मचारिणस्तौ तितं क
पयामि समासतः तत्राकीर्णदोषस्य प्रायश्चित्तं प्रशांतये द्वादशाब्दं षडब्दं वा अ
ब्दं शतयाथवा चरेत् स्मार्त्तको ब्रह्मचारी च नैधनं प्राप्नुयाद्यदि संयोज्य चार्के
विधिना संयोज्यो नोत तन्न्यर देशकालौ स्मृत्वा अमुकगोत्रामुकनाम्नो मृतस्य

ब्रह्मचारिणो व्रतविसर्गं करिष्ये इत्युक्त्वा हेमानांदीश्राद्धं कृत्वाग्निं प्रतिष्ठाप्याघा
रांते च तस्मिन्नाज्याहुतिभिर्व्रतपतये व्रतानुष्ठानफलसंपादनाय विश्वेभ्यो दे
वेभ्यश्चाज्यं हुत्वा स्विष्टकृदादानादि समाप्य पुनर्देशकालौ स्मृत्वार्कविवाहं करि
ष्ये इत्युक्त्वा हेमानांदीश्राद्धं कृत्वार्कशाखां शाखां वा एवं च हरिद्रया लिप्त्वा पीनसूत्रेण वस्त्र
युग्मेन वा वेष्टयित्वाग्निं प्रतिष्ठाप्याघारांते गन्धपेयहस्यनचे विवाहविधियोजकाय च
यस्यै त्वकामकामायेति कामाय स्वाहेति मिश्राज्यं हुत्वा स्विष्टकृदादि समाप्यार्कशा
खां शावे च दहेत् विधानमालायां येषां कुले ब्रह्मचारी निधनं प्राप्नुयाद्यदि तत्कुलं
क्षयमाप्नोति सोपि दुर्गतिमाप्नुयात् मृतस्य ध्रियमाणस्य बटुकं व्रतमादिशेत् त्रिरा
त्रो ब्रह्मचारी भूयाद्दद्यात् कौपीनकाञ्चनवान् हस्तमात्रा कर्णमात्रा दद्यात् कृष्णाजि
नानि च पावडुकाछत्रमाल्यानि गोपीचंदनमेव च मणिप्रवालमालाश्च सु
वर्णादि समर्पयेत् एवं कृते विधाने च विघ्नः कोपि न जायते अत्र मूलं मृग्यं पु
स्तिमत्तौ तु यमः मृतस्य कुष्ठिनो देहं निखनेद्दोषशान्तिकृत् वासरत्रितयं पश्चादुद्धृ
त्यान्यत्र तं दहेत् न गंगासु वनं कार्यमिति केचिद्विधिरुच्यते बटुव्रतस्य तेन विधिकृ
तं चरेत् ततोस्थिसंचयं तस्य गंगायां प्रक्षिपेत् सुधीः मासि मासि ततः कुर्यात् मासि
श्राद्धानि पार्वणानि तु इत्येतत् कुष्ठिमरणे कथितं शास्त्रकोविदैः शुद्धितत्त्वे भविष्ये

मरणे कृच्छ्रमणं विप्रउत्तरो नरत्तो गुरुं विचविकायउत्क्रमाच चैरीयस्तृतीयकः
विकर्त्तुर्ब्राह्मणानां गोचु हरु भस्मेति तयाब्दकमित्युक्ता मते च प्रायश्चित्तेर्थ्यमयवारु
मूलकं न पिंडं नोदकं कार्यं न च दानक्रियां चरेत् षाण्मासीये त्रिमासीये मृतः कृ
च्छ्रीकदाचन यदि स्तेस्मश्वरे हात्स्यति चांद्रायणं चरेत् अकृतप्रायश्चित्तकृच्छ्रादिदा
हे इदं प्रायश्चित्तं अन्तरा एव कुनख्यादि च कुष्ठिनोपि द्वादशरात्रं स्मृतिपाणिनोक्तं ॥
अन्तरा एवान्यदीयं कुष्ठिनो मरणं तन्मृतोचेत् युक्तं कोर्मे क्रियाहीनस्य मृत्सर्वस्य म
हारोगिणा एव च यः पच्चाद्वा चरणस्यात् कुमरणं तन्मृतोचक्रं महारोगास्तु वातव्या
ध्यश्मरी कुष्ठमेहोदर भगंदराः अर्शांसि ग्रहण्येत्यष्टौ महारोगाः प्रकीर्तिता इति र
जस्वलायास्तु वह्निशान्तिर्यः रजस्वलायाः प्रेतायाः संस्कारादीनि नाचरेत् ऊर्ध्वं
त्रिरात्रस्नातानां शवधर्मेण दाहयेत् अन्तः प्रक्षाल्य काष्ठवद्दग्धव्यसोर्ध्वं दहेत् सं
कटेन मदनरतेस्सत्यं तरे उदक्यासूतिकावामृतास्या यदि तांतदा आशौचे
त्वनतिक्रांते दाहयेदं नरायदि उध्यतेनन्तु तोयेन स्नापयित्वा तु मंत्रतः आपोहि
ष्ठेति तिसृभिर्हिरण्यवर्णाश्चतसृभिः पवमानानुवाकेन मेदं तीति च सप्तभिः
ततो यज्ञपवित्रैस्सा गोमूत्रेणायच द्विगाः स्नापयित्वा द्विसनेनाद्यायएवध
र्मतः दाहादिकं ततः कुर्यात् प्रजापतिवचो वं यथा यज्ञपवित्रमापो अस्यानि
तिमितास्वराणां पंचभिः स्नापयित्वा तु गव्यैः प्रेतां रजस्वलां वस्त्रांतराहृतां स्ना

त्वा दाहयेद्विधिपूर्वकं गृह्यकारिकायां अंतरिक्षमृतायै च वह्नाव प्सु प्रमा
दतः उदक्यासूतिका नारी चरेच्चांद्रायणत्रयं ततो यवपिष्टेनानुलिप्याष्टोत्तरशतस्यौदकैः
संस्नाप्यान्यवस्त्रेण वेष्टयित्वा दहेदिति मदनरत्ने प्रायश्चित्तमाह बौधायनः उदक्यासूतिका
मृतायै चरेच्चांद्रायणत्रयमिति सूतिकायास्तु मिताक्षरायां सूतिकायां मृतायां तु
कथं कुर्वंति याज्ञिकाः कुंभे सलिलमादाय पंचगव्यं क्षिपेत्ततः पुण्याभिरभिमं
त्र्यापो वाचा शुद्धिं लभेत्ततः तेनैव स्नापयित्वा तु दाहं कुर्याद्यथाविधिः अग्निं गा
मि मंत्रिसाभिर्वामदेव्याभिरेव च अन्येष्वा वारुणैर्मंत्रैः संस्नाप्य विधिना दहेत् गृ
ह्यकारिकायां सूतिका मरणे प्राप्ते सर्वौषध्यानुलेपनं अस्तकौतुसंस्रष्टः सू
तिकायां यदा साध्वी विपन्नातां मरणं तत् क्षिपेत् प्रायश्चित्ते विरोधस्तत्रैव सूतिकातु यदा
रणं गता त्रिवर्गस्य तां यं पंतं कृच्छ्रं सर्वदा इदं चाद्यमहो सूतिकातु यदा
नारी रजसा तु परिप्लुता म्रियते चेत्तु सा नारी द्विवर्षं कृच्छ्रमाचरेत् इदं द्वितीयमहो
सूतिकातु यदा साध्वी विपन्ना तां मरणं गता त्रिवर्षमेव दिनादर्वाग् एकादशेन विशु
ध्यति ऊर्ध्वं तु सूतिकातु यदा नारी प्राणांश्चैव परित्यजेत् मासमेकाश्च वाधि
पावद्भिः कृच्छ्रैः विशुध्यति गर्भिणीमृतौ तु मदनरत्ने शौनकः गर्भिण्युदक्यां
संस्कारं शिशुसंस्कारमेव च प्रवक्ष्यामि समासेन शौनकोहं द्विजन्मनां गर्भिणी
मरणे प्राप्ते गोमूत्रेण जलैः सह आपो हि ष्ठादिभिर्मंत्रैः प्रोक्ष्य मंत्रैः समास्थितः

384A

मृतं श्मशाने नीत्वा योनिरंध्रस्योदरं ततः पुत्रमादाय जीवं क्षेत्रं तेन दत्वा स्व
नायतु यत्तेस्ततः शाखायामग्नौ ग्रामे निधाय च उदरं चाव्रणं कुर्यात् स्यदा
ज्येन पूर्ववन्मन्त्रसमकं शाणौ मृगैराचो हिरण्यादिभिस्त्रिभिः स्नाप्य वाच्यवे
वासोभिः शवधर्मिणादाहयेत् नत्रैव षड्शीतमते गद्यानि गर्भिण्या मृताया
दक्षिणपार्श्वं सिरसं निधाय तस्या नाभिरंध्रान्तस्य समुदरं चतुरंगुलं हिरण्यगर्भः स
मवर्तेतेतिच्छित्वा गर्भं छेदप्रमाणं स्तप्रक्षाल्य निरवनेत्सयदि जीवन् जीवत्वं मम
पुत्रकेत्युक्त्वा क्षेत्रिये त्वेति पंचभिः स्नापयित्वा हिरण्यमंत्र धीयं भूमौ निधाय
आहुतिभिरभिमंत्र्य यस्ते स्तन शय इति स्तनं शय इति स्तनं पाययित्वा शिशुं ग्रामं
प्रापयेत् कूर्मच्छिद्रस्थले शतायुधायेति पंचाहुती हुत्वा ब्राह्मणाय रत्नहस्ता पूर्णेः स्वाहेः
त्यनवा का भ्यंगमाहत्याचाज्यं कृत्वा भिन्नमुदरं सूत्रेण संग्रथ्य घृतेनानुलि
प्य ब्राह्मणाय निलनाभ्यमिंस्तु वस्त्रं दद्यात् यथा पूर्वोक्तेन कल्पेन दहेत् वैधाय
नेन तु शतायुधायेति पंच होमानो तेरं पुपासाया पासाय विपासाय संयासा
ये द्यासाव वयासा स्वचे शेनकायनप तेन पल्येव ब्रह्म हत्याये सर्वस्मै इति ।
स्वाहांतैराहुतयोऽप्यधिका उक्ताः गृह्यकारिकायां यदा गर्भवती नारी स
शल्या संस्थिता भवेत् कुक्षिं भित्वा ततः शल्यं निर्हरेद्यदि जीवति प्रमीतं नि
खनेत्तं तु प्राय श्चित्तमतः परं सावित्र्या सिंचयेच्छाना स्वच्छे कुः शुध्यते शल्यदोषतः

सगर्भदहने तस्या वर्जितं च धपातकं प्रायश्चित्तं चरित्वा तस्य [illegible] पाय [illegible]
रिणः दग्धा तु गर्भसंयुक्ता अब्दकृच्छ्रं समाचरेत् अथान्वारोहणं अथान्वा
रोहणं स्त्रीणामात्मनो भर्तुरेव च सर्वपापक्षयकरं निरयोद्धारणाय च अ
नेकस्वर्गफलदं मुक्तिदं च तथैव च जन्मान्तरे च सौभाग्यधनपुत्रादिवृद्धि
दं देशकालौ स्मृत्वारुंधतीसमाचारत्व स्वर्गलोकमहीयमानत्वमनुष्यलोम
समसंख्याब्दावच्छिन्नस्वर्गवासभर्तृसहितत्व चतुर्दशेन्द्रावच्छिन्नकालिकश्री
मानत्वमातृपितृश्वशुरकुलत्रयपूतत्व ब्रह्मघ्नमित्रघ्नपतिपूतत्व पत्यवि
योगाकामा भर्तृज्वलनाधिरोहणं करिष्ये अनुगमने तु फलमुक्तिरन्यान्वा
रोहणं करिष्य इत्यूह्यं ततो हरिद्राकुंकुमांजनादिभूषणान्यासुवासिनीभ्यो दद्या

मंत्रस्तु

त् लक्ष्मीनारायणो देवो बलसंचगुणाश्रयः गाढं सत्त्वं चेमं दयाह्वायणोः परि
तोवत्तः सोपस्कराणि सूर्याय शिवाय गणेशसंयुतानि च लक्ष्मीनारायणप्रीत्यै
न त्वत्कामाददाम्यहं अग्नेः समीपमागत्य पंचरत्नानि पल्लवे नीराजनेन तयाव
ध्वा मुखे मुक्ताफलं न्यसेत् ततोग्निप्रार्थनं कृत्वा मंत्रेणानेन निश्चितं स्वाहा
संस्थे च निर्विशस्व सर्वतोऽत्र हुताशनः सत्यमार्गप्रदानेन नय मां पत्युरंतिकं ततो
[illegible] तेजोधिपतये विष्णवे सत्वाधिपतये कालाय धर्माधिपतये
पृथिव्यै लोकाधिपतये अद्भ्यो रसाधिपतिभ्यः वायवे बलाधिपतये आकाश

385A

यसर्वाधिपतये कालायपरमाधिष्ठातृभ्यः सर्वसाक्षिणीभ्यः ब्रह्मणेचवेदा
धिपतये रुद्राय श्मशानाधिपतये हुत्वाग्निंच प्रदक्षिणीकृत्य दृष्टदम्पर
लोकंच संपराप्नुयां जलिग्रहीत्वाग्निं प्रार्थयेत् त्वमग्ने सर्वभूतानामं
तश्चरसि साक्षिवत् त्वमेवदेवजानीषे विदुर्यानिमानुषाः अनुगच्छामि भ
र्तारं वैधव्यभयपीडिता सन्मार्गप्रदानेन यमां भर्तृ[illegible]के मंत्रमुच्चा
र्य[illegible] प्रविशेद्वह्निं [illegible] इमानारीरविधवा इति ॐ इमा वि
पतिमता [illegible] पापाः सुशोभनाः सह भर्तृशरीरेण संविशंतु
विभावसुं [illegible] विप्रः पठेत्पाकु कात्तुरं [illegible] सुप्तां देवदः शिष्या
चारुदीर्घ[illegible] अध्यापयेत् एतन्माहिमामितात्मरादौ [illegible] यः पद्मी
चैकोदये सर्वदे अनुव्रतंतीभर्तारं गृहात्पितृवनंमुदा पदे पदे श्वमेधस्यफ
लंप्राप्नोत्यनुत्तमं पतंगिराः यास्त्री [illegible] मानीयाः तं पतिमनुव्रजे
त् साच्चर्गमात्मघातेन नात्मानं नयतिनवेदितिपञ्चत्वमाप्नुयात् नचिर
येन सम[illegible] शोककर्षिता न ब्रह्मगतिमाप्नोतिमरणाद्यात्म
घातिनी अशौचे नित[illegible] प्राप्नोतिशास्त्रवत् इमानारीरविधवा
इति अरगवेद्वादः अशौचमन्वादाहुः पुण्यपरमितिस्मार्त्तैः निषेध

नि.सिं.
३८६

386

वाक्यानि प्राप्यस्त्रिना पंमरतेव तिजेन वा सहमरणनिषेधपराणीत्यपा
र्थः अत्र स्थिदाहेपत्न्याश्चदाहे वा न पृथक् त्रिदोषः अंगत्वेन स्यानापस्यावा
शारीरलब्धात् यत्तु ब्रह्मघ्नो वा मित्रघ्नो वा भवेत्यपिः पुनात्यविधवा
नारी नमादाय मृतानुयेति हारीतीयं तदाहादिनिषेधेन सहगमस्य दूरापा
स्तत्वादर्थवादमात्रमिति पृथ्वीचंद्रः जन्मांतरीयपापापनुत्तः सहमरणेनो
चार इति स्मार्तगौडाः शुद्धितत्त्वे व्यासः दिनैकगम्यदेशस्था साध्वी चेत्कृत
निश्चया न दहेत्तावत्स्वामिनं तस्या यावदागमनं भवेत् तत्रैव भविष्ये तृती
येह्नि उदक्यायां मृते भर्तरि वै द्विजाः तस्यानुमरणार्थाय स्थापयेदेकरा
त्रकं एकांचिन्मासमासाद्य भर्तारं यानुगच्छति तद्धर्ते यैः क्रियाकर्म सत
स्याश्च क्रियां चरेत् एतद्दशाहांते यश्चाग्निदाता प्रेतस्य पिंडं दद्यात्स एव
हि इति वायवीयोक्तेः आपस्तंबः चितिभ्रष्टा तु या नारी मोहाद्विचलिता भवे
त् प्राजापत्येन शुद्ध्येत तस्माद्वै पापकर्मणः तथा अन्वारोहे तु नारी
णां पत्युश्चैवोदकक्रिया पिंडदानक्रिया तद्दिने श्राद्धं पृथग्वार्षिकं तथा अत्र
चारोहे कृते पत्न्याः पृथक् पिंडास्तिलांजलीन् पृथक् शीलेन कुर्वीत दद्या
देकशीलां तथा अत्रान्यागुरूक्तं इदं गर्भिणीबालापत्यास्त्यतिकारणस्व
ला व्यभिचारिणीभिन्ने कार्यं स्वैरिणीनां गर्भिणीनां पतितानांच यावि

राम
३८६

386A

तां नास्ति पत्याग्निसंवेशः पतितौ हि तस्या उभाविति मदनरत्ने स्मृतिसं
ग्रहे केः मदनरत्ने बृहस्पतिः बालसंवर्धनं मुक्त्वा बालापत्या न गच्छति व्र
तोपवासनियता रक्षेद्गर्भं च गर्भिणी तृतीयेपादे रजस्वला सूतिका चेति र
एधींचं ब्रैगौणीयस्य छिन्नत्वे च पाठः तत्रैव बृहन्नारदीयेपि बालागत्याश्च
गमिष्यामि [illegible] रजस्वला रजस्तु ते नारी हंति चिंतां तु ता इति
महापतिव्रता सा संदीप्तं प्रविवेश हुताशनमिति भावप्रकाशे ऋग्वेदवादा
त्साध्वी स्त्री निष्पापा चापतिव्रतानामेवाधिकारेण दुहितॄणां यत्तु प्रूर
वमन्स च याः पूर्वं पतिं दुष्टेन चेतसा वर्तन्ते याश्च सततं भर्तॄणां प्रति र
कूलतः तत्रानुमरणकाले याः सर्वास्तादृग्विधाः कामक्रोधाद्भयान्मोहात्
त्सवीः एतामवस्थां ते ति भर्तृतत्त्वे स्मृतिकन्यायेन स्तावकामिति पश्चे
चेद्रुः ग्रास्नाएयाः शाकवितिरेव न पृथक्चितिः सगादीनाप्यप्रयोगः काचेतिक
त्यतस्तत्नाकरमदनपारिजातादयः शुद्धिचिंतामणौ चैवं तत्रान्वारोहणे म
अन्वितायाः प्रदानं व्याद्दशपिंडास्म हेण
तेशौचं तु त्र्यहमाशौचं पिंडदानं च अन्वितायाः प्रदीयते इति शुद्धितत्वे स्मृत्यर्थसारे च
तुरवाम्य शौचे मती ... तस्याः श्राद्धं ... प्रविशेद्या हुताशनं तस्याः पिंडादि
पेठीनसिस्मृतिः संस्थितं पतिमालिंग्य

कदेयं क्रमशः पतिपिंडवदिति त्रिकनम्रलपाणिस्मृतिः तत्त्वध्य तत्त्वासो ज्ञेः
अन्यत्राप्युक्तं यदा तु रजस्वला पियत्नीमृते यत्यौ देशकालवशान्नदेवाद्गच्छ
ति न शुद्धिं प्रतीक्षते तत्र विधिः देवयाज्ञिकनिबंधे यदा स्त्रिया मृदकायां पतिः
प्राणान्समुत्सृजेत् द्रोणमेकं तंदुलानामवहन्याद्धिशुद्धये मुसलाघातैस्तद
सकेस्त्रवंतैयोनिमंडलात् विरजस्कामन्यमानास्त्रेचिन्नेन तदस्त्रकुक्षये दृष्टा
णो वंप्रकुर्वीस पंचगव्यतिकयाप्रथक् त्रिंशद्विंशतिर्दश च गवादत्वा तु वसुः अ
मात् विप्राणां वचनात्कुर्यात्समारोहेहुताशने नारीणां सरजस्कानामियं
शुद्धिरुदाहृता अत्रस्त्राद्यादौ निर्णयः अग्निप्रवेशाशक्तौ तु विष्णुः मृते भर्तु
रि ब्रह्मचर्यं तदन्वारोहणं चेति ब्रह्मवैवर्ते मृतानुगमनं शक्तं वैधव्याच्च पालन
यन्तु तेनैव कालेन त्यागाति स्त्रीणां सहानुमेना हृते इति तद्ब्रह्मचर्याशक्यत्व
परं तथा च मनुः ब्रह्मचर्यं चरेद्वापि प्रविशेद्वा हुताशने काशीखंडेऽपि पत्यौ मृ
ते पियायो पिहि धर्मं पालयेत्कचित् सा पुनः प्राप्य भर्तारं स्वर्गलोकं सम
श्नुते अनुपाति न भर्तारं यदि दैवात्कथंचन तत्रापि शीलं संरक्षेच्छीलभं
गात्पतत्यधः न हैव ... यादपि स्वर्गात्पतति पतति रामपयात्तस्याः पि
ता च माता च भ्रातृवर्गस्तथैव च अथ विधवाधर्माः मदनरत्ने स्कंदे
विधवाकवरीबंधो भर्तुर्बंधाय जायते शिरसो वपनं तस्मात्कार्यं विधवे

यासदा एकाहारः सदा कार्यो न द्वितीयः कदाचन मासोपवासं वा कुर्याच्चां
द्रायणमथापि वा पर्यंकशायिनी नारी विधवा पातयेत्पतिं नैवांगोद्वर्तनं
कार्यं स्त्रिया विधवया क्वचित् गंधद्रव्यस्य संभोगो नैव कार्यस्तया पुनः
तर्पणं प्रत्यहं कार्यं भर्तुः तिलकुशोदकैः तत्पितुस्तत्पितुश्चापि नामगोत्रा
दिपूर्वकं इदमप्युत्तममिति मदनपारिजातः नाधिरोहेदनड्वाहं प्राणैः
कंठगतैरपि कंचुकं न परीदध्याद्वासो न विकृतं वसेत् वैशाखे कार्त्तिके माघे
विशेषनियमं चरेत् प्रचेताः तांबूलाभ्यंजनं चैव कांस्यपात्रे च भोजनं यतिश्च
ब्रह्मचारी च विधवा च विवर्जयेत् अथ शेषोऽत्र एमासानि तिमोऽल्प
भाविनमिति तदसवर्णापरमित्यपरार्कः अथ संन्यासः याज्ञवल्क्यः वना
द्गृहाद्वा कृत्वेष्टिं सार्ववेदसदक्षिणां प्राजापत्यां तदंते तानग्नीनारोप्य चात्म
नि अधीतवेदो जपकृत्पुत्रवान् अन्नदोऽग्निमान् शक्त्या च यज्ञकृन्मोक्षे म
नः कुर्यात्तु नान्यथा एतदाश्रमसमुच्चयपक्षे जाबालश्रुतौ चान्येऽपि पक्षाः
उक्ताः यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेद्गृहाद्वा अथ पुनरव्रती वा स्नातको
वास्नातको वोत्सन्नाग्निरनग्निको वा यदहरेव विरजेत्तदहरेव प्रव्रजेदिति
अंगिराः प्रव्रजेद्ब्रह्मचर्याद्वा प्रव्रजेच्च गृहादपि वनाद्वा प्रव्रजेद्विद्वानातु

रोवा यदुःखितः आतुरो मूर्खः दुःखि नक्षोरव्याघ्रादिभीत आरुते आतु
राणांच संन्यासेन विधिर्नैव च क्रिया प्रैषमात्रं समुच्चार्य संन्यासं तत्र पू
रयेत् जीवालश्रुतावपि यद्यातुरः स्यान्मनसा वाचा वा संन्यसेदिति
अत्र विप्रस्यैवाधिकारः ब्राह्मणाः प्रव्रजंतीति जावालश्रुतेः आत्मन्यग्नीन्
समारोप्य ब्राह्मणः प्रव्रजेद्गृहादिति मनूक्तेश्चेति विज्ञानेश्वरादयः वृद्ध
याज्ञवल्क्येऽपि चत्वारो ब्राह्मणस्योक्ता आश्रमाः श्रुतिनोदिताः क्षत्रिय
स्य त्रयः प्रोक्ता द्वावेको वैश्यशूद्रयोरिति माधवस्तु ब्राह्मणः क्षत्रियो वा
पि वैश्यो वा प्रव्रजेद्गृहादिति कौर्मोक्तेः त्रयाणामप्यधिकारः एवं वार
कं तु काषायदंडादिनिषेधार्थं मुखजानामयं धर्मो यद्विष्णोर्लिंगधारणं
राजन्यवैश्ययोर्नेति दत्तात्रेयमुनेर्वचः इति बोधायनोक्तेः इति पक्षांतरमा
ह तत्त्वं तु टीकादिपरमेतदिति योपि संन्यासं पलयेत् [illegible] मिति कलौ
निषेधः सोपि त्रिदंडपरः [illegible] प्राक् सच संन्यासश्चतुर्धा इत्याह हारी
तः कुटीचको बहूदको हंसश्चैव तृतीयकः चतुर्थः परमो हंसो यो यः
पश्चात्स उत्तमः आद्यः पुत्रादिना कुटीं कारयित्वा तत्र गृहे वा वसन्
काषायवासाः शिखोपवीती त्रिदंडवान् बंधुगृहे [illegible] जानन् आ
त्मज्ञो भवेत् एतदन्यत [illegible] हित्वा ससंभार

388A

त्रिभिर्भैक्षं चरन् पूर्वोक्तवेषः स्यात् हंसस्तु पूर्वोक्तवेषोप्येकदंडः ए
कं तु वैणवं दंडं धारयेन्नित्यमादरादिति स्कंदात् विष्णुरपि यज्ञो
पवीतं दंडं चैव वस्त्रं जंतुनिवारणं तावान्परिग्रहः प्रोक्तः नान्योस्य परिग्र
हः वस्तुतोपि स्कांदे परिहंसस्त्रिदंडं च रज्जुं गोवालनिर्मितां शिखाय
ज्ञोपवीतं च नित्यकर्म परित्यजेत् अयमप्येकदंड एव यत्तु शिखायज्ञोपवी
तादित्यागनिषेधास्ते कुटीचकादिपराः यत्तु मेधातिथिः यावन्न स्युस्त्र
यो दंडास्तावदेकेन वर्तयेदिति तदपि तत्परमेव यच्चात्रिः चत्वारो भिक्ष
वः प्रोक्ताः सर्व एव त्रिदंडिन इति तद्वाग्दंडादिपरं न यष्टिपरं वाग्दंडोथ
मनोदंडः कर्मदंडस्तथैव च यस्यैते नियता दंडाः स त्रिदंडीति चोच्यते
इति मनूक्तेः तस्मात्परमहंसस्यैकदंड एव सांख्याविदुषः । विदुषस्तु
सोपि नास्ति न दंडं न शिखा नाच्छादनं चरति परमहंस इति महोपनि
षदुक्तेः ज्ञानमेवास्य दंड इति वाक्यशेषाच्च यत्तु यमः काष्ठदंडो ध
तो येन सर्वाशी ज्ञानवर्जितः स याति नरकान् घोरान् महारौरवसं
ज्ञितानिति तद्वैराग्यं विना जीवनार्थसंन्यासपरं एकदंडं समाश्रि
त्य जीवंति बहवो नराः नरके रौरवे घोरे कर्मत्यागात्पतंति वै इति

ह

इति स्मृतेः ॥ यच्चात्रिमते धर्मे एकादशी द्वादशी वा शिखामुण्डिता एव वा का
यमात्रसारोऽपि यतिः प्रेतत्वे पिण्डरेति तस्यापि सर्वोऽप्यवस्था ज्ञेया ॥
अत एव हि विधिबोधायनः कृत्वा श्राद्धानि सर्वाणि पित्रादिभ्यो यथाक्रमः प्र
क्षालयित्वा च केशादीन् मार्जयेत्यात्मकाम्यः सर्वाणीति स्वरूपेण वश्या
दृष्टोऽष्टश्राद्धादि कार्यमित्यर्थः ॥ सन्न्यासी सोऽपि एकोद्दिष्टविधानेन कुर्या
च्छ्राद्धानि षोडश अग्निमान् पार्वणेनैव विधिना निर्वपेत्स्वयमिति कात्याय
नः ॥ कृष्णसप्तचतुरः कृत्वा पावनार्थमना स्मृतौ आत्मार्थं चेन्न सह कृष्णे नाश्मे
पा गच्छतो ब्रजेत् ॥ बौधायनः सदैव मार्गे कृत्वा प्रियतमात्रकमान्तरेषु ॥ भो(
नकं चात्मन आत्मने अष्टौ श्राद्धानि निर्वपेत् ॥ अष्टकाममाह हेमाद्रौ शौनकः ॥
देवश्राद्धं ऋषिश्राद्धं महेश्वरा देवताः ॥ आद्ये देवर्षिसंघातः देवर्षिसत्र
र्षिमनुष्याश्चैव वामरो आदिक्षत्रपपद्मनिसंन्यासपहृतो न छिन्नं दिव्य
वसुरुद्रादित्या मानुषे सनकसनंदनसनातनाः ॥ भूतश्राद्धे पृथिव्या
दिभूतानि च सह रादिकारणानि चतुर्विधो भूतग्रामश्चेति सत्वः ॥(
पित्र्ये पित्रादित्रयो मातामहाश्च मातृके मात्रादयस्त्रिस्त्रः ॥ आत्मश्राद्धे
आत्मपितृपितामहा देवताः ॥ आत्मश्राद्धं परमात्मदैवत्यमिति संर(

389A

आसपदितो सर्वत्र चनांदीमुखत्वं च विशेषणं ज्ञेयं सर्वत्र पिंडदानं युग्मा वि
शाः दक्षक्रतुसंज्ञकौ वा विश्वेदेवौ अन्यन्नांदीश्राद्धवदिति हेमाद्रिः स्वस्त्यर्थ
ताः केशश्मश्रुलोमनखं वापयित्वा प्रकल्पयेत् दंडं जलपवित्रं च शिक्यं
पात्रं कमंडलुं आसनं कौपीनमाच्छादनं कंथां पादुके इति दशपंच वा एतत्स
र्वं पूर्वेद्युर्नांदीमुखं कृत्वापरेद्युः पुण्याहवाचनं कृत्वा कार्यमिति शौनकः ।
बोधायनः वैणवं दंडं अंगुलस्थान्वरणवान् मूर्धसंमितान् एकादशनवादि त्रि
ततः समान्यपर्वकान वेष्टितान् कृष्णगोवालरज्ज्वा चतुरंगुलान् एको वा तादृशो ।
दंडो गोवालसदृशो भवेत् अनग्निरग्निमुत्पाद्य नित्येन विधिना ततः पृष्ठो
दिवविधानेनत्यर्थः स्वाग्नावेवाग्निमान् कुर्यादयवर्गोत्[illegible]दितः आज्यपयो
दधीत्येतत्त्रिवृदाजलमेव वा ओं भूरित्यादिना प्राश्य रात्रिं तापवसेत् ततः आ
यादित्यस्थालमपात्सर्वमग्नीन् विहृत्य सः आज्यमनेनागार्हपत्ये संस्कृत्ये
तेन [illegible] स्रुचा परणीयाहवनीये जुहुयात् आ[illegible] एवेन ततः उत्सन्चाधानमेत
त्स्यादग्निहोत्रे हुते ततः संतीर्य गार्हपत्यस्य गर्भानुत्तरतो उत्तपात्राण्या
साद्य दर्भे श्रुवस्रुचापत्तन एवत जागरयांद्वा त्रिमेतां तु यावत्प्रातर्होमं हुत्वे
कः अग्निहोत्रं स्वकालेन हुत्वा प्रातःस्नानं ततः इष्टिं वैश्वानरीं कुर्यात् त्वा

नि.सिं.
३९.

390

जापत्यामथापि वा जावालश्रुतौ तदेके प्राजापत्यामेवेष्टिं कुर्वंति
तदु तथा न कुर्यादाग्नेयीमेव कुर्यादित्युक्तं तेनात्र विकल्पः
अत्राहुः केचनाग्नेः प्राजापत्या न कार्या शेषेऽग्नीनिति वहुश्रुतेः एकाग्ने
स्त्वाग्नेयीति अनाहिताग्नेरिष्टिर्नैवैश्वानर आग्नेयो वा चरुरिति माधवः
कात्यायनः आत्मन्यग्नीन्समारोप्य वेदिमध्यस्थितो हरिं ध्यात्वा हृदि
त्वनुज्ञातो गुरुणा प्रैषमीरयेत् कपिलः विधिवत्प्रैषमुच्चार्य त्रिरू
पांशु त्रिरुपांशु त्रिरुच्चकैः अभयं सर्वभूतेभ्यो मत्तः स्वाहेत्यथो भुवि नि
नीय दंडशिक्यादि गृहीत्वा प्रव्रजेत् वौधायनः सखे मेत्यादिना
दंडं येन देवाः पवित्रेण यदस्य पारे रजस इति शिक्यं तु पात्रं व्याहृतिभिस्तथा युवा
सुवासा कौपीनं गृहीत्वा वाधवा त्यजेत् अपरार्कः तत्र संन्यासे वि
कारसिद्ध्यर्थं तस्य नववर्षाद्भवो दशाब्दं वा सपिंडनानि साग्निः पार्वणं
न्यनाग्निस्त्वेकोद्दिष्टविधिना कृत्वा नाश्रमी चेत्कुर्युः चतुर्थमन्यस्तु
तत्र कुर्युः कृत्वोदगयने एकादश्यां द्वादश्यां वा साग्निरमावास्यायां पौ
र्णमास्यां चतुर्दश्यां वा यथापूर्वं प्राजापत्या स्यात् तत्राद्देशकालौ
स्मृत्वा परमहंसादिसंन्यासग्रहणं करिष्ये इति संकल्प्य गणेशं संपूज्य

राम
३९.

390A

प्युण्याहं वाचयित्वा मातृकापूजां हाद्धिश्राद्धं च कृत्वा स्तमयात्प्रागौ
पासनं समिध्याहिताग्निस्तु गार्हपत्यं विसं धुरो गिरहोत्रीन्तु त्रिकां
डमंडनोक्त दिशा कुशापल्या सह पवमाने स्तं नदर्णाद्रुत्यं जे वाधान कु
र्यात् ब्रह्मचारी चे ल्लौकिके विधुरश्चे छाहुतिभिः प्रणवेन चाग्निमाः
दायान्वग्निरूप्य स्यामित्यानीयप्रत्वो दिवीति निधाय तेनैव सामिध्यत
त्सवितुः तां सवितुर्विष्कानिन इति तिस्त्रः सामिधोभ्यादध्यात् एवमग्नै
सिद्धे कक्षोपस्थवर्जं वपनं कृत्वा स्नापयो दधिघृतमाज्यम यो वा ॐ भूः
सावित्रीं प्रविशामि तत्सवितुर्वरेण्यमिति प्राश्य पाचम्य पुनरादाय ॐ भुवः
सावित्रीं प्रविशामि भर्गो देवस्य धीमहीति द्वितीयं ॐ स्वः सावित्रीं प्रवि
शामि धियो योनः प्रचोदयादिति तृतीयं समस्तया चान्तर्यं ॐ भूर्भुवः स्वः
सावित्रीं प्रविशामि तत्सवितुर्यावत् इति संन्यासपद्धतौ नन्दत्रिदसीति
प्रथमं प्रहदसीति द्वितीयां चिद्दसीति तृतीयं प्राश्याद्यः पुनन्त्विति जल
प्राश्य सावित्रीं प्रवेशउक्तः तत आवाहनीयं विहृत्य ब्रह्माणमुपवेश्याग्नेः
संस्कृत्य चतुर्दश वा गृहीत्वा सामिधं वामेः स्वाहा परमात्मने इदं मि

ति कृत्वोपवसेत् ततः सायं होमं वैश्वदेवं च कृत्वाग्नेरुदक् कुशानास्तीर्य दं
डादीनि दशायं च वासांसि अग्न्यगारे कृष्णाजिनोपविष्टो रात्रौ जागरं कृत्वा प्रा
तर्होमानंतरं प्राजापत्यां वैश्वानरीं वा कृत्वा ऋत्विग्भ्यः सर्वस्वं ब्राह्मणेभ्यश्च
मध्यस्थ एणेनैजसपात्रं दत्वा दारुपात्राण्याहवनीये मम मन्त्रमया निचजले प्रक्षि
पेत् कृष्णाजिनं त्वाददीत अथ नाहिताग्निस्तु वैश्वानरमाग्नेयं चरुं कृत्वा पा
त्राण्यग्नौ दिग्ध्वा भूर्भुवः स्वरित्ययः स्व...नरन्तस्मंदीत्समंदीति जप्त्वा विप्रा
न् संभोज्य पुण्याहं वाचयित्वाऽत्र वाचमनं कृत्वा हेमरूप्यकुशजलैः स्नात्वा
पुरुषाय चरुं च जुहुयात् अत्र विरजाहोमं केचिदाहुः यथोक्तैर्हविर्गी
तास्तु जुहुयाद्विरजामंत्रैः प्राणापानादिभिस्ततः अनुवाकान्तमेकादशः स
मिदाज्यचरून् स्वयंपाक श्रावन्म्यग्निं समारोपयाते अग्नेति मंत्रतः ॥ भस्मा
दायाग्निरित्याधेर्विमुच्यंतानि संस्पृशेत् पापैर्विमुच्यन्ते सत्यं मुच्यन्ते
च न संशयः यथा प्राणापानव्यानोदानसमाना मे शुध्यन्तां ज्योतिरहं वि
रजा विपाप्मा भूयासं स्वाहा सर्वत्र लिंगोक्तदेवताभ्यस्त्यागः वाक्
मनस्त्वक्चक्षुःश्रोत्रजिह्वाघ्राणरेतोबुद्ध्याकूतिसंकल्पा मे शुध्यन्तां
ज्योतिः त्वक्चर्ममांसरुधिरमेदोमज्जास्नायवोऽस्थीनि मे शुध्यन्तां ज्यो

391A

तिः त्वक्चर्ममांसरुधिरमेदोमज्जास्नायुवोस्थीनि मे शुध्यंतां ज्योतिः
शिरःपाणिपादपार्श्वपृष्ठोरूदरजंघशिश्नोपस्थपायवो मे शुध्यंतां ज्यो
तिः शब्दस्पर्शरसरूपगंधा मे शुध्यंतां ज्योतिः मनोवाक्कायकर्माणि मे
शुध्यंतां ज्योतिः अव्यक्तभावैरहंकारैर्ज्योतिः आत्मा मे शुध्यंतां ज्योतिः
अंतरात्मा मे शुध्यंतां ज्योतिः परमात्मा मे शुध्यंतां ज्योतिः अन्नमयप्रा
णमयमनोमयविज्ञानमयआनंदमयपरमात्मा मे शुध्यंतां ज्योतिः क्षुधे
स्वाहा क्षुत्पिपासाय स्वाहा ऋग्विधानाय स्वाहा कषोत्काय स्वाहा
क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहं अभूतिमसमृद्धिं च सर्वां
निर्णुद मे पाप्मानः स्वाहेति ततः स्विष्टकदादि कृत्वा ब्रह्मणे हिरण्यमाज्य
पात्रं धेनुं च दत्वा समासिंचत्यित्युपनिषत् अत्र केचिदनग्नेः सावित्री
प्रवेशं संन्यासांगमिच्छन्ति ततो जातवेदसं [illegible] पाहि पातन्त्ररेति त्रिःस्थिरैकैकं
जिघ्रन्नात्मन्यग्नीन् समारोप्य गुरवे सर्वस्वं दत्वा ब्राह्मणानां विरधान्तिम्
वैष्णवो हे वेदांश्च प्रहिणोति तस्मै तंह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शर
णमहं प्रपद्ये [illegible] स्यान्ते दक्षिणं पाणिं प्रमयादावुपसंगृह्याधीहि भगवान्

ऽसीति वदेत् ततो गुरुरात्मानं ब्रह्मस्वरूपं ध्यात्वा स्वं द्वादशप्रणवैरभिमंत्र
ितेन शिष्यमभिषिच्य शन्नो मित्र इति शांतिं पठित्वा तच्छिरसि हस्तं दत्वा
पुरुषसूक्तं जपित्वा मम व्रते हृदयं ते दधामीति च जपित्वोदङ्मुखः प्रणवा
र्थमनुसंदधद्दक्षिणे कर्णे प्रणवमुपदिश्य तदर्थं च पंचीकरणप्रबंधो
क्तं अयमात्मा ब्रह्म तत्त्वमसि प्रज्ञानं ब्रह्मेत्याद्युपदिशेत् तदर्थं च वदेत् आत
तो नाम दद्यात् ततः शिष्यस्तेनोपदिष्टो हरिं स्मरन्नूर्ध्वबाहुस्तिष्ठन् दे
वास्त्रिःप्रदक्षिणं कृत्वा ओं भूर्भुवः स्वः संन्यस्तं मयेति त्रिरुपांशु त्रिरुच्चैस्त्रि
रत्युच्चैरुक्त्वा जलसमीपं गत्वा स्नात्वा अभयं सर्वभूतेभ्यो मत्तः स्वा
हेति त्रिरंजलिं क्षिप्त्वा पुत्रवासस्वासा इति काषायं कौपीनं वासश्च परिधा
य सखा मा गोपायेति मुखं वैणवं पालाशं वैल्वमौडुंबरं वा दंडं गृह्णीया
त् अत्र पुत्रकामो गृहस्थः शंखेन पुरुषसूक्तेन दंडमभिषिच्य दद्यादि
त्याचारः ततः शिखामुत्पाट्य ओं भूः स्वाहेत्यग्नौ जले वा हुत्वा तथैवोप
वीतं हुत्वा येन देवाः पवित्रेणेति जलपवित्रं यदस्य पारे इति शिक्यं सा
वित्र्या कमंडलुं सव्याहृतिभिर्भैक्षपात्रं ओं अन्नपात्रमिदं विष्णुरित्यास

392A

नेहंसी चाग्रहीत्वा ॐ भूः स्तर्पयामीति मस्तसमस्ताभिर्महर्जनमइति तर
र्पयित्वा ॐ भूः स्वधों भूर्भुवः स्वर्महर्नमः स्वधेति पितॄंस्तर्पयित्वोदुत्यं
चित्रंतच्चक्षुर्हंसः शुचिषन्नमो मित्रस्येति सूक्तात्वा उरभिमन्त्रिताभिरापो
हिष्ठेति हिरण्यवर्णाभिः पावमानीभिरापो हितिभिश्च मार्जयित्वा ऋतंचेत्तर
शानमघमर्षणं प्राणायामांश्च कृत्वा ॐ भूर्भुवः स्वरिति पठित्वा नमः स
विवे इति सूर्यमुपस्थाय पुनः स्नात्वा जंघे प्रक्षालयित्वा ॐमिति ब्रह्मेति
तीदं सर्वमेवामिमिति ब्रह्मवाप्यज्योतिर्यस्य वेदोपरावतपतिवेश्मवेन
यएवं वेदो यदच नमस्तीति जपित्वा ब्रह्मसहस्रं गायत्रीं जपेदिति अथयति
धर्माः प्रातरुत्थाय ब्रह्मसत्यं स्यन्ते इति जपित्वा दंडादीनि सदं च निधाय परित्र
पुरीषयोर्गृहस्थवच्चतुर्गुणं शौचं कृत्वा चम्य पर्वद्वादशीवर्जं प्रणवेन दंतधा
वनं कृत्वा तेनैव मृदा बहिः कटिप्रक्षाल्य जलतर्पणवर्जं स्नात्वा पुनर्जंघे
प्रक्षाल्य वस्त्रादीनि गृहीत्वा मंत्रेनाने स्नात्वा केशवादिनमोन्तनामभिस्त
र्पयित्वा ॐ भूः स्तर्पयामीत्यादि मस्तसमस्तव्याहृतिभिर्महर्जनं स्तर्पयामी
ति तर्पयेत ॐ भूः स्वाहेति स्वाहान्तैरांकानेभिरेव पुनस्तर्पयेदिति केचि
त् ततआचम्यांजलिना प्रणवेन जलमादाय व्याहृतिभिरुध्वस्य गाय

शावकोतैः स्य
धा २

मात्रिः सिद्धगायत्रीं जपेत् उदिते सूर्ये प्रणवेन जलमादाय आहुतिभि
र्वार्घ्यं त्रिर्दत्वा मित्रस्य वर्षणीत्यादिभिः एवोक्त सौरीभिरिदं विष्णुस्त्रिर्देवो
ब्रह्मजज्ञानमिति चोपस्थाय सर्वेभ्यो नम इति प्रदक्षिणमावर्तेत
ततो नत्वा आदित्याय विद्महे सहस्रभाय धीमहि तन्नः सूर्यः प्रचोदया
दिति त्रिर्जपेत् एवं त्रिकालं विष्णुपूजां ब्रह्मयज्ञं च कुर्यात् अथ भिक्षा
विधूमे सन्नमुसले व्यंगारे भुक्तवर्जने काले पराङ्मुखे पिष्टे नित्यं भिक्षां
यतिश्चरेदिति भिक्षाकाले उपस्थिते तत्सवितुरादित्यमुपस्थाय तेनैव
ध्यात्वा कृष्णेनेति प्रदक्षिणं कृत्वा येते पंथान इति जप्त्वा योसौ विष्णुश्चा
रव्ये आदित्ये पुरुषोन्तर्हृदि स्थितः सोहं नारायणो देव इति ध्यात्वा प्रणा
म्यतं त्रिदंडं दक्षिणे त्वगेन ततः संध्यय वाऊना पात्रं वामकरे क्षिप्ताङ्गे षये
दक्षिणे नास्तीति वौधायनोक्त दिशा श्रीत्यं च सप्त चागरहान् गत्वा भवत्पूर्वं
भिक्षां याचित्वा एषणीमसि पूर्णमेव भूया इत्या गत्य शुचिस्त्रं प्रोक्ष्य ॐ भूः
स्वधान प्र इत्यादिव्यस्तसमस्तमान्ध्रतिभिः सूर्यादिदेवेभ्यो भूतेभ्यश्च भू
मोक्षिमा भुक्त्वा प्रणवेन षोडश प्राणायामान् कुर्यादिति संक्षेपः गोतमका
रकायां भवतुः यतिहस्ते जलं दत्वा भैक्षं दद्यात्पुनर्जलं भैक्षं पर्वतमात्रं

393A

स्यान्नजलं सागरोद्यमं अत्र सर्वत्र मूलं माधवापरार्कमदनरत्नस्मृत्य
र्थसारादौ नैवं कएव एकरात्रं वसेद्ग्रामे नगरे पंचरात्रकं वर्षाभ्योन्यत्र
वर्षासु मासांस्तु चतुरो वसेत् जावालश्रुतौ शून्यागारदेवगृहतृणकु
टीवृक्षमूलकुलालशालाग्निहोत्रगृहनदीपुलिनगारकुहरनिर्झरस्थण्डिले
ष्वनिकेतनइति मात्स्ये अष्टौ मासा विहारः स्याद्यतीनां संयतात्मनां ए
कत्र चतुरो मासान् वार्षिकान्निवसेत्पुनः अविमुक्ते प्रविष्टानां विहार
स्तु न विद्यते अत्रिः भिक्षाटनं जपं स्नानं ध्यानं शौचं सुरार्चनं कर्तव्यानि
षडेतानि सर्वथा नृपदंडवत् मंचकं शुक्लवस्त्रं च स्त्रीकथां लौल्यमेव च दि
कस्वापं च कंबलं वस्त्रं च स्त्रीकथां लौल्यमेव च दिवास्वापं च यानं च य
तीनां पतनानि षट् आसनं लोभश्च संचयः शिष्यसंग्रहः दिवास्वापो ह्य
प्याज ल्यायतेर्वे चकराणि षट् दक्षः नाध्येतव्यं न वक्तव्यं न श्रोतव्यं कथंच
न याज्ञवल्क्यः यतिपात्राणि मृद्वेणुदार्वलाबुमयानि च मदनरत्ने त्रिः
पित्र्यर्थकल्पितं पूर्वमन्नं देवादिकारणात् वर्जयेत्तादृशीं भिक्षां परबा
धाकरीं तथा बृहस्पतिः न तीर्थवासी नित्यं स्यान्नोपवासपरो यतिः न
चाध्ययनशीलः स्यान्न व्याख्यानपरो भवेत् एतद्विदार्थं भिन्नपरं अत्रिः स्ना
नं सुरार्चनं ध्यानं प्राणायामो बलिः स्तुतिः भिक्षाटनं जपः संध्यान्यासः

कर्मफलस्य च ग्रोतपतिधर्मोऽस्ति सर्वैः [illegible] मन्ये पिमाधवादिभि
ताक्षरादौ ज्ञेयाः यतिधर्मसमुच्चयेन स्नानमाचरेद्विरुत्तः पुत्रादिनि
धनेऽकृते [illegible] स्वयं स्नात्वा स्नात्वा शुध्यति संवरः प्रथाप्रयति संस्का
रः सत्यर्थसारो सर्वसंगनिहत्यस्य ध्यानयोगरतस्य च नतस्य द
नकार्यं नाशौचं नोदकक्रिया न या कुटीचकं तत्प्रदेशे स्वरवे च व द्रु
दकं हंसो जले न तिक्षिप्यः परमहंसं प्रपूरयेत् पलाशमूले नदी
तीरे स्नात्वा गंधपुष्पाक्षतं कृतं शवं वा घघाणे नीत्वा दंडमात्रं खा
हृतिभिः स्नात्वा सप्तव्याहृतिभिस्त्रिः प्रोक्ष्य दर्भानास्तीर्य नव घटं प
चगव्योदकं क्षिप्त्वा नारायणः परब्रह्मेत्यभिमंत्र्य तेनैव संस्नाप्याच्छा
दयित्वा वस्त्रं गंधपुष्पाद्यपयोप्यानं दत्वा चिमोस्व्य रक्षस्वेति शवं गर्त्ते नि
धायेदं विष्णुरिति दक्षिणहस्ते दंडं पदस्य पार्श्वे इति सव्ये शिक्यं येन दे
वाः पवित्रेणेति सुरेवं जलपवित्रं सावित्र्यादरे पात्रं भूमिरस्मै ते ति
गुह्ये कमंडलुं निधाय चित्तिः स्रुगिति दशहोत्राभिमंत्र्य यदिति वि
ष्णोदर्वीं टीकायां स्मृत्यर्थसारे च ह्रस्वेनैव कर्त्तव्यानि पुरुषस्य
तेन स्नापयित्वाप्यायित्वा वटं ततः प्रणवेन तन्मध्ये चारं प्रोक्षयेत्

यि

राम
३९५९३

अथ सर्वेनः विष्णो हव्यं रक्षस्वेति भुजष्या पूर्णावेन च गर्ते
ष्य चेदं विष्णुर्विचक्रमे इति मंत्रेण दंडं तद्द्वादशिण हस्तकामस्याधा
वः स्वश्रोत्रियं नाशरेवनभेदयेत् गर्तं पुरुषसूक्तेन लवणेन पूरयेत्
गालश्वादिरक्षार्थं सम्यग्गाम्पूरयेदिति कुटीचकस्य तु दाहः कार्य
या सर्वप्राग्वत्कृत्वाग्निं प्रज्वाल्य सागेन दक्षिणकरे उपावरोहेत्यवरोह्य
निर्मथ्य वा गृह्यविधिं कृत्वाग्निनाग्निः समिध्यत इत्याग्निं दत्वा सावित्र्या प्र
णवेन वा दहेत् ततो दशरात्रं प्रणवेन नारायणः परं ब्रह्मेति च जप्त्वा सशिरः
प्रणवव्याहृत्या गायत्र्याः तद्भस्मास्थि नीत्वा क्षिप्त्वास्त्वा नाशुचिः नास्यान्य
दौर्ध्वदैहिकं त्रिदंडग्रहणादेव प्रेतत्वं नैव जायत इति उशनःस्मृतेः एका
दशेहि पार्वणं तदपि त्रिदंडिनः हंसपरमहंसादीनां पार्वणादिकं म
प्येन कार्यमिति स्मृतिपारिः श्राद्धचिंतामणौ ब्रजागेयः एकोद्दिष्टं ज
लं पिंडमाशौचं प्रेतसत्क्रियां न कुर्यात् पार्विकादन्यद्ब्रह्मीभूताय भिक्षवे
प्रेतक्रिया एकोद्दिष्टविधेर्निषिद्धे पुनस्तत्र हरणमात्रं केपरं ने न तत्पार्व
णमेवास्त्रिहिनं द्वादशे नारायणबलिः तद्विधिरन्यत्र विशेषः प्रागुक्तः
इति लंबवुह्ना एवं निरूपितमिदं गहनं धर्मतत्त्वं विचार्यं वचनैस्मृत

त्ववावत् तद्दोषं क्षमयन्त्वयं विवेचनीयं विद्वद्भिरित्यविरतप्रणतो ऽ
स्मि तेभ्यः मया सद्भाग्यादिदृग्गादितं मंदमतिनापि मेतच्छं वाध्यवस्ति
तम अधिस्वल्पमतिना तदेवं यत्किंचित्तत्र बाधितमिहाविरत्यानतमत्किमाप्रतायोग्यं
सर्वो विकसतितनुपि ... धो भाट्टतंत्रगवनालीवकाशाधारः साक्षा
तरेभ्यो निखिलेभ्यः ... क्रमः किल कृतः कमलाकरेण प्रीतो
ऽस्तु नारायणकृतीबुधगमकृष्णः ३ श्रीमद्भट्टरामेश्वरसूरिसूनु श्रीमद्भट्टनाराय
णस्तत्सूनोः श्रीरामकृष्णस्य सुतः कृतीमं ग्रंथं निबंधं कमलाकराख्यः
४ नानानिर्णयचलान्निर्णयसिंधुं प्रेक्ष्यंतां विबुधाः निर्णयसरोजज्योतनि
र्णय कमलाकरो यमकरू वसुऋतु ... भे निजे गतेब्दे नरपतिविक्रमतो यथामि
तौद्रे नृपसिंहविवातैर्यो समाप्तिनामरघुपतिपादसरोरुहेऽर्पितश्च ६ ...
सकलविद्यासिंधुसहितं धर्याणां परमभक्तितिपरीक्षाकृज्यतेसज्जनानां
दिष्टसमनिबंधेषु स्वार्थं यदि भवति विदन्धैस्तत्र वश्यं विमृश्यं ७
श्रीमत्पदवाक्यप्रमाणपारावारपारीणश्रीमद्रामेश्वरभट्टसूरिसून
यणभट्टतनूजसकलविद्वन्मुकुटहीराकर श्रीरामकृष्णभट्टात्मज वि
महानुज कमलाकरभट्टकृते निर्णयसिंधौ तृतीयः परिच्छेदः